
अथाग्नेयमहापुराण प्रारभ्यते ।

S/C
294.5925
P985AK

5317.

Gl.w.080594.


ASIATIC SOCIETY
CAL
LIBRARY


सूत:
शौनकादि
श्रीव्यास
श्रीशुक
अत्रि
वसिष्ठ

अद्य सानन्दं निवेदयामो विद्वज्जनानामग्रतः । इह खलु जगति त्रिवर्गसाधनपुरःसरं मोक्षसाधनमेव परमं पुरुषजन्मनः फलम् । तच्च विधिवदनुष्ठितनित्यनैमित्तिककाम्यकर्मानुष्ठानजन्यविविधसुखोदर्कफलानुभवशालिभिर्ब्राह्मणक्षत्रियवैश्यशूद्रैस्तादितरैश्च निष्प्रतिबन्धानुशासनश्रुत्यर्थतात्पर्यप्रकाशकपुराणार्थपरिज्ञानपूर्वकमेव भवितुमर्हति नान्यथोपायसहस्रेणापि । इदमेव मनसिकृत्य परमदयालुना भगवता बादरायणेन वेदव्यासमहर्षिणा ब्राह्मादीन्यष्टादश महापुराणानि निरमीयन्त । अथ तेष्वपि पुराणेषु त्वैहिकामुष्मिकानेकविधनिःश्रेयससंपादनपरायणाश्चानेकविधधर्माः पूर्वजर्षिराजर्षिवर्यवंशाः शेषशायिनः श्रीविष्णोर्मत्स्याद्यनेकावतारा अन्येऽपि लोककल्याणकुशलाः प्रागल्भ्यगर्भा विषयाः सर्वत्र पृथक्पृथक्तयैव दरीदृश्यन्ते । परंचात्र आग्नेये महापुराणे तु, सकललोकानुग्रहाय श्रीमद्भगवद्वंशविहितावतारश्रीमद्वेदव्यासवदनाम्भोरुहविनिःसृतानेकविधौषधीमन्त्रतन्त्रक्रियाकर्मधारणाध्यानधर्मशास्त्रज्योतिः शास्त्रदानव्रताभिषेकयुद्धऋषिराजर्षिवंशवर्णनव्याकरणकाव्यालंकारादयोऽपरे च कर्मकाण्डकुशलानामन्येषामप्यतीवोपयोगिनः—धर्मशास्त्रम्, सर्वदेवादिपूजा, सर्वदेवतानां प्रतिष्ठा, नानापूजाविधिः, पञ्चाङ्गरुद्रः, आशौचनिर्णयः, प्रायश्चित्तानि, व्रतानि, दानानि, वर्णाश्रमधर्माः, नानाविधव्यवहाराः, लक्षकोटिहोमादयः, नवग्रहहोमादिः, देवालयगृहादिवास्तुविधिः । शिल्पकारादीनामुपयोगिनः—जीर्णोद्धारः, शिल्पशास्त्रम्, गृहशिल्पम्, देवालयादिशिल्पम्, नृपाम्मात्यादीनामुपयोगिनः—राजधर्माः, राजाभिषेकः, राजनीतिः, युद्धरचना, युद्धरचनाभेदाः, धनुर्वेदः, नानाविधास्त्राणि । पौराणिकानामैतिहासिकानां च परमोपयोगिनः—पुराणानि, सृष्टिक्रमः, वेदवेदाङ्गविभागः, सूर्यचन्द्रवंशौ, भारतसारः, रामायणसारः, ईश्वरावतारः, सर्वतिथिवारनक्षत्रादिव्रतानि । ज्योतिर्विदामुपयोगिनश्च—ज्योतिःशास्त्रम्, सामुद्रिकप्रकरणम्, स्त्रीपुरुषलक्षणानि । मान्त्रिकाणां तज्जिज्ञासूनां त्वतीवोपयोगिनः,—मन्त्रशास्त्रम्, त्वरिताविद्या, षट्प्रयोगाः, मृतसञ्जीविन्यादिप्रयोगादिः, मन्त्ररूपौषधानि, अघोराद्यस्त्राणि, शालग्रामादिलक्षणानि, स्तम्भनादिमन्त्राः, मन्त्रपरिभाषेत्यादयोऽपरेपि च । रसिकगायकादीनां परमोपयोगिनः—गन्धर्ववेदः, भरतशास्त्रम्, काव्यभेदाः, नाटकभेदाः, अलंकारभेदाः, नवरसनिरूपणम्, स्त्रीपरीक्षा । वैद्यानां तु परमोज्ज्वलयशःसंपादनशीलाः—वैद्यकशास्त्रम्, सिद्धौषधानि, मन्त्ररूपौषधानि, सर्पलक्षणानि, सर्पदंशादिचिकित्सा, सर्वरोगहराण्यौषधानि, वृक्षायुर्वेदः, गवायुर्वेदः, गजाश्वचिकित्सा, तच्छान्तिकराण्यौषधानि, रसादिलक्षणम्, रत्नादिपरीक्षा । वैयाकरणानामुपयोगिनः—कौमारव्याकरणम्, कोशाः, रूपावलिः । अन्येपि, ऋग्यजुःसामाथर्ववेदविधानम्, छन्दःशास्त्रम्, योगशास्त्रम्, वेदान्तशास्त्रम् इत्यादयोऽसंख्यतराः

विषयाः संमीलिताः समुल्लसन्तितराम् । लोकदयश्रेयःपरंपरापारवारिधिरयं ग्रन्थः पूर्वं काचिकाचिटस्तोकेनसमुल्लसित एवासीदार्मिकसज्जनानां श्रीसंपन्नानामेव केवलं सरस्वतीभाण्डागारेषु किंतु ततो न सर्वैरेव लोकैः श्रवणकीर्तनपूर्वकं त्रिदशानामपि दुर्लभस्यास्य ग्रन्थस्य तारतम्यमलम्भि । अत एवास्मदीयदेशाभ्युदयार्थं सकलजनानां निश्रेयसार्थं विपश्चितामभन्दानन्दसंदोहसंवर्द्धनार्थं महता द्रव्यव्ययेन महता परिश्रमेण चायं ग्रन्थोऽस्मदीय " श्रीवेङ्कटेश्वर " (स्टीम्) मुद्रणयन्त्रालये मुद्रयित्वा स्वल्पेनैव मूल्येन करतलामलकवत्कृतः । अत एव प्रार्थनापुरःसरं निवेदयामो. विदुषामन्तिके यन्मुहुर्मुहुरलभ्यमिमं लाभं संभावयंतु विपश्चितः किं बहुनोक्तेनेति. शम् । . श्रीरस्तु ।

भवदीयशुभांकांक्षी–क्षेमराज श्रीकृष्णदास, " श्रीवेङ्कटेश्वर " (स्टीम्) मुद्रणालयाध्यक्षः–मुंबई.

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास,
लक्ष्मीवेंकटेश्वर छापाखाना,
कल्याण–मंबई

क्षेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर छापाखाना
खेतवाडी–मुंबई.

अथाग्नेयमहापुराणस्थविषयानुक्रमणिका।

अध्यायाः।	विषयाः।
१	मंगलाचरणम् । ऋषीणां सूतं प्रति प्रश्नः शुकादीनां व्यासं प्रति प्रश्नः अग्निवसिष्ठसंवादः विद्यासारजिज्ञासोर्वसिष्ठस्याग्निं प्रति प्रश्नः वसिष्ठं प्रति अग्निना विष्णुप्रभाववर्णनम्।
२	मत्स्याद्यवतारहेतुवर्णनम् । वैवस्वतमनोर्मत्स्यमूर्तिसाक्षात्कारः मत्स्यमूर्तिना हयग्रीवदैत्यवधः ।
३	देवानां दूर्वाससः शापः देवानां समुद्रमन्थनाय विष्णोराज्ञा क्षीराब्धिमन्थनं समुद्राद्विषोत्पादुर्भावः शंकरस्य तद्विषपानं तदा मन्दराचलस्य कूर्मरूपेण विष्णुना धारणम् । समुद्रान्मथिताद्दारुणीपारिजातादीनामुत्पत्तिः विष्णोर्लक्ष्मीपतित्वे हेतुः धन्वन्तर्यवतारः दैत्यैर्धन्वन्तरिहस्तादपहृतस्यामृतकलशस्यापहरणाय विष्णोर्मोहिनीरूपधारणम् मोहिन्या दैत्यवंचनाद्वारा सुरेभ्योऽमृतदानम्।चन्द्ररूपेणामृतं स्वीकर्तुं चन्द्रसूर्यमुखेनावगुप्तराहोर्विष्णुकृतं शिरःकर्तनम् । राहोर्विष्णुवरेण देवत्वप्राप्तिः राहुणा सूर्याचन्द्रमोभ्यां ग्रहणशापः ग्रहणे दानप्रशंसा पार्वतीं परित्यज्य मोहिनीमनुधावतः शंकरस्य वीर्यस्खलनम् अमृतार्थं युद्धयतां दैत्यानां देवकृतपराजयः एतदध्यायश्रवणप्रशंसा ।
४	पुरन्दरपदाकर्षणं देवमुखेन ज्ञात्वा वराहरूपेण विष्णुना कृतो हिरण्याक्षस्य वधः

अध्यायाः।	विषयाः।
	तथैव नृसिंहरूपेण विष्णुना कृतस्तद्भ्रातुर्हिरण्यकशिपोर्वधः त्रिपद्या भुवो याच्ञाद्वारा वामनरूपेण विष्णुना कृतो बलिनिग्रहः जमदग्नेः रेणुकायामवतीर्णेन परशुरामेण कार्तवीर्यार्जुनस्य वधः एतदाख्यानश्रवणप्रशंसा ।
५	श्रीमद्रामायणारम्भः-तत्रादौ बालकाण्डम्-वैवस्वते मनुवंशे रामावतारः तथा भरतलक्ष्मणशत्रुघ्नानामुत्पत्तिः यज्ञरक्षार्थं विश्वामित्रेण नीतयो रामलक्ष्मणयोर्मध्ये तदाश्रमे रामकृतः सुबाहोर्वधः तदाश्रमे सुदूरं बाणेन मारीचनयनं च पणीकृतशिवधनुर्भंगलब्धया सीतया रामस्य भरतादीनामपि माण्डव्यादिभिः सह मिथिलायां जनकगृहे विवाहः रामस्य जामदग्न्यजयः अयोध्यायामागमनं रामादीनाम् ।
६	अयोध्याकाण्डम्-रामाय यौवराज्यपदाभिषेकः कार्य इति विचारसमये मन्थरावोधितायै कैकेय्यै प्राग्दत्तवरद्वयं दत्तवतो दशरथस्याज्ञया सीतालक्ष्मणाभ्यां सह रामस्य वनगमनं चित्रकूटे रामकृतं सीतापराधिनः शरणागतस्य काकासुरस्य रक्षणं पुत्रशोकान्मम मरणमिति कौशल्यामुक्त्वा दशरथस्य शरीरत्यागः मातुलगृहाद्भरतागमनपर्यन्तं तैलद्रोण्यां तन्मृतशरीरनिधानम् । वसिष्ठाज्ञया भरतानयनमयोध्यायाम् भरते न कृतं दशरथाय सरयूतटे और्ध्वदेहिककृत्यं

वसिष्ठेन भरताय राज्यपरिपालनादेशः राज्याधिकारमनंगीकृत्य रामानयनाय भरद्वाजाश्रमे भरतस्य ससीतरामलक्ष्मणाभ्यां समागमे दशरथस्य परलोकगमनवर्णनं राज्याधिकारस्वीकृत्यर्थं रामस्य राज्यं प्रति प्रत्यावर्तने भरतप्रार्थना, तामनङ्गीकृत्य राज्यपालनाय रामदत्तपादुके गृहीत्वा नन्दिग्रामे भरतस्य स्थितिः ।

७ अरण्यकाण्डम्–अरण्ये रामकृतमत्रिशरभगांद्रिमहर्षीणां दर्शनम् । अगस्त्येन रामाय चापखड्गदानं दण्डकारण्ये पञ्चवट्यां रामरूपमोहेनागतायाः शूर्पणखाया लक्ष्मणकृतनासिकाकर्त्तनम् । तत्र रामकृतः खरदूषणत्रिशिरआदिराक्षसानां युद्धे संहारः स्वपुत्रवधेन खिन्नायाः भगिन्याः शूर्पणखाया उक्त्या तत्र सीतां वञ्चयितुं स्वर्णमृगरूपेण रावणानीतस्य मारीचस्य रामकृतो वधः रावणकृतं सीतापहरणं तदा मध्येपथं नियुध्यन्तं जटायुषं निपात्य रावणस्य लंकां प्रति सीतया सहागमनम् । सीतां तत्रादृष्ट्वा विलपतो रामस्य तदन्वेषणे जटायुषा उक्त्या रावणापहृतां ज्ञात्वा स्वर्गतं जटायुषं संस्कृत्य कबन्धासुरस्य रामकृतो वधः शापान्मुक्तस्य कबन्धस्य रामं प्रति स्वकार्यार्थं सुग्रीवसख्यकरणे विज्ञापना ।

८ किष्किन्धाकाण्डम्–रामः पम्पां गत्वा सुग्रीवेण संगत्य विश्वासार्थं सप्ततालांश्छित्त्वा दुन्दुभिकलेवरं पादांगुष्ठेन दूरतः क्षिप्त्वा च तच्छत्रुं वालिनं हत्वा तद्राज्ये सुग्रीवमभिषिषेच, रामस्य सुग्रीवकारणाय किष्किन्धायां लक्ष्मणप्रेषणं सुग्रीवेण कृतं वानरैः सह सीतान्वेषणाय हनुमतः प्रेषणम् । तदन्वेषणमार्गे संपातिदर्शनम् ।

९ सुन्दरकाण्डम्–संपात्युक्त्या लङ्कायां सीतास्थितिं ज्ञात्वा गत्वा च तत्राशोकवनिकायां तां दृष्ट्वा श्रीरामांगुलीयकं दत्त्वा हनुमतः सीतया रामार्थं दत्तचूडामणिरत्नाभिज्ञानग्रहणम् । उपवनभङ्गेन कुपितस्याक्षकुमारस्य हनने इन्द्रजिता नागपाशेन हनुमतो बन्धनम् । रावणभाषणोत्तरं कुपितेन हनुमता स्वलांगूलप्रक्षिप्तेनाग्निना लङ्कादहनम् श्रीरामाय चूडामणिरत्नाभिज्ञानार्पणं विभीषणस्य रामेण समागमे रामकृतलङ्काराज्याभिषेकः । समुद्रे सेतुं बद्ध्वा तेन रामस्य दक्षिणतीरस्थसुवेलाचलगमनम् ।

१० युद्धकाण्डम्–रावणं प्रति सन्ध्यर्थं दयया रामेण प्रेषितेनाङ्गदेन भाषणे जाते रावणस्य रामेण युद्धम् । रावणेन निद्रायाः प्रबोधितस्य कुम्भकर्णस्य रामेण युद्धे मरणं ततो रामेण रावणस्य युद्धे संहारः अमृतवर्षेण युद्धे मृतानां वानराणामेवोज्जीवनं विभीषणायाभिषिक्तराज्यदानम् अग्निप्रवेशपरिशुद्धया सीतादेव्या सह विमाने आरुह्यायोध्यानिकटे नन्दिग्रामे भरतेन सह सङ्गतिः भरतेन सहायोध्यायां गत्वा सर्वान्नत्वा वसिष्ठेन राज्येऽभिषिक्तेनसम्मान्यधर्मेण रामेण ॥ कृताश्वमेधेन राज्यस्य परिपालनम् ।

११ उत्तरकाण्डम्–रामेणागस्त्यादिसमागमः वाल्मीक्याश्रमे सीतायां रामस्य कुशलवपुत्रोत्पत्तिः रामस्य वैकुण्ठे गमनं एतच्छ्रवणफलम् ।

१२ कृष्णावतारकथाहरिवंशयोर्वर्णने कृष्णबलरामयोरुत्पत्तिः कृष्णस्य वसुदेवेन गोकुलप्रापणम् । कृष्णेन यमलार्जुनमोक्षणं शकटासुरपूतनावधस्य च वर्णनम् । कालियमर्दनं गोवर्द्धनोद्धारः अक्रूरस्य रामकृष्णाभ्यां समागमः [redacted] कृष्णस्य मालाकाराय वरदानं कृष्णेन कुब्जादेहस्य

ऋक्षकरणं कुवलयापीडाख्यगजस्य संहारः रामकृष्णाभ्यां चाणूरमुष्टिकयोर्मल्लयुद्धे संहारः कंसस्य कृष्णेन कृतो वधः उग्रसेनेन कृष्णात्कंसराज्यलाभः कृष्णेन जरासन्धपौण्ड्रवासुदेवयोर्वधः कृष्णो द्वारकां गत्वा नरकासुरं संहत्य तदीयषोडशसहस्रकन्याः परिजग्राह कृष्णः सन्दीपनगुरवे मृतपुत्रानानीय ददौ कृष्णेन कालयवनस्य वधः रुक्मिण्यां प्रद्युम्नोत्पत्तिः प्रद्युम्नादनिरुद्धोत्पत्तिः बाणकन्ययोषया स्वप्ने दृष्टोऽनिरुद्धश्चित्रलेखया द्वारकाया आहृतः शोणितपुरे तया संगतः । अनिरुद्धस्य बाणासुरेण सह युद्धं कृष्णस्य स्वभक्तरक्षणार्थमागतेन शङ्करेण युद्धं बाणासुरस्य सहस्रभुजानां छेदः शिवोक्तेन कृष्णेन बाणासुरेऽनुग्रहः उषासहितस्यानिरुद्धस्य कृष्णादिभिः सह द्वारकायामागमनं बलरामेण हस्तिनापुराकर्षणम् कृष्णस्य रुक्मिण्यादिषु बहुपुत्रोत्पत्तिः हरिवंशकीर्तनफलम् ।

१३ महाभारतम्—अत्रेः सोमस्योत्पत्तिः सोमाद्बुधादीनामुत्पत्तिः अम्बिकाम्बालिकयोर्विचित्रवीर्य्यसाद्धृतराष्ट्रपाण्डोरुत्पत्तिः गान्धार्या धृतराष्ट्राद्दुर्योधनादीनामुत्पत्तिः पाण्डवानामुत्पत्तिः पाण्डवैर्दुर्योधनादीनां वैरम् । पाण्डवानां द्रौपदीलाभः स्वयंवरे अर्जुनोक्तया खाण्डवदाहः युधिष्ठिरस्य राजसूययागः पाण्डवानां दुर्योधनादिभिर्द्यूतम् द्यूते पराजितानां पाण्डवानां वनवासः पाण्डवान्हेतुं युद्धाय दुर्योधनादीनां यत्नः ।

१४ पुनर्महाभारतम्—कुरुपाण्डवयोर्युद्धम् अर्जुनाय भगवता गीतोपदेशः शिखण्डिना भीष्मस्य पातनं धृष्टद्युम्नस्य द्रोणाचार्यवधः अर्जुनेन युद्धे कर्णस्य वधः भीमेन दुर्योधनस्य वधः पाण्डवपुत्राणामश्वत्थामकृतः संहारः अश्वत्थामात्कृष्णस्योत्तरागर्भस्थपरीक्षिद्रक्षणं युधिष्ठिरेण मृतानामुदकदानं युधिष्ठिराय भीष्मेणापद्राजमोक्षधर्माणामुपदेशः युधिष्ठिरेण परिक्षितो राज्याभिषेकः ।

१५ पाण्डवानां स्वर्गारोहणम्—गान्धारीधृतराष्ट्रयोर्वनवासः मुसलेन यादवकुलनाशः व्याधैः कृष्णदाराणां हरणं पाण्डवानां महापथे गमनं स्वर्गे पाण्डवानां भगवद्दर्शनम् । महाभारतश्रवणफलम् ।

१६ बौद्धावतारः कलियुगांते जातिसङ्करवेदादिवर्णनं दैत्यान्वञ्चयितुं कल्क्यवतारवर्णनम् । विष्णोरवतारकथाश्रवणफलम् ।

१७ सृष्टिः-महत्तत्त्वस्य उत्पत्तिः तस्मादहङ्कारस्य तस्माद्वैकारिकादीनां पञ्चमहाभूतानाञ्च ब्रह्मणस्तस्मान्मरीच्यादिमानसपुत्राणामुत्पत्तिः ।

१८ स्वायम्भुवमनुवंशवर्णनम्—स्वायम्भुवात्प्रियव्रतोत्तानपादयोरुत्पत्तिः उत्तानपादात्सुरुचिसुनीत्योरुत्तमध्रुवयोरुत्पत्तिः ध्रुवचरितं ध्रुवाद्वृद्धयादिपुत्राणामुत्पत्तिः पृथुचक्रवर्त्याख्यानम् पृथोर्वंसुन्धरादोहनं दक्षोत्पत्तिः एकादशरुद्राणां कश्यपादुत्पत्तिः ।

१९ कश्यपवंशः-कश्यपाद्वादशादित्यानामुत्पत्तिः कश्यपाद्धिरण्यकशिपोरुत्पत्तिः प्रह्लादोत्पत्तिः हिरण्यकशिपोर्विरोचनादेरुत्पत्तिः दितिगर्भे इन्द्रेण सप्तधा छिन्ने एकोनपञ्चाशन्मरुदुत्पत्तिः पृथ्वादिभ्यो भगवत्कृतराज्यदानविभागः ।

२० जगत्सृष्टिः-ब्रह्मणो नवविधः सर्गः दक्षकन्याभिः भृग्वादीनां पतित्वेन वरणम् अनसूयायामत्रेः सोमादीनामुत्पत्तिः षष्टिसहस्रवालखिल्यानामुत्पत्तिः अधर्मादिंसायामनृतादिपुत्राणामुत्पत्तिः ।

अध्यायाः	विषयाः
२१	विष्ण्वादिदेवतानां सामान्यपूजा नवग्रहपूजा सरस्वतीपूजा तिलाज्यादिभिर्होमः देवतानां मन्त्राः पूजार्थं सामान्यं स्नानम् ।
२२	क्रियाङ्गमृत्तिकादिस्नानविधिः—अघमर्षणस्नानम् स्नानाङ्गतर्पणं तत्र देवताः पूजागृहप्रवेशः ततस्तन्मूलमन्त्रेण स्नानं तत्तत्पूजीपाम् ।
२३	योगेन कायशोधनं योगेन न्यासादयः विष्णोर्द्वारस्थालपूजा विष्णोरावाहनादिपूजा नवव्यूहार्चनम् ।
२४	कुण्डनिर्माणम् अग्निकार्यं अर्धचन्द्रचतुरस्रवर्तुलाकारकुण्डविधिः होमप्रकारः अग्निसंस्कारः शिष्याय गुरूपदेशविधिः ।
२५	वासुदेवादिमन्त्राः जीवस्वरूपम् ।
२६	मुद्रालक्षणानि अञ्जलि—वन्दन—वराहमुद्राः ।
२७	दीक्षादानविधिः ।
२८	राजादीनांमभिषेकविशेषविधिः ।
२९	मन्त्रसाधनार्थं सर्वतोभद्रादिमण्डलम् ।
३०	तत्र मण्डले देवताप्रतिष्ठाप्रकारः तन्मण्डलमनेकवर्णैः कार्यं मन्त्रसाधकस्य नियमः ।
३१	अपामार्जनस्तोत्रं सर्वरोगहरम् ।
३२	अष्टाचत्वारिंशत्संस्काराः निर्वाणदीक्षार्थम् ।
३३	देवतानां पवित्रारोपणं । सुपर्णादिभिस्तत्पवित्रं कार्यं पवित्रनिर्माणप्रकारः बलिदानपूर्वकं विष्णोः पूजाविधिः देहशुद्ध्यर्थं विष्णोर्मानसोपचारपूजा आवरणदेवताअर्चना ।

अध्यायाः	विषयाः ।
३४	मण्डलं विलिख्य द्वारपूजा कार्या ग्रहणे पञ्चवक्ष्यमन्त्राः कुंभे देवतां प्रतिष्ठाप्य पूजा कार्या होमप्रकारः ।
३५	पवित्राधिवासविधिः ।
३६	विष्णुपवित्रारोपणविधिः पवित्रे समर्प्य विष्णुपूजा कार्या ब्राह्मणाय पवित्रं दयं पवित्रधारणप्रशंसा ।
३७	पवित्रारोपणप्रकारः सर्वदेवेषु समानः ।
३८	देवालयादिनिर्माणस्य फलं देवालयार्थं यद्वनं न भवति तद्वयर्थं मृद्दिर्दारुभिरिष्टकाभिः शिलाभिर्हेमभिर्वा देवालयनिर्माणे उत्तरोत्तरफलं श्रेष्ठम् एतद्विषये स्वदूतान्प्रति यमस्योक्तिः ।
३९	हयग्रीवादिपञ्चविंशतितन्त्रनामानि प्रतिष्ठाकर्तृषु वर्ज्यावर्ज्यौ स्थापनीयदेवतानां नगराद्यपेक्षया स्थानादिशोर्विभागः भूपरिग्रहविधिः करांगुलादिपरिभाषा ।
४०	वास्तुपुरुषस्वरूपम्- तस्य परिमाणम् तस्य पूजनार्घ्यबलिदानादिविधिः ।
४१	मण्डपविधिः—कुण्डचतुष्टयनिर्माणप्रकारः इष्टकान्यासक्रमः इष्टकापरिमाणम् शिलान्यासप्रकारः देवागारनिर्माणप्रशस्तिः ।
४२	प्रासादलक्षणम् ।
४३	प्रासाददेवताप्रतिष्ठा—भूतशान्त्यादिनिरूपणम् ।
४४	वासुदेवादिप्रतिमालक्षणम् प्रतिमासु अङ्गानां प्रमाणम् ।
४५	पिण्डिकादिलक्षणम्— ५३ तमे ध्यायेऽपि वक्ष्यते ।
४६	शालिग्रामेषु मूर्तिलक्षणानि ।
४७	शालिग्रामादिपूजाप्रकारः ।

४८ केशवादिचतुर्विंशतिमूर्तिस्तोत्रम् ।
४९ दशावतारप्रतिमालक्षणम् ।
५० चण्डयादिप्रतिमालक्षणम् तत्र विंशतिभुजचण्डीस्वरूपम् दशभुजचण्डीस्वरूपम् नवदुर्गास्वरूपम् अष्टादशभुजादिदेवतानां स्वरूपाणि ।
५१ नवग्रहदेवतादीनां प्रतिमालक्षणम् अनन्ततक्षकादिलक्षणम् इन्द्राद्यष्टदिक्पाललक्षणम् विश्वकर्मलक्षणम् हनूमल्ल० किन्नरल० विद्याधरल० पिशाचल० वेतालल० क्षेत्रपाललक्षणम् ।
५२ चतुष्षष्टियोगिनीप्रतिमालक्षणम् भैरवल० वीरभद्रल० गौरील० ५० तमेऽध्यायेप्युक्तम् ललितालं० चण्डिकालक्षणम् ।
५३ लिङ्गादिलक्षणं ४५ अध्यायेप्युक्तम् ।
५४ लवण–घृत–वस्त्र–अपक्वमृल्लिङ्ग–पक्वमृल्लिङ्ग–दारव–शैलज–मुक्ता–लोह–सुवर्ण–रानततास्र–पैत्तल–रत्न–रसरत्नगर्भादिलिङ्गमानादिकम् ।
५५ प्रतिमानां पिण्डिकालक्षणम्–सर्वदेवानां विष्णूक्तं मानम् । सर्वदेवीनां लक्ष्म्युक्तं मानम् ।
५६ दशदिक्पालयागः ।
५७ कलशाधिवासविधिः ।
५८ देवतास्नपनविधिः देवतापूजनप्रकारः ।
५९ अधिवासनविधिः (हेरः सान्निध्यकरणम्) न्यासविधिः लोकपालानां सपर्या होमविधिः बलिदानविधिः ।
६० सामान्यप्रतिष्ठाविधिर्वासुदेवादीनाम् अष्टदिक्षु लक्षान्तसंस्थाप्यं होमविधिः शिबिकारूढस्य हरेः नगरे भ्रमणम् ।
६१ अवभृथस्नानविधिः द्वारप्रतिष्ठाविधिः प्रासादप्रतिष्ठाविधिः ध्वजारोपणादिविधिः ध्वजदण्डपरिमाणम् ध्वजप्रतिष्ठाफलम् ।
६२ देवीप्रतिष्ठाविधिः लक्ष्मीपूजनमाचार्यपूजनं च श्रीसूक्तेन ।
६३ गरुडमुदर्शनब्रह्मनृसिंहप्रतिष्ठाविधिः पुस्तकलेखनविधिः पुस्तकप्रतिष्ठाविधिः पुस्तकदानमाहात्म्यम् ।
६४ कूप–वापी–तडाग–प्रतिष्ठाविधिः तडागादौ यूपप्रतिष्ठाविधिः जलदानप्राशस्त्यम् ।
६५ सभाप्रतिष्ठा सभासन्निवेशक्रमः सभाप्रवेशः ।
६६ देवतासामान्यप्रतिष्ठा–आरामनिर्माणप्राशस्त्यम् मठदानप्रशंसा प्रपादानप्रशंसा ।
६७ गृहे जीर्णदेवस्य परित्यागविधिः गृहे देवस्य जीर्णोद्धारविधिः जीर्णकूप-वापी-तडागोद्धारप्रशंसा ।
६८ उत्सवो देवप्रतिष्ठायां कार्य एव अंकुरार्पणम् तीर्थस्नानार्थं देवस्य यात्रा स्नानं मन्त्रैः ।
६९ साङ्गतीर्थस्नानविधिः ।
७० पादपप्रतिष्ठाविधिः आरामप्रतिष्ठाप्रशंसा सूर्येशगणेशशक्तिहरिप्रतिष्ठा ।
७१ गणपतिपूजाविधिः (प्रतिष्ठाङ्गभूतीयम्) ।
७२ स्नानविधिः (प्र०) अस्त्रसन्ध्या (प्र०) सन्धाचतुष्टयी (प्र०) निशीथे ज्ञानिनः सन्ध्याघमर्षणम् । (प्र०) तर्पणम् ।
७३ सूर्यपूजाविधिः (प्र०) चण्डाय सूर्यनिर्माल्यार्पणम् ।

अध्यायाः ।	विषयाः ।
७४	शिवपूजाविधिः ।
७५	शिवपूजाङ्गहोमविधिः ।
७६	पूजाहोमादिकानां समर्पणादिकं चण्डेशपूजानिर्माल्यापनयनादिकम् ।
७७	कपिलापूजनम् विद्यापुस्तकगुरुनमनम् स्नात्वा शिवायाष्टपुष्पिकापूजा शिवाय नैवेद्यं किंचित्समर्प्य वैश्वदेवबलिहरणं ।
७८	शिवपवित्राधिवासनविधिर्नैमित्तिकपूजारूपः तत्र कालः युगभेदेन भिन्नभिन्नपवित्रापवित्रपूजाविधिः पवित्रमानम शिवाय तत्समगुणिताङ्गपूजनपूर्वं पवित्रावतरणम् उत्तरपूजाहोमगुरुपूजादि ।
७९	ततो द्वितीयदिनेदेवीपूजनाद्यङ्गशिवपूजाहोमादिकम् गुरुपूजाहोमादिकम् ।
८०	शिवे दमनकारोहणविधिः दमनोत्पत्तौ कारणम् तत्र कालः शिवाय पूजयित्वा दमनकारोपणम् गुरुपूजादिकम् ।
८१	समयदीक्षाविधिः दीक्षापदार्थः अनुग्राह्यशिष्यविधिः दीक्षा द्विविधा साधारा निराधारा च साधारा चतुर्विधा तेषां लक्षणानि निराधारा द्विविधा दीक्षाविधिः शिवपूजाहोमजपन्यासादिभिः तत्र होमद्रव्यभेदेन फलभेदः उद्देशभेदेन होमसंख्यातारतम्यं तर्पणं गले कटकबन्धनावरोपणादिकं समयदीक्षादीक्षितस्येव भषार्चनेऽधिकार इति तत्फलम् ।
८२	संस्कारदीक्षाविधिः—शिवयोः पूजाहोमः होमार्थकाग्निलक्षणम् । शिशोः गर्भाधानपुंसवनसीमन्तजातबोधनसमरसोभावादिकम् । शिववाह्निपूजादिकं गुरोः कृत्यम् शिवे समर्पणम् वर्षदानम् व्रताङ्गानि होमादिकं संस्कारदीक्षा [illegible] शिशोः ।

अध्यायाः ।	विषयाः ।
८३	निर्वाणदीक्षायां दीक्षाधिवासनविधिः—दीपदानादिकं सूत्रेण शिष्यदेहबन्धनप्रकारः कालानां ग्रहणबन्धनादिकं चण्डेशलोकपालपूजा गुरुयागशालायां प्रवेशः शिष्याणां स्नपनम् ।
८४	निर्वाणदीक्षायां निवृत्तिकलाशोधनविधिः सुस्वप्नदुःस्वप्नौ शिवपूजातर्पणपूजनानि वह्नौ होमपूर्णाहुत्यन्तः तर्पणं अष्टोत्तरशतभुवनानि तत्र दक्षवरुणाः दुःस्वप्न शान्त्यादिकं निवृत्तिकला शोधनं प्रायश्चित्तम् ।
८५	निर्वाणदीक्षायां प्रतिष्ठाकलासंशोधनविधिः तत्त्वयोः सन्धानम् तत्र षष्टिभुवनादिकम् कलासंशोधनं विष्णुपूजादिकं मुमुक्षुदीक्षणम् ।
८६	निर्वाणदीक्षायां विद्यासंशोधनविधिः सप्ततत्त्वानि एकविंशतिपदानि रुद्रभुवनयोः स्वरूपम् विद्यातत्त्वविशोधनं प्रायश्चित्तम् ।
८७	निर्वाणदीक्षायां विद्यासन्धानाय शान्त्या संशोधनाविधिः—कलानां कुण्डे निवेशनं मुमुक्षुदीक्षणे विज्ञापनं शान्तिसंशोधनादिकम् ।
८८	निर्वाणदीक्षायां ताडनाद्याकर्षणादिकं शिष्टविधिसंधानकरणं भुवनाष्टकासेदिः तत्त्वसञ्चयसन्धानं शान्त्यतीताख्यताडनादिकं वह्निप्रतिष्ठाहोमादिकं निवृत्तिवत्सदाशिवावाहनादिकं शिष्योत्पादनादिकं गर्भाधानादिकं प्राग्वत् शिवविसर्जनादिकं शिष्यशेखायां चतुरंगुलस्य च्छेदः शिष्यस्य स्नपनादिकं पुनः कुम्भस्नानान्तं दीक्षाशेषसमापनम् ।
८९	एकतत्त्वदीक्षाविधिः ।
९०	साङ्गदीक्षाभिषेकादिविधिः । अष्टसामरादिकं निवेद्य शिवादींश्च पूज्य शिष्यं त्रपयेत् वस्त्रादिकं दत्त्वा शिष्याय स्वशिष्योपदेशादिविषये आज्ञाप्रदानादि कृत्यम् ।

९१ अभिषिक्तेन शिष्येण कर्तव्यशिवादिपूजाविशेषविधिः ।
९२ देवप्रतिष्ठाविधिः प्रतिष्ठा पञ्चधा प्रतिष्ठापदार्थः स्थापनपदार्थः स्थितस्थापनपदार्थः उत्थापनपदार्थः आस्थापनपदार्थः आस्थापनं द्विधा भूपरीक्षणं पञ्चधा उत्तममूलक्षणम् भूशोधनम् मण्डपे द्वारपूजादिकं शिववास्तुपूजनम् कुदालादिसेचनरक्षःपूजाबलिदानानि कुदालकादि पूजयेत् । भूखननप्रकारः भूपरिग्रहः सशल्यभूपरीक्षणम् भुवि लोहभस्मास्थीष्टकाकपालशवकीटरजतादिज्ञानं भस्मीकरणं तोरणद्वारपालपूजादिकम् । आत्मशुद्धिमण्डपादिसंस्कारकलशपूजादिकम् अग्निपूजादिकं शिलानां धर्मादिनाम शिलेष्टकायोर्निर्णयः शिलेष्टकापरिमाणादिकं शिलातत्तत्कुम्भाः शिलापूजाहोमादिकृत्यम् ।
९३ वास्तुपूजाविधिः—वास्तुस्वरूपं तत्पूजाविस्तरेण विशेषत उक्ता गृहे नगरे च वास्तुविशेषः नगरग्रामखेटादौ वास्तुविशेषः ततोऽपि देशसंस्थापने वास्तुविशेषः गृहप्रसादमानेन वास्तुकल्पना कार्यैव ।
९४ शिलान्यासविधिः—चरक्यादिकं संपूज्य हुत्वा बलिं दत्त्वा शिलासु देवतान्यासः पूर्णानन्दादिशिलाप्रतिष्ठादिकम् ।
९५ लिङ्गादिप्रतिष्ठायां मासर्क्षवारग्रहयोगादयः मण्डपादिमानादिं प्रतिष्ठासामग्र्यादिकं औषधीगणः सप्तलोहानि अष्टधातवः अष्टौ व्रीहयः ।
९६ साङ्गशिवप्रतिष्ठाङ्गाधिवासनादिद्रव्यभेदेन मूर्तौ लक्ष्मनिर्माणक्रमः शिष्टाधिवासप्रयोगक्रमादि ।
९७ शिवप्रतिष्ठाविध्यादि अन्यदेवप्रतिष्ठापनादि ।
९८ गौरीप्रतिष्ठादि ।
९९ सूर्यप्रतिष्ठादि ।
१०० द्वारप्रतिष्ठादिकम् ।
१०१ प्रासादप्रतिष्ठादिकम् ।
१०२ ध्वजारोपणविध्यादिकम् ध्वजभेदाः तन्मानानि ध्वजारोपणप्रयोगादिकम् ।
१०३ जीर्णलिङ्गोद्धारविधिः तत्र हेतवः तत्प्रयोगः जीर्णगृहप्रतिष्ठाप्येवमेव ।
१०४ प्रासादलक्षणम्—तत्र स्थाप्याः देवताः प्रथमादिप्रासादनामभेदाः नवपुष्पकोद्भवाः नवकैलासोद्भववृत्ताः नवमणिकोद्भवाः नवत्रिविष्टपजाः नगराणां संज्ञाः तत्र मानानि चूलादीनां प्रतिहारद्वयकल्पनं स्तम्भवृक्षकूपक्षेत्रप्रासादगृहशालामार्गसभावर्णोलूखलशिलावेधेषु दोषाः तद्वेधदोषपरिहारोपायाः ।
१०५ नगरग्रामदुर्गादौ गृहप्रासादवृद्धये वास्तुपूजासाधनविशेषः नाड्यास्यभेदाः तत्र वास्तुपूजाक्रमादिः तत्र कुड्यादिमानानि न्यूनाधिक्ये दोषः दिग्भेदेन द्वारफलानि ।
१०६ नगरवास्तुविध्यादिकम् तत्र क्रमः तत्तज्जातिलोकवस्त्वादिभेदेन दिक्स्थानसन्निवेशव्यवस्था देवालयाश्चात्र कार्याः गृहे कल्पनीयस्थानविशेषेषु दिग्व्यवस्था शालाभेदाः अलिन्दभेदाः ।
१०७ पृथ्वीद्वीपतत्स्वामिपर्वतभेदादिवर्णनं नाम ह्यायंभुवः सर्गः ।
१०८ महामेरुवर्णनं—(भुवनकोशवर्णनं) ।
१०९ तीर्थमाहात्म्यं—तीर्थयात्राफलं न सर्वस्य तीर्थे कर्तव्यकृत्यानि दानादि च पुष्करादितीर्थानि तन्माहात्म्यं च ।
११० गङ्गामाहात्म्यं तत्रास्थिक्षेपे फलम् ।

अध्यायाः ।	विषयीः ।
१११	प्रयागमाहात्म्यम् ।
११२	काशीमाहात्म्यम् ।
११३	नर्मदामाहात्म्यम् ।
११४	गयामाहात्म्यम् धर्मव्रतायाः देवमयशिलात्वे हेतुः गदासुरास्थिनिर्मितगदायुधधरो गदाधर इत्यस्य वर्णनं गयाब्राह्मणानां शापः ।
११५	गयायात्राक्रमविध्यादिकम् ।
११६	,, ,,
११७	गयादौ श्राद्धपद्धतिः ।
११८	भारतवर्षस्थद्वीपनद्यादिवर्णनम् ।
११९	जम्बूद्वीपादिमहाद्वीपवर्णनं भुवनकोशवर्णनम् ।
१२०	पृथ्वीविस्तारोच्छ्रायादिमानं खगोलवर्णनं नवग्रहाणां रथाश्वादिसंख्यादिकम् ।
१२१	ज्योतिश्शास्त्रम् ।
१२२	कालगणनम् ।
१२३	युद्धजयार्णवीयनानायोगाभिधानम् । स्वरोदयशनिकूर्मराहुचक्रव्यूहप्रशंसा । विजयप्रदौषधीनां धारणं । वश्यकृदौषधीस्नानतिलकादिकम् ।
१२४	युद्धजयार्णवीयज्योतिःशास्त्रसारः । चराचरज्ञानवर्णनम् । ओंकारनिर्देशः ।
१२५	युद्धजयार्णवीयनानाचक्राणि । मारणमोहनपातनोच्चाटनमन्त्राः करालीरेवतीभीषणीप्राणहरादीनां यजनचक्राणि । तिथियोगाः शत्रुस्तम्भनमन्त्रः शस्त्रस्तंभनमारणप्रयोगः ।
१२६	नक्षत्रनिर्णयः । विद्याराज्याभिषेकादिकर्मसु समुचितनक्षत्रविवेचनम् ।

अध्यायाः ।	विषयाः ।
१२७	नानाबलानि । उच्चाधःस्थानिस्थग्रहादीनां फलं राशीनां चराचरतया शुभाशुभफलनिदर्शनम् ।
१२८	कोटचक्रं । तच्चक्रस्थराशिनक्षत्रग्रहाणां सदसत्फलप्रशंसा ।
१२९	अर्घकाण्डम् ।
१३०	मण्डलादिकथनं । वायव्यादिमण्डलप्रभावतः पृथक्पृथग्देशानां सुखासुखकथनम् ।
१३१	घातचक्रादिजयचक्रादिवर्णनम् ।
१३२	सेवाचक्रं ताराचक्रादि ।
१३३	नानाबलानि सूर्यादिग्रहदशासमुत्पन्नानां सदसद्गुणः फलं च शत्रुपलायनकृद्भैरवमन्त्रः परसैन्यभङ्गप्रयोगः तार्क्ष्यचक्रं शत्रुकृद्वितीयभैरवमन्त्रः भङ्गविद्या सर्वकामार्थसाधनीविद्या मृत्युञ्जयकथनम् ।
१३४	त्रैलोक्यविजयविद्या होमादिविधानम् ।
१३५	संग्रामविजयविद्या । सर्वकामसाधिका रणजयदायिनी जयाख्याविद्या नक्षत्रचक्रम् ।
१३६	यात्रादौ शुभफलप्रदत्रिनाडीचक्रं महामारीविद्या ।
१३७	विपक्षपक्षक्षपणाय शवपटे देवतास्वरूपोल्लेखप्रकारः अजासृक्संयुक्तनिम्बसमिद्धोमान्मारणं शत्रूणां शत्रूच्चाटनञ्च षट्कर्माणि ।
१३८	उच्चाटनकृत्पल्लवः । योगरोधकसंपुटविदर्भादिसंप्रदायाः कुलोत्सादनस्तम्भनवश्याकर्षणाद्यभीष्टकरः परस्यात्मनश्च वार्ताज्ञानकरः यमपूजनसहितो होमः दुर्गापूज

अध्यायाः।	विषयाः।
१३९	षष्टिः संवत्सराः प्रभवविभवशुक्लादिसंवत्सराणां शुभाशुभफलम्।
१४०	वश्यादियोगाः। भृंगराजाद्यौषधीनां तिलकांजनधूपादिभिर्जगन्मोहनस्त्रीवश्यप्रकारः स्त्रीवशंकरीशस्त्रादिस्तम्भनकारिणी गुटिका।
१४१	षट्त्रिंशत्पदकज्ञानम्। ब्रह्मरुद्रादिसेवितामरीकरणौषधीनां वर्णनं नानारोगहरौषधयः मृतसञ्जीवनीयोगः।
१४२	मन्त्रौषधादि गर्भगतजन्तोः पृथक्प्रश्ने अरयवलक्षणादिकथनं ग्रहज्वरभूतादिनिवारकवज्रशृङ्खलामहामन्त्रकथनम्।
१४३	कुब्जिकापूजाविधिः ब्रह्माण्यादिदेवीनामावाहनपुरःसरं कुब्जिकापूजाविधानम्।
१४४	कुब्जिकपूजा सर्वकार्यसिद्धिदाः नानाविधाः कुब्जिकामन्त्रा मालिनीमन्त्राः।
१४५	शैवशाक्तादीनां पृथक्पृथङ्न्यासवर्णनम् आष्टाष्टकदेव्यः।
१४६	त्रिखण्ड्यादिदेवतानां नानामन्त्राः।
१४७	त्वरितापूजादिसर्वोपद्रवादिहरगुह्यकुब्जिकादिदेवतापूजा।
१४८	संग्रामविजयपूजा–दीप्तामोघाविद्युतादिदेवतापूजनम्।
१४९	लक्षकोटिहोमः–होमाद्राज्यप्राप्त्यादिफलं सकलशुन्ध्वादिप्रणाशनलक्षकोटयादिहोमफलम्। होमप्रशस्तौषधयः।
१५०	मन्वन्तराणि–स्वायंभुवमनोश्चामीध्रादिपुत्राणामुत्पत्तिः तत्र तत्र सप्तर्ष्यादिदेवानामुत्पत्तिवर्णनम्।
१५१	वर्णेतरधर्माः ब्राह्मणादिवर्णानामाचाराः चण्डालादीनामुत्पत्तिः तेषां जीविकावर्णनम्।

अध्यायाः।	विषयाः।
१५२	गृहस्थवृत्तिः गृहस्थानां धर्माः।
१५३	ब्रह्मचर्याद्याश्रमधर्माः गर्भाधानादिकालः सीमन्तोन्नयनसमयः जातकर्मादिकथनम् ब्राह्मणादीनामुपनयनम् ब्रह्मचारिधर्माः।
१५४	विवाहः–द्विजस्य ब्राह्मण्यादिचतुर्वर्णभार्याग्रहणेधिकारः क्षत्रियस्य क्षत्रियाद्यास्तिस्रो भार्याः वैश्यस्य द्वे शूद्रस्य तज्जातीया एका भार्येति विवाहभेदः शचीपूजोद्वाहे विवाहे निषिद्धः कालः। शुभकालश्च विवाहे ग्रहानुकूल्यम्।
१५५	आचारः नित्यनैमित्तिकः षोढा स्नानविधानं मन्त्रस्नानम्। पुरुषसामान्यधर्माः।
१५६	द्रव्यशुद्धिः मृण्मयादीनां शुद्धिः। यज्ञभाजनानां परिमार्जनाच्छुद्धिः। गृहादीनां शुद्धिश्च।
१५७	शावाशौचादि–जननमरणे सपिण्डानां दशाहाच्छुद्धिः। क्षत्रियवैश्यशूद्राणां क्रमाच्छुद्ध्यादि। प्रेतमुद्दिश्य श्राद्धादिकं शूद्रस्यामन्त्रकर्मकथनं नानाशस्त्रैरात्मघातिनां पतितानां वा मरणे सपिण्डेष्वाशौचाभावनिरूपणं ब्राह्मणशूद्रयो रन्योन्यं शवनिर्हरणे दोषाः अनाथद्विजशवनिर्हरणात्स्वर्गलोकप्राप्तिः शवनिर्हरणविधिः अज्ञातदन्तादीनामनग्निसंस्कारः।
१५८	शावाद्यशौचं ब्राह्मणादिनामस्थिचयनादिकालः सपिण्डादीनां मृताशौचम् आत्मघातिनामन्यतमःप्राप्तिः मृतस्य दशाहकर्म मृते पितरि पुत्रादीनां धर्माः पुत्रजन्मदिने कर्तव्यश्राद्धकथनम् आशौचसंपातनिर्णयः।
१५९	गङ्गायामस्थिप्रक्षेपणान्मृतस्य मुक्तिः आत्मघातिनां पतितानामुदकक्रियानिषेधः। एतस्मान्नारायणबलिप्रतिपादनम्।

अध्यायाः ।	विषयाः ।
१६०	वानप्रस्थाश्रमवनवासिनां धर्माः ।
१६१	प्राजापत्येष्ट्वात्मन्यग्निमारोप्य निलयान्निर्गच्छेदित्यादि । यतिग्राह्यपात्राणां निरूपणं पञ्चसंस्कारभिक्षुकवृत्तिवर्णनमहिंसाजनकदोषनिवृत्त्यर्थं प्राणायामादिकथनम् । कुटीचकादिभिन्नत्वेन भिक्षुवृत्तिश्चतुर्विधेतिवर्णनं प्रसंगाद्यमनियमवर्णनं सगर्भाभिन्नत्वेन प्राणायामस्य प्रकारद्वयकथनं पूरककुम्भकरेचकेतिभेदेन भूयस्त्वेन्त्रिविधिनिरूपणं यतिविधेयध्यानादीनां कथनम् ।
१६२	धर्मशास्त्रनिरूपणम् । प्रवृत्तिनिवृत्ताभिन्नत्वेन कर्मणः प्रकारद्वयकथनं श्रावण्यां स्वाध्यायानामुपाकर्मविधिवर्णनं सप्तत्रिंशदनध्यायानां निरूपणम् ।
१६३	श्राद्धकल्पवर्णनम् । ब्राह्मणभोजनादिनिरूपणम् । दैवपित्र्ययोः क्रमाद्युग्माद्युग्मसंख्याकविप्राणामुपवेशनादिनिरूपणं विश्वेदेवासइत्यादिमन्त्रैर्विप्रार्चनविधिकथनम् । पिण्डदानक्रियाकथनम् । वृद्धिश्राद्धनिरूपणम् । एकोद्दिष्टश्राद्धविधिकथनम् । सपिण्डीकरणविधिः संवत्सरसोदककुम्भदानादेः निरूपणं मासिकादिश्राद्धानां विधेयत्वेन कथनम् । श्राद्धदस्य स्वर्गाद्याप्तिफलस्य कथनम् ।
१६४	नवग्रहहोमः ताम्रकलशादिधातुभिः ग्रहमूर्तीनां कर्तव्यत्वेन कथनम् ॥ आकृष्णेनेत्यादिभिर्मन्त्रैरर्कादिसमिद्धिहोमविधिकथनम् ॥ धेन्वादीनां दक्षिणासहितदानादिनिरूपणम् ।
१६५	नानाधर्माः ॥ ध्यायिने श्राद्धादिकं देयमितिनिरूपणम् । गजच्छायायां श्राद्धादिदाने पितॄणामक्षयातुष्टिरितिकथनम् ॥ योगविधिकथनम् ॥ असवर्णासगर्भिण्याः स्त्रिया दोषत्वनिरूपणम् ॥ गर्भनिर्गमनाद्रजसा नार्याः शुचित्वेन कथनम् ॥ ध्यानेन पापकर्तॄणां शुद्धिः ॥ नैष्ठिकधर्मतत्परस्य व्रताद्यच्यवने प्रायश्चित्तहानेर्निरूपणम् ॥ ये भार्य्यायाः प्रथमं प्रव्रजितास्तद्गोत्रसन्ततेः विदुरनाम अन्त्यजसंज्ञावर्णनम् ॥ योगस्य महत्त्वेन कथनम् ॥
१६६	वर्णधर्मनिरूपणम् ॥ अष्टचत्वारिंशद्भिः संस्कारैः युक्तस्य ब्रह्मवर्चसप्राप्तिकथनम् गर्भाधानादिसंस्कारवर्णनम् ॥ दयादिगुणाष्टकवर्णनम् । प्रवासादौ मौनविधिकथनम् ॥ उदकादिभिः पंक्तिदोषाभावादिनिरूपणम् ॥ अयुतलक्षकोटिहोमवर्णनम् ॥ ग्रहप्रतिष्ठापनादिरीतिकथनम् । अभिषेकमन्त्रनिरूपणम्॥ उपयमनोत्सवयज्ञादिषु ग्रहयज्ञस्यावश्यकतानिरूपणम् ॥ कुण्डप्रमाणविधिः ॥ अभिचारकर्मसु त्रिकोणकुण्डस्य विधिः अभिचारकर्मवर्णनम् ॥ पिष्टरूपस्य शत्रोः क्षुरेण च्छेदनादिविधिः ॥
१६७	महापातकादिकथनम् । मत्तकुपितायत्रान्नदाननिषेधः ॥ पण्यद्रव्यविक्रयदाननिषेधः ॥ अभिशप्तान्नत्रिषेधवर्णनं ॥ वृषलनिमन्त्रितविप्रान्नं न भोज्यमिति निरूपणम् ॥ एषामन्नाशने प्रायश्चित्तवर्णनम् ॥ अन्त्यजश्वपचान्नाशने चान्द्रायणप्रभृतिवर्णनम् । मृतपक्षिनखकूपोदकपानोल्लंघनवर्णनम् ॥ शूकरसासभोष्ट्रादीनां मूत्रशकृद्दशने चान्द्रायणनिरूपणं गोमनुष्यकुक्कुरादीनां पलाशने तप्तकृच्छ्रादिप्रायश्चित्तवर्णनम् । ब्रह्महिंसादिमहादोषवर्णनम् ॥ ब्रह्महिंसासमानदोषकथनम् ॥ उपपातकवर्णनम् ज्ञात्युत्पातकरादिनिरूपणम् ॥
१६८	प्रायश्चित्तानि ॥ ब्रह्महिंसाप्रायश्चित्तवर्णनं ॥ गोहिंसादिप्रायश्चित्तवर्णनम् ॥ अवकीर्णिनश्चान्द्रायणादिविधिः ॥ मद्यपानप्रायश्चित्तवर्णनं ॥ कनकतस्करप्रायश्चित्तं ॥ गुरुशय्याशयने प्रायश्चित्तं ज्ञातिपतितानां प्रायश्चित्तानि ॥

अध्यायाः ।	विषयाः ।
	मार्जारादिहत्यायां प्रायश्चित्तं स्वल्पसारद्रव्याहरणे प्रायश्चित्तम् ॥ भक्ष्यभोज्यादिस्तेये प्रायश्चित्तम् अभोग्यस्त्रीभोगे प्रायश्चित्तम् ॥
१६९	प्रायश्चित्तानि ॥ पातकिसंसर्गे प्रायश्चित्तवर्णनम् ॥ पतितस्य जलदानादिनिरूपणम् ॥ अग्राह्यप्रतिग्रहप्रायश्चित्तम् श्वशृगालादिदंशने प्रायश्चित्तम् ॥ अविज्ञात-अन्यजादिसदने स्थितेरनु सम्प्रज्ञातान्त्यजादिकस्य प्रायश्चित्तवर्णनम् । म्लेच्छैः प्राप्तानां प्रायश्चित्तवर्णनम् ॥ अन्योदक्यया स्पृष्टाया उदक्यायाः प्रायश्चित्तवर्णनम् ॥ पदत्राणस्पृष्टश्वादीनां प्रायश्चित्तादिवर्णनम् ॥
१७०	प्रायश्चित्तानि ॥ रहस्यादिप्रायश्चित्तवर्णनम् । सकृत्कृच्छ्रेषु मुण्डनादिप्रकारः ॥ वीरासनलक्षणकथनम् । यतिचान्द्रायणलक्षणकथनम् । बालकचान्द्रायणदेवचान्द्रायणलक्षणकथनम् । तप्तकृच्छ्रलक्षणकथनम् ॥ कृच्छ्रातिकृच्छ्रलक्षणकथनम् । कृच्छ्रसांतपनलक्षणम् ॥ महासान्तपनलक्षणम् ॥ अतिसान्तपनलक्षणम् ॥ तप्तकृच्छ्रादिवर्णनम् ॥ ब्रह्मकूर्चलक्षणम् ॥
१७१	सर्वपापप्रायश्चित्तानि ॥ हरेः पापप्रणाशनस्तोत्रवर्णनम् ।
१७२	प्रतिपाद्यविषयाः ॥ प्रायश्चित्तम् ॥ ब्रह्मघातस्वरूपकथनम् ॥ ब्रह्महत्यादीनां प्रायश्चित्तानि ॥ यष्टिकादिभिर्गोताडने सान्तपनादिवर्णनम् ॥ रेतोविण्मूत्राशनस्य प्रायश्चित्तम् ॥ नरहरणादिदोषाणां प्रायश्चित्तानि ।
१७३	प्रायश्चित्तानि ॥ सुराश्रमार्चनादीनां नष्टे प्रायश्चित्तानि ॥ अघनाशनायान्नदानादिकथनम् ॥ गङ्गादीनां पापप्रणाशकत्वेन वर्णनम् ॥ अवापनोदकानां वाराणस्यादिक्षेत्राणां वर्णनम् ॥
१७४	व्रतपरिभाषा ॥ व्रतनिषेधद्रव्यवर्णनम् । असकृदुदकपानादिभिर्व्रतभङ्गः ॥

अध्यायाः ।	विषयाः ।
	सर्वव्रतसाधारणधर्मकथनम् ॥ व्रतग्राह्यपदार्थकथनम् ॥ व्रते कूष्माण्डादीनां निषेधकत्वेन वर्णनम् ॥ प्रसङ्गात्याजापत्यातिकृच्छ्रसांतपनमहासान्तपनपराकचान्द्रायणानां लक्षणम् ॥ ब्रह्मकूर्चलक्षणवर्णनम् ॥ अधिमासेऽग्न्याधेयादीनां निषेधकत्वेन निरूपणम् ॥ चान्द्रमासादीनां कथनम् ॥ अपरमाक्षिकश्राद्धस्य विधेयत्वेन वर्णनम् ॥ गर्भिणीसूतिकारजस्वलादीनां यद्यशुद्धिस्तदा व्रतादीन्यन्येन कुर्यादितिवर्णनम् ॥ कुपितादिना व्रते नष्टप्रायश्चित्तम् । व्रतसंसिद्धये विष्णोः स्तुत्यादिकथनम् ॥ केशवार्चनं पुनः ॥ व्रताङ्गविप्रभोजनादिकथनम् ॥
१७५	प्रतिपद्व्रतानि ॥ पञ्चदश्यामुपवासपूर्वकं प्रतिपदि ब्रह्मपूजनविधिः ॥ सलक्षणहैमब्रह्मार्चनम् ॥ शक्त्या ब्रह्मणे पयःप्रदानवर्णनम् । व्रतजनकफलवर्णनम् ॥ मार्गशीर्षप्रतिपदि शिखिव्रतम् ॥
१७६	द्वितीयाव्रतानि ॥ द्वितीयायामश्विनीकुमारार्चनम् ॥ ऊर्जशुक्लपक्षे द्वितीयायां यमपूजनम् ॥ नभसि कृष्णपक्षे द्वितीयायामशून्यशयनव्रतस्य विधेयत्वेन वर्णनम् ॥ अशून्यशयनव्रतप्रकारकथनम् ॥ ऊर्जशुक्लपक्षे कान्तिव्रतम् ॥ तद्व्रतविधानं च । पौषशुक्लद्वितीयायां विष्णुव्रतम् ॥ तद्व्रतविधानकथनं च ॥
१७७	तृतीयाव्रतानि ॥ चैत्रशुक्लतृतीयायां मूलगौरीव्रतम् ॥ तद्व्रतविधिकथनञ्च ॥ शुक्लपक्षे नभस्यवैशाखमार्गशीर्षेष्वप्येतद्व्रतविधिः ॥ फाल्गुनादितृतीयायां सौभाग्यव्रतादिनिरूपणम् ॥
१७८	चतुर्थीव्रतानि ॥ माघशुक्लचतुर्थ्यां विनायकव्रतम् ॥ तन्मन्त्रवर्णनम् ॥ विनायकार्चनाविधिश्च ।

अध्यायाः ।	विषयाः ।
	भाद्रपदे चतुर्थीव्रतम् ॥ अङ्गारकचतुर्थीव्रतवर्णनञ्च ॥
१७९	पञ्चमीव्रतानि ॥ श्रावणादिमासे सिते पक्षे पञ्चम्यां वासुक्यादीनामर्चनम् । ।
१८०	षष्ठीव्रतानि ॥ कार्तिकादौ षष्ठीव्रतविधिः ॥ भाद्रपदे स्कन्दषष्ठीव्रतम् ॥ मार्गशीर्षे कृष्णषष्ठीव्रतञ्च ॥
१८१	षष्ठीव्रतानि ॥ ऊर्जभृतौ षष्ठीव्रतविधिः ॥ भाद्रपदे स्कन्दषष्ठीव्रतम् मार्गशीर्षे कृष्णषष्ठीव्रतम् ।
१८२	सप्तमीव्रतानि ॥ माघादौ सिते सूर्यार्चनम् ।
१८३	अष्टमीव्रतानि ॥ कृष्णाष्टमीव्रतम् ॥ रोहिणीयुक्ताय चन्द्रमसेऽर्घ्यदानकथनम् । व्रतपूजानिरूपणम् व्रतमहिमकथनम् ॥
१८४	अष्टमीव्रतानि ॥ चैत्रकृष्णाष्टम्यां कृष्णाष्टमीव्रतम् मार्गशीर्षकृष्णाष्टम्यां व्रतम् ॥ पौषमासादौ शम्भुव्रतम् तद्विधिश्च । बुधाष्टमीव्रतम् । बुधाष्टमीकथा । पुनर्वसावशोकरसपानविधिश्च ।
१८५	नवमीव्रतानि ॥ आश्विनसिते पक्षे नवमीव्रतम् ॥ रुद्रचण्डादिदेवानामर्चनम् ॥ आयुधार्चनम् ॥ पशुकर्मविधिः ॥ तच्छोणितेन भूतनादिदेवतानां संतर्पणम् ॥ तत्पुरतः पिष्टमयारिपोर्हननम् । तद्भवनकथनम् ॥ जयन्त्यादीनुद्दिश्य बलिदानम् ॥
१८६	दशमीव्रतम् ॥
१८७	एकादशीव्रतम् ॥ एकादश्यां विष्णुपूजादिकथनम् ॥
१८८	द्वादशीव्रतानि ॥ चैत्रशुक्लद्वादश्यां मन्मथद्वादशीव्रतम् ॥ माघशुक्लद्वादश्यां वृकोदरद्वादशीव्रतम् ॥ फाल्गुनशुक्लद्वादश्यां गोविंदद्वादशीव्रतम् । आश्विनशुक्लद्वादश्यां विशोकद्वादशीव्रतम् मार्गशीर्षद्वादश्यां मधुसूदनं संपूज्य लवणदानम् । प्रोष्ठपदे गोवत्सद्वादशीव्रतम् । श्रवणयुक्तद्वादश्यां तिलद्वादशीव्रतम् । फाल्गुने सिते पक्षे मनोरथद्वादशीव्रतम् केशवादिनामभिर्नामद्वादशीव्रतम् । भाद्रपदे शुक्ले अनन्तद्वादशीव्रतम् । पौषशुक्लद्वादश्यां संप्राप्तिद्वादशीव्रतम् ।
१८९	श्रावणद्वादशीव्रतं । भाद्रपदशुक्लद्वादश्यां श्रवणद्वादशीव्रतम् । वामनद्वादशीव्रतम् । तत्पूजाविधि ।
१९०	अखण्डद्वादशीव्रतं मार्गशीर्षशुक्लद्वादश्यामखण्डद्वादशीव्रतं द्वादशब्राह्मणाभ्यर्थ्यन्यूनपात्रदानम् । मध्वादिमासेष्वपि सकुपात्रादिदानम् ॥
१९१	त्रयोदशीव्रतानि । मार्गशीर्षशुक्लत्रयोदश्यामनङ्गत्रयोदशीव्रतं पौषादिमासेषु योगेश्वरादिपूजनम् । आश्विनेऽमराधीशपूजनम् । कार्तिके विश्वेश्वरपूजनम् । वर्षान्ते शिवस्य हिरण्यमयप्रतिमादानम् ।
१९२	चतुर्दशीव्रतानि कार्तिके शुक्लचतुर्दश्यां महेश्वरपूजा शुक्लासितपक्षयोश्चतुर्दश्यष्टम्योः शिवपूजाविधिः । अनन्तचतुर्दशीव्रतं । शालिपिष्टस्यापूपनिर्माणादिकम् ।
१९३	शिवरात्रिव्रतम् । माघकृष्णचतुर्दश्यां शिवरात्रिव्रतम् ।
१९४	अशोकपूर्णिमादिव्रतं फाल्गुन्यामशोकपूर्णिमाव्रतं कार्तिक्यां वृषोत्सर्गादिवृषव्रतं माघपूर्णिमायां पद्मनार्चनं । ज्यष्ठपञ्चदश्यां सावित्रीपूजनम् । तद्व्रतविधिः ।

अध्यायाः ।	विषयाः ।
१९५	वारव्रतानि हस्तर्क्षे सूर्यवारव्रतम् । नक्ते नान्दिव्रतं चित्राभे सोमवारव्रतं । स्वात्यां भौमव्रतं । विशाखायां बुधव्रतम् । अनुराधायां गुरुवारव्रतं ज्येष्ठायां शुक्रवारव्रतं मूले शनैश्चरव्रतम् ।
१९६	नक्षत्रव्रतादि । मूलादौ विष्णुपादादिपूजनं । कार्तिके कृत्तिकायां केशवाद्याह्वाभिः पद्मनाभपूजनं । कार्तिकादिमासचतुष्टयेव्रतदानकर्तव्यता । फाल्गुनादिमासचतुष्टये कृशरदानम् । आषाढादौ पायसदानं । नक्षत्रव्रतम् अनंतव्रतकथनं । मासचतुष्टयपर्यंतमनन्तनिमित्तं होमविधिराज्येन चैत्रादौ शालिना होमादेः कर्तव्यता ।
१९७	दिवसव्रतानि । धेनुपयःकल्पवृक्षव्रतम् । त्रिरात्रव्रतमहिमा कार्तिकशुक्लदशम्यां शिखिवाहनव्रतं । चैत्रे त्रिरात्रादिव्रतम् ।
१९८	मासव्रतानि आषाढादिमासचतुष्टयव्रतं वैशाखव्रतम् । माघे चैत्रे च गुडधेनुदानम् । मार्गशीर्षादिमासेषु नक्तव्रतम् । मांसादित्यागाद्विप्रत्वादिप्राप्तिः आश्विने कौमुदव्रतं कौमुदव्रतफलम् ।
१९९	वर्षाकालइन्धनादिव्रतं सन्ध्यायां मौनव्रतम् । तिलघण्टावस्त्रदानादिव्रतानि संक्रांतिव्रतम् उमाव्रतादिकम् ।
२००	दीपदानव्रतं दीपदानमाहात्म्यम् । दीपदानेन विदर्भराजदुहितुर्ललितायाः राजपत्नीत्वप्राप्तिः ।
२०१	नवव्यूहार्चनं । वासुदेवादिबीजानां पृथग्दिक्ष्वावाहनं । तेषामर्चनम् ।
२०२	पुष्पाध्यायकथनम् । नानाविधविष्णुपूजनम् । देवयोग्यान्ययोग्यानि वा पृथक्सुमानि । तेन सदसल्लोकप्राप्तिः । पुष्पप्रशंसा ।

अध्यायाः ।	विषयाः ।
२०३	अथ नरकस्वरूपम् । गोघात्यादिदुष्टजन्तूनां महावीचिताम्रकुम्भादिनरकेषु क्षेपणं । महापापिनां नानाविधप्रहरणैर्हननम् ।
२०४	मासोपवासव्रतम् । तत्र वृथालापादिदूरीकरणम् । द्विजपूजनम् । तेभ्यो दानानि ।
२०५	भीष्मषष्ठकव्रतम् । तत्रदेवपितृर्पणम् ।
२०६	अगस्त्यार्घ्यदानकथनम् । साध्यागस्त्यस्तवनम् ।
२०७	अथकौमुद्व्रतम् ।
२०८	व्रतदानादिसमुच्चयः । ग्रहणादौ व्रतफलम् ।
२०९	दानपरिभाषाकथनम् । वापीकूपादिनिर्माणतः मोक्षप्राप्तिवर्णनम् । अग्निहोत्रवेदादिपरिपालनान्मुक्तिकथनम् । गंगादितीर्थेषु दानप्रकारः । पृथग्वर्णाचार्यब्राह्मणेभ्यो दत्तदानफलं । नानाविधेषु द्रव्येषु विष्ण्वादिदेवस्वरूपनिरूपणं । कृतादियुगेषु दानविधानम्
२१०	महादानानि तुलापुरुषादिषोडशदानानि गुडघृतादीनि तन्नानाविधानि दानानि । तद्विधिः । तत्फलम् ।
२११	नानादानानि–गोसहस्रदानतः सौवर्णप्रासादादिस्थगन्धर्वैः स्तूयमानत्वकथनम् ॥ गृहभटसभादीनां नानाविधानि दानानि तत्फलञ्च । गजाश्वादिदानम् अन्नदानमहिमा ।
२१२	मेरुदानानि नानाविधान्नदानानि भिन्नभिन्नधातुविहितमेरुदानं रत्नमेरुदानं च ।
२१३	पृथिवीदानादि पृथिव्याः पृथग्दानादि ।
२१४	मन्त्रमाहात्म्यकथनं दशनाडीवर्णनं तत्स्थानानि प्राणानां निरूपणम् तत्कार्य

अध्यायाः ।	विषयाः ।
	पृथगवयवेषु ब्रह्मादिदेवानां स्थापनं ह्रस्वदीर्घादिप्रासादधारणफलम् ।
२१५	सन्ध्याविधिः आकारमहिमावर्णनं गायत्रीप्रशंसा तस्या अयुतलक्षादिजपात्तिसिद्धिकथनम् ।
२१६	गायत्रीनिर्वाणं संध्यांते गायत्रीजपः भूरादिव्याहृतिवर्णनम् ।
२१७	पुनः गायत्रीनिर्वाणंष्कनकादिलिङ्गरूपिमहादेवस्य स्तुतिः । वसिष्ठवरप्रदानम् ।
२१८	राजाभिषेकवर्णनं क्षत्रियादीनां रूप्यादिकुंभाभिषेचनम् ।
२१९	अभिषेकमन्त्राः ब्रह्माद्यभिषेकमंत्राः आदित्याद्यभिषेकमंत्राः स्वायंभुवादिमनूनम्माभिषेकमंत्राः ।
२२०	सहायसम्पत्तिः राज्ञा करणीयसेनापतिसजातिलक्षणं सभासदलक्षणं धर्मसंग्रामादिकार्येषु नियोज्याः पुरुषाः दुष्टादुष्टाश्रयणं भृत्यानां परीक्षा शुभाशुभज्ञानम् ।
२२१	अनुजीविवृत्तं भृत्यकृत्यम् ।
२२२	दुर्गसम्पत्तिः नृपकृत्यं धनुरादिदुर्गनिर्माणं पुररचना राजरक्षा गोब्राह्मणप्रतिपालनादीनि राजकृत्यानि ।
२२३	राजधर्माः ग्रामाधिपतिकृत्यं प्रजारक्षणप्रकारः दण्डयादण्डयत्वादिराजकृत्यानि ।
२२४	राजधर्माः । अत्यनासक्तित्वेन स्त्रीसेवाशरीरारोग्यकराणि कार्याणि सेव्यासेव्यस्त्रीलक्षणकथनं कपित्थादिकर्माष्टकम् अनंगवर्द्धनो धूपः स्नानद्रव्यकथनं कन्दर्पवर्द्धनस्नानं नानाविधौषधीवर्णनम् ।

अध्यायाः	विषयाः ।
२२५	राजधर्माः । सर्वाधिकारेषु योजनीयपुरुषः नृपेण त्याज्यानि कर्माणि । मित्रलक्षणं सप्ताङ्गं राज्यं नानाविधान्यन्यानि राजकृत्यानि ।
२२६	सामाद्युपायकथनं । सामवर्णनं दानफलं राज्ञो दंड्यादण्डयोरविचारित्वेन दोषप्राप्ति ।
२२७	दण्डप्रणयनम् । माषकर्षादीनां मानं सुवर्णादीनां स्तैन्ये पृथग्विधो दण्डः । ब्राह्मणक्षत्रियादीनां पृथग्दण्डः गोगजाश्वघातिनां दण्डश्चान्यदण्डयदण्डाः ।
२२८	युद्धयात्रा यात्रायै गम्यागम्यदिशः शरीरस्फुरणादीनि शकुनानि ।
२२९	स्वप्नः शुभाशुभः । दुःस्वप्नहरणकथनम् अंधन्यस्वप्नवर्णनं तच्छान्तिः शोभनानि स्वप्नानि ।
२३०	शकुनानि । प्रयाणकाले शुभाशुभशकुनानि विष्णुपूजयाऽमङ्गलनाशः श्वेतादिपुष्पाणां शुभत्वम् ।
२३१	शकुनानि । शकुनषट्प्रकाराः सदसत्फलप्रदानि शकुनानि गवोष्ट्रादीनां ग्रामवासित्वं भारद्वाजसारङ्गादीनां दिवाचरत्वम् उलूकशरभादीनां रात्रिचरत्वम् मृगमार्जारवृकादीनां ह्युभयचारित्वं तेषां पुरतः पृष्ठतः पार्श्वतो वा विनिर्गमेन शुभाशुभफलम्
२३२	शकुनानि । युद्धप्रयाणे पुरतः शुभाशुभफलापिशुनशकुनानि ।
२३३	यात्रामण्डलचिन्तादियात्रायां निषिद्धः कालः शोभनदिवसाः छायामानम् राज्यसप्ताङ्गमण्डलरचनावर्णनम् ।
२३४	षाड्गुण्यं दण्डदैविध्यं शत्रोरुद्वेजनम् इन्द्रजालकथनम् ।

अध्यायाः ।	विषयाः ।
२३५	राज्ञोदिनचर्या । अजस्रकर्मकथनं स्नानसन्ध्यादिपित्रर्चनादीनि प्रत्यहं करणीयानि कार्याणि राज्ञाम् ।
२३६	अनेकविषयाः राज्ञो यात्राः प्राक्सप्ताहपर्यन्तं पृथग्देवतानां पूजनं मोदकादिभिर्गणेशादिदेवपूजनम् राज्ञो विजयस्नानं । सप्तमेह्नि त्रिविक्रमपूजनं संग्रामगमनविधिः दशव्यूहप्रतिपादनं चमूनिवेशनादियुद्धधर्मः विजयप्राप्तौ गोदेवद्विजानां पूजनं रणान्मुक्तशत्रोः पुत्रवत्पालनम् ।
२३७	श्रीस्तोत्रम् इन्द्रकृतेन्दिरास्तुतिवर्णनं वरप्राप्तिः पाठकर्तृफलप्रशंसा ।
२३८	न्यायार्जनादिवृत्तचतुष्टयम् । विनयप्रशंसा सम्पत्तिहेतवः गुणाः कामक्रोधादिवर्जनम् आन्वीक्षिक्यादिनार्थविज्ञानप्रकारः वर्णिनां सामान्यो धर्मः राज्ञः त्यम् ।
२३९	पुनाराजधर्माः । राज्यसप्ताङ्गसाधुभूपगुणाः आत्मसंपद्गुणाः मित्रसंग्रहः भृत्यवृत्तं वर्गाष्टकपरिपालनादिकथनम् ।
२४०	पुनः षाड्गुण्यम् । द्वादशराजकमण्डलनिर्माणं संधिविग्रहादिवर्णनं बालवृद्धादिषु संध्यभावः सापत्न्यादिभेदेन वैरपञ्चवैध्यं । विग्रहावसरः यानस्य पञ्चविधत्वम् ।
२४१	साम्नादिपञ्चांगमन्त्रः कर्मसिद्धिलक्षणं त्रिविधो दूतः पञ्चविधं देवम् अमात्यकर्मव्यसननिगर्हणं सचिवव्यसनकथनं दुर्गव्यसनं कोशव्यसनं बालव्यसनं पञ्चविधदानविधिः शत्रूणां भयायेन्द्रजालादिनिर्माणकथनम् ।
२४२	राजनीतिसेनारचनादियुद्धधर्मः । सैन्यविभागेन व्यूहादिरचना । गोमूत्रिकादिव्यूहवर्णनं गोमूत्रिकादिव्यूहलक्षणम् ।

अध्यायाः ।	विषयाः ।
२४३	पुरुषलक्षणं सुलक्षण्यः पुरुषः त्रिविनतः पुरुषः ।
२४४	स्त्रीलक्षणं सुलक्षण्या स्त्री ।
२४५	भद्रासनलक्षणं चामरछत्रादिलक्षणम् । त्रैलोक्यमोहनमन्त्रैर्धनुःखड्गपूजनविधानं खड्गधनुर्लक्षणं खड्गास्यं मालोकयेदित्यादिधर्माः ।
२४६	रत्नपरीक्षा नृपधार्यरत्नानां निरूपणं वज्रधारणं वज्रलक्षणं मौक्तिकादिपरीक्षणम् इन्द्रनीलादिमणयः ।
२४७	वास्तुलक्षणम् । वास्तुकर्माणि समुचिता पृथिवी स्नातस्य परितो महेन्द्रादिदेवतावाहनम् ।
२४८	पुष्पादिपूजाफलम् ।
२४९	धनुर्वेदः । धनुर्वेदपञ्चविधत्वं मन्त्रमुक्तलक्षणं समपदस्थादीनां लक्षणानि बाणधारणप्रकारः ।
२५०	धनुर्वेदकथनम । धनुर्विद्याभ्यासः । वेध्यवर्तनविधानम् ।
२५१	धनुर्वेदकथनम । धनुर्विद्यामाश्रित्य वाहनारोहणादिविधानम् ।
२५२	धनुर्वेदकथनम । खड्गचर्मादिशस्त्रधारणम् भ्रान्तोद्भ्रान्तादिभेदेन नानाजातीयप्रकारवर्णनम् ।
२५३	नयानयादिविचारः । निक्षेपादिलक्षणं मूल्येन पण्यं विक्रीय यच्च क्रेत्रेण दीयते इत्यादिविद्यदपदवर्णनम् ।
२५४	व्यवहारकथनमृणप्रत्यर्पणादिविषयः ।
२५५	दिव्यप्रमाणकथनं साक्षिलक्षणादि कूटसाक्षिणः पातकादिकम् तद्दण्डप्रणयन-

अध्यायाः ।	विषयाः ।
	प्रकारः लेरूपकृतऋणदेयत्वम् सत्यपरीक्षणार्थं सप्तस्वश्वत्थपत्रेषु सूत्रैर्लौहमग्निमयः पिण्डधारणादिकथनम् ।
२५६	दायविभागकथनं पित्रोरूर्ध्वमृक्थमृणं पुत्राः समं विभजेयुरित्यादि । विद्ययाप्तद्रविणविभागः औरसादिपुत्रभेदः धनाधिकारिणः स्त्रीधनादिकम् स्त्रीधनाधिकारिणश्च दौर्बल्यादिदशायां भर्त्रागृहीतस्त्रीधनं तस्यै पुनर्दातुं नार्हतीतिकथनम् ।
२५७	सीमाविवादादिनिर्णयः मृषासीमाविवादे दण्डप्रणयनादिकं सत्यवातकारिणां महिष्यादीनां दण्डनीयत्वं किङ्कराणां वेतनादिकम् ।
२५८	वाक्पारुष्यादिप्रकरणं मिथ्याभिशब्दवाचिनां नानाविधदण्डप्रणयनादिकम् ।
२५९	ऋग्विधानम् गायत्रीजपादिविधिः अग्निमीळे पुरोहितमितिजपन्सकलाभीष्टकामानाप्नोतीत्यादिकम् ।
२६०	यजुर्विधानं होमाद्यनेकविधानुष्ठानविधानं तदनुष्ठानफलम् ।
२६१	सामविधानं यत इन्द्रभयामहे इत्यादि जपाद्धिंसादोषनिवारणफलकथनं सर्पसामप्रयुञ्जानस्य सर्पभयाभावबोधः पृथग्विधानुष्ठानविधिः तत्फलं च ।
२६२	अथ विधानं होमादिविधिः ।
२६३	उत्पातशान्तिः श्रीसूक्तजपेन श्रियाः प्राप्तिः अमृताभयादिशान्तीनां सर्वोत्पातनाशनत्वम् । उल्कापातादिशान्तिः अकालविकृतप्रसवादीनां शान्तिः आकाशतुमुलनादादीनां शान्तिकथनम् ।
२६४	देवपूजा वैश्वदेववलिविष्णुपूजनं होमनिरूपणं देवताभ्यः बलिदानादिकथनं पिण्डनिर्वपणविधानादि ।
२६५	दिक्पालादिस्नानं देवतालयादिषु स्नानात्पृथक्फलप्राप्तिवर्णनम् । पुनर्नवादिभिरुद्वर्तनपूर्वकस्नानावरणं मण्डले विष्ण्वादिदेवतापूजनपूर्वकहोमविधिः कुम्भे औषधीनिक्षेपणादिविधिकथनम् ।
२६६	विनायकस्नानं दुःस्वप्नदर्शनदोषादिनाशनाय स्नानविधिकथनं स्त्रीणामनपत्यादिदोषनाशकस्नानम् । होमादिविधिः ।
२६७	माहेश्वरस्नं नलक्षकोटिहोमादयः नृपाणां विजयपदमाहेश्वरस्नानम् । मन्त्रपूर्वकहोमविधिः शूलपाणिपूजनम् । घृतादिस्नानैरायुर्वृद्धिः । विष्णुपादोदकस्नानमहिमा । अवक्रन्दतिसूक्तेन करे मणिबन्धादिप्रकारः । घृतादिभिर्विष्णोः स्नानम् । धूपादिभिस्तत्पूजनं लक्षकोटिहोमप्रतिपादनम् ।
२६८	नीराजनविधिः जन्मनक्षत्रे राजपूजनम अगस्त्योदयेऽगस्त्यपूजनं चानुमौम्ये विष्णुपूजनम शयनोत्थापने पञ्चदिनोत्सवादिकरणीयत्वं नभस्ये सितपक्षे शक्रध्वजस्थापनपूर्वकं शचीपूजनं पद्मजादिस्तुतिः । भद्रकालीपूजनं नीराजनादिविधिः ।
२६९	छत्रादिप्रार्थनामन्त्राः ।
२७०	विष्णुपंजरं विष्णोश्चक्रगदाद्यायुधवर्णनं यक्षयातुधानादिनाशनविष्णुस्तुतिः ।
२७१	वेदशाखादिकथनम् ऋग्वेदादिमन्त्रप्रमाणं तच्छाखाभेदः समग्रपुराणेष्वाग्नेयश्रेष्ठत्वम् ।
२७२	पुराणदानादिमाहात्म्यं ब्राह्मादिपुराणश्लोकसंख्योक्तया दानप्रक्रमः ।
२७३	सूर्यवंशकीर्तनं ब्रह्मपुत्रमरीचेः कश्यपोत्पत्तिस्तत्पुत्रो विवस्वांस्ततः सूर्यवंशीयाः नृपाः ।
२७४	सोमवंशवर्णनम् । विष्णुनाभिपद्माद्ब्रह्मोत्पत्तिस्तत्पुत्रोऽत्रिस्तदात्मजसोमकृ-

अध्यायाः ।	विषयाः ।
	तराजसूयावभृथे सोमरूपदर्शनेन लक्ष्म्यादिनवदेवीनां मोहनत्वम् । गुरोर्बृहस्पतेर्भार्याहरणं सोमाङ्गिरःसुतयोर्युद्धं बृहस्पतेः पत्न्याः सोमपुत्रबुधोत्पत्तिः ततस्तद्वंशीयनृपवर्णनम् ।
२७५	यदुवंशवर्णनं यदोः सहस्रजिदादीनामुत्पत्तिः स्यमन्तकोपख्यानं पांडवानामुत्पत्तिः ।
२७६	द्वादशसंग्रामाः देवक्यां वासुदेवोत्पत्तिः समासतः कृष्णचरितवर्णनं नारसिंहादीनां द्वादशसंग्रामवर्णनम् ।
२७७	राजवंशवर्णनं तुर्वसोर्वर्गादीनामुत्पत्तिः ।
२७८	पुरुवंशवर्णनम् पूरोर्जनमेजयादीनामुत्पत्तिः शंतनोर्गंगायां भीष्मोत्पत्तिः ।
२७९	सिद्धौषधानि अधस्ताद्गते ज्वरे वमनमूर्ध्वगते विरेचनमिति ज्वरादिरोगनिवृत्तौ सिद्धौषधयः । वातव्याध्यादिग्रस्तानां तक्रारिष्टादेर्हितत्वम् ।
२८०	सर्वरोगहराण्यौषधानि शरीरस्थानसागन्तुकादिरोगाणां वर्णनं तेषां परिहाराय सूर्यवारादौ घृतगुडादिदानानि शिशिरादिकृत्यं धर्माः । रोगसमुद्भवनिदानं वातादिप्रकृतीनां लक्षणम् ।
२८१	रसादिलक्षणम् । कषायकल्पनादिकम् । कषाये द्रव्यपरिमाणम् । लेह्यचूर्णगुणाः । निदाघादावंगमर्दनादिविधानम् । अजीर्णे श्रमनिषिद्धत्वं व्यायामादितः कफनाशनादिगुणोत्पत्तिः ।
२८२	वृक्षायुर्वेदः । उत्तरादिदिक्षु प्लक्षादिवृक्षाणां शुभत्वं ब्राह्मणचन्द्रपूजनपूर्वकं वृक्षरोपणविधिः द्रुमरोपणे शस्यनक्षत्राणि अशोकादिवृक्षाणां धर्मान्ते सायमुष्णसेचनं शीतकाले सूर्योदयानन्तरमित्यादिवृक्षाणां फलपुष्पादिसमृद्धये विडंगघृतादिद्रव्यैः सेचनादिविधानम् ।

अध्यायाः ।	विषयाः ।
२८३	नानारोगहराण्यौषधानि सर्वेष्वतिसारेषु सिंहीसटीत्यादिविनिर्मितक्काथसेवनादिकम् बालरोगहराण्यौषधानि । गुदांकुरे तक्रादिपेयत्वकथनम् मूत्रकृच्छ्रादिनाशकक्काथादिनिरूपणम् ।
२८४	मन्त्ररूपौषधकथनम् ओंकारादिमन्त्रैरायुरारोग्यवर्द्धनादिवर्णनम् ।
२८५	मृतसञ्जीवनकरसिद्धयोगः मरुज्ज्वरादौ बिल्वादिपञ्चमूलस्य क्काथादिकम् । गण्डमालारितैलादिवर्णनम् । स्त्रीणां प्रदरादिनाशकौषधानि दिनैराख्यन्योर्हितकरगुटिकाञ्जनादिकथनम् ।
२८६	मृत्युञ्जयकल्पाः सकलव्याधिनाशनत्रिफलादेश्चूर्णकथनम् कुष्ठनाशनक्काथाः असितालककराणि तैलानि ।
२८७	गजचिकित्सा । गजलक्षणानि गजरोगहराण्यौषधानि । मदहीनमातङ्गस्य पयःपानादिविधानम् गजनेत्रयोश्चटकादिपुरीषाञ्जनम् ।
२८८	अश्ववाहनसारः । हयाद्यारोहणेऽश्विन्यादिनक्षत्राणां प्राशस्त्यम् । अश्ववदने ताडनानिषेधः अश्वपुषि ब्रह्मादिदेवतायोजनप्रकारः अश्वप्रार्थना अश्वारोहणावर्णनम् मक्षिकादिदंशनिवारणाय वालेयुप्रकारः गुणविशेषदर्शनेनाश्वेषु द्विजातित्वकथनम् ।
२८९	अश्वचिकित्सा । अश्वलक्षणानि अश्वातिसारादिनाशकक्काथादिकम् । दाडिमत्रिफलादिभिरश्वपोषकत्वम् अश्वशोथादिनाशकावलेपाः ।
२९०	अश्वशान्तिः । वाजिव्याधिनाशनशान्तिप्रयोगः ।
२९१	गजशान्तिः । मातङ्गव्याधिनाशनशान्तिप्रयोगः ।

अध्यायाः।	विषयाः।
२९२	गवायुर्वेदः। गोशकृदादिमाहात्म्यम् गोग्रासफलम् महासान्तपनतप्तकृच्छ्रादिव्रतवर्णनम् गोषु देवादिस्वरूपकथनम् धेनुरोगनाशनौषधयः।
२९३	मन्त्रपरिभाषा। मन्त्रभेदाः स्त्रीपुंनपुंसकत्वेन मन्त्रत्रैविध्यम्। ऋष्यादिमन्त्रलक्षणादिकं गुरुलक्षणम्। शिष्यलक्षणम्। कपटेन गृहीतमन्त्रवैयर्थ्यम्। मन्त्रजपविधानादिकथनम् सांगमन्त्राणां साफल्यम्।
२९४	नागलक्षणानि। शंखवासुकितक्षकादीनां प्राधान्यम् नानाविधसर्पजातयः प्रयाणे शुभशकुनादिवर्णनम्।
२९५	दष्टचिकित्सा विषद्वैविध्यम्। विषविनाशकताक्ष्यादिमन्त्राः।
२९६	पञ्चांगरुद्रविधानं विषव्याधिनाशकपञ्चांगमंत्रकथनम्। विषविनाशनकुब्जिकादिदेवतानां कथनम्।
२९७	विषहृन्मन्त्रौषधम् विषनाशनौषधकथनम्।
२९८	गोनासादिचिकित्सा सर्पादिविषघातकौषधानि मन्त्रपूर्वकौषधीसेवनम्।
२९९	बालादिग्रहहरबालतन्त्रम् बालपीडानिवर्तकधूपादिविधिः देवतामुद्दिश्य बलिदानादिविधानम्। बालग्रहहरमन्त्राः।
३००	ग्रहहृन्मन्त्रादिकथनं गुरुदेवादिकोपात्पंचोन्मादोत्पत्तिः। शून्यगृहादौ ग्रहाणां स्थितिरित्यादिकं ग्रहेभ्यो गर्भिण्यादीनां पीडासंप्राप्तिः। सूर्यादिग्रहपूजनविधिः। ग्रहापहाङ्गनादिकथनम्।
३०१	सूर्यार्चनम्। गणपतेर्मन्त्राः चतुर्थ्यन्तपूजनादिकं सूर्यादिग्रहाणां पूजनम्। सूर्यायार्घ्यदानं सूर्यादिपूजनात्संगरे जयप्राप्तिः।

अध्यायाः।	विषयाः।
३०२	नानामन्त्रौषधकथनं मन्त्रानुष्ठानं। भ्रष्टराज्यस्य पुनाराज्यप्राप्तिः। वशीकरणमन्त्राः वशीकरौषधयः मुखलेपबलेपाः गोरक्षणमन्त्रकथनम्।
३०३	अंगाक्षरार्चनं वासुदेवादिपूजाविधिः।
३०४	पंचाक्षरादिपूजामन्त्राः शिष्यदीक्षाविधिः अनन्तयोगपीठे तत्पुरुषादिमूर्तीनां स्थापनं पूजनं च। दीक्षायां शिष्यनामकरणादिकम्।
३०५	पंचपंचाशद्विष्णुनामानि।
३०६	नारसिंहादिमन्त्राः मन्त्रजपात्सर्वग्रहमारीविषामयानां विनाशः।
३०७	त्रैलोक्यमोहनमन्त्रः विष्णुपूजा तर्पणहोमादिविधानम्।
३०८	त्रैलोक्यमोहिनीलक्ष्म्यादिपूजा तस्या एव मन्त्राः।
३०९	त्वरितापूजा त्वरिताध्यानादिकम्।
३१०	त्वरितामन्त्रादि प्रणीतादिमुद्रालक्षणम्।
३११	त्वरितामूलमन्त्रादि पूजाजपहोमादिकम्।
३१२	त्वरिताविद्या विद्याप्रस्तावः मुखस्तम्भादिप्रयोगाः त्वरिताविद्याप्रशंसा।
३१३	नानामन्त्राः विनायकार्चनादिप्रयोगः शत्रुत्राटनविधिः गौरीमन्त्रानुष्ठानादिकम्।
३१४	त्वरिताज्ञानम् त्वरिताभूतनविधिः निग्रहानुग्रहचक्रलेखनादिविधानम्।
३१५	स्तम्भनादिमन्त्राः।
३१६	नानामन्त्राः कालदष्टजीवनादिमन्त्रनिरूपणम्।
३१७	सकलादिमन्त्रोद्धारः ब्रह्मपञ्चकम् प्रासादमन्त्रादिकथनम् पञ्चाङ्गसदाशिवकथनम् विद्येश्वरवर्णनम्।

अध्यायाः ।	विषयाः ।
३१८	गणपूजा शिवगायत्री द्वारोपद्वारनिर्मितविघ्ननाशनाख्यमण्डले गणपतिपूजनविधिः जपहोमादिविधानम् ।
३१९	वागीश्वरीपूजा समण्डलं वागीश्वरीपूजनम् । कपिलाज्येन होमविधानम् पूजनात्कवित्व
३२०	मण्डलानि । सर्वतोभद्रकादिमण्डलानि ।
३२१	अघोरास्त्रादिशान्तिकल्पः शिवाद्यस्त्रपूजनम् ग्रहपूजनादेकादशस्थानप्राप्तिः सर्वोत्पातविनाशिकास्त्रशान्तिकथनम् ।
३२२	पाशुपतशान्तिः ।
३२३	षडङ्गान्यघोरास्त्राणि वशीकरणादिमन्त्राणां विधिः शतावर्यादिचूर्णसेवनात्पुत्रलाभः महामृत्युञ्जयादिमन्त्राः ।
३२४	रुद्रशान्तिः रुद्रशान्तिफलम् ।
३२५	अंशकादिः । रुद्राक्षधारणं मन्त्रसिद्धैः सिद्धाङ्गंशकथनम् ।
३२६	गौर्यादिपूजा मन्त्रध्यानमण्डलमुद्रादिवर्णनं गौरीपूजाफलम् । मृत्युञ्जयार्चनम् । तत्फलम् ।
३२७	देवालयमाहात्म्यम् । यमलाजपविधिः शिवलिंगपूजाप्रशंसा वित्तानुसारतो देवालयादि निर्माणावश्यकत्वम् ।
३२८	छन्दःसारः ।
३२९	छन्दःसारः यजुर्गा षडर्णा गायत्र्यृचामष्टादशार्णेत्यादिगायत्रीभेदः । गायत्रीछन्दोनिरूपणम् ।
३३०	छन्दःसारः—पादभेदाच्छन्दोभेदादिकथनं छन्दोदेवताकथनम् ।
३३१	छन्दोजातिनिरूपणम् उत्कृत्यादिच्छन्दोजातिकथनम् ।
३३२	विषमवृत्तकथनम् ।
३३३	अर्धसमवृत्तनिरूपणम् ।
३३४	समवृत्तनिरूपणम् ।
३३५	प्रस्तारनिरूपणम् ।
३३६	शिक्षानिरूपः [illegible]ष्ठस्थानादिकथनम् ।
३३७	काव्यादिलक्षणं काव्यलक्षणकथनं गद्यपद्यात्मककाव्यत्रैविध्यम् । आख्यायिकादिभेदेन गद्यकाव्यस्य पञ्चप्रकारत्वम् । आख्यायिकादीनां लक्षणम् । पद्यकुटुम्बादिकथनं महाकाव्यलक्षणादिकञ्च ।
३३८	नाटकनिरूपणम् नाटकस्य प्रकरणादिभेदनिरूपणम् । नाट्यलक्षणं पूर्वमुखे नान्दीमुखलक्षणम् । नटीविदूषकपारिपार्श्वकादिपात्राणां वर्णनम् । कथोपोद्घातलक्षणं सिद्धोत्प्रेक्षितादिभेदाः ।
३३९	शृङ्गारादिरसनिरूपणं रतिहासादिलक्षणम् । विभावस्यालम्बनोद्दीपनात्मकभेदेन द्विप्रकारत्वम् । धीरोदात्तादिनायकभेदाः शृङ्गारे नायकस्य नर्मसचिवानामनुनायकानाञ्च वर्णनम् । भाषणादिस्वरूपम्
३४०	रीतिनिरूपणम् । पाञ्चालीगौडीयादिभेदेन रीतिनिरूपणम् ।
३४१	नृत्यादावङ्गकर्मनिरूपणं कामिनीनां लीलाविलासादिभेदेन शरीरचेष्टादिकथनम् । शिरःकम्पनादाकम्पितादिभेदेन त्रयोदशप्रकाराः । सप्तप्रकारेण भ्रूकर्मादिकं तारकादीनां नवधा कर्मादिकथनम् ।
३४२	अभिनयादिनिरूपणम् । अभिनयलक्षणम् । रसादिविनियोगः संभोगविप्र-

अध्यायाः ।	विषयाः ।
	लम्भादिभेदेन शृङ्गारो द्विधेति । पुनस्तद्भेदः हासादिलक्षणम । करुणादिरसानां भेदाः । शब्दालंकारादिलक्षणम ।
३४३	शब्दालंकाराः । अलंकाराणामनुप्रासादिकं चक्रबन्धगोमूत्रिकाद्यखिलबन्धाः ।
३४४	अथालङ्काराः साहश्यालंकाराः । तल्लक्षणंच ।
३४५	शब्दार्थालंकाराः प्रशस्तीत्यादिषडभेदानां वर्णनं तल्लक्षणञ्च ।
३४६	रागलक्षणादिकथनम् ।
३४७	काव्यदोषविवेकः सत्यानामुद्वेगजनकत्वादयः सप्त दोषाः । असाधुत्वाप्रयुक्तत्वयोः पदनिग्रहत्वेन प्रतिपादनं तयोः शब्दशास्त्रविरुद्धत्वादसाधुतानिरूपणम् । छान्दसत्वादिविस्तृष्टत्वादिदोषकथनंम तल्लक्षणं विसंध्यादिदोषाः ।
३४८	एकाक्षराभिधानम् एकाक्षरमन्त्राः मातृकामन्त्राः नवदुर्गार्चनं गणपतिमन्त्रकथनम् अमुना स्वाहान्तो होमविधिः ।
३४९	व्याकरणसारः प्रत्याहारसाधकसूत्राणां कथनम् अणादिप्रत्याहारः ।
३५०	संधिसिद्धरूपं दण्डाग्रामुदाहरणानां निरूपणम् ।
३५१	सुविभक्तिसिद्धरूपं विभक्तिपदवाच्यसुप्तिङीः कथनं स्वादिविभक्तिनिरूपणम् । अजन्तहलन्तभेदेन प्रतिपादिकद्वैध्यं तयोस्त्रिप्रकारत्वं पुंस्त्वादिभेदेन वृक्षादिसिद्धरूपाणि ।
३५२	स्त्रीलिङ्गशब्दसिद्धरूपं रमादिरूपाणि ।
३५३	नपुंसकशब्दसिद्धरूपम् ।
३५४	कारकम् । अभिहितानभिहितत्वेन कर्तुरुतमाधमत्वं कर्मसंज्ञादिनिरूपणम् ।
३५५	समासः । तत्पुरुषादिसमासकथनम् ।

अध्यायाः ।	विषयाः ।
३५६	तद्धिताः । तद्धितसिद्धरूपाणि ।
३५७	टणादिसिद्धरूपकथनम् ।
३५८	तिङ्विभक्तिसिद्धरूपम् ।
३५९	कृत्सिद्धरूपम् ।
३६०	स्वर्गपातालादिवर्गाः ।
३६१	अव्ययवर्गः ।
३६२	नानार्थवर्गः ।
३६३	भूमिवनौषध्यादिवर्गाः ।
३६४	नृब्रह्मक्षत्रविट्शूद्रवर्गाः ।
३६५	ब्रह्मवर्गः ।
३६६	क्षत्रविट्शूद्रवर्गाः ।
३६७	सामान्यनामलिङ्गानि ।
३६८	प्रलयवर्णनं नित्यनैमित्तिकप्राकृतात्यन्तिकादिभेदैश्चतुर्विधप्रलयवर्णनम् ।
३६९	आत्यन्तिकप्रलयगमनोपायस्वरूपलक्षणम् । शारीरमानसभेदेनाऽऽध्यात्मिकसंतापस्य द्विप्रकारत्वम् । भोगदेहं विसृज्य जीवस्य कर्मगा गर्भान्तरप्राप्तिः शुभाशुभकर्मफलं गर्भस्य प्रतिमासमवयवोत्पत्तिः सत्त्वादिगुणलक्षणं देहे असृगादीनां गुणाः ।
३७०	शरीरावयवाः कर्मेन्द्रियाणि शरीरे सप्ताशयाः समग्रदेहे षोडशजालानि । [illegible] अवयवादिषु नाडीप्रमाणम् ।

अध्यायाः ।	विषयाः ।
३७१	नरकनिरूपणम् । शुभकर्मणां मनुष्याणां प्राणऊर्ध्वच्छिद्रादिनिर्गच्छतीत्यादियाम्यमार्गकथनम् । तामिस्रादिनरकाणां वर्णनं पापिनां जनानामतावदुःखप्रदयातनानिदर्शनम् आध्यात्मिकादितापलक्षणम् ।
३७२	यमनियमाः । अष्टाङ्गयोगः प्रमुखपरद्रव्यहरणेन तिर्यग्योनिप्राप्तिः मनोजयादिकथनम् विष्णुपूजनादुत्तमागतिः ।
३७३	आसनप्राणायामप्रत्याहाराः ।
३७४	ध्यानम् । ध्यानयज्ञस्य मुक्तिसाधनत्वं हृदये विष्णोर्ध्यानादिकम् ।
३७५	धारणा । धारणालक्षणं वारुणीधारणा ऐशानीधारणा धारणादिभिः साधकस्य विगतक्लेशत्वम् ।
३७६	समाधिः । समाधिलक्षणं योगिनः प्रशंसा योगीसूर्यमण्डलं निर्भिद्य ब्रह्मलोकमतिक्रम्य निर्वाणमृच्छतीत्यादि सदाचारगृहस्थास्यापि मोक्षरीतिकथनम् ।
३७७	ब्रह्मज्ञानम् । देहदिरात्मभवबोधनम् । द्रष्टृभोक्तृत्वादिनिरूपणमात्मनः लिंगशरीरोत्पत्तिः । ब्रह्मज्ञस्य संसारान्मुक्तिः ।

अध्यायाः	विषयाः ।
३७८	ब्रह्मज्ञानम् ।
३७९	ब्रह्मज्ञानम् । कर्मभिर्देवत्वप्राप्तिस्तत्रसा वैराग्यस्य प्राप्तिः कर्मसंन्यासाद्ब्रह्मत्वाप्तिः वैराग्यात्प्रकृतौ लयः ज्ञानात्कैवल्यम् जीवानामित्येताः पञ्च गतयः भावनाविधेयब्रह्मोपासना ब्रह्मज्ञानलक्षणम् ।
३८०	अद्वैतब्रह्मविज्ञानम् अन्तकाले मृत्यादिस्मरणात्तद्देहप्राप्तिः । अद्वैतज्ञानविषये नृपब्राह्मणसंवादः तत्र निदाघकृतुसंवादकथनं ब्राह्मणोपदेशाद्राज्ञो मुक्तिः ।
३८१	गीतासारः ।
३८२	यमगीता तस्याः फलम् ।
३८२	आग्नेयमहापुराणमाहात्म्यम् हेमन्तादावाग्नेयपुराणश्रवणतोग्निष्टोमादियज्ञफलप्राप्तिः आग्नेयपुराणान्तर्गतविषयक्रमः पुराणसंख्या । पुराणपाठफलनादिकं पुस्तकदानफलम् ।

समाप्तेयमग्निपुराणान्तर्गताध्यायस्थविषयानुक्रमणिका ।

श्रीमद्भागवतमहापुराणम्

॥ प्रथमः स्कन्धः ॥

हरिः

श्रीगणेशाय नमः ॥ अथाग्निमहापुराणं प्रारभ्यते ॥ ॐ नमो भगवते वासुदेवाय ॥ श्रियं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् ॥ ब्रह्माणं वह्निमिन्द्रादीन्वासुदेवं नमाम्यहम् ॥ १ ॥ नैमिषे हरिमीजाना ऋषयः शौनकादयः ॥ तीर्थयात्राप्रसङ्गेन स्वागतं सूतमब्रुवन् ॥ २ ॥ ऋषय ऊचुः ॥ सूत त्वं पूजितोऽस्माभिः सारात्सारं वदस्व नः ॥ येन विज्ञातमात्रेण सर्वज्ञत्वं प्रजायते ॥ ३ ॥ सूत उवाच ॥ सारात्सारो हि भगवान्विष्णुः सर्गादिकृद्विभुः ॥ ब्रह्माहमस्मि तं ज्ञात्वा सर्वज्ञत्वं प्रजायते ॥ ४ ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ॥ द्वे विद्ये वेदितव्ये हि इति चाथर्वणी श्रुतिः ॥ ५ ॥ अहं शुकश्च पैलाद्या गत्वा बदरिकाश्रमम् ॥ व्यासं नत्वा पृष्टवन्तः सोऽस्मान्सारमथाब्रवीत् ॥ ६ ॥ व्यास उवाच ॥ शुकाद्यैः शृणु सूत त्वं वसिष्ठो मां यथाऽब्रवीत् ॥ ब्रह्मसारं हि पृच्छन्तं मुनिभिश्च परात्परम् ॥ ७ ॥ वासिष्ठ उवाच ॥ द्विविधं ब्रह्म वक्ष्यामि शृणु व्यासाखिलानुगम् ॥ यथाऽग्निर्मां पुराऽऽह मुनिभिर्देवतैः सह ॥ ८ ॥ पुसणं परमाग्नेयं ब्रह्मविद्याक्षरं परम् ॥ ऋग्वेदाद्यपरं ब्रह्म सर्वदेवसुखावहम् ॥ ९ ॥ अग्निनोक्तं पुराणं यदाग्नेयं ब्रह्मसम्मितम् ॥ भुक्तिमुक्तिप्रदं दिव्यं पठतां शृण्वतां नृणाम् ॥ १० ॥ कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्म परात्परम् ॥ मुनिभिः पृष्टवान्देवं पूजितं ज्ञानकर्मभिः ॥ ११ ॥ वसिष्ठ उवाच ॥ संसारसागरोत्तारनावं ब्रह्मेश्वरं वद ॥ विद्यासारं यद्विदित्वा सर्वज्ञो जायते नरः ॥ १२ ॥ अग्निरुवाच ॥ विष्णुः कालाग्निरुद्रोऽहं विद्यासारं वदामि ते ॥ विद्यासारं पुराणं यत्सर्वं सर्वस्य कारणम् ॥ १३ ॥ सर्गस्य प्रतिसर्गस्य वंशमन्वन्तरस्य च ॥ वंशानुचरितादेश्च मत्स्यकूर्म्मादिरूपधृक् ॥ १४ ॥ द्वे विद्ये भगवान्विष्णुः परा चैवापरा द च ॥ ऋग्यजुःसामाथर्वाख्या वेदाङ्गानि च षट् द्विज ॥ १५ ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ छन्दोऽभिधानं मीमांसा धर्म्मशास्त्रं पुराणकम् ॥ १६ ॥ न्यायवैद्यकगान्धर्वं धनुर्वेदोऽर्थशास्त्रकम् ॥ अपरेयं परा विद्या यया ब्रह्माभिगम्यते ॥ १७ ॥ यत्तदद्दश्यमग्राह्यमगोत्रचरणं ध्रुवम् ॥ विष्णुनोक्तं यथा मह्यं देवेभ्यो ब्रह्मणा पुरा ॥ तथा ते कथयिष्यामि हेतुं मत्स्यादिरूपिणम् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये प्रश्नो नाम प्रथमोऽध्यायः ॥ १ ॥ अथ मत्स्यावतारवर्णनम् ॥ वसिष्ठ उवाच ॥ मत्स्यादिरूपिणं विष्णुं ब्रूहि सर्गादिकारणम् ॥ पुराणं ब्रह्म चाग्नेयं यथा विष्णोः पुरा श्रुतम् ॥ १ ॥

अग्निरुवाच ॥ मत्स्यावतारं वक्ष्येऽहं वसिष्ठ शृणु वै हरेः ॥ अवतारक्रिया दुष्टनष्टये सत्पालनाय हि ॥ २ ॥ आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादिका मुने ॥ ३ ॥ मनुर्वैवस्वतस्तेपे तपो वै भुक्तिमुक्तये ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ ४ ॥ तस्याञ्जल्युदके मत्स्यः स्वल्प एकोऽभ्यपद्यत ॥ क्षेप्तुकामं जले प्राह न मां क्षिप नरोत्तम ॥ ५ ॥ ग्राहादिभ्यो भयं मेऽत्र तच्छ्रुत्वा कलशोऽक्षिपत् ॥ स तु वृद्धः पुनर्मत्स्यः प्राह तं देहि मे बृहत् ॥ ६ ॥ स्थानमेतद्वचः श्रुत्वा राजाऽथोदञ्चनेऽक्षिपत् ॥ तत्र वृद्धोऽब्रवीद्रूपं पृथुं देहि पदं मनो ॥ ७ ॥ सरोवरे पुनः क्षिप्तो ववृधे तत्प्रमाणवान् ॥ ऊचे देहि बृहत्स्थानं प्राक्षिपच्चाम्बुधौ ततः ॥ ८ ॥ लक्षयोजनविस्तीर्णः क्षणमात्रेण सोऽभवत् ॥ मत्स्यं तमद्भुतं दृष्ट्वा विस्मितः प्राब्रवीन्मनुः ॥ ९ ॥ को भवान्ननु वै विष्णुर्नारायण नमोऽस्तु ते ॥ मायया मोहयसि मां किमर्थं त्वं जनार्दन ॥ १० ॥ मनुनोक्तोऽब्रवीन्मत्स्यो मनुं वै पालने रतम् ॥ अवतीर्णो भवायास्य जगतो दुष्टनष्टये ॥ ११ ॥ सप्तमे दिवसे त्वब्धिः प्लावयिष्यति वै जगत् ॥ उपस्थितायां नावि त्वं बीजादीनि विधाय च ॥ १२ ॥ सप्तर्षिभिः परिवृतो निशां ब्राह्मीं चरिष्यसि ॥ उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ॥ १३ ॥ इत्युक्त्वान्तर्दधे मत्स्यो मनुः कालप्रतीक्षकः ॥ स्थितः समुद्र उद्वेले नावमारुरुहे तदा ॥ १४ ॥ एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥ नावं बबन्ध तच्छृङ्गे मत्स्याख्यं च पुराणकम् ॥ १५ ॥ शुश्राव मत्स्यात्पापघ्नं संस्तुवन्स्तुतिभिश्च तम् । ब्रह्मवेदप्रहर्त्तारं हयग्रीवं च दानवम् ॥ १६ ॥ अवधीद्वेदमन्त्राद्यान्पालयामास केशवः ॥ प्राप्ते कल्पेऽथ वाराहे कूर्मरूपोऽभवद्धरिः ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये मत्स्यावतारो नाम द्वितीयोऽध्यायः ॥ २ ॥ अथ कूर्मावतारवर्णनम् ॥ अग्निरुवाच ॥ वक्ष्ये कूर्मावतारं च संश्रुतं पापनाशनम् ॥ पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः ॥ १ ॥ दुर्वाससश्च शापेन निःश्रीकाश्चाभवंस्तदा ॥ स्तुत्वा क्षीराब्धिगं विष्णुमूचुः पालय चासुरात् ॥ २ ॥ ब्रह्मादिकान्हरिः प्राह सन्धिं कुर्वन्तु चासुरैः ॥ क्षीराब्धिमथनार्थं हि अमृतार्थं श्रियेऽसुराः ॥ ३ ॥ अरयोऽपि हि सन्धेयाः सति कार्य्यार्थगौरवे ॥ युष्मानमृतभाजो हि करिष्यामि न दानवान् ॥ ४ ॥ मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ क्षीराब्धिं मत्सहायेन निर्मथध्वमतान्द्रिताः ॥ ५ ॥

विष्णूक्ताः संविदं कृत्वा दैत्यैः क्षीराब्धिमागताः ॥ ततो मथितुमारब्धा यतः पुच्छं ततः सुराः ॥ ६ ॥ फणिनिःश्वाससन्तप्ता हरिणाप्यायिताः सुराः ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ७ ॥ कूर्मरूपं समास्थाय दध्रे विष्णुश्च मन्दरम् ॥ क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलं ह्यभूत् ॥ ८ ॥ हरेण धारितं कण्ठे नीलकण्ठस्ततोऽभवत् ॥ ततोऽभूद्वारुणी देवी पारिजातस्तु कौस्तुभः ॥ ९ ॥ गावश्चाप्सरसो दिव्या लक्ष्मीर्देवी हरिं गता ॥ पश्यन्तः सर्वदेवास्तां स्तुवन्तः साश्रियोऽभवन् ॥ १० ॥ ततो धन्वन्तरिर्विष्णुरायुर्वेदप्रवर्त्तकः ॥ बिभ्रत्कमण्डलुं पूर्णममृतेन समुत्थितः ॥ ११ ॥ अमृतं तत्करादैत्याः सुरेभ्योऽर्द्धं प्रदाय च ॥ गृहीत्वा जग्मुर्जम्भाद्या विष्णुः स्त्रीरूपधृक्ततः ॥ १२ ॥ तां दृष्ट्वा रूपसम्पन्नां दैत्याः प्रोचुर्विमोहिताः ॥ भव भार्य्योऽमृतं गृह्य पाययास्मान्वरानने ॥ १३ ॥ तथेत्युक्त्वा हरिस्तेभ्यो गृहीत्वाऽपाययत्सुरान् ॥ चन्द्ररूपधरो राहुः पिबंश्चाकेन्दुनार्पितः ॥ १४ ॥ हरिणाप्यरिणा च्छिन्नं तदा राहोः शिरः पृथक् ॥ कृपयाऽमरतां नीतं वरदं हरिमब्रवीत् ॥ १५ ॥ राहुर्मत्तस्तु चन्द्रार्कौ प्राप्य ते ग्रहणं ग्रहः ॥ तस्मिन्काले च यदानं दास्यन्ते स्यात्तदक्षयम् ॥ १६ ॥ तथेत्याहाथ तं विष्णुस्ततः सर्वैः सहामरैः ॥ स्त्रीरूपं सम्परित्यज्य हरेणोक्तः प्रदर्शय ॥ १७ ॥ दर्शयामास रुद्राय स्त्रीरूपं भगवान्हरिः ॥ मायया मोहितः शम्भुर्गौरीं त्यक्त्वा स्त्रियं गतः ॥ १८ ॥ नग्न उन्मत्तरूपोऽभूत्स्त्रियः केशानधारयत् ॥ अगाद्विमुच्य केशान्स्त्री अन्वधावच्च तां गताम् ॥ १९ ॥ स्खलितं तस्य वीर्य्यं कौ यत्र यत्र हरस्य हि ॥ तत्रतत्राभवत्क्षेत्रं लिङ्गानां कनकस्य च ॥ २० ॥ मायेयामिति तां ज्ञात्वा स्वरूपस्थोऽभवद्धरः ॥ शिवमाह हरी रुद्र जिता माया त्वया हि मे ॥ २१ ॥ न जेतुमेनां शक्तो मे त्वदृतेऽन्यः पुमान्भुवि ॥ अप्राप्याथाऽमृतं दैत्या देवैर्युद्धे निपातिताः ॥ २२ ॥ त्रिदिवस्थाः सुराश्चासन्दैत्याः पातालवासिनः ॥ यो नरः पठते देवविजयं त्रिदिवं व्रजेत् ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये कूर्म्मावतारो नाम तृतीयोऽध्यायः ॥ ३ ॥ अथ वराहाद्यवतारवर्णनम् ॥ अग्निरुवाच ॥ अवतारं वराहस्य वक्ष्येऽहं पापनाशनम् ॥ हिरण्याक्षोऽसुरेशोऽभूद्देवाञ्जित्वा दिविस्थितः ॥ १ ॥ देवैर्गत्वा स्तुतो विष्णुर्यज्ञरूपो वराहकः ॥ अद्भुतं दानवं हत्वा दैत्यैः साकं च कण्टकम् ॥ २ ॥

धर्मदेवादिरक्षाकृत्ततः सोऽन्तर्दधे हरिः ॥ हिरण्याक्षस्य वै भ्राता हिरण्यकशिपुस्तथा ॥ ३ ॥ जितदेवयज्ञभागः सर्वदेवाधिकारकृत् ॥ नारसिंहं वपुः कृत्वा तं जघान सुरैः सह ॥ ४ ॥ स्वपदस्थान्सुरांश्चक्रे नारसिंहः सुरैःस्तुतः ॥ देवासुरे पुरा युद्धे बलिप्रभृतिभिः सुराः ॥ ५ ॥ जिताः स्वर्गात्परिभ्रष्टा हरिं वै शरणं गताः ॥ सुराणामभयं दत्त्वा अदित्या कश्यपेन च ॥ ६ ॥ स्तुतोऽसौ वामनो भूत्वा ह्यदित्यां स क्रतुं ययौ ॥ बलेः श्रीयजमानस्य राजद्वारेऽगृणाच्छ्रुतिम् ॥ ७ ॥ वेदान्पठन्तं तं श्रुत्वा वामनं वरदोऽब्रवीत् ॥ निवारितोऽपि शुक्रेण बलिर्ब्रूहि यदिच्छसि ॥ ८ ॥ तत्तेऽहं सम्प्रदास्यामि वामनो बलिमब्रवीत् ॥ पदत्रयं हि गुर्वर्थं देहि दास्ये तमब्रवीत् ॥ ९ ॥ तोये तु पतिते हस्ते वामनोऽभूद्वामनः ॥ भूर्लोकं सभुवर्लोकं स्वर्लोकं च पदत्रयम् ॥ १० ॥ चक्रे बलिं च सुतले तच्छ्रीकाय ददौ हरिः ॥ शक्रो देवैर्हरिं स्तुत्वा भुवनेशः सुखी ह्यभूत् ॥ ११ ॥ वक्ष्ये परशुरामस्य चावतारं शृणु द्विज ॥ उद्धतान्क्षत्रियान्मत्वा भूभारहरणाय सः ॥ १२ ॥ अवतीर्णो हरिः शान्त्यै देवविप्रादिपालकः ॥ जमदग्ने रेणुकायां भार्गवः शस्त्रपारगः ॥ १३ ॥ दत्तात्रेयप्रसादेन कार्त्तवीर्यो नृपस्त्वभूत् ॥ सहस्रबाहुः सर्वोर्वीपतिः स मृगयां गतः ॥ १४ ॥ श्रान्तो निमन्त्रितोऽरण्ये मुनिना जमदग्निना ॥ कामधेनुप्रभावेण भोजितः सबलो नृपः ॥ १५ ॥ अप्रार्थयत्कामधेनुं यदा स न ददौ तदा ॥ हृतवानथ रामेण शिरश्छित्त्वा निपातितः ॥ १६ ॥ युद्धे परशुना राजा सधेनुः स्वाश्रमं ययौ ॥ कार्त्तवीर्यस्य पुत्रैस्तु जमदग्निर्निपातितः ॥ १७ ॥ रामे वनं गते वैरादथ रामः समागतः ॥ पितरं निहतं दृष्ट्वा पितृनाशाभिमर्पितः ॥ १८ ॥ त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रामकरोद्विभुः ॥ कुरुक्षेत्रे पञ्च कुण्डान्कृत्वा सन्तर्प्य वै पितॄन् ॥ १९ ॥ कश्यपाय महीं दत्त्वा महेन्द्रे पर्वते स्थितः ॥ कूर्मस्य च वराहस्य नृसिंहस्य च वामनम् ॥ अवतारं च रामस्य श्रुत्वा याति दिवं नरः ॥ २० ॥ इत्यादिमहापुराणे आग्नेये वराहनृसिंहाद्यावतारो नाम चतुर्थोऽध्यायः ॥ ४ ॥ अथ श्रीरामावतारवर्णनम् ॥ अग्निरुवाच ॥ रामायणमहं वक्ष्ये नारदेनोदितं पुरा ॥ वाल्मीकये यथा तद्वत्पठितं भुक्तिमुक्तिदम् ॥ १ ॥ नारद उवाच ॥ विष्णुनाभ्यब्जजो ब्रह्मा मरीचिर्ब्रह्मणः सुतः ॥ मरीचेः कश्यपस्तस्मात्सूर्यो वैवस्वतो मनुः ॥ २ ॥ ततस्तस्मात्तथेक्ष्वाकुस्तस्य वंशे ककुत्स्थकः ॥ ककुत्स्थस्य रघुस्त-

स्मादजो दशरथस्ततः ॥ ३ ॥ रावणादेर्वधार्थाय चतुर्द्धाभूत्स्वयं हरिः ॥ राज्ञो दशरथाद्रामः कौसल्यायां बभूव ह ॥ ४ ॥
कैकेय्यां भरतः पुत्रः सुमित्रायां च लक्ष्मणः ॥ शत्रुघ्न ऋष्यशृङ्गेण तासु सन्दत्तपायसात् ॥ ५ ॥ प्राशिताद्यज्ञसंसिद्धाद्रामा-
द्याश्च समाः पितुः ॥ यज्ञविघ्नविनाशाय विश्वामित्रार्थितो नृपः ॥ ६ ॥ रामं संप्रेषयामास लक्ष्मणं मुनिना सह ॥ रामो
गतोऽस्त्रशस्त्राणि शिक्षितस्ताडकान्तकृत् ॥ ७ ॥ मारीचं मानवास्त्रेण मोहितं दूरतोऽनयत् ॥ सुबाहुं यज्ञहन्तारं सबलं चा-
वधीद्बली ॥ ८ ॥ सिद्धाश्रमनिवासी च विश्वामित्रादिभिः सह ॥ गतः क्रतुं मैथिलस्य द्रष्टुं चापं सहानुजः ॥ ९ ॥ शतान-
न्दनिमित्तेन विश्वामित्रप्रभावतः ॥ रामाय कथिते राज्ञा समुनिः पूजितः क्रतौ ॥ १० ॥ धनुरापूरयामास लीलया स बभञ्ज
तत् ॥ वीर्यशुल्कां च जनकः सीतां कन्यां त्वयोनिजाम् ॥ ११ ॥ ददौ रामाय रामोऽपि पित्रादौ हि समागते ॥ उपयेमे
जानकीं तामुर्मिलां लक्ष्मणस्तथा ॥ १२ ॥ श्रुतकीर्तिं माण्डवीं च कुशध्वजसुते तथा ॥ जनकस्यानुजस्यैते शत्रुघ्नभरतावुभौ
॥ १३ ॥ कन्ये द्वे उपयेमाते जनकेन सुपूजितः ॥ रामोऽगात्सवसिष्ठाद्यैर्जामदग्न्यं विजित्य च ॥ अयोध्यां भरतोऽप्यागा-
त्ससशत्रुघ्नो युधाजितः ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये रामायणे बालकाण्डवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ अथायो-
ध्याकाण्डवर्णनम् ॥ नारद उवाच ॥ भरतेऽथ गते रामः पित्रादीनभ्यपूजयत् ॥ राजा दशरथो राममुवाच शृणु राघव ॥ १ ॥
गुणानुरागाद्राज्ये त्वं प्रजाभिरभिप्रेक्षितः ॥ मनसाऽहं प्रभाते ते यौवराज्यं ददामि ह ॥ २ ॥ रात्रौ त्वं सीतया सार्धं संयतः
सुव्रतो भव ॥ राज्ञश्च मन्त्रिणश्चाष्टौ सवसिष्ठास्तथाब्रुवन् ॥ ३ ॥ सृष्टिर्जयन्तो विजयः सिद्धार्थो राष्ट्रवर्धनः ॥ अशोको धर्म-
पालश्च सुमन्त्रः सवसिष्ठकः ॥ ४ ॥ पित्रादिवचनं श्रुत्वा तथेत्युक्त्वा स राघवः ॥ स्थितो देवार्चनं कृत्वा कौसल्यायै निवेद्य
तत् ॥ ५ ॥ राजोवाच वसिष्ठादीन्रामराज्याभिषेचने ॥ सम्भारान्सम्भरन्तु स्म इत्युक्त्वा कैकयीं गतः ॥ ६ ॥ अयोध्याल-
ङ्कृतिं दृष्ट्वा ज्ञात्वा रामाभिषेचनम् ॥ भविष्यतीत्याचचक्षे कैकेयीं मन्थरा सखी ॥ ७ ॥ पादौ गृहीत्वा रामेण कार्पिता साप-
राधतः ॥ तेन वैरेण सा रामवनवासं च काङ्क्षति ॥ ८ ॥ कैकेयि त्वं समुत्तिष्ठ रामराज्याभिषेचनम् ॥ मरणं तव पुत्रस्य मम ते

नात्र संशयः ॥ ९ ॥ कुब्जयोक्तं च तच्छ्रुत्वा एकमाभरणं ददौ ॥ उवाच मे यथा रामस्तथा मे भरतः सुतः ॥ १० ॥ उपायंतु न पश्यामि भरतो येन राज्यभाक् ॥ कैकेयीमब्रवीत्कुब्जा हारं त्यक्त्वाऽथ मन्थरा ॥ ११ ॥ मन्थरोवाच ॥ वालिशे रक्ष भरतमात्मानं मां च राघवात् ॥ भविता राघवो राजा राघवस्य ततः सुतः ॥ १२ ॥ राजवंशस्तु कैकेयि भरतान्परिहास्यते ॥ देवासुरे पुरा युद्धे शम्बरेण हताः सुराः ॥ १३ ॥ रात्रौ भर्त्ता गतस्तत्र रक्षितो विद्यया त्वया ॥ वरद्वयं तदा प्रादाद्याचेदानीं नृपं च तत् ॥ १४ ॥ रामस्य च वने वासं नव वर्षाणि पञ्च च ॥ यौवराज्ये च भरते तादिदानीं प्रदास्यति ॥ १५ ॥ प्रोत्साहिता कुब्जया सा अनर्थे चार्थदर्शिनी ॥ उवाच सदुपायं मे कश्चित्तं कारयिष्यति ॥ १६ ॥ क्रोधागारं प्रविष्टाऽथ पतिता भुवि मूर्च्छिता ॥ द्विजादीनर्चयित्वाऽथ राजा दशरथस्तदा ॥ १७ ॥ ददर्श कैकयीं रुष्टामुवाच कथमीदृशी ॥ रोगार्त्ता किं भयोद्विग्ना किमिच्छसि करोमि तत् ॥ १८ ॥ येन रामेण हि विना न जीवामि मुहूर्त्तकम् ॥ शपामि तेन कुर्यां वै वाञ्छितं तव सुन्दरि ॥ १९ ॥ सत्यं ब्रूहीति सोवाच नृप मह्यं ददासि चेत् ॥ वरद्वयं पूर्व्वदत्तं सत्यात्त्वं देहि मे नृप ॥ २० ॥ चतुर्दश समा राम्मे वने वसतु संयतः ॥ सम्भारैरेभिरद्यैव भरतोऽत्राभिषेच्यताम् ॥ २१ ॥ विषं पीत्वा मरिष्यामि दास्यसि त्वं न चेन्नृप ॥ तच्छ्रुत्वा मूर्च्छितो भूमौ वज्राहत इवापतत् ॥ २२ ॥ मुहूर्त्ताच्चेतनां प्राप्य कैकेयीमिदमब्रवीत् ॥ दशरथ उवाच ॥ किं कृतं तव रामेण मया वा पापनिश्चये ॥ २३ ॥ यन्मामेवं ब्रवीषि त्वं सर्वलोकाप्रियङ्करि ॥ केवलं त्वत्प्रियं कृत्वा भविष्यामि सुनिन्दितः ॥२४॥ या त्वं भार्या कालरात्रिर्भरतो नेदृशः सुतः ॥ प्रशाधि विधवा राज्यं मृते मयि गते सुते ॥ २५ ॥ सत्यपाशनिबद्धस्तु राममाहूय चाब्रवीत् ॥ कैकेय्या वञ्चितो राम राज्यं कुरु निगृह्य माम् ॥२६॥ त्वया वने तु वस्तव्यं कैकेयीभरतो नृपः ॥ पितरं चैव कैकेयीं नमस्कृत्य प्रदक्षिणम् ॥ २७ ॥ कृत्वा नत्वा च कौसल्यां समाश्वास्य सलक्ष्मणः ॥ सीतया भार्यया सार्द्धं सरथः ससुमन्त्रकः ॥ २८ ॥ दत्त्वा दानानि विप्रेभ्यो दीनानाथेभ्य एव सः ॥ मातृभिश्चैव विप्राद्यैः शोकार्त्तैर्निर्गतः पुरात् ॥ २९ ॥ उषित्वा तमसातीरे रात्रौ पौरान्विहाय च ॥ प्रभाते तमपश्यन्तोऽयोध्यां ते पुनरागताः ॥ ३० ॥ रुद-

त्राजापि कौसल्यागृहमागात्सुदुःखितः ॥ पौरा जनाः स्त्रियः सर्वा रुरुदू राजयोषितः ॥ ३१ ॥ रामो रथस्थश्चीराढ्यः शृङ्गवेरपुर
ययौ ॥ गुहेन पूजितस्तत्र इङ्गुदीमूलमाश्रितः ॥ ३२ ॥ लक्ष्मणः सगुहो रात्रौ चक्रतुर्जागरं हि तौ ॥ सुमन्त्रं सरथं त्यक्त्वा प्रात-
र्न्नावाथ जाह्नवीम् ॥ ३३ ॥ रामलक्ष्मणसीताश्च तीर्णा आपुः प्रयागकम् ॥ भरद्वाजं नमस्कृत्य चित्रकूटं गिरिं ययुः ॥ ३४ ॥
वास्तुपूजां ततः कृत्वा स्थिता मन्दाकिनीतटे ॥ सीतायै दर्शयामास चित्रकूटं च राघवः ॥ ३५ ॥ नखैर्विदारयन्तं तां काक-
तच्चक्षुराक्षिपत् ॥ ऐषीकास्त्रेण शरणं प्राप्तो देवान्विहायसः ॥ ३६ ॥ रामे वनं गते राजा षष्ठेऽह्नि निशि चाब्रवीत् ॥ कौसल्यां स
कथां पौर्वां यदज्ञानाद्धतः पुरा ॥ ३७ ॥ कौमारे सरयूतीरे यज्ञदत्तकुमारकः ॥ शब्दभेदाच्च कुम्भेन शब्दं कुर्वंश्च तत्पिता ॥ ३८ ॥
शशाप विलपन्मात्रा शोकं कृत्वा रुदन्मुहुः ॥ पुत्रं विना मरिष्यावस्त्वं च शोकान्मरिष्यसि ॥ ३९ ॥ पुत्रं विना स्मरञ्शोकात्कौ-
सल्ये मरणं मम ॥ कथामुक्त्वाऽथ हा रामेत्युक्त्वा राजा दिवं गतः ॥ ४० ॥ सुतं मत्वाऽथ कौसल्या सुप्ता शोकार्त्तमेव सा ॥ सुप्र-
भाते शयानं तं सूतमागधबन्दिनः ॥ ४१ ॥ प्रबोधका बोधयन्ति न च बुध्यत्यसौ मृतः ॥ कौसल्या तं मृतं ज्ञात्वा हा हतास्मीति
चाब्रवीत् ॥ ४२ ॥ नरा नार्योऽथ रुरुदुरानीतो भरतस्तदा ॥ वसिष्ठाद्यैः सशत्रुघ्नः शीघ्रं राजगृहात्पुरीम् ॥ ४३ ॥ दृष्ट्वा सशोकां
कैकेयीं निन्दयामास दुःखितः ॥ अकीर्तिः पातिता मूर्ध्नि कौसल्यां स प्रशस्य च ॥ ४४ ॥ पितरं तैलद्रोणिस्थं संस्कृत्य सर-
यूतटे ॥ वसिष्ठाद्यैर्जनैरुक्तो राज्यं कुर्विति सोऽब्रवीत् ॥ ४५ ॥ व्रजामि राममानेतुं रामो राजा मतो बली ॥ शृङ्गवेरं प्रयागं च
भरद्वाजेन भोजितः ॥ ४६ ॥ नमस्कृत्य भरद्वाजं रामं लक्ष्मणमागतः ॥ पिता स्वर्गं गतो राम अयोध्यायां नृपो भव ॥ ४७ ॥ अहं
वनं प्रयास्यामि त्वदादेशप्रतीक्षकः ॥ रामः श्रुत्वा जलं दत्त्वा गृहीत्वा पादुके व्रज ॥ ४८ ॥ राज्यायाहं न यास्यामि सत्या-
ञ्चीरजटाधरः ॥ रामोक्तो भरतश्चायान्नन्दिग्रामे स्थितो बली ॥ त्यक्त्वाऽयोध्यां पादुके ते पूज्य राज्यमपालयत् ॥ ४९ ॥
इत्यादिमहापुराणे आग्नेये रामायणेऽयोध्याकाण्डवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ अथारण्यकाण्डवर्णनम् ॥ नारद उवाच ॥
रामो वसिष्ठं मातॄश्च नत्वाऽत्रिं च प्रणम्य सः ॥ अनसूयां च तत्पत्नीं शरभङ्गं सुतीक्ष्णकम् ॥ १ ॥ अगस्त्यभ्रातरं नत्वा

अगस्त्य तत्प्रसादतः ॥ धनुः खड्गं च संप्राप्य दण्डकारण्यमागतः ॥ २ ॥ जनस्थाने पञ्चवट्यां स्थितो गोदावरीतटे ॥ तत्र शूर्पणखायाता भक्षितुं तान्भयङ्करी ॥ ३ ॥ रामं सुरूपं दृष्ट्वा सा कामिनी वाक्यमब्रवीत् ॥ शूर्पनखोवाच ॥ कस्त्वं कस्मात्समायातो भर्त्ता मे भव चार्थितः ॥ ४ ॥ एतौ च भक्षयिष्यामि इत्युक्त्वा तं समुद्यता ॥ तस्या नासां च कर्णौ च रामोक्तो लक्ष्मणोऽच्छिनत् ॥ ५ ॥ रक्तं क्षरन्ती प्रययौ खरं भ्रातरमब्रवीत् ॥ मरिष्यामि विनासाऽहं खर जीवामि वै तदा ॥ ६ ॥ रामस्य भार्य्या सीताऽस्ति तस्यासील्लक्ष्मणोऽनुजः ॥ तेषां यद्रुधिरं कोष्णं पाययिष्यसि मां यदि ॥ ७ ॥ खरस्तथेति तामुक्त्वा चतुर्दशसहस्रकैः ॥ रक्षसां दूषणेनागाद्योद्धुं त्रिशिरसा सह ॥ ८ ॥ रामं रामोऽपि युयुधे शरैर्विव्याध राक्षसान् ॥ हस्त्यश्वरथपादातं बलं निन्ये यमक्षयम् ॥ ९ ॥ त्रिशीर्षाणं खरं रौद्रं युध्यन्तं चैव दूषणम् ॥ ययौ शूर्पणखा लङ्कां रावणाग्रेऽपतद्भुवि ॥ १० ॥ अब्रवीद्रावणं क्रुद्धा न त्वं राजा च रक्षकः ॥ खरादिहन्तॄ रामस्य सीतां भार्यां हरस्व च ॥ ११ ॥ रामलक्ष्मणरक्तस्य पानाज्जीवामि नान्यथा ॥ तथेत्याह च तच्छ्रुत्वा मारीचं प्राह व व्रज ॥ १२ ॥ स्वर्णचित्रमृगो भूत्वा रामलक्ष्मणकर्षकः ॥ सीताग्रे तां हरिष्यामि अन्यथा मरणं तव ॥ १३ ॥ मारीचो रावणं प्राह रामो मृत्युर्धनुर्धरः ॥ रावणादपि मर्त्तव्यं मर्त्तव्यं राघवादपि ॥ १४ ॥ अवश्यं यदि मर्त्तव्यं वरं रामो न रावणः ॥ इति मत्वा मृगो भूत्वा सीताग्रे व्यचरन्मुहुः ॥ १५ ॥ सीतया प्रेरितो रामः शरेणाथावधीच्च तम् ॥ म्रियमाणो मृगः प्राह हा सीते लक्ष्मणेति च ॥ १६ ॥ सौमित्रिः सीतयोक्तोऽथ विरुद्धं रामं मागतः ॥ रावणोऽप्यहरत्सीतां हत्वा गृध्रं जटायुषम् ॥ १७ ॥ जटायुषा समिन्नाङ्गो अङ्केनादाय जानकीम् ॥ गतो लङ्कामशोकारुये धारयामास चाब्रवीत् ॥ १८ ॥ रावण उवाच ॥ भव भार्य्या ममाद्य त्वं राक्षस्यो रक्ष्यतामियम् ॥ रामो हत्वा तु मारीचं दृष्ट्वा लक्ष्मणमब्रवीत् ॥ १९ ॥ श्रीराम उवाच ॥ मायामृगोऽसौ सौमित्रे यथा त्वमिह चागतः ॥ तथा सीता हृता नूनं नाप्स्यत्स गतोऽथ ताम् ॥ २० ॥ शुशोच विललापार्त्तो मां त्यक्त्वा क्व गतासि वै ॥ लक्ष्मणाश्वासितो रामो मार्गयामास जानकीम् ॥ २१ ॥ दृष्ट्वा जटायुस्तं प्राह रावणो हृतवांश्च ताम् ॥ मृतोऽथ संस्कृतस्तेन कबन्धं चावधीत्ततः ॥ शापमुक्तोऽब्रवीद्रामं स त्वं

सुग्रीवमाव्रज ॥२२॥ इत्यादिमहापुराणे आग्नेये रामायणे आरण्यकाण्डवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ अथ किष्किन्धाकाण्ड-
वर्णनम् ॥ नारद उवाच ॥ रामः पम्पासरो गत्वाऽशोचत्स शबरीं ततः ॥ हनूमताथ सुग्रीवं नीतो मित्रं चकार ह ॥ १ ॥ सप्त
तालान्विनिर्भिद्य शरेणैकेन पश्यतः ॥ पादेन दुन्दुभेः कायं चिक्षेप दशयोजनम् ॥२॥ तद्रिपुं वालिनं हत्वा भ्रातरं वैरकारिणम् ॥
किष्किन्धां कपिराज्यं च रुमां तारां समर्पयत् ॥ ३॥ ऋष्यमूके हरीशाय किष्किन्धेशोऽब्रवीत्स च ॥ सीतां त्वं प्राप्स्यसे यद्वत्तथा
राम करोमि ते ॥ ४ ॥ तच्छ्रुत्वा माल्यवत्पृष्ठे चातुर्मास्यं चकार सः ॥ किष्किन्धायां च सुग्रीवो यदा नायाति दर्शनम् ॥ ५ ॥
तदाऽब्रवीत्तं रामोक्तं लक्ष्मणो व्रज राघवम् ॥ न म सङ्कुचितः पन्था येन वाली हतो गतः ॥ ६ ॥ समये तिष्ठ सुग्रीव.मा वालि-
पथमन्वगाः ॥ सुग्रीव आह संसक्तो गतं कालं न बुद्धवान् ॥ ७ ॥ इत्युक्त्वा स गतो रामं नत्वोवाच हरीश्वरः ॥ सुग्रीव उवाच ॥
आनीता वानराः सर्वे सीतायाश्च गवेषणे ॥ ८ ॥ त्वन्मतात्प्रेषयिष्यामि विचिन्वन्तु च.जानकीम् ॥ पूर्वादौ मासमायान्तु
मासादूर्ध्वं निहन्मि तान् ॥ ९ ॥ इत्युक्ता वानराः पूर्वपश्चिमोत्तरमार्गगाः ॥ जग्मू रामं ससुग्रीवमपश्यन्तस्तु जानकीम्
॥ १० ॥ रामाङ्गुलीयं सङ्गृह्य हनुमान्वानरैः सह ॥ दक्षिणे मार्गयामास सुप्रभाया गुहान्तिके ॥ ११ ॥ मासादूर्ध्वं च विन्ध्यस्था
अपश्यन्तस्तु जानकीम् ॥ ऊचुर्वृथा मरिष्यामो जटायुर्धन्य एव सः ॥१२॥ सीतार्थेयोऽत्यजत्प्राणान्रावणेन हतो रणे ॥ तच्छ्रुत्वा
प्राह सम्पातिर्विहाय कपिभक्षणम् ॥१३॥ भ्राताऽसौ मे जटायुर्वै मयोड्डीनोऽर्कमण्डलम् ॥ अर्कतापाद्रक्षितोऽगादग्धपक्षोऽहमभ्रगः
॥ १४ ॥ रामवार्त्ताश्रवान्पक्षौ जातौ भूयोऽथ जानकीम् ॥ पश्याम्यशोकवनिकागतां लङ्कागतो किल ॥ १५ ॥ शतयोजनवि-
स्तीर्णे लवणाब्धौ त्रिकूटके ॥ ज्ञात्वा रामं ससुग्रीवं वानराः कथयन्तु वै ॥१६॥ इत्यादिमहापुराणे आग्नेये रामायणे किष्किन्धा-
काण्डवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ अथ सुन्दरकाण्डवर्णनम् ॥ नारद उवाच ॥ सम्पातिवचनं श्रुत्वा हनुमानङ्ग-
दादयः ॥ अब्धिं दृष्ट्वाऽब्रुवंस्तेऽब्धिं लङ्घयेत्को नु जीवयेत् ॥ १ ॥ कपीनां जीवनार्थाय रामकार्य्यप्रसिद्धये ॥ शतयोजनविस्तीर्णं
पुप्लुवेऽब्धिं स मारुतिः ॥ २ ॥ दृष्ट्वोत्थितं च मैनाकं सिंहिकां विनिपात्य च ॥ लङ्कां दृष्ट्वा राक्षसानां गृहाणि वनितागृहे ॥ ३ ॥

दशग्रीवस्य कुम्भस्य कुम्भकर्णस्य रक्षसः ॥ विभीषणस्येन्द्रजितो गृहेऽन्येषां च रक्षसाम् ॥ ४ ॥ नापश्यत्पानभूम्यादौ सीतां चिन्तापरायणः ॥ अशोकवनिकां गत्वा दृष्ट्वाऽऽच्छिशपातले ॥ ५ ॥ राक्षसीरक्षितां सीतां भव भार्य्येति वादिनम् ॥ रावणं शिंशपास्थोऽथ नेति सीतां तु वादिनीम् ॥ ६ ॥ भव भार्या रावणस्य राक्षसीर्वादिनीः कपिः ॥ गते तु रावणे प्राह राजा दशरथोऽभवत् ॥ ७ ॥ रामोऽस्य लक्ष्मणः पुत्रौ वनवासं गतौ वरौ ॥ रामपत्नी जानकी त्वं रावणेन हृता बलात् ॥८॥ रामः सुग्रीवमित्रस्त्वां मार्गयन्प्रैषयच्च माम् ॥ साभिज्ञानं चाङ्गुलीयं रामदत्तं गृहाण वै ॥ ९ ॥ सीताऽङ्गुलीयं जग्राह साऽपश्यन्मारुतिं तरौ ॥ भूयोऽग्रे चोपविष्टं तमुवाच यदि जीवति ॥ १० ॥ रामः कथं न नयति शङ्कितामब्रवीत्कपिः ॥ हनुमानुवाच ॥ रामः सीते न जानीते ज्ञात्वा त्वां स नयिष्यति ॥ ११ ॥ रावणं राक्षसं हत्वा सबलं देवि मा शुचः ॥ साभिज्ञानं देहि मे त्वं मणिं सीता ददात्कपौ ॥ १२ ॥ उवाच मां यथा रामो नयेच्छीघ्रं तथा कुरु ॥ काकाक्षिपातनकथां प्रतियाहि हि शोकह ॥ १३ ॥ मणिं कथां गृहीत्वाह हनुमान्नेष्यते पतिः ॥ अथवा ते त्वरा काचित्पृष्ठमारुह मे शुभे ॥ १४ ॥ अद्य त्वां दर्शयिष्यामि ससुग्रीवं च राघवम् ॥ सीताऽब्रवीद्धनूमन्तं नयतां मां हि राघवः ॥ १५ ॥ हनुमान्स दशग्रीवदर्शनोपायमाकरोत् ॥ वनं बभञ्ज तत्पालान्हत्वा दन्तनखादिभिः ॥ १६ ॥ हत्वा तु किंकरान्सर्वान्सप्त मन्त्रिसुतानपि ॥ पुत्रमक्षं कुमारं च शक्रजिच्च बबन्ध तम् ॥ १७ ॥ नागपाशेन पिङ्गाक्षं दर्शयामास रावणम् ॥ उवाच रावणः कस्त्वं मारुतिः प्राह रावणम् ॥ १८ ॥ हनुमानुवाच ॥ रामदूतो राघवाय सीतां देहि मरिष्यसि ॥ रामबाणैर्हृतः सार्द्धं लंकास्थैः राक्षसैर्ध्रुवम् ॥ १९ ॥ रावणो हन्तुमुद्युक्तो विभीषणनिवारितः ॥ दीपयामास लांगूलं दीप्तपुच्छः स मारुतिः ॥ २० ॥ दग्ध्वा लंकां राक्षसांश्च दृष्ट्वा सीतां प्रणम्य ताम् ॥ समुद्रपारमागत्य दृष्टा सीतेति चाब्रवीत् ॥ २१ ॥ अङ्गदादीनङ्गदाद्यैः पीत्वा मधुवने मधु ॥ जित्वा दधिमुखादींश्च दृष्ट्वा रामं च तेऽब्रुवन् ॥ २२ ॥ दृष्टा सीतेति रामोऽपि हृष्टः पप्रच्छ मारुतिम् ॥ श्रीराम उवाच ॥ कथं दृष्टा त्वया सीता किमुवाच च मां प्रति ॥ २३ ॥ सीता कथामृतेनैव सिञ्च मां कामवह्निगम् ॥ नारद उवाच ॥ हनूमानब्रवीद्रामं लङ्घयित्वाऽब्धिमागतः ॥ २४ ॥

सीतां दृष्ट्वा पुरीं दग्ध्वा सीतामणिं गृहाण वै ॥ हत्वा तं रावणं सीतां प्राप्स्यसे राम मा शुचः ॥२५॥ गृहीत्वा तं मणिं रामो रुरोद विरहातुरः ॥ मणिं दृष्ट्वा जानकी मे दृष्टा सीता नयस्व माम् ॥ २६ ॥ तया विना न जीवामि सुग्रीवाद्यैः प्रबोधितः ॥ समुद्रतीरं गतवांस्तत्र रामं विभीषणः ॥ २७ ॥ गतास्तिरस्कृतो भ्रात्रा रावणेन दुरात्मना ॥ रामाय देहि सीतां त्वमित्युक्तेनासहायवान् ॥ २८ ॥ रामो विभीषणं मित्रं लङ्केश्वर्येऽभ्यषेचयत् ॥ समुद्रं प्रार्थयन्मार्गं यदा नायात्तदा शरैः ॥ २९ ॥ भेदयामास रामं च उवाचाब्धिः समागतः ॥ समुद्र उवाच ॥ नलेन सेतुं बद्ध्वाब्धौ लङ्कां व्रज गभीरकः ॥३०॥ अहं त्वया कृतः पूर्वं रामोऽपि नलसेतुना ॥ कृतेन तरुशैलाद्यैर्गतः पारं महोदधेः ॥ वानरैः स सुवेलस्थः सह लङ्कां ददर्श वै ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये रामायणे सुन्दरकाण्डवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ अथ युद्धकाण्डवर्णनम् ॥ नारद उवाच ॥ रामोक्तश्चाङ्गदो गत्वा रावणं प्राह जानकी ॥ दीयतां राघवायाशु अन्यथा त्वं मरिष्यसि ॥ १ ॥ रावणो हन्तुमुद्युक्तः संग्रामोद्धतराक्षसः ॥ रामायाह दशग्रीवो युद्धमेकं तु मन्यते ॥ २ ॥ रामो युद्धाय तच्छ्रुत्वा लङ्कां सकपिरायया ॥ वानरा हनुमान्मैन्दो द्विविदो जाम्बवान्नलः ॥ ३ ॥ नीलस्तारोऽङ्गदो धूम्रः सुषेणः केशरी गयः ॥ पनसो विनतो रम्भः शरभः क्रथनो बली ॥ ४ ॥ गवाक्षो दधिवक्त्रश्च गवयो गन्धमादनः ॥ एते चान्ये च सुग्रीव एतैर्युक्तो ह्यसङ्ख्यकैः ॥ ५ ॥ रक्षसां वानराणांच युद्धं सङ्कुलमाबभौ ॥ राक्षसा वानराञ्छुः शरशक्तिगदादिभिः ॥ ६ ॥ वानरा राक्षसाञ्जघ्नुर्नखदन्तशिलादिभिः ॥ हस्त्यश्वरथपादातं राक्षसानां बलं हतम् ॥ ७ ॥ हनुमान्गिरिशृङ्गेण धूम्राक्षमवधीद्रिपुम् ॥ अकम्पनं प्रहस्तं च युध्यन्तं नील आवधीत् ॥ ८ ॥ इन्द्रजिच्छरबन्धाच्च विमुक्तौ रामलक्ष्मणौ ॥ तार्क्ष्यसन्दर्शनाद्बाणैर्जघ्नतू रक्षसां बलम् ॥ ९ ॥ रामः शरैर्जर्जरितं रावणं चाकरोद्रणे ॥ राक्षसः कुम्भकर्णं च बोधयामास दुःखितः ॥ १० ॥ कुम्भकर्णः प्रबुद्धोऽथ पीत्वा घटसहस्रकम् ॥ मद्यस्य महिषादीनां भक्षयित्वाह रावणम् ॥ ११ ॥ कुम्भकर्ण उवाच ॥ सीताया हरणं पापं कृतं त्वं हि गुरुर्यतः ॥ अतो गच्छामि युद्धाय समे हन्मि सवानरम् ॥ १२ ॥ नारद उवाच ॥ इत्युक्त्वा वानरान्सर्वान्कुम्भकर्णो ममर्द ह ॥ गृहीतस्तेन सुग्रीवः कर्णनासं चकर्त्त सः ॥ १३ ॥ कर्णनासाविहीनोऽसौ भक्षयामास वानरान् ॥

रामोऽथ कुम्भकर्णस्य बाहू चिच्छेद सायकैः ॥ १४ ॥ ततः पादौ ततश्छित्त्वा शिरो भूमौ व्यपातयत् ॥ अथ कुम्भो निकुम्भश्च मकराक्षश्च राक्षसः ॥ १५॥ महोदरो महापार्श्वो मत्त उन्मत्तराक्षसः ॥ प्रघसो भासकर्णश्च विरूपाक्षश्च संयुगे ॥ १६ ॥ देवान्तको नरान्तश्च त्रिशिराश्चातिकायकः ॥ रामेण लक्ष्मणेनैते वानरैः सविभीषणैः ॥ १७॥ युध्यमानास्तथा ह्यन्ये राक्षसा भुवि पातिताः ॥ इन्द्रजिन्मायया युध्यन्रामादीन्सम्बबन्ध ह ॥ १८॥ वरदत्तैर्नागबाणैरोपध्या तौ विशल्यकौ॥ विशल्ययौत्रणौ कृत्वा मारुत्यानौ-तपर्वते ॥ १९ ॥ हनूमान्धारयामास तत्रागं यत्र संस्थितः ॥ निकुम्भिलायां होमादि कुर्वन्तं तं हि लक्ष्मणः ॥२०॥ शरैरिन्द्रजितं वीरं युद्धे तं तु व्यशातयत् ॥ रावणः शोकसन्तप्तः सीतां हन्तुं समुद्यतः॥ २१ ॥ अविन्ध्यवारितो राजा रथस्थः सबलो ययौ ॥ इन्द्रोक्तो मातली रामं रथस्थं प्रचकार तम् ॥ २२ ॥ रामरावणयोर्युद्धं रामरावणयोरिव ॥ रावणो वानरान्हन्ति मारुत्याद्याश्च रावणम् ॥ २३ ॥ रामः शस्त्रैस्तमस्त्रैश्च ववर्ष जलदो यथा ॥ तस्य ध्वजं स चिच्छेद रथमश्वांश्च सारथिम् ॥ २४ ॥ धनुर्बाहूंश्छिरांस्येव उत्तिष्टान्ति शिरांसि हि ॥ पैतामहेन हृदयं भित्त्वा रामेण रावणः ॥ २५ ॥ भूतले पातितः सर्वे राक्षसैः रुरुदुः स्त्रियः ॥ आश्वास्य तं च संस्कृत्य रामाज्ञप्तो विभीषणः ॥ २६ ॥ हनूमतानयद्रामः सीतां शुद्धां गृहीतवान् ॥ रामो वह्नौ प्रविष्टां तां शुद्धामिन्द्रादिभिः स्तुतः ॥ २७ ॥ ब्रह्मणा दशरथेन त्वं विष्णू राक्षसमर्दनः ॥ इंद्रोऽर्चितोऽमृतवृष्ट्या जीवयामास वानरान् ॥ २८ ॥ रामेण पूजिता जग्मुर्युद्धं दृष्ट्वा दिवं च ते ॥ रामो विभीषणायादाल्लङ्कामभ्यर्च्य वानरान् ॥ २९ ॥ ससीतः पुष्पके स्थित्वागतमार्गेण वै गतः ॥ दर्शयन्वनदुर्गाणि सीतायै हृष्टमानसः ॥ ३० ॥ भरद्वाजं नमस्कृत्य नान्दिग्रामं समागतः ॥ भरतेन नतश्चागादयोध्यां तत्र संस्थितः ॥ ३१ ॥ वसिष्ठादीन्नमस्कृत्य कौसल्यां चैव कैकयीम् ॥ सुमित्रां प्रातराज्योऽथ द्विजादीन्सोऽभ्यपूजयत् ॥ ३२ ॥ वासुदेवं स्वमात्मानमश्वमेधैरथायजत् ॥ सर्वदानानि स ददौ पालयामास स प्रजाः ॥ ३३॥ पुत्रवद्धर्मकामादीन्दुष्टनिग्रहणे रतः ॥ सर्वधर्मपरो लोकः सर्वसस्या च मेदिनी ॥ नाकालमरणश्वासीद्रामे राज्यं प्रशासति ॥ ३४ ॥ इत्यादिमहापुराणे आग्नेये रामायणे युद्धकाण्डवर्णनं नाम दशमोऽध्यायः॥ १० ॥ अथोत्तरकाण्डवर्णनम्॥ नारद उवाच ॥ राज्यस्थं राघवं जग्मुरगस्त्याद्याः

सुपूजिताः ॥ ऋषय ऊचुः॥ धन्यस्त्वं विजयी यस्मादिन्द्राजीद्विनिपातितः ॥ १ ॥ ब्रह्मात्मजः पुलस्त्योऽभूद्विश्रवास्तस्य कैकसी ॥ पुष्पोत्कटाभूत्प्रथमा तत्पुत्रोऽभूद्धनेश्वरः ॥ २ ॥ कैकस्यां रावणो जज्ञे विंशद्बाहुर्दशाननः ॥ तपसा ब्रह्मदत्तेन वरेण जितदेवतः ॥ ३ ॥ कुम्भकर्णः सनिद्रोऽभूद्धर्मिष्ठोऽभूद्विभीषणः ॥ स्वसा शूर्पणखा तेषां रावणान्मेघनादकः ॥ ४ ॥ इन्द्रं जित्वेन्द्रजिच्चाभू-द्रावणादधिको बली ॥ हतस्त्वया लक्ष्मणेन देवादेः क्षेममिच्छता ॥ ५ ॥ नारद उवाच ॥ इत्युक्त्वा ते गता विप्रा अगस्त्याद्या नमस्कृताः ॥ देवप्रार्थितरामोक्तः शत्रुघ्नो लवणार्दनः ॥ ६ ॥ अभूत्पूर्मथुरा काचिद्रामोक्तो भरतोऽवधीत् ॥ कोटित्रयं च शैलूष-पुत्राणां निशितैः शरैः ॥ ७ ॥ शैलूषं दुष्टगन्धर्वं सिंधुतीरनिवासिनम् ॥ तक्षं च पुष्करं पुत्रं स्थापयित्वाथ देशयोः ॥ ८ ॥ भरतोऽगात्सशत्रुघ्नो राघवं पूजयन्स्थितः ॥ रामो दुष्टान्निहत्याजौ शिष्टान्सम्पाल्य मानवः ॥ ९ ॥ पुत्रौ कुशलवौ जातौ वाल्मीकेराश्रमे वरौ ॥ लोकापवादात्त्यक्तायां ज्ञातौ सुचरितश्रवात् ॥ १० ॥ राज्येऽभिषिच्य ब्रह्माहमस्मीति ध्यानतत्परः ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ ११ ॥ राज्यं कृत्वा क्रतून्कृत्वा स्वर्गं देवार्चितो ययौ ॥ सपौरः सानुजः सीतापुत्रो जनपदान्वितः ॥ १२ ॥ अग्निरुवाच ॥ वाल्मीकिर्नारदाच्छ्रुत्वा रामायणमकारयत् ॥ सविस्तरं यदेतच्च शृणुयात्स दिवं व्रजेत् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये रामायणे उत्तरकाण्डवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ अथ श्री हरिवंशवर्णनम् ॥ अग्नि-रुवाच ॥ हरिवंशं प्रवक्ष्यामि विष्णुनाभ्यम्बुजादजः ॥ ब्रह्मणोऽत्रिस्ततः सोमः सोमाज्जातः पुरूरवाः ॥ १ ॥ तस्मादायुरभूत्तस्मान्नहु-षोऽतो ययातिकः ॥ यदुं च तुर्वसुं तस्माद्देवयानी व्यजायत ॥ २ ॥ द्रुह्यं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ यदोःकुले यादवाश्च वासुदेवस्तदुत्तमः ॥ ३ ॥ भुवो भारावतारार्थं देवक्यां वसुदेवतः ॥ हिरण्यकशिपोः पुत्रा षड्गर्भा योगनिद्रया ॥ ४ ॥ विष्णु-प्रयुक्तया नीता देवकीजठरं पुरा ॥ अभूच्च सप्तमो गर्भो देवक्या जठराद्बलः ॥ ५ ॥ संक्रामितोऽभूद्रोहिण्यां रौहिणेयस्ततो हरिः ॥ कृष्णाष्टम्यां च नभसि अर्द्धरात्रे चतुर्भुजः ॥ ६ ॥ देवक्या वसुदेवेन स्तुतो बालो द्विबाहुकः ॥ वसुदेवः कंसभयाद्यशोदा-शयनेऽनयत् ॥ ७ ॥ यशोदाबालिकां गृह्य देवकीशयनेऽनयत् ॥ कंसो बालध्वनिं श्रुत्वा तां चिक्षेप शिलातले ॥ ८ ॥ वारितोऽ-

पि स देवक्या मृत्युर्गर्भोऽष्टमो मम ॥ श्रुत्वाऽशरीरिणीं वाचं मत्तो गर्भाः समारिताः ॥ ९ ॥ समर्पितास्तु देवक्या विवाहसमयेरिताः ॥ सा क्षिप्ता बालिका कंसमाकाशस्थाब्रवीदिदम् ॥ १० ॥ बालिकोवाच ॥ किं मया क्षिप्तया कंस जातो यस्त्वां वधिष्यति ॥ सर्व्वस्वभूतो देवानां भूभारहरणाय सः ॥ ११ ॥ अग्निरुवाच ॥ इत्युक्ता सा च शुम्भादीन्हत्वेन्द्रेण च संस्तुता ॥ आर्या दुर्गा वेदगर्भा अम्बिका भद्रकाल्यपि ॥ १२ ॥ भद्रा क्षेम्या क्षेमकरी नैकबाहुर्नमामि ताम् ॥ त्रिसन्ध्यं यः पठेन्नाम सर्वान्कामानवाप्नुयात् ॥ १३ ॥ कंसोऽपि पूतनादींश्च प्रेषयद्बालनाशने ॥ यशोदापतिनन्दाय वसुदेवेन चार्पितौ ॥ १४ ॥ रक्षणाय च कंसादेर्भीतेनैव हि गोकुले ॥ रामकृष्णौ चेरतुस्तौ गोभिर्गोपालकैः सह ॥ १५ ॥ सर्व्वस्य जगतः पालौ गोपालौ तौ बभूवतुः ॥ कृष्णश्चोलूखले बद्धो दाम्ना व्यथ्रयशोदया ॥ १६ ॥ यमलार्जुनमध्येऽगाद्भग्नौ च यमलार्जुनौ ॥ परिवृत्तश्च शकटः पादक्षेपात्स्तनार्थिना ॥ १७ ॥ पूतना स्तनपानेन सा हता हन्तुमुद्यता ॥ वृन्दावनगतः कृष्णः कालियं यमुनाह्रदात् ॥ १८ ॥ जित्वा निःसार्य चाब्धिस्थं चकार बलसंस्तुतः ॥ क्षेमं तालवनं चक्रे हत्वा धेनुकगर्दभम् ॥ १९ ॥ अरिष्टवृषभं हत्वा केशिनं हयरूपिणम् ॥ शक्रोत्सवं परित्यज्य कारितो गोत्रयज्ञकः ॥ २० ॥ पर्वतं धारयित्वा च शक्राद्वृष्टिर्निवारिता ॥ नमस्कृतो महेन्द्रेण गोविन्दोऽथार्जुनोऽर्पितः ॥ २१ ॥ इंद्रोत्सवस्तु तुष्टेन भूयः कृष्णेन कारितः ॥ रथस्थो मथुरां चागात्कंसोक्ताक्रूरसंस्तुतः ॥ २२ ॥ गोपीभिरनुरक्ताभिः क्रीडिताभिर्निरीक्षितः ॥ रजकं चाप्रयच्छन्तं हत्वा वस्त्राणि चाग्रहीत् ॥ २३ ॥ सह रामेण मालाभृन्मालाकारे वरं ददौ ॥ दत्तानुलेपनां कुब्जामृजुं चक्रेऽहनद्गजम् ॥ २४ ॥ मत्तं कुवलयापीडं द्वारि रङ्गं प्रविश्य च ॥ कमादीनां पश्यतां च मञ्चस्थानां नियुद्धकम् ॥ २५ ॥ चक्रे चाणूरमल्लेन मुष्टिकेन बलोऽकरोत् ॥ चाणूरमुष्टिकौ ताभ्यां हतौ मल्लौ तथापरे ॥ २६ ॥ मथुराधिपतिं कंसं हत्वा तत्पितरं हरिः ॥ चक्रे यादवराजानमस्तिप्राप्ती च कंसगे ॥ २७ ॥ जरासन्धस्य ते पुत्र्यौ जरासन्धस्तदीरितः ॥ चक्रे स मथुरारोधं यादवैर्युयुधे शरैः ॥ २८ ॥ रामकृष्णौ च मथुरां त्यक्त्वा गोमन्तमागतौ ॥ जरासन्धं विजित्याजौ पौण्ड्रकं वासुदेवकम् ॥ २९ ॥ पुरा च द्वारकां कृत्वा न्यवसद्यादवैर्वृतः ॥ भौमं त नरकं

हत्वा तेनानीताश्च कन्यकाः ॥ ३० ॥ देवगंधर्वयक्षाणां ता उवाह जनार्दनः ॥ षोडशस्त्रीसहस्राणि रुक्मिण्याद्यास्तथाष्ट च॥३१॥
सत्यभामासमायुक्तो गरुडे नरकार्दनः ॥ मणिशैलं सरत्ने च इंद्रं जित्वा हरिर्दिवि ॥ ३२ ॥ पारिजातं समानीय सत्यभामागृहेऽ-
करोत् ॥ सांदीपनेश्च शस्त्रास्त्रं ज्ञात्त्वा तद्बालकं ददौ ॥ ३३ ॥ जित्वा पञ्चजनं दैत्यं यमेन च सुपूजितः ॥ अवधीत्कालयवनं
मुचुकुन्देन पूजितः ॥ ३४ ॥ वसुदेवं देवकीं च भक्तान्विप्रांश्च सोऽर्चयत् ॥ रेवत्यां बलभद्राच्च जज्ञाते निशठोल्मुकौ ॥ ३५ ॥
कृष्णात्साम्बो जाम्बवत्यामन्यास्वन्येऽभवन्सुताः ॥ प्रद्युम्नोऽभूच्च रुक्मिण्यां पष्टेऽह्नि स हृतो बलात् ॥ ३६ ॥ शम्बरेणाम्बुधौ क्षिप्तो
मत्स्यो जग्राह धीवरः ॥ तं मत्स्यं शंबरायादान्मायावत्यै च शंबरः ॥ ३७ ॥ मायावती मत्स्यमध्ये दृष्ट्वा स्वं पतिमादरात् ॥ पुपोष
सा तं चोवाच रतिस्तेऽहं पतिर्मम ॥ ३८ ॥ कामस्त्वं शंभुनानङ्गः कृतोऽहं शंबरेण च ॥ हता न तस्य पत्नी त्वं मायाज्ञः शंबरं जहि
॥ ३९ ॥ तच्छ्रुत्वा शंबरं हत्वा प्रद्युम्नः सहभार्यया ॥ मायाभूवत्या ययौ कृष्णं कृष्णो हृष्टोऽथ रुक्मिणी ॥ ४० ॥ प्रद्युम्नादनिरुद्धोभूदुषा-
पतिरुदारधीः ॥ बाणो बलिसुतस्तस्य सुतोषा शोणितं पुरम् ॥ ४१ ॥ तपसा शिवपुत्रोऽभून्मयूरध्वजपातितः ॥ युद्धं प्राप्स्यसि बाण
त्वं बाणं तुष्टः शिवोऽभ्यधात् ॥ ४२ ॥ शिवेन क्रीडतीं गौरीं दृष्ट्वोषा सस्पृहा पतौ ॥ तामाह गौरी भर्त्ता ते निशि स्वप्ने तु दर्शनात्
॥ ४३ ॥ वैशाखमासद्वादश्यां पुमान्भर्त्ता भविष्यति ॥ गौर्युक्ता हर्षिता चोषा गृहे सुप्ता ददर्श तम् ॥ ४४ ॥ आत्मना सङ्गतं ज्ञात्वा
तत्सख्या चित्रलेखया ॥ लिखिताद्वै चित्रपटादनिरुद्धं समानयत् ॥ ४५ ॥ कृष्णपौत्रं द्वारकातो दुहित्रा बाणमन्त्रिणः ॥ कुम्भा-
ण्डस्यानिरुद्धोऽगाद्रराम ह्युषया सह ॥ ४६ ॥ बाणध्वजस्य सम्पातो रक्षिभिः स निवेदितः ॥ अनिरुद्धस्य बाणेन युद्धंमासी-
त्सुदारुणम् ॥ ४७ ॥ श्रुत्वा तु नारदात्कृष्णः प्रद्युम्नबलभद्रवान् ॥ गरुडस्थोऽथ जित्वाग्नीञ्ज्वरं माहेश्वरं तथा ॥ ४८ ॥ हरिशङ्क-
रयोर्युद्धं बभूवाथ शराशरि ॥ नन्दीविनायकस्कन्दमुखास्ताक्ष्यादिभिर्जिताः ॥ ४९ ॥ जृम्भिते शङ्करे सुप्ते जृम्भणास्त्रेण
विष्णुना ॥ छिन्नं सहस्रं बाहूनां रुद्रेणाभयमर्थितम् ॥ ५० ॥ विष्णुना जीवितो बाणो द्विबाहुः प्राब्रवीच्छिवम् ॥ कृष्ण उवाच ॥
त्वया यदभयं दत्तं बाणस्यास्य मयापि तत् ॥ ५१ ॥ आवयोर्नास्ति भेदो वै भेदी नरकमाप्नुयात् ॥ अग्निरुवाच ॥ शिवाद्यैः

पूजितो विष्णुः सानिरुद्ध उषादियुक् ॥ ५२ ॥ द्वारकां तु गतो रेमे उग्रसेनादियादवैः ॥ अनिरुद्धात्मजो वज्रो मार्कण्डेयात्तु सर्ववित् ॥ ५३ ॥ बलभद्रः प्रलम्बघ्नो यमुनाकर्षणोऽभवत् ॥ द्विविदस्य कपेर्भेत्ता कौरवोन्मादनाशनः ॥ ५४ ॥ हरौ रेमेऽनेकमूर्त्तौ रुक्मिण्यादिभिरीश्वरः ॥ पुत्रानुत्पादयामास त्वसंख्यातान्स यादवान् ॥ हरिवंशं पठेद्यः स प्राप्तकामो हरिं व्रजेत् ॥ ॥ ५५ ॥ इत्यादिमहापुराणे आग्नेये हरिवंशवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ अथ भारताख्यानम् ॥ अग्निरुवाच ॥ भारतं संप्रवक्ष्यामि कृष्णमाहात्म्यलक्षणम् ॥ भूभारमहरद्विष्णुर्निमित्तीकृत्य पाण्डवान् ॥ १ ॥ विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरत्रितः ॥ सोमः सोमाद्बुधस्तस्मादैल आसीत्पुरूरवाः ॥ २ ॥ तस्मादायुस्ततो राजा नहुषोऽतो ययातिकः ॥ ततः पूरुस्तस्य वंशे भरतोऽथ नृपः कुरुः ॥ ३ ॥ तद्वंशे शन्तनुस्तस्माद्भीष्मो गङ्गासुतोऽनुजौ ॥ चित्राङ्गदो विचित्रश्च सत्यवत्यां च शन्तनोः ॥ ४ ॥ स्वर्गं गते शन्तनौ च भीष्मो भार्य्याविवर्जितः ॥ अपालयद्भ्रातृराज्यं बालश्चित्राङ्गदो हतः ॥ ५ ॥ चित्राङ्गदेन द्वे कन्ये काशिराजस्य चाम्बिका ॥ अंम्बालिका च भीष्मेण आनीते विजितारिणा ॥ ६ ॥ भार्ये विचित्रवीर्यस्य यक्ष्मणा स दिवं गतः ॥ सत्यवत्या ह्यनुमतादम्बिकायां नृपोऽभवत् ॥ ७ ॥ धृतराष्ट्रोऽम्बालिकायां पाण्डुश्च व्यासतः सुतः ॥ गान्धार्य्यां धृतराष्ट्राच्च दुर्योधनमुखं शतम् ॥ ८ ॥ शतशृङ्गाश्रमपदे भार्यायोगादथो मृतः ॥ ऋषिशापात्ततो धर्म्मात्कुन्त्यां पाण्डोर्युधिष्ठिरः ॥ ९ ॥ वाताद्भीमोऽर्जुनः शक्रान्माद्र्यामश्विकुमारतः ॥ नकुलः सहदेवश्च पाण्डुर्माद्रीयुतो मृतः ॥ १० ॥ कर्णः कुन्त्यां हि कन्यायां जातो दुर्योधनाश्रितः ॥ कुरुपाण्डवयोर्वैरं दैवयोगाद्बभूव ह ॥ ११ ॥ दुर्योधनो जतुगृहे पाण्डवानदहत्कुधीः ॥ दग्धागारा विनिष्क्रान्ता मातृष्ष्ठास्तु पाण्डवाः ॥ १२ ॥ ततस्त एकचक्रायां ब्राह्मणस्य निवेशने ॥ मुनिवेषाः स्थिताः सर्वे निहत्य बकराक्षसम् ॥ १३ ॥ ययुः पाञ्चालविषयं द्रौपद्यास्ते स्वयम्वरे ॥ संप्राप्ता बहुवेषेण द्रौपदी पञ्चपाण्डवैः ॥ १४ ॥ अर्द्धराज्यं ततः प्राप्ता ज्ञाता दुर्योधनादिभिः ॥ गाण्डीवं च धनुर्दिव्यं पावकाद्रथमुत्तमम् ॥ १५ ॥ सारथिं चार्जुनः संख्ये कृष्णमक्षय्यसायकान् ॥ ब्रह्मास्त्रादींस्तथा द्रोणात्सर्वे शस्त्रविशारदाः ॥ १६ ॥ कृष्णेन सोऽर्जुनो वह्निं खाण्डवे समतर्पयत् ॥ इन्द्रवृष्टिं वारयंश्च शरव-

षण पाण्डवः ॥ १७ ॥ जिता दिशः पाण्डवैश्च राज्यं चक्रे युधिष्ठिरः ॥ बहुस्वर्णं राजसूयं न सेहे तं सुयोधनः ॥ १८ ॥ भ्रात्रा दुःशासनेनोक्तः कर्णेन प्रातभूतिना ॥ द्यूतकार्ये शकुनिना द्यूतेन स युधिष्ठिरम् ॥ १९ ॥ अजयत्तस्य राज्यं च सभास्थो मायया हसन् ॥ जितो युधिष्ठिरो भ्रातृयुक्तश्चारण्यकं ययौ ॥ २० ॥ वने द्वादशवर्षाणि प्रतिज्ञातानि सोऽनयत् ॥ अष्टाशीतिसहस्राणि भोजयन्पूर्ववद्द्विजान् ॥ २१ ॥ सधौम्यो द्रौपदीपष्ठस्ततः प्रायाद्विराटकम् ॥ कङ्को द्विजो ह्यविज्ञातो राजा भीमोऽथ सूपकृत् ॥ २२ ॥ बृहन्नडार्जुनो भार्या सैरन्ध्री यमजौ तथा ॥ अन्यनाम्ना भीमसेनः कीचकं चावधीन्निशि ॥ २३ ॥ द्रौपदीं हर्त्तुकामं तमर्जुनश्चाजयत्कुरून् ॥ कुर्वन्तो गोग्रहादींश्च तैर्ज्ञाताः पाण्डवा अथ ॥ २४ ॥ सुभद्रा कृष्णभगिनी अर्जुनात्सममजीजनत् ॥ अभिमन्युं ददौ तस्मै विराटश्चोत्तरां सुताम् ॥ २५ ॥ आसीत्सप्ताक्षौहिणीशो धर्मराजो रणाय सः ॥ कृष्णो दूतोऽब्रवीद्गत्वा दुर्योधनममर्षणम् ॥ २६ ॥ एकादशाक्षौहिणीशं नृपं दुर्योधनं तदा ॥ युधिष्ठिरायार्द्धराज्यं देहि ग्रामांश्च पञ्च वा ॥ २७ ॥ युध्यस्व वा वचः श्रुत्वा कृष्णमाह सुयोधनः ॥ सुयोधन उवाच ॥ भूसूच्यग्र न दास्यामि योत्स्ये संग्रहणोद्यतः ॥ २८ ॥ अग्निरुवाच ॥ विश्वरूपं दर्शयित्वा अधृष्यं विदुरार्चितः ॥ प्राग्राद्युधिष्ठिरं प्राह योधयैनं सुयोधन ॥ २९ ॥ इत्यादिमहापुराणे आग्नेये महाभारताख्यानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ अग्निरुवाच ॥ यौधिष्ठिरी कुरुक्षेत्रं ययौ दौर्योधनी चमूः ॥ भीष्मद्रोणादिकान्दृष्ट्वा नायुध्यति गुरूनिति ॥१॥ पार्थं ह्युवाच भगवान्न शोच्या भीष्ममुख्यकाः ॥ शरीराणि विनाशीनि न शरीरी विनश्यति ॥२॥ अयमात्मा परं ब्रह्म अहं ब्रह्मास्मि विद्धि तम् ॥ सिद्ध्यसिद्ध्योः समो योगी राजधर्मं प्रपालय ॥ ३ ॥ कृष्णोक्तोऽथोर्जुनोऽयुध्यद्रथस्थो वाद्यशब्दवान् ॥ भीष्मः सेनापतिरभूदादौ दौर्योधने बले ॥ ४ ॥ पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ॥ धार्तराष्ट्राः पाण्डवांश्च जघ्नुर्युद्धे सभीष्मकाः ॥ ५ ॥ धार्त्तराष्ट्रांश्शिखण्ड्याद्याः पाण्डवा जघ्नुराहवे ॥ देवासुरसमं युद्धं कुरुपाण्डवसेनयोः ॥ ६ ॥ बभूव खस्थदेवानां पश्यतां प्रीतिवर्द्धनम् ॥ भीष्मोऽस्त्रैः पाण्डवं सैन्यं दशाहोभिर्न्यपातयत् ॥ ७ ॥ दशमे ह्यर्जुनो बाणैर्भीष्मं वीरं वर्वर्ष ह ॥ शिखण्डी द्रुपदोक्तोऽस्त्रैर्ववर्ष जलदो यथा ॥ ८ ॥ हस्त्यश्वरथपादा-

तमन्योन्यास्त्रनिपातितम् ॥ भीष्मः स्वच्छन्दमृत्युश्च युद्धमार्गं प्रदर्श्य च ॥ ९ ॥ वसूक्तो वसुलोकाय शरशय्यागतः स्थितः ॥ उत्तरायणमीक्षंश्च ध्यायन्विष्णुं स्तुवन्स्थितः ॥ १० ॥ दुर्योधने तु शोकार्ते द्रोणः सेनापतिस्त्वभूत् ॥ पाण्डवे हर्षिते सैन्ये धृष्टद्युम्नश्चमूपतिः ॥ ११ ॥ तयोर्युद्धं बभूवोग्रं यमराष्ट्रविवर्धनम् ॥ विराटद्रुपदाद्याश्च निमग्ना द्रोणसागरे ॥ १२ ॥ दौर्योधनी महासेना हस्त्यश्वरथपत्तिनी ॥ धृष्टद्युम्नाधिपतिना द्रोणः काल इवाबभौ ॥ १३ ॥ हतोऽश्वत्थामा वेत्युक्ते द्रोणः शस्त्राणि चात्यजत् ॥ धृष्टद्युम्नशराक्रान्तः पतितः स महीतले ॥ १४ ॥ पञ्चमेऽहनि दुर्द्धर्षः सर्वक्षत्रं प्रमथ्य च ॥ दुर्योधने तु शोकार्त्ते कर्णः सेनापतिस्त्वभूत् ॥ १५ ॥ अर्जुनः पाण्डवानां च तयोर्युद्धं बभूव ह ॥ शस्त्राशस्त्रि महारौद्रं देवासुररणोपमम् ॥ १६ ॥ कर्णार्जुनाख्ये सङ्ग्रामे कर्णोऽरीनवधीच्छरैः ॥ द्वितीयेऽहनि कर्णस्तु अर्जुनेन निपातितः ॥ १७ ॥ शल्यो दिनार्द्धं युयुधे ह्यवधीत्तं युधिष्ठिरः ॥ युयुधे भीमसेनेन हतसैन्यः सुयोधनः ॥ १८ ॥ बहून्हत्वा नरादींश्च भीमसेनमथाद्रवत् ॥ गदया प्रहरन्तं तु भीमस्तं हि व्यपातयत् ॥ १९ ॥ गदयान्यानुजांस्तस्य तस्मिन्नष्टादशेऽहनि ॥ रात्रौ सुषुप्तं च बलं पाण्डवानां न्यपायत् ॥ २० ॥ अक्षौहिणीप्रमाणं तु अश्वत्थामा महाबलः ॥ द्रौपदेयान्सपाञ्चालान्धृष्टद्युम्नं च सोऽवधीत् ॥ २१ ॥ पुत्रहीनां द्रौपदीं तां रुदन्तीमर्जुनस्ततः ॥ शिरोमणिं तु जग्राह ऐषीकास्त्रेण तस्य च ॥ २२ ॥ अश्वत्थामास्त्रनिर्दग्धं जीवयामास वै हरिः ॥ उत्तरायास्ततो गर्भं स परीक्षिदभून्नृपः ॥ २३ ॥ कृतवर्मा कृपो द्रौणिस्त्रयो मुक्तास्ततो रणात् ॥ पाण्डवाः सात्यकिः कृष्णः सप्त मुक्ता न चापरे ॥ २४ ॥ स्त्रियश्चार्त्ताः समाश्वास्य भीमाद्यैः स युधिष्ठिरः ॥ संस्कृत्य प्रहतान्वीरान्दत्तोदकधनादिकः ॥ २५ ॥ भीष्माच्छान्तनवाच्छ्रुत्वा धर्म्मान्सर्वांश्च शान्तिदान् ॥ राजधर्म्मान्मोक्षधर्म्मान्दानधर्मान्नृपोऽभवत् ॥ २६ ॥ अश्वमेधे ददौ दानं ब्राह्मणेभ्योऽरिमर्दनः ॥ श्रुत्वार्जुनान्मौसलेयं यादवानां च संक्षयम् ॥ राज्ये परीक्षितं स्थाप्य सानुजः स्वर्गमाप्तवान् ॥ २७ ॥ इत्यादिमहापुराणे आग्नेये महाभारताख्यानं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ अथ पाण्डवचरितवर्णनम् ॥ अग्निरुवाच ॥ युधिष्ठिरे तु राज्यस्थे आश्रमादाश्रमान्तरम् ॥ धृतराष्ट्रो वनमगाद्गान्धारी च पृथा द्विज ॥ १ ॥ विदुरस्त्वग्निना दग्धो वनजेन दिवङ्गतः ॥ एवं

विष्णुभुवो भारमहरद्दानवादिकम् ॥ २ ॥ धर्म्मायाधर्म्मनाशाय निमित्तीकृत्य पाण्डवान् ॥ स विप्रशापव्याजेन मुसलेनाहनत्कुलम् ॥ ३ ॥ यादवानां भारकरं वज्रं राज्येऽभ्यषेचयत् ॥ देवादेशात्प्रभासे स देहं त्यक्त्वा स्वयं हरिः ॥ ४ ॥ इन्द्रलोके ब्रह्मलोके पूज्यते स्वर्गवासिभिः ॥ बलभद्रोऽनन्तमूर्तिः पातालम्वर्गमीयिवान् ॥ ५ ॥ अविनाशी हरिर्देवो ध्यानिभिर्ध्येय एव सः ॥ विना तं द्वारकास्थानं प्लावयामास सागरः ॥ ६ ॥ संस्कृत्य यादवान्पार्थो दत्तोदकधनादिकः ॥ स्त्रियोऽष्टावक्रशापेन भार्य्या विष्णोश्च याः स्थिताः ॥ ७ ॥ पुनर्म्लेच्छापनो नीता गोपालैर्लगुडायुधैः ॥ अर्जुनं हि तिरस्कृत्य पार्थः शोकं चकार ह ॥ ८ ॥ व्यासेनाश्वासितो मेने बलं मे कृष्णसन्निधौ ॥ हस्तिनापुरमागत्य पार्थः सर्वं न्यवेदयत् ॥ ९ ॥ युधिष्ठिराय स भ्रात्रे पालकाय नृणां तदा ॥ तद्धनुस्त्राणि चास्त्राणि स रथस्ते च वाजिनः ॥ १० ॥ विना कृष्णेन तन्नष्टं दानं चाश्रोत्रियं यथा ॥ तच्छ्रुत्वा धर्मराजस्तु राज्ये स्थाप्य परीक्षितम् ॥ ११ ॥ प्रस्थानं प्रस्थितो धीमान्द्रौपद्या भ्रातृभिः सह ॥ संसारानित्यतां ज्ञात्वा जपन्नृषभतं हरेः ॥ १२ ॥ महापथे तु पतिता द्रौपदी सहदेवकः ॥ नकुलः फाल्गुनो भीमो राजा शोकपरायणः ॥ १३ ॥ इन्द्रांनीतरथारूढः सानुजः स्वर्गमाप्तवान् ॥ दृष्ट्वा दुर्योधनादींश्च वासुदेवं च हर्षितः ॥ एतत्ते भारतं प्रोक्तं यः पठेत्स दिवं व्रजेत् ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये महाभारताख्यानं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ अथ बुद्धाद्यवतारकथनम् ॥ अग्निरुवाच ॥ वक्ष्ये बुद्धावतारं च पठतः शृण्वतोऽर्थदम् ॥ पुरा देवासुरा युद्धे दैत्यैर्देवाः पराजिताः ॥ १ ॥ रक्षरक्षेति शरणं वदन्तो जग्मुरीश्वरम् ॥ मायामोहस्वरूपोऽसौ शुद्धोदनसुतोऽभवत् ॥ २ ॥ मोहयामास दैत्यांस्तांस्त्याजिता वेदधर्मकम् ॥ ते च बौद्धा बभूवुर्हि तेभ्योऽन्ये वेदवर्जिताः ॥ ३ ॥ आर्हतः सोऽभवत्पश्चादार्हतान्करोत्परान् ॥ एवं पाषण्डिनो जाता वेदधर्म्मादिवर्जिताः ॥ ४ ॥ नरकार्हं कर्म चक्रुर्यहीप्यन्त्यधमादपि ॥ सर्वे कलियुगान्ते तु भविष्यन्ति च सङ्करा ॥ ५ ॥ दस्यवः शीलहीनाश्च वेदो वाजसनेयकः ॥ दश पञ्च च शाखा वै प्रमाणं नु भविष्यति ॥ ६ ॥ धर्मकंचुकसंवीता अधर्मरुचयस्तथा ॥ मानुषान्भक्षयिष्यन्ति म्लेच्छाः पार्थिवरूपिणः ॥ ७ ॥ कल्की विष्णुयशःपुत्रो याज्ञवल्क्यपुरोहितः ॥ उत्सादयिष्यति म्लेच्छान्गृहीतास्त्रः कृतायुधः ॥ ८ ॥

स्थापयिष्यति मर्य्यादां चातुर्वर्ण्ये यथोचिताम् ॥ आश्रमेषु च सर्वेषु प्रजाः सद्धर्मवर्त्मनि ॥ ९ ॥ कल्किरूपं परित्यज्य हरिः स्वर्गं गमिष्यति ॥ ततः कृतयुगं नाम पुरावत्सम्भविष्यति ॥ १० ॥ वर्णाश्रमाश्च धर्मेषु स्वेषु स्थास्यन्ति सत्तम ॥ एवं सर्वेषु कल्पेषु सर्वमन्वन्तरेषु च ॥ ११ ॥ अवतारा असंख्याता अतीतानागतादयः ॥ विष्णोर्दशावतारख्यान्यः पठेच्छृणुयान्नरः ॥ १२ ॥ सोऽवाप्तकामो विमलः सकुलः स्वर्गमाप्नुयात् ॥ धर्माधर्मव्यवस्थानमेवं वै कुरुते हरिः ॥ अवतीर्णश्च स गतः सर्गादेः कारणं हरिः ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये बुद्धकल्क्यवतारवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ अथ सृष्टिवर्णनम् ॥ अग्निरुवाच ॥ जगत्सर्गादिकां क्रीडां विष्णोर्वक्ष्येऽधुना शृणु ॥ स्वर्गादिकृत्स सर्गादिः सृष्ट्यादिः सगुणोऽगुणः ॥ १ ॥ ब्रह्माव्यक्तं सदग्रेऽभून्न खं रात्रिदिनादिकम् ॥ प्रकृतिं पुरुषं विष्णुं प्रविश्याक्षोभयत्ततः ॥ २ ॥ सर्गकाले महत्तत्त्वमहङ्कारस्ततोऽभवत् ॥ वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥ ३ ॥ अहङ्कारात्तु शब्दमात्रमाकाशमभवत्ततः ॥ स्पर्शमात्रोऽनिलस्तस्माद्रूपमात्रोऽनलस्ततः ॥ ४ ॥ रसमात्रा आप इतो गन्धमात्रा मही स्मृता ॥ अहङ्कारात्तामसात्तु तैजसानीन्द्रियाणि च ॥ ५ ॥ वैकारिका दश देवा मन एकादशेन्द्रियम् ॥ ततः स्वयम्भूर्भगवान्ससृक्षुर्विविधाः प्रजाः ॥ ६ ॥ अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ ७ ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ हिरण्यवर्णमभवत्तदण्डमुदकेशयम् ॥ ८ ॥ तस्मिञ्जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम् ॥ हिरण्यगर्भो भगवानुषित्वा परिवत्सरम् ॥ ९ ॥ तदण्डमकरोद्द्वैधं दिवं भुवमथापि च ॥ तयोः शकलयोर्मध्ये आकाशममृजत्प्रभुः ॥ १० ॥ अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे ॥ तत्र कालं मनो वाचं कामं क्रोधमथो रतिम् ॥ ११ ॥ ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन्प्रजापतिः ॥ विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ॥ १२ ॥ वयांसि च ससर्जादौ पर्जन्यं चाथ वक्रतः ॥ ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये ॥ १३ ॥ साध्यांस्तैरयजन्देवान्भूतमुच्चावचं भुजात् ॥ सनत्कुमारं रुद्रं च ससर्ज क्रोधसम्भवम् ॥ १४ ॥ मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् ॥ वसिष्ठं मानसाः सप्त ब्रह्माण इति निश्चिताः ॥ १५ ॥ सप्तैते जनयन्ति स्म प्रजा रुद्राश्च सत्तम ॥ द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽ-

भवत् ॥ अर्द्धेन नारी तस्यां स ब्रह्मा वै चासृजत्प्रजाः ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये जगत्सर्गवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ स्वायम्भुववंशवर्णनम् ॥ अग्निरुवाच ॥ प्रियव्रतोत्तानपादौ मनुः स्वायम्भुवः सुतौ ॥ अर्जीजनत्सुतां रम्यां शतरूपां तपोऽन्विताम् ॥ १ ॥ काम्यां कर्दमभार्यातः सम्राट् कुक्षिर्विराट् प्रभुः ॥ सुरुच्यामुत्तमो जज्ञे पुत्र उत्तानपादतः ॥ २ ॥ सुनीत्यां तु ध्रुवः पुत्रस्तपस्तेपे स कीर्तये ॥ ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि हे मुने ॥ ३ ॥ तस्मै प्रीतो हरिः प्रादान्मुन्यग्रे स्थानकं स्थिरम् ॥ श्लोकं पपाठ ह्युशना वृद्धिं दृष्ट्वा स तस्य च ॥ ४ ॥ अहोऽस्य तपसो वीर्यमहो श्रुतमहोऽद्भुतम् ॥ यमग्र्य पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥ ५ ॥ तस्माच्छिष्टिश्च भव्यश्च ध्रुवाच्छम्भुर्व्यजायत ॥ शिष्टेराधत्त सुच्छाया पञ्च पुत्रानकल्मषान् ॥ ६ ॥ रिपुं रिपुञ्जयं रिप्रं वृकलं वृकतेजसम् ॥ रिपोराधत्त बृहती चाक्षुषं सर्वतेजसम् ॥ ७ ॥ अजीजनत्पुष्करिण्यां वीरण्यां चाक्षुषो मनुम् ॥ मनोरजायन्त दश नड्वलायां सुतोत्तमाः ॥ ८ ॥ ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः ॥ अग्निष्टुरतिरात्रश्च सुद्युम्नश्चातिमन्युकः ॥ ९ ॥ ऊरोरजनयत्पुत्रान्पडाग्नेयो महाप्रभान् ॥ अङ्गं सुमनसं स्वाति क्रतुमङ्गिरसं गयम् ॥ १० ॥ अङ्गात्सुनीथापत्यं वै वेनमेकं व्यजायत ॥ अरक्षकः पापरतः स हतो मुनिभिः कुशैः ॥ ११ ॥ प्रजार्थमृषयोऽथास्य ममन्थुर्दक्षिणं करम् ॥ वेनस्य मथिते पाणौ सम्बभूव पृथुर्नृपः ॥ १२ ॥ तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः ॥ करिष्यति महातेजा यशश्च प्राप्स्यते महत् ॥ १३ ॥ स धन्वी कवची जातस्तेजसा निर्दहन्निव ॥ पृथुर्वैन्यः प्रजाः सर्वा ररक्ष क्षत्रपूर्वजः ॥ १४ ॥ राजसूयाभिषिक्तानामाद्यः स पृथिवीपतिः ॥ तस्माच्चैव समुत्पन्नौ निपुणौ सूतमागधौ ॥ १५ ॥ तत्स्तोत्रं चक्रतुर्वीरौ राज्ञाभूज्जनरञ्जनात् ॥ दुग्धा गौस्तेन सस्यार्थं प्रजानां जीवनाय च ॥१६॥ सहदेवैर्मुनिगणैर्गन्धर्वैः साप्सरोगणैः ॥ पितृभिर्दानवैः सर्पैर्वीरुद्भिः पर्वतैर्जनैः ॥ १७ ॥ तेषुतेषु च पात्रेषु दुह्यमाना वसुन्धरा ॥ प्रादाद्यथेप्सितं क्षीरं तेन प्राणानधारयत् ॥ १८ ॥ पृथोः पुत्रौ तु धर्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ ॥ शिखण्डिनी हविर्द्धानमन्तर्द्धानाद्व्यजायत ॥ १९ ॥ हविर्द्धानात्पडाग्नेयी धिषणाजनयत्सुतान् ॥ प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ ॥ २० ॥ प्राचीनाग्राः कुशास्तस्य पृथिव्यां यजतो यतः ॥ प्राचीनबर्हिर्भ-

गवान्महानासीत्प्रजापतिः ॥ २१ ॥ सर्वर्णोऽधत्त सामुद्री दश प्राचीनबर्हिषः ॥ सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥ २२ ॥ अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः ॥ दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥ २३ ॥ प्रजापतित्वं सम्प्राप्य तुष्टा विष्णोश्च निर्गताः ॥ भूः खं व्याप्तं हि तरुभिस्तांस्तरूनदहंश्च ते ॥२४॥ मुखजाग्निमरुद्भ्यां च दृष्ट्वा चाथ द्रुमक्षयम् ॥ उपगम्याब्रवीद्देवान्राजा सोमः प्रजापतीन् ॥ २५ ॥ कोपं यच्छत दास्यन्ति कन्यां वो मारिषां वराम् ॥ तपस्विनो मुनेः कण्डोः प्रम्लोचायां मयैव च ॥ २६ ॥ भविष्यं जानता सृष्टा भार्य्यां वोऽस्तु कुलंकरी ॥ अस्यामुत्पत्स्यते दक्षः प्रजाः संवर्द्धयिष्यति ॥ २७ ॥ प्रचेतसस्तां जगृहुर्दक्षोऽस्यां च ततोऽभवत् ॥ अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः ॥ २८ ॥ ससृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः ॥ ददौ स दश धर्म्माय कश्यपाय त्रयोदश ॥ २९ ॥ सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेमये ॥ द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे ह्यदात् ॥ ३० ॥ तासु देवाश्च नाग्याद्या मैथुनान्मनसा पुरा ॥ धर्मसर्गं प्रवक्ष्यामि दशपत्नीषु धर्मतः ॥ ३१ ॥ विश्वेदेवास्तु विश्वायाः साध्यान्साध्या व्यजायत ॥ मरुत्वत्या मरुत्वन्तो वसोस्तु वसवोऽभवन् ॥ ३२ ॥ भानोऽस्तु भानवः पुत्रा मुहूर्त्तास्तु मुहूर्त्तजाः ॥ लम्बाया धर्मतो घोषो नागवीथी च यामिजा ॥ ३३ ॥ पृथिवीविषयं सर्वं मरुत्वत्यां व्यजायत ॥ सङ्कल्पायास्तु सङ्कल्पा इन्दोर्नक्षत्रतः सुताः ॥ ३४ ॥ आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ च नामतः ॥ ३५ ॥ आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो मुनिस्तथा ॥ ध्रुवस्य कालो लोकान्तो वर्च्चाः सोमस्य वै सुतः ॥ ३६ ॥ धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥ मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ॥ ३७ ॥ पुरोजवोऽनिलस्यासीदविज्ञातोऽनलस्य च ॥ अग्निपुत्रः कुमारश्च शरस्तम्बे व्यजायत ॥ ३८ ॥ तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ॥ कृत्तिकातः कार्त्तिकेयो यातिः सनत्कुमारकः ॥ ३९ ॥ प्रत्यूषादेवलो जज्ञे विश्वकर्म्मा प्रभायुतः ॥ कर्त्ता शिल्पसहस्राणां त्रिदशानां च वर्द्धकिः ॥ ४० ॥ मनुष्याश्चोपजीवन्ति शिल्पं वै भूषणादिकम् ॥ सुरभी कश्यपाद्रुद्रानेकादश विजज्ञुषी ॥ ४१ ॥ महादेवप्रसादेन तपसा भाविता सती ॥ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च सत्तम ॥ ४२ ॥ त्वष्टुश्चैवात्मजः श्रीमान्विश्वरूपो महायशाः ॥ हरश्च बहुरूपश्च

त्र्यम्बकश्चापरो जतः ॥ ४३ ॥ वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा ॥ मृगव्याधश्च सर्पश्च कपाली दश चैककः ॥ रुद्राणां च शतं लक्षं वैवर्यातं सचराचरम् ॥ ४४ ॥ इत्यादिमहापुराणे आग्नेये स्वायम्भुवमनुवंशवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ अथ कश्यपवंशवर्णनम् ॥ अग्निरुवाच ॥ कश्यपस्य वदे सर्गमादित्यादिषु हे मुने ॥ चाक्षुषे तुषिता देवास्तेऽदित्यां कश्यपात्पुनः ॥ १ ॥ आसन्विष्णुश्च शक्रश्च त्वष्टा धाता तथार्य्यमा ॥ पूषा विवस्वान्सविता मित्रोऽथ वरुणो भगः ॥ २ ॥ अंशुश्च द्वादशादित्या अ-सन्वैवस्वतेऽन्तरे ॥ अरिष्टनेमिपत्नीनामपत्यानीह षोडश ॥ ३ ॥ बहुपुत्रस्य विदुषश्चतस्रो विद्युतः सुताः ॥ प्रत्यङ्गिरसजाः श्रेष्ठाः कृशाश्वस्य सुरायुधाः ॥ ४ ॥ उदयास्तमने सूर्य्ये तद्वदेते युगेयुगे ॥ हिरण्यकशिपुर्दित्यां हिरण्याक्षश्च कश्यपात् ॥ ५ ॥ सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः ॥ राहुप्रभृतयस्तस्यां सैंहिकेया इति श्रुताः ॥ ६ ॥ हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः ॥ अनुह्लादश्च ह्लादश्च प्रह्लादश्चातिवैष्णवः ॥ ७ ॥ संह्लादश्च चतुर्थोऽभूद्ध्लादपुत्रो ह्लदस्तथा ॥ संह्लादपुत्र - आयुष्मान्शिबिर्बाष्कल एव च ॥ ८ ॥ विरोचनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् ॥ बलेः पुत्रशतं त्वासीद्बाणज्येष्ठं महामुने ॥ ९ ॥ पुरा कल्पे हि बाणेन प्रसाद्योमापतिं वरः ॥ पार्श्वतो विहरिष्यामीत्येवं प्राप्तश्च ईश्वरात् ॥ १० ॥ हिरण्याक्षसुताः पञ्च शम्बरः शकुनिस्त्विति ॥ द्विमूर्द्धा शङ्कुरार्यश्च शतमासन्दनोः सुताः ॥ ११ ॥ स्वर्भानोः सुप्रभा कन्या पुलोम्नस्तु शची स्मृता ॥ उपदानवी हयशिरा शर्मिष्ठा वार्षपर्वणी ॥ १२ ॥ पुलोमा कालका चैव वैश्वानरसुते उभे ॥ कश्यपस्य तु भार्य्ये द्वे तयोः पुत्राश्च कोटयः ॥ १३ ॥ प्रह्लादस्य चतुष्कोट्यो निवातकवचाः कुले ॥ ताम्रायाः षट् सुताः स्युश्च काकी श्येनी च भास्यपि ॥ १४ ॥ गृध्रिका च शुचिग्रीवा ताभ्यः काकादयोऽभवन् ॥ अश्वाश्वोष्ट्राश्च ताम्रायां अरुणो गरुडस्तथा ॥ १५ ॥ विनतायाः सहस्रं तु सर्पाश्च सुरसाभवाः ॥ कादृवेयाः सहस्रं तु शेषवासुकितक्षकाः ॥ १६ ॥ दंष्ट्रिणः क्रोधवशगा धरोत्थाः पक्षिणो जले ॥ सुरभ्यां गोमहिष्यादिरिरोत्पन्नास्तृणादयः ॥ १७ ॥ खसायां यक्षरक्षांसि मुनेरप्सरसोऽभवन् ॥ अरिष्टायान्तु गन्धर्वाः कश्यपाद्धि स्थिरं चरम् ॥ १८ ॥ एषां पुत्रादयोऽ-संख्या देवैर्वै दानवा जिताः ॥ दितिर्विनष्टपुत्रा वै तोषयामास कश्यपम् ॥ १९ ॥ पुत्रमिन्द्रप्रहर्त्तारमिच्छती प्राप कश्यपात् ॥

पादप्रक्षालनात्सुमा तस्या गर्भं जघान ह ॥ २० ॥ छिद्रमन्विष्य चेन्द्रस्तु ते देवा मरुतोऽभवन् ॥ शक्रस्यैकोनपञ्चाशत्सहाया दीप्ततेजसः ॥ २१ ॥ एतत्सर्वं हरिर्ब्रह्मा अभिषिच्य पृथुं नृपम् ॥ ददौ क्रमेण राज्यानि अन्येषामधिपो हरिः ॥ २२ ॥ द्विजौषधीनां चन्द्रश्च अपां तु वरुणो नृपः ॥ राज्ञां वैश्रवणो राजा सूर्य्याणां विष्णुरीश्वरः ॥ २३ ॥ वसूनां पावको राजा मरुतां वासवः प्रभुः ॥ प्रजापतीनां दक्षोऽथ प्रह्लादो दानवाधिपः ॥ २४ ॥ पितॄणां च यमो राजा भूतादीनां हरः प्रभुः ॥ हिमवांश्चैव शैलानां नदीनां सागरः प्रभुः ॥ २५ ॥ गन्धर्वाणां चित्ररथो नागानामथ वासुकिः ॥ सर्पाणां तक्षको राजा गरुडः पक्षिणामथ ॥ २६ ॥ ऐरावतो गजेन्द्राणां गोवृषोऽथ गवामपि ॥ मृगाणामथ शार्दूलः पुष्पो वनस्पतीश्वरः ॥ २७ ॥ उच्चैःश्रवास्तथाश्वानां सुधन्वा पूर्वपालकः ॥ दक्षिणस्यां शङ्खपदः केतुमान्पालको जले ॥ हिरण्यरोमकः सौम्ये प्रतिसर्गोऽयमीरितः ॥ २८ ॥ इत्यादिमहापुराणे आग्नेये प्रतिसर्गवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ पुनः जगत्सर्गवर्णनम् ॥ अग्निरुवाच ॥ प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः ॥ १ ॥ वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ॥ इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः ॥ २ ॥ मुख्यः सर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥ तिर्य्यक्स्रोतास्तु यः प्रोक्तस्तैर्य्यग्योन्यस्ततः स्मृतः ॥ ३ ॥ तथोर्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः ॥ ततोऽर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ॥ ४ ॥ अष्टमोऽनुग्रहः सर्गः सात्विकस्तामसश्च यः ॥ पञ्चैते वैकृताः सर्गाः प्राकृताश्च त्रयः स्मृताः ॥ ५ ॥ प्राकृतो वैकृतश्चैव कौमारो नवमस्तथा ॥ ब्रह्मणो नव सर्गास्तु जगतो मूलहेतवः ॥ ६ ॥ ख्यात्याद्या दक्षकन्यास्तु भृग्वाद्या उपयेमिरे ॥ नित्यो नैमित्तिकः सर्गस्त्रिधा प्रकथितो जनैः ॥ ७ ॥ प्राकृतो दैनन्दिनी स्यादान्तरप्रलयादनु ॥ जायते यत्रानुदिनं नित्यसर्गो हि स स्मृतः ॥ ८ ॥ देवौ धातृविधातारौ भृगोः ख्यातिरसूयत ॥ श्रियं च पत्नी विष्णोर्या स्तुता शक्रेण वृद्धये ॥ ९ ॥ धातुर्विधातुर्द्वौ पुत्रौ क्रमात्प्राणो मृकण्डुकः ॥ मार्कण्डेयो मृकण्डोश्च जज्ञे वेदशिरास्ततः ॥ १० ॥ पौर्णमासश्च सम्भूत्यां मरीचेरभवत्सुतः ॥ स्मृत्यामङ्गिरसः पुत्राः सिनीवाली कुहूस्तथा ॥ ११ ॥ राका चानुमतिश्चात्रेरनसूयाप्यजीजनत् ॥ सोमं दुर्वाससं पुत्रं दत्तात्रेयं च योगि-

नम् ॥ १२ ॥ प्रीत्यां पुलस्त्यभार्य्यायां दत्तोलिस्तत्सुतोऽभवत् ॥ क्षमायां पुलहाज्जाताः सहिष्णुक्रमपादिकाः ॥ १३ ॥ सन्नत्या च क्रतोरासन्वालखिल्या महौजसः ॥ अङ्गुष्टपर्वमात्रास्ते ये हि षष्टिसहस्रिणः ॥ १४ ॥ ऊर्ज्जायां च वसिष्ठाच्च राजा गात्रोर्द्ध-बाहुकः ॥ सवनश्चालघुः शुक्रः सुतपा सप्त चर्षयः ॥ १५ ॥ पावकः पवमानोऽभूच्छुचिः स्वाहाग्निजोऽभवत् ॥ अग्निष्वात्ता बर्हि-षदोऽनग्नयः साग्नयो ह्यजात् ॥ १६ ॥ पितृभ्यश्च स्वधायां च मेना च धारिणी सुते ॥ हिंसा भार्य्या त्वधर्मस्य तयोर्जज्ञे तथाऽ-नृतम् ॥ १७ ॥ कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥ माया च वेदना चैव मिथुनं त्विदमेतयोः ॥ १८ ॥ तयोर्जज्ञेऽथ वै माया मृत्युर्भूतापहारिणम् ॥ वेदना च सुतं चापि दुःखं जज्ञेऽथ रौरवात् ॥ १९ ॥ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ॥ ब्रह्मणश्च रुदञ्जातो रोदनाद्रुद्रनामकः ॥ २० ॥ भवं शर्वमथेशानं तथा पशुपतिं द्विज ॥ भीममुग्रं महादेवमुवाच स पितामहः ॥ २१ ॥ दक्षकोपाच्च तद्भार्य्यां देहं तत्याज सा सती ॥ हिमवद्दुहिता भूत्वा पत्नी शम्भोरभूत्पुनः ॥ २२ ॥ ऋषिभ्यो नारदा-द्युक्ताः पूजाः स्नानादिपूर्विकाः ॥ स्वायम्भुवाद्यास्ताः कृत्वा विष्ण्वादेर्भुक्तिमुक्तिदाः ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये जगत्सर्गवर्णनं नाम विंशतितमोऽध्यायः ॥ २० ॥ अथ सामान्यतो देवपूजानिरूपणम् ॥ नारद उवाच ॥ सामान्यपूजां विष्ण्वादेर्वक्ष्ये मन्त्रांश्च सर्वदान् ॥ समस्तपरिवाराय अच्युताय नमो यजेत् ॥ १ ॥ धात्रे विधात्रे गङ्गाय यमुनाय निधी तथा ॥ द्वारश्रियं वास्तुनरं शक्तिं कूर्ममनन्तकम् ॥ २ ॥ पृथिवीं धर्मकं ज्ञानं वैराग्यैश्वर्य्यमेव च ॥ अधर्मादीन्कन्दनालपद्मकेसरक-र्णिकाः ॥ ३ ॥ ऋग्वेदाद्यं कृताद्यं च सत्त्वाद्यर्कादिमण्डलम् ॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा च ता यजेत् ॥ ४ ॥ प्रह्वी सत्या तथेशा चानुग्रहाऽमलमूर्त्तिका ॥ दुर्गां गिरं गणं क्षेत्रं वासुदेवादिकं यजेत् ॥ ५ ॥ हृदयं च शिरश्चूडां वर्म नेत्रमथास्त्रकम् ॥ शङ्खं चक्रं गदां पद्मं श्रीवत्सं कौस्तुभं यजेत् ॥ ६ ॥ वनमालां श्रियं पुष्टिं गरुडं गुरुमर्चयेत् ॥ इन्द्रमाग्नेयं यमं रक्षो जलं वायुं धनेश्वरम् ॥ ७ ॥ ईशानं तमजं चास्त्रं वाहनं कुमुदादिकम् ॥ विष्वक्सेनं मण्डलादौ सिद्धिः पूजादिना भवेत् ॥ ८ ॥ शिवपू-जाथ सामान्या पूर्वं नन्दिनमर्च्चयेत् ॥ महाकालं यजेद्गङ्गां यमुनाञ्च गणादिकम् ॥ ९ ॥ गिरं श्रियं गुरुं वास्तुं शक्त्यादीन्धर्मकादि-

कम् ॥ वामा ज्येष्ठा तथा रौद्री काली कलविकारिणी ॥ १० ॥ बलविकारिणी चापि बलप्रमथिनी क्रमात् ॥ सर्वभूतदमनी च तथा मनोन्मनी शिवा ॥ ११ ॥ हां हूं हां शिवमूर्त्तये साङ्गवक्त्रं शिवं यजेत् ॥ ह्रौं शिवाय ह्रौमित्यादि हामीशानादि वक्त्रकम् ॥ १२ ॥ ह्रीं गौरीं गं गणः शक्रमुखाश्चण्डो हृदादिकाः ॥ क्रमात्सूर्य्यार्च्चने मन्त्रा दण्डी पूज्यश्च पिङ्गलः ॥ १३ ॥ उच्चैःश्रवाश्चारुणश्च प्रभूतं विमलं यजेत् ॥ सोमसंध्या परमुखं स्कन्दाद्यं मध्यतो यजेत् ॥ १४ ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ अमोघा विद्युता चैव पूज्याथो सर्वतोमुखी ॥ १५ ॥ अर्कासनं हि हं खं खं सोल्कायेति च मूर्त्तिकम् ॥ ह्रां ह्रीं सः सूर्य्याय नम आं नमो हृदयाय च ॥ १६ ॥ अर्कास्त्राय शिरसे तद्वदग्नीशासुरवायुगान् ॥ भूर्भुवःस्वरे ज्वालिनि शिखा हुं कवचं स्मृतम् ॥ १७ ॥ भां नेत्रं ह्रस्तथार्कास्त्रं राज्ञी शक्तिश्च निष्कुभा ॥ सोमोऽङ्गारकोऽथ बुधो जीवः शुक्रः शनिः क्रमात् ॥ १८ ॥ राहुः केतुस्तेजश्चण्डः सङ्क्षेपांदथ पूजनम् ॥ आसनं मूर्त्तयो मूलं हृदाद्यं परिचारकः ॥ १९ ॥ विष्ण्वासनं विष्णुमूर्त्तेरां श्रीं श्रीं श्रीधरो हरिः ॥ ह्रीं सर्वमूर्त्तिमन्त्रोऽयमिति त्रैलोक्यमोहनः ॥ २० ॥ क्लीं हृषीकेशः हूं विष्णुः स्वरैर्दीर्घैर्हृदादिकम् ॥ समस्तैः पञ्चमी पूजा संग्रामादौ जयादिदा ॥ २१ ॥ चक्रं गदां क्रमाच्छङ्खं मुसलं खड्गशार्ङ्गकम् ॥ पाशाङ्कुशौ च श्रीवत्सं कौस्तुभं वनमालया ॥ २२ ॥ श्रीं श्रीर्महालक्ष्मीस्ताक्ष्यो गुरुरिन्द्रादयोऽर्च्चनम् ॥ सरस्वत्यासनं मूर्त्तिं रौं ह्रीं देवी सरस्वती ॥ २३ ॥ हृदाद्याः लक्ष्मीर्मेधा च कला तुष्टिश्च पुष्टिका ॥ गौरी प्रभावती दुर्गा गणो गुरुश्च क्षेत्रपः ॥ २४ ॥ तथा गं गणपतये च ह्रीं गौर्यै च श्रीं श्रियै ॥ ह्रीं त्वरितायै ऐं क्लीं सौं त्रिपुराचतुर्थ्यन्ता नमोऽन्तकाः ॥ २५ ॥ प्रणवाद्याश्च नामाद्यमक्षरं बिन्दुसंयुतम् ॥ ओं युता वा सर्वमन्त्राः पूजनाज्जपतः स्मृताः ॥ २६ ॥ होमात्तिलघृताद्यैश्च धर्म्मकामार्थमोक्षदाः ॥ पूजामन्त्रान्पठेद्यस्तु भुक्तभोगो दिवं व्रजेत् ॥ २७ ॥ इत्यादिमहापुराणे आग्नेये विष्ण्वादिदेवसामान्यपूजाकथनं नाम एकविंशतितमोऽध्यायः ॥ २१ ॥ अथ स्नानविधिकथनम् ॥ नारद उवाच ॥ वक्ष्ये स्नानं क्रियाद्यर्थं नृसिंहेन तु मृत्तिकाम् ॥ गृहीत्वा तां द्विधा कृत्वा मलस्नानमथैकया ॥ १ ॥ निमज्याचम्य विन्यस्य सिंहेन कृतरक्षकः ॥ विधिस्नानं ततः कुर्य्यात्प्राणायामपुरःसरम् ॥ २ ॥ हृदि ध्यायन्हरिं देवं मन्त्रेणाष्टा-

क्षरेण हि ॥ त्रिधा पाणितले मृत्स्नां दिग्बन्धं सिंहजप्ततः ॥ ३ ॥ वासुदेवप्रजप्तेन तीर्थं सङ्कल्प्य चालभेत् ॥ गात्र वेदादिमन्त्रैश्च सम्मार्ज्यार्घ्याद्य मूर्त्तिगम् ॥ ४ ॥ स्मृत्वाघमर्षणं वस्त्रं परिधाय समाचरेत् ॥ विन्यस्य मन्त्रैर्निर्म्मार्ज्य पाणिस्थं जलमेव च ॥ ५ ॥ नारायणेन संयम्य वायुमाघ्राय चोत्सृजेत् ॥ जलं ध्यायन्हरिं पश्चादत्त्वार्घ्यं द्वादशाक्षरम् ॥ ६ ॥ जप्त्वान्यान्भक्तितस्तर्प्य योगपीठादितः क्रमात् ॥ मन्त्रान्दिक्पालपर्यन्तानृषीन्पितृगणानपि ॥ ७ ॥ मनुष्यान्सर्वभूतानि स्थावरान्तान्यथावसेत् ॥ न्यस्य चाङ्गानि संहृत्य मन्त्रान्यागगृहं व्रजेत् ॥ एवमन्यासु पूजासु मूलाद्यैः स्नानमाचरेत् ॥ ८ ॥ इत्यादिमहापुराणे आग्नेये स्नानविधिकथनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ अथादिमूर्त्यादिपूजाविधिकथनम् ॥ नारद उवाच ॥ वक्ष्ये पूजाविधिं विप्रा यं कृत्वा सर्वमाप्नुयात् ॥ प्रक्षालितांघ्रिराचम्य वाग्यतः कृतरक्षणः ॥ १ ॥ प्राङ्मुखः स्वस्तिकं बद्ध्वा पद्माद्यपरमेव च ॥ यं बीजं नाभिमध्यस्थं धूम्रं चण्डानिलात्मकम् ॥ २ ॥ विशोषयेदशेषं तु ध्यायन्कायात्तु कल्मषम् ॥ क्ष्रौं हृत्पंकजमध्यस्थं बीजं तेजोनिधिं स्मरन् ॥ ३ ॥ अधोर्ध्वतिर्यग्गाभिस्तु ज्वालाभिः कल्मषं दहेत् ॥ शशांकाकृतिवद्ध्यायेदम्बरस्थं सुधाम्बुभिः ॥४॥ हृत्पद्मव्यापिभिर्देहं स्वकमाप्लावयेत्सुधीः ॥ सुषुम्नायोनिमार्गेण सर्वनाडीविसर्पिभिः ॥ ५ ॥ शोधयित्वा न्यसेत्तत्त्वं करशुद्धिरथास्त्रकम् ॥ व्यापकं हस्तयोरादौ दक्षिणाङ्गुष्ठतोऽङ्गकम् ॥ ६ ॥ मूलं देहे द्वादशाङ्गं न्यसेन्मन्त्रैर्द्विषट्ककैः ॥ हृदयं च शिरश्चैव शिखा वर्म्मास्त्रलोचने ॥ ७ ॥ उदरं च तथा पृष्टं बाहूरू जानुपादकम् ॥ मुद्रां दत्त्वा स्मरेद्विष्णुं जप्त्वाष्टशतमर्चयेत् ॥ ८ ॥ वामे तु वर्द्धनीं न्यस्य पूजाद्रव्यं तु दक्षिणे ॥ प्रक्षाल्यास्त्रेण चार्घ्येऽथ गन्धपुष्पान्विते न्यसेत् ॥ ९ ॥ चैतन्यं सर्वगं ज्योतिरस्त्रजप्तेन वारिणा ॥ फडन्तेन तु संसिच्य हस्ते ध्यात्वा हरिं परे ॥ १० ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्य्यं वह्निदिङ्मुखान् ॥ अधर्मादीनि गात्राणि पूर्वादौ योगपीठके ॥ ११ ॥ कूर्मं पीठे ह्यनन्तं च यमं सूर्य्यादिमण्डलम् ॥ विमलाद्याः केसरस्थानग्रहाः कर्णिकास्थिताः ॥ १२ ॥ पूर्वं स्वहृदये ध्यात्वा आवाह्यार्चेच्च मण्डले ॥ अर्घ्यं पाद्यं तथाचामं मधुपर्कं पुनश्च तत् ॥ १३ ॥ स्नानं वस्त्रोपवीतं च भूषणं गन्धपुष्पकम् ॥ धूपदीपनैवेद्यानि पुण्डरीकाक्षविद्यया ॥ १४ ॥ यजेदङ्गानि पूर्वादौ द्वारि पूर्वे परेऽण्डजम् ॥

दक्षे चक्रं गदां सौम्यकोणे शङ्खं धनुर्न्यसेत् ॥ १५ ॥ देवस्य वामतो दक्षे चेषुधी खड्गमेव च ॥ वामे चर्म्म श्रियं दक्षे पुष्टिं वामेऽग्रतो न्यसेत् ॥ १६ ॥ वनमालां च श्रीवत्सकौस्तुभौ दिक्पतीन्बहिः ॥ स्वमन्त्रैः पूजयेत्सर्वान्विष्णोरर्चाऽवसानतः ॥ १७ ॥ व्यस्तेन च समस्तेन अङ्गैर्बीजेन वै यजेत् ॥ जप्त्वा प्रदक्षिणीकृत्य स्तुत्वार्घ्यं च समर्प्य च ॥ १८ ॥ हृदये विन्यसेद्ध्यात्वा अहं ब्रह्म हरिस्त्विति ॥ आगच्छावाहने योज्यं क्षमस्वेति विसर्जने ॥ १९ ॥ एवमष्टाक्षराद्यैश्च पूजां कृत्वा विमुक्तिभाक् ॥ एकमूर्त्यर्चनं प्रोक्तं नवव्यूहार्चनं शृणु ॥ २० ॥ अङ्गुष्ठकद्वये न्यस्य वासुदेवं बलादिकान् ॥ तर्जन्यादौ शरीरेऽथ शिरो ललाटवक्त्रके ॥ २१ ॥ हृन्नाभिगुह्यजान्वङ्घ्रौ मध्ये पूर्वादिकं यजेत् ॥ एकपीठं नवव्यूहं नवपीठं च पूर्ववत् ॥ २२ ॥ नवाब्जे नवमूर्त्या च नवव्यूहं च पूर्ववत् ॥ पद्ममध्ये च तत्स्थानि वासुदेवं च पूजयेत् ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये आदिमूर्त्यादिपूजाविधिर्नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ अथ कुण्डनिर्माणाग्निकार्यादिविधिः ॥ नारद उवाच ॥ अग्निकार्य्यं प्रवक्ष्यामि येन स्यात्सर्वकामभाक् ॥ चतुरभ्याधिकं विंशमङ्गुलं चतुरस्रकम् ॥ १ ॥ सूत्रेण सूत्रयित्वा तु क्षेत्रं तावत्खनेत्समम् ॥ खातस्य मेखलाः कार्य्यास्त्यक्त्वा चैवाङ्गुलद्वयम् ॥ २ ॥ सत्त्वादिसञ्ज्ञाः पूर्वास्या द्वादशाङ्गुलमुच्छ्रिताः ॥ अष्टाङ्गुलाद्यङ्गुलाथ चतुरङ्गुलविस्तृता ॥ ३ ॥ योनिर्दशाङ्गुला रम्या षट्चतुर्व्यङ्गुलाग्रगा ॥ क्रमान्निम्ना तु कर्त्तव्या पश्चिमाशाव्यवस्थिता ॥ ४ ॥ अश्वत्थपत्रसदृशी किञ्चित्कुण्डे निवेशिता ॥ तुर्याङ्गुलायतं नालं पञ्चदशाङ्गुलायतम् ॥ ५ ॥ मूलन्तु त्र्यङ्गुलं यान्या अग्रं तस्याः षडङ्गुलम् ॥ लक्षणं चैकहस्तस्य द्विगुणं द्विकरादिषु ॥ ६ ॥ एकत्रिमेखलं कुण्डं वर्तुलादि वदाम्यहम् ॥ कुण्डार्द्धं तु स्थितं सूत्रं कोणे यदतिरिच्यते ॥ ७ ॥ तदर्द्धं दिशि संस्थाप्य भ्रामितं वर्त्तुलं भवेत् ॥ कुण्डार्द्धं कोणभागार्द्धं दिशि चोत्तरतो बहिः ॥ ८ ॥ पूर्वपश्चिमतो यत्नाल्लाञ्छयित्वा तु मध्यतः ॥ संस्थाप्य भ्रामितं कुण्डमर्द्धचन्द्रं भवेच्छुभम् ॥ ९ ॥ पद्माकारे दलानि स्युर्मेखलायां तु वर्त्तुले ॥ बाहुदण्डप्रमाणन्तु होमार्थं कारयेत्सुचम् ॥ १० ॥ सप्तपञ्चाङ्गुलं वापि चतुरस्रं तु कारयेत् ॥ त्रिभागेन भवेद्वर्त्तं मध्ये वृत्तं सुशोभनम् ॥ ११ ॥

[illegible] खात्वा बाहरद्ध तु शोधयत् ॥ अंगुलस्य चतुर्थांशं शेषार्द्धार्द्धं तथान्ततः ॥ १२ ॥ खातस्य मेखलां रम्यां शेषार्द्धेन तु कारयेत् ॥ कण्ठं त्रिभागविस्तारमङ्गुष्ठकसमायतम् ॥ १३ ॥ सार्द्धमङ्गुष्ठकं वा स्यात्तदग्रे तु मुखं भवेत् ॥ चतुरङ्गुलविस्तारं पञ्चाङ्गुलमथापि वा ॥ १४ ॥ त्रिकं द्व्यङ्गुलकं तत्स्यान्मध्यं तस्य सुशोभनम् ॥ आयामस्तत्समस्तस्य मध्यनिम्नः सुशोभनः ॥ १५ ॥ सुषिरं कण्ठदेशे स्याद्विशेद्यावत्कनीयसी ॥ शेषं कुण्डं तु कर्त्तव्यं यथारुचि विचित्रितम् ॥ १६ ॥ स्रुवं तु हस्तमात्रं स्याद्दण्डकेन समन्वितम् ॥ वटुकं द्व्यङ्गुलं वृत्तं कर्त्तव्यं तु सुशोभनम् ॥ १७ ॥ गोपदं तु यथा मग्नमल्पपङ्के तथा भवेत् ॥ उपलिप्य लिखेद्रेखामंगुलां वज्रनासिकाम् ॥ १८ ॥ सौम्याग्रां प्रथमां तस्यां रेखे पूर्वमुखे तयोः ॥ मध्ये तिस्रस्तथा कुर्यादक्षिणादिक्रमेण तु ॥ १९ ॥ एवमुल्लिख्य चाभ्युक्ष्य प्रणवेन तु मन्त्रवित् ॥ विष्टरं कल्पयेत्तेन तस्मिञ्शक्तिं तु वैष्णवीम् ॥ २० ॥ अलंकृत्वा मूर्त्तिमतीं क्षिपेदग्निं हरिं स्मरन् ॥ प्रादेशमात्राः समिधो दत्त्वा परिसमुह्य तम् ॥ २१ ॥ दर्भैस्त्रिधा परिस्तीर्य पूर्वादौ तत्र पात्रकम् ॥ आसादयेदिध्मवह्नी भूमौ च स्रुक्स्रुवद्वयम् ॥ २२ ॥ आज्यस्थालीं चरुस्थालीं कुशाज्यं च प्रणीतया ॥ प्रोक्षयित्वा प्रोक्षणीं च गृहीत्वापूर्य्य वारिणा ॥ २३ ॥ पवित्रान्तर्हिते हस्ते परिस्राव्य च तज्जलम् ॥ प्राङ्नीत्वा प्रोक्षणीपात्रं ज्योतिरग्रे निधाय च ॥ २४ ॥ तदद्भिस्त्रिश्च सम्प्रोक्ष्य इध्मं विन्यस्य चाग्रतः ॥ प्रणीतायां सपुष्पायां विष्णुं ध्यात्वोत्तरेण च ॥ २५ ॥ आज्यस्थालीमथाज्येन सम्पूर्य्याग्रे निधाय च ॥ संप्लवोत्प्लवनाभ्यां तु कुर्यादाज्यस्य संस्कृतिम् ॥ २६ ॥ अखण्डिताग्रौ निर्गर्भौ कुशौ प्रादेशमात्रकौ ॥ ताभ्यामुत्तानपाणिभ्यामङ्गुष्ठानामिकेन तु ॥ २७ ॥ आज्यं तयोस्तु संगृह्य द्विर्नीत्वा त्रिरवाङ्क्षिपेत् ॥ स्रुक्स्रुवौ चापि संगृह्य ताभ्यां प्रक्षिप्य वारिणा ॥ २८ ॥ प्रतप्य दर्भैः सम्मृज्य पुनः प्रक्षाल्य चैव हि ॥ निष्टप्य स्थापयित्वा तु प्रणवेनैव साधकः ॥ २९ ॥ प्रणवादिनमोऽन्तेन पश्चाद्धोमं समाचरेत् ॥ गर्भाधानादिकर्माणि यावदंशव्यवस्थया ॥ ३० ॥ नामान्ते व्रतबन्धान्तं समावर्त्तावसानकम् ॥ अधिकारावसानं वा कुर्य्यादज्ञानुसारतः ॥ ३१ ॥ प्रणवेनोपचारं तु कुर्य्यात्सर्वत्र साधकः ॥ अङ्गैर्होमस्तु कर्त्तव्यो यथावित्तानुसारतः ॥ ३२ ॥

गर्भाधानं तु प्रथमं ततः पुंसवनं स्मृतम् ॥ सीमन्तोन्नयनं जातकर्म नामान्नप्राशनम् ॥ ३३ ॥ चूडाकृतिं व्रतबन्धं वेदव्रतान्यशेषतः ॥ समावर्त्तनं पत्न्या च योगश्चाथाधिकारकः ॥ ३४ ॥ हृदादिक्रमतो ध्यात्वा एकैकं कर्म पूज्य च ॥ अष्टावष्टौ तु जुहुयात्प्रतिकर्माहुतीः पुनः ॥ ३५ ॥ पूर्णाहुतिं ततो दद्यात्स्रुचा मूलेन साधकः ॥ वौषडन्तेन मन्त्रेण प्लुतं सुस्वरमुच्चरन् ॥ ३६ ॥ विष्णोर्वह्निं तु संस्कृत्य अर्घयेद्वैष्णवं चरुम् ॥ आराध्य स्थण्डिले विष्णुं मन्त्रान्संस्मृत्य संश्रयेत् ॥ ३७ ॥ आसनादिक्रमेणैव साङ्गावरणमुत्तमम् ॥ गन्धपुष्पैः समभ्यर्च्य ध्यात्वा देवं सुरोत्तमम् ॥ ३८ ॥ आधायेध्ममथाघारावाज्यावग्नीशसंस्थितौ ॥ वायव्यनैर्ऋताशादिप्रवृत्तौ तु यथाक्रमम् ॥ ३९ ॥ आज्यभागौ ततो हुत्वा चक्षुषी दक्षिणोत्तरे ॥ मध्येऽथ जुहुयात्सर्वमन्त्रैरर्च्चाक्रमेण तु ॥ ४० ॥ आज्येन तर्पयेन्मूर्त्तिं दशांशेनाङ्गहोमकम् ॥ शतं सहस्रं वाज्याद्यैः समिद्भिर्वा तिलैः सह ॥ ४१ ॥ समाप्यार्च्चां तु होमान्तां शुचीञ्शिष्यानुपोषितान् ॥ आहूयाग्रे निवेश्याथ ह्यस्त्रेण प्रोक्षयेत्पशून् ॥ ४२ ॥ शिष्यानात्मनि संयोज्य विद्याकर्मनिबन्धनैः ॥ लिङ्गानुवृत्तं चैतन्यं सह लिङ्गेन पालितम् ॥ ४३ ॥ ध्यानमार्गेण सम्प्रोक्ष्य वायुबीजेन शोषयेत् ॥ ततो दहनबीजेनं सृष्टिं ब्रह्माण्डसञ्ज्ञिकाम् ॥ ४४ ॥ निर्दग्धां सकलां ध्यायेद्रस्मकूटनिभस्थिताम् ॥ प्लावयेद्वारिणा भस्म संसारं वार्मयं स्मरेत् ॥ ४५ ॥ तत्र शक्तिं न्यसेत्पश्चात्पार्थिवीं बीजसञ्ज्ञिकाम् ॥ तन्मात्राभिः समस्ताभिः संवृत्तं पार्थिवं शुभम् ॥ ४६ ॥ अखण्डं तद्भवं ध्यायेत्तदाधारं तदात्मकम् ॥ तन्मध्ये चिन्तयेन्मूर्त्तिं पौरुषीं प्रणवात्मिकाम् ॥ ४७ ॥ लिङ्गं संक्रामयेत्पश्चादात्मस्थं पूर्वसंस्कृतम् ॥ विभक्तेन्द्रियसंस्थानं क्रमाद्वृद्धं विचिन्तयेत् ॥४८॥ ततोऽण्डमब्दमेकं तु स्थित्वा विशकलीकृतम् ॥ द्यावापृथिव्यौ शकले तयोर्मध्ये प्रजापतिम् ॥४९॥ जातं ध्यात्वा पुनः प्रोक्ष्य प्रणवेन तु तं शिशुम् ॥ मन्त्रात्मकतनुं कृत्वा यथान्यासं पुरोदितम् ॥ ५० ॥ विष्णुहस्तं ततो मूर्ध्नि दत्त्वा ध्यात्वा तु वैष्णवम् ॥ एवमेकं बहून्वापि जापित्वा ध्यानयोगतः ॥ ५१ ॥ करौ संगृह्य मूलेन नेत्रे बद्ध्वा तु वाससा ॥ नेत्रमन्त्रेण मन्त्री तान्सदशेनाहतेन तु ॥ ५२ ॥ कृतपूजो गुरुः सम्यग्देवदेवस्य तत्त्ववान् ॥ शिष्यान्पुष्पाञ्जलिभृतः प्राङ्मुखानुपवेशयेत् ॥ ५३ ॥

अर्चयेयुश्च तेऽप्येवं प्रमूता गुरुणा हरिम् ॥ क्षिप्त्वा पुष्पाञ्जलिं तत्र पुष्पादिभिरनन्तरम् ॥ ५४ ॥ वासुदेवार्चनं कृत्वा गुरोः पादार्चनं ततः ॥ विधाय दक्षिणां दद्यात्सर्वस्वं चार्द्धमेव वा ॥ ५५ ॥ गुरुः संशिक्षयेच्छिष्यांस्तैः पूज्यो नामाभिर्हरिः ॥ विष्वक्सेनं यजेदीशं शङ्खचक्रगदाधरम् ॥ ५६ ॥ तर्जयन्तं च तर्जन्या मण्डलस्थं विसर्जयेत् ॥ ५७ ॥ विष्णुनिर्माल्यमखिलं विष्वक्सेनाय चार्पयेत् ॥ प्रणीताभिस्तथात्मानमभिषिच्य च कुण्डगम् ॥ ५८ ॥ वह्निमात्मनि संयोज्य विष्वक्सेनं विसर्जयेत् ॥ बुभुक्षुः सर्वमाप्नोति मुमुक्षुर्लीयते हरौ ॥५९॥ इत्यादिमहापुराणे आग्नेये कुण्डनिर्माणाद्यग्निकार्य्यादिकथनं नाम चतुर्विंशोऽध्यायः ॥२४॥

अथ वासुदेवादिमन्त्रप्रदर्शनम् ॥ नारद उवाच ॥ वासुदेवादिमन्त्राणां पूज्यानां लक्षणं वदे ॥ वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ १ ॥ नमो भगवते चादौ अ आ अं अः सबीजकाः ॥ ओङ्काराद्या नमोऽन्ताश्च नमो नारायणस्ततः ॥ २ ॥ ओं तत्सद्ब्रह्मणे चैव. ओं नमो विष्णवे नमः ॥ ओं क्ष्रौं ओं नमो भगवते नरसिंहाय वै नमः ॥ ३ ॥ ओं भूर्नमो भगवते वराहाय नराधिपाः ॥ जपारुणहरिद्राभानीलश्यामललोहिताः ॥ ४ ॥ मेघाग्निमधुपिङ्गाभा वल्लभा नव नायकाः ॥ अङ्गानि स्वरबीजानां स्वनामान्तैर्यथाक्रमम् ॥ ५ ॥ हृदयादीनि कल्पेत. विभक्तैस्तन्त्रवेदिभिः ॥ व्यञ्जनादीनि बीजानि तेषां लक्षणमन्यथा ॥ ६ ॥ दीर्घस्वरैस्तु भिन्नानि नमोऽन्तान्तस्थितानि तु ॥ अङ्गानि ह्रस्वयुक्तानि उपाङ्गानीति वर्ण्यते ॥ ७ ॥ विभक्तनामवर्णान्तंस्थितं बीजात्ममुत्तमम् ॥ दीर्घैर्ह्रस्वैश्च संयुक्तं साङ्गोपाङ्गस्वरैः क्रमात् ॥८॥ व्यञ्जनानां क्रमो ह्येष हृदयादिप्रकल्पने ॥ स्वबीजेन स्वनामान्तैर्विभक्तान्यङ्गनामभिः ॥९॥ युक्तानि हृदयादीनि द्वादशान्तानि पञ्चतः ॥ आरभ्य कल्पयित्वा तु जपेत्सिद्धानुरूपतः ॥ १० ॥ हृदयं च शिरश्चूडा कवचं नेत्रमस्त्रकम् ॥ षडङ्गानि तु बीजानां मूलस्य द्वादशाङ्गकम् ॥ ११ ॥ हृच्छिरश्च शिखा चैव हस्तौ नेत्रे तथोदरम् ॥ पृष्ठबाहूरुजानूंश्च जङ्घे पादौ क्रमान्न्यसेत् ॥ १२ ॥ कं टं पं शं वैनतेयः खं ठं फं पं गदानुजः ॥ गं डं वं सं पुष्टिमन्त्रो घं ढं भं हं श्रियै नमः ॥ १३ ॥ वं शं मं क्षं पाञ्चजन्यं छं तं पं कौस्तुभाय च ॥ जं खं ब्रं सुदर्शनाय श्रीवत्साय सं वं दं चं लं ॥ १४ ॥ ॐ धं वं वनमालाये महानन्ताय वै नमः ॥ निर्बीजपदमंत्राणां पदैरङ्गानि कल्पयेत् ॥ १५ ॥ जात्यन्तैर्नामसंयुक्तै-

हृदयादीनि पञ्चधा ॥ प्रणवं हृदयादीनि ततः प्रोक्तानि पञ्चधा ॥ १६ ॥ प्रणवं हृदयं पूर्वं पराय शिरः शिखा ॥ नाम्नात्मना तु कवचमस्त्रं नामान्तकं भवेत् ॥ १७ ॥ ॐ परास्त्रादिस्वनामात्मा चतुर्थ्यन्तो नमोऽन्तकः ॥ एकव्यूहादिषड्विंशव्यूहात्तस्यात्मनो मनुः ॥ १८ ॥ कनिष्ठादिकराग्रेषु प्रकृतिं देहकेऽर्चयेत ॥ पराय पुरुषात्मा स्यात्प्रकृत्यात्मा द्विरूपकः ॥ १९ ॥ ॐ परायाव्यात्मने च वस्वर्कौ च द्विरूपकः ॥ अग्निस्त्रिमूर्त्तौ विन्यस्य व्यापकं करदेहयोः ॥ २० ॥ वाय्वर्कौ करशाखासु सव्येतरकरद्वये ॥ हृदि मूर्त्तौ तनावेष त्रिव्यूहे तुर्य्यरूपके ॥ २१ ॥ ऋग्वेदं व्यापकं हस्ते अङ्गुलीषु यजुर्न्यसेत ॥ तलद्वयेऽथर्वरूपं शिरो हृच्चरणान्तिगम् ॥ २२ ॥ आकाशं व्यापकं न्यस्य करे देहे तु पूर्ववत् ॥ अंगुलीषु च वाय्वादि शिरोहृद्वह्निपादके ॥ २३ ॥ वायुर्ज्योतिर्जलं पृथ्वी पञ्चव्यूहः समीरितः ॥ मनः श्रोत्रं त्वग्दृग्जिह्वा घ्राणं षड्व्यूह ईरितः ॥ २४ ॥ व्यापकं मानसं न्यस्य ततोऽङ्गुष्ठादितः क्रमात् ॥ मूर्धास्यहृद्वह्निपत्सु कथितः करुणात्मकः ॥ २५ ॥ आदिमूर्त्तिस्तु सर्वत्र व्यापको जीवसञ्ज्ञितः ॥ भूर्भुवःस्वर्महर्जनस्तपःसत्यं च सप्तधा ॥ २६ ॥ करे देहे न्यसेदाद्यमङ्गुष्ठादिक्रमेण तु ॥ तलसंस्थः सप्तमश्च लोकेशो देहके क्रमात् ॥ २७ ॥ देवः शिरोललाटास्यहृद्वह्न्यांघ्रिषु संस्थितः ॥ अग्निष्टोमस्तथोक्थस्तु षोडशी वाजपेयकः ॥ २८ ॥ अतिरात्रातोर्यामश्च यज्ञात्मा सप्तरूपकः ॥ धीरहं मनः शब्दश्च स्पर्शरूपरसास्ततः ॥ २९ ॥ गन्धो बुद्धिर्व्यापकं तु करे देहे न्यसेत्क्रमात ॥ न्यसेदंघ्रौ च तलयोः के ललाटे मुखे हृदि ॥ ३० ॥ नाभौ गुह्ये च पादे च अष्टव्यूहः पुमान्स्मृतः ॥ जीवो बुद्धिरहङ्कारो मनः शब्दो गुणोऽनिलः ॥ ३१ ॥ रूपं रसो नवात्मायं जीव अंगुष्टकद्वये ॥ तर्जन्यादिक्रमाच्छेषं यावद्ग्रामप्रदेशिनीम् ॥ ३२ ॥ देहे शिरोललाटास्यहृन्नाभिगुह्यजानुषु ॥ पादयोश्च दशात्मायमिन्द्रो व्यापी समास्थितः ॥ ३३ ॥ अङ्गुष्टकद्वये वह्नेस्तर्जन्यादौ परेषु च ॥ शिरोललाटवक्त्रेषु हृन्नाभीगुह्यजानुषु ॥ ३४ ॥ पादयोरेकादशात्मा मनः श्रोत्रं त्वगेव च ॥ चक्षुर्जिह्वा तथा घ्राणं वाक्पाण्यंघ्रिश्च पायु च ॥ ३५ ॥ उपस्थं मानसो व्यापी श्रोत्रमङ्गुष्टकद्वये ॥ तर्जन्यादिक्रमादष्टावतिरिक्तं तलद्वये ॥ ३६ ॥ उत्तमाङ्गललाटस्यहृन्नाभावथ गुह्यके ॥ ऊरुयुग्मे तथा जङ्घागुल्फपादेषु च क्रमात् ॥ ३७ ॥ विष्णुर्मधुहरश्चैव त्रिविक्रमकवामनौ ॥ श्रीधरोऽथ हृषीकेशः पद्मनाभस्त-

थैव च ॥३८॥ दामोदरः केशवश्च नारायणस्ततः परः ॥ माधवश्चाथ गोविंदो विष्णुर्वै व्यापकं न्यसेत् ॥३९॥ अङ्गुष्ठादौ तलादौ च पादे जानुनि वै कटौ ॥ शिरःशिखोरःकट्यास्यजानुपादादिषु न्यसेत् ॥ ४० ॥ द्वादशात्मा पञ्चविंशः षड्विंशव्यूहकस्तथा ॥ पुरुषो धीरहङ्कारो मनश्चित्तं च शब्दकः ॥ ४१ ॥ तथा स्पर्शो रसो रूपं गन्धः श्रोत्रं त्वचस्तथा ॥ चक्षुर्जिह्वा नासिका च वाक् पाण्यंघ्रिश्च पायवः ॥ ४२ ॥ उपस्थो भूर्जलं तेजो वायुराकाशमेव च ॥ पुरुषं व्यापकं न्यस्य अङ्गुष्ठादौ दश न्यसेत् ॥ ४३ ॥ शेषान्हस्ततले न्यस्य शिरस्यथ ललाटके ॥ मुखहृन्नाभिगुह्योरुजान्वंघ्रौ करणोद्भवौ ॥ ४४ ॥ पादे जान्वोरुपस्थे च हृदये मूर्ध्नि च क्रमात् ॥ परश्च पुरुषात्मादौ षड्विंशे पूर्ववत्परम् ॥ ४५ ॥ संचिन्त्य मण्डलैके तु प्रकृतिं पूजयेद्बुधः ॥ पूर्वयाम्याप्यसौम्येषु हृदयादीनि पूजयेत् ॥४६॥ अस्त्रमग्न्यादिकोणेषु वैनतेयादि पूर्ववत् ॥ दिक्पालांश्च विधिस्तस्य त्रिव्यूहेऽग्निश्च मध्यतः॥४७॥ पूर्वादिदिग्बला वासो राज्यादिभिरलंकृतः ॥ कर्णिकायां नाभसश्च मानसः कर्णिकास्थितः ॥ ४८॥ विश्वंरूपं सर्वस्थित्यै यजेद्राज्यजयाय च ॥ सर्वव्यूहैः समायुक्तमङ्गैरपि च पञ्चभिः ॥४९॥ गरुडाद्यैस्तथेन्द्राद्यैः सर्वान्कामानवाप्नुयात् ॥ विष्वक्सेनं यजेन्नाम्ना वै बीजं व्योमसंस्थितम् ॥ ५० ॥ इत्यादिमहापुराणे आग्नेये वासुदेवादिमन्त्रप्रदर्शनं नाम पञ्चविंशोऽध्यायः ॥ २५॥ अथ मुद्रालक्षणम् ॥ नारद उवाच ॥ मुद्राणां लक्षणं वक्ष्ये सान्निध्यादिप्रकारकम् ॥ अञ्जलिः प्रथमां मुद्रा वन्दनी हृदयानुगा ॥ १ ॥ ऊर्ध्वाङ्गुष्ठो वाममुष्टिर्दक्षिणाङ्गुष्ठबन्धनम् ॥ सव्यस्य तस्य चाङ्गुष्ठो यस्य चोर्ध्वं प्रकीर्तितः ॥ २ ॥ तिस्रः साधारणा व्यूहे अथासाधारणा इमाः ॥ कनिष्ठादिविमोकेन अष्टौ मुद्रा यथाक्रमम् ॥ ३ ॥ अष्टानां पूर्वबीजानां क्रमशस्त्ववधारयेत् ॥ अङ्गुष्ठेन कनिष्ठान्तं नामयित्वांगुलित्रयम् ॥ ४ ॥ ऊर्ध्वं कृत्वा सम्मुखं च बीजायनवमाय वै ॥ वामहस्तमथोत्तानं कृत्वोर्ध्वं नामयेच्छनैः ॥ ५ ॥ वराहस्य स्मृता मुद्रा अङ्गानां च क्रमादिमाः ॥ एकैकां मोचयेद्धृद्वा वाममुष्टौ तथांगुलीम् ॥ ६ ॥ आकुञ्चयेत्पूर्वमुद्रां दक्षिणेऽप्येवमेव च ॥ ऊर्ध्वाङ्गुष्ठो वाममुष्टिर्मुद्रासिद्धिस्ततो भवेत् ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये मुद्रालक्षणं नाम षड्विंशोऽध्यायः ॥ २६ ॥ अथ दीक्षाविधिः ॥ नारद उवाच ॥ वक्ष्ये दीक्षां सर्वदां च मण्डलेऽब्जे हरिं यजेत् ॥ दश-

म्यामुपसंहृत्य यागद्रव्यं समस्तकम् ॥ १ ॥ विन्यस्य नारसिंहेन सम्मन्त्र्य शतवारकम् ॥ सर्षपांस्तु फडन्तेन रक्षोघ्नान्सर्वतः क्षिपेत् ॥ २ ॥ शक्तिं सर्वात्मिकां तत्र न्यसेत्प्रासादरूपिणीम् ॥ सर्वौषधीः समाहृत्य विकिरानभिमन्त्रयेत् ॥ ३ ॥ शतवारं शुभे पात्रे वासुदेवेन साधकः ॥ संसाध्य पञ्चगव्यं तु पञ्चभिर्मूलमूर्तिभिः॥ ४॥नारायणान्तैः सम्प्रोक्ष्य कुशाग्रैस्तेन तां भुवम् ॥ विकिरान्वासुदेवेन क्षिपेदुत्तानपाणिना ॥ ५ ॥ त्रिधा पूर्वमुखास्तिष्ठन्ध्यायेद्विष्णुं तथा हृदि ॥ वर्द्धन्या सहिते कुम्भे साङ्गं विष्णुं प्रपूजयेत् ॥ ६ ॥ शतवारं मन्त्रयित्वा त्वस्त्रेणैव च वर्धनीम् ॥ अच्छिन्नधारया सिञ्चन्नीशानान्तं नयेच्च तम् ॥ ७ ॥ कलशं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि ॥ संहृत्य विकिरान्दर्भैः कुम्भेशं कर्करीं यजेत् ॥ ८ ॥ सवस्त्रं पञ्चरत्नाढ्यं स्थण्डिले पूजयेद्धरिम् ॥ अग्नावपि समभ्यर्च्य मन्त्रान्संजप्य पूर्ववत् ॥ ९ ॥ प्रक्षाल्य पुण्डरीकेण विलिप्यान्तः सुगन्धिना ॥ उखामाज्येन सम्पूर्य गोक्षीरेण तु साधकः ॥ १० ॥ आलोक्य वासुदेवेन ततः सङ्कर्षणेन च ॥ तण्डुलानाज्यसंसृष्टान्क्षिपेत्क्षीरे सुसंस्कृते ॥ ११ ॥ प्रद्युम्नेन समालोड्य दर्व्या संघट्टयेच्छनैः ॥ पक्वमुत्तारयेत्पश्चादनिरुद्धेन देशिकः ॥ १२ ॥ प्रक्षाल्यालिप्य तत्कुर्याद्दुर्ग्धपुण्ड्रं तु भस्मना ॥ नारायणेन पार्श्वेषु चरुमेवं सुसंस्कृतम् ॥ १३॥ भागमेकं तु देवाय कलशाय द्वितीयकम् ॥ तृतीयेन तु भागेन प्रदद्यादाहुतित्रयम् ॥ १४ ॥ शिष्यैः सह चतुर्थं तु गुरुरद्याद्विशुद्धये ॥ नारायणेन सम्मंत्र्य सप्तधा क्षीरवृक्षजम् ॥ १५ ॥ दन्तकाष्ठं भक्षयित्वा त्यक्त्वा ज्ञात्वा स्वपातकम् ॥ ऐन्द्राग्न्युत्तरकेशानीमुखं पतितमुत्तमम् ॥ १६ ॥ शुभं सिंहशतं हुत्वा आचम्याथ प्रविश्य च ॥ पूजागारं न्यसेन्मन्त्री प्राच्यां विष्णुं प्रदक्षिणम् ॥ १७ ॥ संसाराणेवमग्नानां पशूनां पाशमुक्तये ॥ त्वमेव शरणं देव सदा त्वं भक्तवत्सल ॥ १८ ॥ देवदेवानुजानीहि प्राकृतैः पाशबन्धनैः ॥ पाशितान्मोचयिष्यामि त्वत्प्रसादात्पशूनिमान् ॥ १९ ॥ इति विज्ञाप्य देवेशं सम्प्रविश्य पशूंस्ततः ॥ धारणाभिस्तु संशोध्य पूर्ववज्ज्वलनादिना ॥ २० ॥ संस्कृत्य मूर्त्या संयोज्य नेत्रे बद्धे प्रदर्शयेत् ॥ पुष्पपूर्णांजलींस्तत्र क्षिपेत्तन्नाम योजयेत् ॥ २१ ॥ अमन्त्रमर्चनं तत्र पूर्ववत्कारयेत्क्रमात् ॥ यस्यां मूर्त्तौ पतेत्पुष्पं तस्य तन्नाम निर्दिशेत् ॥ २२ ॥ शिखान्तसम्मितं सूत्रं पादाङ्गुष्ठादिषड्गुणम् ॥ कन्यया कर्त्तितं रक्तं पुनस्तत्त्रिगुणीकृतम् ॥ २३ ॥ यस्यां

संलीयते विश्वं यया विश्वं प्रसूयते ॥ प्रकृतिं प्रक्रियाभेदैः संस्थितां तत्र चिंतयेत् ॥२४॥ तेन प्राकृतिकान्पाशान्ग्रथित्वा तत्त्वसङ्ख्यया ॥ कृत्वा शरावे तत्सूत्रं कुण्डपार्श्वे निधाय तु ॥२५॥ ततस्तत्त्वानि सर्वाणि ध्यात्वा शिष्यतनौ न्यसेत् ॥ सृष्टिक्रमात्प्रकृत्यादिपृथिव्यन्तानि देशिकः ॥ २६॥ तत्रैकधा पञ्चधा स्याद्दशद्वादशधापि वा ॥ दातव्यः सर्वभेदेन ग्रथितस्तत्त्वचिन्तकः ॥२७॥ अङ्गैः पञ्चभिरध्वानं निखिलं विकृतिक्रमात् ॥ तन्मात्रात्मनि संहृत्य मायासूत्रे पशोस्तनौ ॥ २८ ॥ प्रकृतिर्लिंगशक्तिश्च कर्त्ता बुद्धिस्तथा मनः ॥ पञ्चतन्मात्रबुद्ध्याख्यं कर्मीख्यं भूतपञ्चकम् ॥ २९ ॥ ध्यायेच्च द्वादशात्मानं सूत्रे देहे तथेच्छया ॥ हुत्वा सम्पातविधिना सृष्टेः सृष्टिक्रमेण तु॥ ३० ॥ एकैकशतहोमेन दत्त्वा पूर्णाहुतिं ततः ॥ शरावे संम्पुटीकृत्य कुंभेशाय निवेदयेत्॥ ३१॥ अधिवास्य यथान्यायं भक्तं शिष्यं तु दीक्षयेत् ॥ करणीं कर्त्तरीं वापि रजांसि खटिकामपि ॥ ३२ ॥ अन्यदप्युपयोगि स्यात्सर्वं तद्वायुगोचरे ॥ संस्थाप्य मूलमन्त्रेण परामृश्याधिवासयेत् ॥ ३३ ॥ नमो भूतेभ्यश्च बलिः कुशे देयः स्मरन्हरिम् ॥ मण्डपं भूषयित्वाथ वितानघटलड्डुकैः ॥ ३४ ॥ मण्डलेऽथ यजेद्विष्णुं ततः सन्तर्प्य पावकम् ॥ आहूय दीक्षयेच्छिष्यान्बद्धपद्मासनस्थितान् ॥ ॥३५॥ सम्प्रोक्ष्य विष्णुं हस्तेन मूर्द्धानं स्पृश्य वै क्रमात् ॥ प्रकृत्यादिविकृत्यन्तां साधिभूताधिदैवताम् ॥ ३६ ॥ सृष्टिमाध्यात्मिकीं कृत्वा हृदि तां संहरेत्क्रमात् ॥ तन्मात्रभूतां सकलां जीवेन समतां गताम् ॥ ३७ ॥ ततः सम्प्रार्थ्य कुम्भेशं सूत्रं संहृत्य देशिकः॥ अग्रे समीपमागत्य पार्श्वे तं सन्निवेश्य तु ॥३८॥ मूलमन्त्रेण सृष्टीशमाहुतीनां शतेन तम् ॥ उदासीनमथासाद्य पूर्णाहुत्या च देशिकः ॥३९॥ शुक्लं रजः समादाय मूलेन शतमन्त्रितम् ॥ सन्ताड्य हृदयं तेन हुंफट्कारान्तसंयुतैः ॥ ४० ॥ वियोगंपदसंयुक्तैर्बीजः पादादिभिः क्रमात् ॥ पृथिव्यादीनि तत्त्वानि विश्लिष्य जुहुयात्ततः ॥४१॥ वह्नावखिलतत्त्वानामालये व्याहृते हरौ ॥ नीयमानं क्रमात्सर्वं तत्राध्वानं स्मरेद्बुधः ॥ ४२ ॥ ताडनेन वियोज्यैव आदायापाद्य शाम्यताम् ॥ प्रकृत्याहृत्य जुहुयाद्यथोक्ते जातवेदसि ॥ ४३ ॥ गर्भाधानं जातकर्म भोगं चैव लयं तथा ॥ हुत्वाष्टौ तत्र तत्रैव ततः शुद्धन्तु होमयेत् ॥ ४४ ॥ शुद्धं तत्त्वं समुद्धृत्य पूर्णाहुत्या तु देशिकः ॥ सन्धयेद्धि परे तत्त्वे यावदव्याकृतं क्रमात् ॥४५॥ तत्परं ज्ञानयोगेन विलाप्य परमात्मनि ॥

विमुक्तबन्धनं जीवं परस्मिन्नव्यये पदे ॥ ४६ ॥ निर्वृतं परमानन्दे शुद्धे बुद्धे समर्द्धयः ॥ दद्यात्पूर्णाहुतिं पश्चादेवं दीक्षा समाप्यते ॥ ४७ ॥ प्रयोगमन्त्रान्वक्ष्यामि यैर्दीक्षाहोमसंलयः ॥ ॐ यं भूतानि विशुद्धं हुं फट् ॥ अनेन ताडनं कुर्य्यादियोजनमिह त्रयम् ॥ ४८ ॥ ॐ यं भूतान्यापातयेऽहम् । आदानं कृत्वा चानेन प्रकृत्या योजनं शृणु ॥ ॐ य भूतानि पुंश्चाहो । होममन्त्रं प्रवक्ष्यामि ततः पूर्णाहुतेर्मनुम् ॥ ४९ ॥ ॐ भूतानि संहर स्वाहा । ॐ अं ॐ नमो भगवते वासुदेवाय वौषट् ॥ पूर्णाहुत्यनन्तरे तु तत्त्वे शिष्यं तु साधयेत् ॥ एवं तत्त्वानि सर्वाणि क्रमात्संशोधयेद्गुरुः ॥ ५० ॥ नमोऽन्तान स्ववीजेन ताडनादिपुरःसरम् ॥ ॐ वां कर्मेन्द्रियाणि । ओं दें बुद्धीन्द्रियाणि ॥ यं बीजेन समानन्तु ताडानादिप्रयोगकम् ॥ ५१ ॥ ॐ सुगन्धतन्मात्रे वियुङ्क्ष्व हुं फट् ॐ सम्पाहिहा ॥ ॐ स्वं स्वं युङ्क्ष्व प्रकृत्या । ॐ सुं हुं गन्धतन्मात्रे संहर स्वाहा । ततः पूर्णाहुतिश्चैवमुत्तरेषु प्रयुज्यते ॥ ॐ रां रसतन्मात्रे । ॐ भें रूप तन्मात्रे । ॐ रं स्पर्शतन्मात्रे । ॐ एं शब्दतन्मात्रे । ॐ भं नमः । ॐ सों अहङ्कारः । ॐ नं बुद्धौ ॐ ॐ प्रकृतौ । एकमूर्त्तावयं प्रोक्तो दीक्षायोगः समासतः ॥ एवमेव प्रयोगस्तु नवव्यूहादिके स्मृतः ॥ ५२ ॥ दग्ध्वा परस्मिन्सन्दध्यान्निर्वाणे प्रकृतिं नरः ॥ अविकारे समादध्यादीश्वरे प्रकृतिं नरः ॥ ५३ ॥ शोधयित्वाथ भूतानि कर्मांङ्गानि विशोधयेत् ॥ बुद्ध्याख्यान्यथ तन्मात्रं मनो ज्ञानमहङ्कृतिम् ॥ ५४ ॥ लिङ्गात्मानं विशोध्यान्ते प्रकृतिं शोधयेत्पुनः ॥ पुरुषं प्राकृतं शुद्धमीश्वरे धाम्नि संस्थितम् ॥ ५५ ॥ स्वगोचरीकृताशेषभोगं मुक्तौ कृतास्पदम् ॥ ध्यायन्पूर्णाहुतिं दद्यादीक्षेयं त्वधिकारिणी ॥ ५६ ॥ अङ्गैराराध्य मन्त्रस्य नीत्वा तत्त्वगणं समम् ॥ क्रमादेवं विशोध्यान्ते सर्वसिद्धिसमन्वितम् ॥ ५७ ॥ ध्यायन्पूर्णाहुतिं दद्यादीक्षेयं साधके स्मृता ॥ द्रव्यस्य वा न सम्पत्तिरशक्तिर्वात्मनो यदि ॥ ५८ ॥ इष्ट्वा देवं यथापूर्वं सर्वोपकरणान्वितम् ॥ सद्योऽधिवास्य द्वादश्यां दीक्षयेद्देशिकोत्तमः ॥ ५९ ॥ भक्तो विनीतः शारीरैर्गुणैः सर्वैः समन्वितः ॥ शिष्यो नातिधनी यस्तु स्थण्डिलेऽभ्यर्च्य दीक्षयेत् ॥ ६० ॥ अध्वानं निखिलं देवं भौतं वाध्यात्मिकंकृतम् ॥ सृष्टिक्रमेण शिष्यस्य देहे ध्यात्वा तु देशिकः ॥ ६१ ॥ अष्टाष्टाहुतिभिः पूर्वं क्रमात्सन्तर्प्य सृष्टिमान् ॥ स्वमन्त्रैर्वासुदेवादीञ्ज्वलनादीन्विसर्जयेत् ॥ ६२ ॥ होमेन शोधयेत्पश्चात्संहार-

क्रमयोगतः ॥ यानि सूत्राणि बद्धानि मुक्त्वा कर्माणि देशिकः ॥ ६३ ॥ शिष्यदेहात्समाहृत्य क्रमात्तत्त्वानि शोधयेत् ॥ अग्नौ प्राकृतिके विष्णौ लयं नीत्वाधिदैविके ॥ ६४ ॥ शुद्धं तत्त्वमशुद्धेन पूर्णाहुत्या तु साधयेत् ॥ शिष्ये प्रकृतिमापन्ने दग्ध्वा प्राकृतिकान्गुणान् ॥ ६५ ॥ मोचयेदधिकारे वा नियुञ्ज्यादेशिकः शिशून् ॥ अथान्यां शक्तिदीक्षां वा कुर्याद्भावे स्थितो गुरुः ॥ ६६ ॥ भक्त्या सम्प्रतिपन्नानां यतीनां निर्द्धनस्य च ॥ सम्पूज्य स्थण्डिले विष्णुं पार्श्वस्थं स्थाप्य पुत्रकम् ॥ ६७ ॥ देवताभिमुखः शिष्यस्तिर्यगास्यः स्वयं स्थितः ॥ अध्वानं निखिलं ध्यात्वा पर्वभिः स्वैर्विकल्पितम् ॥ ६८ ॥ शिष्यदेहे तथा देवमाधिदैविकयाजनम् ॥ ध्यानयोगेन सञ्चिन्त्य पूर्ववत्ताडनादिना ॥ ६९ ॥ क्रमात्तत्त्वानि सर्वाणि शोधयेत्स्थण्डिले हरौ ॥ ताडनेन वियोज्याथ गृहीत्वात्मनि तत्परः ॥ ७० ॥ देवे संयोज्य संशोध्य गृहीत्वा तत्स्वभावतः ॥ आनीय शुद्धभावेन सन्धयित्वा क्रमेण तु ॥ ७१ ॥ शोधयेद्ध्यानयोगेन सर्वतो ज्ञानमुद्रया ॥ शुद्धेषु सर्वतत्त्वेषु प्रधाने चेश्वरे स्थिते ॥ ७२ ॥ दग्ध्वा निर्वापयेच्छिष्यान्पदे चैशे नियोजयेत् ॥ निनयेत्सिद्धिमार्गे वा साधकं देशिकोत्तमः ॥ ७३ ॥ एवमेवाधिकारस्थो गृही कर्म्मण्यतन्द्रितः ॥ आत्मानं शोधयंस्तिष्ठेद्यावद्रागक्षयो भवेत् ॥ ७४ ॥ क्षीणरागमथात्मानं ज्ञात्वा संशुद्धकिल्बिषः ॥ आरोप्य पुत्रे शिष्ये वा ह्यधिकारं तु संयमी ॥ ७५ ॥ दग्ध्वा मायामयं पाशं प्रव्रज्य स्वात्मान स्थितः ॥ शरीरपातमाकाङ्क्षन्नासीताव्यक्तलिङ्गवान् ॥ ७६ ॥ इत्यादिमहापुराणे आग्नेये सर्वदीक्षाकथनं नाम सप्तविंशोध्यायः ॥ २७ ॥ अथाचार्याभिषेकविधानम् ॥ नारद उवाच ॥ अभिषेकं प्रवक्ष्यामि यथाकुर्यात्तु पुत्रकः ॥ सिद्धिभाक्साधको येन रोगी रोगाद्विमुच्यते ॥ १ ॥ राज्यं राजा सुतं स्त्री च प्राप्नुयान्मलनाशनम् ॥ मृत्स्नाकुम्भान्सुरत्नाढ्यान्मध्यपूर्वादितो न्यसेत् ॥ २ ॥ सहस्रावर्त्तितान्कुर्यादथवा शतवर्त्तितान् ॥ मंडपे मण्डले विष्णुं प्राच्यैशान्योश्च पीठके ॥ ३ ॥ निवेश्य सकलीकृत्य पुत्रकं साधकादिकम् ॥ अभिषेकं समभ्यर्च्य कुर्याद्गीतादिपूर्वकम् ॥ ४ ॥ दद्याच्च योगपीठादीन्स्वनुग्राह्यास्त्वया नराः ॥ गुरुश्च समयान्ब्रूयाद्भृतः शिष्योऽथ सर्वभाक् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये आचार्य्याभिषेको नामाष्टाविंशोऽध्यायः ॥ २८ ॥ अथ सर्वतोभद्रमण्डलविधिः ॥ नारद उवाच ॥ साधकः साधयेन्मन्त्रं

देवतायतनादिके ॥ शुद्धभूमौ गृहे प्राच्ये मण्डले हरिमीश्वरम् ॥ १ ॥ चतुरश्रीकृते क्षेत्रे मण्डलादीनि वै लिखेत् ॥ रसबाणाक्षि-कोष्ठेषु सर्वतोभद्रमालिखेत् ॥ २ ॥ षट्त्रिंशत्कोष्ठकैः पद्मं पीठं पंक्त्या बहिर्भवेत् ॥ द्वाभ्यां तु वीथिका तस्माद्वाभ्यां द्वाराणि दिक्षु च ॥ ३ ॥ वर्तुल भ्रामयित्वा तु पद्मक्षेत्रं पुरोदितम् ॥ पद्मार्द्धं भ्रामयित्वा तु भागं द्वादशकं बहिः ॥ ४ ॥ विभज्य भ्रामयेच्छेषं चतुःक्षेत्रं तु वर्तुलम् ॥ प्रथमं कर्णिकाक्षेत्रं केसराणां द्वितीयकम् ॥ ५ ॥ तृतीयं दलसन्धीनां दलाग्राणां चतुर्थकम् ॥ प्रसार्य कोणसूत्राणि कोणदिङ्मध्यमं ततः ॥ ६ ॥ निधाय केसराग्रे तु दलसन्धींस्तु लाञ्छयेत् ॥ पातयित्वाथ सूत्राणि तत्र पत्राष्टकं लिखेत् ॥ ७ ॥ जलसन्ध्यन्तरालं तु मानं मध्ये निधाय तु ॥ दलाग्रं भ्रामयेत्तेन तदग्रे तदनन्तरम् ॥ ८ ॥ तदन्तरालं तत्पार्श्वे कृत्वा बाह्यक्रमेण च॥ केसरे तु लिखेद्वौ द्वौ दलमध्ये ततः पुनः ॥९॥ पद्मलक्ष्मैतत्सामान्यं द्विपट्कदलमुच्यते ॥ कर्णिकार्द्धेन मानेन प्राक्संस्थं भ्रामयेत्क्रमात् ॥ १० ॥ तत्पार्श्वे भ्रमयोगेन कुण्डल्यः षड् भवन्ति हि ॥ एवं द्वादश मत्स्याः स्युर्द्विपट्कदलकं च तैः ॥ ११ ॥ पञ्चपत्राभिसिध्यर्थं मत्स्ये कृत्वैवमञ्जकम् ॥ व्योमरेखाबहिः पीठं तत्र कोष्ठानि मार्जयेत् ॥ १२ ॥ त्रीणि कोणेषु पादार्थं द्विद्विकान्यपराणि तु ॥ चतुर्दिक्षु विलिप्तानि पत्रकाणि भवन्त्युत ॥ १३ ॥ ततः पङ्क्तिद्वयं दिक्षु वीथ्यथ तु विलोपयेत् ॥ द्वाराण्याशासु कुर्वीत चत्वारि चतसृष्वपि ॥ १४ ॥ द्वाराणां पार्श्वतः शोभा अष्टौ कुर्याद्विचक्षणः ॥ तत्पार्श्वे उपशोभास्तु तावत्यः परिकीर्त्तिताः ॥ १५ ॥ समीप उपशोभानां कोणास्तु परिकीर्त्तिताः ॥ चतुर्दिक्षु ततो द्वे द्वे चिन्तयेन्मध्यकोष्ठकैः ॥ १६ ॥ चत्वारि बाह्यतो मृज्यादेकैकं पार्श्वयोरपि ॥ शोभार्थं पार्श्वयोस्त्रीणि त्रीणि लुम्पेद्दलस्य तु ॥ १७॥ तद्वद्विपर्यये कुर्यादुपशोभां ततः परम् ॥ कोणस्यान्तर्बहिस्त्रीणि चिन्तयेद्विविधेदतः ॥ १८॥ एवं षोडशकोष्ठं स्यादेवमन्यत्तु मण्डलम् ॥ द्विपट्कभागे षट्त्रिंशत्पदं पद्मं तु वीथिका ॥ १९॥ एका पङ्क्तिः पराभ्यां तु द्वारशोभादि पूर्ववत् ॥ द्वादशाङ्गुलिभिः पद्ममेकहस्ते तु मण्डले ॥ २० ॥ द्विहस्ते हस्तमात्रं स्याद्वृद्ध्या द्वारेण वाचरेत् ॥ अपीठं चतुरस्रं स्याद्विकरं चक्रपङ्कजम् ॥ २१॥ पद्मार्द्धं नवभिः प्रोक्तं नाभिस्तु तिसृभिः स्मृता ॥ अष्टाभिस्त्वरकान्कुर्यान्नेमिं तु चतुरङ्गुलैः ॥ २२॥ त्रिधा विभज्य च क्षेत्रमन्तर्द्वाभ्यामथाङ्कयेत् ॥ पंचान्तस्त्वारासिद्ध्यर्थं

तेष्वास्फाल्य लिखेदरान् ॥ २३ ॥ इन्दीवरदलाकारानथवा मातुलुङ्गवत् ॥ पद्मपत्रायतान्वापि लिखेदिच्छानुरूपतः ॥ २४ ॥ भ्रामयित्वा बहिर्नेमावरसन्ध्यन्तरे स्थितः ॥ भ्रामयेदरमूलं तु सन्धिमध्ये व्यवस्थितः ॥२५॥ अरमध्ये स्थितो मध्यमरणिं भ्रामयेत्समम् ॥ एवं संद्धचंतराः सम्यङ्मातुलुङ्गनिभाः समाः ॥ २६ ॥ विभज्य सप्तधा क्षेत्रं चतुर्दशकरं समम् ॥ द्विधा कृते शतं ह्यत्र षण्णवत्याधिकानि तु ॥ २७ ॥ कोष्ठकानि चतुर्भिस्तैर्मध्ये भद्रं समालिखेत् ॥ परितो विसृजेद्रीथ्यै तथा दिक्षु समालिखेत् ॥ २८ ॥ कमलानि पुनर्वीथ्यै परितः परिमृज्य तु ॥ द्वे द्वे मध्यमकोष्ठे तु ग्रीवार्थं दिक्षु लोपयेत् ॥ २९ ॥ चत्वारि बाह्यतः पश्चात्रीणि त्रीणि तु लोपयेत् ॥ ग्रीवापार्श्वे बहिस्त्वेका शोभा सा परिकीर्त्तिता ॥ ३० ॥ विसृज्य बाह्यकोणेषु सप्तान्तस्त्रीणि मार्जयेत् ॥ मण्डलं नवभागं स्यान्नवव्यूहं हरिं यजेत् ॥ ३१ ॥ पञ्चविंशतिकव्यूहं मण्डलं विश्वरूपकम् ॥ द्वात्रिंशद्धस्तकं क्षेत्रं भक्तं द्वात्रिंशता समम् ॥ ३२ ॥ एवंकृते चतुर्विंशत्यधिकं तु सहस्रकम् ॥ कोष्ठकानां समुद्दिष्टं मध्ये षोडशकोष्ठकैः ॥ ३३ ॥ भद्रकं परिलिख्याथ पार्श्वे पङ्क्तिं विमृज्य तु ॥ ततः षोडशभिः कोष्ठैर्दिक्षु भद्राष्टकं लिखेत् ॥ ३४ ॥ ततोऽपि पङ्क्तिं सम्मृज्य तद्वत्षोडशभद्रकम् ॥ लिखित्वा परितः पङ्क्तिं विमृज्याथ प्रकल्पयेत् ॥ ३५ ॥ द्वारद्वादशकं दिक्षु त्रीणि त्रीणि यथाक्रमात् ॥ षड्भिश्च परिलुप्यान्तर्मध्ये चत्वारि पार्श्वयोः ॥ ३६ ॥ चत्वार्यन्तर्बहिर्द्वे तु शोभार्थं परिमृज्य तु ॥ उपद्वारप्रसिद्ध्यर्थं त्रीण्यन्तः पञ्च बाह्यतः ॥ ३७ ॥ परिमृज्य तथा शोभां पूर्ववत्परिकल्पयेत् ॥ बाह्यैः कोणेषु सप्तान्तस्त्रीणि कोष्ठानि मार्जयेत् ॥ ३८ ॥ पञ्चविंशतिकव्यूहे परं ब्रह्म यजेच्छुभे ॥ मध्ये पूर्वादितः पद्मे वासुदेवादयः क्रमात् ॥ ३९ ॥ वराहं पूजयित्वा च पूर्वपद्मे ततः क्रमात् ॥ व्यूहान्सम्पूजयेत्तावद्यावत्षट्त्रिंशगो भवेत् ॥ ४० ॥ यथोक्तं व्यूहमाखिलमेकस्मिन्पङ्कजे क्रमात् ॥ यष्टव्यमिति यत्नेन प्रचेता मन्यतेऽध्वरम् ॥ ४१ ॥ सत्यं तु मूर्तिभेदेन विभक्तं मन्यतेऽच्युतम् ॥ चत्वारिंशत्करं क्षेत्रं ह्युत्तरं विभजेत्क्रमात् ॥ ४२ ॥ एकैकं सप्तधा भूयस्तथैकैकं द्विधा पुनः ॥ चतुष्षष्ट्युत्तरं सप्तशतान्येक सहस्रकम् ॥ ४३ ॥ कोष्ठकानां भद्रकं च मध्ये षोडशकोष्ठकैः ॥ पार्श्वे वार्थी ततश्चाष्टभद्राण्यथ च वीथिका ॥ ४४ ॥ षोडशाब्जान्यथो वीथी चतुर्विंशतिपङ्कजम् ॥

वीथीपद्मानि द्वात्रिंशत्पङ्क्तिवीथिकजान्यथ ॥ ४५ ॥ चत्वारिंशत्ततो वीथी शेषपङ्क्तित्रयेण च ॥ द्वारशोभोपशोभाः स्युर्दिक्षु मध्ये विलोप्य च ॥ ४६ ॥ द्विचतुष्पड्द्वारसिद्धयै चतुर्दिक्षु विलोपयेत् ॥ पञ्च त्रीण्येककं बाह्ये शोभोपद्वारसिद्धये ॥४७॥ द्वाराणां पार्श्वयोरन्तः षड् वा चत्वारि मध्यतः ॥ द्वे द्वे लुप्येदेवमेव षड् भवन्त्युपशोभिकाः ॥ ४८ ॥ एकस्यां दिशि सङ्ख्याः स्युश्चतस्रः परिसङ्ख्यया ॥ एकैकस्यां दिशि त्रीणि द्वाराण्यपि भवन्त्युत ॥ ४९ ॥ पञ्च पञ्च तु कोणेषु पङ्क्तौ पङ्क्तौ क्रमात्सृजेत् ॥ कोष्ठकानि भवेदेवं मत्यैंष्टं मण्डलं शुभम् ॥५०॥ इत्यादिमहापुराणे आग्नेये सर्वतोभद्रमण्डलादिविधिर्नामोनत्रिंशोऽध्यायः ॥२९॥

अथ मण्डलविधिः ॥ नारद उवाच ॥ मध्ये पद्मे यजेद्ब्रह्म साङ्गं पूर्वेऽब्जनाभकम् ॥ आग्नेयेऽब्जे च प्रकृतिं याम्येऽब्जे पुरुषं यजेत् ॥ १ ॥ पुरुषादक्षिणे वह्निं नैर्ऋते वारुणेऽनिलम् ॥ आदित्यमैन्दवे पद्मे ऋग्यजुश्चेशेपद्मके ॥ २ ॥ इन्द्रादींश्च द्वितीयायां पद्मे षोडशके तथा ॥ सामाथर्वाणमाकाशं वायुं तेजस्तथा जलम् ॥ ३ ॥ पृथिवी च मनश्चैव श्रोत्रं त्वक् चक्षुरर्चयेत् ॥ रसनां च तथा घ्राणं भूर्भुवश्चैव षोडशम् ॥ ४ ॥ महर्जनस्तपः सत्यं अत्याग्निष्टोममेव च ॥ तथाग्निष्टोमकं चोक्थं षोडशीं वाजपेयकम् ॥ ५ ॥ अतिरात्रं च सम्पूज्य तथाप्तोर्यामम्मर्च्चयेत् ॥ मनो बुद्धिमहङ्कारं शब्दं स्पर्शं च रूपकम् ॥ ६ ॥ रसं गन्धं च पद्मेषु चतुर्विंशतिषु क्रमात् ॥ जीवं मनो धियं चाहं प्रकृतिं शब्दमात्रकम् ॥ ७ ॥ वासुदेवादिमूर्त्तीश्च तथा चैव दशात्मकम् ॥ मनः श्रोत्रं त्वचं प्राच्यं चक्षुश्च रसनं तथा ॥ ८ ॥ घ्राणं वाक्पाणिपादं च द्वात्रिंशद्वारिजेष्विमान् ॥ चतुर्थावरणे पूज्याः साङ्गाः सपरिवारकाः ॥ ९ ॥ पायूपस्थौ च सम्पूज्य मासानां द्वादशाधिपान् ॥ पुरुषोत्तमादिषड्विंशान्बाह्यावरणके यजेत् ॥ १० ॥ चक्राब्जे तेषु सम्पूज्या मासानां पतयः क्रमात् ॥ अष्टौ प्रकृतयः षड् वा पञ्चाथ चतुरोऽपरे ॥ ११ ॥ रजःपातं ततः कुर्याल्लिखिते मंडले शृणु ॥ कर्णिका पीतवर्णा स्याद्रेखाः सर्वाः सिताः समाः ॥ १२ ॥ द्विहस्तेऽङ्गुष्ठमात्राः स्युर्हस्ते चार्द्धसमाः सिताः ॥ पद्मं शुक्लेन सन्धौस्तु कृष्णेन श्यामतोऽथवा ॥ १३ ॥ केसरा रक्तपीताः स्युः कोणान्रक्तेन पूरयेत् ॥ भूषयेद्योगपीठं तु यथेष्टं सार्ववर्णिकैः ॥ १४ ॥ लतावितानपत्राद्यैर्वीथिकामुपशोभयेत् ॥ पीठद्वारे तु शुक्लेन शोभा रक्तेन पीततः ॥ १५ ॥ उपशोभां च नीलेन कोणसङ्ख्यांश्च

वै सितान् ॥ भद्रके पूरणं प्रोक्तमेवमन्येषु पूरणम् ॥ १६ ॥ त्रिकोणं सितरक्तेन कृष्णेन च विभूषयेत् ॥ द्विकोणं रक्तपीताभ्यां
नाभिं कृष्णेन चक्रके ॥ १७ ॥ अरकान्पीतरक्ताभिः श्यामान्नेमिं तु रक्ततः ॥ सितश्यामारुणाः कृष्णाः पीता रेखास्तु बाह्यतः
॥ १८ ॥ शालिपिष्टादि शुक्लं स्याद्रक्तं कौसुम्भकादिकम् ॥ हरिद्रया च हारिद्रं कृष्णं स्याद्दग्धधान्यतः ॥ १९ ॥ शमीपत्रादिकैः
श्यामं बीजानां लक्षजाप्यतः ॥ चतुर्लक्षस्तु मंत्राणां विद्यानां लक्षसाधनम् ॥ २० ॥ अयुतं बुद्धविद्यानां स्तोत्राणां च सहस्रकम् ॥
पूर्वमेवाथ लक्षेण मन्त्रशुद्धिस्तथात्मनः ॥ २१ ॥ तथापरेण लक्षेण मंत्रः क्षेत्रीकृता भवेत् ॥ पूर्वसेवासमो होमो बीजानां सम्प्रकी-
र्तितः ॥ २२ ॥ पूर्वसेवा दशांशेन मन्त्रादीनां प्रकीर्तिता ॥ पुरश्चरणमन्त्रे तु मासिकं व्रतमाचरेत् ॥ २३ ॥ भुवि न्यसेद्वामपादं न
गृह्णीयात्प्रतिग्रहम् ॥ एवं द्वित्रिगुणेनैव मध्यमोत्तमसिद्धयः ॥ २४ ॥ मन्त्रध्यानं प्रवक्ष्यामि येन स्यान्मंत्रजं फलम् ॥ स्थूलं
शब्दमयं रूपं विग्रहं बाह्यमिष्यते ॥ २५ ॥ सूक्ष्मं ज्योतिर्म्मयं रूपं हार्दं चिन्तामयं भवेत् ॥ चिन्तया रहितं यत्तु तत्परं परिकी-
र्तितम् ॥ २६ ॥ वाराहसिंहशक्तीनां स्थूलरूपं प्रधानतः ॥ चिन्तया रहितं रूपं वासुदेवस्य कीर्तितम् ॥ २७ ॥ इतरेषां स्मृतं
रूपं हार्दचिन्तामयं सदा ॥ स्थूलं वैराजमाख्यात सूक्ष्मं वै लिङ्गित भवेत् ॥ २८ ॥ चिन्तया रहितं रूपमैश्वरं परिकीर्तितम् ॥
हृत्पुण्डरीकनिलयं चैतन्यं ज्योतिरव्ययम् ॥ २९ ॥ बीजं बीजात्मकं ध्यायेत्कदम्बकुसुमाकृति ॥ कुम्भान्तरगतो दीपो निरुद्ध-
प्रसवो यथा ॥ ३० ॥ संहृतः केवलस्तिष्ठेदेवं मन्त्रेश्वरो हृदि ॥ अनेकसुषिरे कुम्भे तावन्मात्रा गभस्तयः ॥ ३१ ॥ प्रसरन्ति
बहिस्तद्वन्नाडीभिर्बीजरश्मयः ॥ अथावभासतो देवीमात्मीकृत्य तनुं स्थिताः ॥ ३२ ॥ हृदयात्प्रस्थिता नाड्यो दर्शनेन्द्रिय-
गोचसः ॥ अग्नीषोमात्मके तासां नाड्यौ नासाग्रसंस्थिते ॥ ३३ ॥ सम्यग्गुह्येन योगेन जित्वा देहसमीरणम् ॥ जपध्यानरतो
मन्त्री मन्त्रलक्षणमश्नुते ॥३४॥ संशुद्धभूततन्मात्रः सकामो योगमभ्यसन् ॥ अणिमादिमवाप्नोति विरक्तः प्रविलङ्घच च ॥ देवा-
त्मको भूतमात्रान्मुच्यते चेन्द्रियग्रहात् ॥३५॥ इत्यादिमहापुराणे आग्नेये मण्डलादिवर्णनं नाम त्रिंशोऽध्यायः ॥३०॥अथ कुशा-
पामार्जनविधानम् ॥ अग्निरुवाच ॥ रक्षां स्वस्य परेषां च वक्ष्ये तां मार्जनाद्भयाम् ॥ यया विमुच्यते दुःखैः सुखं च प्राप्नुयान्नरः ॥ १ ॥

॥ ओं नमः परमार्थाय पुरुषाय महात्मने ॥ अरूपबहुरूपाय व्यापिने परमात्मने ॥ २ ॥ निष्कल्मषाय शुद्धाय ध्यान-
योगरताय च ॥ नमस्कृत्य प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥ ३ ॥ वराहाय नृसिंहाय वामनाय महात्मने ॥ नमस्कृत्य
प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥ ४ ॥ त्रिविक्रमाय रामाय वैकुंठाय नराय च ॥ नमस्कृत्य प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः
॥५॥ वराह नरसिंहेश वामनेश त्रिविक्रम ॥ हयग्रीवेश सर्वेश हृषीकेश हराशुभम् ॥६॥ अपराजित चक्राद्यैश्चतुर्भिः परमायुधैः ॥
अखण्डितानुभावैस्त्वं सर्वदुःखहरो भव ॥ ७ ॥ हरामुकस्य दुरितं सर्वं च कुशलं कुरु ॥ मृत्युबन्धार्त्तिभयदं दुरितस्य च यत्फ-
लम् ॥ ८ ॥ पराभिध्यानसहितैः प्रयुक्तं चाभिचारकम् ॥ गदस्पर्शमहारोगप्रयोगं जरया जर ॥ ९ ॥ ओं नमो वासुदेवाय नमः
कृष्णाय खड्गिने ॥ नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥ १० ॥ नमः कमलकिञ्जल्कपीतनिर्मलवाससे ॥ महाहवारिपुस्कन्ध-
सृष्टचक्राय चक्रिणे ॥ ११ ॥ दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्त्तिमते नमः ॥ महायज्ञवराहाय शेषभोगाङ्कशायिने ॥ १२ ॥ तप्तहाटक-
केशाग्रज्वलत्पावकलोचन ॥ वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥ १३ ॥ काश्यपायातिह्रस्वाय ऋग्यजुःसामभूषित ॥
तुभ्यं वामनरूपायाक्रमते गां नमो नमः ॥ १४ ॥ वराहाशेषदुःखानि सर्वपापफलानि वै ॥ मर्द मर्द महादंष्ट्र मर्द मर्द च तत्फलम्
॥ १५ ॥ नरसिंह करालास्य दन्तप्रान्तानलोज्ज्वल ॥ भञ्ज भञ्ज निनादेन दुष्टान्पश्यार्त्तिनाशन ॥ १६ ॥ ऋग्यजुःसामगर्भाभि-
र्वाग्भिर्वामनरूपधृक् ॥ प्रशम सर्वदुःखानि नयत्वस्य जनार्दनः ॥१७॥ ऐकाहिकं द्व्याहिकं च तथा त्रिदिवसं ज्वरम् ॥ चातुर्थिकं
तथात्युग्रं तथैव सततं ज्वरम् ॥ १८ ॥ दोषोत्थं सन्निपातोत्थं तथैवागन्तुकं ज्वरम् ॥ शमं नयाशु गोविंद च्छिन्धि च्छिन्ध्यस्य
वेदनाम् ॥१९॥ नेत्रदुःखं शिरो दुःखं दुःखं चोदरसम्भवम् ॥ अन्तःश्वासमतिश्वासं परितापं सवेपथुम् ॥२०॥ गुदघ्राणांघ्रिरोगांश्च
कुष्ठरोगांस्तथा क्षयम् ॥ कामलादींस्तथा रोगान्प्रमेहांश्चातिदारुणान् ॥ २१ ॥ भगन्दरातिसारांश्च मुखरोगांश्च वल्गुलीम् ॥
अश्मरीमूत्रकृच्छ्रांश्च रोगानन्यांश्च दारुणान् ॥ २२ ॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ॥ कफोद्भवाश्च ये केचिद्ये चान्ये
सान्निपातिकाः ॥२३॥ आगन्तुकाश्च ये रोगा लूता विस्फोटकादयः ॥ ते सर्वे प्रशमं यांतु वासुदेवापमार्जिताः ॥२४॥ विलयं यांतु

ते सर्वे विष्णोरुच्चारणेन च ॥ क्षयं गच्छन्तु चाशेषास्ते चक्राभिहता हरेः ॥ २५ ॥ अच्युतानन्तगोविन्दनामोच्चारणभीषिताः ॥
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ २६ ॥ स्थावरं जङ्गमं वापि कृत्रिमं चापि यद्विषम् ॥ दन्तोद्भवं नख-
भवमाकाशप्रभवं विषम् ॥ २७ ॥ लूतादिप्रभवं यच्च विषमन्यत्तु दुःखदम् ॥ शमं नयतु तत्सर्वं कीर्तितोऽस्य जनार्दनः ॥ २८ ॥
ग्रहान्प्रेतग्रहांश्चापि तथा वै डाकिनीग्रहान् ॥ वेतालांश्च पिशाचांश्च गन्धर्वान् यक्षराक्षसान् ॥ २९ ॥ शकुनीपूतनाद्यांश्च तथा
वैनायकान्ग्रहान् ॥ मुखमण्डीं तथा क्रूरां रेवतीं वृद्धरेवतीम् ॥ ३० ॥ वृद्धकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि ॥ बालस्य
विष्णोश्चरितं हन्तु बालग्रहानिमान् ॥ ३१ ॥ वृद्धाश्च ये ग्रहाः केचिद्ये च बालग्रहाः क्वचित् ॥ नरसिंहस्य ते दृष्ट्वा दग्धा ये
चापि यौवने ॥ ३२ ॥ सटाकरालवदनो नरसिंहो महाबलः ॥ ग्रहानशेषान्निःशेषान्करोतु जगतो हितः ॥ ३३ ॥ नरसिंह महा-
सिंह ज्वालामालोज्ज्वलानन ॥ ग्रहानशेषान्सर्वेश खाद खादाग्निलोचन ॥ ३४ ॥ ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः ॥
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः ॥ ३५ ॥ शस्त्रक्षतेषु ये दोषा ज्वालागर्दभकादयः ॥ तानि सर्वाणि सर्वात्मा परमात्मा
जनार्दनः ॥ ३६ ॥ किञ्चिद्रूपं समास्थाय वासुदेवस्य नाशय ॥ क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालातिभीषणम् ॥ सर्वदुष्टो-
पशमनं कुरु देववराच्युत ॥ ३७ ॥ सुदर्शन महाज्वाल च्छिन्धि च्छिन्धि महारव ॥ सर्वदुष्टानि रक्षांसि क्षयं यान्तु
विभीषण ॥ ३८ ॥ प्राच्यां प्रतीच्यां च दिशि दक्षिणोत्तरतस्तथा ॥ रक्षाङ्करोतु सर्वात्मा नरसिंहः सुगर्जितः ॥ ३९ ॥ दिवि
भुव्यन्तरिक्षे च पृष्ठतः पार्श्वतोऽग्रतः ॥ रक्षां करोतु भगवान्बहुरूपो जनार्दनः ॥ ४० ॥ यथा विष्णुर्जगत्सर्वं सदेवासुरमानुषम् ॥
तेन सत्येन दुष्टानि शममस्य व्रजन्तु वै ॥ ४१ ॥ यथा विष्णौ स्मृते सद्यः संक्षयं यांतु पातकम् ॥ सत्येन तेन सकलं दुष्टमस्य
प्रशाम्यतु ॥ ४२ ॥ परमात्मा यथा विष्णुर्वेदान्तेषु च गीयते ॥ तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥ ४३ ॥ यथा
यज्ञेश्वरो विष्णुर्देवेष्वपि हि गीयते ॥ सत्येन तेन सकलं यन्मयोक्तं तथास्तु तत् ॥ ४४ ॥ शान्तिरस्तु शिवं चास्तु दुष्टमस्य प्रशा-
म्यतु ॥ वासुदेवशरीरोत्थैः कुशैर्निर्म्मथितं मया ॥ ४५ ॥ अपमार्जतु गोविन्दो नरो नारायणस्तथा ॥ तथास्तु सर्वदुःखानां प्रशमो

जपनाद्धरेः ॥ ४६ ॥ अपामार्जनकं शस्त्रं सर्वरोगादिवारणम् ॥ अहं हरिः कुशो विष्णुर्हता रोगा मया तव ॥ ४७ ॥ इत्यादि-
महापुराणे आग्नेये कुशापामार्जनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ अथ संस्कारकथनम् ॥ अग्निरुवाच ॥ निर्वाणादिषु दीक्षासु
चत्वारिंशत्तथाष्ट च ॥ संस्कारान्कारयेद्धीमाञ्च्छृणु तान्यैः सुरो भवेत् ॥ १ ॥ गर्भाधानं तु योन्यां वै ततः पुंसवनं चरेत् ॥
सीमन्तोन्नयनं चैव जातकर्म्म च नाम च ॥ २ ॥ अन्नाशनं ततश्चूडा ब्रह्मचर्य्यं व्रतानि च ॥ चत्वारि वैष्णवी पार्थी भौतिकी
श्रौतिकी तथा ॥ ३ ॥ गोदानं स्नातकत्वं च पाकयज्ञाश्च सप्त ते ॥ अष्टका पार्वणश्राद्धं श्रावण्याग्रहणीति च ॥ ४ ॥ चैत्री चाश्वयुजी
सप्त हविर्यज्ञाश्च ताञ्छृणु ॥ आधानं चाग्निहोत्रं च दर्शो वै पौर्णमासकः ॥ ५ ॥ चातुर्मास्यं पशोर्बन्धः सौत्रामणिरथापरः ॥ सोमसंस्थाः
सप्त शृणु चाग्निष्टोमः क्रतूत्तमः ॥ ६ ॥ अत्यग्निष्टोम उक्थ्यश्च षोडशी वाजपेयकः ॥ अतिरात्रातोर्य्यामश्च सहस्रेशाः सवा इमे ॥ ७ ॥
हिरण्यांघ्रिर्हिरण्याक्षो हिरण्यमित्र इत्यतः ॥ हिरण्यपाणिर्हेमाक्षो हेमाङ्गो हैमसूत्रकः ॥ ८ ॥ हिरण्यास्यो हिरण्याङ्गो हेमजिह्वो
हिरण्यवान् ॥ अश्वमेधो हि सर्वेशो गुणाश्चाष्टाथ ताञ्छृणु ॥ ९ ॥ दया च सर्वभूतेषु क्षान्तिश्चैव तथार्जवम् ॥ शौचं चैवमनाया-
सो मङ्गलं चापरो गुणः ॥ १० ॥ अकार्पण्यं चास्पृहा च मूलेन जुहुयाच्छतम् ॥ सौरशाक्तैर्विष्ण्वीशदीक्षास्वेते समाः
स्मृताः ॥ ११ ॥ संस्कारैः संस्कृतश्चैतैर्भुक्तिं मुक्तिमवाप्नुयात् ॥ सर्वरोगादिनिर्मुक्तो देववद्वर्त्तते नरः ॥ जप्याद्धोमात्पूजनाच्च
ध्यानाद्देवस्य चेष्टभाक् ॥ १२ ॥ इत्यादिमहापुराणे आग्नेये अष्टचत्वारिंशत्संस्कारकथनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥
अथ पवित्रारोपणविधानम् ॥ अग्निरुवाच ॥ पवित्रारोपणं वक्ष्ये वर्षपूजाफलं हरेः ॥ आषाढादौ कार्तिकान्ते प्रतिपत्त्यज्यते तिथिः
॥ १ ॥ श्रिया गौर्या गणेशस्य सरस्वत्या गुहस्य च ॥ मार्त्तण्डमातृदुर्गाणां नागर्षिहरिमन्मथैः ॥ २ ॥ शिवस्य ब्रह्मणस्तद्वद्वितीया-
दितिथेः क्रमात् ॥ यस्य देवस्य यो भक्तः पवित्रा तस्य सा तिथिः ॥ ३ ॥ आरोहणे तुल्यविधिः पृथङ् मन्त्रादिकं यदि ॥ सौवर्ण
राजतं ताम्रं नेत्रकार्पासकादिकम् ॥ ४ ॥ ब्राह्मण्या कर्त्तितं सूत्रं तदलाभे तु संस्कृतम् ॥ द्विगुणं त्रिगुणीकृत्य तेन कुर्य्यात्पवित्र-
कम् ॥ ५ ॥ अष्टोत्तरशतादूर्द्धं तदर्द्धं चोत्तमादिकम् ॥ क्रियालोपविघातार्थं यत्त्वयाभिहितं प्रभो ॥ ६ ॥ मया तत्क्रियते देव

यथा यत्र पवित्रकम् ॥ अविघ्नं तु भवेदत्र कुरु नाथ जयाव्यय ॥ ७ ॥ प्रार्थ्य तन्मण्डलादौ गायत्र्या बन्धयेन्नरः ॥ ॐ नारायणाय विद्महे वासुदेवाय धीमहि ॥ ८ ॥ तन्नोविष्णुः प्रचोदयाद्देवदेवानुरूपतः ॥ जानूरुनाभिनासान्तं प्रतिमासु पवित्रकम् ॥ ९ ॥ पादान्ता वनमाला स्यादष्टोत्तरसहस्रतः ॥ मालां तु कल्पसाध्यां वा द्विगुणां षोडशांगुलाम् ॥ १० ॥ कर्णिकाकेसरं पत्रं मन्त्राद्यं मण्डलान्तकम् ॥ मण्डलांगुलमात्रैकचक्राब्जादौ पवित्रकम् ॥ ११ ॥ स्थंडिलेऽगुलमानेन आत्मनः सप्तविंशतिः ॥ आचार्याणां च सूत्राणि पितृमात्रादिपुस्तके ॥ १२ ॥ नाभ्यन्तं द्वादशग्रान्थि तथा गन्धपवित्रके ॥ अंगुलात्कल्पनादौ द्विर्माला चाष्टोत्तरं शतम् ॥ १३ ॥ अथवार्कचतुर्विंशषट्त्रिंशन्मालिका द्विज ॥ अनामामध्यमांगुष्टैर्मन्दाद्यैः मालिकार्थिभिः ॥ १४ ॥ कनिष्ठा दौ द्वादश वा ग्रंथयः स्युः पवित्रके ॥ रवेः कुम्भहुताशादेः सम्भवे विष्णुवन्मतम् ॥ १५ ॥ पीठस्य पीठमानं स्यान्मेखलांतेचं कुंडके ॥ यथाशक्ति सूत्रग्रन्थिः परिचारेऽथ वैष्णवे ॥ १६ ॥ सूत्राणि वा सप्तदश सूत्रेण त्रिविभक्तके ॥ रोचनागुरुकर्पूरहरिद्राकुङ्कुमादिभिः ॥ १७ ॥ रञ्जयेच्चन्दनाद्यैर्वा स्नानसन्ध्यादिकृन्नरः ॥ एकादश्यां यागगृहे भगवंतं हरिं यजेत् ॥ १८ ॥ समस्तपरिवाराय बलिं पीठे समर्चयेत् ॥ क्षौक्षेत्रपालाय द्वारान्ते द्वारोपरि तथा श्रियम् ॥ १९ ॥ धात्रे दक्षे विधात्रे च गङ्गां च यमुनां तथा ॥ शङ्खपद्मनिधी पूज्य मध्ये वास्त्वपसारणम् ॥ सारङ्गायेति भूतानां भूतशुद्धिं स्थितश्चरेत् ॥ २० ॥ ॐ ह्रूं हः फट् ह्रूं गन्धतन्मात्रं संहरामि नमः ॥ ॐ ह्रूं हः फट् ह्रूं रसतन्मात्रं संहरामि नमः ॐ ह्रूं हः फट् ह्रूं रूपतन्मात्रं संहरामि नमः ॥ ॐ ह्रूं हः फट् ह्रूं स्पर्शतन्मात्रं संहरामि नमः ॥ ॐ ह्रूं हः फट् ह्रूं शब्दतन्मात्रं संहरामि नमः पञ्चोद्घातैर्गन्धतन्मात्रस्वरूपं भूमिमण्डलम् ॥ चतुरस्रं च पीतं च कठिनं वज्रलाञ्छितम् ॥ २१ ॥ इन्द्राधिदैवतं पादयुग्ममध्यगतं स्मरेत् ॥ शुद्धं च रसतन्मात्रं प्रविलाप्याऽथ संहरेत् ॥ रसमात्रं रूपमात्रे क्रमेणानेन पूजकः ॥ २२ ॥ ॐ ह्रीं हः फट् ह्रूं रसतन्मात्रं संहरामि नमः ॥ ॐ ह्रीं हः फट् ह्रूं रूपतन्मात्रं संहरामि नमः ॥ ॐ ह्रीं हः फट् ह्रूं स्पर्शतन्मात्रं संहरामि नमः ॥ ॐ ह्रीं हः फट् ह्रूं शब्दतन्मात्रं संहरामि नमः ॥ जानुनाभिमध्यगतं श्वेतं वै पद्मलाञ्छितम् ॥ शुक्लवर्णं चार्द्धचन्द्रं ध्यायेद्वरुणदैवतम् ॥ २३ ॥ चतुर्भिश्च तदुद्घातैः शुद्धं तद्रसमात्रकम् ॥ संहरेद्रसतन्मात्रे रूपमात्रे च संहरेत् ॥

॥ २४ ॥ ॐ ह्रूं हः फट् ह्रूं रूपतन्मात्रं सहरामि नमः ॥ ॐ ह्रूं हः फट् ह्रूं स्पर्शतन्मात्रं संहरामि नमः ॥ ॐ ह्रूं हः फट् ह्रूं शब्द-
तन्मात्रं संहरामि नमः ॥ इति त्रिभिस्तदुद्घातैस्त्रिकोणं वह्निमण्डलम् ॥ नाभिकण्ठमध्यगतं रक्तं स्वस्तिकलाञ्छितम् ॥ २५ ॥
ध्यात्वानलाधिदेवं तच्छुद्धं स्पर्शे लयं नयेत् ॥ ॐ ह्रीं हः फट् ह्रूं स्पर्शतन्मात्रं संहरामि नमः ॥ ॐ ह्रीं हः फट् ह्रूं शब्दतन्मात्रं संह-
रामि नमः ॥ कण्ठनासामध्यगतं वृत्तं वै वायुमण्डलम् ॥ २६ ॥ द्विरुद्भौर्तधूम्रवर्णं ध्यायेच्छुद्धेन्दुलाञ्छितम् ॥ स्पर्शमात्रं शब्द-
मात्रैः संहरेद्ध्यानयोगतः ॥ २७ ॥ ॐ ह्रीं हः फट् ह्रूं शब्दतन्मात्रं संहरामि नमः ॥ एकोद्घातेन चाकाशं शुद्धस्फटिकसन्निभम् ॥
नासापुटशिखान्तस्थमाकाशमुपसंहरेत् ॥ २८ ॥ शोषणाद्यैर्देहशुद्धिं कुर्यादेव क्रमात्ततः ॥ शुष्कं कलेवरं ध्यायेत्पादाद्यं च शिखा-
न्तकम् ॥ २९ ॥ यंबीजेन क्वींजेन ज्वालामालासमायुतम् ॥ देहं रमित्यनेनैव ब्रह्मरन्ध्राद्विनिर्गतम् ॥ ३० ॥ बिन्दुं ध्यात्वा
चामृतस्य तेन भस्म कलेवरम् ॥ संप्लावयेल्लमित्यस्मादेहं सम्पाद्य दिव्यंकम् ॥ ३१ ॥ न्यासं कृत्वा करे देहे मानसं यागमा-
चरेत् ॥ विष्णुं साङ्गं हृदि पद्मे मानसैः कुसुमादिभिः ॥ ३२ ॥ मूलमन्त्रेण देवेशं प्रार्च्चयेद्भुक्तिमुक्तिदम् ॥ स्वागतं देवदेवेश
सन्निधौ भव केशव ॥ ३३ ॥ गृहाण मानसीं पूजां यथार्थं परिभाविताम् ॥ आधारशक्तिः कूर्मोऽथ पूज्योऽनन्तो मही ततः
॥ ३४ ॥ मध्येऽग्न्यादौ च धर्माद्या अधर्माद्याश्च मुख्यगाः ॥ सत्त्वादिमध्ये पद्मं च मायाविद्याख्यतत्त्वके ॥ ३५ ॥ कालतत्त्वं
च सूर्यादिमण्डलं पक्षिराजकः ॥ मध्ये ततश्च वायव्यादीशान्ता गुरुपंक्तिका ॥ ३६ ॥ गणः सरस्वती पूज्या नारदो नलकूबरः ॥
गुरुर्गुरोः पादुका च परो गुरुश्च पादुका ॥ ३७ ॥ पूर्वसिद्धाः परसिद्धाः केसरेषु च शक्तयः ॥ लक्ष्मीः सरस्वती प्रीतिः कीर्तिः
शान्तिश्च कांतिका ॥ ३८ ॥ पुष्टिस्तुष्टिर्महेन्द्राद्या मध्ये चावाहितो हरिः ॥ धृतिः श्रीरतिकान्त्याद्या मूलेन स्थापितोऽच्यु-
तः ॥ ३९ ॥ ॐ अभिमुखो भवेति प्रार्थ्य प्राच्यां सन्निहितो भव ॥ विन्यस्याघ्र्यादिकं दत्त्वा गन्धाद्यैर्मूलतो यजेत् ॥ ४० ॥
ॐ भीषय भीषय हृच्छिरस्त्रासय वै पुनः ॥ मर्दय मर्दय शिखा अस्त्रादौ शस्त्रतोऽस्त्रकम् ॥ ४१ ॥ रक्ष रक्ष प्रध्वंसय प्रध्वंसय
कवचाय नमस्ततः ॥ ॐ ह्रूं फट् अस्त्राय नमो मूलबीजेन चाङ्गकम् ॥ ४२ ॥ पूर्वदक्षाप्यसौम्येषु मूर्त्यावरणमर्च्चयेत् ॥ वासुदेवः

सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥४३॥ अग्न्यादौ श्रीधृतिरतिकान्तयो मूर्तयो हरेः ॥ शङ्खचक्रगदापद्ममग्न्यादौ पूर्वकादिकम् ॥४४॥
शार्ङ्गं च मुसलं खड्गं वनमालां च तद्बहिः ॥ इन्द्राद्याश्च तथानन्तो नैर्ऋत्यां वरुणस्ततः ॥ ४५ ॥ ब्रह्मेन्द्रेशानयोर्मध्ये अस्त्रावर-
णकं बहिः ॥ ऐरावतंस्ततश्छागो महिषो वानरो झषः ॥ ४६ ॥ मृगः शशोऽथ वृषभः कूर्म्मो हंसस्ततो बहिः ॥ पृश्निगर्भः
कुमुदाद्या द्वारपाला द्वयं द्वयम् ॥ ४७ ॥ पूर्वाद्युत्तरद्वारान्तं हरिं नत्वा बलिं बहिः ॥ विष्णुपार्षदेभ्यो नमो बलिपीठे बलिं दद्यात्
॥ ४८ ॥ विश्वाय विष्वक्सेनात्मने ईशानके यजेत् ॥ देवस्य दक्षिणे हस्ते रक्षासूत्रं च बन्धयेत् ॥ ४९ ॥ संवत्सरकृताचार्यायाः
संपूर्णफलदायिने ॥ पवित्रारोहणायेदं कौतुकं धारय ॐ नमः ॥ ५० ॥ उपवासादिनियमं कुर्य्याद्वै देवसन्निधौ ॥ उपवासादि-
नियतो देवं सन्तोषयाम्यहम् ॥ ५१ ॥ कामक्रोधादयः सर्वे मा मे तिष्ठन्तु सर्वथा ॥ अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम्
॥ ५२ ॥ यजमानो ह्यशक्तश्चेत्कुर्यान्नक्तादिकं व्रती ॥ हुत्वा विसर्जयेत्स्तुत्वा श्रीकरं नित्यपूजनम् ॥ ॐ ह्रीं श्रीं श्रीधराय त्रैलोक्य-
मोहनाय नमः ॥ ५३ ॥ इत्यादिमहापुराणे आग्नेये पवित्रारोहणे श्रीधरनित्यपूजाविधानं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ अथ
होमादिविधिः ॥ अग्निरुवाच ॥ विशेदनेन मन्त्रेण यागस्थानं च भूपयेत् ॥ नमो ब्रह्मण्यदेवाय श्रीधरायाव्ययात्मने ॥ १॥ ऋग्यजुः
सामरूपाय शब्ददेहाय विष्णवे ॥ विलिख्य मण्डलं सायं यागद्रव्यादि चाहरेत् ॥ २ ॥ प्रक्षालितकरांघ्रिः सन्विन्यस्यार्घ्य-
करो नरः ॥ अर्घ्याद्भिस्तु शिरः प्रोक्ष्य द्वारदेशादिकं तथा ॥ ३ ॥ आरभेद्धोमयागं च तोरणेशान्प्रपूजयेत् ॥ अश्वत्थोदुंबरवटप्लक्षाः
पूर्वादिगा नगाः ॥ ४ ॥ ऋगिन्द्रशोभनं प्राच्यां यंजुर्यमसुभद्रकम् ॥ सामापश्च सुधन्वाख्यं सोमाथर्वसुहोत्रकम् ॥ ५ ॥ तोरणान्ताः
पताकाश्च कुमुदाद्या घटद्वयम् ॥ द्वारि द्वारि स्वनाम्नार्च्याः पूर्वे पूर्णश्च पुष्करः ॥ ६ ॥ आनन्दनन्दनो दक्षो वीरसेनः सुषेणकः ॥
संभवप्रभवौ सौम्ये द्वारपांश्चैव पूजयेत् ॥ ७ ॥ अस्त्रजप्तपुष्पक्षेपाद्विघ्नानुत्सार्य संविशेत् ॥ भूतशुद्धिं विधायाथ विन्यस्य कृतमुद्रकः
॥ ८ ॥ फट्कारान्तं शिखां जप्त्वा सर्षपान्दिक्षु निक्षिपेत् । वासुदेवेन गोमूत्रं सङ्कर्षणेन गोमयम् ॥ ९ ॥ प्रद्युम्नेन पयस्तच्च दधि
नारायणाद्घृतम् ॥ एकद्वित्र्यादिवारेण घृताद्यै भागतोऽधिकम् ॥ १० ॥ घृतपात्रे तदेकत्र पञ्चगव्यमुदाहृतम् ॥ मण्डपप्रोक्षणायैकं

चापरं प्राशनाय च ॥ ११ ॥ आनीय दशकुंभेषु इन्द्राद्यांल्लोकपान्यजेत् ॥ पूज्याज्ञां श्रावयेत्तांश्च स्थातव्यं चाज्ञया हरेः ॥ १२ ॥ यागद्रव्यादि संरक्ष्य विकिरान्विकिरेत्ततः ॥ मूलाष्टशतसंज्ञतान्कुशकूर्चान्हरेच्च तान् ॥ १३ ॥ ऐशान्यां दिशि तत्रस्थं स्थाप्यं कुंभं च वर्द्धनीम् ॥ कुंभे साङ्गं हरिं प्रार्च्य वर्द्धन्यामस्त्रमर्चयेत् ॥ १४ ॥ प्रदक्षिणं यागगृहं वर्द्धन्याऽच्छिन्नधारया ॥ सिञ्चन्नयेत्ततः कुम्भं पूजयेच्च स्थिरासने ॥ १५ ॥ सपञ्चरत्नवस्त्राढ्यकुम्भे गन्धादिभिर्हरिम् ॥ वर्द्धन्यां हेमगर्भायां यजेदस्त्रं च वामतः ॥ १६ ॥ तत्समीपे वास्तुलक्ष्मीं भूविनायकमर्चयेत् ॥ स्नपनं कल्पयेद्विष्णोः संक्रान्त्यादौ तथैव च ॥ १७ ॥ पूर्णकुम्भानवस्थाप्य नवकोणेषु निर्व्रणान् ॥ पाद्यमर्घ्यमाचमनीयं पञ्चगव्यं च निःक्षिपेत् ॥ १८ ॥ पूर्वादिकलशेऽग्न्यादौ पञ्चामृतजलादिकम् ॥ दधि क्षीरं मधूष्णोदं पाद्यं स्याच्चतुरङ्गकम् ॥ १९ ॥ पद्मश्यामाकदूर्वाश्च विष्णुपर्णी च पाद्यकम् ॥ तथाष्टाङ्गार्घ्यमाख्यातं यवगन्धफलाक्षतम् ॥ २० ॥ कुशाः सिद्धार्थपुष्पाणि तिला द्रव्याणि चौहणम् ॥ लवङ्गकंकोलयुतं दद्यादाचमनीयकम् ॥ २१ ॥ स्नापयेन्मूलमन्त्रेण देवं पञ्चामृतैरपि ॥ शुद्धोदं मध्यकुंभेन देवमूर्ध्नि विनिःक्षिपेत् ॥ २२ ॥ कलशान्निःसृतं तोयं कूर्चाग्रं संस्पृशेन्नरः ॥ शुद्धोदकेन पाद्यं च अर्घ्यमाचमनं ददेत् ॥ २३ ॥ परिमृज्य पटेनांगं सवस्त्रं मंडलं नयेत् ॥ तत्राभ्यर्च्याचरेद्धोमं कुंडादौ प्राणसंयमी ॥ २४ ॥ प्रक्षाल्य हस्तौ रेखाश्च तिस्रः पूर्वाग्रगामिनीः ॥ दक्षिणादुत्तरान्ताश्च तिस्रश्चैवोत्तराग्रगाः ॥ २५ ॥ अघ्योंदकेन सम्प्रोक्ष्य योनिमुद्रां प्रदर्शयेत् ॥ ध्यात्वात्मरूपं चाग्निं तु योन्यां कुण्डे क्षिपेन्नरः ॥ २६ ॥ पात्राण्यासादयेत्पश्चाद्दर्भस्रुक्स्रुवकादिभिः ॥ बाहुमात्राः परिधय इध्मवत्रश्चसमेव च ॥ २७ ॥ प्रणीता प्रोक्षणीपात्रमाज्यस्थाली घृतादिकम् ॥ प्रस्थद्वयं तण्डुलानां युग्मं युग्ममधोमुखम् ॥ २८ ॥ प्रणीताप्रोक्षणीपात्रे न्यसेत्प्रागग्रगं कुशम् ॥ अद्भिः पूर्य्य प्रणीतां तु ध्यात्वा देवं प्रपूज्य च ॥ २९ ॥ प्रणीतां स्थापयेदग्रे द्रव्याणां चैव मध्यतः ॥ प्रोक्षणीमद्भिरसम्पूर्य्य प्रार्च्य दक्षे तु विन्यसेत् ॥ ३० ॥ चरुं च श्रपयेदग्नौ ब्रह्माणं दक्षिणे न्यसेत् ॥ कुशानास्तीर्य्य पूर्वादौ परिधीन्स्थापयेत्ततः ॥ ३१ ॥ वैष्णवीकरणं कुर्याद्गर्भाधानादिना नरः ॥ गर्भाधानं पुंसवनं सीमन्तोन्नयनं जनिः ॥ ३२ ॥ नामादिसमावर्त्तनान्तं जुहुयादष्ट चाहुतीः ॥ पूर्णाहुतिः प्रतिकर्म्म स्रुचा

स्रुवसुयुक्तया ॥ ३३ ॥ कुण्डमध्ये ऋतुमतीं लक्ष्मीं सञ्चिन्त्य होमयेत् ॥ कुण्डलक्ष्मीः समाख्याता प्रकृतिस्त्रिगुणात्मिका ॥ ३४ ॥ सा योनिः सर्वभूतानां विद्यामन्त्रगणस्य च ॥ विमुक्तेः कारणं वह्निः परमात्मा च मुक्तिदः ॥ ३५ ॥ प्राच्यां शिरः समाख्यातं बाहू कोणे व्यवस्थितौ ॥ ईशानाग्नेयकोणे तु जङ्घे वायव्यनैर्ऋते ॥ ३६ ॥ उदरं कुण्डमित्युक्तं योनिर्योनिर्विधीयते ॥ गुणत्रयं मेखलाः स्युर्ध्यात्वैवं समिधो दश ॥ ३७ ॥ पञ्चाधिकांस्तु जुहुयात्प्रणवान्मुष्टिमुद्रया ॥ पुनराघारौ जुहुयाद्वाय्वन्त्यन्तं ततः श्रयेत् ॥ ३८ ॥ ईशान्तं मूलमन्त्रेण आज्यभागौ तु होमयेत् ॥ उत्तरे द्वादशान्तेन दक्षिणे तेन मध्यतः ॥ ३९ ॥ व्याहृत्या पद्ममध्यस्थं ध्यायेद्वह्निं तु संस्कृतम् ॥ वैष्णवं सप्तजिह्वं च सूर्यकोटिसमप्रभम् ॥ ४० ॥ चन्द्रवक्त्रं च सूर्याक्षं जुहुयाच्छतमष्ट च ॥ तदर्द्धं चाष्ट मूलेन अङ्गानां च दशांशतः ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये आग्नेक्रियाकथनं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ अथ पवित्राधिवासनादिविधिः ॥ अग्निरुवाच ॥ सम्पाताहुतिना सिच्य पवित्राण्यधिवासयेत् ॥ नृसिंहमन्त्रजप्तानि गुप्तान्यस्त्रेण तानि तु ॥ १ ॥ वस्त्रसंवेष्टितान्येव पात्रस्थान्यभिमन्त्रयेत् ॥ बिल्वाद्यद्भिः प्रोक्षितानि मन्त्रेणैकधा द्विधा ॥ २ ॥ कुम्भपार्श्वे तु संस्थाप्य रक्षां विज्ञाप्य देशिकः ॥ दन्तकाष्ठं चामलकं पूर्वे सङ्कर्षणेन तु ॥ ३ ॥ प्रद्युम्नेन भस्मत्तिलान्दक्षे गोमयमृत्तिकाम् ॥ वारुणे चानिरुद्धेन सौम्ये नारायणेन च ॥ ४ ॥ दर्भोदकं चाथ हृदा अग्नौ कुङ्कुमरोचनम् ॥ ऐशान्यां शिरसा धूपं शिखया नैर्ऋतेऽप्यथ ॥ ५ ॥ मूलपुष्पाणि दिव्यानि कवचेनाथ वायवे ॥ चन्दनाम्बक्षतदधिदूर्वाश्च पुटिकास्थिताः ॥ ६ ॥ गृहं त्रिसूत्रेणावेष्ट्य पुनः सिद्धार्थकान्क्षिपेत् ॥ दद्यात्पूजाक्रमेणाथ स्वैः स्वैर्गंधपवित्रकम् ॥ ७ ॥ मन्त्रैर्वै द्वारपादिभ्यो विष्णुकुम्भे त्वनेन च ॥ विष्णुतेजोभवं रम्यं सर्वपातकनाशनम् ॥ ८ ॥ सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥ संपूज्य धूपदीपाद्यैर्व्रजेद्वारसमीपतः ॥ ९ ॥ गन्धपुष्पाक्षतोपेतं पवित्रं चास्त्रिलेऽर्पयेत् ॥ पवित्रं वैष्णवं तेजो महापातकनाशनम् ॥ १० ॥ धर्मकामार्थसिद्ध्यर्थं स्वकेऽङ्गे धारयाम्यहम् ॥ आसने परिवारादौ गुरौ दद्यात्पवित्रकम् ॥ ११ ॥ गन्धादिभिः समभ्यर्च्य मन्धपुष्पाक्षतादिमत् ॥ विष्णुतेजो भवेत्यादिमूलेन हरयेऽर्पयेत् ॥ १२ ॥ वह्निस्थाय ततो दत्त्वा देवं सम्प्रार्थये-

त्ततः ॥ क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ १३ ॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यो भव केशव ॥ इन्द्रादिभ्यस्ततो दत्त्वा विष्णुपार्षदके बलिम् ॥ १४ ॥ ततो देवाग्रतः कुम्भं वासोयुगसमन्वितम् ॥ रोचनाचन्द्रकाश्मीरगन्धाद्युदकसंयुतम् ॥ १५ ॥ गन्धपुष्पादिनाभ्यर्च्य मूलमन्त्रेण पूजयेत् ॥ मण्डपाद्बहिरागत्य विलिप्ते मण्डलत्रये ॥ १६ ॥ पञ्चगव्यं चरुं दन्तकाष्ठं चैव क्रमाद्ददेत् ॥ पुराणश्रवणं स्तोत्रं पठञ्जागरणं निशि ॥ १७ ॥ परप्रेषकबालानां स्त्रीणां भोगभुजां तथा ॥ सद्योऽधिवासनं कुर्याद्विना गन्धपवित्रकम् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये पवित्राधिवासनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ अथ विष्णुपवित्रारोपणविधिः ॥ अग्निरुवाच ॥ प्रातः स्नानादिकं कृत्वा द्वारपालान्प्रपूज्य च ॥ प्रविश्य गुप्ते देशे च समाकृष्याथ धारयेत् ॥ १ ॥ पूर्वाधिवासितं द्रव्यं वस्त्राभरणगन्धकम् ॥ निरस्य सर्वं निर्म्माल्यं देवं संस्थाप्य पूजयेत् ॥ २ ॥ पञ्चामृतैः कषायैश्च शुद्धगन्धोदकैस्ततः ॥ पूर्वाधिवासितं दद्याद्वस्त्रं गन्धं च पुष्पकम् ॥ ३ ॥ अग्नौ हुत्वा नित्यवच्च देवं सम्प्रार्थयेन्नमेत् ॥ समर्प्य कर्म्म देवाय पूजां नैमित्तिकीं चरेत् ॥ ४ ॥ द्वारपालविष्णुकुम्भवर्द्धनीः प्रार्थयेद्धरिम् ॥ अतोदेवेतिमन्त्रेण मूलमन्त्रेण कुम्भके ॥ ५ ॥ कृष्णकृष्ण नमस्तुभ्यं गृहीष्वेदं पवित्रकम् ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ ६ ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ॥ शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥ ७ ॥ पवित्रं च हृदाद्यैस्तु आत्मानमभिषिच्य च ॥ विष्णुकुम्भं च सम्प्रोक्ष्य व्रजेद्देवसमीपतः ॥ ८ ॥ पवित्रमात्मने दद्याद्रक्षाबन्धं विसृज्य च ॥ गृहाण ब्रह्मसूत्रं च यन्मया कल्पितं प्रभो ॥ ९ ॥ कर्म्मणां पूरणार्थाय यथा दोषो न मे भवेत् ॥ द्वारपालासनगुरुमुख्यानां च पवित्रकम् ॥ १० ॥ कनिष्ठादि च देवाय वनमालां च मूलतः ॥ हृदादिविष्वक्सेनान्ते पवित्राणि समर्पयेत् ॥ ११ ॥ वह्नौ हुत्वा वह्निगेभ्यो विष्वाद्यिभ्यः पवित्रकम् ॥ प्रार्च्य पूर्णाहुतिं दद्यात्प्रायश्चित्ताय मूलतः ॥ १२ ॥ अष्टोत्तरशतं वापि पञ्चोपनिषदैस्ततः ॥ मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ॥ १३ ॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ वनमाला यथा देव कौस्तुभं सततं हृदि ॥ १४ ॥ तद्वत्पवित्रतन्तूंश्च पूजां च हृदये वह ॥ कामतोऽकामतो वापि यत्कृतं नियमार्च्चने ॥ १५ ॥ विधिना विघ्नलोपेन परिपूर्णं तदस्तु मे ॥ प्रार्थ्य नत्वा

क्षमाप्याथ पवित्रं मस्तकेऽर्प्पयेत् ॥ १६ ॥ दत्त्वा बलिं दक्षिणाभिर्वैष्णवं तोषयेद्गुरुम् ॥ विप्रान्भोजनवस्त्राद्यैर्दिवसं पक्षमेव वा ॥ १७ ॥ पवित्रं स्नानकाले वा अवताार्य्य समर्चयेत् ॥ अनिवारितमन्नाद्यं दद्याद्भुङ्क्तेऽथ च स्वयम् ॥ १८ ॥ विसर्जनेऽह्नि सम्पूज्य पवित्राणि विसर्जयेत् ॥ सांवत्सरीमिमां पूजां सम्पाद्य विधिवन्मम ॥ १९ ॥ व्रज पवित्रकेदानीं विष्णुलोकं विसर्जितः ॥ मध्ये सोमेशयोः प्राच्यं विष्वक्सेनं हि तस्य च ॥ २० ॥ पवित्राणि समभ्यर्च्य ब्राह्मणाय समर्पयेत् ॥ यावन्तस्तन्तवस्तस्मिन्पवित्रे परिकल्पिताः ॥ २१ ॥ तावद्युगसहस्राणि विष्णुलोके महीयते ॥ कुलानां शतमुद्धृत्य दश पूर्व्वान्दशापरान् ॥ विष्णुलोके तु संस्थाप्य स्वयं मुक्तिमवाप्नुयात् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये विष्णुपवित्रारोपणविधिनिरूपणं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

अथ सर्वदेवपवित्रारोपणविधिः ॥ अग्निरुवाच ॥ सङ्क्षेपात्सर्वदेवानां पवित्रारोपणं शृणु ॥ पवित्रं पूर्वलक्ष्म स्यात्स्वरसानलगं त्वपि ॥ १ ॥ जगद्योने समागच्छ परिवारगणैः सह ॥ निमन्त्रयाम्यहं प्रातर्दद्यां तुभ्यं पवित्रकम् ॥ २ ॥ जगत्सृजे नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम् ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ ३ ॥ शिव देव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम् ॥ मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ॥ ४ ॥ इयं सांवत्सरी पूजा तवास्तु वेदवित्पते ॥ सांवत्सरीमिमां पूजां सम्पाद्य विधिवन्मम ॥ ५ ॥ व्रज पवित्रकेदानीं स्वर्गलोकं विसर्जितः ॥ सूर्य्य देव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम् ॥ ६ ॥ [पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ शिवदेव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम्] ॥ ७ ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ गणेश्वर नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम् ॥ ८ ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ शक्ति देवि नमस्तुभ्यं गृह्णीष्वेदं पवित्रकम् ॥ ९ ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ नारायणमयं सूत्रमनिरुद्धमयं वरम् ॥ १० ॥ धनधान्यायुरारोग्यप्रदं संप्रददामि ते ॥ कामदेवमयं सूत्रं सङ्कर्षणमयं वरम् ॥ ११ ॥ विद्यासन्ततिसौभाग्यप्रदं संप्रददामि ते ॥ वासुदेवमयं सूत्रं धर्म्मकामार्थमोक्षदम् ॥ १२ ॥ संसारसागरोत्तारकारणं प्रददामि ते ॥ विश्वरूपमयं सूत्रं सर्व्वदं पापनाशनम् ॥ १३ ॥ अतीतानागतकुलसमुद्धारं ददामि ते ॥ कनिष्ठादीनि चत्वारि ददिरे मनुभिः क्रमात ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये सर्वदेवपवित्रारोपणं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अथ देवालयनिर्म्माणफलम् ॥ अग्निरुवाच ॥ वासुदेवाद्यालयस्य कृतौ वक्ष्ये फलादिकम् ॥ चिकीर्षोर्देवधामादि सहस्रज्ञानिपापनुत् ॥ १ ॥ मनसा सद्मकर्तॄणां शतजन्माघनाशनम् ॥ येऽनुमोदन्ति कृष्णस्य क्रियमाणं नरा गृहम् ॥ २ ॥ तेऽपि पापैर्विनिर्मुक्ताः प्रयान्त्यच्युतलोककम् ॥ समतीतं भविष्यं च कुलानामयुतं नरः ॥ ३ ॥ विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥ वसन्ति पितरो हृष्टा विष्णुलोके ह्यलङ्कृताः ॥ ४ ॥ विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णस्य मन्दिरम् ॥ ब्रह्महत्यादिपापौघघातकं देवतालयम् ॥ ५ ॥ फलं यन्नाप्यते यज्ञैर्धामि कृत्वा तदाप्यते ॥ देवागारे कृते सर्वतीर्थस्नानफलं लभेत् ॥ ६ ॥ देवाद्यर्थे हतानां च रणे यत्तत्फलादिकम् ॥ शाठ्येन पांसुना वापि कृतं धाम च नाकदम् ॥ ७ ॥ एकायतनकृत्स्वर्गी त्र्यगारी ब्रह्मलोकभाक् ॥ पञ्चागारी शम्भुलोकमष्टागाराद्धरौ स्थितिः ॥ ८ ॥ षोडशालयकारी तु भुक्तिं मुक्तिमवाप्नुयात् ॥ कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ॥ ९ ॥ स्वर्गं च वैष्णवं लोकं मोक्षमाप्नोति च क्रमात् ॥ श्रेष्ठमायतनं विष्णोः कृत्वा यद्धनवाँल्लभेत् ॥ १० ॥ कनिष्ठेनैव तत्पुण्यं प्राप्नोत्यधनवान्नरः ॥ समुत्पाद्य धनं कृत्वा स्वल्पेनापि सुरालयम् ॥ ११ ॥ कारयित्वा हरेः पुण्यं प्राप्नोत्यभ्यधिकं वरम् ॥ लक्षेणाथ सहस्रेण शतस्यार्द्धेन वा हरेः ॥ १२ ॥ कारयन्भवनं याति यत्रास्ते गरुडध्वजः ॥ बाल्ये तु क्रीडमाणा ये पांसुभिर्भवनं हरेः ॥ १३ ॥ वासुदेवस्य कुर्व्वंति तेऽपि तल्लोकगामिनः ॥ तीर्थे चायतने पुण्ये सिद्धक्षेत्रे तथाश्रमे ॥ १४ ॥ कर्त्तुरायतनं विष्णोर्यथोक्तात्त्रिगुणं फलम् ॥ बन्धूकपुष्पविन्यासैः सुधापंकेन वैष्णवम् ॥ १५ ॥ ये विलिम्पन्ति भवनं ते यान्ति भगवत्पुरम् ॥ पतितं पतमानं तु तथार्द्धपतितं नरः ॥ १६ ॥ समुद्धृत्य हरेर्धाम प्राप्नोति द्विगुणं फलम् ॥ पतितस्य तु यः कर्त्ता पतितस्य च रक्षिता ॥ १७ ॥ विष्णोरायतनस्येह स नरो विष्णुरूपभाक् ॥ इष्टकानिचयास्तिष्ठेद्यावदायतनं हरेः ॥ १८ ॥ सकुलस्तस्य वै कर्त्ता त्रिष्णुलोके महीयते ॥ स एव पुण्यवान्पूज्य इह लोके परत्र च ॥ १९ ॥ कृष्णस्य वासुदेवस्य यः कारयति केतनम् ॥ जातः स एव सुकृती कुलं तेनैव पावितम् ॥ २० ॥ विष्णुरुद्रार्कदेव्यादेर्गृहकर्त्ता स कीर्तिभाक् ॥ किं तस्य वित्तनिचयैर्मूढस्य परिरक्षिणः ॥ २१ ॥ दुःखार्जितैर्यः कृष्णस्य न कारयति केतनम् ॥ नोपभोग्यं धनं यस्य पितृविप्र-

दिवौकसाम् ॥ २२ ॥ नोपभोगाय बन्धूनां व्यर्थस्तस्य धनागमः ॥ यथा ध्रुवो नृणां मृत्युर्वित्तनाशस्तथा ध्रुवः ॥ २३ ॥ मूढस्तत्राऽनुबध्नाति. जीवितेऽथ चले धने ॥ यदा वित्तं न दानाय नोपभोगाय देहिनाम् ॥ २४ ॥ नापि कीर्त्यै न धर्मार्थं तस्य स्वाम्येऽथ को गुणः ॥ तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषादथ ॥ २५ ॥ दद्यात्सम्यग्द्विजाग्र्येभ्यः कीर्त्तनानि च कारयेत् ॥ दानेभ्यश्चाधिकं यस्मात्कीर्त्तनेभ्यो वरं यतः ॥ २६ ॥ अतस्तत्कारयेद्धीमान्विष्ण्वादेर्मन्दिरादिकम् ॥ विनिवेश्य हरेर्धाम भक्तिमद्भिर्नरोत्तमैः ॥ २७ ॥ निवेशितं भवेत्कृत्स्नं त्रैलोक्यं सचराचरम् ॥ भूतं भव्यं भविष्यं च स्थूलं सूक्ष्मं तथेतरत् ॥ २८ ॥ आब्रह्मस्तंबपर्य्यन्तं सर्वं विष्णोः समुद्भवम् ॥ तस्य देवाधिदेवस्य सर्वगस्य महात्मनः ॥ २९ ॥ निवेश्य भवनं विष्णोर्न भूयो भुवि जायते ॥ यथा विष्णोर्धामकृतौ फलं तद्वद्दिवौकसाम् ॥ ३० ॥ शिवब्रह्मार्कविघ्नेशचण्डीलक्ष्म्यादिकात्मनाम् ॥ देवालयकृतेः पुण्यं प्रतिमाकरणेऽधिकम् ॥ ३१ ॥ प्रतिमास्थापने यागे फलस्यान्तो न विद्यते ॥ मृन्मयाद्दारुजे पुण्यं दारुजाद्दिष्टकोद्भवे ॥ ३२ ॥ इष्टकोत्थाच्छैलजे स्याद्धेमादेरधिकं फलम् ॥ सप्तजन्मकृतं पापं प्रारम्भादेव नश्यति ॥३३॥ देवालयस्य स्वर्गी स्यान्नरकं न स गच्छति ॥ कुलानां शतमुद्धृत्य विष्णोर्लोकं भयेन्नरः ॥३४॥ यमो यमभटानाह देवमन्दिरकारिणः ॥ यम उवाच ॥ प्रतिमापूजादिकृतो नानेया नरकं नराः ॥ ३५ ॥ देवालयांश्चकर्त्तार आनेयास्ते विशेषतः ॥ विचरध्वं यथान्याय्यं नियोगो मम पाल्यताम् ॥ ३६ ॥ नाज्ञाभंगं करिष्यन्ति भवतां जन्तवः क्वचित् ॥ केवलं ये जगत्तातमनन्तं समुपाश्रिताः ॥३७॥ भवद्भिः परिहर्त्तव्यास्तेषां नात्रास्ति संस्थितिः ॥ यत्र भागवता लोके तच्चित्तास्तत्परायणाः ॥ ३८ ॥ पूजयन्ति सदा विष्णुं ते वस्त्याज्याः सुदूरतः ॥ यस्तिष्ठन्प्रस्वपन्गच्छन्नात्तिष्ठन्स्खलिते स्थिते ॥ ३९ ॥ सङ्कीर्त्तयन्ति गोविन्दं ते वस्त्याज्याः सुदूरतः ॥ नित्यैर्नैमित्तिकैर्देवं ये यजन्ति जनार्दनम् ॥ ४० ॥ नावलोक्या भवद्भिस्ते तद्व्रता यांति सद्गतिम् ॥ ये पुष्पधूपवासोभिर्भूषणैश्चातिवल्लभैः ॥ ४१ ॥ अर्च्चयन्ति न ते ग्राह्या नराः कृष्णालयं गताः ॥ उपलेपनकर्त्तारः सम्मार्जनपराश्च ये ॥ ४२ ॥ कृष्णालये परित्याज्यास्तेषां पुत्रास्तथा कुलम् ॥ येन चायतनं विष्णोः कारितं तत्कुलोद्भवम् ॥ ४३ ॥ पुंसां शतं नावलोक्यं भव-

द्विर्दुष्टचेतसा ॥ यस्तु देवालयं विष्णोर्दारुशैलमयं तथा ॥ ४४ ॥ कारयेन्मृन्मयं वापि सर्वपापैः प्रमुच्यते ॥ अहन्यहनि यज्ञेन यजतो यन्महाफलम् ॥ ४५ ॥ प्राप्नोति तत्फलं विष्णोर्यः कारयति केतनम् ॥ कुलानां शतमागामि समतीतं तथा शतम् ॥४६॥ कारयन्भगवद्धाम नयत्यच्युतलोककम् ॥ सप्तलोकमयो विष्णुस्तस्य यः कुरुते गृहम् ॥ ४७ ॥ तारयत्यक्षयाँल्लोकानक्षयान्प्रतिपद्यते ॥ इष्टकाचयविन्यासो यावन्त्यब्दानि तिष्ठति ॥ ४८ ॥ तावद्वर्षसहस्राणि तत्कर्तुर्दीप्ति संस्थितिः ॥ प्रतिमाकृद्विष्णुलोकं स्थापको लीयते हरौ ॥ देवसद्मप्रतिकृतिप्रतिष्ठाकृत्तु गोचरे ॥ ४९ ॥ अग्निरुवाच ॥ यमोक्ता नानयंस्तेऽथ प्रतिष्ठादिकृतं हरेः ॥ हयशीर्षः प्रतिष्ठार्थं देवानां ब्रह्मणेऽब्रवीत् ॥ ५० ॥ इत्यादिमहापुराणे आग्नेये देवालयादिनिर्माणमाहात्म्यादिवर्णनं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ अथ भूपरिग्रहविधानम् ॥ हयग्रीव उवाच ॥ विष्ण्वादीनां प्रतिष्ठादि वक्ष्ये ब्रह्मञ्शृणुष्व मे ॥ प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया ॥ १ ॥ व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्यया ॥ हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम् ॥ २ ॥ वैभवं पौष्करं तन्त्रं प्रह्लादं गार्ग्यगालवम् ॥ नारदीयं च श्रीप्रश्नं शाण्डिल्यं चेश्वरं तथा ॥ ३ ॥ सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरम् ॥ स्वायम्भुवं कापिलं च तार्क्ष्यं नारायणीयकम् ॥ ४ ॥ आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम् ॥ बौधायनं तथाष्टांगं विश्वोक्तं तस्य सारतः ॥ ५ ॥ प्रतिष्ठां हि द्विजः कुर्य्यान्मध्यदेशादिसम्भवः ॥ न कच्छदेशसम्भूतः कावेरीकोङ्कणोद्भवः ॥ ६ ॥ कामरूपः कलिङ्गोत्थः काञ्चीकाश्मीरकोसलः ॥ आकाशवायुतेजोऽम्बुभूरेताः पञ्च रात्रयः ॥ ७ ॥ अचैतन्यास्तमोद्रिक्ताः पञ्चरात्रविवर्जिताः ॥ ब्रह्माहं विष्णुरमल इति विद्यात्स देशिकः ॥ ८ ॥ सर्वलक्षणहीनोऽपि स गुरुस्तन्त्रपारगः ॥ नगराभिमुखाः स्थाप्या देवा न च पराङ्मुखाः ॥ ९ ॥ कुरुक्षेत्रे गयादौ च नदीनां तु समीपतः ॥ ब्रह्मा मध्ये तु नगरे पूर्वे शक्रस्य शोभनम् ॥ १० ॥ अग्नावग्नेश्च मातॄणां भूतानां च यमस्य च ॥ दक्षिणे चण्डिकायाश्च पितृदैत्यादिकस्य च ॥ ११ ॥ नैर्ऋते मन्दिरं कुर्याद्वरुणादेश्च वारुणे ॥ वायोर्नागस्य वायव्ये सौम्ये यक्षगुहस्य च ॥ १२ ॥ चण्डीशस्य महेशस्य ऐशे विष्णोश्च सर्वशः ॥ पूर्वदेवकुलं पीठ्य प्रासादं स्वल्पकं त्वथ ॥ १३ ॥ समं वाप्यधिकं वापि न

कर्त्तव्यं विजानता ॥ उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रायसाम्मिताम् ॥ १४ ॥ प्रासादं कारयेदन्यं नोभयं पीडयेद्बुधः ॥
भूमौ तु शोधितायां तु कुर्याद्भूमिपरिग्रहम् ॥ १५ ॥ प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ॥ माषं हरिद्राचूर्णं तु सलाजं
दधिसक्तुभिः ॥ १६ ॥ अष्टाक्षरेण सक्तूंश्च पातयित्वाष्टदिक्षु च ॥ राक्षसाश्च पिशाचाश्च येऽस्मिंस्तिष्ठन्ति भूतले ॥ १७ ॥ सर्वे
ते व्यपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥ हलेन दारयित्वा गां गोभिश्चैवावदारयेत् ॥ १८ ॥ परमाण्वष्टकेनैव रथरेणुः प्रकी-
र्तितः ॥ रथरेण्वष्टकेनैव त्रसरेणुः प्रकीर्त्यते ॥ १९ ॥ तैरष्टभिस्तु बालाग्रं लिक्षा तैरष्टभिर्मता ॥ ताभिर्यूकाष्टाभिः ख्याता ताश्चाष्टौ
यवमध्यमः ॥ २० ॥ यवाष्टकैरङ्गुलं स्याच्चतुर्विंशाङ्गुलः करः ॥ चतुरङ्गुलसंयुक्तः स हस्तः पद्महस्तकः ॥ २१ ॥ इत्यादि-
महापुराणे आग्नेये विष्ण्वादिदेवताप्रतिष्ठार्थं भूपरिग्रहो नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ अथार्घ्यदानविधिशल्यकथने ॥
भगवानुवाच ॥ पूर्वमासीन्महद्भूतं सर्वभूतभयङ्करम् ॥ तदेवैर्निहितं भूमौ स वास्तुपुरुषः स्मृतः ॥ १ ॥ चतुष्पष्टिपदे क्षेत्रे ईशं
कोणार्द्धसंस्थितम् ॥ घृताक्षतैस्तपर्ययेत्तं पर्जन्यं पदगं ततः ॥ २ ॥ उत्पलाद्रिर्जयन्तं च द्विपदस्थं पताकया ॥ महेन्द्रं चैककोष्ठस्थं
सर्वरक्तैः पदे रविम् ॥ ३ ॥ वितानेनार्द्धपदगं सत्यं पादे भृशं घृतैः ॥ व्योम शाकुनमांसेन कोणार्द्धपदसंस्थितम् ॥ ४ ॥ सुचां
चार्द्धपदे वह्निं पूषणं लाजयेकतः ॥ स्वर्णेन वितथं द्विष्टं मंथनेन गृहाक्षतम् ॥ ५ ॥ मांसोदनेन धर्मेशमेकैकस्मिन् स्थितं द्वयम् ॥
गन्धर्वं द्विपदं गन्धैर्भृशं शाकुनजिह्वया ॥ ६ ॥ एकस्थमर्धसंस्थं च मृगनीलपटैस्तथा ॥ पितॄन्कृशरयार्द्धस्थं दन्तकाष्ठैः पदस्थि-
तम् ॥ ७ ॥ दौवारिकं द्विसंस्थं च सुग्रीवं यावकेन तु ॥ पुष्पदन्तं कुशस्तम्बैः पद्मैर्वरुणमेकतः ॥ ८ ॥ असुरं सुरया द्विष्टं पदे-
शाय घृतांभसा ॥ यवैः पापं पदार्द्धस्थं रोगमध्ये च मण्डकैः ॥ ९ ॥ नागपुष्पैः पदे नागं मुख्यं भक्ष्यैर्हि संस्थितम् ॥ मुद्गोदनेन
भल्लाटं पदे सोमं पदे तथा ॥ १० ॥ मधुना पायसेनाथ शालूकेन ऋषिं द्वये ॥ पदे दितिं लोपिकाभिरर्द्धे दितिमथापरम् ॥ ११ ॥
पूरिकाभिस्ततश्चापमीशाधः पयसा पदे ॥ ततोऽधश्चापवत्सन्तु दध्ना चैकपदे स्थितम् ॥ १२ ॥ लड्डुकैश्च मरीचिं तु पूर्वको-
ष्ठचतुष्टये ॥ सवित्रे रक्तपुष्पाणि ब्रह्माधःकोणकोष्ठके ॥ १३ ॥ तदधःकोष्ठके दद्यात्सवित्रे च कुशोदकम् ॥ विवस्वतेऽरुणं दद्या-

चन्दनं चतुरंघ्रिषु ॥ १४ ॥ रक्षोऽधःकोणकोष्ठे तु इन्द्रायार्घ्यं निशान्वितम् ॥ इन्द्रं जयंाय तस्याधो घृताक्तं कोणकोष्ठके ॥ १५ ॥ चतुष्पदे तु दातव्यमिन्द्राय गुडपायसम् ॥ वाय्वधःकोणदेशे तु रुद्राय पक्वमांसकम् ॥ १६ ॥ तदधः कोणकोष्ठे तु यक्षायार्द्रं फलं तथा ॥ महीधराय मांसान्नं मापं च चतुरंघ्रिषु ॥ १७ ॥ मध्ये चतुष्पदे स्थाप्या ब्रह्मणे तिलतण्डुलाः ॥ चरकिं मापसर्पिभ्यां स्कन्दं कृशरयासृजा ॥ १८ ॥ रक्तपत्रैर्विदारीं च कन्दर्पं च पलोदनैः ॥ पूतनां पलपित्ताभ्यां मांसासृग्भ्यां च जम्भकम् ॥ १९ ॥ पित्तासृगस्थिभिः पापं पिलिपिञ्जं स्रजासृजा ॥ ईशाद्यास्रक्तमांसेन अभावादक्षतैर्यजेत् ॥ २० ॥ रक्षोमातृगणेभ्यश्च पिशाचादिभ्यः एव च ॥ पितृभ्यः क्षेत्रपालेभ्यो बलीन्दद्यात्प्रकामतः ॥ २१ ॥ अहुत्वैतानसन्तर्प्य प्रासादादीन्न कारयेत् ॥ ब्रह्मस्थाने हरिं लक्ष्मीं गणं पश्चात्समर्चयेत् ॥ २२ ॥ महीश्वरं वास्तुमयं वर्द्धन्या सहितं घटम् ॥ ब्रह्माणं मध्यतः कुम्भे ब्रह्मादींश्च दिगीश्वरान् ॥ २३ ॥ दद्यात्पूर्णाहुतिं पश्चात्स्वस्ति वाच्य प्रणम्य च ॥ प्रगृह्य कर्करीं सम्यक्मङ्गलं तु प्रदक्षिणम् ॥ २४ ॥ मूत्रमार्गेण हे ब्रह्मंस्तोयधारां च भ्रामयेत् ॥ पूर्ववत्तेन मार्गेण सप्त बीजानि वापयेत् ॥ २५ ॥ प्रारम्भं तेन मार्गेण तस्य खातस्य कारयेत् ॥ ततो गर्त्तं खनेन्मध्ये हस्तमात्रप्रमाणतः ॥ २६ ॥ चतुरङ्गुलकं चाधश्चोपलिप्यार्चयेत्ततः ॥ ध्यात्वा चतुर्भुजं विष्णुमर्घ्यं दद्यात्तु कुम्भतः ॥ २७ ॥ कर्कर्यां पूरयेच्छुभ्रं शुक्लपुष्पाणि च न्यसेत् ॥ दक्षिणावर्त्तकं श्रेष्ठं बीजैर्मृद्भिश्च पूरयेत् ॥ २८ ॥ अर्घ्यदानं विनिष्पाद्य गोवस्त्रादीन्ददेद्गुरौ ॥ कालज्ञाय स्थपतये वैष्णवादिभ्य अर्चयेत् ॥ २९ ॥ ततस्तु खानयेद्यत्नाज्जलान्तं यावदेव तु ॥ पुरुषाधः स्थितं शल्यं न गृहे दोषदं भवेत् ॥ ३० ॥ अस्थिशल्ये भिद्यते वै भित्तिर्वै गृहिणोऽसुखम् ॥ यन्नामशब्दं शृणुयात्तत्र शल्यं तदुद्भवम् ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये अर्घ्यदानशल्ययोः कथनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥ अथ शिलाविन्यासविधिः ॥ भगवानुवाच ॥ पादप्रतिष्ठां वक्ष्यामि शिलाविन्यासलक्षणम् ॥ अग्रतो मण्डपः कार्यः कुण्डानां तु चतुष्टयम् ॥ १ ॥ कुम्भन्यासेष्टकान्यासौ द्वारस्तम्भोच्छ्रयं शुभम् ॥ पादोनं पूरयेत्खातं तत्र वास्तुं यजेत्समे ॥ २ ॥ इष्टकाश्च सुपक्वाः स्युर्द्वादशाङ्गुलसम्मिताः ॥ सुविस्तारत्रिभागेण वैपुल्येन समन्विताः ॥ ३ ॥ करप्रमाणा श्रेष्ठा स्याच्छिलाप्यथ शिला-

मये ॥ नव कुम्भांस्ताम्रमयान्स्थापयेदिष्टकावटान् ॥ ४ ॥ अद्भिः पञ्चकषायेण सर्वौषधिजलेन च ॥ गन्धतोयेन च तथा कुम्भै-
स्तोयसुपूरितैः ॥ ५ ॥ हिरण्यव्रीहिसंयुक्तैर्गन्धचन्दनचर्चितैः ॥ आपोहिष्ठेति तिसृभिः शन्नोदेवीति चाप्यथ ॥ ६ ॥ तरत्समन्दी-
रिति च पावमानीभिरेव च ॥ उदुत्तमं वरुणमिति कयानश्च तथैव च ॥ ७ ॥ वरुणस्येति मन्त्रेण हँसः शुचिषदित्यपि ॥ श्रीसू-
क्तेनापि च तथा शिलाः संस्थाप्य संयुताः ॥ ८ ॥ शय्यायां मण्डपे प्राच्यां मण्डले हरिमर्चयेत् ॥ जुहुयाज्जनयित्वाग्निं समिधो
द्वादशीस्ततः ॥ ९ ॥ आघारावाज्यभागौ तु प्रणवेनैव कारयेत् ॥ अष्टाहुतीस्तथाष्टान्तैराज्यं व्याहृतिभिः क्रमात् ॥ १० ॥
लोकेशानामग्नये वै सोमायावग्रहेषु च ॥ पुरुषोत्तमायेति च व्याहृतीर्जुहुयात्ततः ॥ ११ ॥ प्रायश्चित्तं ततः पूर्णां मूर्तिमांसघृतां-
स्तिलान् ॥ वेदाद्यैर्द्वादशान्तेन कुम्भेषु च पृथक्पृथक् ॥१२॥ प्राङ्मुखस्तु गुरुः कुर्यादष्ट दिक्षु विलिप्य च ॥ मध्ये चैकां शिलां
कुम्भान्न्यसेदेतान्सुरान्क्रमात् ॥ १३॥ पद्मं चैव महापद्मं मकरं कच्छपं तथा ॥ कुमुदं च तथा नन्दं पद्मशङ्खे च पद्मिनीम् ॥ १४ ॥
कुम्भान्न चालयेत्तेषु न्यसेदष्टेष्टकाः क्रमात् ॥ ईशानान्ताश्च पूर्वादाविष्टकाः प्रथमं न्यसेत् ॥ १५ ॥ शक्तयो विमलाद्यास्तु
इष्टकानान्तु देवताः ॥ न्यसनीया यथायोगं मध्ये न्यस्यात्त्वनुग्रहा ॥ १६ ॥ अव्यङ्गे चाक्षते पूर्णे मुनेरङ्गिरसः सुते ॥ इष्टके त्वं
प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् ॥ १७ ॥ मन्त्रेणानेन विन्यस्य इष्टका देशिकोत्तमः ॥ गर्भाधानं ततः कुर्य्यान्मध्यस्थाने समा-
हितः ॥ १८ ॥ कुम्भोपरिष्टाद्देवेशं पद्मिनीं न्यस्य देवताम् ॥ मृत्तिकाश्चैव पुष्पाणि धातवो रत्नमेव च ॥ १९ ॥ लोहानि दिक्-
पतेरस्त्रं यजेद्वै गर्भभाजने ॥ द्वादशांगुलविस्तारे चतुरङ्गुलकोच्छ्रये ॥ २० ॥ पद्माकारे ताम्रमये भाजने पृथिवीं यजेत् ॥ एकान्ते
सर्वभूतेशे पर्वतासनमण्डिते ॥ २१ ॥ समुद्रपरिवारे त्वं देवि गर्भं समाश्रय ॥ नन्दे नन्दय वासिष्ठे वसुभिः प्रजया सह ॥ २२ ॥
जये भार्गवदायादे प्रजानां विजयावहे ॥ पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् ॥ २३ ॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं
मम ॥ सर्वबीजसमायुक्ते सर्वरत्नौषधीवृते ॥ २४ ॥ जये सुरुचिरे नन्दे वासिष्ठे रम्यतामिह ॥ प्रजापतिसुते देवि चतुरस्रे मही-
यसि ॥ २५ ॥ सुभगे सुप्रभे भद्रे गृहे काश्यपि रम्यताम् ॥ पूजिते परमाश्चर्य्ये गन्धमाल्यैरलंकृते ॥ २६॥ भवभूतिकरी देवि गृहे

भार्गवि रम्यताम् ॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥२७॥ मनुष्यादिकतुष्ट्यर्थं पशुवृद्धिकरी भव ॥ एवमुक्त्वा ततः खातं
गोमूत्रेण तु सेचयेत् ॥ २८ ॥ कृत्वा निधापयेद्गर्भं गर्भाधानं भवेन्निशि ॥ गोवस्त्रादि प्रदद्याच्च गुरवेऽन्येषु भोजनम् ॥ २९ ॥
गर्भं न्यस्येष्टका न्यस्य ततो गर्भं प्रपूरयेत् ॥ पीठबन्धमतः कुर्य्यान्मितप्रासादमानतः ॥ ३० ॥ पीठोत्तमं चोच्छ्रयेण प्रासाद-
स्यार्द्धविस्तरात् ॥ पादहीनं मध्यमं स्यात्कनिष्ठं चोत्तमार्द्धतः ॥ ३१ ॥ पीठबन्धोपरिष्टात्तु वास्तुयागं पुनर्यजेत् ॥ पादप्रति-
ष्ठाकारी तु निष्पापो दिवि मोदते ॥ ३२ ॥ देवागारं करोमीति मनसा यस्तु चिन्तयेत् ॥ तस्य कायगतं पापं तदह्ना हि प्रण-
श्यति ॥ ३३ ॥ कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥ अष्टेष्टकासमायुक्तं यः कुर्य्यादेवतालयम् ॥ ३४ ॥ न तस्य फल-
सम्पत्तिर्वक्तुं शक्येत केनचित् ॥ अनेनैवानुमेयं हि फलं प्रासादविस्तरात् ॥ ३५ ॥ ग्राममध्ये च पूर्वे च प्रत्यग्द्वारं प्रकल्पयेत् ॥
विदिशासु च सर्वासु ग्रामे प्रत्यङ्मुखो भवेत् ॥ दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखो भवेत् ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये
शिलाविन्यासकथनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ अथ प्रासादलक्षणम् ॥ हयग्रीव उवाच ॥ प्रासादं संप्रवक्ष्यामि
सर्वसाधारणं शृणु ॥ चतुरस्रीकृतं क्षेत्रं भजेत्षोडशधा बुधः ॥१॥ मध्ये तस्य चतुर्भिस्तु कुर्यादायसमन्वितम् ॥ द्वादशैव तु भागांश्च
भित्त्यर्थं परिकल्पयेत् ॥ २ ॥ जंघोच्छ्रायस्तु कर्त्तव्यश्चतुर्भागेण चायतः ॥ जंघाया द्विगुणोच्छ्रायं मञ्जर्याः कल्पयेद्बुधः ॥ ३ ॥
तुर्यभागेण मञ्जर्याः कार्यः सम्यक्प्रदक्षिणः ॥ तन्माननिर्गमः कार्य उभयोः पार्श्वयोः समः ॥ ४ ॥ शिखरेण समं कार्यमग्रे जगति
विस्तरम् ॥ द्विगुणेनापि कर्त्तव्यं यथाशोभानुरूपतः ॥ ५ ॥ विस्तारान्मण्डपस्याग्रे गर्भसूत्रद्वयेन तु ॥ दैर्घ्यात्पादाधिकं कुर्यान्म-
ध्यस्तम्भैर्विभूषितम् ॥ ६ ॥ प्रासादगर्भमानं वा कुर्वीत मुखमण्डपम् ॥ एकाशीतिपदैर्वास्तुं पश्चान्मण्डपमारभेत् ॥ ७ ॥ शुका-
न्प्राग्द्वारविन्यासे पादान्तःस्थान्यजेत्सुरान् ॥ तथा प्राकारविन्यासे यजेद्वात्रिंशदन्तगान् ॥ ८ ॥ सर्वसाधारणं चैतत्प्रासादस्य च
लक्षणम् ॥ मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥ ९ ॥ प्रतिमायाः प्रमाणेन कर्त्तव्या पिण्डिका शुभा ॥ गर्भस्तु पिण्डिकार्द्धेन
गर्भमानास्तु भित्तयः॥१०॥भित्तेरायाममानेन उत्सेधं तु प्रकल्पयेत् ॥ भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद्बुधः ॥११॥ शिख-

रस्य तु तुर्येण भ्रमणं परिकल्पयेत् ॥ शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम् ॥१२॥ अष्टमांशेन गर्भस्य रथकानां तु निर्गमः ॥
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् ॥१३॥ तत्तृतीयेन वा कुर्याद्रथकानां तु निर्गमम् ॥ वामत्रयं स्थापनीयं रथकत्रितये सदा॥
॥ १४ ॥ शिखरार्थं हि सूत्राणि चत्वारि विनिपातयेत् ॥ शुकनासोर्ध्वतः सूत्रं तिर्यग्भूतं निपातयेत् ॥१५॥ शिखरस्यार्द्धभागस्थं
सिंहं तत्र तु कारयेत् ॥ शुकानासां स्थिरीकृत्य मध्यसन्धौ निधापयेत् ॥ १६ ॥ अपरे च तथा पार्श्वे तद्वत्सूत्रं निधापयेत् ॥
तदूर्ध्वं तु भवेद्वेदी सकण्ठासनसारकम् ॥ १७ ॥ स्कन्धभग्नं न कर्त्तव्यं विकरालं तथैव च ॥ ऊर्ध्वं च वेदिकामानात्कलशं परि-
कल्पयेत् ॥ १८ ॥ विस्तारादद्विगुणं द्वारं कर्त्तव्यं तु सुशोभनम् ॥ उदुम्बरौ तदूर्ध्वं च न्यसेच्छाखां सुमङ्गलैः ॥ १९ ॥ द्वारस्य तु
चतुर्थांशे कार्यौ चण्डप्रचण्डकौ ॥ विष्वक्सेनो वत्सदण्डो शाखार्धोदुम्बरे श्रियम् ॥२०॥ दिग्गजैः स्नाप्यमानां तां घटैः साब्जां
सुरूपिकाम् ॥ प्रासादस्य चतुर्थांशे प्राकारस्योच्छ्रयो भवेत् ॥२१ ॥ प्रासादात्पादहीनस्तु गोपुरस्योच्छ्रयो भवेत् ॥ पञ्चहस्तस्य
देवस्य एकहस्ता तु पीठिका ॥२२॥ गारुडं मंडपं चाग्रे एकं भौमादिधाम च॥कुर्याद्धि प्रतिमायां तु दिक्षु चाष्टासु चोपरि ॥२३॥
पूर्वे वराहं दक्षे च नृसिंहं श्रीधरं जले ॥ उत्तरे तु हयग्रीवमाग्नेय्यां जामदग्न्यकम् ॥ २४ ॥ नैर्ऋत्यां रामकं वायौ वामनं वासुदेव-
कम् ॥ ईशे प्रासादरचना देया वस्वर्ककादिभिः ॥ द्वारस्य चाष्टमाद्यंशं त्यक्त्वा वेधो न दोषभाक् ॥२५॥ इत्यादिमहापुराणे आग्नेये
प्रासादलक्षणं नाम द्विचत्वारिंशोऽध्यायः॥ ४२॥अथ प्रासाददेवतास्थापनभूतशान्त्यादिकथनम् ॥ भगवानुवाच ॥ प्रासादे देवताः
स्थाप्या वक्ष्ये ब्रह्मञ्शृणुष्व मे ॥ पञ्चायतनमध्ये तु वासुदेवं निवेशयेत् ॥ १ ॥ वामनं नृहरिं चाश्वशीर्षं तद्वच्च सूकरम् ॥ आग्नेये
नैर्ऋते चैव वायव्ये चेशगोचरे॥२॥अथ नारायणं मध्ये ह्याग्नेय्यामम्बिकां न्यसेत् ॥ नैर्ऋत्यां भास्करं वायौ ब्रह्माणं लिङ्गमीशके
॥ ३ ॥ अथवा रुद्ररूपं तु अथवा नवधामसु ॥ वासुदेवं न्यसेन्मध्ये पूर्वादौ रामरामकान् ॥ ४ ॥ इन्द्रादींल्लोकपालांश्च अथवा नव
धामसु ॥ पञ्चायतनकं कुर्यान्मध्ये तु पुरुषोत्तमम् ॥ ५ ॥ लक्ष्मीवैश्रवणौ पूर्वे दक्षे मातृगणं न्यसेत् ॥ स्कंदं गणेशमीशानं सूर्यो-
दीन्पश्चिमे महान् ॥ ६ ॥ उत्तरे दश मत्स्यादीनाग्नेय्यां चण्डिकां तथा ॥ नैर्ऋत्यामम्बिकां स्थाप्य वायव्ये तु सरस्वतीम् ॥ ७ ॥

पद्मामैशे वासुदेवं मध्ये नारायणं च वा ॥ त्रयोदशालये मध्ये विश्वरूपं न्यसेद्धरिम् ॥ ८ ॥ पूर्वादौ केशवादींश्च अन्यधाम स्वयं हरिः ॥ मृन्मयी दारुघटिता लोहजा रत्नजा तथा ॥ ९ ॥ शैलजा गन्धजा चैव कौसुमी सप्तधा स्मृता ॥ कौसुमी गन्धजा चैव मृन्मयी प्रतिमा तथा ॥ १० ॥ तत्कालपूजिताश्चैताः सर्वकामफलप्रदाः ॥ अथ शैलमयीं वक्ष्ये शिला यत्र च गृह्यते ॥ ११ ॥ पर्वतेनामभावे च गृह्णीयाद्भूगतां शिलाम् ॥ पांडुरा ह्यरुणा पीता कृष्णा शस्ता तु वर्णिनाम् ॥ १२ ॥ न यदा लभ्यते सम्यग्वर्णिनां वर्णतः शिला ॥ वर्णाद्यापादनं तत्र जुहुयात्सिंहविद्यया ॥ १३ ॥ शिलायां शुक्लरेखाढ्या कृष्णाढ्या सिंहहोमतः ॥ कांस्यघंटानिनादां स्यात्पुंलिङ्गा विस्फुलिङ्गिका ॥ १४ ॥ तन्मन्दलक्षणा स्त्री स्याद्रूपाभावान्नपुंसका ॥ दृश्यते मंडलं यस्यां सगर्भां तां विवर्जयेत् ॥ १५ ॥ प्रतिमार्थं धनं दत्त्वा वनयागं समाचरेत् ॥ तत्र खात्वोपलिप्याथ मंडपे तु हरिं यजेत् ॥ १६ ॥ बलिं दत्त्वा कर्मशस्त्रं टङ्कादिकमथार्चयेत् ॥ हुत्वाथ शालितोयेन अस्त्रेण प्रोक्षयेच्छिलाम् ॥ १७ ॥ रक्षां कृत्वा नृसिंहेन मूलमन्त्रेण पूजयेत् ॥ हुत्वा पूर्णाहुतिं दद्यात्ततो भूतबलिं गुरुः ॥ १८ ॥ अत्र ये संस्थिताः सत्त्वा यातुधानाश्च गुह्यकाः ॥ सिद्धादयो वा ये चान्ये तान्सम्पूज्य क्षमापयेत् ॥ १९ ॥ विष्णुबिम्बार्थमस्माकं यात्रैषा केशवाज्ञया ॥ विष्ण्वर्थं यद्भवेत्कार्यं युष्माकमपि तद्भवेत् ॥ २० ॥ अनेन बलिदानेन प्रीता भवत सर्वथा ॥ क्षेमेण गच्छताऽन्यत्र मुक्त्वा स्थानमिदं त्वरात् ॥ २१ ॥ एवं प्रबोधिता मुक्त्वा यान्ति तृप्ता यथासुखम् ॥ शिल्पिभिश्च चरुं प्राश्य स्वप्नमन्त्रं जपेन्निशि ॥ २२ ॥ ॐ नमः सकललोकाय विष्णवे प्रभविष्णवे ॥ विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २३ ॥ आचक्ष्व देवदेवेश प्रसुप्तोऽस्मि तवान्तिकम् ॥ स्वप्ने सर्वाणि कार्याणि हृदिस्थानि तु यानि मे ॥ २४ ॥ ॐ ॐ ह्रूं फट् विष्णवे स्वाहा ॥ शुभे स्वप्ने शुभं सर्वं ह्यशुभे सिंहहोमतः ॥ प्रातरर्घ्यं शिलायां तु दत्त्वास्त्रेणास्त्रकं यजेत् ॥ २५ ॥ कुदालटङ्कशस्त्राद्यं मध्वाज्याक्तमुखं चरेत् ॥ आत्मानं चिन्तयेद्विष्णुं शिल्पिनं विश्वकर्मकम् ॥ २६ ॥ शस्त्रं विष्ण्वात्मकं दद्यान्मुखपृष्ठादि दर्शयेत् ॥ जितेन्द्रियषडङ्गस्तः शिल्पी तु चतुरस्रकाम् ॥ २७ ॥ शिलां कृत्वा पिण्डिकार्थं किञ्चिन्न्यूनां तु कल्पयेत् ॥ रथे स्थाप्य समानीय सवस्त्रां कारुवेश्मनि ॥ पूजयित्वाथ घटयेत्प्रतिमां

स तु कर्मकृत् ॥ २८ ॥ इत्यादिमहापुराणे आग्नेये प्रासाददेवतास्थापनशान्त्यादिवर्णनं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
अथ वासुदेवादिप्रतिमालक्षणानि ॥ भगवानुवाच ॥ वासुदेवादिप्रतिमालक्षणं प्रवदामि ते ॥ प्रासादस्योत्तरे पूर्वमुखीं वा
चोत्तराननाम् ॥ १ ॥ संस्थाप्य पूज्य च बलिं दत्त्वाथो मध्यसूत्रकम् ॥ शिलां शिल्पी तु नवधा विभज्य नवमें-
शके ॥ २ ॥ सूर्यै भक्ते शिलायां तु भागं स्याङ्गुलमुच्यते ॥ ब्यंगुलं गोलकं नाम्ना कलानेत्रं तदुच्यते ॥ ३ ॥
भागमेकं त्रिधा भक्त्वा पार्ष्णिभागं प्रकल्पयेत् ॥ भागमेकं तथा जानौ ग्रीवायां भागमेव च ॥ ४ ॥ मुकुटं तालमात्रं
स्यात्तालमात्रं तथा मुखम् ॥ तालेनैकेन कण्ठं तु तालेन हृदयं तथा ॥ ५ ॥ नाभिमेढ्रान्तरं तालं द्वितालावूरुकौ तथा ॥ तालद्वयेन
जंघा स्यात्सूत्राणि शृणु साम्प्रतम् ॥ ६ ॥ कार्य्यं सूत्रद्वयं पादे जंघामध्ये तथापरम् ॥ जानौ सूत्रद्वयं कार्य्यमूरुमध्ये तथा परम्
॥ ७ ॥ मेढ्रे तथापरं कार्य्यं कट्यां सूत्रं तथापरम् ॥ मेखलाबन्धसिद्ध्यर्थं नाभ्यां चैवापरं तथा ॥ ८ ॥ हृदये च तथा कार्य्यं कण्ठे
सूत्रद्वयं तथा ॥ ललाटे चापरं कार्यं मस्तके च तथापरम् ॥ ९ ॥ मुकुटोपरि कर्तव्यं सूत्रमेकं विचक्षणैः ॥ सूत्राण्यूर्द्धं प्रदेयानि
सप्तैव कमलोद्भव ॥ १० ॥ कक्षात्रिकान्तरेणैव षट् सूत्राणि प्रदापयेत् ॥ मध्यसूत्रं तु सन्त्यज्य सूत्राण्येव निवेदयेत् ॥ ११ ॥
ललाटं नासिकावक्त्रं कर्तव्यं चतुरङ्गुलम् ॥ ग्रीवा कर्णौ तु कर्तव्यावायामाच्चतुरङ्गुलौ ॥ १२ ॥ द्व्यङ्गुले हनुके कार्य्ये विस्ताराच्चिबुकं
तथा ॥ अष्टाङ्गुलं ललाटं तु विस्तारेण प्रकीर्तितम् ॥ १३ ॥ परेण द्व्यङ्गुलौ शङ्खौ कर्तव्यावलकान्वितौ ॥ चतुरङ्गुलमाख्यातम-
न्तरं कर्णनेत्रयोः ॥ १४ ॥ द्व्यङ्गुलौ पृथुकौ कर्णौ कर्णापाङ्गार्द्धपञ्चमे ॥ भ्रूसमेन तु सूत्रेण कर्णस्रोतः प्रकीर्तितम् ॥ १५ ॥ विद्धं
षडङ्गुलं कर्णमविद्धं चतुरङ्गुलम् ॥ चिबुकेन समं विद्धमविद्धं वा षडंगुलम् ॥ १६ ॥ गन्धपात्रं तथावर्त्तं शष्कुलीं कल्पयेत्तथा ॥
अंगुलेनाधरः कार्यस्तस्यार्द्धेनोत्तराधरः ॥ १७ ॥ अर्द्धांगुलं तथा नेत्रं वक्त्रं तु चतुरंगुलम् ॥ आयामेन तु वैपुल्यात्सार्द्धमंगुलमुच्यते
॥ १८ ॥ अव्यात्तमेवं स्याद्वक्त्रं व्यात्तं त्र्यंगुलमिष्यते ॥ नासावंशसमुच्छ्रायं मूले त्वेकांगुलं मतम् ॥ १९ ॥ उच्छ्रायाद्व्यंगुलं चाग्रे
करवीरोपमा स्मृता ॥ अंतरं चक्षुषोः कार्य्यं चतुरंगुलमानतः ॥ २० ॥ ब्यंगुलं चाक्षिकोणं च ब्यंगुलं चांतरं तयोः ॥ तारा नेत्रत्रिभागेण

दक्तारा पञ्चमांशिका ॥ २१ ॥ त्र्यंगुलं नेत्रविस्तारं द्रोणी चार्द्धांगुला मता ॥ तत्प्रमाणा भ्रुवोर्लेखा भ्रुवौ चैव समे मते ॥ २२ ॥ भ्रूमध्यं द्व्यंगुलं कार्य्यं भ्रूदैर्घ्यं चतुरंगुलम् ॥ षट्त्रिंशदंगुलायामं मस्तकस्य तु वेष्टनम् ॥ २३ ॥ मूर्तीनां केशवादीनां द्वात्रिंशद्वेष्टनं भवेत् ॥ पञ्चनेत्रा त्वयो ग्रीवा विस्ताराद्वेष्टनं पुनः ॥ २४ ॥ त्रिगुणं तु भवेदूर्द्धं विस्तृताष्टांगुलं पुनः ॥ ग्रीवात्रिगुणमायामं ग्रीवावक्षोऽन्तरं भवेत् ॥ २५ ॥ स्कन्धावष्टांगुलौ कार्यौ त्रिकलावंशकौ शुभौ ॥ सप्तनेत्रौ स्मृतौ बाहू प्रबाहू षोडशांगुलौ ॥ २६ ॥ त्रिकलौ विस्तृतौ बाहू प्रबाहू चापि तत्समौ ॥ बाहुदंडोर्ध्वतो ज्ञेयः परीणाहः कला नव ॥ २७ ॥ सप्तदशांगुलो मध्ये कूर्परोऽर्द्धे च षोडश ॥ कूर्परस्य भवेन्नाहस्त्रिगुणः कमलोद्भव ॥ २८ ॥ नाहः प्रबाहुमध्ये तु षोडशांगुल उच्यते ॥ अग्रहस्ते परीणाहो द्वादशांगुल उच्यते ॥ २९ ॥ विस्तारेण करतलं कीर्तितं तु षडंगुलम् ॥ दैर्घ्यं सप्तांगुलं कार्यं मध्या पञ्चांगुला मता ॥ ३० ॥ तर्जन्यनामिका चैव तस्मादर्द्धांगुलं विना ॥ कनिष्ठांगुष्ठकौ कार्यौ चतुरंगुलसम्मितौ ॥ ३१ ॥ द्विपर्वोऽङ्गुष्ठकः कार्यः शेषांगुल्यस्त्रिपर्विकाः ॥ सर्वासां पर्वणोऽर्द्धेन नखमानं विधीयते ॥ ३२ ॥ वक्षसो यत्प्रमाणं तु जठरं तत्प्रमाणतः ॥ अंगुलैका भवेन्नाभी वेधेन च प्रमाणतः ॥ ३३ ॥ ततो मेढ्रान्तरं कार्यं तालमात्रं प्रमाणतः ॥ नाभिमध्ये परीणाहो द्विचत्वारिंशदंगुलः ॥ ३४ ॥ अन्तरं स्तनयोः कार्यं तालमात्रं प्रमाणतः ॥ चूचुकौ यवमानौ तु मण्डलं द्विपदं भवेत् ॥ ३५ ॥ चतुःषष्ट्यंगुलं कार्यं वेष्टनं वक्षसः स्फुटम् ॥ चतुर्मुखं च तदधो वेष्टनं परिकीर्तितम् ॥ ३६ ॥ पारीणाहस्तथा कट्याश्चतुःपञ्चदशांगुलैः ॥ विस्तारश्चोरुमूले तु प्रोच्यते द्वादशांगुलः ॥ ३७ ॥ तस्मादभ्यधिकं मध्ये ततो निम्नतरं क्रमात् ॥ विस्तृताष्टांगुलं जानुस्त्रिगुणा परिणाहतः ॥ ३८ ॥ जङ्घामध्ये तु विस्तारः सप्तांगुल उदाहृतः ॥ त्रिगुणः परिधिश्चास्य जङ्घाग्रे पञ्च विस्तरात ॥ ३९ ॥ त्रिगुणः परिधिश्चास्य पादौ तालप्रमाणकौ ॥ आयामादुत्थितौ पादौ चतुरंगुलमेव च ॥ ४० ॥ गुल्फात्पूर्वं तु कर्तव्यं प्रमाणाच्चतुरंगुलम् ॥ त्रिकलं विस्तृतौ पादौ त्र्यंगुलो गुह्यकः स्मृतः ॥ ४१ ॥ पञ्चांगुलस्तु नाहोऽस्य दीर्घा तद्वत्प्रदेशिनी ॥ अष्टमाष्टांशितो न्यूनाः शेषांगुल्यः क्रमेण तु ॥ ४२ ॥ सपादांगुलमुत्सेधमंगुष्ठस्य प्रकीर्तितम् ॥ तदेव द्विगुणं कार्यमंगुष्ठस्य नखं

तथा॥४३॥ अर्द्धांगुलं तथा न्यासं क्रमान्न्यूनं तु कारयेत् ॥ द्व्यंगुलौ वृषणौ कार्यौ मेढ्रं तु चतुरंगुलम् ॥४४॥ परिणाहोऽत्र कोषाग्रं
कर्तव्यं चतुरंगुलम् ॥ षडंगुलपरीणाहौ वृषणौ परिकीर्तितौ ॥ ४५ ॥ प्रतिमा भूषणाढ्या स्यादेतदुद्देशलक्षणम् ॥ अनयैव दिशा
कार्यं लोके दृष्ट्वा तु लक्षणम् ॥ ४६ ॥ दक्षिणे तु करे चक्रमधस्तात्पद्ममेव च॥ वामे शंखं गदाधस्ताद्वासुदेवस्य लक्षणात् ॥ ४७॥
श्रीपुष्टी चापि कर्तव्ये पद्मवीणाकरान्विते ॥ ऊरुमात्रोच्छ्रितायामे मालाविद्याधरौ तथा ॥ ४८ ॥ प्रभामण्डलसंस्थौ तौ: प्रभा
हस्त्यादिभूषणा ॥ पद्माभं पादपीठं तु प्रतिमास्वेवमाचरेत् ॥ ४९ ॥ इत्यादिमहापुराणे आग्नेये वासुदेवादिप्रतिमालक्षणं नाम
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ अथ पिण्डिकादिलक्षणम् ॥ भगवानुवाच ॥ पिंडिकालक्षणं वक्ष्ये दैर्घ्येण प्रतिमासमा ॥
उच्छ्राये प्रतिमार्द्धं तु चतुःषष्टिपुटां च ताम् ॥ १ ॥ त्यक्त्वा पङ्क्तिद्वयं चाधस्तदूर्ध्वं यत्तु कोष्ठकम् ॥ समन्तादुभयोः पार्श्वे
अन्तःस्थं परिमार्जयेत् ॥२॥ ऊर्ध्वं पङ्क्तिद्वयं त्यक्त्वा अधस्ताद्यत्तु कोष्ठकम् ॥ अन्तःसन्मार्जयेद्यत्नात्पार्श्वयोरुभयोः समम् ॥ ३ ॥
तयोर्मध्यगतौ तत्र चतुष्कौ मार्जयेत्ततः ॥ चतुर्द्धा भाजयित्वा तु ऊर्ध्वपंक्तिद्वयं बुधः ॥ ४ ॥ मेखला भागमात्रा स्यात्खातं तस्यार्द्ध-
मानतः ॥ भागं भागं परित्यज्य पार्श्वयोरुभयोः समम् ॥ ५ ॥ दत्त्वा चैकं पदं बाह्ये प्रमाणं कारयेद्बुधः ॥ त्रिभागेन च भागस्याग्रे
स्यात्तोयविनिर्गमः ॥ ६ ॥ नानाप्रकारभेदेन भद्रेयं पिण्डिका शुभा ॥ अष्टताला तु कर्त्तव्या देवी लक्ष्मीस्तथा स्त्रियः ॥ ७ ॥
भ्रुवौ यवाधिके कार्ये यवहीना तु नासिका ॥ गोलकेनाधिकं वक्त्रमूर्ध्वं तिर्य्यग्विवर्जितम् ॥ ८ ॥ आयते नयने कार्य्ये
त्रिभागोनैर्यवैस्त्रिभिः ॥ तदर्द्धेन तु वैपुल्यं नेत्रयोः परिकल्पयेत् ॥ ९ ॥ कर्णपाशोऽधिकः कार्य्यः सूक्किणी समसूत्रतः ॥ नम्र
कलाविहीनं तु कुर्य्यादंशद्वयं तथा ॥ १० ॥ ग्रीवा सार्द्धकला कार्य्या तद्विस्तारोपशोभिता ॥ नेत्र त्रिना तु विस्तारौ ऊरू
जानु च पिण्डिका ॥ ११ ॥ अंघ्रिपृष्ठौ स्फिचौ कट्यां यथायोगं प्रकल्पयेत् ॥ सप्तांशोनास्तथाङ्गुल्यो दीर्घविष्कम्भना-
हतम् ॥ १२ ॥ नेत्रैकवर्जितायामा जङ्घोरुश्च तथा कटिः ॥ मध्यपार्श्वं तु यद्वृत्तं घनं पीनं कुचद्वयम् ॥ १३ ॥ तालमात्रौ स्तनौ
कार्य्यौ कटिः सार्द्धकलाधिका ॥ लक्ष्म शेषं पुरावत्स्याद्दक्षिणे चाम्बुजं करे ॥ १४ ॥ वामे बिल्वं स्त्रियौ पार्श्वे शुभे

चामरहस्तके ॥ दीर्घघोणस्तु गरुडश्चक्राङ्गाद्यानथो वदे ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये पिण्डिकादिलक्षणं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ अथ शालग्रामादिमूर्तिलक्षणम् ॥ श्रीभगवानुवाच ॥ शालग्रामादिमूर्त्तींश्च वक्ष्येऽहं भुक्तिमुक्तिदाः ॥ वासुदेवोऽसितो द्वारे शिलालग्रद्विचक्रकः ॥ १ ॥ ज्ञेयः सङ्कर्षणो लग्रद्विचक्रो रक्त उत्तमः ॥ सूक्ष्मचक्रो बहुच्छिद्रः प्रद्युम्नो नीलदीर्घकः ॥ २ ॥ पीतोऽनिरुद्धः पद्माङ्को वर्त्तुलो द्वित्रिरेखकः ॥ कृष्णो नारायणो नाभ्युन्नतः सुषिरदीर्घवान् ॥ ३ ॥ परमेष्ठी साब्जचक्रः पृष्ठच्छिद्रश्च बिन्दुमान् ॥ स्थूलचक्रोऽसितो विष्णुर्मध्ये रेखा गदाकृतेः ॥ ४ ॥ नृसिंहः कपिलः स्थूलचक्रः स्यात्पञ्चबिन्दुकः ॥ वराहः शक्तिलिङ्गः स्यात्तच्चक्रो विषमो स्मृतौ ॥ ५ ॥ इन्द्रनीलनिभः स्थूलस्त्रिरेखालाञ्छितः शुभः ॥ कूर्मस्तथोन्नतः पृष्ठे वर्त्तुलावर्त्तकोऽसितः ॥ ६ ॥ हयग्रीवोऽङ्कुशाकाररेखो नीलःसबिन्दुकः ॥ वैकुण्ठएकचक्रोऽब्जो मणिभःपुच्छरेखकः ॥ ७ ॥ मत्स्यो दीर्घस्त्रिबिन्दुः स्यात्काचवर्णस्तु पूरितः ॥ श्रीधरो वनमालाङ्कः पञ्चरेखस्तु वर्त्तुलः ॥ ८ ॥ वामनो वर्त्तुलश्चातिह्रस्वो नीलः सबिन्दुकः ॥ श्यामस्त्रिविक्रमो दक्षरेखो वामेन रिक्तकः ॥ ९ ॥ अनन्तो नागभोगाङ्को नैकाभो नैकमूर्तिमान् ॥ स्थूलो दामोदरो मध्यचक्रः स्यात्सूक्ष्मबिन्दुकः ॥ १० ॥ सुदर्शनस्त्वेकचक्रो लक्ष्मीनारायणो द्वयात् ॥ त्रिचक्रश्चाच्युतो देवस्त्रिचक्रो वा त्रिविक्रमः ॥ ११ ॥ जनार्दनश्चतुश्चक्रो वासुदेवश्च पञ्चभिः ॥ षट् चक्रश्चैव प्रद्युम्नः सङ्कर्षणश्च सप्तभिः ॥ १२ ॥ पुरुषोत्तमोऽष्टचक्रो नवव्यूहो नवाङ्कितः ॥ दशावतारो दशभिर्दशैकेनानिरुद्धकः ॥ द्वादशात्मा द्वादशभिरत ऊर्ध्वमनन्तकः ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये शालग्रामादिमूर्तिलक्षणं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ अथ शालग्रामादिपूजाकथनम् ॥ श्रीभगवानुवाच ॥ शालग्रामादिचक्राङ्कपूजाः सिद्ध्यै वदामि ते ॥ त्रिविधा स्याद्धरेः पूजा काम्याकाम्योभयात्मिका ॥ १ ॥ मीनादीनां तु पञ्चानां काम्यार्था वोभयात्मिका ॥ वराहस्य नृसिंहस्य वामनस्य च मुक्तये ॥ २ ॥ चक्रादीनां त्रयाणां तु शालग्रामार्चनं शृणु ॥ उत्तमा निष्फला पूजा कनिष्ठा सफलार्चना ॥ ३ ॥ मध्यमा मूर्तिपूजा स्याच्चक्राब्जे चतुरस्रके ॥ प्रणवं हृदि विन्यस्य षडङ्गं करदेहयोः ॥ ४ ॥ कृतमुद्रात्रयश्चक्राद्बहिः पूर्वे गुरुं यजेत् ॥ आप्ये गणं वायवे च धातारं नैर्ऋते यजेत् ॥ ५ ॥ विधातारं च कर्त्तारं

र्त्तारं दक्षसौम्ययोः ॥ विष्वक्सेनं यजेदीश आग्नेये क्षेत्रपालकम् ॥ ६ ॥ ऋगादिवेदान्प्रागादावाधारानन्तकं भुवम् ॥ पीठं पद्मं चार्कचन्द्रवह्नचाख्यं मण्डलत्रयम् ॥ ७॥ आसनं द्वादशार्णेन तत्र स्थाप्य शिलां यजेत् ॥ व्यस्तेन च समस्तेन स्वबीजेन यजेत्क्रमात् ॥ ८ ॥ पूर्वादावथ वेदाद्यैर्गायत्र्याद्यैर्जितादिना ॥ प्रणवेनार्चयेत्पश्चान्मुद्रास्तिस्रः प्रदर्शयेत् ॥ ९ ॥ विष्वक्सेनस्य चक्रस्य क्षेत्रपालस्य दर्शयेत् ॥ शालग्रामस्य प्रथमा पूजाथो निष्फलोच्यते ॥ १० ॥ पूर्ववत्षोडशारं च सपद्मं मण्डलं लिखेत् ॥ शङ्खचक्रगदाखड्गैर्गुर्वाद्यं पूर्ववद्यजेत् ॥ ११ ॥ पूर्वे सौम्ये धनुर्बाणान्वेदाद्यैरासनं ददेत् ॥ शिलां न्यसेद्वादशार्णैस्तृतीयं पूजनं शृणु ॥ १२ ॥ अष्टारमब्जं विलिखेद्गुर्वाद्यं पूर्ववद्यजेत् ॥ अष्टार्णेनासनं दत्त्वा तेनैव च शिलां न्यसेत् ॥ पूजयेद्दशधा तेन गायत्रीभ्यां जितं तथा ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये शालग्रामादिपूजाकथनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ अथ चतुर्विंशतिमूर्त्तिस्त्रोतम् ॥ श्रीभगवानुवाच ॥ ओंरूपः केशवः पद्मशंखचक्रगदाधरः ॥ नारायणः शंखपद्मगदाचक्री प्रदक्षिणम् ॥ १ ॥ ततो गदी माधवोऽरिशंखपद्मी नामामि तम् ॥ चक्रकौमोदकीपद्मशंखी गोविन्द ऊर्जितः ॥ २ ॥ मोक्षदः श्रीगदी पद्मी शंखो विष्णुश्च चक्रधृक् ॥ शंखचक्राब्जगादिनं मधुसूदनमानमे ॥ ३ ॥ भक्त्या त्रिविक्रमः पद्मगदी चक्री च शंखचापि ॥ शंखचक्रगदीपद्मी वामनः पातु मां सदा ॥ ४ ॥ गतिदः श्रीधरः पद्मी चक्रशार्ङ्गी च शंखचापि ॥ हृषीकेशौ गदी चक्री पद्मी शार्ङ्गी च पातु नः ॥५॥ वरदः पद्मनाभस्तु शंखाब्जारिगदाधरः ॥ दामोदरः पद्मशंखगदाचक्री नमामि तम् ॥६॥ तेने गदी शंखचक्री वासुदेवोऽब्जभृज्जगत् ॥ सङ्कर्षणो गदी शंखी पद्मी चक्री च पातु वः ॥७॥ गदी चक्री शंखगदी प्रद्युम्नः पद्मभृत्प्रभुः ॥ अनिरुद्धश्चक्रगदी शंखी पद्मी च पातु नः ॥८॥ सुरेशोऽर्यब्जशंखाढ्यः श्रीगदी पुरुषोत्तमः ॥ अधोक्षजः पद्मगदी शंखी चक्री च पातु वः ॥९॥ देवो नृसिंहश्चाब्जगदी शंखी नमामि तम् ॥ अच्युतः श्रीगदी पद्मी चक्री शंखी च पातु वः ॥ १० ॥ बालरूपी शंखगदी उपेन्द्रश्चक्रपद्मयपि ॥ जनार्दनः पद्मचक्री शंखधारी गदाधरः ॥११॥ शंखी पद्मी च चक्री च हरिः कौमोदकीधरः ॥ कृष्णः शंखी गदी पद्मी चक्री मे भुक्तिमुक्तिदः ॥१२॥ आदिमूर्तिर्वासुदेवस्ततस्मात्सङ्कर्षणोऽभवत् ॥ सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नादनिरुद्धकः ॥१३॥ केशवा-

दिप्रभेदेन एकैकः स्यात्त्रिधा क्रमात् ॥ द्वादशाक्षरकं स्तोत्रं चतुर्विंशतिमूर्तिमत् ॥ यः पठेच्छृणुयाद्वापि निर्मलः सर्वमाप्नुयात् ॥ १४॥ इत्यादिमहापुराणे आग्नेये चतुर्विंशतिमूर्तिस्तोत्रं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ अथ मत्स्यादिलक्षणवर्णनम् ॥ श्रीभगवानुवाच ॥ दशावतारं मत्स्यादिलक्षणं प्रवदामि ते ॥ मत्स्याकारस्तु मत्स्यः स्यात्कूर्मः कूर्माकृतिर्भवेत्॥ १ ॥नराङ्को वाथ कर्त्तव्यो भूवराहो गदादिभृत् ॥ दक्षिणे वामके शङ्खो लक्ष्मीर्वा पद्ममेव वा ॥२॥ श्रीर्वामकूर्परस्था तु क्ष्मानन्तौ चरणानुगौ ॥ वराहस्थापनाद्राज्यं भवाब्धितरणं भवेत् ॥३॥ नरसिंहो विवृत्तास्यो वामोरुक्षतदानवः ॥ तद्वक्षो दारयन्माली स्फुरच्चक्रगदाधरः ॥४॥ छत्री दंडी वामनः स्यादथवा स्याच्चतुर्भुजः ॥ रामश्चापेषुहस्तः स्यात्खड्गी परशुनान्वितः ॥५॥ रामश्चापी शरी खड्गी शङ्खी वा द्विभुजः स्मृतः ॥ गदालाङ्गलधारी च रामो वाथ चतुर्भुजः ॥ ६ ॥ वामार्धे लाङ्गलं दद्यादधः शङ्खं सुशोभनम् ॥ मुसलं दक्षिणार्द्धे तु चक्रं चाधः सुशोभनम् ॥७॥ शान्तात्मा लम्बकर्णश्च गौराङ्गश्चाम्बरावृतः ॥ ऊर्ध्वपद्मस्थितो बुद्धो वरदाभयदायकः ॥८॥ धनुस्तूणान्वितः कल्की म्लेच्छोत्सादकरो द्विजः ॥ अथवाश्वस्थितः खड्गी शङ्खचक्रशरान्वितः ॥ ९ ॥ लक्षणं वासुदेवादिनवकस्य वदामि ते ॥ दक्षिणार्धे गदा वामे वामार्धे चक्रमुत्तमम् ॥ १० ॥ ब्रह्मेशौ पार्श्वगौ नित्यं वासुदेवोऽस्ति पूर्ववत् ॥ शङ्खी सवरदो वाथ द्विभुजो वा चतुर्भुजः ॥ ११ ॥ लाङ्गली मुसली रामो गदापद्मधरः स्मृतः ॥ प्रद्युम्नो दक्षिणे वज्रं शङ्ख वामे धनुः करे ॥ १२ ॥ गदानाभ्यावृतः प्रीत्या प्रद्युम्नो वा धनुःशरी ॥ चतुर्भुजोऽनिरुद्धः स्यात्तथा नारायणो विभुः ॥ १३ ॥ चतुर्मुखश्चतुर्बाहुर्बृहज्जठरमण्डलः ॥ लम्बकूर्चो जटायुक्तो ब्रह्मा हंसाग्र्यवाहनः ॥ १४ ॥ दक्षिणे चाक्षसूत्रं च स्रुवो वामे तु कुण्डिका ॥ आज्यस्थाली सरस्वती सावित्री वामदक्षिणे ॥ १५ ॥ विष्णुरष्टभुजस्ताक्ष्यें करे खड्गस्तु दक्षिणे ॥ गदाधरश्च वरदो वामे कार्मुकखेटके ॥ १६ ॥ चक्रशङ्खौ चतुर्बाहुर्नरसिंहश्चतुर्भुजः ॥ शङ्खचक्रधरो वापि विदारितमहासुरः ॥ १७ ॥ चतुर्बाहुर्वराहस्तु शेषः पाणितले धृतः ॥ धारयन्बाहुना पृथ्वीं वामेन कमलाधरः ॥ १८ ॥ पादलग्ना धरा कार्य्या पदा लक्ष्मीर्व्यवस्थिता ॥ त्रैलोक्यमोहनस्ताक्ष्यें ह्यष्टबाहुस्तु दक्षिणे ॥ १९ ॥ चक्रं खड्गं च मुसलमङ्कुशं वामके करे ॥ शङ्खशार्ङ्गगदापाशान्पद्मवीणासमन्विते ॥ २० ॥ लक्ष्मीसर-

स्वती कार्यें विश्वरूपोऽथ दक्षिणे ॥ मुद्गरं च तथा पाशं शक्तिशूलं शरं करे ॥ २१ ॥ वामे शङ्खं च शार्ङ्गं च गदां पाशं च तोमरम् ॥
लाङ्गलं परशुं दण्डं छुरिकां चर्मक्षेपणम् ॥ २२ ॥ विंशद्बाहुश्चतुर्वक्त्रो दक्षिणस्थोऽथ वामके ॥ त्रिनेत्रो वामपार्श्वेनशायितो जलशा-
य्यपि ॥ २३ ॥ श्रिया धृतैकचरणो विमलाद्याभिरीडितः ॥ नाभिपद्मचतुर्वक्त्रो हरिशङ्करको हरिः ॥ २४ ॥ शूलर्ष्टिधारी दक्षे
च गदाचक्रधरोऽपरे ॥ रुद्रकेशवलक्ष्माङ्को गौरीलक्ष्मीसमन्वितः ॥ २५ ॥ शंखचक्रगदावेदपाणिश्चाश्वशिरा हरिः ॥ वामपादो
धृतः शेषे दक्षिणः कूर्मपृष्ठगः ॥ २६ ॥ दत्तात्रेयो द्विबाहुः स्याद्वामोत्सङ्गे श्रिया सह ॥ विष्वक्सेनश्चक्रगदी हली शङ्खी हरेर्गणः
॥ २७ ॥ इत्याग्नेये महापुराणे मत्स्यादिप्रतिमालक्षणं नामोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ अथ देवीप्रतिमालक्षणम् ॥ श्रीभग-
वानुवाच ॥ चण्डी विंशतिबाहुः स्याद्विभ्रतीं दक्षिणैः करैः ॥ शूलासिशक्तिचक्राणि पाशखेटायुधाभयम् ॥ १ ॥ डमरुं शक्तिकां
वामैर्नागपाशं च खेटकम् ॥ कुठाराङ्कुशपांशांश्च घण्टाध्वजगदास्तथा ॥ २ ॥ आदर्शमुद्गरान्हस्तैश्चण्डी वा दशबाहुका ॥ तदधो
महिषश्छिन्नमूर्ध्वा पातितंमस्तकः ॥ ३ ॥ शस्त्रोद्यतकरः क्रुद्धस्तद्ग्रीवासम्भवः पुमान् ॥ शूलहस्तो वमद्रक्तं रक्तस्रङ्मूर्द्धजेक्षणः ॥
॥ ४ ॥ सिंहेनास्वाद्यमानस्तु पाशबद्धो गले भृशम् ॥ याम्यांघ्र्याक्रान्तसिंहा च सव्याङ्घ्रिर्नीचगासुरे ॥ ५ ॥ चण्डिकेयं त्रिनेत्रा
च सशस्त्रा रिपुमर्दिनी ॥ नवपद्मात्मके स्थाने पूज्या दुर्गा स्वमूर्तितः ॥ ६ ॥ आदौ मध्ये तथेन्द्राद्या नवतत्त्वात्मभिः क्रमात् ॥
अष्टादशभुजैका तु दक्षे मुण्डं च खेटकम् ॥ ७ ॥ आदर्शं तर्जनीं चापं ध्वजं डमरुकं तथा ॥ पाशं वामे बिभ्रती च शक्तिमुद्ग-
रशूलकम् ॥ ८ ॥ वज्रखड्गाङ्कुशशरान् चक्रं देवी शलाकया ॥ एतैरेवायुधैर्युक्ताः शेषाः षोडशबाहुकाः ॥ ९ ॥ डमरुं तर्जनीं
त्यक्त्वा रुद्रचण्डादयो नव ॥ रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥ १० ॥ चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ॥
उग्रचण्डा च मध्यस्था रोचनाभाऽरुणाऽसिता ॥ ११ ॥ नीला शुक्ला धूम्रिका च पीता श्वेता च सिंहगा ॥ महिषोऽथ पुमाञ्छ-
स्त्री तत्कचग्रहमुष्टिका ॥ १२ ॥ अलीढा नवदुर्गाः स्युः स्थाप्याः पुत्रादिवृद्धये ॥ तथा गौरी चण्डिकाद्या कुण्डचक्षररदाग्निधृक्
॥ १३ ॥ सैव रम्भा वने सिद्धाऽग्निहीना ललिता तथा ॥ स्कन्धमूर्द्धकरा वामे द्वितीये धृतदर्पणा ॥ १४ ॥ याम्ये फलाक्षालि-

हस्ता सौभाग्या तत्र चोर्ध्विका ॥ लक्ष्मीर्याम्यकराम्भोजा वामे श्रीफलसंयुता ॥ १५ ॥ पुस्ताक्षमालिकाहस्ता वीणाहस्ता
सरस्वती ॥ कुम्भाब्जहस्ता श्वेताभा मकरोपरि जाह्नवी ॥ १६ ॥ कूर्म्मगा यमुना कुम्भकरा श्यामा च पूज्यते ॥ सवीणस्तु-
म्बुरुः शुक्लः शूली मात्रग्रतो वृषे ॥ १७ ॥ गौरी चतुर्मुखी ब्राह्मी अक्षमालासुरान्विता ॥ कुण्डाक्षपात्रिणी वामे हंसगा शाङ्करी
सिता ॥ १८ ॥ शरचापौ दक्षिणेऽस्या वामे चक्रं धनुर्वृषौ ॥ कौमारी शिखिगा रक्ता शक्तिहस्ता द्विबाहुका ॥ १९ ॥ चक्रशङ्खधरा
सव्ये वामे लक्ष्मीर्गदाब्जधृक् ॥ दण्डशङ्खासिगदया वाराही महिषस्थिता ॥२०॥ ऐन्द्री गजे वज्रहस्ता सहस्राक्षी तु सिद्धये ॥
चामुण्डा कोटराक्षी स्यान्निर्मांसा तु त्रिलोचना ॥ २१ ॥ निर्मांसा अस्थिसारा वा ऊर्ध्वकेशी कृशोदरी ॥ द्वीपिचर्मधरा वामे
कपालं पट्टिशं करे ॥ २२ ॥ शूलं कर्त्री दक्षिणेऽस्याः शवारूढास्थिभूषणा ॥ विनायको नराकारो बृहत्कुक्षिर्गजाननः ॥ २३ ॥
बृहच्छुण्डो ह्युपवीती मुखं सप्तकलं भवेत् ॥ विस्तारादैर्घ्यतश्चैव शुण्डं षट्त्रिंशदङ्गुलम् ॥ २४ ॥ कला द्वादश नाडी तु ग्रीवा
सार्द्धकलोच्छ्रिता ॥ षट्त्रिंशदङ्गुलं कण्ठं गुह्यमध्यर्द्धमङ्गुलम् ॥ २५ ॥ नाभिरूरू द्वादशं च जङ्घे पादे तु दक्षिणे ॥ स्वदन्तं परशुं
वामे लड्डुकं चोत्पलं शये ॥ २६ ॥ सुमुखी च विडालाक्षी पार्श्वे स्कन्दो मयूरगः ॥ स्वामी शाखो विशाखश्च द्विभुजो बाल-
रूपधृक् ॥ २७ ॥ दक्षे शक्तिः कुक्कुटेऽथ एकवक्त्रोऽथ षण्मुखः ॥ षड्भुजो वा द्वादशभिर्ग्रामेऽरण्ये द्विबाहुकः ॥ २८ ॥ शक्ती-
षुपाशनिस्त्रिंशतोत्रदोस्तर्जनीयुतः ॥ शक्त्या दक्षिणहस्तेषु षट्सु वामे करे तथा ॥ २९ ॥ शिखिपिच्छं धनुः खेटं पताकाभयकु-
क्कुटे ॥ कपालकर्त्तरीशूलपाशभृद्याम्यसौम्ययोः ॥ ३० ॥ गजचर्मभृदूर्ध्वास्यपादा स्याद्रुद्रचर्चिका ॥ सैव चाष्टभुजा देवी शिरो
डमरुकान्विता ॥ ३१ ॥ तेन सा रुद्रचामुण्डा नाट्येश्वर्य्यथ नृत्यती ॥ इयमेव महालक्ष्मीरुपविष्टा चतुर्मुखी ॥ ३२ ॥ नृवा-
जिमाहिषेभांश्च खादन्ती च करे स्थितान् ॥ दशबाहुस्त्रिनेत्रा च शस्त्रासिडमरुत्रिकम् ॥ ३३ ॥ बिभ्रती दक्षिणे हस्ते वामे घण्टां
च खेटकम् ॥ खट्वाङ्गं च त्रिशूलं च सिद्धचामुण्डिकाह्वया ॥ ३४ ॥ सिद्धयोगेश्वरी देवी सर्वसिद्धिप्रदायिका ॥ एतद्रूपा
भवेदन्या पाशाङ्कुशयुतारुणा ॥ ३५ ॥ भैरवी रूपविद्या तु भुजैर्द्वादशभिर्युता ॥ एताः श्मशानजा रौद्रा अम्बाष्टकमिदं

स्मृतम् ॥ ३६ ॥ क्षमा शिवावृता वृद्धा द्विभुजा विवृताननना ॥ दन्तुरा क्षेमकारी स्याद्भूमौ जानुकरा स्थिता ॥ ३७ ॥
यक्षिण्यस्तब्धदीर्घाक्ष्यः शाकिन्यो वक्रदृष्टयः ॥ पिङ्गाक्ष्यः स्युमहारम्र्या रूपिण्योऽप्सरसः सदा ॥ ३८ ॥ साक्षमाली त्रिशूली
च नन्दीशो द्वारपालकः ॥ महाकालोऽसिमुण्डी स्याच्छूलखेटकवांस्तथा ॥ ३९ ॥ कृशो भृङ्गी च नृत्यन्वै कूष्माण्डस्थूलखर्व-
वान् ॥ गजगोकर्णवक्त्राद्या वीरभद्रादयो गणाः ॥ ४० ॥ घण्टाकर्णोऽष्टदशदो पापरोगं विदारयन् ॥ वज्रासिदण्डचक्रेषुमुसलो-
ङ्कुशमुद्गरान् ॥ ४१ ॥ दक्षिणे तर्जनीं खेटं शक्तिं मुण्डं च पाशकम् ॥ चापं घण्टां कुठारं च द्वाभ्यां चैव त्रिशूलकम् ॥ घण्टामा-
लाकुलो देवो विस्फोटकविमर्दनः ॥ ४२ ॥ इत्यादिमहापुराणे आग्नेये देवीप्रतिमालक्षणं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥
अथ सूर्य्यादिप्रतिमालक्षणम् ॥ श्रीभगवानुवाच ॥ ससप्ताश्वे सैकचक्रे रथे सूर्य्यो द्विपद्मधक् ॥ मषीभाजनलेखन्यौ बिभ्रद्दण्डी
तु दक्षिणे ॥ १ ॥ वामे तु पिङ्गलो द्वारि दण्डभृत्स रवेर्गणः ॥ बालव्यजनधारिण्यौ पार्श्वे राज्ञी च निष्प्रभा ॥ २ ॥ अथवाऽश्वस-
मारूढः कार्य्य एकस्तु भास्करः ॥ वरदा व्यञ्जिनः सर्व्वे दिक्पाः शस्त्रकराः क्रमात् ॥ ३ ॥ मुद्गरः शूलचक्राब्जभृतोऽग्न्यादिवि-
दिक्स्थिताः ॥ सूर्य्यार्य्यमादिरक्षोऽन्ताश्चतुर्हस्ता द्विपद्मदले ॥ ४ ॥ वरुणः सूर्य्यनामा च सहस्रांशुस्तथा परः ॥ धाता तपनसञ्ज्ञश्च
सविताथ गभस्तिकः ॥ ५ ॥ रविश्चैवाथ पर्जन्यस्त्वष्टा मित्रोऽथ विष्णुकः ॥ मेषादिराशिसंस्थाश्च मार्गादिकार्तिकान्तकाः ॥ ६ ॥
कृष्णो रक्तोः मनाग्रक्तः पीतः पाण्डुरकः सितः ॥ कपिलः पीतवर्णश्च शुंकाभो धवलस्तथा ॥ ७ ॥ धूम्रो नीलः क्रमाद्वर्णाः
शक्तयः केसराग्रगाः ॥ इडा सुषुम्णा. विश्वार्चिरिन्दुसञ्ज्ञा प्रमर्दिनी ॥ ८ ॥ प्रहर्षिणी महाकाली कपिला च प्रबोधिनी ॥
नीलाम्बरघनान्तस्था अमृताख्या च शक्तयः ॥ ९ ॥ वरुणादेश्च तद्वर्णाः केसराग्रेषु विन्यसेत् ॥ तेजश्चण्डो महावक्त्रो द्विभुजः
पद्मखड्गभृत् ॥ १० ॥ कुण्डिकाजप्यमालीन्दुः कुजः शक्तयक्षमालिकः ॥ बुधश्चापाक्षपाणिः स्याज्जीवः कुण्ड्यक्षमालिकः ॥ ११ ॥
शुक्रः कुण्ड्यक्षमाली स्यात्किङ्किणीसूत्रवाञ्छनिः ॥ अर्द्धचन्द्रधरो राहुः केतुः खड्गी च दीपभृत् ॥ १२ ॥ अनन्तस्तक्षकः कर्कः
पद्मो महाब्जः शङ्खकः ॥ कुलिकः सूत्रिणः सर्वे फणवक्त्रा महाप्रभाः ॥ १३ ॥ इन्द्रो वज्री गजारूढश्छागगोऽग्निश्च शक्तिमान् ॥

यमो दण्डी च महिषे नैर्ऋतः खड्गवान् करे ॥ १४ ॥ मकरे वरुणः पाशी वायुर्ध्वजधरो मृगे ॥ गदी कुबेरो मेषस्थ ईशानश्च जटी वृषे ॥ १५ ॥ द्विबाहवो लोकपाला विश्वकर्माक्षसूत्रभृत् ॥ हनूमान्वज्रहस्तः स्यात्पद्मचां सम्पीडिताश्रयः ॥ १६ ॥ वीणाहस्ताः किन्नराः स्युर्माला विद्याधराश्च खे ॥ दुर्बलाङ्गाः पिशाचाः स्युर्वेताला विकृतानानाः ॥ क्षेत्रपालाः शूलवन्तः प्रेता महोदराः कृशाः ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये मूर्त्यादिप्रतिमालक्षणं नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ अथ चतुःषष्टियोगिन्यादिल० ॥ श्रीभगवानुवाच ॥ योगिन्यष्टाष्टकं वक्ष्ये ऐन्द्रादीशानतः क्रमात् ॥ अक्षोभ्या रूक्षकर्णी च राक्षसी कृपणा क्षया ॥ १ ॥ पिङ्गाक्षी चाक्षया क्षेमा इला नीलालया तथा ॥ लोलाऽलक्ता बलाकेशी लालसा विमला पुनः ॥ २ ॥ हुताशा च विशालाक्षी हुङ्कारा वडवामुखी ॥ महाक्रूरा क्रोधना तु भयङ्करी महानना ॥ ३ ॥ सर्वज्ञा तरला तारा ऋग्वेदा तु हयानना ॥ साराख्या रुद्रसंग्राही शम्बरा तालजङ्घिका ॥ ४ ॥ रक्ताक्षी सुप्रसिद्धा तु विद्युज्जिह्वा करङ्किणी ॥ मेघनादा प्रचण्डोग्रा कालकर्णी वरप्रदा ॥ ५ ॥ चन्द्रा चन्द्रावली चैव प्रपञ्चा प्रलयान्तिका ॥ शिशुवक्त्रा पिशाची च पिशिताशा च लोलुपा ॥ ६ ॥ धमनी तापनी चैव रागिणी विकृताननना ॥ वायुवेगा बृहत्कुक्षिर्विकृता विश्वरूपिका ॥ ७ ॥ यमजिह्वा जयन्ती च दुर्जया च जयन्तिका ॥ विडाली रेवती चैव पूतना विजयान्तिका ॥ ८ ॥ अष्टहस्ताश्चतुर्हस्ता इच्छास्त्राः सर्वसिद्धिदाः ॥ भैरवश्चार्कहस्तः स्यात्कूर्परास्यो जटेन्दुभृत् ॥ ९ ॥ खड्गाङ्कुशकुठारेषुविश्वाभयभृदेकतः ॥ चापत्रिशूलखट्वाङ्गपाशकार्द्धवरोद्यतः ॥ १० ॥ गजचर्मधरो द्राभ्यां कृत्तिवासोऽहिभूषितः ॥ प्रेताशनो मातृमध्ये पूज्यः पञ्चाननोऽथवा ॥ ११ ॥ अविलोमाग्निपर्यन्तं दीर्घाष्टकैकभेदितम् ॥ तत्पडङ्गानि जात्यन्तैरन्वितं च क्रमाद्यजेत् ॥ १२ ॥ मन्दिराग्निदलारूढं सुवर्णरसकान्वितम् ॥ नादबिन्दुइन्दुसंयुक्तं मातृनाथाङ्कदीपितम् ॥ १३ ॥ वीरभद्रो वृषारूढो मात्रग्रे स चतुर्मुखः ॥ गौरी तु द्विभुजा त्र्यक्षा शूलिनी दर्पणान्विता ॥ १४ ॥ शूलं गलन्तिका कुण्डी वरदा च चतुर्भुजा ॥ अब्जस्था ललिता स्कन्दगणादर्शशलाकया ॥ १५ ॥ चण्डिका दशहस्ता स्यात्खड्गशूलारिशक्तिधृक् ॥ दक्षे वामे नागपाशं चर्माङ्कुशकुठारकम् ॥ धनुः सिंहे च महिषः शूलेन प्रहनोद्यतः ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये चतुः

षष्टियोगिन्यादिलक्षणं नाम द्विपञ्चाशत्तमोऽध्यायः ॥५२॥ अथ लिङ्गादिलक्षणम् ॥ श्रीभगवानुवाच ॥ लिङ्गादिलक्षणं वक्ष्ये कमलोद्भव तच्छृणु ॥ दैर्घ्यार्द्धं वसुभिर्भक्ता त्यक्ता भागत्रयं ततः ॥ १ ॥ विष्कम्भं भूतभागैस्तु चतुरस्रं तु कारयेत् ॥ आयामं मूर्तिभिर्भक्ता एकद्वित्रिक्रमान्न्यसेत् ॥२॥ ब्रह्मविष्णुशिवांशेषु वर्द्धमानोऽयमुच्यते॥ चतुरस्रेऽस्य कर्णार्द्धं गुह्यकोणेषु लाञ्छयेत् ॥३॥ अष्टाग्रं वैष्णवं भागं सिध्यत्येव न संशयः ॥ षोडशास्रं ततः कुर्याद्द्वात्रिंशास्रं ततः पुनः ॥४॥ चतुःषष्टयस्रकं कृत्वा वर्तुलं साधयेत्ततः ॥ कर्त्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः ॥५॥ विस्तारमथ लिङ्गस्य अष्टधा संविभाजयेत् ॥ भागार्द्धार्द्धं तु सन्त्यज्य छत्राकारं शिरो भवेत्॥६॥ त्रिषु भागेषु सदृश आयामो यस्य विस्तरः ॥ तद्विभागसमं लिङ्गं सर्वकामफलप्रदम् ॥७ ॥ दैर्घ्यस्य तु चतुर्थेन विष्कम्भं देवपूजिते ॥ सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम् ॥ ८ ॥ मध्यसूत्रं समासाद्य ब्रह्मरुद्रान्तिकं कुरुः ॥ षोडशांगुलालिङ्गस्य षड्भागैर्भाजितो यथा ॥९॥ तद्वैयमनसूत्राभ्यां मानमन्तरमुच्यते ॥ यत्राष्टगुत्तं कार्यं शेषाणां यत्रहानितः ॥१०॥ अर्चाभागं त्रिधा कृत्वा तदर्द्धमेकं परित्यजेत् ॥ अष्टधा तद्वयं कृत्वा ऊर्ध्वभागत्रयं त्यजेत् ॥ ११ ॥ ऊर्ध्वं च पञ्चमाद्भागाद्भ्रूम्य रेखां प्रलम्बयेत् ॥ भागमेकं परित्यज्य सङ्गमं कारयेत्तयोः ॥ १२ ॥ एतत्साधारणं प्रोक्तं लिङ्गानां लक्षणं मया ॥ सर्वसाधारणं वक्ष्ये पिण्डिकां तान्निबोध मे ॥ १३ ॥ ब्रह्मभागप्रवेशं च ज्ञात्वा लिङ्गस्य चोच्छ्रयम् ॥ न्यसेद्ब्रह्मशिलां विद्वान्सम्यक्कर्मशिलोपरि ॥ १४ ॥ तथा समुच्छ्रयं ज्ञात्वा पिण्डिकां प्रविभाजयेत् ॥ द्विभागमुच्छ्रितं पीठं विस्तारे लिङ्गसम्मितम् ॥ १५ ॥ त्रिभागं मध्यतः खातं कृत्वा पीठं विभाजयेत् ॥ स्वमानार्द्धत्रिभागेण बाहुल्यं परिकल्पयेत् ॥ १६ ॥ बाहुल्यस्य त्रिभागेण मेखलामथ कल्पयेत् ॥ खातं स्यान्मेखलातुल्यं क्रमान्निम्नं तु कारयेत् ॥ १७ ॥ मेखलापोडशांशेन खातं वा तत्प्रमाणतः ॥ उच्छ्रायं तस्य पीठस्य विकाराङ्गं तु कारयेत् ॥ १८ ॥ भूमौ प्रविष्टमेकं तु भागेनैकेन पिण्डिका ॥ कण्ठं भागैस्त्रिभिः कार्यं भागेनैकेन पट्टिका ॥ १९ ॥ द्व्यंशेन चोर्ध्वपट्टं तु एकांशाः शेषपट्टिकाः ॥ भागं भागं प्रविष्टं तु यावत्कण्ठं ततः पुनः ॥ २० ॥ निर्गमं भागमेकं तु यावद्वै शेषपट्टिका ॥ प्रणवस्य त्रिभागेण निर्गमस्तु त्रिभागतः ॥ २१ ॥ मूलेऽङ्गुल्यग्रविस्तारमग्रे त्र्यंशेन चार्द्धतः ॥ ईषन्निम्नं

तु कुर्वीत खातं तच्चोत्तरेण वै ॥ पिण्डिकासहितं लिङ्गमेतत्साधारणं स्मृतम् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये लिङ्गादिलक्षणं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ अथ नानालिङ्गमानादिलक्षणम् ॥ श्रीभगवानुवाच ॥ वक्ष्याम्यन्यप्रकारेण लिङ्गमानादिकं शृणु ॥ वक्ष्ये लवणजं लिङ्गं घृतजं बुद्धिवर्द्धनम् ॥ १ ॥ भृतये वस्त्रलिङ्गं तु लिङ्गं तात्कालिकं विदुः ॥ पक्वापक्वं मृन्मयं स्यादपक्वात्पक्वजं वरम् ॥२॥ ततो दारुमयं मुख्यं दारुजाच्छैलजं वरम् ॥ शैलाद्धरं तु मुक्ताजं ततो लौहं सुवर्णजम् ॥ ३ ॥ राजतं कीर्त्तितं ताम्रं पैत्तलं भुक्तिमुक्तिदम् ॥ ४ ॥ रङ्गजं रसलिंगं च भुक्तिमुक्तिप्रदं वरम् ॥ रसजं रसलोहादेरत्नगर्भं तु वर्धयेत् ॥ मानादिवेष्टं सिद्धादिस्थापितेऽथ स्वयंभुवि ॥ ५ ॥ बाणे च स्वेच्छया तेषां पीठप्रासादकल्पना ॥ पूजयेन्मूर्यबिंबस्थं दर्पणे प्रतिबिंबितम् ॥ ६ ॥ पूज्यो हरस्तु सर्वत्र लिङ्गे पूर्णार्चनं भवेत् ॥ हस्तोत्तरोच्छ्रितं शैले दारुजं तद्वदेव हि ॥ ७ ॥ चलमंगुलमानेन द्वारगर्भकरैः स्थितम् ॥ अंगुलाद्वहलिङ्गं स्याद्यावत्पञ्चदशांगुलम् ॥ ८ ॥ द्वारमानात्रिसंख्याकं नवधा गर्भमानतः ॥ नवधा गर्भमानेन लिङ्गं धाम्नि च पूजयेत् ॥ ९ ॥ एवं लिङ्गानि षट्त्रिंशज्ज्ञेयानि ज्येष्ठमानतः ॥ मध्यमानेन षट्त्रिंशत्षट्त्रिंशदधमेन च ॥ १० ॥ इत्थमैक्येन लिङ्गानां शतमष्टोत्तरं भवेत् ॥ एकांगुलादिपञ्चान्तं कानेष्ठञ्चलमुच्यते ॥ ११ ॥ षडादिदशपर्यंतं चलाचलमुच्यते मध्यमम् ॥ एकादशाङ्गुलादि स्याज्ज्येष्ठं पञ्चदशान्तकम् ॥ १२ ॥ षडंगुलं महारत्ने रत्नैरन्यैर्नवांगुलम् ॥ रविभिर्हेममारोप्यं लिङ्गं शेषैस्त्रिपञ्चभिः ॥ १३ ॥ षोडशांशे च वेदांशे युगं लुम्बोर्ध्वदेशतः ॥ द्वात्रिंशत्षोडशांशाश्च कोणयोस्तु विलोपयेत् ॥ १४ ॥ चतुर्निवेशनात्कंठो विंशतिस्त्रियुगैस्तथा ॥ पार्श्वाभ्यां तु विलुप्ताभ्यां घनलिङ्गं भवेद्वरम् ॥ १५ ॥ धाम्नो युगर्तुनागांशैर्द्वारमानोनितं क्रमात् ॥ लिङ्गे द्वारोच्छ्रयादर्वाग्भवेत्पादोनितं क्रमात् ॥ १६ ॥ गर्भार्द्धिनाधमं लिङ्गं भूतांशैः स्यात्त्रिभिर्वरम् ॥ तयोर्मध्ये च सूत्राणि सप्त सम्पादयेत्समम् ॥ १७ ॥ एवं स्युर्नव सूत्राणि भूतसूत्रैश्च मध्यमम् ॥ द्व्यन्तरो वामभागश्च लिङ्गानां दीर्घता तव ॥ १८ ॥ हस्ताद्विवर्द्धते हस्तो यावत्स्युर्नव पाणयः ॥ हीनमध्योत्तमं लिङ्गं त्रिविधं त्रिविधात्मकं ॥ १९ ॥ एकैकलिङ्गमध्येषु त्रीणि त्रीणि च पादशः ॥ लिंगानि घटयेद्धीमान्षट्सु चाष्टोत्तरेषु च ॥ २० ॥ स्थिरदीर्घप्रमाणैस्तु द्वारमर्भकरात्मकं ॥ भागेशं

चाप्यमीशं च देवेशं तुल्यसंज्ञितम् ॥ २१ ॥ चत्वारि लिंगरूपाणि विष्कम्भेण तु लक्षयेत् ॥ दीर्घमायान्वितं कृत्वा लिङ्गं
कुर्य्यात्त्रिरूपकम् ॥ २२ ॥ चतुरष्टाष्टवृत्तं च तत्त्वत्रयगुणात्मकम् ॥ लिङ्गानामीप्सितं दैर्घ्यं तेन कृत्वांगुलानि वै ॥ २३ ॥
ध्वजाद्यायैः सुरैर्भूतैः शिखिभिर्वा हरेत्कृतिम् ॥ तान्यङ्गुलानि यच्छेषं लक्षयेच्च शुभाशुभम् ॥ २४ ॥ ध्वजाद्या ध्वजसिंहेभवृषाः
श्रेष्ठाः परे शुभाः ॥ स्वरेषु षड्जगान्धारपञ्चमाः शुभदायकाः ॥ २५ ॥ भूतेषु च शुभा भूः स्यादग्निश्चाहवनीयकः ॥ उक्तायाः
मस्य चाद्धांशे नागांशैर्भाजिते क्रमात् ॥ २६ ॥ रसभूतांशषष्ठांशत्र्यंशाधिकशरैर्भवेत् ॥ आढ्यानाढ्यसुरेज्यार्कतुल्यानां चतु-
रस्रता ॥ २७ ॥ पञ्चमं वर्द्धमानाख्यं व्यासानाहप्रवृद्धितः ॥ द्विधा भेदा बहून्यत्र वक्ष्यन्ते विश्वकर्मतः ॥ २८ ॥ आढ्यादीनां
त्रिधा स्थौल्याद्यवधृतं तदष्टधा ॥ त्रिधा हस्ताज्जिनाख्यं च युक्तं सर्वसमेन च ॥ २९ ॥ पञ्चविंशति लिङ्गानि नाद्ये देवार्चिते
तथा ॥ पञ्चसप्तभिरेकत्वाज्जिनैर्भक्तैर्भवन्ति हि ॥ ३० ॥ चतुर्दशसहस्राणि चतुर्दशशतानि च ॥ एवमष्टांगुलविस्तारो नवैककं-
रगर्भतः ॥ ३१ ॥ तेषां कोणार्द्धकोणस्थैश्चिन्न्यात्कोणानि सूत्रकैः ॥ विस्तारं मध्यतः कृत्वा स्थाप्यं वा मध्यतस्त्रयम् ॥ ३२ ॥
विभागादूर्ध्वमष्टास्रो द्व्यष्टास्रः स्याच्छिवांशकः ॥ पादाज्जान्वन्तको ब्रह्मा नाभ्यन्तो विष्णुरित्यतः ॥ ३३ ॥ मूर्द्धान्तो भूतभागेशो
व्यक्तेऽव्यक्ते च तद्वति ॥ पञ्चलिङ्गव्यवस्थायां शिरो वर्तुलमुच्यते ॥ ३४ ॥ छत्राभं कुक्कुटाभं वा बालेन्दुप्रतिमाकृतिः ॥
एकैकस्य चतुर्भेदैः काम्यभेदात्फलं वदे ॥ ३५ ॥ लिङ्गमस्तकविस्तारं वसुभक्तं तु कारयेत् ॥ आद्यभागं चतुर्द्धा तु विस्ता-
रोच्छ्रायतो भजेत् ॥ ३६ ॥ चत्वारि तत्र सूत्राणि भागभागानुपातनात् ॥ पुण्डरीकं तु भागेन विशालाख्यं त्रिलोकनात्
॥ ३७ ॥ त्रिशातनात्तु श्रीवत्सं शत्रुकृद्वेदलोपनात् ॥ शिरः सर्वसमे श्रेष्ठं कुक्कुटाभं सुराह्वये ॥ ३८ ॥ चतुर्भागात्मके लिङ्गे
त्रपुषं द्वयलोपनात् ॥ अनाद्यस्य शिरः प्रोक्तमर्द्धचन्द्रं शिरः शृणु ॥ ३९ ॥ अंशात्प्रान्ते युगांशैश्च द्व्यंकहान्याऽमृताक्षकम् ॥
पूर्णबालेन्दुकुमुदं द्वित्रिवेदक्षयात्क्रमात् ॥ ४० ॥ चतुस्त्रिरेखं वदनं मुखलिङ्गमतः शृणु ॥ पूजाभागः प्रकर्तव्यो
मूर्त्यभ्रिपदकल्पितः ॥ ४१ ॥ अर्कांशं पूर्ववत्त्यक्त्वा षट् स्थानानि विवर्त्तयेत् ॥ शिरोन्नतिः प्रकर्त्तव्या ललाटं

नासिका ततः ॥ ४२ ॥ वदनं चिबुकं ग्रीवा युगभागेभुंजाक्षिभिः ॥ कराभ्यां मुकुलीकृत्य प्रतिमायाः प्रमाणतः ॥ ४३ ॥ मुखं प्रति समः कार्यो विस्तारादष्टमांशतः ॥ चतुर्मुखं मया प्रोक्तं त्रिमुखं चोच्यते शृणु ॥ ४४ ॥ कर्णपादाधिकान्यस्य ललाटादीनि निर्दिशेत् ॥ भुजौ चतुर्भिर्भागैस्तु कर्त्तव्यौ पश्चिमोर्जितौ ॥ ४५ ॥ विस्तारादष्टमांशेन मुखानां प्रति निर्गमः ॥ एकवक्त्रं तथा कार्यं पूर्वस्यां सौम्यलोचनम् ॥ ४६ ॥ ललाटनासिकावक्त्रग्रीवायां च विवर्त्तयेत् ॥ भुजाञ्च पञ्चमांशेन भुजहीनं विवर्त्तयेत् ॥ ४७ ॥ विस्तारस्य षडंशेन मुखैर्निर्गमनं हितम् ॥ सर्वेषां मुखलिङ्गानां त्रपुषं वाथ कुङ्कुमम् ॥ ४८ ॥ इत्यादिमहापुराणे आग्नेये लिङ्गमानादिव्यक्ताव्यक्तादिलक्षणं नाम चतुःपञ्चाशत्तमोऽध्यायः ॥५४॥ अथ पिण्डिकालक्षणम् ॥ श्रीभगवानुवाच ॥ अतः परं प्रवक्ष्यामि प्रतिमानां तु पिण्डिकाम् ॥ दैर्घ्येण प्रतिमातुल्या तदर्धेन तु विस्तृता ॥ १ ॥ उच्छ्रितायामतोऽर्द्धेन सुविस्तारार्द्धभागतः ॥ तृतीयेन तु वा तुल्यां तत्त्रिभागेण मेखलाम् ॥ २ ॥ खातं च तत्प्रमाणं तु किञ्चिदुत्तरतो नतम् ॥ विस्तारस्य चतुर्थेन प्रणालस्य विनिर्गमम् ॥ ३ ॥ [मूल मूलस्य विस्तारमग्रे कुर्यात्तदर्द्धतः ॥ विस्तारस्य तृतीयेन तोयमार्गं तु कारयेत् ॥ ४ ॥] पिण्डिकार्द्धेन वा तुल्यं दैर्घ्यमीशस्य कीर्तितम् ॥ ऐशं वा तुल्यदीर्घं च ज्ञात्वा सूत्रं प्रकल्पयेत् ॥ ५ ॥ उच्छ्रायं पूर्ववत्कुर्याद्भागषोडशसंख्यया ॥ अधः षट्कं द्विभागं तु कण्ठे कुर्यात्त्रिभागकम् ॥ ६ ॥ शेषास्त्वेकैकशः कार्याः प्रतिष्ठानिर्गमास्तथा ॥ पट्टिका पिण्डिका चेयं सामान्यप्रतिमासु च ॥ ७ ॥ प्रासादद्वारमानेन प्रतिमाद्वारमुच्यते ॥ गजव्यालकसंयुक्ता प्रभा स्यात्प्रतिमासु च ॥ ८ ॥ पिण्डिकापि यथाशोभं कर्त्तव्या सततं हरेः ॥ सर्वेषामेव देवानां विष्णूक्तं मानमुच्यते ॥ देवीनामपि सर्वासां लक्ष्म्युक्तं मानमुच्यते ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये पिण्डिकादिलक्षणं नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ अथ दिक्पालयागकथनम् ॥ श्रीभगवानुवाच ॥ प्रतिष्ठापञ्चकं वक्ष्ये प्रतिमात्मा तु पूरुषः ॥ प्रकृतिः पिण्डिका लक्ष्मीः प्रतिष्ठा योगकस्तयोः ॥ १ ॥ इच्छाफलार्थिभिस्तस्मात्प्रतिष्ठा क्रियते नरैः ॥ गर्भसूत्रं तु निःसार्य्य प्रासादस्याग्रतो गुरुः ॥ २ ॥ अष्टषोडशविंशान्तं मण्डपं चाथमादिकम् ॥ स्नानार्थं कलशार्थं च यागद्रव्यार्थमर्द्धतः ॥ ३ ॥ त्रिभागेणार्द्धभागेन वेदिं कुर्यात्तु

शोभनाम् ॥ कलशैर्वटिकाभिश्च वितानाद्यैश्च भूषयेत् ॥ ४ ॥ पञ्चगव्येन सम्प्रोक्ष्य सर्वद्रव्याणि धारयेत् ॥ अलङ्कृतो गुरुर्विष्णुं ध्यात्वात्मानं प्रपूजयेत् ॥ ५ ॥ अङ्गुलीयप्रभृतिभिर्मूर्तिपान्वलयादिभिः ॥ कुण्डे कुण्डे स्थापयेच्च मूर्त्तिपांस्तन्त्रपारगान् ॥ ६ ॥ चतुष्कोणे चार्धकोणे वर्तुले पद्मसन्निभे ॥ पूर्वादौ तोरणार्थं तु पिप्पलोदुम्बरौ वटः ॥ ७ ॥ प्लक्षः सुशोभनं पूर्वं सुभद्रं दक्षतोरणम् ॥ सुकर्माणं सुहोत्रं च आप्ये सौम्ये समुच्छ्रयम् ॥ ८ ॥ पञ्चहस्तं तु संस्थाप्य स्योनापृथिवीति पूजयेत् ॥ तोरणस्तम्भमूले तु कलशान्मंगलाङ्कुरान् ॥ ९ ॥ प्रदद्यादुपरिष्टाच्च कुर्य्याच्चक्रं सुदर्शनम् ॥ पञ्चहस्तप्रमाणं तु ध्वजं कुर्य्याद्विचक्षणः ॥ १० ॥ वैपुल्यं चास्य कुर्वीत षोडशाङ्गुलसम्मितम् ॥ सप्तहस्तोच्छ्रितं चास्य कुर्य्याद्दण्डं सुरोत्तम ॥ ११ ॥ अरुणोऽग्निनिभश्चैव कृष्णः शुक्लोऽथ पीतकः ॥ रक्तवर्णस्तथा श्वेतश्चैवं वर्णादिकं क्रमात् ॥ १२ ॥ कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥ शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ १३ ॥ पूज्याः कोटिगुणैर्युक्ताः पूर्वाद्या ध्वजदेवताः ॥ जलाढकसुपूरास्तु पक्वबिम्बोपमा घटाः ॥ १४ ॥ अष्टाविंशाधिकशतं कालमण्डनवर्जिताः ॥ सहिरण्या वस्त्रकण्ठाः सोदकास्तोरणाद्बहिः ॥ १५ ॥ घटाः स्थाप्याश्च पूर्वादौ वेदिकायाश्च कोणगाः ॥ चतुरः स्थापयेत्कुम्भानाजिघ्रेति च मन्त्रतः ॥ १६ ॥ कुम्भेष्वावाह्य शक्रादीन्पूर्वादौ पूजयेत्क्रमात् ॥ इन्द्रागच्छ देवराज वज्रहस्त गजस्थित ॥ १७ ॥ पूर्वद्वारं च मे रक्ष देवैः सह नमोऽस्तु ते ॥ त्रातारमिन्द्रमन्त्रेण अर्चयित्वा यजेद्बुधः ॥ १८ ॥ आगच्छाग्ने शक्तियुत छागस्थ बलसंयुत ॥ रक्षाग्नेयीं दिशं देवैः पूजां गृह्ण नमोऽस्तु ते ॥ १९ ॥ अग्निर्मूर्धेतिमन्त्रेण यजेद्वा अग्नये नमः ॥ महिषस्थ यमागच्छ दण्डहस्त महाबल ॥ २० ॥ रक्ष त्वं दक्षिणद्वारं वैवस्वत नमोस्तु ते ॥ वैवस्वतं सङ्गमनमित्यनेन यजेद्यमम् ॥ २१ ॥ नैर्ऋतागच्छ खड्गाद्य बलवाहनसंयुत ॥ इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैर्ऋतीं दिशम् ॥ २२ ॥ एष ते नैर्ऋतमन्त्रेण यजेदर्घ्यादिभिर्नरः ॥ मकरारूढ वरुण पाशहस्त महाबल ॥ २३ ॥ आगच्छ पश्चिमद्वारं रक्ष रक्ष नमोऽस्तु ते ॥ उरुं हि राजा वरुणं यजेदर्घ्यादिभिर्गुरुः ॥ २४ ॥ आगच्छ वायो सबल ध्वजहस्त सवाहन ॥ वायव्यं रक्ष देवैस्त्वं समरुद्भिर्नमोऽस्तु ते ॥ २५ ॥ वात इत्यादिभिश्चार्चेदोन्नमो वायवेऽपि वा ॥ आगच्छ सोम सबल गदाहस्त

सवाहन ॥ २६ ॥ रक्ष त्वमुत्तरद्वारं सकुबेर नमोस्तु ते ॥ सोमं राजानमिति वा यजेत्सोमाय वै नमः ॥ २७ ॥ आगच्छेशान सबल शूलहस्त वृषस्थित ॥ यज्ञमण्डपस्यैशानीं दिशं रक्ष नमोऽस्तु ते ॥ २८ ॥ ईशानमस्येति यजेदीशानाय नमोपि वा ॥ ब्रह्मन्नागच्छ हंसस्थ स्रुक्स्रुवव्यग्रहस्तक ॥२९॥ सलोकोर्ध्वां दिशं रक्ष यज्ञस्याज नमोऽस्तु ते ॥ हिरण्यगर्भेति यजेन्नमस्ते ब्रह्मणेऽपि वा ॥ ३० ॥ अनन्तागच्छ चक्राढ्य कूर्मस्थाहिगणेश्वर ॥ अधोदिशं रक्ष रक्ष अनन्तेश नमोऽस्तु ते ॥ नमोऽस्तु सर्पेति यजेदनन्ताय नमोऽपि वा ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये दशदिक्पतियागो नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ अथ कुम्भाधिवासविधिः ॥ श्रीभगवानुवाच ॥ भूमेः परिग्रहं कुर्य्यात्क्षिपेद्वीर्हीश्च सर्षपान् ॥ नारसिंहेन रक्षोघ्नान्प्रोक्षयेत्पञ्चगव्यतः ॥ १ ॥ भूमिं घटे तु सम्पूज्य सरत्नं साङ्गकं हरिम् ॥ अस्त्रमन्त्रेण करकं तत्र चाष्टशतं यजेत् ॥ २ ॥ अच्छिन्नधारया सिञ्चन्व्रीहीन्संस्कृत्य धारयेत् ॥ प्रदक्षिणं परिभ्राम्य कलशं विकिरोपरि ॥ ३ ॥ सवस्त्रे कलशे भूयः पूजयेदच्युतं श्रियम् ॥ योगे योगेतिमन्त्रेण न्यसेच्छय्यां तु मण्डले ॥ ४ ॥ कुशोपरि तूलिका च शय्यायां दिग्विदिक्षु च ॥ विद्याधिपान्यजेद्विष्णुं मधुव्रातं त्रिविक्रमम् ॥ ५ ॥ वामनं दिक्षु वाय्वादौ श्रीधरं च हृषीकपम् ॥ पद्मनाभं दामोदरमैशान्यां स्नानमण्डपे ॥ ६ ॥ अभ्यर्च्य पश्चादैशान्यां चतुष्कुम्भे सवेदिके ॥ स्नानमण्डपके सर्व्वद्रव्याण्यानीय निक्षिपेत् ॥ ७ ॥ स्नानकुम्भेषु कुंभांस्तांश्चतुर्दिक्ष्वधिवासयेत् ॥ कलशाः स्थापनीयास्तु अभिषेकार्थमादरात् ॥ ८ ॥ वटोदुंबरकाश्वत्थांश्चम्पकाशोकश्रीद्रुमान् ॥ पलाशार्जुनपुन्नागांस्तु कदंबबकुलाम्रकान् ॥ ९ ॥ पल्लवांस्तु समानीय पूर्वकुंभे विनिक्षिपेत् ॥ पद्मकं रोचनां दूर्वां दर्भपिञ्जूलमेव च ॥ १० ॥ जातीपुष्पं कुन्दपुष्पं चन्दनं रक्तचन्दनम् ॥ सिद्धार्थं तगरं चैव तण्डुलं दक्षिणे न्यसेत् ॥ ११ ॥ सुवर्णं रजतं चैव कूलद्वयमृदं तथा ॥ नद्याः समुद्रगामिन्या विशेषाज्जाह्नवीमृदम् ॥ १२ ॥ गोमयं च यवाञ्शालींस्तिलांश्चैवापरे न्यसेत् ॥ विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम् ॥ १३ ॥ सहदेवीं वचां सैंहीं बलां व्याघ्रीं सलक्षणाम् ॥ ऐशान्यामपरे कुम्भे मङ्गलान्निवेशयेत ॥ १४ ॥ वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत् ॥ जाह्नवीबालुकां तोयं विन्यसेदपरे घटे ॥ १५ ॥ वराहवृष-

नागेन्द्रविषाणोद्धृतमृत्तिकाम् ॥ मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे न्यसेत् ॥ १६ ॥ तीर्थपर्वतमृद्भिश्च युक्तमप्यपरे न्यसेत् ॥
नागकेसरपुष्पं च काश्मीरमपरे न्यसेत् ॥ १७ ॥ चन्दनागुरुकर्पूरैः पुष्पं चैवापरे न्यसेत् ॥ वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव
च ॥ १८ ॥ एतान्येकत्र निक्षिप्य स्थापयेद्देवसत्तमम् ॥ नदीनदतडागानां सलिलैरपरे न्यसेत् ॥ १९ ॥ एकाशीतिपदे
चान्यान्मण्डपे कलशान्न्यसेत् ॥ गन्धोदकाद्यैः संपूर्णाञ्छ्रीसूक्तेनाभिमन्त्रयेत् ॥ २० ॥ यवान्सिद्धार्थकं गन्धं कुशाग्रं चाक्षतां-
स्तथा ॥ तिलान्फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत ॥ २१ ॥ पद्मं श्यामलतां दूर्वां विष्णुपर्णीं कुशांस्तथा ॥ पाद्यार्थं दक्षिणे
भागे मधुपर्कं तु पश्चिमे ॥ २२ ॥ कक्कोलकं लवङ्गं च तथा जातीफलं शुभम् ॥ उत्तरेह्याचमनीयमग्नौ दूर्वाक्षतान्वितम् ॥ २३ ॥
पात्रं नीराजनार्थं च तथोद्वर्त्तनमानिले ॥ गन्धपुष्पान्वितं पात्रमैशान्यां पात्रके न्यसेत् ॥ २४ ॥ मुरामांसीं चाम्लकं सहदेवीं
निशादिकम् ॥ पुष्टिदीपान्न्यसेदर्घ्यौ न्यसेन्नीराजनाय च ॥ २५ ॥ शंखं चक्रं च श्रीवत्सं कुलिशं पङ्कजादिकम् ॥ हेमा-
दिपात्रे कृत्वा तु नानावर्णादिपुष्पकम् ॥ २६ ॥ इत्यादिमहापुराणे आग्नेये कुम्भाधिवासो नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥
अथ स्नपनादिविधिः ॥ श्रीभगवानुवाच ॥ ऐशान्यां जनयेत्कुण्डं गुरुर्वाह्निं च वैष्णवम् ॥ गायत्र्याष्टशतं हुत्वा सम्पातविधिना
घटान् ॥ १ ॥ प्रोक्षयेत्कारुशालायां शिल्पिभिर्मूर्त्तिपैर्व्रजेत् ॥ तूर्य्यशब्दैः कौतुकं च बन्धयेद्दक्षिणे करे ॥ २ ॥ विष्णवे शिपि-
विष्टेति ऊर्णासूत्रेण सर्पपैः ॥ पट्टवस्त्रेण कर्तव्यं देशिकस्यापि कौतुकम् ॥ ३ ॥ मण्डपे प्रतिमां स्थाप्य सवस्त्रां पूजितां स्तुवन् ॥
नमस्तेऽर्च्ये सुरेशानि प्रणीते विश्वकर्मणा ॥ ४ ॥ प्रभावितशेषजगद्धात्रि तुभ्यं नमो नमः ॥ त्वाये सम्पूजयामीशे नारायणम-
नामयम् ॥ ५ ॥ रहिता शिल्पिदोषैस्त्वमृद्धियुक्ता सदा भव ॥ एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपम् ॥ ६ ॥ शिल्पिनं तोष-
येद्रव्यैर्गुरवे गां प्रदापयेत् ॥ चित्रं देवेतिमन्त्रेण नेत्रे चोन्मीलयेत्ततः ॥ ७ ॥ अग्निर्ज्योतीति दृष्टिं च दद्याद्वै भद्रपीठके ॥ ततः
शुक्लानि पुष्पाणि घृतं सिद्धार्थकं तथा ॥ ८ ॥ दूर्वां कुशाग्रं देवस्य दद्याच्छिरसि देशिकः ॥ मधुवातेति मन्त्रेण नेत्रे चाभ्यञ्जयेद्-
गुरुः ॥ ९ ॥ हिरण्यगर्भमन्त्रेण इमं मेति च कीर्त्तयेत् ॥ घृतेनाभ्यञ्जयेत्पश्चात्पठन्घृतवर्तीं पुनः ॥ १० ॥ मसूरपिष्टेनोद्वर्त्य अतो

देवेति कीर्तयेत् ॥ क्षालयेदुष्णतोयेन सत्तेऽग्नेति देशिकः ॥ ११ ॥ द्रुपदादिवेत्यनुलिम्पेदापो हिष्टेति सेचयेत् ॥ नदीजैस्तीर्थजैः स्नानं पावमानीति रत्नजैः ॥ १२ ॥ समुद्रं गच्छ गच्छेति तीर्थमृत्कलशेन च ॥ शन्नो देवीः स्नापयेच्च गायत्र्याप्युष्णवारिणा ॥ १३ ॥ पञ्चमृद्भिर्हिरण्येति स्नापयेत्परमेश्वरम् ॥ सिकताद्रिरिमं मेति वल्मीकोत्थघटेन च ॥ १४ ॥ तद्विष्णोरिति ओषध्यद्भिर्या ओषधिमन्त्रतः ॥ यज्ञायज्ञेति काषायैः पञ्चभिर्गव्यकैस्ततः ॥ १५ ॥ पयः पृथिव्यां मन्त्रेण याः फलीति फलाम्बुभिः ॥ विश्वतश्चक्षुः सौम्येन पूर्वेण कलशेन च ॥ १६ ॥ सोमं राजानमित्येवं विष्णो रराटं दक्षतः ॥ हँसः शुचिः पश्चिमेन कुर्यादुद्वर्तनं हरेः ॥ १७ ॥ मूर्द्धानमितिमन्त्रेण धात्रीमांस्युदकेन च ॥ मानस्तोकेति मन्त्रेण गन्धद्वारेति गन्धकैः ॥ १८ ॥ इदमापेति च घटैरेकाशीतिपदास्थितैः ॥ एह्येहि भगवन्विष्णो लोकानुग्रहकारक ॥ १९ ॥ यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते ॥ अनेनावाह्य देवेशं कुर्यात्कौतुकमोचनम् ॥ २० ॥ मुञ्चामि त्वेतिसूक्तेन देशिकस्यापि मोचयेत् ॥ हिरण्मयेन पात्रेण पाद्यं दद्यादतो देवेति चार्घ्यकम् ॥ २१ ॥ मधुवाता मधुपर्कं मयि गृह्णामि चाचमेत् ॥ अक्षन्नमीमदन्तेति किरेद्वीक्षितं बुधः ॥ २२ ॥ काण्डान्निर्मन्थनं कुर्याद्गन्धं गन्धवतीति च ॥ उन्नयामीति माल्यं च इदं विष्णुः पवित्रकम् ॥ २३ ॥ बृहस्पते वस्त्रयुग्मं वेदाहमित्युत्तरीयकम् ॥ महाव्रतेन सकलान्पुष्पं चौषधयः क्षिपेत् ॥ २४ ॥ धूपं दद्याद्धूरसीति विभ्राट्सूक्तेन चाञ्जनम् ॥ युञ्जन्तीति च तिलकं दीर्घायुष्ट्वेति माल्यकम् ॥ २५ ॥ इन्द्रश्छत्रेति छत्रं तु आदर्शं तु विराजतः ॥ चामरं तु विकर्णेन भूषां रथन्तरेण च ॥ २६ ॥ व्यजनं वायुदेवत्येर्मुञ्चामित्वेति पुष्पकम् ॥ वेदाद्यैः संस्तुतिं कुर्य्याद्धरेः पुरुषसूक्ततः ॥ २७ ॥ सर्वमेतत्समं कुर्यात्पिण्डकादौ हरादिके ॥ देवस्योत्थानसमये सौपर्णं सूक्तमुच्चरेत् ॥ २८ ॥ उतिष्ठेति समुत्थाप्य शय्याया मण्डपे नयेत् ॥ शाकुनेनैव सूक्तेन देवं ब्रह्मरथादिना ॥ २९ ॥ अतो देवेति सूक्तेन प्रतिमां पिण्डिकां तथा ॥ श्रीसूक्तेन च शय्यायां विष्णोस्तु सकलीकृतिः ॥ ३० ॥ मृगराजं वृषं नागं व्यजनं कलशं तथा ॥ वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलम् ॥ ३१ ॥ दर्शयेदश्वसूक्तेन पाददेशे त्रिपादिति ॥ उखां पिधानकं पात्रमम्बिकां दार्विकां ददेत् ॥ ३२ ॥ मुसलोलूखलं दद्याच्छिलां सम्मार्जनीं तथा ॥ तथा भोजनभाण्डानि गृहोपकरणानि च ॥ ३३ ॥

शिरोदेशे च निद्रास्थं वस्त्ररत्नयुतं घटम् ॥ खण्डखाद्यैः पूरयित्वा स्नपनस्य विधिः स्मृतः ॥ ३४॥ इत्यादिमहापुराणे आग्नेये स्नपनादि विधानं नामाष्टपञ्चाशत्तमोऽध्यायः॥५८॥ अथाधिवासनकथनम् ॥श्रीभगवानुवाच॥ हरेः सान्निध्यकरणमधिवासनमुच्यते॥ सर्वज्ञं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमम् ॥ १॥ ओंकारेण समायोज्य चिच्छक्तिमाभिमानिनीम्॥ निःसाम्यर्यात्मैकतां कृत्वा स्वस्मिन्सर्वगते विभौ॥२॥ योजयेन्मरुता पृथ्वीं वह्निबीजेन दीपयेत् ॥ संहरेद्वायुना चाग्निं वायुमाकाशतो नयेत् ॥३॥ अधिभूताधिदैवैस्तु साध्याख्यैर्विभवैः सह ॥ तन्मात्रपातकान्कृत्वा संहरेत्तत्क्रमाद्बुधः ॥ ४ ॥ आकाशं मनसाहृत्य मनोऽहङ्करणे कुरु ॥ अहङ्कारं च महति तं चाप्यव्याकृते नयेत् ॥ ५ ॥ अव्याकृतं ज्ञानरूपे वासुदेवः स ईरितः ॥ स तामव्याकृतां मायामवष्टभ्य सिसृक्षया ॥ ६ ॥ सङ्कर्षणं स शब्दात्मा स्पर्शाख्यमसृजत्प्रभुः॥ क्षोभ्य मायां स प्रद्युम्नं तेजोरूपं स चासृजत् ॥७॥ अनिरुद्धं रसमात्रं ब्रह्माणं गन्धरूपकम् ॥ अनिरुद्धः स च ब्रह्मा अप आदौ ससर्ज ह ॥८॥ तस्मिन्हिरण्मयं चान्डं सोऽसृजत्पञ्चभूतवत् ॥ तस्मिन्संक्रामिते जीवे शक्तिरात्मोपसंहृता ॥९॥ प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्दचते ॥ जीवो व्याहृतिसञ्ज्ञस्तु प्राणेष्वाध्यात्मिकः स्मृतः॥ १०॥ प्राणैर्युक्ता ततो बुद्धिः सञ्जाता चाष्टमूर्तिका ॥ अहङ्कारस्ततो जज्ञे मनस्तस्माद जायत ॥११॥ अर्थाः प्रजज्ञिरे पञ्च संकल्पादियुतास्ततः ॥ शब्दः स्पर्शश्च रूपं च रसो गन्ध इति स्मृताः ॥ १२ ॥ ज्ञानशक्तियुतान्येतैरारब्धानीन्द्रियाणि तु ॥ त्वक्छ्रोत्रघ्राणचक्षूंषि जिह्वाबुद्धीन्द्रियाणि तु ॥१३॥ पादौ पायुस्तथा पाणी वागुपस्थश्च पञ्चमः ॥ कर्मेन्द्रियाणि चैतानि पञ्च भूतान्यतः शृणु ॥१४॥ आकाशवायुतेजांसि सलिलं पृथिवी तथा ॥ स्थूलमेभिः शरीरं तु सर्वाधारं प्रजायते ॥१५॥ एतेषां वाचका मन्त्रा न्यासायोच्यन्त उत्तमाः ॥ जीवभूतं मकारं तु देवस्य व्यापकं न्यसेत् ॥ १६ ॥ प्राणतत्त्वं भकारं तु जीवोपाधिगतं न्यसेत् ॥ हृदयस्थं बकारं तु बुद्धितत्त्वं न्यसेद्बुधः ॥ १७ ॥ फकारमपि तत्रैवं अहङ्कारमयं न्यसेत् ॥ मनस्तत्त्वं पकारं तु न्यसेत्सङ्कल्पसम्भवम् ॥१८॥ शब्दतन्मात्रतत्त्वं तु नकारं मस्तके न्यसेत् ॥ स्पर्शात्मकं धकारं तु वक्त्रदेशे तु विन्यसेत् ॥ १९ ॥ दकारं रूपतत्त्वं तु हृद्देशे विनिवेशयेत् ॥ थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत ॥ २० ॥ तकारं गन्धतन्मात्रं जङ्घयोर्विनिवेशयेत् ॥ णकारं श्रोत्रयोर्न्यस्य ढकारं विन्यसे-

त्त्वचि ॥ २१ ॥ डकारं नेत्रयुग्मे तु रसनायां ठकारकम् ॥ टकारं नासिकायां तु ञकारं वाचि विन्यसेत् ॥ २२ ॥ झकारं कर्ण्यो-
र्न्यस्य पाणितत्त्वं विचक्षणः ॥ जकारं पादयोर्न्यस्य छं पायौ चमुपस्थके ॥ २३ ॥ विन्यसेत्पृथिवीतत्त्वं ङकारं पादयुग्मके ॥
वस्तौ घकारं गंतत्त्वं तेजसं हृदि विन्यसेत् ॥ २४ ॥ खकारं वायुतत्त्वं च नासिकायां निवेशयेत् ॥ ककारं विन्यसेन्नित्यं खतत्त्वं
मस्तके बुधः ॥ २५ ॥ हृत्पुण्डरीके विन्यस्य यकारं सूर्य्यदैवतम् ॥ द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ॥ २६ ॥ कला-
षोडशसंयुक्तं सकारं तत्र विन्यसेत् ॥ तन्मध्ये चिन्तयेन्मन्त्री विन्दुवह्नेस्तु मण्डलम् ॥२७॥ हकारं विन्यसेत्तत्र प्रणवेन सुरोत्तम ॥
ओं आं परमेष्ठ्यात्मने आं नमः पुरुषात्मने ॥ २८ ॥ ओं वां नमो निवृत्त्यात्मने नां च विश्वात्मने नमः ॥ ओं वं नमः सर्वात्मने
इत्युक्ताः पञ्च शक्तयः ॥ २९ ॥ स्थाने तु प्रथमा योज्या द्वितीया आसने मता ॥ तृतीया शयने तद्वच्चतुर्थी यानकर्म्मणि ॥३०॥
प्रत्यर्च्चायां पञ्चमी स्यात्पञ्चोपनिषदः स्मृताः ॥ हुंकारं विन्यसेन्मध्ये ध्यात्वा मन्त्रमयं हरिम् ॥ ३१ ॥ यां मूर्त्तिं स्थापयेत्तस्या
मूलमन्त्रं न्यसेत्ततः ॥ ओं नमो भगवते वासुदेवाय मूलकम् ॥ ३२ ॥ शिरोघ्राणललाटेषु मुखे कण्ठे हृदे क्रमात् ॥ भुजयोर्ज-
ङ्घयोरङ्घ्र्योः केशवं शिरसि न्यसेत् ॥ ३३ ॥ नारायणं न्यसेद्वक्त्रे ग्रीवायां माधवं न्यसेत् ॥ गोविन्दं भुजयोर्न्यस्य विष्णुं च हृदये
न्यसेत् ॥ ३४ ॥ मधुसूदनकं पृष्ठे वामनं जठरे न्यसेत् ॥ कट्यां त्रिविक्रमं न्यस्य जङ्घायां श्रीधरं न्यसेत् ॥ ३५ ॥ हृषीकेशं दक्षि-
णायां पद्मनाभं तु गुल्फके ॥ दामोदरं पादयोश्च हृदयादि षडङ्गकम् ॥ ३६ ॥ एतत्साधारणं प्रोक्तमादिमूर्त्तेस्तु सत्तम ॥ अथवा
यस्य देवस्य प्रारब्धं स्थापनं भवेत् ॥ ३७ ॥ तस्यैव मूलमन्त्रेण सजीवकरणं भवेत् ॥ यस्या मूर्त्तेस्तु यन्नाम तस्याद्यं चाक्षरं च
यत् ॥ ३८ ॥ तत्स्वरैर्द्वादशैर्भेद्य ह्यङ्गानि परिकल्पयेत् ॥ हृदयादीनि देवेश मूलं च दशमाक्षरम् ॥ ३९ ॥ यथा देवे तथा देहे
तत्त्वानि विनियोजयेत् ॥ चक्राब्जमण्डले विष्णुं यजेद्बन्धादिना तथा ॥ ४० ॥ पूर्ववच्चासनं ध्यायेत्सगात्रं सपरिच्छदम् ॥
शुभं चक्रं द्वादशारं ह्युपरिष्टाद्विचिन्तयेत् ॥ ४१ ॥ त्रिनाभि चक्रं द्विनेमि स्वरैस्तच्च समन्वितम् ॥ पृष्ठदेशे ततः प्राज्ञः प्रकृत्या-
दीन्निवेशयेत् ॥ ४२ ॥ पूजयेदारकाग्रेषु सूर्यं द्वादशधा पुनः ॥ कलाषोडशसंयुक्तं सोमं तत्र विचिन्तयेत् ॥ ४३ ॥ सकलं त्रितये

नाभौ चिन्तयेद्देशिकोत्तमः ॥ पद्मं च द्वादशदलं पद्ममध्ये विचिन्तयेत् ॥ ४४ ॥ तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य च देशिकः ॥
प्रतिमायां हरिं न्यस्य तत्र तं पूजयेत्सुरान् ॥ ४५ ॥ गन्धपुष्पादिभिः सम्यक् साङ्गं सावरणं क्रमात् ॥ द्वादशाक्षरबीजैस्तु
केशवादीन्समर्च्चयेत् ॥ ४६ ॥ द्वादशारे मण्डले तु लोकपालादिकं क्रमात् ॥ प्रतिमामर्च्चयेत्पश्चाद्गन्धपुष्पादिभिर्द्विजः ॥ ४७ ॥
पौरुषेण तु सूक्तेन श्रियाः सूक्तेन पिण्डिकाम् ॥ जननादिक्रमात्पश्चाज्जनयेद्वैष्णवानलम् ॥ ४८ ॥ हुत्वाग्निं वैष्णवैर्मन्त्रैः कुर्य्या-
च्छान्त्युदकं बुधः ॥ तत्सिक्त्वा प्रतिमामूर्ध्नि वह्निप्रणयनं चरेत् ॥ ४९ ॥ दक्षिणेऽग्निं हुतमिति कुण्डेऽग्निं प्रणयेद्बुधः ॥ अग्निं-
मग्नीति पूर्वे तु कुण्डेऽग्निं प्रणयेद्बुधः ॥ ५० ॥ उत्तरे प्रणयेदग्निमग्निमग्नी हवामहे ॥ अग्निप्रणयने मन्त्रस्त्वमग्ने ह्यग्निरुच्यते
॥ ५१ ॥ पलाशसमिधां तत्र अष्टोत्तरसहस्रकम् ॥ कुण्डे कुण्डे होमयेच्च व्रीहीन्वेदादिकैस्तथा ॥ ५२ ॥ प्राज्यांस्तिलान्व्याह-
तिभिर्मूलमन्त्रेण वै घृतम् ॥ कुर्य्यात्ततः शान्तिहोमं मधुरत्रितयेन च ॥ ५३ ॥ द्वादशार्णैः स्पृशेत्पादौ नाभिं हृन्मस्तकं ततः ॥
घृतं दधि पयो हुत्वा स्पृशेन्मूर्द्धन्यथो बुधः ॥ ५४ ॥ स्पृष्ट्वा शिरोनाभिपादांश्चतस्रः स्थापयेन्नदीः ॥ गङ्गा च यमुना गोदा
क्रमान्नाम्ना सरस्वती ॥ ५५ ॥ दुहेत्तु विष्णुगायत्र्या गायत्र्या श्रपयेच्चरुम् ॥ होमयेच्च बलिं दद्यादुत्तरे भोजयेद्द्विजान्
॥ ५६ ॥ सामाधिपानां तुष्ट्यर्थं हेम गां गुरवे ददेत् ॥ दिक्पतिभ्यो बलिं दत्त्वा रात्रौ कुर्य्याच्च जागरम् ॥ ब्रह्मगीतादिशब्देन
सर्वभागधिवासनात् ॥ ५७ ॥ इत्यादिमहापुराणे आग्नेयेऽधिवासनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ अथ वासुदेव-
प्रतिष्ठादिविधिः ॥ श्रीभगवानुवाच ॥ पिण्डिकास्थापनार्थं तु गर्भागारं तु सप्तधा ॥ विभजेद्ब्रह्मभागे तु प्रतिमां स्थापयेद्बुधः
॥ १ ॥ देवमानुषपैशाचभागेषु न कदाचन ॥ ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य चाण्डज ॥ २ ॥ देवमानुषभागाभ्यां
स्थाप्या यत्नात्तु पिण्डिका ॥ नपुंसकशिलायां तु रत्नन्यासं समाचरेत् ॥ ३ ॥ नारसिंहेन हुत्वाथ रत्नन्यासं च तेन वै ॥ व्रीही-
त्रत्नानि धातूंश्च लोहादींश्चन्दनादिकान् ॥ ४ ॥ पूर्वादिनवगर्त्तेषु न्यसेन्मध्ये यथारुचि ॥ अथ चेन्द्रादिमन्त्रैश्च गर्त्तां गुग्गुलु-
नावृतः ॥ ५ ॥ रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः ॥ सशलाकैर्दर्भपुञ्जैः सहदेवैः समन्वितैः ॥ ६ ॥ सबाह्यान्तेश्च संस्कृत्य

पञ्चगव्येन शोधयेत् ॥ प्रोक्षयेदर्भतोयेन नदीतीर्थोदकेन च ॥ ७ ॥ होमार्थं स्थण्डिलं कुर्य्यात्सिकताभिः समन्ततः ॥ सार्द्धहस्तप्रमाणं तु चतुरस्रं सुशोभनम् ॥ ८ ॥ अष्टदिक्षु यथान्यासं कलशानपि विन्यसेत् ॥ पूर्वाद्यानष्टवर्णेन अग्निमानीय संस्कृतम् ॥ ९ ॥ त्वमग्नेद्युभिरिति च गायत्र्या समिधो हुनेत् ॥ अष्टार्णेनाष्टशतकमाज्यं पूर्णं प्रदापयेत् ॥ १० ॥ शान्त्युदकमाम्रपत्रैर्मूलेन शतमन्त्रितम् ॥ सिञ्चेद्देवस्य तन्मूर्ध्नि श्रीश्चते ह्यनया ऋचा ॥ ११ ॥ ब्रह्मयानेन चोद्धृत्य उत्तिष्ठ ब्रह्मणस्पते ॥ तद्विष्णोरितिमंत्रेण प्रासादाभिमुखं नयेत् ॥ १२ ॥ शिबिकायां हरिं स्थाप्य भ्रामयति पुरादिकम् ॥ गीतवेदादिशब्दैश्च प्रासादद्वारि धारयेत् ॥ १३ ॥ स्त्रीभिर्विप्रैर्मंगलाष्टघटैः संस्नापयेद्धरिम् ॥ ततो गन्धादिनाभ्यर्च्य मूलमन्त्रेण देशिकः ॥ १४ ॥ अतो देवेति वस्त्राद्यमष्टांगार्घ्यं निवेद्य च ॥ स्थिरो लग्ने पिण्डिकायां देवस्य त्वेति धारयेत् ॥ १५ ॥ ॐ त्रैलोक्यविक्रान्ताय नमस्तेऽस्तु त्रिविक्रम ॥ संस्थाप्य पिण्डिकायां तु स्थिरं कुर्य्याद्विचक्षणः ॥ १६ ॥ ध्रुवा द्यौरिति मन्त्रेण विश्वतश्चक्षुरित्यपि ॥ पञ्चगव्येन संस्नाप्य क्षालय गन्धोदकेन च ॥ १७ ॥ पूजयेत्सकलीकृत्य सांगं सावरणं हरिम् ॥ ध्यायेत्खं तस्य मूर्तिं तु पृथिवी तस्य पीठिका ॥ १८ ॥ कल्पयेद्विग्रहं तस्य तेजसैः परमाणुभिः ॥ जीवमावाहयिष्यामि पञ्चविंशतितत्त्वगम् ॥ १९ ॥ चैतन्यं परमानन्दं जाग्रत्स्वप्नविवर्जितम् ॥ देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् ॥ २० ॥ ब्रह्मादिस्तम्बपर्य्यन्तं हृदयेषु व्यवस्थितम् ॥ हृदयात्प्रतिमाबिम्बे स्थिरो भव परेश्वर ॥ २१ ॥ सजीवं कुरु बिम्बं त्वं सबाह्याभ्यन्तरस्थितः ॥ अंगुष्टमात्रः पुरुषो देहोपाधिषु संस्थितः ॥ २२ ॥ ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकम् ॥ सजीवीकरणं कृत्वा प्रणवेन निबोधयेत् ॥ २३ ॥ सान्निध्यकरणं नाम हृदयं स्पृश्य वै जपेत् ॥ सूक्तं तु पौरुषं ध्यायन्निदं गुह्यमनुं जपेत् ॥ २४ ॥ नमस्तेऽस्तु सुरेशाय सन्तोषविभवात्मने ॥ ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुयायिने ॥ २५ ॥ गुणातिक्रान्तदेशाय पुरुषाय महात्मने ॥ अक्षयाय पुराणाय विष्णो सन्निहितो भव ॥ २६ ॥ यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः ॥ तत्सर्वमेकतो लीनमस्मिन्देहे विबुध्यताम् ॥ २७ ॥ आत्मानं सन्निधीकृत्य ब्रह्मादिपरिवारकान् ॥ स्वनाम्ना स्थापयेदन्यानायुधादीन्स्वमुद्रया ॥ २८ ॥ यात्रावर्षादिकं दृष्ट्वा ज्ञेयः संनिहितो

हरिः ॥ नत्वा स्तुत्वा स्तवाद्यैश्च जप्त्वा चाष्टाक्षरादिकम् ॥ २९ ॥ चण्डप्रचण्डौ द्वारस्थौ निर्गत्याभ्यर्चयेद्गुरुः ॥ अथ मण्डप-
मासाद्य गरुडं स्थाप्य पूजयेत् ॥ ३० ॥ दिगीशान्दिशि देवांश्च स्थाप्य सम्पूज्य देशिकः ॥ विष्वक्सेनं तु संस्थाप्य शङ्खचक्रादि
पूजयेत् ॥ ३१ ॥ सर्वपार्षदकेभ्यश्च बलिं भूतेभ्य अर्पयेत् ॥ ग्रामवस्त्रसुवर्णादि · गुरवे दक्षिणां ददेत् ॥ ३२ ॥ यागोपयोगि-
द्रव्याद्यमाचार्य्याय नरोऽर्पयेत् ॥ आचार्य्यदक्षिणार्द्धं तु ऋत्विग्भ्यो दक्षिणां ददेत् ॥ ३३ ॥ अन्येभ्यो दक्षिणां दद्याद्भोजयेद्
ब्राह्मणांस्ततः ॥ अवारितान्फलान्दद्याद्यजमानाय वै गुरुः ॥ ३४ ॥ विष्णुं नयेत्प्रतिष्ठाता चात्मना सकलं कुलम् ॥ सर्वेषामेव
देवानामेष साधारणो विधिः ॥ मूलमन्त्राः पृथक् तेषां शेषं कार्य्यं समानकम् ॥ ३५ ॥ इत्यादिमहापुराणे आग्नेये वासु-
देवप्रतिष्ठादिविधिर्नाम षष्टितमोऽध्यायः ॥ ६० ॥ अथ द्वारप्रतिष्ठाध्वजारोहणादिविधिः ॥ श्रीभगवानुवाच ॥ वक्ष्ये चावभृ-
थस्नानं विष्णोर्नत्वेति होमयेत् ॥ एकाशीतिपदे कुम्भान्स्थाप्य संस्थापयेद्धरिम् ॥ १ ॥ पूजयेद्गन्धपुष्पाद्यैर्बालं दत्त्वा गुरुं
यजेत् ॥ द्वारेप्रतिष्ठां वक्ष्यामि द्वाराधो हेम वै ददेत् ॥ २ ॥ अष्टभिः कलशैः स्थाप्य शाखोदुम्बरकौ गुरुः ॥ गन्धादिभिः सम-
भ्यर्च्य मन्त्रैर्वेदादिभिर्गुरुः ॥ ३ ॥ कुण्डषु होमयेद्वह्निं समिल्लाजतिलादिभिः ॥ दत्त्वा शय्यादिकं चाधो दद्यादाधारशक्ति-
कामू ॥ ४ ॥ शाखयोर्विन्यसेन्मूले देवौ चण्डप्रचण्डकौ ॥ ऊर्ध्वोदुम्बरके देवीं लक्ष्मीं सुरगणार्चिताम् ॥ ५ ॥ न्यस्याभ्यर्च्य
यथान्यायं श्रीसूक्तेन चतुर्मुखम् ॥ हुत्वा तु श्रीफलादीनि आचार्यादेस्तु ·दक्षिणाम् ॥ ६ ॥ प्रतिष्ठासिद्धद्वारस्य त्वाचार्यः स्थाप-
येद्धरिम् ॥ प्रासादस्य प्रतिष्ठां तु हृत्प्रतिष्ठेति तां शृणु ॥ ७ ॥ समाप्तौ शुकनासाया वेद्याः प्राग्गर्भमस्तके ॥ सौवर्णं राजतं
कुम्भमथवा शुक्लनिर्मितम् ॥ ८ ॥ अष्टरत्नौषधीधातुबीजलोहान्वितं शुभम् ॥ सवस्त्रं पूरितं : चाद्भिर्मंडले चाधिवासयेत् ॥ ९ ॥
सपल्लवं नृसिंहेन हुत्वा सम्पातसिञ्चितम् ॥ नारायणाख्यतत्त्वेन प्राणभूतं न्यसेत्ततः ॥ १० ॥ वैराजभूतं तं ध्यायेत्प्रासादस्य
सुरेश्वर ॥ ततः पुरुषवत्सर्वं प्रासादं चिन्तयेद्बुधः ॥ ११ ॥ अधो दत्त्वा सुवर्णं तु तद्भद्भूतं घटं न्यसेत् ॥ गुर्वादौ दक्षिणां दद्याद्ब्रा-
ह्मणादेश्च भोजनम् ॥ १२ ॥ ततः पश्चाद्वेदिबन्धं तदूर्ध्वं कण्ठबन्धनम् ॥ कण्ठोपरिष्टात्कर्त्तव्यं विमलामलसारकम् ॥ १३ ॥

तदूर्ध्वं वृकलं कुर्याच्चक्रं चाद्यं सुदर्शनम् ॥ मूर्तिं श्रीवासुदेवस्य ग्रहगुप्तां निवेदयेत् ॥ १४ ॥ कलशं वाथ कुर्वीत तदूर्ध्वं चक्रमुत्तमम् ॥ वेद्याश्च परितः स्थाप्या अष्टौ विघ्नेश्वरास्तव ॥ १५ ॥ चत्वारो वा चतुर्दिक्षु स्थापनीया गरुत्मतः ॥ ध्वजारोहं च वक्ष्यामि येन भूतादि नश्यति ॥ १६ ॥ प्रासादबिम्बद्रव्याणां यावन्तः परमाणवः ॥ तावद्वर्षसहस्राणि तत्कर्त्ता विष्णुलोकभाक् ॥ १७ ॥ कुम्भाण्डवेदिबिम्बानां भ्रमणाद्वायुनानघ ॥ कंठस्यावेष्टनाज्ज्ञेयं फलं कोटिगुणं ध्वजात् ॥ १८ ॥ पताकां प्रकृतिं विद्धि दंडं पुरुषरूपिणम् ॥ प्रासादं वासुदेवस्य मूर्तिभेदं निबोध मे ॥ १९ ॥ धारणाद्वर्णी विद्धि आकारं सुषिरात्मकम् ॥ तेजस्तत्पावकं विद्धि वायुं स्पर्शगतं तथा ॥ २० ॥ पाषाणादिष्वेव जलं पार्थिवं पृथिवीगुणम् ॥ प्रतिशब्दोद्भवं शब्दं स्पर्शं स्यात्कर्कशादिकम् ॥ २१ ॥ शुक्लादिकं भवेद्रूपं रसमन्नादिदर्शनम् ॥ धूपादिगन्धं गंधं तु वाग्भेद्यादिषु संस्थिता ॥ २२ ॥ शुंकनासाश्रिता नासा बाहू तद्वयकौ स्मृतौ ॥ शिरस्त्वंडं निगदितं कलशो मूर्द्धजाः स्मृताः ॥ २३ ॥ कंठं कंठमिति ज्ञेयं स्कन्धो वेदो निगद्यते ॥ पायूपस्थे प्रणाले तु त्वक्सुधा परिकीर्तिता ॥ २४ ॥ मुखं द्वारं भवेदस्य प्रतिमा जीव उच्यते ॥ तच्छक्तिं पिण्डिकां विद्धि प्रकृतिं च तदाकृतिम् ॥ २५ ॥ निश्चलत्वं च गर्भोऽस्या अधिष्ठाता तु केशवः ॥ एवमेष हरिः साक्षात्प्रासादत्वेन संस्थितः ॥ २६ ॥ जङ्घा त्वस्य शिवो ज्ञेयः स्कन्धे धाता व्यवस्थितः ॥ ऊर्ध्वभागे स्थितो विष्णुरेवं तस्य स्थितस्य हि ॥ २७ ॥ प्रासादस्य प्रतिष्ठां तु ध्वजरूपेण मे शृणु ॥ ध्वजं कृत्वा सुरैर्दैत्या जिताः शस्त्रादिचिह्नितम् ॥ २८ ॥ अण्डोर्द्ध कलशं न्यस्य तदूर्ध्वं विन्यसेद्ध्वजम् ॥ बिम्बार्द्धमानं दण्डस्य त्रिभागेनाथ कारयेत् ॥ २९ ॥ अष्टारं द्वादशारं वा मध्ये मूर्तिमतान्वितम् ॥ नारसिंहेन तार्क्ष्येण ध्वजदण्डस्तु निर्व्रणः ॥ ३० ॥ प्रासादस्य तु विस्तारो मान दण्डस्य कीर्तितम् ॥ शिखरार्द्धेन वा कुर्य्यात्तृतीयार्द्धेन वा पुनः ॥ ३१ ॥ द्वारस्य दैर्घ्याद्द्विगुणं दण्डं वा परिकल्पयेत् ॥ ध्वजयष्टिर्देवगृहे ऐशान्यां वायवेऽथवा ॥ ३२ ॥ क्षौमाद्यैश्च ध्वजं कुर्य्याद्विचित्रं वैकवर्णकम् ॥ घण्टाचामरकिङ्किण्या भूषितं पापनाशनम् ॥ ३३ ॥ दण्डाग्राद्धरणिं यावद्धस्तैकं विस्तरेण तु ॥ महाध्वजः सर्वदः स्यात्तुर्य्यांशाद्धीनतोऽर्चिनः ॥ ३४ ॥

ध्वजे चाङ्गेन विज्ञेया पताका मानवर्जिता ॥ विस्तारेण ध्वजः कार्य्यो विंशदङ्गुलसन्निभः ॥ ३५ ॥ अधिवासविधानेन चक्रं दण्डं ध्वजं तथा ॥ देववत्सकलं कृत्वा मण्डपस्नपनादिकम् ॥ ३६ ॥ नेत्रोन्मीलनकं त्यक्त्वा पूर्वोक्तं सर्वमाचरेत् ॥ अधिवासयेच्च विधिना शय्यायां स्थाप्य देशिकः ॥ ३७ ॥ ततः सहस्रशीर्षेति सूक्तं चक्रे न्यसेदधः ॥ तथा सौदर्शनं मन्त्रं मनस्तत्त्वं निवेशयेत् ॥ ३८ ॥ मनोरूपेण तस्यैव सजीवकरणं स्मृतम् ॥ अरेषु मूर्त्तयो न्यस्याः केशवाद्याः सुरोत्तम ॥ ३९ ॥ नाभ्यब्जप्रतिनेमीषु न्यसेत्तत्त्वानि देशिकः ॥ नृसिंहं विश्वरूपं वा अब्जमध्ये निवेशयेत् ॥ ४० ॥ सकलं विन्यसेद्दण्डे सूत्रात्मानं सजीवकम् ॥ निष्कलं परमात्मानं ध्वजे ध्यायन्न्यसेद्धरिम् ॥ ४१ ॥ तच्छक्तिं व्यापिनीं ध्यायेद्वज्ररूपां बलाबलाम् ॥ मण्डपे स्थाप्य चाभ्यर्च्य होमं कुण्डेषु कारयेत् ॥ ४२ ॥ कलशे स्वर्णशकलं न्यस्य रत्नानि पञ्च च ॥ स्थापयेच्चक्रमन्त्रेण स्वर्णचक्रमधस्ततः ॥ ४३ ॥ पारदेन तु संप्लाव्य नेत्रपट्टेन छादयेत् ॥ ततो निवेशयेच्चक्रं तन्मध्ये नृहरिं स्मरेत् ॥ ४४ ॥ ॐ क्ष्रौं नृसिंहाय नमः पूजयेत्स्थापयेद्धरिम् ॥ ततो ध्वजं गृहीत्वा तु यजमानः सबान्धवः ॥ ४५ ॥ दधिभक्तयुते पात्रे ध्वजस्याग्रं निवेशयेत् ॥ ध्रुवाद्येन फडन्तेन ध्वजं मन्त्रेण पूजयेत् ॥ ४६ ॥ शिरस्याधाय तत्पात्रं नारायणमनुस्मरन् ॥ प्रदक्षिणं तु कुर्वीत तुर्य्यमङ्गलनिःस्वनैः ॥ ४७ ॥ ततो निवेशयेद्दण्डं मन्त्रेणाष्टाक्षरेण तु ॥ मुञ्चामि त्वेतिसूक्तेन ध्वजं मुञ्चेद्विचक्षणः ॥ ४८ ॥ पात्रं ध्वजं कुञ्जरादि दद्यादाचार्यके द्विजः ॥ एष साधारणः प्रोक्तो ध्वजस्यारोहणे विधिः ॥ ४९ ॥ यस्य देवस्य यच्चिह्नं तन्मन्त्रेण स्थिरं चरेत् ॥ स्वर्गच्छेद्ध्वजदानात्तु भुवि राजा बली भवेत् ॥ ५० ॥ इत्यादिमहापुराणे आग्नेये द्वारप्रतिष्ठाध्वजारोहणादिविधिर्नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ अथ लक्ष्मीप्रतिष्ठाविधिः ॥ श्रीभगवानुवाच ॥ समुदायेन देवादेः प्रतिष्ठां प्रवदामि ते ॥ लक्ष्म्याः प्रतिष्ठां प्रथमं तथा देवीगणस्य च ॥ १ ॥ पूर्ववत्सकलं कुर्य्यान्मण्डपस्नपनादिकम् ॥ भद्रपीठे श्रियं न्यस्य स्थापयेदष्ट वै घटान् ॥ २ ॥ घृतेनाभ्यज्य मूलेन स्नापयेत्पञ्चगव्यकैः ॥ हिरण्यवर्णां हरिणीं नेत्रे चोन्मीलयोच्छ्रियाः ॥ ३ ॥ ताम्म आवह इत्येवं प्रदद्यान्मधुरत्रयम् ॥ अश्वपूर्णेति पूर्वेण तां कुम्भेनाभिषेचयेत् ॥ ४ ॥

कांसोऽस्मितेति याम्येन पश्चिमेनाभिषेचयेत् ॥ चन्द्रां प्रभासामुच्चार्यादित्यवर्णेति चोत्तरात् ॥ ५ ॥ उपैतु मेति चाग्नेयात्क्षु-
त्पिपासेति नैर्ऋतात् ॥ गन्धद्वारेति वायव्यां मनसः काममाकूतिम् ॥ ६ ॥ ईशानकलशेनैव शिरः सौवर्णकर्दमात् ॥ एकाशी-
तिघटैः स्नानं मन्त्रेणापः सृजन्क्षितिम् ॥ ७ ॥ आर्द्रां पुष्करिणीं गन्धैरार्द्रामित्यादिपुष्पकैः ॥ ताम्म आवह मन्त्रेण य आनन्द
ऋचाखिलम् ॥ ८ ॥ श्रायन्ती येन शय्यायां श्रीसूक्तेन च सन्निधिम् ॥ लक्ष्मीबीजेन चिच्छक्तिं विन्यस्याभ्यर्चयेत्पुनः ॥
॥ ९ ॥ श्रीसूक्तेन मण्डपेऽथ कुण्डेष्वब्जानि होमयेत् ॥ करवीराणि वा हुत्वा सहस्रं शतमेव वा ॥ १० ॥ गृहोपकरणान्ताादि
श्रीसूक्तेनैव चार्पयेत् ॥ ततः प्रासादसंस्कारं सर्वं कृत्वा तु पूर्ववत् ॥ ११ ॥ मन्त्रेण पिण्डिकां कृत्वा प्रतिष्ठानं ततः श्रियः ॥
श्रीसूक्तेन च सान्निध्यं पूर्ववत्प्रत्यृचं जपेत् ॥ १२ ॥ चिच्छक्तिं बोधयित्वा तु मूलात्सान्निध्यकं चरेत् ॥ भूस्वर्णवस्त्रगोऽन्नादि
गुरवे ब्रह्मणेऽर्पयेत् ॥ एवं देव्योऽखिलाः स्थाप्य राज्यस्वर्गादिभाग्भवेत् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये लक्ष्मीस्थापनं
नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ अथ सुदर्शनचक्रादिप्रतिष्ठाकथनम् ॥ श्रीभगवानुवाच ॥ एवं तार्क्ष्यस्य चक्रस्य ब्रह्मणो
नृहरेस्तथा ॥ प्रतिष्ठा विष्णुवत्कार्या स्वस्वमन्त्रेण तां शृणु ॥ १ ॥ सुदर्शन महाचक्र शान्त दुष्टभयङ्कर ॥ छिन्धि छिन्धि भिन्धि
भिन्धि विदारय विदारय ॥ परमन्त्रान्ग्रस ग्रस भक्षय भक्षय भूतान् त्रासय त्रासय हुं फट् सुदर्शनाय नमः ॥ अभ्यर्च्य चक्रं
चानेन रणे दारयते रिपून् ॥ २ ॥ ॐ क्षौं नरसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा ॥ नरसिंहस्य मन्त्रोऽयं पाताला-
ख्यस्य वच्मि ते ॥ ॐ क्षौं नमो भगवते नरसिंहाय प्रदीप्तसूर्यकोटिसहस्रसमतेजसे वज्रनखदंष्ट्रायुधाय स्फुटविकटाविकीर्णके-
सरसटाप्रक्षुभितमहार्णवाम्भोदुन्दुभिनिर्घोषाय सर्वमन्त्रोत्तारणाय एह्येहि भगवन्नरसिंह पुरुष परापर ब्रह्म सत्येन स्फुर स्फुर
विजृम्भ विजृम्भ आक्रम आक्रम गर्ज गर्ज मुञ्च मुञ्च सिंहनादान् विदारय विदारय विद्रावय विद्रावय आविश आविश
सर्वमन्त्ररूपाणि सर्वमन्त्रजातीश्च हन हन छिन्द छिन्द सङ्क्षिप सङ्क्षिप सर सर दारय दारय स्फुट स्फुट स्फोटय स्फोटय ज्वाला-
मालासङ्घातमय सर्वतोऽनन्तज्वालावज्राशनिचक्रेण सर्वपातालान् उत्सादय उत्सादय सर्वतोऽनन्तज्वाल वज्रशरपञ्जरेण

सर्वपातालान् परिवारय परिवारय सर्वपातालासुरवासिनां हृदयान्याकर्षय आकर्षय शीघ्रं दह दह पच पच मथ मथ शोषय शोषय निकृन्तय निकृन्तय तावद्यावन्मे वशमागताः पातालेभ्यः फट् असुरेभ्यः फट् मन्त्ररूपेभ्यः फट् मन्त्रजातिभ्यः फट् संशयान्मां भगवन्नरसिंहरूप विष्णो सर्वापद्भ्यः सर्वमन्त्ररूपेभ्यो रक्ष रक्ष हुं फट् नमो नमस्ते ॥ नरसिंहस्य विद्येयं हरिरूपार्थसिद्धिदा ॥ ३ ॥ त्रैलोक्यमोहनैर्मन्त्रैः स्थाप्यस्त्रैलोक्यमोहनः ॥ गदी दक्षे शान्तिकरो द्विभुजो वा चतुर्भुजः ॥ ४ ॥ वामोर्द्धे कारयेच्चक्रं पाञ्चजन्यमथो ह्यधः ॥ श्रीपुष्टिसंयुतं कुर्य्याद्वलेन सह भद्रया ॥ ५ ॥ प्रासादे स्थापयेद्विष्णुं गृहे वा मण्डपेऽपि वा ॥ वामनं चैव वैकुण्ठं हयास्यमनिरुद्धकम् ॥ ६ ॥ स्थापयेज्जलशय्यास्थं मत्स्यादींश्चावतारकान् ॥ सङ्कर्षणं विश्वरूपं लिङ्गं वै रुद्रमूर्तिकम् ॥ ७ ॥ अर्द्धनारीश्वरं तद्वद्धरिशङ्करमातृकाः ॥ भैरवं च तथा सूर्यं ग्रहांस्तद्वद्विनायकम् ॥ ८ ॥ गौरीमिन्द्रादिभिः सेव्यां चित्रजां च बलाबलाम् ॥ पुस्तकानां प्रतिष्ठां च वक्ष्ये लिखनताद्विधिम् ॥ ९ ॥ स्वस्तिके मण्डलेऽभ्यर्च्य शरपत्रासने स्थिरम् ॥ लेख्यं च लिखितं पुस्तं गुरुर्विद्यां हरिं यजेत् ॥ १० ॥ यजमानो गुरुं विद्यां हरिं लिपिकृतं नरम् ॥ प्राङ्मुखः पश्चिमां ध्यायेल्लिखित्वा श्लोकपञ्चकम् ॥ ११ ॥ रौप्यस्थमघ्या हैम्या च लेखन्या नागराक्षरम् ॥ ब्राह्मणान्भोजयेच्छक्त्या शक्त्या दद्याच्च दक्षिणाम् ॥ १२ ॥ गुरुं विद्यां हरिं प्रार्च्य पुराणादि लिखेन्नरः ॥ पूर्ववन्मण्डलाद्यैश्च ऐशान्यां भद्रपीठके ॥ १३ ॥ दर्पणे पुस्तकं दृष्ट्वा सेचयेत्पूर्ववद्घटे ॥ नेत्रोन्मीलनकं कृत्वा शय्यायां तु न्यसेन्नरः ॥ १४ ॥ न्यसेत्तु पौरुषं सूक्तं वेदाद्यं तत्र पुस्तके ॥ कृत्वा सजीवीकरणं प्रार्च्य हुत्वा चरुं ततः ॥ १५ ॥ सम्प्रार्च्य दक्षिणाभिस्तु गुर्वादीन्भोजयेद्द्विजान् ॥ रथेन हस्तिना वापि भ्रामयेत्पुस्तकं नरैः ॥ १६ ॥ गृहे देवालयादौ तु पुस्तकं स्थाप्य पूजयेत् ॥ वस्त्रादिवेष्टितं पाठादादावन्ते समर्च्चयेत् ॥ १७ ॥ जगच्छान्तिं चावधार्य्य पुस्तकं वाचयेन्नरः ॥ अध्यायमेकं कुम्भाद्यैर्यजमानादि सेचयेत् ॥ १८ ॥ द्विजाय पुस्तकं दत्त्वा फलस्यान्तो न विद्यते ॥ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ॥ १९ ॥ विद्यादानफलं दत्त्वा मध्याक्तं पत्रसञ्चयम् ॥ यावत्तु पत्रसंख्यानमक्षराणां तथाऽनघ ॥ २० ॥ तावद्वर्षसहस्राणि विष्णुलोके

महीयते ॥ पञ्चरात्रं पुराणादि भारतादि ददन्नरः ॥ कुलैकविंशमुद्धृत्य परे तत्त्वे तु लीयते ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये देवादिप्रतिष्ठाकथनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ अथ कूपादिप्रतिष्ठाकथनम् ॥ श्रीभगवानुवाच ॥ कूपवापीतडागानां प्रतिष्ठां वच्मि तां शृणु ॥ जलरूपेण हि हरिः सोमो वरुण उत्तमः ॥ १ ॥ अग्नीषोममयं विश्वं विष्णुरापस्तु कारणम् ॥ हेमं रौप्यं रत्नजं वा वरुणं कारयेन्नरः ॥ २ ॥ द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम् ॥ वामेन नागपाशं तु नदीनागादिसंयुतम् ॥ ॥ ३ ॥ यागमण्डपमध्ये स्याद्वेदिका कुण्डमण्डिता ॥ तोरणं वारुणं कुम्भं न्यसेच्च करकान्वितम् ॥ ४ ॥ भद्रके चार्द्धचन्द्रे वा स्वस्तिके द्वारि कुम्भकान् ॥ अग्न्याधानं चाप्यकुण्डे कृत्वा पूर्णां प्रदापयेत् ॥ ५ ॥ वरुणं स्नानपीठे तु ये ते शतेति संस्पृशेत् ॥ घृतेनाभ्यञ्जयेत्पश्चान्मूलमन्त्रेण देशिकः ॥ ६ ॥ शन्नो देवीति प्रक्षाल्य शुद्धवत्या शिवोदकैः ॥ अधिवासयेदष्टकुम्भान्सामुद्रं पूर्वकुम्भके ॥ ७ ॥ गाङ्गेमग्नौ वर्षतोयं दक्षे रक्षस्तु नैर्झरम् ॥ नदीतोयं पश्चिमे तु वायव्ये तु नदोदकम् ॥ ८ ॥ औद्भिज्जं चोत्तरे स्थाप्यमैशान्यां तीर्थसम्भवम् ॥ अलाभे तु नदीतोयं यासां राजेति मन्त्रयेत् ॥ ९ ॥ देवं निर्माज्य निर्मथ्य दुर्मित्रियेति विचक्षणः ॥ नेत्रे चोन्मीलयेच्चित्रं तच्चक्षुर्मधुरत्रयैः ॥ १० ॥ ज्योतिः सम्पूरयेद्धैम्यां गुरवे गामथार्पयेत् ॥ समुद्रज्येष्ठेत्यभिषिञ्चेद्वरुणं पूर्वकुम्भतः ॥ ११ ॥ समुद्रं गच्छ गाङ्गेयात्सोमो धेन्विति वर्षकात् ॥ देवीरापो निर्झराद्रिर्नदाद्रिः पञ्चनद्यतः ॥ १२ ॥ उद्भिदद्म्यश्चोद्भिदेन पावमान्याऽथ तीर्थकैः ॥ आपो हि ष्ठा पञ्चगव्याद्धिरण्यवर्णेति स्वर्णजात् ॥ १३ ॥ आपो अस्मेति वर्षोत्थैर्व्याहृत्या कूपसम्भवैः ॥ वरुणं च तडागोत्थैर्वरुणाद्धिस्तु वश्यतः ॥ १४ ॥ आपो देवीति गिरिजैरेकाशीतिघटैस्ततः ॥ स्नापयेद्वरुणस्येति त्वन्नो वरुण चार्घकम् ॥ १५ ॥ व्याहृत्या मधुपर्कं तु बृहस्पतेति वस्त्रकम् ॥ वरुणेति पवित्रं तु प्रणवेनोत्तरीयकम् ॥ १६ ॥ यद्वारण्येन पुष्पादि प्रदद्याद्वरुणाय तु ॥ चामरं दर्पणं छत्रं व्यजनं वैजयन्तिकाम् ॥ १७ ॥ मूलेनोत्तिष्ठेत्युत्थाप्य तां रात्रिमधिवासयेत् ॥ वरुणं चेति सान्निध्यं यद्वारण्येन पूजयेत् ॥ १८ ॥ सजीवीकरणं मूलात्पुनर्गन्धादिना यजेत् ॥ मण्डपे पूर्ववत्प्रार्च्य कुण्डेषु सामिदादिकम् ॥ १९ ॥ वेदादिमन्त्रैर्गगाद्याश्चतस्रो धेनवो दुहेत् ॥ दिक्ष्वथो वै यवचरुं ततः संस्थाप्य होमयेत् ॥ २० ॥

व्याहृत्या वाथ गायत्र्या मूलेनामन्त्रयेत्तथा ॥ सूर्याय प्रजापतये द्यौः स्वाहा चान्तरिक्षकः ॥ २१ ॥ तस्यै पृथिव्यै देहधृत्यै इह स्वधृतये ततः ॥ इह रत्यै चेह रमत्या उग्रो भीमश्च रौद्रकः ॥ २२ ॥ विष्णुश्च वरुणो धाता रायस्पोषो महेन्द्रकः ॥ अग्निर्यमो नैर्ऋतोऽथ वरुणो वायुरेव च ॥ २३ ॥ कुबेर ईशोऽनन्तोऽथ ब्रह्मा राजा जलेश्वरः ॥ तस्मै स्वाहेदं विष्णुश्च तद्विप्रासेति होमयेत् ॥ २४ ॥ सोमो धेन्विति षड् हुत्वा इमं मेति च होमयेत् ॥ आपोहिष्ठेति तिसृभिरिमा रुद्रेति होमयेत् ॥ २५ ॥ दशादिक्षु बलिं दद्याद्गन्धपुष्पादिनाऽर्चयेत् ॥ प्रतिमां तु समुत्थाप्य मण्डले विन्यसेद्बुधः ॥ २६ ॥ पूजयेद्गन्धपुष्पाद्यैर्हेमपुष्पादिभिः क्रमात् ॥ जलाशयांस्तु दिग्भागे वितस्तिद्वयसम्मितान् ॥ २७ ॥ कृत्वाऽष्टौ स्थण्डिलान्रम्यान्सैकतान्देशिकोत्तमः ॥ वरुणस्येति मन्त्रेण साज्यमष्टशतं ततः ॥ २८ ॥ चरुं यवमयं हुत्वा शान्तितोयं समाचरेत् ॥ सेचयेन्मूर्ध्नि देवं तु सजीवकरणं चरेत् ॥ २९ ॥ ध्यायेत्तु वरुणं युक्तं गौर्या नदनदीगणैः ॥ ओं वरुणाय नमोऽभ्यर्च्य ततः सान्निध्यमाचरेत् ॥ ३० ॥ उत्थाप्य नागपृष्ठाद्यैर्भ्रामयेत्तैः समङ्गलैः ॥ आपोहिष्ठेति च क्षिपेद्विमध्वाक्ते घटे जले ॥ ३१ ॥ जलाशये मध्यगतं सुगुप्तं विनिवेशयेत् ॥ स्नात्वा ध्यायेच्च वरुणं सृष्टिं ब्रह्माण्डसञ्ज्ञिकाम् ॥ ३२ ॥ अग्निबीजेन सन्दग्ध्य तद्भस्म प्लावयेद्धराम् ॥ सर्वमापोमयं लोकं ध्यायेत्तत्र जलेश्वरम् ॥ ३३ ॥ तोयमध्यस्थितं देवं ततो यूपं निवेशयेत् ॥ चतुरस्रमथाष्टास्रं वर्तुलं वा प्रवर्तितम् ॥ ३४ ॥ आराध्य देवतालिङ्गं दशहस्तं तु कूपके ॥ यूपं यज्ञीयवृक्षोत्थं मूले हेमं फलं न्यसेत् ॥ ३५ ॥ वाप्यां पञ्चदशकरे पुष्करिण्यां तु विंशकम् ॥ तडागे पञ्चविंशाख्यं जलमध्ये निवेशयेत् ॥ ३६ ॥ यागमण्डपाङ्गणे वा यूपवस्केति मन्त्रतः ॥ स्थाप्य तद्वेष्टयेद्वस्त्रैर्यूपोपरि पताकिकाम् ॥ ३७ ॥ तदभ्यर्च्य च गन्धाद्यैर्जगच्छान्तिं समाचरेत् ॥ दक्षिणां गुरवे दद्याद्धेनुगोहेमाम्बुपात्रकम् ॥ ३८ ॥ द्विजेभ्यो दक्षिणा देया आगतान्भोजयेत्तथा ॥ आब्रह्मस्तम्बपर्य्यन्ता ये केचित्सलिलार्थिनः ॥ ३९ ॥ ते तृप्तिमुपगच्छन्तु तडागस्थेन वारिणा ॥ तोयमुत्सर्जयेदेवं पञ्चगव्यं विनिक्षिपेत् ॥ ४० ॥ आपोहिष्ठेति तिसृभिः शान्तितोयं द्विजैः कृतम् ॥ तीर्थतोयं क्षिपेत्पुण्यं गोकुलं चार्पयेद्विजान् ॥ ४१ ॥ अनिवारितमन्नाद्यं सर्वजन्यं च कारयेत् ॥ अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ॥ ४२ ॥ एकाहं स्थापये-

त्तोयं तत्पुण्यमयुतायुतम् ॥ विमाने मोदते स्वर्गे नरकं न स गच्छति ॥ ४३ ॥ गवादिः पिबते यस्मात्तस्मात्कर्त्तुर्न पातकम् ॥ तोयदानात्सर्वदानफलं प्राप्य दिवं व्रजेत् ॥ ४४॥ इत्यादिमहापुराणे आग्नेये कूपवापीतडागादिप्रतिष्ठाकथनं नाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ अथ सभादिस्थापनकथनम् ॥ श्रीभगवानुवाच ॥ सभादिस्थापनं वक्ष्ये तथैतेषां प्रवर्त्तनम् ॥ भूमौ परीक्षितायां च वास्तुयागं समाचरेत् ॥ १ ॥ स्वेच्छया तु सभां कृत्वा स्वेच्छया स्थापयेत्सुरान् ॥ चतुष्पथे च ग्रामादौ न शून्ये कारयेत्सभाम् ॥ २ ॥ निर्मलः कुलमुद्धृत्य कर्त्ता स्वर्गे विमोदते ॥ अनेन विधिना कुर्य्यात्सप्तभौमं हरेर्गृहम् ॥ ३ ॥ यथा राज्ञां तथाऽन्येषां पूर्वाद्याश्च ध्वजादयः ॥ कोणभुजान्वर्जयित्वा चतुःशालं तु वर्त्तयेत् ॥ ४ ॥ त्रिशालं वा द्विशालं वा एकशालमथापि वा ॥ व्ययाधिकं न कुर्वीत व्ययदोषकरं हि तत् ॥ ५ ॥ आयाधिके भवेत्पीडा तस्मात्कुर्य्यात्समं द्वयम् ॥ कारराशिं समस्तं तु कुर्य्याद्वसुगुणं गुरुः ॥ ६ ॥ सप्तार्च्चिषा हते भागे गर्गविद्याविचक्षणः ॥ अष्टधा भाजिते तस्मिन्यच्छेषं स व्ययो मतः ॥ ७ ॥ अथवा कारराशिं तु हन्यात्सप्तार्चिषा बुधः ॥ वसुभिः संहते भागे ध्वजादि परिकल्पयेत् ॥ ८ ॥ ध्वजो धूम्रस्तथा सिंहः श्वा वृषस्तु खरो गजः ॥ ध्वांक्षश्चेति क्रमेणैवमायाष्टकमुदाहृतम् ॥ ९ ॥ त्रिशालकत्रयं शस्तमुदक्पूर्वविवर्जितम् ॥ याम्यां परगृहोपेतं द्विशालं लभ्यते सदा ॥१० ॥ याम्ये शालैकशालं तु प्रत्यक्शालमथापि वा ॥ एकशालद्वयं शस्तं शेषास्त्वन्ये भयावहाः ॥ ११॥ चतुःशालं सदा शस्तं सर्व्वदोषविवर्जितम् ॥ एकभौमादि कुर्वीत भवनं सप्तभौमकम् ॥ १२ ॥ द्वारवेद्यादिरहितं पूरणेन विवर्जितम् ॥ देवगृहं देवतायाः प्रतिष्ठाविधिना सदा ॥ १३ ॥ संस्थाप्य मनुजानां च समुदायोक्तकर्मणा ॥ प्रातः सर्वौषधीस्नानं कृत्वा शुचिरतन्द्रितः ॥ १४ ॥ मधुरैस्तु द्विजान्भोज्य पूर्णकुम्भादिशोभितम् ॥ सतोरणं स्वस्ति वाच्य द्विजान्गोपृष्ठहस्तकः ॥ १५ ॥ गृही गृहं प्रविशेच्च देवज्ञान्प्रार्च्य संविशेत् ॥ गृहे पुष्टिकरं मन्त्रं पठेच्चेमं समाहितः ॥ १६ ॥ ओं वन्दे नन्दय वासिष्ठे वसुभिः प्रजया सह ॥ जये भार्गवदायादे प्रजानां विजयावहे ॥ १७ ॥ पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् ॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ॥ १८ ॥ सर्वबीजौषधीयुक्तं सर्वरत्नौषधीवृते ॥ रुचिरे नन्दने नन्दे वासिष्ठे रम्यता-

मिह ॥ १९ ॥ प्रजापतिसुते देवि चतुरस्रे महीयसि ॥ सुभगे सुव्रते देवि गृहे काश्यपि रम्यताम् ॥ २० ॥ पूजिते परमाचार्यैर्गन्धमाल्यैरलंकृते ॥ भवभूतिकरे देवि गृहे भार्गवि रम्यताम् ॥ २१ ॥ अव्यक्ते व्याकृते पूर्णे मुनेरङ्गिरसः सुते ॥ इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् ॥ २२ ॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥ मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये सभागृहस्थापनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ अथ साधारणप्रतिष्ठाविधानम् ॥ श्रीभगवानुवाच ॥ समुदायप्रतिष्ठां च वक्ष्ये सा वासुदेववत् ॥ आदित्या वसवो रुद्राः साध्या विश्वेऽश्विनौ तथा ॥ १ ॥ ऋषयश्च तथा सर्वे वक्ष्ये तेषां विशेषकम् ॥ यस्य देवस्य यन्नाम तस्याद्यं गृह्य चाक्षरम् ॥ २ ॥ मात्राभिर्भेदयित्वा तु दीर्घाण्यङ्गानि भेदयेत ॥ प्रथमं कल्पयेद्बीजं सबिन्दुं प्रणवं नतिम् ॥ ३ ॥ सर्वेषां मूलमन्त्रेण पूजनं स्थापनं तथा ॥ नियमव्रतकृच्छ्राणां मठसङ्क्रमवेश्मनाम् ॥ ४ ॥ मासोपवासद्वादश्यामित्यादिस्थापनं वदे ॥ शिलां पूर्णघटं कांस्यं सम्भारं स्थापयेत्ततः ॥ ५ ॥ ब्रह्मकूर्चं समाहृत्य श्रपेद्यवमयं चरुम् ॥ क्षीरेण कपिलायास्तु तद्विष्णोरिति साधकः ॥ ६ ॥ प्रणवेनाभिघार्यैव दर्व्या सङ्घट्टयेत्ततः ॥ साधयित्वाऽवताय्यार्थ विष्णुमभ्यर्च्य होमयेत् ॥ ७ ॥ व्याहृत्या चैव गायत्र्या तद्विप्रासेति होमयेत् ॥ विश्वतश्चक्षुर्वेदाद्यैर्भूरग्नये तथैव च ॥ ८ ॥ सूर्य्याय प्रजापतये अन्तरिक्षाय होमयेत् ॥ द्यौः स्वाहा ब्रह्मणे स्वाहा पृथिवी महाराजकः ॥ ९ ॥ तस्मै सामं च राजानमिन्द्राद्यैर्होममाचरेत् ॥ एवं हुत्वा चरोर्भागान्दद्यादिग्बलिमादरात् ॥ १० ॥ समिधोऽष्टशतं हुत्वा पालाशांश्चाज्यहोमकम् ॥ कुर्य्यात्पुरुषसूक्तेन इरावती तिलाष्टकम् ॥ ११ ॥ हुत्वा तु ब्रह्मविष्ण्वीशदेवानामनुयायिनाम् ॥ ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः ॥ १२ ॥ पर्वतानां नदीनां च समुद्राणां तथाऽऽहुतीः ॥ हुत्वा च व्याहृतीर्दद्यात्स्रुवपूर्णाहुतित्रयम् ॥ १३ ॥ वौषडन्तेन मन्त्रेण वैष्णवेन पितामह ॥ पञ्चगव्यं चरुं प्राश्य दत्त्वाऽचार्य्याय दक्षिणाम् ॥ १४ ॥ तिलपात्रं हेमयुक्तं सवस्त्रं गामलंकृताम् ॥ प्रीयतां भगवान्विष्णुरित्युत्सृजेद्व्रतं बुधः ॥ १५ ॥ मासोपवासादेरन्यां प्रतिष्ठां वच्मि पूर्वतः ॥ यज्ञेनाऽऽतोष्य देवेशं श्रपयेद्वैष्णवं चरुम् ॥ १६ ॥ तिलतण्डुलनीवारैः श्यामाकैरथवा यवैः ॥ आज्येनाघार्य चोताऱ्य होमयेन्मूर्तिमन्त्रकैः ॥ १७ ॥

विष्ण्वादीनां मासपानां तदन्ते होमयेत्पुनः ॥ ओं श्रीविष्णवे स्वाहा ॥ ओं विष्णवे सिभूषणाय स्वाहा ॥ ओं विष्णवे शिपिविष्टाय स्वाहा ॥ ओं नरसिंहाय स्वाहा ॥ ओं पुरुषोत्तमाय स्वाहा ॥ द्वादशाश्वत्थसमिधो होमयेद्घृतसंप्लुताः ॥ १८ ॥ विष्णोरराटमन्त्रेण ततो द्वादश चाहुतीः ॥ इदं विष्णुरिरावती चरोर्द्वादश चाहुतीः ॥ १९ ॥ हुत्वा चाज्याहुतीस्तद्वत्ताद्विप्रामेनि होमयेत् ॥ शेषहोमं ततः कृत्वा दद्यात्पूर्णाहुतित्रयम् ॥ २० ॥ युञ्जते त्वनुवाकं तु जप्त्वा प्रांश्रीत्त वै चरुम् ॥ प्रणवेन स्वशब्दान्ते कृत्वा पात्रे तु पैप्पले ॥ २१ ॥ ततो मासाधिपानां तु विप्रान्द्वादश भोजयेत् ॥ त्रयोदशो गुरुस्त्र नेभ्यो दद्यात्त्रयोदश ॥ २२ ॥ कुम्भान्स्वाद्वम्बुसंयुक्तान्सच्छत्रोपानहान्वितान् ॥ सवस्त्रहेममाल्याढ्यान्त्रतपूर्त्यै त्रयोदश ॥ २३ ॥ गावः प्रीतिसमायान्तु प्रचरन्तु प्रहर्षिताः ॥ इति गोपथमुत्सृज्य यूपं तत्र निवेशयेत् ॥ २४ ॥ दशहस्तं प्रपाऽऽरामठसंक्रमणादिषु ॥ गृहे चं होममेवं तु कृत्वा सर्वं यथाविधि ॥ २५ ॥ पूर्वोक्तेन विधानेन प्रविशेच्च गृहं गही ॥ अनिवारितमन्नाद्यं सर्वेभ्येनेषु कारयेत् ॥ २६ ॥ द्विजेभ्यो दक्षिणा देया यथाशक्ति विचक्षणैः ॥ आरामं कारयेद्यस्तु नन्दने स चिरं वसेत् ॥ २७ ॥ मठप्रदानात्स्वलोंके शक्रलोके वसेत्ततः ॥ प्रपादानाद्वारुणेन संक्रमेण वसेद्दिवि ॥ २८ ॥ इष्टकासेतुकारी च गोलोके मार्गकृद्व्रजाम् ॥ नियमव्रतकृद्विष्णुः कृच्छ्रकृत्सर्वपापहा ॥ २९ ॥ गृहं दत्त्वा वसेत्स्वर्गे यावदाभूतसंप्लवम् ॥ समुदायप्रतिष्ठेष्टा शिवादीनां गृहात्मनाम् ॥ ३० ॥ इत्यादिमहापुराणे आग्नेये साधारणप्रतिष्ठाकथनं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ अथ जीर्णोद्धारविधानम् ॥ श्रीभगवानुवाच ॥ जीर्णोद्धारविधिं वक्ष्ये भूषितां स्नपयेद्गुरुः ॥ अचलां विन्यसेद्देहे अतिजीर्णां परित्यजेत् ॥ १ ॥ व्यङ्गां भग्नां च च शैलाढ्यां न्यसेदन्यां च पूर्ववत् ॥ संहारविधिना तत्र तत्त्वान्संहृत्य देशिकः ॥ २ ॥ सहस्रं नारसिंहेन हुत्वा तामुद्धरेद्गुरुः ॥ दारवीं दाहयेद्वह्नौ शैलजां प्रक्षिपेज्जले ॥ ३ ॥ धातुजां रत्नजां वापि अगाधे वा जलेऽम्बुधौ ॥ यानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत् ॥ ४ ॥ वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत् ॥ यत्प्रमाणा च यद्द्रव्या तन्मानां स्थापयेदिने ॥ कूपवापीतडागादेर्जीर्णोद्धारे महाफलम् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये जीर्णोद्धारविधानकथनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अथ यात्रोत्सवविधिकथनम् ॥ श्रीभगवानुवाच ॥ वक्ष्ये विधिं चोत्सवस्य स्थापिते तु सुरे चरेत् ॥ तस्मिन्नब्दे चैकरात्रं त्रिरात्रं चाष्टरात्रकम् ॥ १ ॥ उत्सवेन विना यस्मात्स्थापनं निष्फलं भवेत् ॥ अयने विषुवे चापि शयनोपवने गृहे ॥ २ ॥ कारकस्यानुकूले वा यात्रां देवस्य कारयेत् ॥ मङ्गलाङ्कुररोपैस्तु गीतनृत्यादिवाद्यकैः ॥ ३ ॥ शराववाटिकापालीस्त्वङ्कुरारोहणे हिताः ॥ यवाश्छालींस्तिलान्मुद्गान्गोधूमान्सितसर्षपान् ॥ ४ ॥ कुलत्थमाषनिष्पावान्क्षालयित्वा तु वापयेत् ॥ पूर्वादौ च बलिं दद्याद्धरन्दीपैः पुरं निशि ॥५॥ इन्द्रादेः कुमुदादेश्च सर्वभूतेभ्य एव च ॥ अनुगच्छन्ति ते तत्र प्रतिरूपधराः पुनः ॥६॥ पदे पदेऽश्वमेधस्य फलं तेषां न संशयः ॥ आगत्य देवतागारं देवं विज्ञापयेद्गुरुः ॥ ७ ॥ तीर्थयात्रा तु या देव त्वयः कर्त्तव्या सुरोत्तम ॥ तस्यारम्भमनुज्ञातुमर्हसे देव सर्वथा ॥ ८ ॥ देवमेवं तु विज्ञाप्य ततः कर्म्म समारभेत् ॥ प्ररोहघटिकाभ्यां तु वेदिकां भूषितां व्रजेत् ॥ ९ ॥ चतुःस्तम्भां तु तन्मध्ये स्वस्तिके प्रतिमां न्यसेत् ॥ काम्यार्थां लेख्यचित्रेषु स्थाप्य तत्राधिवासयेत् ॥ १० ॥ वैष्णवैः सह कुर्वीत घृताभ्यङ्गं तु मूलतः ॥ घृतधाराभिषेकं वा सकलां शर्वरीं बुधः ॥ ११ ॥ दर्पणं दर्श्य नीराजं गीतवाद्यैश्च मंगलम् ॥ व्यजनं पूजनं दीपं गन्धपुष्पादिभिर्यजेत् ॥ १२ ॥ हरिद्रामुद्गकाश्मीरशुक्लचूर्णादि मूर्द्धनि ॥ प्रतिमायाश्च भक्तानां सर्वतीर्थफलं धृते ॥ १३ ॥ स्नापयित्वा समभ्यर्च्य यात्राबिम्बं रथे स्थितम् ॥ नयेद्गुरुर्वेदीं नादैश्छत्राद्यै राष्ट्रपालिकाम् ॥ १४ ॥ निम्नगा योजनानादर्व्वाक् तत्र वेदीं तु कारयेत ॥ वाहनादवतार्य्यैनां तस्यां वेद्यां निवेशयेत् ॥ १५ ॥ चरुं वै श्रपयेत्तत्र पायसं होमयेत्ततः ॥ अखिलैर्वैदिकैर्मन्त्रैस्तीर्थानावाहयेत्ततः ॥ १६ ॥ आपो हिष्टेपनिषदैः पूजयेदर्घ्यमुख्यकैः ॥ पुनर्देवं समादाय तोये कृत्वाऽवभर्षणम् ॥ १७ ॥ स्नायान्महाजनैर्विप्रैर्वेद्यामुत्तार्य्य तं न्यसेत् ॥ पूजयित्वा तदह्ना च प्रासादं तु नयेत्ततः ॥ पूजयेत्परिवारस्थं तु गुरुः स्याद्भुक्तिमुक्तिकृत् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये देवयात्रोत्सवकथनं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ अथ स्नानविधानम् ॥ अग्निरुवाच ॥ ब्रह्मन् शृणु प्रवक्ष्यामि स्नपनोत्सवविस्तरम् ॥ प्रासादस्याग्रतः कुंभान्मण्डपे मण्डले न्यसेत् ॥ १ ॥ कुर्याद्धचानार्चनं होमं हरेरादौ च कर्मसु ॥ सहस्रं वा शतं वापि होमयेत्पूर्णया सह ॥ २ ॥ स्नानद्रव्याण्यथाहृत्य कलशांश्चापि

विन्यसेत् ॥ अधिवास्य सूत्रकण्ठान्धारयेन्मण्डले घटान् ॥ ३ ॥ चतुरस्रं पुरं कृत्वा रुद्रैस्तं प्रविभाजयेत् ॥ मध्येन तु चरुं स्थाप्य पार्श्वे पंक्तिं प्रमार्जयेत् ॥ ४ ॥ शालिचूर्णादिनापूर्य पूर्वादिनवकेषु च ॥ कुंभमुद्रां ततो बद्ध्वा घटं तत्रानयेद्बुधः ॥ ५ ॥ पुण्डरीकाक्षमंत्रेण दर्भास्तांस्तु विसर्जयेत् ॥ अद्भिः पूर्णं सर्वरत्नयुक्तं मध्ये न्यसेद्घटम् ॥ ६ ॥ यवव्रीहितिलांश्चैव नीवारश्यामकान् क्रमात् ॥ कुलित्थमुद्गसिद्धार्थान्मुन्काऽन्यानष्टदिक्षु च ॥ ७ ॥ ऐन्द्रे तु नवके मध्ये घृतपूर्णं घटं न्यसेत् ॥ पलाशाश्वत्थन्यग्रोध-बिल्वोदुंबरक्षीरिणाम् ॥ ८ ॥ जंबूशमीकपित्थानां त्वक्कषायैर्वटाष्टकम् ॥ आग्नेयनवके मध्ये मधुपूर्णं घटं न्यसेत् ॥ ९॥ गोशृङ्ग-नगगङ्गाम्बुगजेन्द्रदर्शनेषु च ॥ तीर्थक्षेत्रखलेष्वष्टौ मृत्तिकाः स्युर्वटाष्टके ॥ १० ॥ याम्ये तु नवके मध्ये तिलतैलघटं न्यसेत् ॥ नारङ्गमथ जम्बीरं खर्जूरं मृद्विकां क्रमात् ॥ ११ ॥ नारिकेलं न्यसेत्पूगं दाडिमं पनसं फलम् ॥ नैर्ऋते नवके मध्ये क्षीरपूर्णं घटं न्यसेत् ॥ १२ ॥ कुंकुमं नागपुष्पं च चंपकं मालतीं क्रमात् ॥ मल्लिकामथ पुन्नागं करवीरं महोत्पलम् ॥ १३॥ पुष्पाणि चान्ये नवके मध्ये वै नारिकेलकम् ॥ नादेयमथ सामुद्रं सारसं कोपमेव च ॥ १४॥ वर्षजं हिमतोयं च नैर्झरं गाङ्गमेव च ॥ उदकान्यथ वायव्ये नवके कदलीफलम् ॥ १५॥ सहदेवीं कुमारीं च सिंहीं व्याघ्रीं तथाऽमृताम् ॥ विष्णुपर्णीं शतशिवां वचां दिव्यौषधीर्न्यसेत् ॥ १६॥ पूर्वादौ सौम्यनवके मध्ये दधिघटं न्यसेत् ॥ पत्रमेलां त्वचं कुष्ठं बालकं चन्दनद्वयम् ॥ १७॥ लतां कस्तूरिकां चैव कृष्णागरुमनु-क्रमात्॥सिद्धद्रव्याणि पूर्वादौ शान्तितोयमथैकतः॥ १८॥चन्द्रतारं क्रमाच्छुक्लं गिरिसारं त्रपुं न्यसेत् ॥ घनसारं तथा शीर्षे पूर्वादौ रत्नमेव च ॥ १९॥ घृतेनाभ्यज्य चोद्वर्त्य स्नपयेन्मूलमन्त्रतः ॥ गन्धाद्यैः पूजयेद्ब्रह्मौ हुत्वा पूर्णाहुतिं चरेत् ॥ २०॥ बलिं च सर्वभू-तेभ्यो भोजयेद्दत्तदक्षिणः ॥ देवैश्च मुनिभिर्भूपैर्देवं संस्थाप्य चेश्वराः ॥ २१॥ बभूवुः स्थापयित्वेत्थं स्नपनोत्सवकं चरेत् ॥ अष्टोत-रसहस्रेण घटानां सर्वभाग्भवेत् ॥ २२ ॥ यज्ञावभृथस्नानेन पूर्णसंस्नापनं कृतम् ॥ गौरीलक्ष्मीविवाहादि चोत्सवं स्नानपूर्व-कम् ॥ २३॥ इत्यादिमहापुराणे आग्नेये यज्ञावभृथस्नानं नामैकोनसप्ततितमोऽध्यायः॥ ६९॥ अथ वृक्षादिप्रतिष्ठाकथनम् ॥ श्रीभग-वानुवाच ॥ प्रतिष्ठां पादपानां च वक्ष्येऽहं भुक्तिमुक्तिदाम् ॥ सर्वौषध्युदकैर्लिप्तान्पिष्टातकविभूषितान् ॥ १ ॥ वृक्षान्माल्यैरलङ्कृत्य

वासोभिरभिवेष्टयेत् ॥ सूच्या सौवर्णया कार्य्यं सर्वेषां कर्णवेधनम् ॥२॥ हेमशलाकयाऽञ्जनं च वेद्यां तु फलसप्तकम् ॥ अधिवासयेच्च प्रत्येकं घटान्बलिनिवेदनम् ॥३॥ इन्द्रादेरधिवासोऽथ होमः कार्य्यो वनस्पतेः ॥ वृक्षमध्यादुत्सृजेद्वां ततोऽभिषेकमंत्रतः ॥४॥ ऋग्यजुःसाममन्त्रैश्च वारुणैर्मंगलारवैः ॥ वृक्षवेदिककुम्भैश्च स्नपनं द्विजपुंगवाः ॥५॥ तरूणां यजमानस्य कुर्युश्च यजमानकः॥ भूषितो दक्षिणां दद्याद्गोभूभूषणवस्त्रकम् ॥ ६ ॥ क्षीरेण भोजनं दद्याद्यावद्दिनचतुष्टयम् ॥ होमस्तिलाद्यैः कार्य्यस्तु पलाशसमिधैस्तथा ॥ ७ ॥ आचार्य्यं द्विगुणं दद्यात्पूर्ववन्मण्डपादिकम् ॥ पापनाशः परा सिद्धिर्वृक्षारामप्रतिष्ठया ॥८॥ स्कन्दायेशो यथा प्राह प्रतिष्ठाद्यं तथा शृणु ॥ सूर्य्येशगणशक्त्यादेः परिवारस्य वै हरेः ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये पादपारामप्रतिष्ठाकथनं नाम सप्ततितमोऽध्यायः ॥ ७० ॥ अथ गणेशपूजाविधिः ॥ ईश्वर उवाच ॥ गणपूजां प्रवक्ष्यामि निर्विघ्नमखिलार्थदाम् ॥ गणाय स्वाहा हृदयमेकदंष्ट्राय वै शिरः ॥ १ ॥ गजकर्णिने च शिखा गजवक्त्राय वर्म च ॥ महोदराय स्वदन्तहस्तायाक्षि तथाऽस्त्रकम् ॥ २ ॥ गणो गुरुः पादुका च शक्त्यनन्तौ च धर्मकः ॥ मुख्यास्थिमण्डलं चाधश्चोर्ध्वच्छदनमर्चयेत् ॥ ३ ॥ पद्मकर्णिकबीजं च ज्वलिनीं नन्दयाऽर्चयेत् ॥ सूर्य्येशा कामरूपा च उदया कामवर्तिनी ॥ ४ ॥ सत्या च विघ्ननाशा च आसनं गन्धमृत्तिका ॥ यं शोषो रं च दहनं प्लवो लं वं तथाऽमृतम् ॥ ५ ॥ लम्बोदराय विद्महे महोदराय धीमहि तन्नो दन्तिः प्रचोदयात् ॥ गणपतिर्गणाधिपो गणेशो गणनायकः ॥ गणक्रीडो वक्रतुण्ड एकदंष्ट्रो महोदरः ॥६॥ गजवक्त्रो लम्बकुक्षिर्विकटो विघ्ननाशनः ॥ धूम्रवर्णो महेन्द्राद्याः पूज्या गणपतेः स्मृताः ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये विनायकपूजाकथनं नामैकसप्ततितमोऽध्यायः ॥७१॥ अथ स्नानविशेषादिकथनम् ॥ ईश्वर उवाच ॥ वक्ष्यामि स्कन्द नित्यर्द्धिं स्नानं पूजां प्रतिष्ठया ॥ खात्वाऽसिना समुद्धृत्य मृदमष्टाङ्गुलां ततः ॥ १ ॥ सर्वात्मना समुद्धृत्य पुनस्तेनैव पूरयेत् ॥ शिरसा पयसस्तीरे निधायास्त्रेण शोधयेत् ॥ २ ॥ तृणानि शिखयोद्धृत्य वर्म्मणा विभजेत्त्रिधा ॥ एकया नाभिपादान्तं प्रक्षाल्य पुनरन्यया ॥ ३ ॥ अस्त्राभिलब्धयालभ्य दीप्तया सर्वविग्रहम् ॥ निरुध्याक्षाणि पाणिभ्यां प्राणान्संयम्य वारिणि ॥ ४ ॥ निमज्यासीत हृद्यस्त्रं स्मरन्कालानलप्रभम् ॥ मलस्नानं

विधायेत्थं समुत्थाय जलान्तरात् ॥ ५ ॥ अस्त्रमन्त्र्यामुपास्याथ विधिस्नानं समाचरेत् ॥ सारस्वतादितीर्थानामेकमङ्कुशमुद्रया ॥ ६ ॥ हृदाकृष्य तथा स्नाप्य पुनः संहारमुद्रया ॥ शेषं मृद्रागमादाय प्रविश्यानाभि वारिणि ॥ ७॥ वामपाणितले कुर्याद्रागत्रयमुदङ्मुखः ॥ अङ्गैर्दक्षिणमेकाद्यं पूर्वमन्त्रेण सत्वरा ॥ ८ ॥ शिवेन दशधा सौम्यं जपेद्रागत्रयं क्रमात् ॥ सर्वादिक्षु क्षिपेत्पूर्वं हुंफडन्तशरात्मना ॥ ९ ॥ कुर्याच्छिवेन सौम्येन शिवतीर्थं भुजक्रमात् ॥ सर्वाङ्गमङ्गजतेन मूर्द्धादिचरणावधि ॥ १० ॥ दक्षिणेन समालभ्य पठन्नङ्गचतुष्टयम् ॥ पिधाय खानि सर्वाणि सम्मुखीकरणेन च ॥ ११॥ शिवं स्मरन्निमज्जेत हरिं गङ्गेति वा स्मरन् ॥ वौषडन्तषडङ्गेन के कुर्यादभिषेचनम् ॥ १२॥ कुम्भपात्रेण रक्षार्थं पूर्वादीन्निक्षिपेज्जलम् ॥ स्नात्वा राजोपचारेण सुगन्धामलकादिभिः ॥ १३॥ स्नात्वा चोत्तीर्य तत्तीर्थं संहारिण्योपसंहरेत् ॥ अथातो विधिशुद्धेन संहितामन्त्रितेन च॥ १४॥ निवृत्त्यादिविशुद्धेन भस्मना स्नानमाचरेत् ॥ शिरस्तः पादपर्यन्तं हुंफडन्तशरात्मना ॥ १५ ॥ तेन कृत्वा मलस्नानं विधिस्नानं समाचरेत् ॥ ते पतत्पुरुषा घोर गुह्यकाजातसञ्ज्ञरैः ॥ १६ ॥ क्रमेणोङ्कनयेन्मूर्ध्नि वक्त्रहृद्गुह्यविग्रहान् ॥ सन्ध्यात्रये निशीथे च वर्षापूर्वावसानयोः ॥ १७ ॥ सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकम् ॥ स्त्रियं नपुंसकं शूद्रं विडालशशमूषिकम् ॥ १८ ॥ स्नानमाग्नेयकं स्पृष्ट्वाशुचावुद्वलकं चरेत् ॥ सूर्य्यांशुवर्षसम्पर्कैः प्राङ्मुखेनोर्ध्ववाहुना ॥ १९ ॥ माहेन्द्रं स्नानमैशेन कार्यं सतपदावधि ॥ गोसङ्घमध्यगः कुर्यात्खुरोत्खातकरेणुभिः ॥ २० ॥ पावनं नवमन्त्रेण स्नानं तद्वर्मणाऽथवा ॥ सद्योजातादिभिर्मन्त्रैरम्भोभिरभिषेचनम् ॥ २१ ॥ मन्त्रस्नानं भवेदेवं वारुणाग्नेययोरपि ॥ मनसा मूलमन्त्रेण प्राणायामपुरःसरम् ॥२२॥ कुर्वीत मानसं स्नानं सर्वत्र विहितं च यत् ॥ वैष्णवादौ च तन्मन्त्रैरेवं स्नानादि कारयेत् ॥२३॥ सन्ध्याविधिं प्रवक्ष्यामि मन्त्रैर्भिन्नैः समं गुह ॥ संवीक्ष्य त्रिः पिबेदम्बु ब्रह्मतीर्थेन शङ्करैः ॥ २४ ॥ स्वधान्तैरात्मतत्त्वाद्यैस्ततः खानि स्पृशेन्मृदा ॥ शकलीकरणं कृत्वा प्राणायामेन संस्थितः ॥ २५ ॥ त्रिः समावर्तयेन्मन्त्री मनसा शिवसंहिताम् ॥ आचम्य न्यस्य सन्ध्यां च ब्राह्मीं प्रातः स्मरेन्नरः ॥ २६ ॥ हंसपद्मासनां रक्तां चतुर्वक्त्रां चतुर्भुजाम् ॥ प्रस्कन्दमालिनीं दक्षे वामे दण्डं कमण्डलुम् ॥ २७॥ तार्क्ष्यें पद्मासनां ध्यायेन्मध्याह्ने वैष्णवीं सिताम् ॥ शङ्खचक्र-

धरां वामे दक्षिणे सगदाभयाम् ॥ २८ ॥ रौद्रीं ध्यायेद्वृषाव्जस्थां त्रिनेत्रां शशिभूषिताम् ॥ त्रिशूलाक्षधरां दक्षे वामे साभयशक्तिकाम् ॥ २९ ॥ साक्षिणीं कर्मणां सन्ध्यामात्मानं तत्प्रभानुगम् ॥ चतुर्थीं ज्ञानिनः सन्ध्या निशीथादौ विभाव्यते ॥ ३० ॥ ह्रद्विन्दुब्रह्मरन्ध्रेषु अरूपा तु परे स्थिता ॥ शिवबोधपरा या तु सा सन्ध्या परमोच्यते ॥ ३१ ॥ पैत्र्यं मूले प्रदेशिन्या कनिष्ठाया प्रजापतेः ॥ ब्राह्ममङ्गुष्ठमूलस्थं तीर्थं दैवं कराग्रतः ॥३२॥ सव्यपाणितले वह्नेस्तीर्थं सोमस्य वामतः ॥ ऋषीणां तु समग्रेषु अङ्गुलीपर्वसन्धिषु ॥३३॥ ततः शिवात्मकैर्मन्त्रैः कृत्वा तीर्थं शिवात्मकम् ॥ मार्जनं संहितामन्त्रैस्तत्तोयेन समाचरेत् ॥ ३४ ॥ वामपाणिपतत्तोये योजनं सव्यपाणिना ॥ उत्तमाङ्गे क्रमान्मन्त्रैर्मार्जनं समुदाहृतम् ॥३५॥ नीत्वा तदुपनासाग्रं दक्षपाणिपुटस्थितम् ॥ बोधरूपं सितं तोयं वाममाकृष्य स्तम्भयेत् ॥ ३६ ॥ तत्पापं कज्जलाभासं पिङ्गयारिच्य मुष्टिना ॥ क्षिपेद्वज्रशिलायां तु तद्भवेदघमर्षणम् ॥ ३७ ॥ स्वाहान्तशिवमन्त्रेण कुशपुष्पाक्षतान्वितम् ॥ शिवायार्घ्याञ्जलिं दत्त्वा गायत्रीं शक्तितो जपेत् ॥ ३८ ॥ तर्पणं सम्प्रवक्ष्यामि देवतीर्थेन मन्त्रकात् ॥ तर्पयेद्वै शिवायेति स्वाहान्यान्स्वाहया युतान् ॥ ३९ ॥ ह्रां हृदयाय ह्रीं शिरसे ह्रूं शिखायै ह्रैं कवचाय ॥ अस्त्रायाष्टौ देवगणान्हृदादित्येभ्य एव च ॥ ४० ॥ ह्रां वसुभ्योऽथ रुद्रेभ्यो विश्वेभ्यश्चैव मरुद्गणः ॥ भृगुभ्यो ह्रामङ्गिरोभ्य ऋषीन्कण्ठोपवीत्यथ ॥ ४१ ॥ अत्रयेऽथ वसिष्ठाय नमश्चाथ पुलस्तये ॥ क्रतवे भारद्वाजाय विश्वामित्राय वै नमः ॥ ४२ ॥ प्रचेतसे मनुष्यांश्च सनकाय वषट् तथा ॥ ह्रां सनन्दाय वषट् सनातनाय वै वषट् ॥ ४३ ॥ सनत्कुमाराय वषट् कपिलाय तथा वषट् ॥ पञ्चशिखाय द्युभवे संलग्नकरमूलतः ॥ ४४ ॥ सर्वेभ्यो भूतेभ्यो वषड्भूतान्देवपितृनथ ॥ दक्षस्कन्धोपवीती च कुशमूलाग्रतस्तिलैः ॥ ४५ ॥ कव्यवाहानलायाथ सोमाय च यमाय च ॥ अर्य्यम्णे चाग्निसोमाय बर्हिषद्भ्यः स्वधायुतान् ॥ ४६ ॥ आज्यपाय च सोमाय विशेषसुरवत्पितॄन् ॥ ओं ह्रामीशानाय पित्रे स्वधा दद्यात्पितामहे ॥ ४७ ॥ शान्तप्रपितामहाय तथा प्रेतपितॄंस्तथा ॥ पितृभ्यः पितामहेभ्यः स्वधाऽथ प्रपितामहे ॥ ४८ ॥ वृद्धप्रपितामहेभ्यो मातृभ्यश्च स्वधा तथा ॥ ह्रां मातामहेभ्यः स्वधा ह्रां प्रमातामहेभ्यश्च ॥ ४९ ॥ वृद्धप्रमातामहेभ्यः सर्वेभ्यः पितृभ्य-

स्तथा ॥ सर्वेभ्यः स्वधा ज्ञातिभ्यः सर्वाचार्येभ्य एव च ॥ दिशां दिक्पतिसिद्धानां मातॄणां ग्रहरक्षसाम् ॥ ५० ॥ इत्यादिमहा-
पुराणे आग्नेये स्नानतर्पणादिविधिर्नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ अथ सूर्यपूजाविधिः ॥ ईश्वर उवाच ॥ वक्ष्ये सूर्य्यार्चनं
स्कन्द कराङ्गन्यासपूर्वकम् ॥ अहं तेजोमयः सूर्य इति ध्यात्वाऽर्घ्यमर्चयेत् ॥ १ ॥ पूरयेद्रक्तवर्णेन ललाटाकृष्टबिन्दुना ॥ तं
सम्पूज्य रवेरङ्गैः कृत्वा रक्षावगुण्ठनम् ॥ २ ॥ सम्प्रोक्ष्य तज्जलैर्द्रव्यं पूर्वस्यां भानुमर्चयेत् ॥ ओं अं हृद्बीजादि सर्वत्र पूजनं
दण्डिपिङ्गलौ ॥ ३ ॥ द्वारि दक्षे वामपार्श्व ईशाने अं गणाय च ॥ अग्नौ गुरुं पीठमध्ये प्रभूतं चासनं यजेत् ॥ ४ ॥ अग्न्यादौ
विमलं सारमाराध्यं परमं सुखम् ॥ सितरक्तपीतनीलवर्णान्सिंहनिभान्यजेत् ॥ ५ ॥ पद्ममध्ये रां च दीप्तां रीं सूक्ष्मां रुं जयां
क्रमात् ॥ रूं भद्रां रें विभूतीश्च विमलां रैममोघया ॥ ६ ॥ रों रौं च विद्युतां शक्तिं पूर्वाद्याः सर्वतोमुखाः ॥ रं मध्ये अर्कासनं
स्यात्सूर्य्यमूर्त्तिं षडक्षरम् ॥ ७ ॥ ओं हृं खं खोलकायेति यजेदावाह्य भास्करम् ॥ ललाटाकृष्टमञ्जल्यां ध्यात्वा रङ्गं न्यसेद्रविम्
॥ ८ ॥ ह्रां ह्रीं सः सूर्य्याय नमो मुद्रयावाहनादिकम् ॥ विधाय प्रीतये बिम्बमुद्रां गन्धादिकं ददेत् ॥ ९ ॥ पद्ममुद्रां बिल्वमुद्रां
प्रदर्श्याग्नौ हृदीरितम् ॥ ओं आं हृदयाय नमः अर्काय शिरसे तथा ॥ १० ॥ भूर्भुवः स्वः सुरेशाय शिखायै नैर्ऋते यजेत् ॥
हुं कवचाय वायव्ये ह्रां नेत्रायेति मध्यतः ॥ ११ ॥ वः अस्त्रायेति पूर्वादौ ततो मुद्राः प्रदर्शयेत् ॥ धेनुमुद्रा हृदादीनां गोवि-
षाणा च नेत्रयोः ॥ १२ ॥ अस्त्रस्य त्रासनी योज्या ग्रहाणां च नमस्क्रिया ॥ सीं सोमं बुं बुधं बृं च जीवं भं भार्गवं यजेत् ॥ १३ ॥
दले पूर्वादिकेऽग्न्यादौ अं भौमं शं शनैश्चरम् ॥ रं राहुं कें केतवे च गन्धाद्यैश्च खषोल्कया ॥ १४ ॥ मूलं जप्त्वार्घ्यपात्राम्बु दत्त्वा
सूर्य्याय संस्तुतिः ॥ नत्वा पराङ्मुखं चार्कं क्षमस्वेति ततो वदेत् ॥ १५ ॥ शराणुना फडन्तेन समाहृत्याणुसंहतिम् ॥ हृत्पद्मे
शिवसूर्येति संहारिण्योपसंस्कृतिम् ॥ १६ ॥ योजयेत्तेजश्चण्डाय रविनिर्म्माल्यमर्प्पयेत् ॥ अभ्यर्च्येश जपाद्धचानाद्धोमा-
त्सर्वं रवेर्भवेत् ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये सूर्य्यपूजाविधिकथनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ शिवपूजाविधिः ॥
ईश्वर उवाच ॥ शिवपूजां प्रवक्ष्यामि आचम्य प्रणवार्घ्यवान् ॥ द्वारमस्त्राम्बुना प्रोक्ष्य होमादिद्वारपान्यजेत् ॥ १ ॥ गणं

सरस्वतीं लक्ष्मीं मूध्वोंदुम्बरके यजेत् ॥ नान्दिगङ्गे दक्षिणेऽथ स्थिते वामगते यजेत् ॥ २ ॥ महाकालं च यमुनां दिव्यदृष्टि-
निपातितः ॥ उत्सार्य दिव्यान्विघ्नांश्च पुष्पक्षेपान्तरिक्षगान् ॥ ३ ॥ दक्षपार्ष्णित्रिभिर्घातैर्भूमिष्ठान्यागमन्दिरम् ॥ देहलीं लंघये-
द्वामशाखामाश्रित्य वै विशेत् ॥ ४ ॥ प्रविश्य दक्षपादेन विन्यस्यास्त्रमुदुम्बरे ॥ ओं हां वास्त्वधिपतये ब्रह्मणे मध्यतो यजेत्
॥ ५ ॥ निरीक्षणादिभिः शस्त्रैः शुद्धानादाय गह्वडुकान् ॥ लब्धानुज्ञः शिवान्मौनी गङ्गादिकमनुव्रजेत् ॥ ६ ॥ पवित्राङ्गः प्रजप्तेन
वस्त्रपूतेन वारिणा ॥ पूरयेदम्बुधौ तांस्तान्गायत्र्या हृदयेन वा ॥ ७ ॥ गन्धकाक्षतपुष्पादिसर्व्वद्रव्यसमुच्चयम् ॥ सन्निधीकृत्य
पूजार्थं भूतशुद्ध्यादि कारयेत् ॥ ८ ॥ देवदक्षे ततो न्यस्य सौम्यास्यश्च शरीरतः ॥ संहारमुद्रयादाय मूर्ध्नि मन्त्रेण धारयेत् ॥ ९ ॥
भोग्यकर्म्मोपभोगार्थं पाणिकच्छुपिकारूपया ॥ हृदम्बुजे निजात्मानं द्वादशान्तपदेऽथवा ॥ १० ॥ शोधयेत्पञ्चभूतानि सञ्चिन्त्य
सुषिरं तनौ ॥ चरणाङ्गुष्ठयोर्युग्मान्सुषिरान्तर्बहिः स्मरेत् ॥ ११ ॥ शक्तिं हृद्व्यापिनीं पश्चाद्धूङ्कारे पावकप्रभे ॥ रन्ध्रमध्यस्थिते कृत्वा
प्राणरोधं हि चिन्तकः ॥ १२ ॥ निवेशयेद्रेचकान्ते फडन्तेनाथ तेन च ॥ हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रे विभिद्य च ॥ १३ ॥ ग्रन्थीन्नि-
र्भिद्य हूङ्कारं मूर्ध्नि विन्यस्य जीवनम् ॥ सम्पुटं हृदयेनाथ पूरकाहितचेतनम् ॥ १४ ॥ हूं शिखोपरि विन्यस्य शुद्धं बिन्द्वात्मकं
स्मरेत् ॥ कृत्वाथ कुम्भकं शम्भावेकोद्घातेन योजयेत् ॥ १५ ॥ रेचकेन बीजवृत्त्या शिवे लीनोऽथ शोधयेत् ॥ प्रतिलोमं स्वदेहे
तु बिन्द्वन्तं तत्र बिन्दुकम् ॥ १६ ॥ लयं नीत्वा महीवातौ जलवह्नी परस्परम् ॥ द्वौ द्वौ साध्यौ तथाकाशमविरोधेन तच्छृणु ॥ १७ ॥
पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितम् ॥ ह्रौमित्यात्मीयबीजेन तान्निवृत्तिकलामयम् ॥ १८ ॥ पादादारभ्य मूर्द्धान्त विचिन्त्य
चतुरस्रकम् ॥ उद्घातपञ्चकेनैव वायुभूतं विचिन्तयेत् ॥ १९ ॥ अर्द्धचन्द्रं द्रवं सौम्यं शुभ्रमम्भोजलाञ्छितम् ॥ ह्रीमित्यनेन बीजेन
प्रतिष्ठारूपतां गतम् ॥ २० ॥ संयुक्तं राममंत्रेण पुरुषान्तमकारणम् ॥ अर्घ्यं चतुर्भिरुद्घातैर्वह्निभूतं विशोधयेत् ॥ २१ ॥ आग्नेयं
मण्डलं त्र्यस्रं रक्तं स्वास्तिकलाञ्छितम् ॥ हूमित्यनेन बीजेन विद्यारूपं विभावयेत् ॥ २२ ॥ घोराणुत्रिभिरुद्घातैर्जलभूतं
विशोधयेत ॥ षडस्रं मण्डलं वायोर्बिन्दुभिः षड्भिरङ्कितम् ॥ २३ ॥ कृष्णं होमिति बीजेन जातं शान्तिकलामयम् ॥ सञ्चि-

त्यीद्घातयुग्मेन पृथ्वीभूतं विशोधयेत् ॥२४॥ नभो बिन्दुमयं वृत्तं बिन्दुशक्तिविभूषितम्॥ व्योमाकारं सुवृत्तं च शुद्धस्फटिकनिर्मलम् ॥ २५ ॥ हौंकारेण फडन्तेन शान्त्यतीतकलामयम् ॥ ध्यात्वैकोद्घातयोगेन सुविशुद्धं विभावयेत् ॥ २६ ॥ आप्यायायेत्ततः सर्वं मूलेनामृतवर्षिणा ॥ आधाराख्यमनन्तं च धर्मज्ञानादिपङ्कजम् ॥ २७ ॥ हृदासनमिदं ध्यात्वा मूर्त्तिमावाहयेत्ततः ॥ मृष्ट्वा शिवमयं तस्यामात्मानं द्वादशान्ततः ॥ २८ ॥ अथ तां शक्तिमन्त्रेण वौषडन्तेन सर्वतः ॥ दिव्यामृतेन संप्लाव्य कुर्वीत सकलीकृतम् ॥ २९ ॥ हृदयादिकरान्तेषु कनिष्ठाद्यङ्गुलीषु च ॥ हृदादिमन्त्रविन्यासः सकलीकरणं मतम् ॥ ३० ॥ अस्त्रेण रक्ष प्राकारं तन्मंत्रेणाथ तद्बहिः ॥ शक्तिजालमधश्चोर्ध्वं महामुद्रां प्रदर्शयेत ॥ ३१ ॥ आपादमस्तकं यावद्भावपुष्पैः शिवं हृदि ॥ पद्मे यजेत्पूरकेण आकृष्टामृतसद्धृतैः ॥ ३२ ॥ शिवमन्त्रेर्नाभिकुण्डे तर्पयेत शिवानलम् ॥ ललाटे विन्दुरूपं च चिन्तयेच्छुभविग्रहम् ॥ ३३ ॥ एकं स्वर्णादिपात्राणां पात्रमस्त्राम्बुशोधितम् ॥ विन्दुप्लुतपीयूषरूपर्तोयाक्षतादिना ॥ ३४ ॥ हृदापूर्य्य षडङ्गेन पूजयित्वाऽभिमन्त्रयेत् ॥ संरक्ष्य हेतिमन्त्रेण कवचेन विगुण्ठयेत् ॥ ३५ ॥ रचयित्वाऽर्घ्यमष्टाङ्गं सेचयेद्धेनुमुद्रया ॥ अभिषिञ्चेदथात्मानं मूर्ध्नि तत्तोयबिन्दुना ॥ ३६ ॥ तत्रस्थं यागसम्भारं प्रोक्षयेदस्त्रवारिणा ॥ अभिमन्त्र्य हृदा पिण्डेस्तनुत्राणेन वेष्टयेत् ॥ ३७ ॥ दर्शयित्वाऽमृतां मुद्रां पुष्पं दत्त्वा निजासने ॥ विधाय तिलकं मूर्ध्नि पुष्पं मूलेन योजयेत् ॥ ३८ ॥ स्नाने देवार्चने होमे भोजने यागयोगयोः ॥ आवश्यके जपे धीरः सदा वाचंयमो भवेत् ॥ ३९ ॥ नादान्तोच्चारणान्मन्त्रं शोधयित्वा सुसंस्कृतम् ॥ पूजनेऽभ्यर्च्य गायत्र्या सामान्यार्घ्यमुपाहरेत् ॥ ४० ॥ ब्रह्मपञ्चकमावर्त्त्य माल्यमादाय लिङ्गतः ॥ ऐशान्यां दिशि चण्डाय हृदयेन निवेदयेत् ॥ ४१ ॥ प्रक्षाल्य पिण्डिका लिङ्गे अस्त्रतोये ततो हृदा ॥ अर्घ्यपात्राम्बुना सिञ्चेदिति लिङ्गविशोधनम् ॥ ४२ ॥ आत्मद्रव्यमन्त्रलिङ्गशुद्धौ सर्वान्सुरान् यजेत् ॥ वायव्ये गणपतये हां गुरुभ्योऽर्च्चयेच्छिवे ॥ ४३ ॥ आधारशक्तिमङ्कुरनिभां कूर्म्मशिलास्थिताम् ॥ यजेद्ब्रह्मशिलारूढं शिवस्यानन्तमासनम् ॥ ४४ ॥ विचित्रकेशप्रख्यानमन्योन्यं पृष्ठदर्शिनः ॥ कृतत्रेतादिरूपेण शिवस्यासनपादुकाम् ॥ ४५ ॥ धर्म्मं

ज्ञान च वैराग्ययमैश्वर्य्यं चाग्निदिङ्मुखान् ॥ कर्पूरकुङ्कुमस्वर्णकज्जलाभान्यजेत्क्रमात् ॥ ४६ ॥ पद्मं च कर्णिकामध्ये पूर्वादौ मध्यतो नव ॥ वरदाभयहस्ताश्च शक्तयो धृतचामराः ॥ ४७ ॥ वामा ज्येष्ठा च रौद्री च काली कलविकारणी ॥ बलविकारणी पूज्या बलप्रथमनी क्रमात् ॥ ४८ ॥ हां सर्वभूतदमनी केसराग्रे मनोन्मनी ॥ क्षित्यादिशुद्धविद्यां तु तत्त्वव्यापकमासनम् ॥४९॥ न्यसेत्तिसहासने देवं शुक्लं पञ्चमुखं विभुम् ॥ दशबाहुं च खण्डेन्दुं दधानं दक्षिणैः करैः ॥ ५० ॥ शक्त्यृष्टिशूलखड्गाङ्गवरदं वामकैः करैः ॥ डमरुं बीजपूरं च नीलाब्जं सूत्रमुत्पलम् ॥ ५१ ॥ द्वात्रिंशल्लक्षणोपेतां शैवीं मूर्त्तिं तु मध्यतः ॥ हां हं हां शिवमूर्त्तये स्वप्रकाशं शिवं स्मरन् ॥ ५२ ॥ ब्रह्मादिकारणत्यागान्मन्त्रं नीत्वा शिवास्पदम् ॥ ततो ललाटमध्यस्थं स्फुरत्तारापतिप्रभम् ॥ ५३ ॥ षडङ्गेन समाकीर्णं बिन्दुरूपं परं शिवम् ॥ पुष्पाञ्जलिगतं ध्यात्वा लक्ष्मीमूर्त्तौ निवेशयेत् ॥ ५४ ॥ ॐ हां हौं शिवाय नमः आवाहन्या हृदा ततः ॥ आवाह्य स्थाप्य स्थापन्या सन्निधायान्तिकं शिवम् ॥५५॥ निरोधयेन्निदुरया कालकान्त्या फडन्ततः ॥ विघ्नानुत्सार्य्य विष्टचाथ लिङ्गमुद्रां नमस्कृतिम् ॥ ५६ ॥ हृदावगुण्ठयेत्पश्चादावाहः सन्मुखी ततः ॥ निवेशनं स्थापनं स्यात्सन्निधानं तवास्मि भोः ॥ ५७ ॥ आकर्म्मकाण्डपर्य्यन्तं सन्निधेयो परिक्षयः ॥ स्वभक्तेश्च प्रकाशो यस्तद्भवेदवगुण्ठनम् ॥ ५८ ॥ सकलीकरणं कृत्वा मन्त्रैः षड्भिरथैकताम् ॥ अङ्गानामङ्गिना सार्द्धं विदध्यादमृतीकृतम् ॥ ५९ ॥ चिच्छक्तिहृदयं शम्भोः शिव ऐश्वर्य्यमष्टधा ॥ शिखा वशित्वं चाभेद्य तेजः कवचमैश्वरम् ॥ ६० ॥ प्रतापो दुःसहश्चास्त्रमन्तरायापहारकम् ॥ नमः स्वधा च स्वाहा च वौषट् चेति यथाक्रमम् ॥ ६१ ॥ हृत्पुरःसरमुच्चार्य्य पाद्यादीनि निवेदयेत् ॥ पाद्यं पादाम्बुजद्वन्द्वे वक्त्रेऽप्याचमनीयकम् ॥ ६२ ॥ अर्घ्यं शिरसि देवस्य दूर्वापुष्पाक्षतानि च ॥ एवं संस्कृत्य संस्कारैर्दशभिः परमेश्वरम् ॥ ६३ ॥ यजेत्पञ्चोपचारेण विधिना कुसुमादिभिः ॥ अभ्युक्ष्योद्वर्त्य निर्मज्य राजिकालवणादिभिः ॥ ६४ ॥ अर्घ्योदबिन्दुपुष्पाद्यैर्गन्धकैः स्नापयेच्छनैः ॥ पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ॥ ६५ ॥ ईशादिमन्त्रितैर्द्रव्यैरर्च्य तेषां विपर्य्ययः ॥ तोयधूपान्तरैः सर्वैर्मूलेन स्नपयेच्छिवम् ॥ ६६ ॥ विरूक्ष्य यवचूर्णेन यथेष्टं शीतलैर्जलैः ॥ स्वशक्त्या गन्धतोयेन संस्नाप्य शुचिवाससा ॥ ६७ ॥

निर्म्माज्यार्घ्यं प्रदद्याच्च नोपरि भ्रामयेत्करम् ॥ न शून्यमस्तकं लिङ्गं पुष्पैः कुर्य्यात्ततो ददेत् ॥ ६८ ॥ चन्दनाद्यैः समालभ्य पुष्पैः प्रार्च्य शिवाणुना ॥ धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य शिवाणुना ॥ ६९ ॥ अस्त्रेण पूजितां घण्टां चादाय गुग्गुलं ददेत् ॥ दद्यादाचमनं पश्चात्स्वधान्तं हृदयाणुना ॥ ७० ॥ आरार्तिकं समुत्तार्य्य तथैवाचामयेत्पुनः ॥ प्रणम्यादाय देवाज्ञां भोगाङ्गानि प्रपूजयेत् ॥ ७१ ॥ हृदग्नौ चन्द्रभं चैशे शिवं चामीकरप्रभम् ॥ शिखां रक्तां च नैर्ऋत्ये कृष्णं वर्म्म च वायवे ॥ ७२ ॥ चतुर्वक्त्रं चतुर्बाहुं दलस्थान्पूजयेदिमान् ॥ दंष्ट्राकरालमप्यस्त्रं पूर्वादौ वज्रसन्निभम् ॥७३॥ मूले हौं शिवाय नमः ॐ हां हूँ हीं हों शिरश्च ॥ हूं शिखायै हैं वर्म्म हश्चास्त्रं परिवारयुताय च ॥ ७४ ॥ शिवाय दद्यात्पाद्यं च आचामं चार्घ्यमेव च ॥ गन्धं पुष्पं धूपदीपौ नैवेद्याचमनीयकम् ॥ ७५ ॥ करोद्वर्त्तनताम्बूलं मुखवासं च दर्पणम् ॥ शिरस्यारोप्य देवस्य दूर्वाक्षतपवित्रकम् ॥ ७६ ॥ मूलमष्टशतं जप्त्वा हृदयेनाभिमन्त्रितम् ॥ चर्म्मणा वेष्टितं खड्गं रक्षितं कुशपुष्पकैः ॥ ७७ ॥ अक्षतैर्मुद्रया युक्तं शिवमुद्रवसञ्ज्ञया ॥ गुह्यातिगुह्यगुप्त्यर्थं गृहाणास्मत्कृतं जपम् ॥ ७८ ॥ सिद्धिर्भवतु मे येन त्वत्प्रसादात्त्वयि स्थिते ॥ भोगी श्लोकं पठित्वाद्यं दक्षहस्तेन शंभवे ॥ ७९ ॥ मूलाणुनार्घ्यतोयेन वरहस्ते निवेदयेत् ॥ यत्किञ्चित्कुर्म्महे देव सदा सुकृतदुष्कृतम् ॥ ८० ॥ तन्मे शिवपदस्थस्य हूं क्षः क्षेपय शंकर ॥ शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ॥ ८१ ॥ शिवो जयति सर्वत्र यः शिवः सोऽहमेव च ॥ श्लोकद्वयमधीत्यैवं जपं देवाय चार्पयेत् ॥ ८२ ॥ शिवाङ्गानां दशांशं च दत्त्वार्घ्यं स्तुतिमाचरेत् ॥ प्रदक्षिणीकृत्य नमेत्साष्टाङ्गं चाष्टमूर्त्तये ॥ नत्वा ध्यानादिभिश्चैव यजेच्चित्रेऽनलादिषु ॥ ८३ ॥ इत्यादिमहापुराणे आग्नेये शिवपूजाविधिर्नाम चतुःसप्ततितमोऽध्यायः ॥७४॥ अथाग्निस्थापनादिविधिः ॥ ईश्वर उवाच ॥ अर्घपात्रकरो यायादग्न्यागारं सुसंवृतः ॥ यागोपकरणं सर्वं दिव्यदृष्ट्या च कल्पयेत् ॥ १ ॥ उदङ्मुखः कुण्डमक्षेत्प्रोक्षणं ताडनं कुशैः ॥ विदध्यादस्त्रमन्त्रेण वर्म्मणाभ्युक्षणं मतम् ॥ २ ॥ खड्गेन खातमुद्धारं पूरणं समतामपि ॥ कुर्वीत वर्मणा सेकं कुट्टनं तु शरात्मना ॥ ३ ॥ सम्मार्जनं समालेपं कलारूपप्रकल्पनम् ॥ त्रिसूत्रीपरिधानं च वर्म्मणाभ्यर्चनं सदा ॥ ४ ॥ रेखात्रयमुदक्कुर्य्यादेकां पूर्वाननामधः ॥

कुशेन च शिवास्त्रेण यद्वा तासां विपर्य्ययः ॥ ५ ॥ वज्रीकरणमन्त्रेण हृदा दर्भैश्चतुष्पथम् ॥ अक्षपात्रं तनुत्रेण विन्यसेद्विष्टरं हृदा ॥ ६ ॥ हृदा वागीश्वरीं तत्र ईशभावाह्य पूजयेत् ॥ वह्निं सदाश्रयानीतं शुद्धपात्रोपरि स्थितम् ॥ ७ ॥ क्रव्यादांशं परित्यज्य वीक्षणादिविशोधितम् ॥ औदर्यं चैन्दवं भौतमेकीकृत्यानलत्रयम् ॥ ८ ॥ ॐ हूं वह्नि-चैतन्याय वह्निबीजेन विन्यसेत् ॥ संहितामन्त्रितं वह्निं धेनुमुद्रामृतीकृतम् ॥ ९ ॥ रक्षितं हेतिमन्त्रेण कवचेनावगुण्ठितम् ॥ पूजितं त्रिः परिभ्राम्य कुण्डस्योर्ध्वं प्रदक्षिणम् ॥ १० ॥ शिवबीजमिति ध्यात्वा वागीशागर्भगोचरे ॥ वागीश्वरेण देवेन क्षिप्यमाणं विभावयेत् ॥ ११ ॥ भूमिष्ठजानुको मन्त्री हृदात्मसम्मुखं क्षिपेत् ॥ ततोऽन्तःस्थितबीजस्य नाभिदेशे समूहनम् ॥ १२ ॥ सम्भृतिं परिधानस्य शौत्रमाचमनं हृदा ॥ गर्भाग्नेः पूजनं कृत्वा तद्रक्षार्थं शराणुना ॥ १३ ॥ बध्नीयाद्भर्भजं देव्याः कङ्कणं पाणिपल्लवे ॥ गर्भाधानाय संपूज्य सद्योजातेन पावकम् ॥ १४ ॥ ततो हृदयमन्त्रेण जुहुयादाहुतित्रयम् ॥ पुंसवनाय वामेन तृतीये मासि पूजयेत् ॥ १५ ॥ आहुतित्रितयं दद्याच्छिरसांबुकणान्वितम् ॥ सीमन्तोन्नयनं षष्ठे मासि संपूज्य रूपिणा ॥ १६ ॥ जुहुयादाहुतीस्तिस्रः शिखया शिखयैव तु ॥ वक्राङ्गकल्पनां कुर्याद्भक्रोद्घाटननिष्कृती ॥ १७ ॥ जातकर्मनृकर्मभ्यां दशमे मासि पूर्ववत् ॥ वह्निं सन्धुक्ष्य दर्भाद्यैः स्नानं गर्भमलापहम् ॥ १८ ॥ सुवर्णबन्धनं देव्या कृतं ध्यात्वा हृदार्चयेत् ॥ सद्यः-सूतकनाशाय प्रोक्षयेदस्त्रवारिणा ॥ १९ ॥ कुंभं तु बहिरस्त्रेण ताडयेद्भर्मणोक्षिपेत् ॥ अस्त्रेणोत्तरपूर्व्वाग्रान्मेखलासु बहिः कुशान् ॥ २० ॥ आस्थाप्य स्थापयेत्तेषु हृदा परिधिविस्तरम् ॥ वक्राणामस्त्रमन्त्रेण ततो नालापनुत्तये ॥ २१ ॥ समिधः पञ्च होतव्याः प्रान्ते मूले घृतप्लुताः ॥ ब्रह्माणं शङ्करं विष्णुमनन्तं च हृदार्चयेत् ॥ २२ ॥ दूर्वाक्षतैस्तत्पर्य्यन्तं परिधिस्थाननुक्रमात् ॥ इन्द्रादीशानपर्यन्तान्विष्टरस्थाननुक्रमात् ॥ २३ ॥ अग्नेरभिमुखीभूतान्निजादिक्षु हृदार्चयेत् ॥ निवार्य विघ्नसङ्घातं बालकं पालयिष्यथ ॥ २४ ॥ शैवीमाज्ञामिमां तेषां श्रावयेत्तदनन्तरम् ॥ गृहीत्वा स्रुक्स्रुवावूर्ध्ववदनाधोमुखैः क्रमात् ॥ २५ ॥ प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत् ॥ कुशस्पृष्टप्रदेशे तु आत्मविद्याशिवात्मकम् ॥ २६ ॥ क्रमात्तत्त्वत्रयं न्यस्य हां हीं हूं संरवैः क्रमात् ॥

स्रुचि शक्तिं स्रुवे शंभुं ज्वलनस्य हृदयाणुना ॥ २७ ॥ त्रिसूत्रीवेष्टितग्रीवौ पूजितौ कुसुमादिभिः ॥ कुशानामुपरिष्टात्तौ स्थापयित्वा स्वदक्षिणे ॥ २८ ॥ गव्यमाज्यं समादाय वीक्षणादिविशोधितम् ॥ स्वकां ब्रह्ममयीं मूर्तिं सञ्चिन्त्यादाय तद्घृतम् ॥ २९ ॥ कुण्डस्योर्ध्वं हृदावर्त्य भ्रामयित्वाग्निगोचरे ॥ पुनर्विष्णुमयीं ध्यात्वा घृतमीशानगोचरे ॥ ३० ॥ धृत्वादाय कुशाग्रेण स्वाहान्तं शिरसाणुना ॥ जुहुयाद्विष्णवे विन्दुं रुद्ररूपमनन्तरम् ॥ ३१ ॥ भावयन्निजमात्मानं नाभौ धृत्वा प्रवेक्ततः ॥ प्रादेशमात्रदर्भाभ्यामङ्गुष्ठानामिकाग्रकैः ॥ ३२ ॥ धृताभ्यां संमुखं वह्नेरस्त्रेण प्रथमार्चयेत् ॥ हृदात्मसंमुखं तद्वत्कुर्यान्निष्प्लवनं ततः ॥ ३३ ॥ हृदालब्धदग्धदर्भं शस्त्रक्षेपात्पवित्रयेत् ॥ दीप्तेनापस्दर्भेण निवाद्यानेन दीपयेत् ॥ ३४ ॥ अस्त्रमन्त्रेण निर्दग्धं वह्नौ दर्भं पुनः क्षिपेत् ॥ क्षिप्त्वा घृते कृतग्रन्थिकुशं प्रादेशसम्मितम् ॥ ३५ ॥ पक्षत्रयमिडादीनां त्रयं चाज्ये विभावयेत् ॥ क्रमाद्रागत्रयादाज्यं स्रुवेणादाय होमयेत् ॥ ३६ ॥ स्वेत्यग्नौ हा घृते भागं शेषमाज्यं क्षिपेत्क्रमात् ॥ ओं हाम् अग्नये स्वाहा । ओं हाम् सोमाय स्वाहा । ओं हाम् अग्नीषोमाभ्यां स्वाहा ॥ उद्घाटनाय नेत्राणामग्नेर्नेत्रत्रये मुखे ॥ ३७ ॥ स्रुवेण घृतपूर्णेन चतुर्थीमाहुतिं यजेत् ॥ ओं हां अग्नये स्विष्टकृते स्वाहा ॥ अभिमन्त्र्य षडंगेन बोधयेद्धेनुमुद्रया ॥ ३८ ॥ अवगुंठ्य तनुत्रेण रक्षेदाज्यं शराणुना ॥ हृदाज्यबिन्दुविक्षेपात्कुर्यादभ्युक्ष्य शोधनम् ॥ ३९ ॥ वक्त्राभिघारसन्धानं वक्त्रैकीकरणं तथा ॥ ओं हां सद्योजाताय स्वाहा । ओं हां वामदेवाय स्वाहा । ओं हाम् अघोराय स्वाहा । ओं तत्पुरुषाय स्वाहा । ओं हाम् ईशानाय स्वाहा ॥ इत्येकैकघृताहुत्या कुर्याद्वक्त्राभिघारकम् ॥ ४० ॥ ओं हां सद्योजातवामदेवाभ्यां स्वाहा । ओं हां वामदेवाघोराभ्यां स्वाहा । ॐ हाम् अघोरतत्पुरुषाभ्यां स्वाहा । ॐ हां तत्पुरुषेशानाभ्यां स्वाहा ॥ इति वक्त्रानुसन्धानं मन्त्रैरेभिः क्रमाच्चरेत् ॥ अग्नितो गतया वायुं निर्ऋतौ दिशि वान्तया ॥ ४१ ॥ वक्त्राणामेकतां कुर्यात्स्रुवेण घृतधारया । ओं हां सद्योजातवामदेवाघोरतत्पुरुषेशानेभ्यः स्वाहा ॥ इतीष्टवक्त्रे वक्त्राणामन्तर्भावस्तदाकृतिः ॥ ४२ ॥ ईशेन वह्निमभ्यर्च्य दत्त्वास्त्रेणाहुतित्रयम् ॥ कुर्यात्सर्वात्मना नाम शिवाग्निस्त्वं हुताशन ॥ ४३ ॥ हृदार्चितौ विसृष्टाग्नौ पितरौ विधिपूरणीम् ॥ मूलेन वौषडन्तेन दद्यात्पूर्णां यथाविधि ॥ ४४ ॥ ततो हृदंबुजे साङ्गं ससेनं भासुरं परम् ॥ यजेत्पूर्ववदावाह्य

प्रार्थ्यांज्ञां तर्प्पयेच्छिवम् ॥४५॥ यागाग्निशिवयोः कृत्वा नाडीसन्धानमात्मना ॥ शक्त्या मूलाणुना होमं कुर्यादङ्गैर्दशांशतः॥४६॥
घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा ॥ शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य तु ॥ ४७॥ यथावत्सर्वभक्षाणां लाजानां
मुष्टिसंमितम् ॥ खण्डत्रयं तु मूलानां फलानां स्वप्रमाणतः ॥ ४८ ॥ ग्रासार्द्धमात्रमन्नानां सूक्ष्माणि पञ्च होमयेत् ॥ इक्षोरापर्व्विकं
मानं लतानामङ्गुलद्वयम् ॥ ४९ ॥ पुष्पं पत्रं स्वमानेन समिधां तु दशाङ्गुलम् ॥ चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्दमान् ॥ ५० ॥
कलायसम्मितानेतान्गुग्गुलुं बदरास्थिवत् ॥ कन्दानामष्टमं भागं जुहुयाद्विधिवत्परम् ॥५१॥ होमं निर्वर्त्तयेदेवं ब्रह्मबीजपदैस्ततः ॥
वृतेन स्रुचि पूर्णायां निधायाधोमुखं स्रुवम् ॥ ५२ ॥ स्रुगग्रे पुष्पमारोप्य पश्चाद्वामेन पाणिना ॥ पुनः सव्येन तौ धृत्वा शङ्ख-
न्निभमुद्रया ॥ ५३ ॥ समुद्गतोऽर्ध्वकायश्च समपादः समुत्थितः ॥ नाभौ तन्मूलमाधाय स्रुगग्रन्यग्रलोचनः ॥ ५४ ॥ ब्रह्मादिकार-
णात्यागाद्विनिःसृत्य सुषुम्णया ॥ वामस्तनान्तमानीय तयोर्मूलमतन्द्रितः ॥५५॥ मूलमन्त्रमविस्पष्टं वौषडन्तं समुच्चरेत् ॥ तद्ग्नौ
जुहुयादाज्यं यवसम्मितधारया ॥ ५६ ॥ आचामं चन्दनं दत्त्वा ताम्बूलप्रभृतीनपि ॥ भक्त्या तद्भूतिमावन्द्य विदध्यात्प्रणतिं
पराम् ॥ ५७ ॥ ततो वह्निं समभ्यर्च्च्य फडन्तास्त्रेण संवरान् ॥ संहारमुद्रयाहृत्य क्षमस्वेत्यभिधाय च ॥ ५८ ॥ भासुरान्पारिषीं-
स्तांश्च पूरकेण हृदाऽणुना ॥ श्रद्धया परमात्मीये स्थापयेत हृदम्बुजे ॥ ५९ ॥ सर्वपाकाग्रमादाय कृत्वा मण्डलकद्वयम् ॥ अन्त-
र्बहिर्बलिं दद्यादाग्नेय्यां कुण्डसन्निधौ ॥ ॥ ६० ॥ ओं हां रुद्रेभ्यः स्वाहा पूर्वे मातृभ्यो दक्षिणे तथा ॥ वारुणे हां गणेभ्यश्च स्वाहा
तेभ्यस्त्वयं बलिः ॥ ६१ ॥ उत्तरे हां च यक्षेभ्य ईशाने हां ग्रहेभ्य उ ॥ अग्नौ हामसुरेभ्यश्च रक्षोभ्यो नैर्ऋते बलिः ॥ ६२ ॥ वायव्ये
हां च नागेभ्यो नक्षत्रेभ्यश्च मध्यतः ॥ हां राशिभ्यः स्वाहा वह्नौ विश्वेभ्यो नैर्ऋते तथा ॥ ६३ ॥ वारुण्यां क्षेत्रपालाय अन्तर्बलि-
रुदाहृतः ॥ द्वितीये मण्डले बाह्य इन्द्रायाग्नियमाय च ॥ ६४ ॥ नैर्ऋताय जलेशाय वायवे धनरक्षिणे ॥ ईशानाय च पूर्व्वादौ
ईशाने ब्रह्मणे नमः ॥ ६५ ॥ नैर्ऋते विष्णवे स्वाहा वायसादेर्बहिर्बलिः ॥ बलिद्वयगतान्मन्त्रान्संहारमुद्रयाऽऽ-
त्मनि ॥ ६६ ॥ इत्यादिमहापुराणे आग्नेये शिवपूजाङ्गहेमविधिनिरूपणं नाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ अथ चण्डपूजा-

विधिः ॥ ईश्वर उवाच ॥ ततः शिवान्तिकं गत्वा पूजाहोमादिकं मम ॥ गृहाण भगवन् पुण्यफलमित्यभिधाय च ॥ १ ॥ अर्घ्योदकेन देवाय मुद्रयोद्भवसंज्ञया ॥ हृद्बीजपूर्वमूलेन स्थिरचित्तो निवेदयेत् ॥ २ ॥ ततः पूर्ववदभ्यर्च्य स्तुत्वा स्तोत्रैः प्रणम्य च ॥ अर्घ्यं पराङ्मुखं दत्त्वा क्षमस्वेत्यभिधाय च ॥ ३ ॥ नाराचमुद्रयाऽस्त्रेण फडन्तेनात्मसञ्चयम् ॥ संहृत्य दिव्यया लिङ्गं मूर्त्तिमन्त्रेण योजयेत् ॥ ४ ॥ स्थण्डिले त्वार्चिते देवे मन्त्रसङ्घातमात्मनि ॥ नियोज्य विधिनोक्तेन विदध्याच्चण्डपूजनम् ॥ ५ ॥ ओं चण्डेशानाय नमो मध्यश्चण्डमूर्तये ॥ ओं धूलिचण्डेश्वराय हूं फट् स्वाहा तमाह्वयेत् ॥ ६ ॥ चण्डहृदयाय हूं फट् ओं चण्डशिरसे तथा ॥ ओं चण्डशिखायै हूं फट् चण्डायुः कवचाय च ॥ ७ ॥ चण्डास्त्राय तथा हूं फट् चण्डं रुद्राग्निजं स्मरेत् ॥ शूलटङ्कधरं कृष्णं साक्षसूत्रकमण्डलुम् ॥ ८ ॥ टङ्कारेऽर्द्धचन्द्रे वा चतुर्वक्त्रं प्रपूजयेत् ॥ यथाशक्ति जपं कुर्य्यादङ्गानां तु दशांशतः ॥ ९ ॥ गोभूहिरण्यवस्त्रादिमणिहेमादिभूषणम् ॥ विहाय शेषनिर्माल्यं चण्डेशाय निवेदयेत् ॥ १० ॥ लेह्यचोष्यमन्नवरं ताम्बूलं स्रग्विलेपनम् ॥ निर्माल्यं भोजनं तुभ्यं प्रदत्तं तु शिवाज्ञया ॥ ११ ॥ सर्वमेतत्क्रियाकाण्डं मया चण्ड तवाज्ञया ॥ न्यूनाधिकं कृतं मोहात्परिपूर्णं सदाऽस्तु मे ॥ १२ ॥ इति विज्ञाप्य देवेशं दत्त्वाऽर्घ्यं तस्य संस्मरन् ॥ संहारमूर्त्तिमन्त्रेण शनैः संहारमुद्रया ॥ १३ ॥ पूरकान्वितमूलेन मन्त्रानात्मनि योजयेत् ॥ निर्माल्यापनयस्थानं लिम्पेद्गोमयवारिणा ॥ प्रोक्ष्यार्घ्यादि विसृज्याथ स्वाचान्तोऽन्यत्समाचरेत् ॥ १४ ॥ इत्यादि महापुराणे आग्नेये चण्डपूजाविधानं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ अथ कपिलापूजादिविधानम् ॥ ईश्वर उवाच ॥ कपिलापूजनं वक्ष्ये एभिर्मन्त्रैर्यजेच्च गाम् ॥ ॐ कपिले नन्दे नमः ॐ कपिले भद्रिके नमः ॥ १ ॥ ॐ कपिले सुशीले नमः कपिले सुरभि प्रभे ॥ ॐ कपिले सुमनसे नमः ॐ भुक्तिमुक्तिप्रदे नमः ॥ २ ॥ सौरभेयि जगन्मातर्देवानाममृतप्रदे ॥ गृहाण वरदे ग्रासमीप्सितार्थं च देहि मे ॥ ३ ॥ वन्दिताऽसि वसिष्ठेन विश्वामित्रेण धीमता ॥ कपिले हर मे पापं यन्मया दुष्कृतं कृतम् ॥ ४ ॥ गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ॥ गावो मे हृदये चापि गवां मध्ये वसाम्यहम् ॥ ५ ॥ दत्तं गृह्णन्तु मे ग्रासं जग्ध्वा स्यां निर्म्मलः शिवः ॥ प्रार्च्य

विद्यापुस्तकानि गुरुपादौ नमेन्नरः ॥ ६ ॥ यजेत्स्नात्वा तु मध्याह्ने अष्टपुष्पिकया शिवम् ॥ पीठमूर्त्तिशिवाङ्गानां पूजा स्यादष्ट-
पुष्पिका ॥ ७ ॥ मध्याह्ने भोजनागारे सुलिप्ते पाकमानयेत् ॥ ततो मृत्युञ्जयेनैव वौषडन्तेन सप्तधा ॥ ८ ॥ जतैः सदर्भश-
ङ्खस्थैः सिञ्चेत्तं वारिन्बिदुभिः ॥ सर्वपाकाग्रमुद्धृत्य शिवाय विनिवेदयेत् ॥ ९ ॥ अथार्द्धं चुल्लिकाहोमे विधानायोपकल्पयेत् ॥
विशोध्य विधिना चुल्लीं तद्वह्निं पूरकाहुतिम् ॥ १० ॥ हुत्वा नाभ्याग्निना चैकं ततो रेचकवायुना ॥ वह्निबीजं समादाय कादि-
स्थानगतिक्रमात् ॥ ११ ॥ शिवाग्निस्त्वमिति ध्यात्वा चुल्लिकाग्नौ निवेशयेत् ॥ ॐ हाम् अग्नये नमो वै हां सोमाय वै नमः
॥ १२ ॥ सूर्य्याय बृहस्पतये प्रजानां पतये नमः ॥ सर्वेभ्यश्चैव देवेभ्यः सर्वविश्वेभ्य एव च ॥ १३ ॥ हामग्नये स्विष्टकृते पूर्वा-
दावर्चयेदिमान् ॥ स्वाहान्तामाहुतिं दत्त्वा क्षमयित्वा विसर्जयेत् ॥ १४ ॥ चुल्ल्या दक्षिणबाहौ च यजेद्धर्म्माय वै नमः ॥ वाम-
बाहावधर्माय काञ्जिकादिकभाण्डके ॥ १५ ॥ रसपरिवर्त्तमानाय वरुणाय जलाग्नये ॥ विन्नराजो गृहद्वारे पेषण्यां सुभगे नमः
॥ १६ ॥ ॐ रौद्रिके नमो गिरिके नमश्चोलूखले यजेत् ॥ बलप्रियायायुधाय नमस्ते मुसले यजेत् ॥ १७ ॥ सम्मार्ज्जन्यां
देवतोक्ते कामाय शयनीयके ॥ मध्यस्तम्भे च स्कन्दाय दत्त्वा वास्तुबलिं ततः ॥ १८ ॥ भुञ्जीत पात्रे सौवर्णे पद्मिन्यादिदलो-
दिके ॥ आचार्य्यः साधकः पुत्रः समयी मौनमास्थितः ॥ १९ ॥ वटाश्वत्थार्कवातादिसर्ज्जभल्लातकांस्त्यजेत् ॥ आपोशानं
पुरादाय प्राणाद्यैः प्रणवान्वितैः ॥ २० ॥ स्वाहान्तेनाहुतीः पञ्च दत्त्वादीप्योदरानलम् ॥ नागः कूर्म्मोऽथ कृकरो देवदत्तो
धनञ्जयः ॥ २१ ॥ एतेभ्य उपवायुभ्यः स्वाहापोशानवारिणा ॥ भक्तादिकं निवेद्याथ पिबेच्छेषोदकं नरः ॥ २२ ॥ अमृतो-
पस्तरणमसि प्राणाहुतीस्ततो ददेत् ॥ प्राणाय स्वाहाऽपानाय समानाय ततस्तथा ॥ २३ ॥ उदानाय च व्यानाय भुक्त्वा
चुल्लकमाचरेत् ॥ अमृतापिधानमसीति शरीरेऽन्नादिवायवः ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये कपिलापूजादिविधानं नाम
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ अथ पवित्राधिवासनम् ॥ ईश्वर उवाच ॥ पवित्रारोहणं वक्ष्ये क्रियार्च्चादिषु पूरणम् ॥ नित्यं
तन्नित्यमुद्दिष्टं नैमित्तिकमथापरम् ॥१॥ आषाढादिचतुर्दश्यामथ श्रावणभाद्रयोः॥ सितासितासु कर्त्तव्यं चतुर्दश्यष्टमीषु तत्॥२॥

कुर्य्याद्वा कार्तिकीं यावत्तिथौ प्रतिपदादिके ॥ वह्निब्रह्माम्बिकेभास्यनागस्कन्दार्कशूलिनाम् ॥ ३ ॥ दुर्गायमेन्द्रगो-
विन्दस्मरशम्भुसुधाभुजाम् ॥ सौवर्णं राजतं ताम्रं कृतादिषु यथाक्रमम् ॥ ४ ॥ कलौ कार्प्पासजं वापि पट्टपद्मादिसूत्रकम् ॥
प्रणवश्चन्द्रमा वह्निर्ब्रह्मा नागो ग्रहो हरिः ॥ ५ ॥ सर्वेशः सर्वदेवाः स्युः क्रमेण नवतन्तुषु ॥ अष्टोत्तरशतान्यर्द्धं तदर्धं चोत्तमा-
दिकम् ॥ ६ ॥ एकाशीत्याऽथवा सूत्रैस्त्रिंशताऽप्यष्टयुक्तया ॥ पञ्चाशता वा कर्त्तव्यं तुल्यग्रन्थ्यन्तरालकम् ॥ ७ ॥ द्वादशाङ्गुल-
मानानि व्यासादष्टाङ्गुलानि च ॥ लिङ्गविस्तारमानानि चतुरङ्गुलकानि वा ॥ ८ ॥ तथैव पिण्डिकास्पर्शं चतुर्थं सर्वदेवतम् ॥
गङ्गावतारकं कार्य्यं सुजातेन सुधौतकम् ॥ ९ ॥ ग्रन्थिं कुर्य्याच्च वामेन अघोरेणाथ शोधयेत् ॥ रञ्जयेत्पुरुषेणैव रक्तचन्दनकु-
ङ्कुमैः ॥ १० ॥ कस्तूरीरोचनाचन्द्रैर्हरिद्रागैरिकादिभिः ॥ ग्रन्थयो दश कर्त्तव्या अथवा तन्तुसङ्ख्यया ॥ ११ ॥ अन्तरं वा
यथाशोभमेकद्विचतुरङ्गुलम् ॥ प्रकृतिः पौरुषी वीरा चतुर्थी त्वपराजिता ॥ १२ ॥ जयाऽन्या विजया षष्ठी अजिता च सदा-
शिवा ॥ मनोन्मनी सर्वमुखी ग्रन्थयोऽभ्यधिकाः शुभाः ॥ १३ ॥ कार्य्या वा चन्द्रवह्न्यर्कपवित्रे शिववद्वदि ॥ एकैकं निज-
मूर्त्तौ वा पुस्तके गुरुके गणे ॥ १४ ॥ स्यादेकैकं तथा द्वारादिक्पालकलशादिषु ॥ हस्तादिनवहस्तान्तं लिङ्गानां स्यात्पवित्रकम्
॥ १५ ॥ अष्टाविंशतितो वृद्धं दशभिर्दशभिः क्रमात् ॥ द्व्यङ्गुलाभ्यन्तरास्तत्र क्रमादेकाङ्गुलान्तराः ॥ १६ ॥ ग्रन्थ्यो मानमप्येषां
लिङ्गविस्तारसम्मितम् ॥ सप्तम्यां वा त्रयोदश्यां कृतनित्यक्रियः शुचिः ॥ १७ ॥ भूषयेत्पुष्पवस्त्राद्यैः सायाह्ने यागमन्दिरम् ॥ कृत्वा
नैमित्तिकीं सन्ध्यां विशेषेण च तर्पणम् ॥ १८ ॥ परिगृहीते भूभागे पवित्रे सूर्य्यमर्चयेत् ॥ आचम्य सकलीकृत्य प्रणवार्घ्य-
करो गुरुः ॥ १९ ॥ द्वाराण्यस्त्रेण सम्प्रोक्ष्य पूर्वादिक्रमतोऽर्चयेत् ॥ हां शान्तिकलाद्वाराय तथा विद्याकलात्मने ॥ २० ॥ निवृत्ति-
कलाद्वाराय प्रतिष्ठाख्यकलात्मने ॥ तच्छाखयोः प्रतिद्वारं द्वौ द्वौ द्वाराधिपौ यजेत् ॥ २१ ॥ नन्दिने महाकालाय भृङ्गिणेऽथ
गणाय च ॥ वृषभाय च स्कन्दाय देव्यै चण्डाय च क्रमात् ॥ २२ ॥ नित्यं च द्वारपालादीन्प्राविश्य द्वारपश्चिमे ॥ इष्ट्वा वास्तुं
भूतशुद्धिं विशेषार्घ्यकरः शिवः ॥ २३ ॥ प्रोक्षणाद्यं विधायाथ यज्ञसम्भारकृन्नरः ॥ मन्त्रयेद्भर्भदूर्वाद्यैः पुष्पाद्यैश्च हृदादिभिः ॥ २४ ॥

शिवहस्तं विधायेत्थं स्वशिरस्याधिरोपयेत् ॥ शिवोऽहमादिः सर्वज्ञो मम यज्ञप्रधानता ॥ २५ ॥ अत्यर्थं भावयेद्देवं ज्ञानखड्गकरो गुरुः ॥ नैर्ऋतीं दिशमासाद्य प्रक्षिपेदुदगाननः ॥ २६ ॥ अर्घ्याम्बु पञ्चगव्यं च समंतान्मखमण्डपे ॥ चतुष्पथान्तसंस्कारैर्वीक्षणाद्यैः सुसंस्कृतैः ॥ २७ ॥ विक्षिप्य विकिरांस्तत्र कुशकूर्च्चोपसंहरेत् ॥ तानीशदिशि वर्द्धन्यामासनायोपकल्पयेत् ॥ २८ ॥ नैर्ऋते वास्तुगीर्वाणान्द्वारे लक्ष्मीं प्रपूजयेत् ॥ पश्चिमाभिमुखं कुम्भं सर्वधान्योपरि स्थितम् ॥ २९ ॥ प्रणवेन वृषारूढं सिंहस्थां वर्द्धनीं ततः ॥ कुम्भे साङ्गं शिवं देवं वर्द्धन्यामस्त्रमर्चयेत् ॥ ३० ॥ दिक्षु शक्रादिदिक्पालान्विष्णुब्रह्मशिवादिकान् ॥ वर्द्धनीं सम्यगादाय घटपृष्ठानुगामिनीम् ॥ ३१ ॥ शिवाज्ञां श्रावयेन्मन्त्री पूर्वादीशानगोचराम् ॥ अविच्छिन्नपयोधारां मूलमन्त्रमुदीरयेत् ॥ ३२ ॥ समन्ताद्भ्रामयेदेनां रक्षार्थं शस्त्ररूपिणीम् ॥ पूर्वं कलशमारोप्य शस्त्रार्थं तस्य वामतः ॥ ३३ ॥ समग्रासनके कुम्भे यजेद्देवं स्थिरासने ॥ वर्द्धन्यां प्रणवस्थायामायुधं तदनु द्वयोः ॥ ३४ ॥ भगलिंगसमायोगं विदध्याल्लिंगमुद्रया ॥ कुम्भे निवेद्य बोधांसि मूलमन्त्रजपं तथा ॥ ३५ ॥ तद्दशांशन वर्द्धन्यां रक्षां विज्ञापयेदपि ॥ गणेशं वायवेऽभ्यर्च्य हरं पञ्चामृतादिभिः ॥ ३६ ॥ स्नापयेत्पूर्ववत्प्रार्च्य कुण्डे च शिवपावकम् ॥ विधिवच्च चरुं कृत्वा सम्पाताहुतिशोधितम् ॥ ३७ ॥ देवाग्न्यात्मविभेदेन दर्व्या तं विभजेत्त्रिधा ॥ दत्त्वा भागौ शिवाग्निभ्यां संरक्षेद्भागमात्मनि ॥ ३८ ॥ शरेण वर्मणां देयं पूर्वतो दन्तधावनम् ॥ तस्माद्घोरशिखाभ्यां वा दक्षिणे पश्चिमे मृदम् ॥ ३९ ॥ सद्योजातेन च हृदा चोत्तरे वामनीकृतम् ॥ जलं वामेन शिरसा ईशे गंधान्वितं जलम् ॥ ४० ॥ पंचगव्यं पलाशादिपुटकं वै समन्ततः ॥ ऐशान्यां कुसुमं दद्यादाग्नेय्यां दिशि रोचनाम् ॥ ४१ ॥ अगुरुं नैर्ऋताशायां वायव्यां च चतुःसमम् ॥ होमद्रव्याणि सर्वाणि सद्यो जातैः कुशैः सह ॥ ४२ ॥ दण्डाक्षसूत्रकौपीनभिक्षापात्राणि रूपिणे ॥ कज्जलं कुङ्कुमं तैलं शलाकां केशशोधिनीम् ॥ ४३ ॥ तांबूलं दर्पणं दद्यादुत्तरे रोचनामपि ॥ आसनं पादुके पात्रं योगपट्टातपत्रकम् ॥ ४४ ॥ ऐशान्यामीशमन्त्रेण दद्यादीशानतुष्टये ॥ पूर्वस्यां चरुकं साज्यं दद्याद्वन्धादिकं नवे ॥ ४५ ॥ पवित्राणि समादाय प्रोक्षितान्यर्घ्यवारिणा ॥ संहितामंत्रपूतानि नीत्वा पावकसन्निधिम् ॥ ४६ ॥ कृष्णाजिनादिनाऽऽच्छाद्य स्मरन्संवत्सरात्मकम् ॥ साक्षिणं सर्वकृत्यानां गोप्तारं शिवमव्ययम् ॥ ४७ ॥ स्वोति

हेति प्रयोगेण मन्त्रसंहितया पुनः ॥ शोधयेच्च पवित्राणि वाराणामेकविंशतिम् ॥ ४८ ॥ गृहादि वेष्टयेत्सूत्रैर्गन्धाद्यं रवये ददेत् ॥
पूजिताय समाचम्य कृतन्यासः कृतार्घ्यकः ॥४९॥ नन्द्यादिभ्योऽथ गन्धाख्यं वास्तोश्चाथ प्रविश्य च ॥ शस्त्रेभ्यो लोकपालेभ्यः
स्वनाम्ना शिवकुम्भके ॥ ५० ॥ वर्द्धन्यै विघ्नराजाय गुरवे ह्यात्मने यजेत् ॥ अथ सर्वौषधिलिप्तं धूपितं पुष्पदूर्वया ॥ ५१ ॥ आमन्त्र्य
च पवित्रं तद्विधायाञ्जलिमध्यगम् ॥ ओं समस्तविधिच्छिद्रपूरणे च विधिं प्रति ॥ ५२ ॥ प्रभवान्मन्त्रयामि त्वां त्वदिच्छावाप्ति-
कारिकाम् ॥ तत्सिद्धिमनुजानीहि यजतश्चिदचित्सते ॥५३॥ सर्वथा सर्वदा शम्भो नमस्तेऽस्तु प्रसीद मे ॥ आमन्त्रितोऽसि देवेश
सह देव्या गणेश्वरैः ॥५४॥ मन्त्रेशैर्लोकपालैश्च सहितः पारिचारकैः ॥ निमन्त्रयाम्यहं तुभ्यं प्रभाते तु पवित्रकम् ॥५५॥ नित्यं च
करिष्यामि परमेश तवाज्ञया ॥ इत्येवं देवमामन्त्र्य रेचकेनामृतीकृतम् ॥ ५६ ॥ शिवान्तं मूलमुच्चार्य्य तच्छिवाय निवेदयेत् ॥
जपं स्तोत्रं प्रणामं च कृत्वा शंभुं क्षमापयेत् ॥५७॥ हुत्वा चरोस्तृतीयांशं तद्दद्यात शिवाग्नये ॥ दिग्वासिभ्यो दिगीशेभ्यो भूतमातृ-
गणेभ्य उ ॥५८॥ रुद्रेभ्यः क्षेत्रपादिभ्यो नमः स्वाहा बलिस्त्वयम् ॥ दिङ्नागाद्यैश्च पूर्वादौ क्षेत्राय चाग्नये बलिः ॥ ५९ ॥ समा-
चम्य विधिच्छिद्रपूरकं होममाचरेत् ॥ पूर्णां व्याहृतिहोमं च कृत्वा रुन्धीत पावकम् ॥६०॥ तत ओमग्नये स्वाहा स्वाहा सोमाय
चैव हि ॥ ओमग्नीषोमाभ्यां स्वाहाऽग्नये स्विष्टकृते तथा ॥६१॥ इत्याहुतिचतुष्कं तु दत्त्वा कुर्य्यात्तु योजनाम् ॥ वह्निकुण्डार्चितं
देवं मण्डलाभ्यर्चिते शिवे ॥ ६२ ॥ नाडीसन्धानरूपेण विधिना योजयेत्ततः ॥ वंशादिपात्रे विन्यस्य अस्त्रं च हृदयं ततः ॥६३॥
अधिरोप्य पवित्राणि कलाभिर्वाऽथ मन्त्रयेत् ॥ षडङ्गं ब्रह्ममूलैर्वा हृद्धर्म्मास्त्रं च योजयेत् ॥ ६४ ॥ विधाय सूत्रैः संवेष्टय पूजयि-
त्वाऽङ्गसम्भवैः ॥ रक्षार्थं जगदीशाय भक्तिनम्रः समर्पयेत् ॥ ६५ ॥ पूजिते पुष्पधूपाद्यैर्दत्त्वा सिद्धान्तपुस्तके ॥ गुरोः पादान्तिकं
गत्वा भक्त्या दद्यात्पवित्रकम् ॥ ६६ ॥ निर्गत्य बहिराचम्य गोमये मण्डलत्रये ॥ पञ्चगव्यं चरुं दन्तधावनं च क्रमाद्यजेत् ॥ ६७ ॥
आचान्तो मन्त्रसंबद्धः कृतसङ्गीतजागरः ॥ स्वपेदन्तः स्मरन्नीशं बुभुक्षुर्दर्भसंस्तरे ॥ ६८ ॥ अनेनैव प्रकारेण मुमुक्षुरपि संविशेत् ॥
केवलं भस्मशय्यायां सोपवासः समाहितः ॥६९॥ इत्यादिमहापुराणे आग्नेयं पवित्रारोहणविधिर्नामाष्टसप्ततितमोऽध्यायः ॥७८॥

अथ पवित्रारोहणविधिः ॥ ईश्वर उवाच ॥ अथ प्रातः समुत्थाय कृतस्नानः समाहितः ॥ कृतसन्ध्यार्चनो मन्त्री प्रविश्य मखमण्डपम् ॥१॥ समादाय पवित्राणि अविसर्जितदैवतः ॥ ऐशान्यां भाजने शुद्धे स्थापयेत्कृतमंडले ॥२॥ ततो विसर्ज्य देवेशं निर्माल्यमपनीय च ॥ पूर्ववद्भूतले शुद्धे कृत्वाह्निकमथ द्वयम् ॥ ३ ॥ आदित्यद्वारदिक्पालकुंभेशानौ शिवेऽनले ॥ नैमित्तिकीं सविस्तारां कुर्य्यात्पूजां विशेषतः ॥ ४ ॥ मन्त्राणां तर्पणं प्रायश्चित्तहोमं शरात्मना ॥ अष्टोत्तरशतं कृत्वा दद्यात्पूर्णाहुतिं शनैः ॥ ५॥ पवित्रं भानवे दत्त्वा समाचम्य ददीत च ॥ द्वारपालादिदिक्पालकुम्भवर्द्धनिकादिषु ॥ ६ ॥ सन्निधाने ततः शम्भोरुपविश्य निजासने ॥ पवित्रमात्मने दद्याद्गणाय गुरुवह्नये ॥ ७ ॥ ॐ कालात्मना त्वया देव यद्दृष्टं मामके विधौ ॥ कृतं क्लिष्टं समुत्सृष्टं कृतं गुप्तं च यत्कृतम् ॥ ८ ॥ तदस्तु क्लिष्टमक्लिष्टं कृतं क्लिष्टमसंस्कृतम् ॥ सर्वात्मनाऽमुना शम्भो पवित्रेण त्वदिच्छया ॥ ९ ॥ ॐ पूरय मखव्रतं नियमेश्वराय स्वाहा ॥ आत्मतत्त्वे प्रकृत्यन्ते पालिते पद्मयोनिना ॥ १० ॥ मूलं लयान्तमुच्चार्य्य पवित्रेणार्चयेच्छिवम् ॥ विद्यातत्त्वे च विद्यान्ते विष्णुकारणपालिते ॥ ११ ॥ ईश्वरान्तं समुच्चार्य्य पवित्रमधिरोपयेत् ॥ शिवान्ते शिवतत्त्वे च रुद्रकारणपालिते ॥ १२ ॥ शिवान्तं मन्त्रमुच्चार्य तस्मै देयं पवित्रकम् ॥ सर्वकारणपालेषु शिवमुच्चार्य्य सुव्रतः ॥ १३॥ मूलं लयान्तमुच्चार्य्य दद्याद्गङ्गावतारकम् ॥ आत्मविद्या शिवः प्रोक्तं मुमुक्षूणां पवित्रकम् ॥ १४ ॥ विनिर्दिष्टं बुभुक्षूणां शिवतत्त्वात्ममिः क्रमात् ॥ स्वाहान्तं वा नमोऽन्तं वा मन्त्रमेषामुदीरयेत् ॥ १५ ॥ ॐ ह्राम् आत्मतत्त्वाधिपतये शिवाय स्वाहा ॥ ॐ ह्रां विद्यातत्त्वाधिपतये शिवाय स्वाहा ॥ ॐ ह्रीं शिवतत्त्वाधिपतये शिवाय स्वाहा ॥ ॐ ह्रौं सर्वतत्त्वाधिपतये शिवाय स्वाहा ॥ नत्वा गङ्गावतारं तु प्रार्थयेत्तं कृताञ्जलिः ॥ त्वं गतिः सर्वभूतानां संस्थितिस्त्वं चराचरे ॥ १६ ॥ अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वर ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ १७ ॥ मन्त्रहीनं क्रियाहीनं द्रव्यहीनं च यत्कृतम् ॥ जपहोमार्चनैर्हीनं कृतं नित्यं मया तव ॥ १८ ॥ अकृतं वाक्यहीनं च तत्पूरय महेश्वर ॥ सुपूतस्त्वं परेशान पवित्रं पापनाशनम् ॥ १९ ॥ त्वया पवित्रितं सर्वं जगत्स्थावरजङ्गमम् ॥ खण्डितं यन्मया देव व्रतं वैकल्ययोगतः ॥ २० ॥ एकीभवतु तत्सर्वं तवाज्ञासूत्रगु-

म्फितम् ॥ जपं निवेद्य देवस्य भक्त्या स्तोत्रं विधाय च ॥ २१ ॥ नत्वा तु गुरुणा दिष्टं गृह्णीयान्नियमं नरः ॥ चतुर्मासं त्रिमासं वा त्र्यहमेकाहमेव च ॥ २२ ॥ प्रणम्य क्षमयित्वेशं गत्वा कुण्डान्तिकं व्रती ॥ पावकस्थे शिवेऽप्येवं पवित्राणां चतुष्टयम् ॥ २३ ॥ समारोप्य समभ्यर्च्य पुष्पधूपाक्षतादिभिः ॥ अन्तर्बलिं पवित्रं च रुद्रादिभ्यो निवेदयेत् ॥ २४ ॥ प्रविश्यान्तः शिवं स्तुत्वा सप्रणामं क्षमापयेत् ॥ प्रायश्चित्तकृतं होमं कृत्वा हुत्वा च पायसम् ॥ २५ ॥ शनैः पूर्णाहुतिं दत्त्वा वह्निस्थं विसृजेच्छिवम् ॥ होमं व्याहृतिभिः कृत्वा रुन्ध्यान्निष्ठुरयाऽनलम् ॥ २६ ॥ अग्न्यादिभ्यस्तता दद्यादाहुतीनां चतुष्टयम् ॥ दिक्पतिभ्यस्ततो दद्यात्सपवित्रं बहिर्बलिम् ॥ २७ ॥ सिद्धान्तपुस्तके दद्यात्सप्रमाणं पवित्रकम् ॥ ॐ हां भूः स्वाहा ॥ ॐ हां भुवः स्वाहा ॥ ओं हां स्वः स्वाहा ॥ ओं हां भूर्भुवः स्वः स्वाहा ॥ होमं व्याहृतिभिः कृत्वा दत्त्वाऽऽहुतिचतुष्टयम् ॥ २८ ॥ ओं हाम् अग्नये स्वाहा । ओं हां सोमाय स्वाहा । ओं हाम् अग्नीषोमाभ्यां स्वाहा । ओं हाम् अग्नये स्विष्टकृते स्वाहा । गुरुं शिवमिवाभ्यर्च्य वस्त्रभूषादिविस्तरैः ॥ समग्रं सफलं तस्य क्रियाकाण्डादिवार्षिकम् ॥ २९ ॥ यस्य तुष्टो गुरुः सम्यगित्याह परमेश्वरः ॥ इत्थं गुरोः समारोप्य हृदालम्बिपवित्रकम् ॥ ३० ॥ द्विजादीन्भोजयित्वा तु भक्त्या वस्त्रादिकं ददेत् ॥ दानेनानेन देवेशः प्रीयतां मे सदाशिवः ॥ ३१ ॥ भक्त्या स्नानादिकं प्रातः कृत्वा शम्भोः समाहरेत् ॥ पवित्राण्यष्टपुष्पैस्तं पूजयित्वा विसर्जयेत् ॥ ३२ ॥ नित्यं नैमित्तिकं कृत्वा विस्तरेण यथा पुरा ॥ पवित्राणि समारोप्य प्रणम्याग्नौ शिवं यजेत् ॥ ३३ ॥ प्रायश्चितं ततोऽस्त्रेण हुत्वा पूर्णाहुतिं यजेत् ॥ भुक्तिकामः शिवायाथ कुर्य्यात्कर्म्मसमर्पणम् ॥ ३४ ॥ त्वत्प्रसादेन कर्म्मेदं ममाऽस्तु फलसाधकम् ॥ मुक्तिकामस्तु कर्म्मेदं माऽस्तु मे नाथ बन्धकम् ॥ ३५ ॥ वह्निस्थं नाडियोगेन शिवं संयोजयेच्छिवे ॥ हृदि न्यस्याग्निसङ्घातं पावकं च विसर्जयेत् ॥ ३६ ॥ समाचम्य प्रविश्यान्तः कुम्भानुगतसंवरान् ॥ शिवं संयोज्य साक्षेपं क्षमस्वेति विसर्जयेत् ॥ ३७ ॥ विसृज्य लोकपालादीनादायेशात्पवित्रकम् ॥ सति चण्डेश्वरे पूजां कृत्वा दत्त्वा पवित्रकम् ॥ ३८ ॥ तन्निर्म्माल्यादिकं तस्मै सपवित्रं समर्पयेत ॥ अथवा स्थण्डिले चण्डं विधिना पूर्ववद्यजेत् ॥ ३९ ॥ यत्किञ्चिद्वार्षिकं कर्म कृतं न्यूनाधिकं मया ॥ तदस्तु

परिपूर्णं मे चण्ड नाथ तवाज्ञया ॥ ४० ॥ इति विज्ञाप्य देवेशं नत्वा स्तुत्वा विसर्जयेत् ॥ त्यक्तनिर्म्मांल्यकः शुद्धः स्नापयित्वा शिवं यजेत् ॥ पञ्चयोजनसंस्थोऽपि पवित्रं गुरुसन्निधौ ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये पवित्रारोहणविधिर्नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ अथ दमनकारोहणविधिः ॥ ईश्वर उवाच ॥ वक्ष्ये दमनकारोहाविधिं पूर्ववदाचरेत् ॥ हरकोपात्पुरा जातो भैरवो दमिताः सुराः ॥ १ ॥ तेनाथ शप्तो विटपो भवेति त्रिपुरारिणा ॥ प्रसन्नेनेरितं चेदं पूजयिष्यन्ति ये नराः ॥२॥ परिपूर्णं फलं तेषां नान्यथा ते भविष्यति ॥ सप्तम्यां वा त्रयोदश्यां दमनं सहितात्मभिः ॥ ३ ॥ सम्पूज्य बोधयेद्वृक्षे भववाक्येन मन्त्रवित् ॥ हरप्रसादसम्भूत त्वमत्र सन्निधौ भव ॥ ४ ॥ शिवकार्य्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ॥ गृहेऽप्यामन्त्रणं कुर्य्यात्साधाह्ने चाधिवासनम् ॥ ५ ॥ यथाविधि समभ्यर्च्य सूर्य्यशङ्करपावकम् ॥ देवस्य पश्चिमे मूलं दद्यात्तस्य मृदा युतम् ॥ ६ ॥ वामेन शिरसा वाऽथ नालं धात्रीं तथोत्तरे ॥ दक्षिणे भग्नपत्रं च प्राच्यां पुष्पं च धारणम् ॥ ७ ॥ पुटिकास्थं फलं मूलमथैशान्यां यजेच्छिवम् ॥ पञ्चाङ्गमञ्जलौ कृत्वा आमन्त्र्य शिरसि न्यसेत् ॥ ८ ॥ आमन्त्रितोऽसि देवेश प्रातःकाले मया प्रभो ॥ कर्त्तव्यस्तपसो लाभः पूर्णं सर्वं तवाज्ञया ॥ ९॥ मूलेन शेषं पात्रस्थं पिधायाथ पवित्रकम् ॥ प्रातः स्नात्वा जगन्नाथं गन्धपुष्पादिभिर्यजेत् ॥ १० ॥ नित्यं नैमित्तिकं कृत्वा दमनैः पूजयेत्ततः ॥ शेषमञ्जलिनादाय आत्मविद्याशिवात्मभिः ॥ ११ ॥ मूलाद्यैरीश्वरान्तैश्च चतुर्थाञ्जलिना ततः ॥ ओं ह्रौं मखेश्वराय मखं पूरय पूरय शूलपाणये नमः ॥ शिवं वह्निं च सम्पूज्य गुरुं प्राच्यार्थ बोधयेत् ॥१२॥ भगवन्नतिरिक्तं वा हीनं वा यन्मया कृतम् ॥ सर्वं तदस्तु सम्पूर्णं यच्च दामनकं मम ॥ सकलं चैत्रमासोत्थं फलं प्राप्य दिवं व्रजेत् ॥१३ ॥ इत्यादिमहापुराणे आग्नेये दमनकारोहणविधिर्नामाशीतितमोऽध्यायः ॥८० ॥ अथ समयदीक्षाविधानम् ॥ ईश्वर उवाच ॥ वक्ष्यामि भोगमोक्षाथ दीक्षां पापक्षयङ्करीम् ॥ मलमायादिपाशानां विश्लेषः क्रियते यया ॥ १ ॥ ज्ञानं च जन्यते शिष्ये सा दीक्षा भुक्तिमुक्तिदा ॥ विज्ञातकलनामैको द्वितीयः प्रलयाकलः ॥ २ ॥ तृतीयः सकलः शास्त्रेऽनुग्राह्यस्त्रिविधो मतः ॥ तत्राद्यो मलमात्रेण मुक्तोऽन्यो मलकर्मभिः ॥ ३ ॥ कलादिभूमिपर्य्यंतं स्तवैस्तु सकलो युतः ॥ निराधाराऽथ साधारा दीक्षाऽपि

द्विविधा मता ॥ ४ ॥ निराधारा द्वयोस्तेषां साधारा सकलस्य तु ॥ आधारनिरपेक्षेण क्रियते शम्भुचर्य्यया ॥ ५ ॥ तीव्रशक्तिनिपातेन निराधारेति सा स्मृता ॥ आचार्य्यमूर्त्तिमास्थाय मायातीव्रादिभेदया ॥ ६ ॥ शक्त्या यां कुरुते शम्भुः सा साधिकरणोच्यते ॥ इयं चतुर्विधा प्रोक्ता सबीजा बीजवर्जिता ॥७॥ साधिकारानधिकारा यथा तदभिधीयते ॥ समयाचारसंयुक्ता सबीजा जायते नृणाम् ॥ ८ ॥ निर्बीजा त्वसमर्थानां समयाचारवर्जिता ॥ नित्ये नैमित्तिके काम्ये यतः स्यादधिकारिता ॥ ९ ॥ साधिकारा भवेद्दीक्षा साधकाचार्य्ययोरतः ॥ निर्बीजा दीक्षितानां तु यदा समयपुत्रयोः ॥ १० ॥ नित्यमात्राधिकारत्वाद्दीक्षा निराधिकारिका ॥ द्विविधेयं द्विरूपा हि प्रत्येकमुपजायते ॥ ११ ॥ एका क्रियावती तत्र कुण्डमण्डलपूर्विका ॥ मनोव्यापारमात्रेण या सा ज्ञानवती मता ॥ १२ ॥ इत्थं लब्धाधिकारेण दीक्षाऽऽचार्य्येण साध्यते ॥ स्कन्ददीक्षां गुरुः कुर्य्यात्कृत्वा नित्यक्रियां ततः ॥ १३ ॥ प्रणवार्घ्यकराम्भोजः कृतद्वाराधिपार्च्चनः ॥ विघ्नानुत्सार्य्य देहल्यां न्यस्यास्त्रं स्वासने स्थितः ॥ १४ ॥ कुर्वीत भूतसंशुद्धिं मन्त्रयोगं यथोदितम् ॥ तिलंतण्डुलसिद्धार्थकुशदूर्वाक्षतोदकम् ॥ १५ ॥ सयवक्षीरनीरं च विशेषार्घ्यमिदन्ततः ॥ तदम्बुना द्रव्यशुद्धिं तिलकं स्वासनात्मनोः ॥ १६ ॥ पूजनं मन्त्रशुद्धिं च पञ्चगव्यं च पूर्ववत् ॥ लाजचन्दनसिद्धार्थभस्मदूर्वाक्षतं कुशान् ॥ १७ ॥ विकिराञ्शुद्धलाजांस्तान्संधूपानस्त्रमन्त्रितान् ॥ शस्त्राम्बुप्रोक्षितानेतान्कवचेनावगुण्ठितान् ॥ १८ ॥ नानाप्रहरणाकारान्विघ्नौघविनिवारकान् ॥ दर्भाणां तालमानेन कृत्वा षट्त्रिंशता दलैः ॥ १९ ॥ सप्तजप्तं शिवास्त्रेण वेणीं बोधासिमुत्तमम् ॥ शिवमात्मनि विन्यस्य सृष्ट्याधारमभीप्सितम् ॥ २० ॥ निष्कलं च शिवं न्यस्य शिवोऽहमिति भावयेत् ॥ उष्णीषं शिरसि न्यस्य अलंकुर्य्यात्स्वदेहकम् ॥ २१ ॥ गन्धमण्डनकं स्वीये विदध्यादक्षिणे करे ॥ विधिनाऽत्रार्च्चयेदीशमित्थं स्याच्छिवमस्तकम् ॥ २२ ॥ विन्यस्य शिवमन्त्रेण भास्वरं निजमस्तके ॥ शिवादभिन्नमात्मानं कर्त्तारं भावयेद्यथा ॥ २३ ॥ मण्डले कर्म्मणां साक्षी कलशे यज्ञरक्षकः ॥ होमाधिकरणं वह्नौ शिष्ये पाशविमोचकः ॥ २४ ॥ स्वात्मन्यनुगृहीतोति षडाधारो य ईश्वरः ॥ सोऽहमेवेति कुर्वीत भावं स्थिरतरं पुनः ॥ २५ ॥ ज्ञानखड्गकरः स्थित्वा नैर्ऋत्याभिमुखो नरः ॥ सार्घ्याम्बुपञ्च-

गव्याभ्यां प्रोक्षयेद्यागमण्डपम् ॥ २६ ॥ चतुष्पथान्तसंस्कारैः संस्कुर्य्यादीक्षणादिभिः ॥ विक्षिप्य विकिरांस्तत्र कुशकूर्च्चोप-
संहरेत् ॥ २७ ॥ तानीशादिशि वर्द्धन्यामासनायोपकल्पयेत् ॥ नैर्ऋते वास्तुगीर्वाणान्द्वारे लक्ष्मीं प्रपूजयेत् ॥ २८ ॥ आप्ये
रत्नैः पूरयन्तीं हृदा मण्डपरूपिणीम् ॥ साम्बुवस्त्रे सरत्ने च धान्यास्ये पश्चिमानने ॥ २९ ॥ ऐशे कुम्भे यजेच्छम्भुं शक्तिं
कुम्भस्य दक्षिणे ॥ पश्चिमस्यां तु सिंहस्थां वर्द्धनीं खड्गरूपिणीम् ॥ ३० ॥ दिक्षु शक्रादिदिक्पालान्विष्वक्सेनान्प्रणवासनान् ॥
वाहनायुधसंयुक्तान्हृदाऽभ्यर्च्च्य स्वनामभिः ॥ ३१ ॥ प्रथमं तां समादाय कुम्भस्याग्राभिगामिनीम् ॥ अविच्छिन्नपयोधारां
भ्रामयित्वा प्रदक्षिणम् ॥ ३२ ॥ शिवाज्ञां लोकपालानां श्रावयेन्मूलमुच्चरन् ॥ संरक्षत यथायोगं कुम्भं धृत्वाऽथ तां धरेत् ॥ ३३ ॥
ततः स्थिरासने कुम्भे साङ्गं सम्पूज्य शङ्करम् ॥ विन्यस्य शोध्यमघ्वानं वर्द्धन्यामस्त्रमर्च्चयेत् ॥ ३४ ॥ ॐ हः अस्त्रासनाय हूं फट् ॥
ॐ ॐ अस्त्रमूर्त्तये नमः । ॐ हूं फट् पाशुपतास्त्राय नमः । ॐ ॐ हृदयाय हूं फट् नमः । ॐ श्रीं शिरसे हूं फट् नमः । ॐ यं शिखा-
ये हूं फट् नमः । ॐ गूं कवचाय हूं फट् नमः । ॐ फट् अस्त्राय हूं फट् नमः । चतुर्वक्त्रं सदंष्ट्रं च स्मरेदस्त्रं सशक्तिकम् ॥ समुद्गर-
त्रिशूलासिं सूर्य्यकोटिसमप्रभम् ॥ ३५ ॥ भगलिङ्गसमायोगं विदध्याल्लिङ्गमुद्रया ॥ अङ्गुष्ठेन स्पृशेत्कुम्भं हृदा मुष्ट्यास्त्रवर्द्ध-
नीम् ॥ ३६ ॥ भुक्तये मुक्तये त्वादौ मुष्टिना वर्द्धनीं स्पृशेत् ॥ कुम्भस्य मुखरक्षार्थं ज्ञानखड्गं समर्पयेत् ॥ ३७ ॥ शस्त्रं च मूलम-
न्त्रस्य शत कुम्भे निवेशयेत् ॥ तदंशांशेन वर्द्धन्यां रक्षां विज्ञापयेत्ततः ॥ ३८ ॥ यथेदं कृतयत्नेन भगवन्मखमन्दिरम् ॥ रक्षणीयं
जगन्नाथ सर्वाध्वरधर त्वया ॥ ३९ ॥ प्रणवस्थं चतुर्थांहुं वायव्ये गणमर्च्चयेत् ॥ स्थण्डिले शिवमभ्यर्च्च्य सार्घ्यः कुण्डं व्रजेन्नरः
॥ ४० ॥ निविष्टो मन्त्रतृप्त्यर्थमर्घ्यगन्धघृतादिकम् ॥ वामे सव्ये तु विन्यस्य समिद्भर्भतिलादिकम् ॥ ४१ ॥ कुण्डवह्निसगाज्यादि
प्राग्वत्संस्कृत्य भावयेत् ॥ मुख्यतांमूर्ध्ववक्त्रस्य हृदि वह्नौ शिवं यजेत् ॥ ४२ ॥ स्वमूर्तौ शिवकुंभे च स्थण्डिले त्वग्निशिष्ययोः ॥
सृष्टिन्यासेन विन्यस्य शोध्याध्वानं यथाविधि ॥ ४३ ॥ कुण्डमानं मुखं ध्यात्वा हृदाहुतिभिरीप्सितम् ॥ बीजानि सप्तजिह्वा-
नामग्नेर्होमाय भण्यते ॥ ४४ ॥ विरेफावन्तिमौ वर्णौ रेफषष्ठस्वरान्वितौ ॥ इन्दुबिन्दुशिखायुक्तौ जिह्वाबीजान्युपक्रमात् ॥ ४५ ॥

हिरण्या कनका रक्ता कृष्णा तदनु सुप्रभा ॥ अतिरिक्ता बहुरूपा रुद्रेन्द्राम्याप्यदिङ्मुखाः ॥ ४६ ॥ क्षीरादिमधुरैर्होमं कुर्य्यात्-
च्छान्तिकपौष्टिके ॥ अभिचारे तु पिण्याकसक्तुकश्रुकाज्यिकैः ॥ ४७ ॥ लवणे राजिकातक्रकटुतैलैश्च कण्टकैः ॥ समिद्भिरपि
वक्राभिः क्रुद्धो भाष्याणुना यजेत् ॥ ४८ ॥ कदम्बकलिकाहोमाद्यक्षिणी सिध्यति ध्रुवम् ॥ बन्धूककिंशुकादीनि वश्याकर्षाय
होमयेत् ॥४९॥ बिल्वं राज्यक्षय लक्ष्म्यर्थं पाटलांश्चम्पकानपि ॥ पद्मानि चक्रवर्त्तित्वे भक्ष्यभोज्यानि सम्पदे ॥५०॥ दूर्वा व्याधि-
विनाशाय सर्वसत्त्ववशीकृते ॥ प्रियङ्गु पाटलीपुष्पं चूतपत्रं ज्वरान्तकम् ॥ ५१ ॥ मृत्युञ्जयो मृत्युजित्स्याद्वृद्धिः स्यात्तिलहो-
मतः ॥ रुद्राशान्तिः सर्वशान्त्या अथ प्रस्तुतमुच्यते ॥५२॥ आहुत्यष्टशतर्मूलमङ्गानि तु दशांशतः ॥ सन्तर्पयेत मूलेन दद्यात्पूर्णां
यथा पुरा ॥५३॥ तथा शिष्यप्रवेशाय प्रतिशिष्यं शतं जपेत् ॥ दुर्निमित्तापसाराय सुनिमित्त कृते तथा ॥५४॥ शतद्वयं च होतव्यं
मूलमन्त्रेण पूर्ववत् ॥ मूलाद्यष्टास्त्रमन्त्राणां स्वाहान्तैस्तर्पणं सकृत् ॥ ५५ ॥ शिखासम्पुटितैर्बीजैर्हुंफण्डन्तैश्च दीपनम् ॥
ॐ ह्रौं शिवाय स्वाहेत्यादिमन्त्रैश्च तर्पणम् ॥ ५६ ॥ ॐ हूं ह्रौं ह्रीं शिवाय हूं फडित्यादिदीपनम् ॥ ततः शिवांभसा स्थालीं
क्षालितां वर्मगुण्ठिताम् ॥ ५७ ॥ चन्दनादिसमालब्धां बध्नीयात्कटकं गले ॥ वर्मास्त्रजप्तसद्दर्भपत्राभ्यां चरुसिद्धये ॥ ५८ ॥
मर्माद्यैरासने दत्ते सार्द्धेन्दुकृतमंडले ॥ न्यस्तायां मूर्तिभूतायां भावपुष्पैः शिवं यजेत् ॥ ५९ ॥ वस्त्रबद्धमुखायां वा स्थाल्यां पुष्पै-
र्बहिर्भवैः ॥ चुल्ल्यां पश्चिमवक्त्रायां शुद्धायां वीक्षणादिभिः ॥ ६० ॥ न्यस्ताहङ्कारबीजायां न्यस्तायां कुंडदक्षिणे ॥ धर्माधर्मश-
रीरायां जप्तायां मानुषात्मना ॥ ६१ ॥ स्थालीमारोपयेदस्त्रजप्तां गव्यांबुमार्जिताम् ॥ गव्यं पयोऽस्त्रसंशुद्धं प्रासादशतमंत्रितम्
॥६२॥ तंडुलाञ्छचामकादीनां निक्षिपेत्तत्र तद्यथा ॥ एकशिष्यविधानाय तेषां प्रसृतिपञ्चकम् ॥६३॥ प्रसृतिं प्रसृतिं पश्चाद्वर्द्धयेद्
द्व्यादिषु क्रमात् ॥ कुर्य्याच्चानलमन्त्रेण पिधानं कवचाणुना ॥ ६४ ॥ शिवाग्नौ मूलमंत्रेण पूर्वास्यश्चरुकं पचेत् ॥ सुस्विन्नैस्तत्र
तच्चुल्ल्यां स्रुवमापूर्य सर्पिषा ॥ ६५ ॥ स्वाहान्तैः संहितामन्त्रैर्दत्त्वा तत्राभिघारणम् ॥ संस्थाप्य मण्डले स्थालीं सद्दर्भैऽस्त्राणुना
कृते ॥ ६६ ॥ प्रणवेन पिधायास्यां तदेहं लेपनं हृदा ॥ सुशीतलो भवत्येवं प्राप्य शीताभिघारणम् ॥ ६७ ॥ विदध्यात्संहिता-

मन्त्रैः शिष्यं प्रति सकृत्सकृत् ॥ धर्माद्यासनके हुत्वा कुंडमंडलपश्चिमे ॥ ६८ ॥ संपातं च स्रुचा हुत्वा शुद्धिं संहितया चरेत् ॥ चरुकं सकृदालभ्य तयैव वषडन्तया ॥ ६९ ॥ धेनुमुद्रामृतीभूतं स्थंडिले शान्तिकं नयेत् ॥ साज्यभागं स्वशिष्याणां भागो देवाय वह्नये ॥ ७० ॥ कुर्यात्तु लोकपालादेः समध्वाज्यमिदं त्रयम् ॥ नमोऽन्तेन हृदा दद्यात्तेनैवाचमनीयकम् ॥ ७१ ॥ साज्यं मंत्र-शतं हुत्वा दद्यात्पूर्णां यथाविधि ॥ मंडलं कुंडतः पूर्वे मध्ये वा शम्भुकुम्भयोः ॥ ७२ ॥ रुद्रमातृगणादीनां निर्वर्त्यान्तर्बलिं हृदा ॥ शिवमध्येऽप्यलब्धाज्ञो विधायैकत्वभावनम् ॥ ७३ ॥ सर्वज्ञतादियुक्तोऽहं समन्ताच्चोपरि स्थितः ॥ ममांशो योजनास्थानमाधि-ष्ठाताऽहमध्वरे ॥ ७४ ॥ शिवोऽयमित्यहङ्कारी निष्क्रमेद्यागमण्डपात् ॥ न्यस्तपूर्वायसन्धर्भे शस्त्राणुकृतमण्डले ॥ ७५ ॥ प्रणवा-सनके शिष्यं शुक्लवस्त्रोत्तरीयकम् ॥ स्नातं चोदङ्मुखे मुक्तयै पूर्ववक्त्रं तु भुक्तये ॥ ७६ ॥ ऊर्ध्वकायं समारोप्य पूर्वास्यं प्रविलोक-येत् ॥ चरणादिशिखां यावन्मुक्तौ भुक्तौ विलोमतः ॥ ७७ ॥ चक्षुषा सप्रसादेन शैवं धाम विवृण्वता ॥ अस्त्रोदकेन सम्प्रोक्ष्य मन्त्राम्बुस्नानसिद्धये ॥ ७८ ॥ भस्मस्नानाय विघ्नानां शान्तये पापभित्तये ॥ सृष्टिसंहारयोगेन ताडयेदस्त्रभस्मना ॥ ७९ ॥ पुनर-स्त्राम्बुना प्रोक्ष्य सकलीकरणाय तम् ॥ नाभेरूर्ध्वं कुशाग्रेण मार्जनीयास्त्रमुच्चरन् ॥८०॥ त्रेधाऽऽलभेत तन्मूलैरघमर्षाय नाभ्यधः॥ द्वैविध्याय च पाशानामालभेत शराणुना ॥८१॥ तच्छरीरे शिवं साङ्गं सासनं विन्यसेत्ततः ॥ पुष्पादिपूजितस्यास्य नेत्रे नेत्रेण वा हृदा ॥ ८२ ॥ बद्धामंत्रितवस्त्रेण सितेन सदशेन च ॥ प्रदक्षिणक्रमादेनं प्रवेश्य शिवदक्षिणम् ॥ ८३ ॥ सवस्त्रमासनं दद्याद्यथावर्णं निवेदयेत् ॥ संहारमुद्रयात्मानं मूर्त्या तस्य हृदम्बुजे ॥ ८४ ॥ निरुद्ध्य शोधिते काये न्यासं कृत्वा तमर्चयेत् ॥ पूर्वाननस्य शिष्यस्यं मूलमन्त्रेण मस्तके ॥ ८५ ॥ शिवहस्तं प्रदद्याच्च रुद्रेशपददायकम् ॥ शिवसेवाग्रहोपायं दत्तहस्तं शिवाणुना ॥ ८६ ॥ शिवे प्रक्षेपयेत्पुष्पमपनीयार्चकान्तरम् ॥ तत्पात्रस्थानमन्त्राढ्यं शिवदेवगणानुगम् ॥ ८७ ॥ विप्रादीनां क्रमान्नाम कुर्य्याद्वा स्वेच्छया गुरुः ॥ प्रणतिं कुम्भवर्द्धन्योः कारयित्वाऽनलान्तिके ॥ ८८ ॥ सदक्षिणासने तद्वत्सोम्यास्यमुपवेशयेत् ॥ शिष्यदे-हविनिष्क्रान्तां सुषुम्णामिव चिन्तयेत् ॥ ८९ ॥ निजविग्रहलीनां च दर्भमूलेन मन्त्रितम् ॥ दर्भाग्रं दक्षिणे तस्य विधाय करप-

ह्रुवे ॥ ९० ॥ तन्मूलमात्मजङ्घायामग्रं चेति शिखिध्वजे ॥ शिष्यस्य हृदयं गत्वा रेचकेन शिवाणुना ॥ ९१ ॥ पूरकेण समागत्य स्वकीयं हृदयान्तरम् ॥ शिवाग्निना पुनः कृत्वा नाडीसन्धानमीदृशम् ॥ ९२ ॥ हृदा तत्सन्निधानार्थं जुहुयादाहुतित्रयम् ॥ शिवहस्तस्थिरत्वार्थं शतं मूलेन होमयेत् ॥ इत्थं समयदीक्षायां भवेद्योग्यो भवार्च्चने ॥ ९३ ॥ इत्यादिमहापुराणे आग्नेये समयदीक्षाविधिर्नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ अथ संस्कारदीक्षाविधिः ॥ ईश्वर उवाच ॥ वक्ष्ये संस्कारदीक्षाया विधानं शृणु षण्मुख ॥ आवाहयेन्महेशस्य वह्निस्थस्य शिरो हृदि ॥ १ ॥ संश्लिष्टौ तौ समभ्यर्च्य संतर्प्य हृदयात्मना ॥ तयोः सन्निधये दद्यात्तेनैवाहुतिपञ्चकम् ॥ २ ॥ कुसुमेनास्त्रलिप्तेन ताडयेत्तं हृदा शिशुम् ॥ प्रस्फुरत्तारकाकारं चैतन्यं तत्र भावयेत् ॥ ३ ॥ प्रविश्य तत्र हुङ्कारमुक्तं रेचकयोगतः ॥ संहारिण्या तदाकृष्य पूरकेण हृदि न्यसेत् ॥ ४ ॥ ततो वागीश्वरीयोनौ मुद्रयोद्भवसञ्ज्ञया ॥ हृत्संम्पुटितमन्त्रेण रेचकेन विनिक्षिपेत् ॥ ५ ॥ ओं हां हां हां आत्मने नमः ॥ जाज्वल्यमाने निर्धूमे जुहुयादिष्टसिद्धये ॥ अप्रबुद्धे सधूमे तु होमे वह्नौ न सिध्यति ॥ ६ ॥ स्निग्धः प्रदक्षिणावर्त्तः सुगन्धिः शस्यतेऽनलः ॥ विपरीतः स्फुलिङ्गी च भूमिस्पर्शः प्रशस्यते ॥ ७ ॥ इत्येवमादिभिश्चिह्नैर्हुत्वा शिष्यस्य कल्मषम् ॥ पापभक्षणहोमेन दहेद्वा तं भवात्मना ॥ ८ ॥ द्विजत्वापादनार्थाय तथा रुद्रांशभावने ॥ आहारबीजसंशुद्धौ गर्भाधानाय संस्थितो ॥ ९ ॥ सीमन्ते जन्मतो नामकरणाय च होमयेत् ॥ शतानि पञ्चमूलेन वौषडादिदशांशतः ॥ १० ॥ शिथिलीभूतबन्धस्य शक्तावुत्कर्षणं च यत् ॥ आत्मनो रुद्रपुत्रत्वे गर्भाधानं तदुच्यते ॥ ११ ॥ स्वातन्त्र्यात्मगुणव्यक्तिरिह पुंसवनं मतम् ॥ मायात्मनोर्विवेकेन ज्ञानं सीमन्तवर्द्धनम् ॥ १२ ॥ शिवादितत्त्वशुद्धेस्तु स्वीकारो जननं मतम् ॥ बोधनं यच्छिवत्वेन शिवत्वाईस्य नो मतम् ॥ १३ ॥ संहारमुद्रयात्मानं स्फुरद्बिन्दुकणोपमम् ॥ विदधीत समादाय निजे हृदयपङ्कजे ॥ १४ ॥ ततः कुम्भकयोगेन मूलमन्त्रमुदीरयेत् ॥ कुर्य्यात्समवशीभावं तदा च शिवयोर्हृदि ॥ १५ ॥ ब्रह्मादिकारणात्यागक्रमाद्रेचकयोगतः ॥ नीत्वा शिवान्तमात्मानमादायोद्भवमुद्रया ॥ १६ ॥ हृत्सम्पुटितमन्त्रेण रेचकेन विधानवित् ॥ शिष्यस्य हृदयाम्भोजकर्णिकायां विनिक्षिपेत् ॥ १७ ॥ पूजां शिवस्य वह्नेश्च गुरुः

कुर्य्यात्तदोचिताम् ॥ प्रणतिं चात्मने शिष्यं समयाञ्छ्रावयेत्तथा ॥ १८ ॥ देवं न निन्देच्छास्त्राणि निर्म्मार्ल्यादि न लङ्घयेत् ॥ शिवाग्निगुरुपूजा च कर्त्तव्या जीवितावधि ॥ १९ ॥ बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनाम् ॥ यथाशक्ति ददीतार्थं समर्थस्य समग्रकान् ॥ २० ॥ भूताङ्गानि जटाभस्मदण्डकौपीनसंयमान् ॥ ईशानाद्यैर्हृदाद्यैर्वा पारिजप्य यथाक्रमात् ॥ २१ ॥ स्वाहान्तसंहितामन्त्रैः पात्रेष्वारोप्य पूर्ववत् ॥ सम्पादितं हुतं हुत्वा स्थाण्डिलेशाय दर्शयेत् ॥ २२ ॥ रक्षणाय घटाधस्तादारोप्य क्षणमात्रकम् ॥ शिवस्याज्ञां समादाय ददीत व्रतिने गुरुः ॥ २३ ॥ एवं समयदीक्षायां विशिष्टायां विशेषतः ॥ वह्निहोमागमज्ञानयोग्यः सञ्जायते शिशुः ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये संस्कारदीक्षाविधिर्नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ अथ निर्वाणदीक्षा ॥ ईश्वर उवाच ॥ अथ निर्वाणदीक्षायां कुर्यान्मूलादिदीपनम् ॥ पाशबन्धनशक्त्यर्थं ताडनादिकृतेन वा ॥ १ ॥ एकैकया तदाहुत्या प्रत्येकं तत्रयेण वा ॥ बीजगर्भशिखार्द्धं तु हूं फडन्तध्रुवादिना ॥ २ ॥ ॐ हूं ह्रौं ह्रौं हूं फडिति मूलमन्त्रस्य दीपनम् ॥ ॐ हृं ह्रौं हूं फडिति हृदय एवं शिरोमुखे ॥ ३ ॥ प्रत्येकं दीपनं कुर्य्यात्सर्व्वस्मिन्क्रूरकर्मणि ॥ शान्तिके पौष्टिके चास्त्र वषडन्तादिनाणुना ॥ ४ ॥ वषड्वौषट्समोपेतैः सर्वकाम्योपरिस्थितैः ॥ हवनं संवरैः कुर्य्यात्सर्वत्राप्यायनादिषु ॥ ५ ॥ ततः स्वसव्यभागस्थं मण्डले शुद्धविग्रहम् ॥ शिष्यं सम्पूज्य तत्सूत्रं सुषुम्गेति विभावितम् ॥ ६ ॥ मूलेन तच्छिखाबन्धं पादाङ्गुष्ठान्तमानयेत् ॥ संहारेण मुमुक्षोस्तु बध्नीयाच्छिष्यकायके ॥७॥ पुंसस्तु दक्षिणे भागे वामे नार्य्या नियोजयेत् ॥ शक्तिं च शक्तिमन्त्रेण पूजितां तस्य मस्तके ॥८॥ संहारमुद्रयाऽऽदाय सूत्रं तेनैव योजयेत् ॥ नाडीं त्वादाय मूलेन सूत्रे न्यस्य हृदार्च्चयेत् ॥ ९॥ अत्रकुण्ठय तु रुद्रेण हृदयेनाहुतित्रयम् ॥ प्रपद्यात्सन्निधानार्थं शक्तावप्येवमेव हि ॥ १० ॥ ॐ हां वर्णाध्वने नमो हां भवनाध्वने नमः ॥ हां ॐ कलाध्वने नमः शोध्याध्वानं हि सूत्रके ॥ ११ ॥ न्यस्यास्त्रवारिणा शिष्यं प्रोक्ष्यास्त्रमन्त्रितेन च ॥ पुष्पेण हृदि सन्ताडय शिष्यदेहे प्रविश्य च ॥ १२ ॥ गुरुश्च तत्र हूङ्कारयुक्तं रेचकयोगतः ॥ चैतन्यं हंसबीजस्थं विश्लिष्येदायुधात्मना ॥ १३ ॥ ॐ ह्रौं हूं फट् । आच्छिद्य शक्तिसूत्रेण हां हं स्वाहेति चाणुना ॥ संहारमुद्रया सूत्रे नाडीभूते नियोजयेत् ॥ १४ ॥

ॐ हां हं हाम् आत्मने नमः । व्यापकं भावयेदेनं तनुत्रेणावकुण्ठयेत् ॥ आहुतित्रितयं दद्याद्धृदा सन्निधिहेतवे ॥ १५ ॥ विद्यादेहं च विन्यस्य शान्त्यतीतावलोकनम् ॥ तस्यामितरतत्त्वाद्यं मन्त्रभूतं विचिन्तयेत् ॥ १६ ॥ ॐ हां हौं शान्त्यतीतकलापाशाय नम इत्यनेनावलोकयेत् ॥ द्वे तत्त्वे मन्त्रमप्येकं पदं वर्णाश्च षोडश ॥ तथाऽष्टौ भुवनान्यस्यां बीजनाडीकथद्वयम् ॥ १७ ॥ विषयं च गुण चैकं कारणं च सदाशिवम् ॥ सितायां शान्त्यतीतायामन्तर्भाव्य प्रपीडयेत् ॥ १८ ॥ ॐ हौं शान्त्यतीतकलापाशाय हूं फट् ॥ संहारमुद्रयाऽऽदाय विदध्यात्सूत्रमस्तके ॥ पूजयेदाहुतीस्तिस्रोदद्यात्सन्निधिहेतवे ॥ १९ ॥ तत्त्वे द्वे अक्षरे द्वे च बीजनाडीकथद्वयम् ॥ गुणो मन्त्रौ तथाऽग्नस्थमेकं कारणमीश्वरम् ॥ २० ॥ पदानि भानुसङ्ख्यानि भुवनानि दश सप्त च ॥ एकं च विषयं शान्तौ कृष्णायामच्युतं स्मरेत् ॥ २१ ॥ ताडयित्वा समादाय मुखसूत्रे नियोजयेत् ॥ जुहुयान्निजबीजेन सान्निध्यायाहुतित्रयम् ॥ २२ ॥ विद्यायां सप्त तत्त्वानि पदानामेकविंशतिम् ॥ षड्वर्णान्सञ्चरं चैकं लोकानां पञ्चविंशतिम् ॥ २३ ॥ गुणानां त्रयमेकं च विषयं रुद्रकारणम् ॥ अन्तर्भाव्यातिरिक्तायां बीजनाडीकथद्वयम् ॥ २४ ॥ अस्त्रमादाय दद्याच्च पदं द्व्यधिकविंशतिम् ॥ लोकानां च कलानां च षष्टिं गुणचतुष्टयम् ॥ २५ ॥ मन्त्राणां त्रयमेकं च विषयं कारणं हरिम् ॥ अन्तर्भाव्य प्रतिष्टायां शक्तायां ताडनादिकम् ॥ २६ ॥ विधाय नाभिसूत्रस्थां सन्निधायाहुतीर्यजेत् ॥ ह्रीं भुवनानां शतं साग्रं पदानामष्टविंशतिम् ॥ २७ ॥ बीजनाडीसमीराणां द्वयोरिन्द्रिययोरपि ॥ वर्णं तत्त्वं च विषयमेकैकं गुणपञ्चकम् ॥ २८ ॥ हेतुं ब्रह्माण्डमन्त्रस्थं शम्बराणां चतुष्टयम् ॥ निवृत्तौ पीतवर्णायामन्तर्भाव्य प्रताडयेत् ॥ २९ ॥ आदौ यत्तत्त्वभागान्ते सूत्रे विन्यस्य पूजयेत् ॥ जुहुयादाहुतीस्तिस्रः सन्निधानाय पावके ॥ ३० ॥ इत्यादाय कलासूत्रे योजयेच्छिष्यविग्रहात् ॥ सबीजायां तु दीक्षायां समयाचारयागतः ॥ ३१ ॥ देहारम्भकरक्षार्थं मन्त्रसिद्धिफलादपि ॥ इष्टापूर्त्तादिधर्म्मार्थं व्यतिरिक्तं प्रबन्धकम् ॥ ३२ ॥ चैतन्यबोधकं सूक्ष्मं कलानामन्तरे स्मरेत् ॥ अमुनैव क्रमेणाथ कुर्य्यात्तर्पणदीपने ॥ ३३ ॥ आहुतिभिः स्वमन्त्रेण तिसृभिस्तिसृभिस्तथा ॥ ॐ हौं शान्त्यतीतकलापाशाय

स्वाहेत्यादितर्पणम् ॥ ॐ हां हृ हां शान्त्यतीतकलापाशाय हूम्फडित्यादिदीपनम् ॥ तत्सूत्रं व्याप्तिबोधाय कलास्थानेषु पञ्चसु ॥ ३४ ॥ संगृह्य कुङ्कुमाज्येन तत्र साङ्गं शिवं यजेत् ॥ हूम्फडन्तैः कलामन्त्रैर्भित्त्वा पाशाननुक्रमात् ॥ ॥ ३५ ॥ नमोऽन्तैश्च प्रविश्यान्तः कुर्य्याद्ग्रहणबन्धने ॥ ओं हूं हां हा हां हुं फट शान्त्यतीतकलां गृह्णामि बध्नामि चेत्यादिमन्त्रैः कलानां ग्रहणबन्धनादिप्रयोगः ॥ पाशादीनां च स्वीकारो ग्रहणं बन्धनं पुनः ॥ ३६ ॥ पुरुषं प्रति निःशेषव्यापारप्रतिपत्तये ॥ उपवेश्याथ तत्सूत्रं शिष्यस्कन्धे निवेशयेत् ॥ ३७ ॥ विस्तृताघप्रमोषाय शतं मूलेन होमयेत् ॥ शरावसम्पुटे पुंसः स्त्रियाश्च प्रणितोदरे ॥ ३८ ॥ हृदस्त्रसम्पुटं सूत्रं विधायाभ्यर्च्चयेद्धृदा ॥ सूत्रं शिवेन साङ्गेन कृत्वा सम्पातशोधितम् ॥ ३९ ॥ निदध्यात्कलशस्याधो रक्षां विज्ञापयेदिति ॥ शिष्यं पुष्पं करे दत्त्वा सम्पूज्य कलशादिकम् ॥ ४० ॥ प्रणम्य बहिर्यायाद्यागमन्दिरमध्यतः ॥ मण्डलत्रितयं कृत्वा मुमुक्षूनुत्तराननान् ॥ ४१ ॥ भुक्तये पूर्व्ववक्त्रांश्च शिष्यांस्तत्र निवेशयेत् ॥ प्रथमे पञ्चगव्यस्य प्राशयेत्पलकत्रयम् ॥ ४२ ॥ पाणिना कुशयुक्तेन अर्चितानन्तरान्तरम् ॥ चरुं ततस्तृतीये तु ग्रासत्रितयसम्मितम् ॥ ४३ ॥ अष्टग्रासप्रमाणं वा दशनस्पर्शवर्जितम् ॥ पालाशपुटके मुक्तौ भुक्तौ पिप्पलपत्रके ॥ ४४॥ हृदा सम्भोजनं दत्त्वा पूतैराचामयेज्जलैः ॥ दन्तकाष्ठं हृदा कृत्वा प्रक्षिपेच्छोभने शुभम् ॥ ४५ ॥ न्यूनादिदोषमोषाय मूलेनाष्टोत्तरं शतम् ॥ विधाय स्थण्डिलेशाय सर्व्वकर्म्मसमर्पणम् ॥४६॥ पूजाविसर्जनं चास्य चण्डेशस्य च पूजनम् ॥ निर्म्माल्यमपनीयाथ शेषमग्नौ यजेच्चरोः ॥ ४७ ॥ कलशं लोकपालांश्च पूजयित्वा विसृज्य च ॥ विसृजेद्गणमग्निं च रक्षितं यदि बाह्यतः ॥ ४८ ॥ बाह्यतो लोकपालानां दत्त्वा सङ्क्षेपतो बलिम् ॥ भस्मना शुद्धतोयैर्वा स्नात्वा यागालयं विशेत् ॥ ४९ ॥ गृहस्थान्दर्भशय्यायां पूर्वशीर्षान्सुरक्षितान् ॥ हृदा सद्भस्मशय्यायां यतीन्दक्षिणमस्तकान् ॥ ५०॥ शिखाबद्धशिखानस्त्रसप्तमाणवकान्वितान् ॥ विज्ञाय स्नापयेच्छिष्यांस्ततो यायात्पुनर्बहिः ॥५१॥ ॐ हिलि हिलि त्रिशूलपाणये स्वाहा ॥ पञ्चगव्यं चरुं प्राश्य गृहीत्वा दन्तधावनम् ॥ समाचम्य शिवं ध्यात्वा शय्यामास्थाय पावनीम् ॥ ५२ ॥ दीक्षामतं क्रियाकाण्डं संस्मरन्संविशेद्गुरुः ॥ इति सङ्क्षेपतः प्रोक्तो

विधिर्दीक्षाधिवासने ॥ ५३ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायामधिवासनविधिर्नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

॥ अथ निर्वाणदीक्षाविधानम् ॥ ईश्वर उवाच ॥ अथ प्रातः समुत्थाय कृतस्नानादिको गुरुः ॥ दध्यार्द्रमांसमद्यादेः प्रशस्ताऽभ्यवहारिता ॥ १ ॥ गजाश्वारोहणं स्वप्ने शुभं शुक्लांशुकादिकम् ॥ तैलाभ्यङ्गादिकं हीनं होमो घोरेण शान्तये ॥ २ ॥ नित्यकर्म्मद्वयं कृत्वा प्रविश्य मखमण्डपम् ॥ स्वाचान्तो नित्यवत्कर्म्म कुर्य्यान्नैमित्तिके विधौ ॥ ३ ॥ ततः संशोध्य चात्मानं शिवहस्तं तथात्मनि ॥ विन्यस्य कुम्भगं प्रार्च्य इन्द्रादीनामनुक्रमात् ॥ ४ ॥ मण्डले स्थण्डिले वाऽपि प्रकुर्वीत शिवार्चनम् ॥ तर्पणं पूजनं वह्नेः पूर्णान्तं मन्त्रतर्पणम् ॥ ५ ॥ दुःस्वप्नदोषमोषाय शस्त्रेणाष्टाधिकं शतम् ॥ हुत्वा हूँ सम्पुटेनैव विदध्यान्मन्त्रदीपनम् ॥ ६ ॥ अन्तर्बलिविधानं च मध्ये स्थंडिलकुम्भयोः ॥ कृत्वा शिष्यप्रवेशाय लब्धानुज्ञो बहिर्व्रजेत् ॥ ७ ॥ कुर्य्यात्समयवत्तत्र मण्डलारोपणादिकम् ॥ सम्पातहोमं तन्नाडीरूपदर्भकरानुगम् ॥ ८ ॥ सत्सन्निधानाय तिस्रो हुत्वा मूलाणुनाऽहुतीः ॥ कुम्भस्थं शिवमभ्यर्च्य पाशसूत्रमुपाहरेत् ॥ ९ ॥ स्वदक्षिणोर्ध्वकायस्य शिष्यस्याभ्यर्चितस्य च ॥ तच्छिखायां निबध्नीयात्पादाङ्गुष्ठावलम्बितम् ॥ १० ॥ तं निवेश्य निवृत्तेस्तु व्याप्तिमालोक्य चेतसा ॥ ज्ञेयानि भुवनान्यस्यां शतमष्टाधिकं ततः ॥ ११ ॥ कपालोऽजश्च बुद्धश्च वज्रदेहः प्रमर्दनः ॥ विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥ १२ ॥ अग्नी रुद्रो हुताशी च पिङ्गलः खादको हरः ॥ ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षपान्तकौ ॥ १३ ॥ याम्यमृत्युहरो धाता विधाता कार्य्यरञ्जकः ॥ कालो धर्मोऽप्यधर्मश्च संयोक्ता च वियोगकः ॥ १४ ॥ नैर्ऋतो मारणो हन्ता क्रूरदृष्टिर्भयानकः ॥ ऊर्द्धांशको विरूपाक्षो धूम्रलोहितदंष्ट्रवान् ॥ १५ ॥ बलश्चातिबलश्चैव पाशहस्तो महाबलः ॥ श्वेतश्च जयभद्रश्च दीर्घबाहुर्जलान्तकः ॥ १६ ॥ वडवास्यश्च भीमश्च दशैते वारुणाः स्मृताः ॥ शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षपान्तकः ॥ १७ ॥ पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ॥ जटामुकुटधारी च नानारत्नधरस्तथा ॥ १८ ॥ निधीशो रूपवान्धन्यः सौम्यदेहः प्रसादकृत् ॥ प्रकाशोऽप्यथ लक्ष्मीवान्कामरूपो दशोत्तरे ॥ १९ ॥ विद्याधरो ज्ञानधरः सर्वज्ञो वेदपारगः ॥ मातृवृत्तश्च पिङ्गाक्षो भूतपालो बलिप्रियः ॥ २० ॥ सर्वविद्या-

विधाता च सुखदुःखहरो दश ॥ अनन्तः पालको धीरः पातालाधिपतिस्तथा ॥ २१॥ वृषो वृषधरो वीर्य्यो ग्रसनः सर्वतोमुखः॥ लोहितश्चैव विज्ञेया दश रुद्राः फणिस्थिताः ॥२२॥ शम्भुर्विभुर्गणाध्यक्षरुयक्षास्त्रिदशवन्दितः॥ संहारश्च विहारश्च लाभो लिप्सुर्विचक्षणः ॥ २३ ॥ अत्ता कुहककालाग्निरुद्रा हाटक एव च ॥ कूष्माण्डश्चैव सत्यश्च ब्रह्मा विष्णुश्च सप्तमः ॥ २४ ॥ रुद्रश्चाष्टाविमे रुद्राः कटाहाभ्यन्तरे स्थिताः ॥ एतेषामेव नामानि भुवनानामपि स्मरेत् ॥ २५ ॥ भवोद्भवः सर्वभूतः सर्वभूतसुखप्रदः ॥ सर्वसान्निध्यकृद्ब्रह्मविष्णुरुद्रशरार्चितः ॥ २६ ॥ संस्तुत पूर्वस्थित ॐ साक्षिन् ॐ रुद्रान्तक ॐ पतङ्ग ॐ शब्द ॐ सूक्ष्म ॐ शिव सर्व सर्वेद सर्वसान्निध्यकर ब्रह्मविष्णुरुद्रकर ॐ नमः शिवाय ॐ नमो नमः ॥ अष्टाविंशतिपदानि व्योम व्यापि मनोगुह ॥ सद्योद्दक्षनेत्राणि मन्त्रवर्णाष्टको मतः ॥ २७ ॥ बीजाकारो मकारश्च नाड्याविडापिङ्गलाह्वये ॥ प्राणापानावुभौ वायू घ्राणोपस्थौ तथेन्द्रिये ॥ २८ ॥ गन्धस्तु विषयः प्रोक्तो गन्धादिगुणपञ्चके ॥ पार्थिवं मण्डलं पीतं वज्राङ्कं चतुरस्रकम् ॥ २९ ॥ विस्तारो योजनानां तु कोटिरस्य शताहता ॥ अत्रैवान्तर्गता ज्ञेया योनयोऽपि चतुर्दश ॥ ३० ॥ प्रथमा सर्वदेवानां मन्याद्या देवयोनयः ॥ मृगः पक्षी च पशवश्चतुर्द्धा तु सरीसृपाः ॥ ३१ ॥ स्थावरं पञ्चमं सर्वं योनिः षष्ठी अमानुषी ॥ पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च ॥ ३२ ॥ सौम्यं प्राणेश्वरं ब्राह्ममष्टमं परिकीर्त्तितम् ॥ अष्टानां पार्थिवं तत्त्वमधिकारास्पदं मतम् ॥ ॥ ३३ ॥ लयस्तु प्रकृतौ बुद्धौ भोगी ब्रह्मा च कारणम् ॥ ततो जाग्रदवस्थानैः समस्तैर्भुवनादिभिः ॥ ३४ ॥ निवृत्तिं गर्भितां ध्यात्वा स्वमन्त्रेण नियोज्य च ॥ ॐ हां हूँ हां निवृत्तिकलापाशाय हूं फट् तत ॐ हां हां निवृत्तिकलापाशाय स्वाहेत्यनेनाङ्कुशमुद्रया पूरकेणाकृष्य ॐ हूं ह्रां हूं निवृत्तिकलापाशाय हूं फडित्यनेन संहारमुद्रया कुम्भकेनाधःस्थानादादाय ॐ ॐ ह्रं हां निवृत्तिकलापाशाय नम इत्यनेनोद्भवमुद्रया रेचकेन कुम्भे संस्थाप्य ॐ हां निवृत्तिकलापाशाय नमः इत्यनेनार्घ्यं दत्त्वा सम्पूज्य विमुखेनैव स्वाहान्तेनैव सन्निधानायाहुतित्रयं सन्तर्पणाहुतित्रयं च दत्त्वा ओं हां ब्रह्मणे नम इति ब्रह्माणमावाह्य सम्पूज्य च स्वाहान्तेन सन्तर्प्य ब्रह्मंस्त्वाधिकारेऽस्मिन्मुमुक्षुं दीक्षयाम्यहम् ॥ ३५ ॥ भाव्यं त्वयाऽनुकूलेन विधिं विज्ञापयेदिति ॥ आवा-

हयेत्ततो देवीं रक्षां वागीश्वरीं हृदा ॥ ३६ ॥ इच्छाज्ञानक्रियारूपां षड्विधां ह्येककारणम् ॥ पूजयेत्तर्पयेद्देवीं प्रकारेणामुना ततः ॥ ३७ ॥ वागीश्वरीं विनिःशेषयोनिविक्षोभकारणम् ॥ हृत्सम्पुटार्थबीजादिहूंफडन्तशराणुना ॥ ३८ ॥ ताडयेद्धृदये तस्य प्रविशेत्स विधानवित् ॥ ततः शिष्यस्य चैतन्यं हृदि वह्निकणोपमम् ॥३९॥ निवृत्तिस्थं युतं पाशैर्ज्येष्ठया विभजेद्यथा ॥ ॐ हां हूं हः हूं फट् ॐ हां स्वाहेत्यनेनाथ पूरकेणांकुशमुद्रया ॥४०॥ तदाकृष्य स्वमन्त्रेण गृहीत्वाऽऽत्मनि योजयेत् ॥ ॐ हां हूं हां आत्मने नमः । पित्रोर्विभाज्य संयोगं चैतन्यं रेचकेन तत् ॥ ४१ ॥ ब्रह्मादिकारणत्यागक्रमान्नीत्वा शिवास्पदम् ॥ गर्भाधानार्थमादाय युगपत्सर्वयोनिषु ॥४२॥ क्षिपेद्वागीश्वरीयोनौ वामयोद्भवमुद्रया ॥ ओं हां हां हाम् आत्मने नमः । पूजयेदप्यनेनैव तर्पयेदपि पञ्चधा ॥४३॥ अन्ययोनिषु सर्व्वासु देहशुद्धिं हृदा चरेत् ॥ नात्र पुंसवनं रुग्यादिशरीरस्यापि सम्भवात् ॥४४॥ सीमन्तोन्नयनं वापि दैवान्यङ्गानि देहवत् ॥ शिरसा जन्म कुर्वीत युगपत्सर्वदेहिनाम् ॥ ४५ ॥ तथैव भावयेदेषामधिकारं शिवाणुना ॥ भोगं कवचमन्त्रेण शस्त्रेण विषयात्मना ॥ ४६ ॥ मोहरूपमभेद्यं च लयसञ्ज्ञं विभावयेत् ॥ शिवेन स्रोतसां शुद्धिं हृदा तत्त्वविशोधनम् ॥४७॥ पञ्च पञ्चाहुतीः कुर्य्याद्गर्भाधानादिषु क्रमात् ॥ मायया मलकर्मादिपाशबन्धनिवृत्तये ॥४८॥ निष्कृत्यैव हृदा पश्चाद्यजेत शतमाहुतीः ॥ मलशक्तिनिरोधेन पाशानां च वियोजनम् ॥ ४९ ॥ स्वाहान्तायुधमन्त्रेण पञ्चपञ्चाहुतीर्यजेत् ॥ मायाद्यन्तस्य पाशस्य सप्तवारास्त्रजप्तया ॥ ५० ॥ कर्त्तर्य्या छेदनं कुर्य्यात्कल्पशस्त्रेण तद्यथा ॥ ओं हूं निवृत्तिकलापाशाय हूं फट् बन्धकर्त्वं च निर्वर्त्य हस्ताभ्याञ्च शराणुना ॥ ५१ ॥ विसृज्य वर्त्तुलीकृत्य घृतपूर्णे स्रुवे धरेत् ॥ दहेदनुकलास्त्रेण केवलास्त्रेण भस्मसात् ॥ ५२ ॥ कुर्य्यात्पञ्चाहुतीर्दत्त्वा पाशांकुशनिवृत्तये ॥ ओं हः अस्त्राय हूं फट् ॥ प्रायश्चित्तं ततः कुर्य्यादस्त्राहुतिभिरष्टभिः ॥ ५३ ॥ अथावाह्य विधातारं पूजयेत्तर्पयेत्तथा ॥ तत ओं हां शब्दस्पर्शशुद्धब्रह्मन् गृहाण स्वाहेत्याहुतित्रयेणाधिकारमस्य समर्पयेत् । दग्धनिःशेषपापस्य ब्रह्मन्नस्य पशोस्त्वया ॥ ५४ ॥ बन्धाय न पुनः स्थेयं शिवाज्ञां श्रावयेदिति ॥ ततो विसृज्य घातारं नाडया दक्षिणया शनैः ॥५५॥ संहारमुद्रयात्मानं कुम्भकेन निजात्मना ॥ राहुयुक्तैकदेशेन चन्द्रबिम्बेन सन्निभम् ॥५६॥

आदाय योजयेत्सूत्रे रेचकेनोद्भवाख्यया ॥ पूजयित्वार्घ्यपात्रस्थतोयबिन्दुं सुधोपमम् ॥ ५७ ॥ आप्यायनाय शिष्यस्य गुरुः शिरसि विन्यसेत् ॥ विसृज्य पितरौ दद्याद्धौषडन्तशिवाणुना ॥ पूरणाय विधिः पूर्णा निवृत्तिरिति शोधिता ॥ ५८ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां निवृत्तिकलाशोधनं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ अथ प्रतिष्ठाकलाशोधनम् ॥ ईश्वर उवाच ॥ तत्त्वयोरथ सन्धानं कुर्य्याच्छुद्धविशुद्धयोः ॥ ह्रस्वदीर्घप्रयोगेण नादनादान्तसंज्ञिना ॥ १ ॥ ॐ हां हूं हाम् अप्तेजोवायुराकाशं तन्मात्रेन्द्रियबुद्धयः ॥ गुणत्रयमहङ्कारश्चतुर्विंशः पुमानिति ॥ २ ॥ प्रतिष्ठायां निविष्टानि तत्त्वान्येतानि भावयेत् ॥ पञ्चविंशतिसङ्ख्यानि खादियान्ताक्षराणि च ॥ ३ ॥ पञ्चाशदधिका षष्टिर्भुवनैस्तुल्यसञ्ज्ञिताः ॥ तावन्त एव रुद्राश्च विज्ञेयास्तत्र तद्यथा ॥ ४ ॥ अमरेशः प्रभावश्च नैमिषः पुष्करोऽपि च ॥ तथा पृथ्वादिश्च दण्डिश्च भावभूतिरथाष्टमः ॥ ५ ॥ नकुलीशो हरिश्चन्द्रः श्रीशैलो दशमः स्मृतः ॥ अन्वीशोऽप्रातिकेशश्च महाकालोऽथ मध्यमः ॥ ६ ॥ केदारो भैरवश्चैव द्वितीयाष्टकमीरितम् ॥ ततो गयाकुरुक्षेत्रखलानादिकनादिके ॥ ७ ॥ विमलश्चाट्टहासश्च महेन्द्रो भीम एव च ॥ वस्वापदं रुद्रकोटिरवियुक्तो महाबलः ॥ ८ ॥ गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरेव च ॥ अजेशश्चैव सर्वज्ञो भास्वरः सूदनान्तरः ॥ ९ ॥ सुबाहुर्म्मत्तरूपी च विशालो जटिलस्तथा ॥ रौद्रोऽथ पिङ्गलाक्षश्च कालदंष्ट्री भवेत्ततः ॥ १० ॥ विदुरश्चैव घोरश्च प्राजापत्यो हुताशनः ॥ कामरूपी तथा कालः कर्णेऽप्यथ भयानकः ॥ ११ ॥ मतङ्गः पिङ्गलश्चैव हरो वै धातृसंज्ञकः ॥ शंकुकर्णो विधानश्च श्रीकण्ठश्चन्द्रशेखरः ॥ १२ ॥ सहैतेन च पर्य्यन्ताः कथ्यन्तेऽथ पदान्यपि ॥ व्यापिन् ॐ अरूप ॐ प्रमथ ॐ तेजः ॐ ज्योतिः ॐ पुरुष ॐ अग्ने ॐ अधूम ॐ अभस्म ॐ अनादि ॐ नाना ॐ धुधू ॐ मूः ॐ भुवः ॐ स्वः अनिधन निधनोद्भव शिव शर्व परमात्मन् महेश्वर महादेव सद्भावेश्वर महातेजः योगाधिपतये मुञ्च प्रथम सर्व सर्वेति द्वात्रिंशत् पदानि ॥ बीजभावे त्रयो मंत्रा वामदेवः शिवः शिखा ॥ १३ ॥ गान्धारी च सुषुम्णा च नाड्यौ द्वौ मारुतौ तथा ॥ समानोदाननामानौ रसनापायुरिन्द्रिये ॥ १४ ॥ रसस्तु विषयो रूपशब्दस्पर्शा रसा गुणाः ॥ मण्डलं वर्त्तुलं तच्च पुण्डरीकाङ्कितं सितम् ॥ १५ ॥

स्वप्राणस्था प्रतिष्ठायां कारणं गरुडध्वजम् ॥ प्रतिष्ठान्तकृतं सर्वं साश्चिन्त्य भुवनादिकम् ॥ १६ ॥ सूत्रं देहे स्वमन्त्रेण प्रविश्यैनां वियोजयेत् ॥ ओं ह्रां स्त्रीं ह्रां प्रतिष्ठाकलापाशाय ओं फट् स्वाहान्तेनानेनैव पूरकेणांकुशमुद्रया समाकर्षेत् । ततः ॐ ह्रां ह्रूं ह्रां ह्रूं प्रतिष्ठाकलापाशाय ह्रूं फडित्यनेन संहारमुद्रया कुम्भकेन हृदयादधोनाडीसूत्रादादाय ॐ ह्रां ह्रूं ह्रां ह्रां प्रतिष्ठाकलापाशाय नम इत्यनेनोद्भवमुद्रया रेचकेन कुम्भे समारोपयेत् । ॐ ह्रां ह्रीं प्रतिष्ठाकलापाशाय नम इत्यनेनार्च्चयित्वा सम्पूज्य स्वाहान्तेनाहुतीनां त्रयेण सन्निधाय ततः ॐ ह्रां विष्णवे नम इति विष्णुमावाह्य सम्पूज्य सन्तर्प्य विष्णो तवाधिकारेऽस्मिन्मुमुक्षुं दीक्षयाम्यहम् ॥ १७ ॥ भाव्यं त्वयानुकूलेन विष्णुं विज्ञापयेदिति ॥ ततो वागीश्वरीं देवीं वागीशमापि पूर्ववत् ॥ १८ ॥ आवाह्याभ्यर्च्य सन्तर्प्य शिष्यं वक्षसि ताडयेत् ॥ ॐ ह्रां ह्रां हं फट् । प्रविशेदप्यनेनैव चैतन्यं विभजेत्ततः ॥ १९ ॥ शस्त्रेण पाशसंयुक्तं ज्येष्ठयाऽङ्कुशमुद्रया ॥ ॐ ह्रां हं ह्रों ह्रूं फट् स्वाहान्तेन हृदाकृष्य तेनैव पुटितात्मना ॥ २० ॥ गृहीत्वा तं नमोऽन्तेन निजात्मनि नियोजयेत् ॥ ॐ ह्रां हं होम् आत्मने नमः । पूर्ववत्पितृसंयोगं भावयित्वोद्भवाख्यया ॥ २१ ॥ वामया तदनेनैव देवीगर्भे विनिःक्षिपेत् ॥ ॐ ह्रां हं हाम् आत्मने नमः । देहोत्पत्तौ हृदा ह्येवं शिरसा जन्मना तथा ॥ २२ ॥ शिखया वाधिकाराय भोगाय कवचाणुना ॥ तत्त्वशुद्धौ हृदा ह्येवं गर्भाधानाय पूर्ववत् ॥ २३ ॥ शिरसा पाशशैथिल्ये निष्कृत्यैवं शतं जपेत् ॥ एवं पाशवियोगेऽपि ततः शस्त्रात्मजप्तया ॥ २४ ॥ छिन्द्यादस्त्रेण कर्त्तर्य्या कलाबीजवता यथा ॥ ॐ ह्रीं प्रतिष्ठाकलापाशाय हः फट् ॥ विसृज्य वर्त्तुलीकृत्य पाशमंत्रेण पूर्ववत् ॥ २५ ॥ घृतपूर्णे स्रुवे दत्त्वा कलास्त्रेणैव होमयेत् ॥ अस्त्रेण जुहुयात्पञ्च पाशाङ्कुशनिवृत्तये ॥ २६ ॥ प्रायश्चित्तनिषेधार्थं दद्यादष्टाहुतीस्ततः ॥ ॐ हः अस्त्राय हूं फट् । हृदावाह्य हृषीकेशं कृत्वा पूजनतर्पणे ॥ २७ ॥ पूर्वोक्तविधिना कुर्य्यादधिकारसमर्पणम् ॥ ॐ ह्रां रसशुक्रं गृहाण स्वाहा । निःशेषदग्धपाशस्य पशोरस्य हरे त्वया ॥ २८ ॥ न स्थेयं बन्धकत्वेन शिवाज्ञां श्रावयेदिति ॥ ततो विसृज्य गोविन्दं विद्यात्मानं नियोज्य च ॥ २९ ॥ बाहुमुक्तार्द्धदृश्येन चन्द्रबिम्बेन सन्निभम् ॥ संहारमुद्रया

स्वस्थं विधायोद्भवमुद्रया ॥ ३० ॥ सूत्रे संयोज्य विन्यस्य तोयबिन्दुं यथापुरा ॥ विसृज्य पितरौ वह्नेः पूजितौ कुसुमादिभिः ॥
दद्यात्पूर्णां विधानेन प्रतिष्ठाऽपि विशोधिता ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां प्रतिष्ठाकलासंशोधनविधि-
र्नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ अथ विद्याविशोधनविधानम् ॥ ईश्वर उवाच ॥ सन्धानमथ विद्यायाः प्राचीनकलया
सह ॥ कुर्वीत पूर्ववत्कृत्वा तत्त्वं वर्णय तद्यथा ॥ १ ॥ ॐ ह्रौं श्रीमिति सन्धानम् । रागश्च शुद्धविद्या च नियतिः कलया सह॥
कालो माया तथाऽविद्या तत्त्वानामिति सप्तकम् ॥ २ ॥ रलवाः शषसा वर्णाः षड्विद्यायां प्रकीर्त्तिताः ॥ पदानि प्रणवादीनि
एकविंशतिसङ्ख्यया ॥ ३ ॥ ॐ नमः शिवाय सर्वप्रभवे हं शिवाय ईशानमूर्याय तत्पुरुषवक्त्राय अघोरहृदयाय वामदेवगुह्याय
सद्योजातमूर्त्तये ॐ नमो नमो गुह्यातिगुह्याय गोप्त्रे अनिधनाय सर्वाधिपाय ज्योतीरूपाय परमेश्वराय भावेन ॐ व्योम ॥ ॐ
रुद्राणां भुवनानां च स्वरूप ममथ कथ्यते ॥ प्रथमो वामदेवः स्यात्ततः सर्वभवोद्भवः ॥ ४ ॥ वज्रदेहः प्रभुर्धाता क्रमविक्रमसु-
प्रभाः ॥ वटुः प्रशान्तनामा च परमाक्षरसञ्ज्ञकः ॥ ५ ॥ शिवश्च माशिवो बहुरक्षयः शम्भुरेव च ॥ अदृष्टरूपनामानौ तथाऽन्यो
रूपवर्द्धनः ॥ ६ ॥ मनोन्मनो महावीर्य्यश्चित्राङ्गस्तदनन्तरम् ॥ कल्याण इति विज्ञेयाः पञ्चविंशतिसङ्ख्यया ॥ ७ ॥ मन्त्रौ
घोरामरौ बीजे नाड्यौ द्वे तत्र ते यथा ॥ पूषा च हस्तिजिह्वा च व्याननागौ प्रभञ्जनौ ॥ ८ ॥ विषयो रूपमेवैकमिन्द्रिये पाद-
चक्षुषी ॥ शब्दः स्पर्शश्च रूपं च त्रय एते गुणाः स्मृताः ॥ ९ ॥ अवस्थाऽत्र सुषुप्तिश्च रुद्रो देवस्तु कारणम् ॥ विद्यामध्यगतं सर्वं
भावयेद्भुवनादिकम् ॥ १० ॥ ताडनं छेदनं तत्र प्रवेशं चापि योजनम् ॥ आकृष्य ग्रहणं कुर्य्याद्विद्यया हृत्प्रदेशतः ॥ ११ ॥
आत्मन्यारोप्य सङ्गृह्य कलां कुण्डे निवेशयेत् ॥ रुद्रं कारणमावाह्य विज्ञाप्य च शिशुं प्रति ॥ १२ ॥ पित्रोरावाहनं कृत्वा
हृदये ताडयेच्छिशुम् ॥ प्रविश्य पूर्वमन्त्रेण तदात्मनि नियोजयेत् ॥ १३ ॥ आकृष्यादाय पूर्वोक्तविधिनाऽऽत्मनि योजयेत् ॥
वामया योजयेद्योनौ गृहीत्वा द्वादशान्ततः ॥ १४ ॥ कुर्वीत देहसम्पत्तिं जन्माधिकारमेव च ॥ भोगं लयं तथा श्रो (स्रो)
तः शुद्धितत्त्वविशोधनम् ॥ १५ ॥ निःशेषमलकर्मादिपाशबन्धनिवृत्तये ॥ निष्कृत्यैव विधानेन यजेत शतमाहुतीः ॥ १६ ॥

अस्त्रेण पाशशैथिल्यं मलशक्तिं तिरोहिताम् ॥ छेदनं मर्दनं तेषां वर्त्तुलीकरणं तथा ॥ १७ ॥ दाहं तदक्षराभावं प्रायश्चित्तमथोदितम् ॥ रुद्राण्यावाहनं पूजा रूपगन्धसमर्पणम् ॥ १८ ॥ ओं ह्रीं रूपगन्धौ शुल्कं रुद्र गृहाण स्वाहा ॥ संश्राव्य शाम्भवीमाज्ञां रुद्रं विसृज्य कारणम् ॥ विधायात्मनि चैतन्यं पाशसूत्रे निवेशयेत् ॥ १९ ॥ बिन्दुं शिरसि विन्यस्य विसृजेत्पितरौ ततः ॥ दद्यात्पूर्णां विधानेन समस्तविधिपूरणीम् ॥ २० ॥ पूर्वोक्तविधिना कार्य्यं विद्यायां ताडनादिकम् ॥ स्वबीजं तु विशेषः स्यादिति विद्या विशोधिता ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां विद्याशोधनं नाम षडशीतितमोऽध्यायः ॥८६॥

अथ नि० शान्तिशोधनम् ॥ ईश्वर उवाच ॥ सन्दध्यादधुना विद्यां शान्त्या सार्द्धं यथाविधि ॥ शान्तौ तत्त्वद्वयं लीनं भावेश्वरसदाशिवौ ॥ १ ॥ हकारश्च क्षकारश्च द्वौ वर्णौ परिकीर्त्तितौ ॥ रुद्राः समाननामानो भुवनैः सह तद्यथा ॥ २ ॥ प्रभवः समयः क्षुद्रो विमलः शिव इत्यपि ॥ घनो निरञ्जनाकारौ स्वशिवौ दीप्तिकारणौ ॥ ३ ॥ त्रिदशेश्वरनामा च त्रिदशः कालसञ्ज्ञकः ॥ सूक्ष्माम्बुजेश्वरश्चेति रुद्राः शान्तौ प्रतिष्ठिताः ॥ ४ ॥ व्योमव्यापिने व्योमव्याप्यरूपाय सर्वव्यापिने शिवाय अनन्ताय अनाथाय अनाश्रिताय ध्रुवाय शाश्वताय योगपीठसंस्थिताय नित्ययोगिने ध्यानाहारायेति द्वादश पदानि । पुरुषः कवचौ मन्त्रौ बीजे बिन्दूपकारकौ ॥ अलम्बुपायसानाढ्यौ वायू कूकरकूर्म्मकौ ॥ ५ ॥ इन्द्रिये त्वक्करावस्याः स्पर्शस्तु विषयो मतः ॥ गुणौ स्पर्शनिनादौ द्वावेकः कारणमीश्वरः ॥ ६ ॥ तुर्य्यावस्थेति शान्तिस्थं सम्भाव्य भुवनादिकम् ॥ विदध्यात्ताडनं भेदं प्रवेशं च वियोजनम् ॥ ७ ॥ आकृष्य ग्रहणं कुर्य्याच्छान्तेर्वदनसूत्रतः ॥ आत्मन्यारोप्य, सङ्कल्प्य कलां कुण्डे निवेशयेत् ॥ ८ ॥ ईश तवाधिकारेऽस्मिन्मुमुक्षुं दीक्षयाम्यहम् ॥ भाव्यं त्वयाऽनुकूलेन कुर्य्यादिज्ञापनामिति ॥ ९ ॥ आवाहनादिकं पित्रोः शिष्यस्य ताडनादिकम् ॥ विधायादाय चैतन्यं विधिनाऽऽत्मनि योजयेत् ॥ १० ॥ पूर्ववत्पितृसंयोगं भावयित्वोद्भवाख्यया ॥ हृत्सम्पुटात्मबीजेन देवीगर्भे नियोजयेत् ॥ ११ ॥ देहोत्पत्तौ हृदा पञ्च शिरसा जन्महेतवे ॥ शिखया वाऽधिकाराय भोगाय कवचापुना ॥ १२ ॥ लयाय शस्त्रमन्त्रेण स्रोतः शुद्धौ शिवेन च ॥ तत्त्वशुद्धौ हृदा ह्येवं गर्भाधानादि पूर्ववत् ॥ १३ ॥ वर्म्मणा पाश-

शैथिल्यं निष्कृत्यैवं शतं जपेत् ॥ मलशक्तितिरोधाने शस्त्रेणाहुतिपञ्चकम् ॥ १४॥ एवं पाशवियोगेऽपि ततः सन्ताडनत्रयात् ॥ छिंद्या-दस्त्रेण कर्त्तव्यो पाशान्बीजवता यथा ॥ १५॥ ॐ ह्रौं शान्तिकलापाशाय हः हूं फट् ॥ विमृज्य वर्त्तुलीकृत्य पाशमंत्रेण पूर्ववत् ॥ घृतपूर्णे स्रुवे दत्वा कलास्त्रेणैव होमयेत् ॥ १६ ॥ अस्त्रेण जुहुयात्पञ्च पाशाङ्कुशनिवृत्तये ॥ प्रायश्चित्तनिषेधाय दद्यादष्टाहुतीरथ ॥ १७ ॥ ॐ हः अस्त्राय हूं फट् ॥ हृदेश्वरं समावाह्य कृत्वा पूजनतर्पणे ॥ निदधीत विधानेन तस्मै शुल्कसमर्पणम् ॥ १८ ॥ ॐ हाम् ईश्वर बुद्ध्यहङ्कारौ शुल्कं गृह्णाण स्वाहा ॥ निःशेषदग्धपाशस्य पशोरस्येश्वर त्वया ॥ न स्थेयं बन्धकत्वेन शिवाज्ञां श्रावयेदिति ॥ १९॥ विसृजेदीश्वरं देवं रौद्रात्मानं नियोजयेत् ॥ २० ॥ मूत्रे संयोजयेदेनं शुद्धयोद्भवमुद्रया ॥ दद्यान्मूलेन शिष्यस्य शिरस्यमृतबिन्दु-कम् ॥२१॥ विसृज्य पितरौ वह्नेः पूजितौ कुसुमादिभिः ॥ दद्यात्पूर्णां विधानज्ञो निःशेषविधिपूरणीम् ॥२२॥ अस्यामपि विधा-तव्यं पूर्ववत्ताडनादिकम् ॥ स्ववीजं तु विशेषः स्याच्छुद्धिः शान्तेरपीडिता ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां शांतिशोधनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ अथ निर्वाणदीक्षाविधिः ॥ ईश्वर उवाच ॥ सन्धानं शान्त्यतीतायाः शान्त्या सार्द्धं विशुद्धया ॥ कुर्वीत पूर्ववत्तत्र तत्त्ववर्णादि तद्यथा ॥ १ ॥ ॐ ह्रौं क्ष्रौं ह्रौं हाम् इति सन्धानानि ॥ उभौ शक्तिशिवौ तत्त्वे भुवनाष्टकसिद्धिकम् ॥ दीपकं रोचकं चैव मोचकं चोर्द्ध्वगामि च ॥ २ ॥ व्योमरूपमनाथं च स्यादनाश्रितमष्टमम् ॥ ॐ कार-पदमीशाने मंत्रो वर्णाश्च षोडश ॥ ३ ॥ अकारादिविसर्गान्ता बीजेन देहकारकौ ॥ कुहूश्च शङ्खिनी नाड्यौ देवदत्तधनञ्जयौ ॥४॥ मारुतौ स्पर्शनं श्रोत्रमिन्द्रिये विषयो नभः ॥ शब्दो गुणोऽस्यावस्था तु तुर्य्यातीता तु पञ्चमी ॥ ५ ॥ हेतुः सदाशिवो देव इति तत्त्वादिसंश्चयम् ॥ सञ्चिन्त्य शान्त्यंतीताख्यं विदध्यात्ताडनादिकम्॥६॥कलापाशं समाताड्य फडन्तेन विभिद्य च॥ प्रविश्यान्त-र्न्नमोऽन्तेन फडन्तेन वियोजयेत् ॥७॥ शिखाहृत्सम्पुटीभूतं स्वाहान्तं सृणिमुद्रया ॥ पूरकेण समाकृष्य पाशं मस्तकसूत्रतः ॥ ८ ॥ कुम्भकेन समादाय रेचकेनोद्भवाख्यया ॥ हृत्सम्पुटं नमोन्तेन वह्निं कुण्डे निवेशयेत् ॥ ९ ॥ अस्याः पूजादिकं सर्वं निवृत्ते-रिव साधयेत् ॥ सदाशिवं समावाह्य पूजयित्वा प्रतर्प्य च ॥ १० ॥ सदाख्यातेऽधिकारेऽस्मिन्मुमुक्षुं दीक्षयाम्यहम् ॥ भाव्यं

त्वयाऽनुकूलेन भक्त्या विज्ञापयेदिति ॥ ११ ॥ पित्रोरावाहनं पूजां कृत्वा तर्पणसन्निधौ ॥ हृत्सम्पुटात्मबीजेन शिष्यं वक्षसि ताडयेत् ॥ १२ ॥ ॐ हां हूं हं फट् । प्रविश्य चाप्यनेनैव चैतन्यं विभजेत्ततः ॥ शस्त्रेण पाशसंयुक्तं ज्येष्ठयाऽङ्कुशमुद्रया ॥ १३ ॥ ॐ हां हः हूं फट् ॥ स्वाहान्तेन तद्वाकृष्य तेनैव पुटितात्मना ॥ गृहीत्वा तन्नमोऽन्तेन निजात्मनि नियोजयेत् ॥ १४ ॥ ॐ हां हं हीम् आत्मने नमः । पूर्ववत्पितृसंयोगं भावयित्वोद्भवाख्यया ॥ वामया तदनेनैव देव्या गर्भे नियोजयेत् ॥ १५॥ गर्भाधानादिकं सर्वं पूर्वोक्तविधिना चरेत् ॥ मूलेन पाशशैथिल्ये निष्कृत्यैव शतं जपेत् ॥ १६ ॥ नलशक्तितिरोधाने पाशानां च वियोजने ॥ पञ्च पञ्चाहुतीर्दद्यादायुधेन यथापुरा ॥ १७ ॥ पाशानायुधमन्त्रेण सप्तवाराभिजप्तया ॥ छिन्द्यादस्त्रेण कर्त्तर्य्या कलाबीजयुजा यथा ॥ १८ ॥ ॐ हां शान्त्यतीतकलापाशाय हः हूं फट् ॥ विमृज्य वर्त्तुलीकृत्य पाशानस्त्रेण पूर्ववत् ॥ घृतपूर्णे स्रुवे दत्त्वा कलास्त्रेणैव होमयेत् ॥ १९ ॥ अस्त्रेण जुहुयात्पञ्च पाशाङ्कुशनिवृत्तये ॥ प्रायश्चित्तनिषेधार्थं दद्यादष्टाहुतीस्ततः ॥ २० ॥ सदाशिवं हृदावाह्य कृत्वा पूजनतर्पणे ॥ पूर्वोक्तविधिना कुर्य्यादधिकारसमर्पणम् ॥ २१ ॥ ॐ हां सदाशिवमनोबिन्दुं शुल्कं गृहाण स्वाहा । निःशेषदग्धपाशस्य पशोरस्य सदाशिव ॥ बन्धाय न त्वया स्थेयं शिवाज्ञां श्रावयेदिति ॥ २२ ॥ मूलेन जुहुयात्पूर्णां विसृजेत्तु सदाशिवम् ॥ ततो विशुद्धमात्मानं शरच्चन्द्रमिवोदितम् ॥ २३ ॥ संहारमुद्रया रौद्र्या संयोज्य गुरुरात्मनि ॥ कुर्वीत शिष्यदेहस्थमुद्धृत्योद्भवमुद्रया ॥ २४ ॥ दद्यादाप्यायनायास्य मस्तकेऽर्घ्याम्बुबिन्दुकम् ॥ क्षमयित्वा महाभक्त्या पितरौ विसृजेत्तथा ॥ २५ ॥ खेदितौ शिष्यदीक्षायै यन्मया पितरौ युवाम् ॥ कारुण्यान्मोक्षयित्वा तद्व्रज त्वं स्थानमात्मनः ॥ २६ ॥ शिखामन्त्रितकर्त्तर्य्या बोधशक्तिस्वरूपिणीम् ॥ शिखां छिन्द्याच्छिवास्त्रेण शिष्यस्य चतुरङ्गुलाम् ॥ २७ ॥ ॐ क्ष्रीं शिखायै हूं फट् ॐ हः अस्त्राय हूं फट् ॥ स्रुचि तां घृतपूर्णायां गोविड्गोलकमध्यगाम् ॥ संविधायास्त्रमन्त्रेण हूं फडन्तेन होमयेत् ॥ २८ ॥ ॐ हौं हः अस्त्राय हूं फट् । प्रक्षाल्य स्रुक्स्रुवौ शिष्यं संस्नाप्याचम्य च स्वयम् ॥ योजनिकास्थमात्मानं शस्त्रमन्त्रेण ताडयेत ॥ २९ ॥ वियोज्याकृष्य सम्पूज्य पूर्ववद्वादशान्ततः ॥ आत्मीयहृदयाम्भोजकर्णिकायां निवेशयेत् ॥ ३० ॥

पूरितं स्रुवमाज्येन विहिताधोमुखस्रुचा ॥ नित्योक्तविधिनाऽऽदाय शङ्खसन्निभमुद्रया ॥ ३१ ॥ प्रसारितशिरोग्रीवो नादोच्चारानुसारतः ॥ समदृष्टिः स्थिरश्चान्तः परभावसमन्वितः ॥ ३२ ॥ कुम्भमण्डलवह्निभ्यः शिष्यादपि निजात्मनः ॥ गृहीत्वा षड्विधाध्वानं सुगम्रे प्राणनाडिकम् ॥ ३३ ॥ सञ्चिन्त्य बिन्दुवद्धत्वा क्रमशः सप्तधा यथा ॥ प्रथमं प्राणसंयोगस्वरूपमपरं ततः ॥ ३४ ॥ हृदयादिक्रमोच्चारविसृष्टं मन्त्रसञ्ज्ञकम् ॥ पूरकं कुम्भकं कृत्वा व्यादाय वदनं मनाक् ॥ ३५ ॥ सुषुम्णानुगतं नादस्वरूपं तु तृतीयकम् ॥ सप्तमे कारणे त्यागात्प्रशान्तं विश्वरं लयः ॥ ३६ ॥ शक्तिनादोर्ध्वसञ्चारस्तच्छक्ति विस्वरं मतम् ॥ प्राणस्य निखिलस्यापि शक्तिप्रमेयवर्जितम् ॥ ३७ ॥ तत्कालविश्वरं षष्ठं शक्त्यतीतं च सप्तमम् ॥ तदेतद्योजनास्थानं विश्वरं तत्त्वसञ्ज्ञकम् ॥ ३८ ॥ पूरकं कुम्भकं कृत्वा व्यादाय वदनं मनाक् ॥ शनैरुदीरयेन्मूलं कृत्वा शिष्यात्मनो लयम् ॥ ३९ ॥ हकारे तडिदाकारे षडध्वंप्राणरूपिणि ॥ उकारं परतो नाभेर्वितास्तिं व्याप्य संस्थितम् ॥ ४० ॥ ततः परं मकारन्तु हृदयाच्चतुरङ्गुलम् ॥ ॐकारवाचकं विष्णोस्ततोऽष्टाङ्गुलकण्ठकम् ॥ ४१ ॥ चतुरङ्गुलतालुस्थं मकारं रुद्रवाचकम् ॥ तद्भ्रुलाटमध्यस्थं बिन्दुमीश्वरवाचकम् ॥ ४२ ॥ नादं सदाशिवं देवं ब्रह्मरन्ध्रावसानकम् ॥ शक्तिं च ब्रह्मरन्ध्रस्थां त्यजन्नित्यमनुक्रमात् ॥ ४३ ॥ दिव्यं पिपीलिकास्पर्शं तस्मिन्नेवानुभूय च ॥ द्वादशान्ते परे तत्त्वे परमानन्दलक्षणे ॥ ४४ ॥ भावशून्ये मनोऽतीते शिवे नित्यगुणोदये ॥ विलीय मानसे तस्मिञ्छिष्यात्मानं विभावयेत् ॥ ४५ ॥ विमुञ्चन्सर्पिषो धारां ज्वालान्तेऽपि परे शिवे ॥ योजनिकास्थिरत्वाय वोपडन्तशिवाणुना ॥ ४६ ॥ दत्त्वा पूर्णां विधानेन गुणापादनमाचरेत् ॥ ॐ हाम् आत्मने सर्वज्ञो भव स्वाहा । ॐ हाम् आत्मने परितृप्तो भव स्वाहा । ॐ हूम् आत्मने अनादिबोधो भव स्वाहा । ॐ हौम् आत्मने स्वतन्त्रो भव स्वाहा ॥ ॐ हौम् आत्मन् अलुप्तशक्तिर्भव स्वाहा । ॐ हः आत्मने अनन्तशक्तिर्भव स्वाहा । इत्थं षड्गुणमात्मानं गृहीत्वा परमाक्षरात् ॥ ४७ ॥ विधिना भावनोपेतः शिष्यदेहे नियोजयेत् ॥ तीव्राणुशक्तिसम्पातजनितश्रमशान्तये ॥ ४८ ॥ शिष्यमूर्द्धानि विन्यस्येदर्घ्यादमृतबिन्दुकम् ॥ प्रणमय्येशकुम्भादीञ्छिवाद्दक्षिणमण्डले ॥ ४९ ॥ सौम्यवक्त्रं व्यवस्थाप्य शिष्यं दक्षि-

णमात्मनः ॥ त्वयेवानुगृहीतोऽयं मूर्तिमास्थाय मामकाम् ॥ ५० ॥ देवे वह्नौ गुरौ तस्माद्भक्तिं चाप्यस्य वर्द्धय ॥ इति विज्ञाप्य देवेशं प्रणम्य च गुरुः स्वयम् ॥ ५१ ॥ श्रेयस्तवास्त्विति ब्रूयादाशिषं शिष्यमादरात् ॥ ततः परमया भक्त्या दत्त्वा देवेऽष्टपुष्पिकाम् ॥ पुत्रकं शिवकुंभेन संस्नाप्य विसृजेन्मखम् ॥ ५२ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षाविधिर्नामाऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥ एकतत्त्वदीक्षाविधिः ॥ ईश्वर उवाच ॥ अथैकतात्त्विकी दीक्षा लघुत्वादुपदिश्यते ॥ सूत्रबन्धादि कुर्वीत यथायोगं निजात्मना ॥ १ ॥ कालाग्न्यादिशिवान्तानि तत्त्वानि परिभावयेत् ॥ समतत्त्वे समग्राणि सूत्रे मणिगणानिव ॥ २ ॥ आवाह्य शिवतत्त्वादि गर्भाधानादि पूर्ववत् ॥ मूलेन किन्तु कुर्वीत सर्व्वशुल्कसमर्पणम् ॥ ३ ॥ प्रददीत ततः पूर्णां तत्त्वत्रातोपगर्भिताम् ॥ एकयैव यया शिष्यो निर्व्वाणमधिगच्छति ॥ ४ ॥ योजनायै शिवे चान्यां स्थिरत्वापादनाय च ॥ दत्त्वा पूर्णां प्रकुर्वीत शिवकुंभाभिषेचनम् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये एकतत्त्वदीक्षाविधिर्नामैकोननवतितमोऽध्यायः ॥ ८९ ॥ अथाभिषेकादि ॥ ईश्वर उवाच ॥ शिवमभ्यर्च्याभिषेकं कुर्य्याच्छिष्यादिके श्रिये ॥ कुम्भानीशादिकाष्ठासु क्रमशो नव विन्यसेत् ॥ ॥ १ ॥ तेषु क्षारोदं क्षीरोदं दध्युदं घृतसागरम् ॥ इक्षुकादंबरीस्वादुमस्तूदानष्ट सागरान् ॥ २ ॥ निवेशयेद्यथासङ्ख्यमष्टौ विद्येश्वरानथ ॥ एकं शिखण्डिनं रुद्रं श्रीकण्ठं तु द्वितीयकम् ॥ ३ ॥ त्रिमूर्त्तमेकरुद्राक्षमेकनेत्रं शिवोत्तमम् ॥ सप्तमं सूक्ष्मनामानमनन्तं रुद्रमष्टमम् ॥ ४ ॥ मध्ये शिवं समुद्रं च शिवमन्त्रं च विन्यसेत् ॥ यागालयान्दिगीशस्य रचिते स्नानमण्डपे ॥ ५ ॥ कुर्य्यात्करद्वयायामां वेदिमष्टाङ्गुलोच्छ्रिताम् ॥ श्रीपर्णाद्यासने तत्र विन्यस्यानन्तमासनम् ॥ ६॥ शिष्यं निवेश्य पूर्वस्यां सकलीकृत्य पूजयेत् ॥ काञ्जिकोदनमृद्रस्मदूर्वागोमयगोलकैः ॥ ७ ॥ सिद्धार्थदधितायैश्च कुर्य्यान्निर्मन्थनं ततः ॥ क्षारोदानुक्रमेणाथ हृदा विद्येशशम्बरैः ॥ ८ ॥ कलशैः स्नापयेच्छिष्यं स्वधाधारणयान्वितम् ॥ परिधाप्य सिते वस्त्रे निवेश्य शिवदक्षिणे ॥ ९ ॥ पूर्वोदितासने शिष्यं पुनः पूर्ववदर्च्चयेत् ॥ उष्णीषं योगपट्टं च मुकुटं कर्त्तरीं घटीम् ॥ १० ॥ अक्षमालां पुस्तकादि शिविकाद्यधिकारकम् ॥ दीक्षाव्याख्याप्रतिष्ठाद्यं ज्ञात्वाऽद्यप्रभृति त्वया ॥ ११ ॥ सुपरीक्ष्य विधातव्यमाज्ञां संश्रावयेदिति ॥ अभि-

वाद्य ततः शिष्यं प्रणिपत्य महेश्वरम् ॥ १२ ॥ विघ्नज्वालापनोदाथ कुर्य्याद्विज्ञापनं यथा ॥ अभिषेकार्थमादिष्टस्त्वयाऽहं गुरुमूर्त्तिना ॥ १३ ॥ संहितापारगः सोऽयमभिषिक्तो मया शिव ॥ तृप्तये मन्त्रचक्रस्य पञ्च पञ्चाहुतीर्यजेत् ॥ १४ ॥ दद्यात्पूर्णां ततः शिष्यं स्थापयेन्निजदक्षिणे ॥ शिष्यदक्षिणपाणिस्था अङ्गुष्ठाद्यङ्गुलीः क्रमात् ॥ १५ ॥ लाञ्छयेदुपबद्धाय दग्धदर्भाग्रशम्बरैः ॥ कुसुमानि करे दत्त्वा प्रणामं कारयेदमुम् ॥ १६ ॥ कुम्भेऽनले शिवे स्वस्मिंस्ततस्तत्कृत्यमाविशेत् ॥ अनुग्राह्यास्त्वया शिष्याः शास्त्रेण सुपरीक्षिताः ॥ १७ ॥ भूपवन्मानवादीनामभिषेकादभीप्सितम् ॥ ॐ श्रां श्रीं पशु हूं फडित्यस्त्रराजाभिषेकतः ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षाभिषेकादिविधिर्नाम नवतितमोऽध्यायः ॥ ९० ॥ अथ विविधमन्त्रादयः ॥ ईश्वर उवाच ॥ अभिषिक्तः शिवं विष्णुं पूजयेद्रास्करादिकान् ॥ शङ्खभेर्य्यादिनिर्घोषैः स्नापयेत्पञ्चगव्यकैः ॥ १ ॥ यो देवान्देवलोक स याति स्वकुलमुद्धरन् ॥ वर्षकोटिसहस्रेषु यत्पापं समुपार्जितम् ॥ २ ॥ घृताभ्यङ्गेन देवानां भस्मीभवति पावके ॥ आढकेन घृताद्यैश्च देवान्स्नाप्य सुरो भवेत् ॥ ३ ॥ चन्दनेनानुलिप्याथ गन्धाद्यैः पूजयेत्तथा ॥ अल्पायासेन स्तुतिभिः स्तुता देवास्तु सर्वदा ॥ ४ ॥ अतीतानागतज्ञानमन्त्रधीभुक्तिमुक्तिदाः ॥ गृहीत्वा प्रश्नसूक्ष्मार्णे हृते द्वाभ्यां शुभाशुभम् ॥ ५ ॥ त्रिभिर्जीवो मूलधातुश्चतुर्भिर्ब्राह्मणादिभिः ॥ पञ्चादौ भूततत्त्वादि शेषे चैवं जपादिकम् ॥ ६ ॥ एकत्रिकातित्रिकान्ते पदे द्विपञ्चकान्तके ॥ अशुभं मध्यमं मध्येष्विन्द्रस्त्रिषु नृपः शुभः ॥ ७ ॥ संख्यावृन्दे जीविताब्दं यमोऽब्ददशहा ध्रुवम् ॥ सूर्य्येभास्येशदुर्गाश्रीविष्णुमन्त्रैर्लिखेत्कजे ॥ ८ ॥ कठिन्या जतया स्पृष्टे गोमूत्राकृतिरेखया ॥ आरभ्यैकं त्रिकं यावत्त्रिचतुष्कावसानकम् ॥ ९ ॥ मरुद्व्योममरुद्भीजैश्चतुःषष्टिपदे तथा ॥ अक्षाणां पतनात्स्पर्शाद्विषमादौ शुभादिकम् ॥ १० ॥ एकत्रिकादिमारभ्य अन्ते चाष्टत्रिकं तथा ॥ ध्वजाद्या याः समा हीना विषमाः शोभनादिदाः ॥ ११ ॥ आईपल्लवितैः काद्यैः षोडशस्वरपूर्वगैः ॥ आद्यैस्तैः सस्वरैः काद्यैस्त्रिपुरानाममन्त्रकाः ॥ १२ ॥ ह्रींबीजाः प्रणवाद्याः स्युर्नमोऽन्ता यत्र पूजने ॥ मन्त्रा विंशतिसाहस्राः शत षष्ट्यधिकं ततः ॥ १३ ॥ आं ह्रीं मन्त्राः सरस्वत्याश्चण्डिकायास्तथैव च ॥ तथा गौर्य्याश्च दुर्गाया आं श्रीं मन्त्राः श्रियस्तथा ॥ १४ ॥ तथा क्षौंमन्त्राः सूर्यस्य

आद्यैर्मन्त्राः शिवस्य च ॥ आंगमन्त्रा गणेशस्य आमन्त्राश्च तथा हरेः ॥ १५ ॥ शताद्यैकाधिकैः काद्यैस्तथा षोडशभिः स्वरैः ॥
काद्यैस्तैः सस्वरैराद्यैः कान्तैर्मन्त्रास्तथाखिलाः ॥१६ ॥ रवीशदेवीविष्णूनां स्वाब्धिदेवेन्द्रवर्त्तनात् ॥ शतत्रयं षष्ट्यधिकं प्रत्येकं
मण्डलं क्रमात् ॥ अभिषिक्तो जपेद्ध्यायेच्छिष्यादीन्दीक्षयेद्गुरुः ॥ १७ ॥ इत्यादिमहापुराणे आग्नेयेऽभिषिक्तेन कर्तव्यस्य तत्तद्दे-
वतामन्त्रजपादिविधिर्नामैकनवतितमोऽध्यायः ॥ ९१ ॥ अथ वास्तुप्रतिष्ठाविधिः ॥ ईश्वर उवाच ॥ प्रतिष्ठां सम्प्रवक्ष्यामि
क्रमात्सङ्क्षेपतो गुह ॥ पीठं शक्तिं शिवो लिङ्गं तद्योगः सा शिवाणुभिः ॥ १ ॥ प्रतिष्ठायाः पञ्च भेदास्तेषां रूपं वदामि ते ॥ यत्र
ब्रह्मशिलायोगः सा प्रतिष्ठा विशेषतः॥२॥ स्थापनं तु यथायोगं पीठ एव निवेशनम् ॥ प्रतिष्ठाभिन्नपीठस्य स्थितः स्थापनमुच्यते
॥ ३ ॥ उत्थापनं च सा प्रोक्ता लिङ्गोद्धारपुरःसरा ॥ यस्यां तु लिङ्गमारोप्य संस्कारः क्रियते बुधैः ॥ ४ ॥ आस्थापनं तदुद्दिष्टं
द्विधा विष्ण्वादिकस्य च ॥ आसु सर्वासु चैतन्यं नियुञ्जीत परं शिवम् ॥ ५ ॥ यदाधारादिभेदेन प्रासादेष्वपि पञ्चधा ॥ परीक्षा-
मथ मेदिन्याः कुर्य्यात्प्रासादकाम्यया ॥ ६ ॥ शुक्लाज्यगन्धा रक्ता च रक्तगन्धा सुगन्धिनी ॥ पीता कृष्णा सुरागन्धा विप्रादीनां
मही क्रमात् ॥ ७ ॥ पूर्वेशोत्तरे सर्वत्र पूर्वा चैषां विशिष्यते ॥ आखाते हास्तिके यस्याः पूर्णे मृदधिका भवेत ॥ ८ ॥ उत्तमां
तां महीं विद्यात्तोयाद्यैर्वा समुक्षिताम् ॥ अस्थ्यङ्गारादिभिर्दुष्टामत्यन्तं शोधयेद्गुरुः ॥ ९ ॥ नगरग्रामदुर्गार्थं गृहप्रासाद-
कारणम् ॥ खननेगोंकुलावासैः कर्षणैर्वा मुहुर्मुहुः ॥ १० ॥ मण्डपे द्वारपूजादि मन्त्रतृप्त्यवसानकम् ॥ कर्म्म निर्वर्त्त्यार्घोरास्त्रं
सहस्रं विधिना यजेत् ॥ ११ ॥ समीकृत्योपलिप्तायां भूमौ संशोधयेद्दिशः ॥ स्वर्णदध्यक्षते रेखाः प्रकुर्वीत प्रदक्षिणम् ॥ १२ ॥
मध्यादीशानकोष्ठस्थे पूर्णकुम्भे शिवं यजेत् ॥ वास्तुमभ्यर्च्य तत्तोयैः सिञ्चेत्कुदालकादिकम् ॥ १३ ॥ बाह्ये रक्षोगणानिद्वा
विधिना दिग्बलिं क्षिपेत् ॥ भूमिं संसिच्य संस्नाप्य कुदालाद्यं प्रपूजयेत् ॥ १४ ॥ अन्यं वस्त्रयुगच्छन्नं कुम्भं स्कन्धे
द्विजन्मनः ॥ निधाय गीतवाद्यादिब्रह्मघोषसमाकुलम् ॥ १५ ॥ पूजां कुम्भे समास्तृत्य प्राप्ते लग्नेऽग्निकोष्ठके ॥ कुदालेना-
भिषिक्तेन मध्यक्तेन तु खानयेत् ॥ १६ ॥ नैर्ऋत्यां क्षेपयेन्मृत्स्नां खाते कुम्भजलं क्षिपेत् ॥ पुरस्य पूर्वसीमान्तं नयेद्यावदमी-

॥ ९७ ॥

प्सितम् ॥ १७ ॥ अथ तत्र क्षणं स्थित्वा भ्रामयेत्परितः पुरम् ॥ सिञ्चन्सीमान्तचिह्नानि यावदीशानगोचरम् ॥ १८ ॥ अर्घ्यदानमिदं प्रोक्तं तत्र कुम्भपरिभ्रमात् ॥ इत्थं परिग्रहं भूमेः कुर्वीत तदनन्तरम् ॥ १९ ॥ कर्करान्तं जलान्तं वा शल्य-दोषजिघांसया ॥ खानयेद्बुकुमारीं चेद्विधिना शल्यमुद्धरेत् ॥ २० ॥ अकचटतपयशहान्मानवश्चेत्प्रश्नाक्षराणि तु ॥ अग्नेर्ध्वजादिपतिताः स्वस्थाने शल्यमाख्यान्ति ॥ २१ ॥ कर्त्तुश्चाङ्गविकारेण जानीयात्तत्प्रमाणतः ॥ पश्वादीनां प्रवेशेन कीर्त्तनैर्विरुतैर्दिशः ॥ २२ ॥ मातृकामष्टवर्गाढ्यां फलके भुवि वा लिखेत् ॥ शल्यज्ञानं वर्गवशात्पूर्वादीशान्ततः क्रमात् ॥ २३ ॥ अवर्गे चैव लोहं तु कवर्गेऽङ्गारमग्नितः ॥ चवर्गे भस्म दक्षे स्याट्टवर्गेऽस्थि च नैर्ऋते ॥ २४ ॥ तवर्गे चेष्टका चाप्ये कपालं च पवर्गके ॥ यवर्गे शवकीटादि शवर्गे लोहमादिशेत् ॥ २५ ॥ हवर्गे रजतं तद्वदवर्गाच्चानर्थकरानपि ॥ प्रोक्ष्यात्मभिः करापूरैरष्टाङ्गुलमृदन्तरैः ॥ २६ ॥ पादोनं खातमापूर्य्य सजलैर्मुद्गराहतैः ॥ लिप्तां समपृष्ठां तत्र कारयित्वा भुवं गुरुः ॥ २७ ॥ सामान्यार्घ्यकरो यायान्मण्डपं वक्ष्यमाणकम् ॥ तोरणद्वाःपतीनिष्ट्वा प्रत्यग्द्वारेण संविशेत् ॥ २८ ॥ कुर्य्यात्तत्रात्मशुद्ध्यादि कुण्डमण्डपसंस्कृतिम् ॥ कलशं वर्द्धनीसक्तं लोकपालशिवार्च्चनम् ॥ २९ ॥ अग्नेर्जननपूजादि सर्वं पूर्ववदाचरेत् ॥ यजमानान्वितो यायाच्छिलानां स्नानमण्डपम् ॥ ३०. ॥ शिलाः प्रासादलिङ्गस्य पादा धर्म्मादिसञ्ज्ञकाः ॥ अष्टाङ्गुलोच्छ्रिताः शस्ताश्चतुरस्राः करायताः ॥ ३१ ॥ पाषाणानां शिलाः कार्य्या इष्टकानां तदर्द्धतः ॥ प्रासादे स्म शिलाः शैल इष्टका इष्टकामये ॥ ३२ ॥ अङ्किता नववक्त्राद्यैः पङ्कजैः पङ्कजाङ्किताः ॥ नन्दा भद्रा जया रिक्ता पूर्णाख्या पञ्चमी मता ॥ ३३ ॥ आसां पद्मो महापद्मः शङ्खोऽथ मकरस्तथा ॥ समुद्रश्चेति पञ्चामी निधिकुम्भाः क्रमादधः ॥ ३४ ॥ नन्दा भद्रा जया पूर्णा अजिता चापराजिता ॥ विजया मङ्गलाख्या च धरणी नवमी शिला ॥ ३५ ॥ सुभद्रश्च विभद्रश्च सुनन्दः पुष्पनन्दकः ॥ जयोऽथ विजयश्चैव कुम्भः पूर्णस्तथोत्तरः ॥ ३६ ॥ नवानां तु यथासंख्यं निधिकुम्भा अमी नव ॥ आसनं प्रथमं दत्त्वा ताडयोल्लिख्य शस्त्रगुना ॥ ३७ ॥ सर्वासामविशेषेण तनुत्रेणावगुण्ठनम् ॥ मृद्भिर्गोमयगोमूत्रकषायैर्गन्धवा-

रिणा ॥ ३८ ॥ अस्त्रेण हूंफडन्तेन मलस्नानं समाचरेत् ॥ विधिना पञ्चगव्येन स्नानं पञ्चामृतेन च ॥ ३९ ॥ गन्धतोयान्तरं कुर्य्यान्निजनामाङ्कितेनुना ॥ फलरत्नसुवर्णानां गोशृङ्गसलिलैस्ततः ॥ ४० ॥ चन्दनेन समालभ्य वस्त्रैराच्छादयेच्छिलाम् ॥ स्वर्णोत्थमासनं दत्त्वा नीत्वा यागं प्रदक्षिणम् ॥ ४१ ॥ शय्यायां कुशतल्पे वा हृदयेन निवेशयेत् ॥ संपूज्य न्यस्य बुद्ध्यादि धरान्तं तत्त्वसञ्चयम् ॥ ४२ ॥ त्रिखण्डव्यापकं तत्त्वत्रयं चानुक्रमान्न्यसेत् ॥ बुद्ध्यादौ चित्तपर्य्यन्ते चिन्तातन्मात्रकावधौ ॥ ॥ ४३ ॥ तन्मात्रादौ धरान्ते च शिवविद्यात्मनां स्थितिः ॥ तत्त्वानि निजमंत्रेण तत्त्वेशांश्च हृदाऽर्च्चयेत् ॥ ४४ ॥ स्थानेषु पुष्पमालादिचिह्नितेषु यथाक्रमम् । ॐ हूं शिवतत्त्वाय नमः । ॐ हूं शिवतत्त्वाधिपतये रुद्राय नमः । ॐ हां विद्यातत्त्वाय नमः । ॐ हां विद्यातत्त्वाधिपाय विष्णवे नमः ॥ ॐ हाम् आत्मतत्त्वाय नमः । ॐ हाम् आत्मतत्त्वाधिपतये ब्रह्मणे नमः ॥ क्षमाग्नियजमानार्कजलवातेन्दुखानि च ॥ ४५ ॥ प्रतितत्त्वं न्यसेदष्टौ मूर्तीः प्रति शिलां शिलाम् ॥ शर्वं पशुपतिं चोग्रं रुद्रं भवमथेश्वरम् ॥ ४६ ॥ महादेवं च भीमं च मूर्तीशांश्च यथाक्रमात् ॥ ॐ धरामूर्त्तये नमः । ओं धराधिपतये नमः ॥ इत्यादिमंत्रौंल्लोकपालान्यथासंख्यं निजाणुभिः ॥ ४७ ॥ विन्यस्य पूजयेत्कुम्भांस्तन्मन्त्रैर्वा निजाणुभिः ॥ इन्द्रादीनां तु बीजानि वक्ष्यमाणक्रमेण तु ॥ ४८ ॥ लूं रूं शूं पूं वूं यूं सूं हूं क्षूमिति ॥ उक्तो नवशिलापक्षः शिला पञ्चपदा तथा ॥ प्रतितत्त्वं न्यसेन्मूर्त्तीः सृष्ट्या पञ्च धरादिकाः ॥ ४९ ॥ ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः ॥ एते च पञ्च मूर्त्तीशा यष्टव्यास्तासु पूर्ववत् ॥ ५० ॥ ॐ पृथ्वीमूर्त्तये नमः । ॐ पृथ्वीमूर्त्त्यधिपतये ब्रह्मणे नमः । इत्यादिमन्त्राः । संपूज्य कलशान्पञ्च क्रमेण निजनामभिः ॥ निरुन्धीत विधानेन न्यासो मध्यशिलाक्रमात् ॥ ५१ ॥ कुर्य्यात्प्राकारमन्त्रेण भूतिदर्भैस्तिलैस्ततः ॥ कुण्डेषु घारिकां शक्तिं विन्यस्याभ्यर्च्य तर्पयेत् ॥ ५२ ॥ तत्त्वतत्त्वाधिपान्मूर्तीर्मूर्त्तीशांश्च घृतादिभिः ॥ ततो ब्रह्मांशशुद्ध्यर्थं मूलाङ्गं ब्रह्मभिः क्रमात् ॥ ५३ ॥ कृत्वा शतादिपूर्णान्तं प्रोक्ष्याः शान्तिजलैः शिलाः ॥ पूजयेच्च कुशैः स्पृष्ट्वा प्रतितत्त्वमनुक्रमात् ॥ ५४ ॥ सान्निध्यमथ सन्धानं कृत्वा शुद्ध पुनर्न्यसेत् ॥ एवं भागत्रये कर्म गत्वा गत्वा समाचरेत् ॥ ५५ ॥

ॐ आम् ईम् आत्मतत्त्वविद्यातत्त्वाभ्यां नमः इति ॥ संस्पृशेद्दर्भमूलाद्यैर्ब्रह्माङ्गादित्रयं क्रमात् ॥ कुर्य्यात्तत्त्वानुसन्धानं ह्रस्वदीर्घ-प्रयोगतः ॥ ५६ ॥ ॐ हाम् उम् विद्यातत्त्वशिवतत्त्वाभ्यां नमः ॥ घृतेन मधुना पूर्णांस्ताम्रकुंभान्सरत्नकान् ॥ पञ्चगव्यार्घ्य-संसिक्ताँल्लोकपालाधिदेवतान् ॥ ५७ ॥ पूजयित्वा निजैर्मन्त्रैः सन्निधौ होममाचरेत् ॥ शिलानामथ सर्वासां संस्मरेदधि-देवताः ॥ ५८ ॥ विद्यारूपाः कृतस्नाना हेमवर्णाः शिलांबराः ॥ न्यूनादिदोषमोषार्थं वास्तुभूमेश्च शुद्धये ॥ यजेदस्त्रेण मूर्द्धान्तमाहुतीनां शतं शतम् ॥ ५९ ॥ इत्यादिमहापुराणे आग्नेये वास्तुप्रतिष्ठाङ्गशिलान्यासविधिर्नाम द्विनवतितमोऽ-ध्यायः ॥ ९२ ॥ अथ वास्तुपूजादिविधानम् ॥ ईश्वर उवाच ॥ ततः प्रासादमासूत्र्य वर्त्तयेद्वास्तुमण्डपम् ॥ कुर्य्यात्कोष्ठचतुःषष्टिं क्षेत्रे वेदास्रके समे ॥ १ ॥ कोणेषु विन्यसेद्रंशौ रज्जवोऽष्टौ विकोणगाः ॥ द्विपदाः षट्पदास्तास्तु वास्तुं तत्रार्च्चये-द्यथा ॥ २ ॥ आकुञ्चितकचं वास्तुमुत्तानमसुराकृतिम् ॥ स्मरेत्पूजासु कुड्यादिनिवेशे त्वधराननम् ॥ ३ ॥ जानुनी कूर्परौ सक्थि दिशि वातहुताशयोः ॥ पैत्र्यां पादपुटे रौद्र्यां शिरोऽस्य हृदयेऽञ्जलिः ॥ ४ ॥ अस्य देहे समारूढा देवताः पूजिताः शुभाः ॥ अष्टौ कोणाधिपास्तत्र कोणार्द्धेष्वष्टसु स्थिताः ॥ ५ ॥ षट्पदास्तु मरीच्याद्या दिक्षु पूर्वादिषु क्रमात् ॥ मध्ये चतु-ष्पदो ब्रह्मा शेषास्तु पदिकाः स्मृताः ॥ ६ ॥ समस्तनाडीसंयोगे महामर्म्मानुजं फलम् ॥ त्रिशूलं स्वस्तिकं वज्रं महास्वस्तिक-सम्पुटौ ॥ ७ ॥ त्रिकटुं माणिबन्धं च सुविशुद्धं पदं तथा ॥ इति द्वादश मर्म्माणि वास्तोर्भित्त्यादिषु त्यजेत् ॥ ८ ॥ साज्यम-क्षतमीशाय पर्जन्यायाम्बुजोदकम् ॥ ददीताथ जयन्ताय पताकां कुङ्कुमोज्ज्वलाम् ॥ ९ ॥ रत्नवारि महेन्द्राय रवौ धूम्रं वितानकम् ॥ सत्याय घृतगोधूममाज्यभक्तं भृशाय च ॥ १० ॥ विर्मांसमन्तरिक्षाय शकुन्तेभ्यस्तु पूर्वतः ॥ मधुक्षीराज्यसम्पूर्णां प्रदद्याद्ब्रह्मये स्रुचम् ॥ ११ ॥ लाजान्पूर्णे सुवर्णाम्बु वितथाय निवेदयेत् ॥ दद्याद्बृहक्षते क्षौद्रं यमराजे पलौदनम् ॥ १२ ॥ गन्धं गन्धर्वनाथाय जिह्वां भृङ्गाय पक्षिणः ॥ मृगाय पद्मपर्णानि याम्यामित्यष्ट देवताः ॥ १३ ॥ पित्रे तिलोदकं क्षीरवृक्षजं दन्तधावनम् ॥ दौवारिकाय देवाय प्रदद्याद्धेनुमुद्रया ॥ १४ ॥ सुग्रीवाय दिशेत्पूपान्पुष्पदन्ताय दर्भकम् ॥ रक्तं प्रचेतसे

पद्ममसुराय सुरासवम् ॥ १५ ॥ घृतं गुडौदनं शेषे रोगाय घृतमण्डकान् ॥ लाजान्वा पश्चिमाशायां देवाष्टकमितीरितम् ॥ १६ ॥ मारुताय ध्वजं पीतं नागाय नागकेसरम् ॥ मुख्ये भक्ष्याणि भल्लाटे मुद्गसूपं सुसंस्कृतम् ॥ १७ ॥ सोमाय पायसं साज्यं शालूकं मूषये दिशेत् ॥ लोपीमदितये दित्यै पुरीमित्युत्तराष्टकम् ॥ १८ ॥ मोदकान्ब्रह्मणः प्राच्यां षट्पदाय मरीचये ॥ सवित्रे रक्तपुष्पाणि वह्नयधःकोणकोष्ठके ॥ १९ ॥ तदधःकोष्ठके दद्यात्सावित्र्यै च कुशोदकम् ॥ दक्षिणे चन्दनं रक्तं षट्पदाय विवस्वते ॥ २० ॥ हारिद्रौदनामिंद्राय रक्षोधःकोणकोष्ठके ॥ इन्द्रजाय च मिश्रान्नमिन्द्राधस्तान्निवेदयेत् ॥ २१ ॥ वारुण्यां षट्पदासीने मित्रे सगुडमोदनम् ॥ रुद्राय घृतसिद्धान्नं वायुकोणाधरे पदे ॥ २२ ॥ तदधो रुद्रदासाय मांसं मार्गमथोत्तरे ॥ ददीत माषनैवेद्यं षट्पदस्थे धराधरे ॥ २३ ॥ आपाय शिवकोणाधस्तद्वत्साय च तत्स्थले ॥ क्रमाद्दद्याद्दधि क्षीरं पूजयित्वा विधानतः ॥ २४ ॥ चतुष्पदे निविष्टाय ब्रह्मणे मध्यदेशतः ॥ पञ्चगव्याक्षतोपेतं चरुं साज्यं निवेदयेत् ॥ २५ ॥ ईशादिवायुपर्य्यन्तकोणेष्वथ यथाक्रमम् ॥ वास्तुबाह्ये चरक्याद्याश्चतस्रः पूजयेद्यथा ॥ २६ ॥ चरक्यै सघृतं मांसं विदार्य्यै दधिपङ्कजे ॥ पूतनायै पलं पित्तं रुधिरं च निवेदयेत् ॥ २७ ॥ अस्थीनि पापराक्षस्यै रक्तपित्तपलानि च ॥ ततो माषौदनं प्राच्यां स्कन्दाय विनिवेदयेत् ॥ २८ ॥ अर्य्यम्णे दक्षिणाशायां पूपान्कृसरया युतान् ॥ जम्भकाय च वारुण्यामामिषं रुधिरान्वितम् ॥ २९ ॥ उदीच्यां पिलिपिञ्जाय रक्तान्नं कुसुमानि च ॥ यजेद्वा सकलं वास्तुं कुशदध्यक्षतैर्जलैः ॥ ३० ॥ गृहे च नगरादौ च एकाशीतिपदैर्यजेत् ॥ त्रिपदा रज्जवः कार्य्याः षट्पदाश्च विकोणके ॥ ३१ ॥ ईशाद्याः पादिकास्तास्मिन्नागाद्याश्च द्विकोष्ठगाः ॥ षट्पदस्था मरीच्याद्या ब्रह्मा नवपदः स्मृतः ॥ ३२ ॥ नगरग्रामखेटादौ वास्तुः शतपदोऽपि वा ॥ वंशद्वयं कोणगतं दुर्जयं दुर्धरं सदा ॥३३॥ यथा देवालये न्यासस्तथा शतपदे हितः॥ ग्रहाः स्कन्दादयस्तत्र विज्ञेयाश्चैव षट्पदाः ॥ ३४ ॥ चरक्याद्या भूतपदा रज्जुवंशादि पूर्ववत् ॥ देशसंस्थापने वास्तुश्चतुस्त्रिंशच्छतं भवेत् ॥ ३५ ॥ चतुःषष्टिपदो ब्रह्मा मरीच्याद्याश्च देवताः ॥ चतुष्पञ्चाशत्पदिका आपाद्यष्टौ रसाग्निभिः ॥ ३६ ॥

ईशानाद्या नवपदाः स्कन्दाद्याः शक्तिकाः स्मृताः ॥ चरक्याद्यास्तद्वदेव रज्जुवंशादि पूर्ववत् ॥ ३७ ॥ ज्ञेयो विंशतिसाहस्रेवास्तु-
मण्डलगैः पदैः ॥ न्यासो नवगुणस्तत्र कर्त्तव्यो देशवास्तुवत् ॥ ३८ ॥ पञ्चविंशतिपदो वास्तुर्वैताल्याश्चेनौ स्मृतः ॥ अन्यो
नवपदो वास्तुः षोडशांघ्रिस्तथापरः ॥ ३९ ॥ षडस्रत्र्यस्रवृत्तादेर्म्मध्ये स्याच्चतुरस्रकम् ॥ स्नाते वास्तोः समं पृष्ठे न्यासे ब्रह्म-
शिलात्मके ॥ ४० ॥ शावाकस्य निवेशे च मूर्तिसंस्थापने तथा ॥ पायसेन तु नैवेद्यं सर्वेषां वा प्रशापयेत् ॥ ४१ ॥ उक्तानुक्ते
तु वै वास्तुः पञ्चहस्तप्रमाणतः ॥ गृहप्रासादमानेन वास्तुः श्रेष्ठस्तु सर्वदा ॥ ४२ ॥ इत्यादिमहापुराणे आग्नेये वास्तुपूजाविधिर्नाम
त्रिनवतितमोऽध्यायः ॥ ९३ ॥ अथ शिलाविन्यासविधानम् ॥ ईश्वर उवाच ॥ ईशादिषु चरक्याद्याः पूर्ववत्पूजयेद्बहिः ॥ आहु-
तित्रितयं दद्यात्प्रतिदेवमनुक्रमात् ॥ १ ॥ दत्त्वा भूतबलिं लग्ने शिलान्यासमनुक्रमात् ॥ मध्यसूत्रे न्यसेच्छक्तिं कुम्भं जान्वन्तमुत्तमम्
॥ २ ॥ नकाररूढमूलेन कुम्भेऽस्मिन्धारयेच्छिलाम् ॥ कुम्भानष्टौ सुभद्रादीन्दिक्षु पूर्वादिषु क्रमात् ॥ ३ ॥ लोकपालाणुभिर्न्यस्य
श्चभ्रेषु न्यस्तशक्तिषु ॥ शिलास्तेष्वथ नन्दाद्याः क्रमेण विनिवेशयेत् ॥ ४ ॥ शम्बरैर्मूर्तिनाथानां यथा स्युर्भित्तिमध्यतः ॥ तासु
धर्म्मादिकानष्टौ कोणात्कोणं विभागशः ॥ ५ ॥ सुभद्रादिषु नन्दाद्याश्चतस्रोऽभ्यादिकोणगाः ॥ अजिताद्याश्च पूर्वादिजयादि-
ष्वर्थं क्रियसेत् ॥ ६ ॥ ब्राह्मणं चोपरि न्यस्य व्यापकं च महेश्वरम् ॥ चिन्तयेदेषु चाधानं व्योमप्रासादमध्यगम् ॥ ७ ॥ बलिं
दत्त्वा जपेदस्त्रं विघ्नदोषनिवारणम् ॥ शिलापञ्चकपक्षेऽपि मनागुद्दिश्यते यथा ॥ ८ ॥ मध्ये पूर्णशिलान्यासः सुभद्रकलशोऽ-
र्द्धतः ॥ पद्मादिषु च नन्दाद्याः कोणेष्वभ्यादिषु क्रमात् ॥ ९ ॥ मध्यभावे चतस्रोऽपि मातृवद्भावसम्मताः ॥ ओं पूर्णे त्वं
महाविद्ये सर्वसन्दोहलक्षणे ॥ १० ॥ सर्वं सम्पूर्णमेवात्र कुरुष्वाङ्गिरसः सुते ॥ ओं नन्दे त्वं नन्दिनी पुंसां त्वामत्र
स्थापयाम्यहम् ॥ ११ ॥ प्रासादे तिष्ठ सन्तृप्ता यावच्चन्द्रार्कतारकम् ॥ आयुः कामं श्रियं नन्दे देहि वासिष्ठि देहिनाम्
॥ १२ ॥ अस्मिन्रक्षा सदा कार्य्या प्रासादे यत्नतस्त्वया ॥ ओं भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि ॥ १३ ॥
आयुर्दा कामदा देवि श्रीप्रदा च सदा भव ॥ ओं जयेऽत्र सर्वदा देवि श्रीदाऽऽयुर्दा सदा भव ॥ १४ ॥ ओं जयेऽत्र

सर्वदा देवि तिष्ठ त्वं स्थापिता मया ॥ नित्यं जयाय भूत्यै च स्वामिनी भव भार्गवे ॥ १५ ॥ ओं रिक्तेऽतिरिक्तदोषघ्ने सिद्धिमुक्तिप्रदे शुभे ॥ सर्वदा सर्वदेशस्थे तिष्ठास्मिन्विश्वरूपिणि ॥ १६ ॥ गगनायतनं ध्यात्वा तत्र तत्त्वत्रयं न्यसेत् ॥ प्रायश्चित्तं ततो हुत्वा विधिना विसृजेन्मखम् ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये शिलाविन्यासविधानं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ अथ प्रतिष्ठामासादिसामग्र्यादिः ॥ ईश्वर उवाच ॥ वक्ष्ये लिङ्गप्रतिष्ठां च प्रासादे भुक्तिमुक्तिदाम् ॥ तां चरेत्सर्वदा मुक्तौ भुक्तौ देवदिने सति ॥ १ ॥ विना चैत्रेण माघादौ प्रतिष्ठा मासपञ्चके ॥ गुरुशुक्रोदये कार्या प्रथमे करणत्रये ॥ २ ॥ शुक्लपक्षे विशेषेण कृष्णेऽप्यापञ्चमीदिनम् ॥ चतुर्थीं नवमीं षष्ठीं वर्जयित्वा चतुर्दशीम् ॥ ३ ॥ शोभनास्तिथयः शेषाः क्रूरवारविवर्जिताः ॥ शतभिषा धनिष्ठाद्री अनुराधोत्तरात्रयम् ॥ ४ ॥ रोहिणी श्रवणं चेति स्थिरारम्भे महोदयाः ॥ लग्ने च कुम्भसिंहालितुलास्त्रीवृषधन्विनाम् ॥ ५ ॥ शस्तो जीवो नवर्क्षेषु सप्तस्थानेषु सर्वदा ॥ बुधः षडष्टदिक्सप्ततुर्येषु विनर्तुं सितः ॥ ६ ॥ सप्तर्त्तुत्रिदशादित्यः शशाङ्को बलदः सदा ॥ रविर्दशत्रिषट्संस्थो राहुस्त्रिदशषड्गतः ॥ ७ ॥ षट्त्रिस्थानगताः शस्ता मन्दाङ्गारार्ककेतवः ॥ शुभाः क्रूराश्च पापाश्च सर्व एकादशस्थिताः ॥ ८ ॥ एषां दृष्टिर्गुनौ पूर्णा त्वार्द्धिकी ग्रहभूतयोः ॥ पादिकी रामदिक्स्थाने चतुरष्टौ पादवर्जिता ॥ ९ ॥ पादन्यूनचतुर्नाडीभोगः स्यान्मीनमेषयोः ॥ वृषकुम्भौ च भुञ्जाते चतस्रः पादवर्जिताः ॥ १० ॥ मकरो मिथुनं पञ्च चापालिहरिकर्कटाः ॥ पादोनाः षट् तुलाकन्ये घटिकाः सार्द्धपञ्च च ॥ ११ ॥ केसरी वृषभः कुम्भः स्थिराः स्युः सिद्धिदायकाः ॥ चरा धनुस्तुलामेषा द्विःस्वभावास्तृतीयकाः ॥ १२ ॥ शुभः शुभग्रहैर्दृष्टः शस्तो लग्नः शुभाश्रितः ॥ गुरुशुक्रबुधैर्युक्तो लग्नो दद्याद्बलायुषी ॥ १३ ॥ राज्यं शौर्यं बलं पुत्रान्यज्ञो धर्मादिकं बहु ॥ प्रथमः सप्तमस्तुर्य्यो दशमः केन्द्र उच्यते ॥ १४ ॥ गुरुशुक्रबुधास्तत्र सर्वसिद्धिप्रदायकाः ॥ त्र्येकादशचतुर्थस्था लग्नात्पापग्रहाः शुभाः ॥ १५ ॥ अतोऽप्यनीचकर्मार्थं योज्यास्तिथ्यादयो बुधैः ॥ धाम्नः पञ्चगुणां भूमिं त्यक्त्वा वा धामसम्मिताम् ॥ १६ ॥ हस्तादशसोपानात्कुर्य्यान्मण्डपमग्रतः ॥ चतुरस्रं चतुर्द्वारं स्नानार्थं तु तदर्द्धतः ॥ १७ ॥ एकास्यं चतुरास्यं वा रौद्र्यां प्राच्युत्तरेऽथ

वा ॥ हास्तिको दशहस्ती वै मण्डपोऽर्ककरोऽथवा ॥ १८ ॥ द्विहस्तोत्तरया वृद्ध्या शेषं स्यान्मण्डपाष्टकम् ॥ वेदिश्चतुष्करा मध्ये कोणस्तम्भेन संयुता ॥ १९ ॥ वेदिपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च वा ॥ एकं वा शिवकाष्ठायां प्राच्यां वा तद्गुरोः परम् ॥ २० ॥ मुष्टिमात्रं शताद्धें स्याच्छते चारत्निमात्रकम् ॥ हस्तं सहस्रहोमे स्यान्नियुते तु द्विहास्तिकम् ॥ २१ ॥ लक्षे चतुष्करं कुण्डं कोटिहोमेऽष्टहस्तकम् ॥ भगाभमग्नौ खण्डेन्दु दक्षे त्र्यस्रं च नैर्ऋते ॥ २२ ॥ षडस्रं वायौ पद्मं सौम्ये चाष्टास्रकं शिवे ॥ तिर्य्यक्पातं शिवं स्रातमूर्ध्वं मेखलया सह ॥ २३ ॥ तद्वहिर्मेखलास्तिस्रो वेदवह्नियमाङ्गुलैः ॥ अङ्गुलैः षड्भिरेका वा कुण्डाकारास्तु मेखलाः ॥ २४ ॥ तासामुपरि योनिः स्यान्मध्येऽश्वत्थदलाकृतिः ॥ उच्छ्रायेणाङ्गुलं तस्माद्विस्तारेणाङ्गुलाष्टकम् ॥ २५ ॥ दैर्घ्यं कुण्डार्द्धमानेन कुण्डकण्ठसमोऽधरः ॥ पूर्वाग्नियाम्यकुण्डानां योनिः स्यादुत्तरानना ॥ २६ ॥ पूर्वाननां तु शेषाणामैशान्येऽन्यतरा तयोः ॥ कुण्डानां यश्चतुर्विंशो भागः सोऽङ्गुल इत्यतः ॥ २७ ॥ प्लक्षोदुम्बरकाश्वत्थवटजास्तोरणाः क्रमात् ॥ शान्तिभूतिबलारोग्यपूर्वाद्या नामतः क्रमात् ॥ २८ ॥ पञ्चषट्सप्तहस्तानि हस्तखातस्थितानि च ॥ तदर्द्धविस्तराणि स्युर्युतान्याम्रदलादिभिः ॥ २९ ॥ इन्द्रायुधोपमा रक्ता कृष्णा धूम्रा शशिप्रभा ॥ शुक्लाभा हेमवर्णा च पताका स्फाटिकोपमा ॥ ॥ ३० ॥ पूर्वादितोऽब्जजे रक्ता नीलाऽनन्तस्य नैर्ऋते ॥ पञ्चहस्तास्तदर्द्धाश्च ध्वजा दीर्घाश्च विस्तराः ॥ ३१ ॥ हस्तप्रदेशिता दण्डा ध्वजानां पञ्चहस्तकाः ॥ वल्मीकाद्दन्तिदन्ताग्रात्तथा वृषभशृङ्गतः ॥ ३२ ॥ पद्मषण्डाद्वराहाच्च गोष्ठादापि चतुष्पथात् ॥ मृत्तिका द्वादश ग्राह्या वैकुण्ठेऽष्टौ पिनाकिनी ॥ ३३ ॥ न्यग्रोधोदुम्बराश्वत्थचूतजम्बूत्वगुद्भवम् ॥ कषायपञ्चकं ग्राह्यमार्त्तवं च पलाष्टकम् ॥ ३४ ॥ तीर्थाम्भांसि सुगन्धीनि तथा सर्वौषधीजलम् ॥ शस्तं पुष्पफलं वक्ष्ये रत्नगोशृङ्गवारि च ॥ ३५ ॥ स्नानायापाहरेत्पञ्च पञ्चगव्यामृतं तथा ॥ पिष्टनिर्मितवस्त्रादिद्रव्यं निर्म्मञ्जनाय च ॥ ३६ ॥ सहस्रसुषिरं कुम्भं मण्डलाय च रोचना ॥ शतमौषधिमूलानां विजया लक्ष्मणा बला ॥ ३७ ॥ गुडूच्यतिबला पाठा सहदेवी शतावरी ॥ ऋद्धिः सुवर्चला वृद्धिः स्नाने प्रोक्ता पृथक् पृथक ॥ ३८ ॥ रक्षायै तिलदर्भौघो भस्मस्नानं तु केवलम् ॥ यवगोधूमबिल्वानां चूर्णानि च विच-

क्षणः ॥ ३९॥ विलेपनं सकर्प्पूरं स्नानार्थं कुम्भगण्डकान् ॥ खट्टां च तूलिकायुग्मं सोपधानं सवस्त्रकम् ॥४०॥ कुर्य्याद्वित्तानुसारेण शयने लक्ष्यकल्पने ॥ घृतक्षौद्रयुतं पात्रं कुर्य्यात्स्वर्णशलाकिकाम् ॥ ४१ ॥ वर्द्धनीं शिवकुम्भं च लोकपालघटानपि ॥ एकं निद्राकृते कुम्भे शान्त्यर्थं कुण्डसङ्ख्यया ॥ ४२ ॥ द्वारपालादिधर्मादिप्रशान्तादिघटानपि ॥ वास्तुलक्ष्मीगणेशानां कलशानपरानपि ॥ ४३ ॥ धान्यपुञ्जकृताधारान्सवस्त्रान्सग्विभूषितान् ॥ सहिरण्यान्समालम्बान्गन्धपानीयपूरितान् ॥ ४४ ॥ पूर्णपात्रफलाधारान्पल्लवाढ्यान्सलक्षणान् ॥ वस्त्रैराच्छादयेत्कुम्भानाहरेद्धैरसर्षपान् ॥ ४५ ॥ विकिरार्थं तथा लाजाञ्ज्ञानखड्गं च पूर्ववत् ॥ समिधश्च चरुस्थालीं दर्वीं च ताम्रनिर्मिताम् ॥ ४६ ॥ घृतक्षौद्रान्वितं पात्रं पादाभ्यङ्गकृते तथा ॥ विष्टरांस्त्रिशतीदर्भदलैर्बाहुप्रमाणकान् ॥ ४७ ॥ चतुरश्चतुरस्तद्वत्पालाशान्पारिधीनपि ॥ तिलपात्रं हविःपात्रमर्घपात्रं पवित्रकम् ॥ ४८ ॥ पलविंशाष्टमानानि घटी धूपप्रदानकम् ॥ स्रुक्स्रुवौ पिटकं पीठं व्यजनं शुष्कमिन्धनम् ॥ ४९ ॥ पुष्पं पत्रं गुग्गुलुं च घृतैर्दीपांश्च धूपकम् ॥ अक्षतानि त्रिसूत्रीं च गव्यमाज्यं यवांस्तिलान् ॥ ५० ॥ कुशाः शान्त्यै त्रिमधुरं समिधो दशपार्विकाः ॥ बाहुमात्रं स्रुवं हस्तमर्कादिग्रहशान्तये ॥ ५१ ॥ समिधोऽर्कपलाशोत्थाः खादिरामार्गपिप्पलाः ॥ उदुम्बरशमीदूर्वाः कुशोत्थाः शतमष्ट च ॥ ५२ ॥ तदभावे यवतिला गृहोपकरणं तथा ॥ स्थालीदर्वीपिधानादि देवादिभ्योऽशुक्लद्वयम् ॥ ५३ ॥ मुद्रामुकुटवासांसि हारकुण्डलकङ्कणान् ॥ कुर्य्यादाचार्यपूजार्थं वित्तशाठ्यं विवर्जयेत् ॥५४॥ तत्पादपादहीना च मूर्त्तिभृदस्त्रजापिनाम् ॥ पूजा स्याज्जापिभिस्तुल्या विप्रदैवज्ञशिल्पिनाम् ॥ ५५ ॥ वज्रार्केशान्तौ नीलातिनीलमुक्ताफलानि च ॥ पुष्पपद्मादिरागं च वैदूर्य्यं रत्नमष्टमम् ॥ ५६ ॥ उशीरमाधवकान्तारक्तचन्दनकागुरुम् ॥ श्रीखण्डं सारिकं कुष्ठं शङ्खिनी ह्योषधीगणः ॥ ५७ ॥ हेमताम्रमयं रक्तं राजतं च सकांस्यकम् ॥ सीसकं चेति लोहानि हरितालं मनःशिला ॥ ५८ ॥ गैरिकं हेममाक्षीकं पारदो वह्निगैरिकम् ॥ गन्धकाभ्रकमित्यष्टौ धातवो व्रीहयस्तथा ॥ ५९ ॥ गोधूमान्सतिलान्माषान्मुद्गानप्याहरेद्यवान् ॥ नीवाराञ्छ्यामकानेवं व्रीहयोऽप्यष्ट कीर्त्तिताः ॥ ६० ॥ इत्यादिमहापुराणे आग्नेये प्रतिष्ठामासादिसामग्र्यादिकं नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

अथाधिवासनाविधिः ॥ ईश्वर उवाच ॥ स्नात्वा नित्यद्वयं कृत्वा प्रणवार्घकरो गुरुः ॥ सहायैर्मूर्त्तिपैर्विप्रैः सह गच्छेन्मखालयम् ॥ १ ॥ शान्त्यादितोरणांस्तत्र पूर्ववत्पूजयेत्क्रमात् ॥ प्रदक्षिणक्रमादेषां शाखायां द्वारपालकान् ॥ २ ॥ प्राचि नन्दिमहाकालौ याम्ये भृङ्गिविनायकौ ॥ वारुणे वृषभस्कन्दौ देवीचण्डौ तथोत्तरे ॥ ३ ॥ तच्छाखामूलदेशस्थौ प्रशान्तशिशिरौ घटौ ॥ पर्जन्य-शोकनामानौ भूतसञ्जीवनामृतौ ॥ ४ ॥ घनदश्रीपदौ द्वा द्वौ पूजयेदनुपूर्वशः ॥ स्वनामभिश्चतुर्थ्यन्तैः प्रणवादिनमोऽन्तकैः ॥ ५ ॥ लोकमहावसुद्वाःस्थस्रवन्तीनां द्वयं द्वयम् ॥ भानुत्रयं युगं वेदो लक्ष्मीर्गणपतिस्तथा ॥ ६ ॥ इति देवा मखागारे तिष्ठन्ति प्रति-तोरणम् ॥ विघ्नसंघापनोदाय क्रतोः संरक्षणाय च ॥ ७ ॥ वज्रं शक्तिं तथा दण्डं खड्गं पाशं ध्वजं गदाम् ॥ त्रिशूलं चक्रमम्भोजं पताकास्त्वर्च्चयेत्क्रमात् ॥ ८ ॥ ॐ हूं फट् नमः । ॐ हूं फट् द्वाःस्थशक्तये हूं फट् नमः इत्यादिमन्त्रैः । कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥ शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ ९ ॥ ध्वजेऽष्टदेवताः पूज्याः पूर्वादौ भूतको-टिभिः ॥ ॐ कौं कुमुदाय नम इत्यादिमन्त्रैस्तथा ॥ १० ॥ हेतुकं त्रिपुरघ्नं च शक्त्याख्यं यमजिह्वकम् ॥ कालं करालिनं षष्ठमेकांघ्रिं भीममष्टकम् ॥ ११ ॥ तथैव पूजयेद्दिक्षु क्षेत्रपालाननुक्रमात् ॥ बलिभिः कुसुमैर्धूपैः सन्तुष्टान्परिभावयेत् ॥ ॥ १२ ॥ काक्षीतृणेषु वंशेषु स्थूणास्वन्येष्वनुक्रमात् ॥ पञ्च क्षित्यादितत्त्वानि सद्योजातादिभिर्यजेत् ॥ १३ ॥ सदाशिव-पदव्यापि मण्डपं धाम शाङ्करम् ॥ पताकाशक्तिसंयुक्तं तत्त्वदृष्ट्यावलोकयेत् ॥ १४ ॥ दिव्यान्तरिक्षभूमिष्ठविघ्नानुत्सार्य्य पूर्ववत् ॥ प्रविशेत्पश्चिमद्वारा शेषद्वाराणि दर्शयेत् ॥ १५ ॥ प्रदक्षिणक्रमाद्गत्वा निविष्टो वेदिदक्षिणे ॥ उत्तराभिमुखः कुर्य्याद्भूतशुद्धिं यथा पुरा ॥ १६ ॥ अन्तर्य्यागं विशेषार्घ्यं मन्त्रद्रव्यादिशोधनम् ॥ कुर्व्वीत स्वात्मनः पूजां पञ्चगव्यादि पूर्ववत् ॥ १७ ॥ साधारं कलशं तस्मिन्विन्यसेत्तदनन्तरम् ॥ विशेषाच्छिवतत्त्वाय तत्त्वत्रयमनुक्रमात् ॥ १८ ॥ ललाट-स्कन्धपादान्तं शिवविद्यात्मकं परम् ॥ रुद्रनारायणब्रह्मदैवतं निजसञ्चरैः ॥ १९ ॥ ॐ हं हां मूर्तीस्तदीश्वरांस्तत्र पूर्ववद्वि-निवेशयेत् ॥ तद्व्यापकं शिवं साङ्गं शिवहस्तं च मूर्द्धनि ॥ २० ॥ ब्रह्मरन्ध्रप्रविष्टेन तेजसा बाह्यमन्तरम् ॥ तमःपटलमाधूय

प्रद्योतितदिमन्तरम् ॥ २१ ॥ आत्मार्घं मूलमन्त्रैः सार्द्धं स्रग्वस्त्रकुसुमादिभिः ॥ भूषयित्वा शिवोऽस्मीति ध्यात्वा बोधासि-
मुद्धरेत् ॥ २२ ॥ चतुष्पादान्तसंस्कारैः संस्कुर्य्यान्मखमण्डपम् ॥ विक्षिप्य विकिरादीनि कुशकूर्चोपसंहरेत् ॥ २३ ॥
आसनीकृत्य वर्द्धन्यां वास्त्वादीन्पूर्ववद्यजेत् ॥ शिवकुम्भास्त्रवर्द्धन्यौ पूजयेच्च स्थिरासने ॥ २४ ॥ स्वदिक्षु कलशारूढाँल्लोक-
पालाननुक्रमात् ॥ वाहायुधादिसंयुक्तान्पूजयेद्विधिना यथा ॥ २५ ॥ ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम् ॥ सहस्रनयनं शक्रं
वज्रप्राणिं विभावयेत् ॥ २६ ॥ सप्तार्चिषं च बिभ्राणमक्षमालां कमण्डलुम् ॥ ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् ॥ २७ ॥
महिषस्थं दण्डहस्तं यमं कालानलं स्मरेत् ॥ रक्तनेत्रं खरारूढं खड्गहस्तं च नैर्ऋतम् ॥ २८ ॥ वरुणं मकरे श्वेतं नागपाशधरं
स्मरेत् ॥ वायुं च हरिणे नीलं कुबेरं मेषसंस्थितम् ॥ २९ ॥ त्रिशूलिनं वृषे चेशं कूर्मेऽनन्तं तु चक्रिणम् ॥ ब्रह्माणं हंसगं
ध्यायेच्चतुर्वक्त्रं चतुर्भुजम् ॥ ३० ॥ स्तम्भमूलेषु कुम्भेषु वेद्यां धर्मादिकान्यजेत् ॥ दिक्षु कुम्भेष्वनन्तादीन्पूजयेन्त्यपि
केचन ॥ ३१ ॥ शिवाज्ञां श्रावयेत्कुम्भं भ्रामयेदात्मपृष्ठगम् ॥ पूर्ववत्स्थापयेदादौ कुम्भं तदनु वर्द्धनीम् ॥ ३२ ॥
शिवं स्थिरासनं कुम्भे शस्त्रार्थं च ध्रुवासनम् ॥ पूजयित्वा यथापूर्वं स्पृशेदुद्भवमुद्रया ॥ ३३ ॥ निजयागं जगन्नाथ रक्ष
भक्तानुकम्पया ॥ एभिः संश्राव्य रक्षार्थं कुम्भे खड्गं निवेशयेत् ॥ ३४ ॥ दीक्षास्थापनयोः कुम्भे स्थण्डिले मण्डलेऽथ वा ॥
मण्डलेऽभ्यर्च्य देवेशं व्रजेद्वै कुण्डसन्निधौ ॥ ३५ ॥ कुण्डनाभिं पुरस्कृत्य निविष्टा मूर्तिधारिणः ॥ गुरोरादेशतः कुर्य्युर्निजकुण्डेषु संस्कृ-
तिम् ॥ ३६ ॥ जपेयुर्जापिनोऽसङ्ख्यं मंत्रमन्ये तु संहिताम् ॥ पठेयुर्ब्राह्मणाः शान्ति स्वशाखा वेदपारगाः ॥ ३७ ॥ श्रीसूक्तं
पावमानीश्च मैत्रकं च वृषाकपिम् ॥ ऋग्वेदी पूर्वदिग्भागे सर्वमेतत्समुच्चरेत् ॥ ३८ ॥ देवव्रतं तु भारुण्डं ज्येष्ठसाम रथन्तरम् ॥
पुरुषं गीतिमेतानि सामवेदी तु दक्षिणे ॥ ३९ ॥ रुद्रं पुरुषसूक्तं च श्लोकाध्यायं विशेषतः ॥ ब्राह्मणं च यजुर्वेदी पश्चिमायां
समुच्चरेत् ॥ ४० ॥ नीलरुद्रं तथाथर्वी सूक्ष्मासूक्ष्मं तथैव च ॥ उत्तरेऽथर्वशीर्षं च तत्परस्तु समुद्धरेत् ॥ ४१ ॥ आचार्य्यश्चा-
ग्निमुत्पाद्य प्रतिकुण्डं प्रदापयेत् ॥ वह्नेः पूर्वादिकान्भागान्पूर्वकुण्डादितः क्रमात् ॥ ४२ ॥ धूपदीपचरूणां च ददीताग्निं समुद्ध-

रेत् ॥ पूर्ववच्छिमवभ्यर्च्य शिवाग्नौ मन्त्रतर्पणम् ॥ ४३ ॥ देशकालादिसम्पत्तौ दुर्निमित्तप्रशान्तये ॥ होमं कृत्वा तु मन्त्रज्ञः पूर्णां दत्त्वा शुभावहाम् ॥ ४४ ॥ पूर्ववच्चरुकं कृत्वा प्रतिकुण्डं निवेदयेत् ॥ यजमानालंकृतास्तु व्रजेयुः स्नानमण्डपम् ॥ ४५ ॥ भद्रपीठे निधायेशं ताडयित्वावकुण्ठयेत् ॥ स्नापयेत्पूजयित्वा तु मृदा काषायवारिणा ॥ ४६ ॥ गोमूत्रैर्गोमयेनापि वारिणा चान्तरान्तरा ॥ भस्मना गन्धतोयेन फडन्तास्त्रेण वारिणा ॥ ४७ ॥ देशिको मूर्त्तिपैः सार्द्धं कृत्वा कारणशोधनम् ॥ धर्मजप्तेन संछाद्य पीतवर्णेन वाससा ॥ ४८ ॥ सम्पूज्य सितपुष्पैश्च नयेदुत्तरवेदिकाम् ॥ तत्र दत्तासनायां च शय्यायां सन्निवेश्य च ॥ ४९ ॥ कुङ्कुमालिप्तसूत्रेण विभज्य गुरुरालिखेत् ॥ शलाकया सुवर्णस्य अक्षिणी शस्त्रकर्मणा ॥ ५० ॥ अञ्जयेल्लक्ष्मकृत्पश्चाच्छास्त्रदृष्टेन कर्मणा ॥ कृतकर्मा च शस्त्रेण लक्ष्मी शिल्पी समुत्क्षिपेत् ॥ ५१ ॥ त्र्यंशाद्द्वौऽथ पादार्द्धाद्धार्द्धाया अर्द्धतोऽथ वा ॥ सर्वकामप्रसिद्धयर्थं शुभं लक्ष्मावतारणम् ॥ ५२ ॥ लिङ्गदीर्घविकारांशे त्रिभक्ते भागवर्णनात् ॥ विस्तारो लक्ष्म देहस्य भवेल्लिङ्गस्य सर्वतः ॥ ५३ ॥ यवस्य नवभक्तस्य भागैरष्टाभिरावृता ॥ हास्तिके लक्ष्मरेखा च गाम्भीर्य्याद्विस्तरादपि ॥ ५४ ॥ एवमष्टांशवृद्धया तु लिङ्गे सार्द्धकरादिके ॥ भवेदष्टयवा पृथ्वी गम्भीरात्र च हास्तिके ॥ ५५ ॥ शाम्भवेषु च लिङ्गेषु पादवृद्धेषु सर्वतः ॥ लक्ष्म देहस्य विष्कम्भो भवेद्वै यववर्द्धनात् ॥ ५६ ॥ गंभीरत्वपृथुत्वाभ्यां रेखापि त्र्यंशवृद्धितः ॥ सर्वेषु च भवेत्सूक्ष्मं लिङ्गमस्तकमस्तकम् ॥ ५७ ॥ लक्ष्मक्षेत्रेऽष्टधा भक्ते मूर्ध्नि भागद्वये शुभे ॥ षड्भागपरिवर्त्तेन मुक्त्वा भागद्वयं त्वधः ॥ ५८ ॥ रेखात्रयेण सम्बद्धं कारयेत्पृष्ठदेशगम् ॥ रत्नजे लक्षणोद्धारो यवौ हेमसमुद्भवे ॥ ५९ ॥ स्वरूपं लक्षणं तेषां प्रभा रत्नेषु निर्मला ॥ नयनोन्मीलनं वक्त्रे सान्निध्याय च लक्ष्म तत् ॥ ६० ॥ लक्ष्मणोद्धाररेखां च घृतेन मधुना तथा ॥ मृत्युञ्जयेन सम्पूज्य शिल्पिदोषनिवृत्तये ॥ ६१ ॥ अर्चयेच्च ततो लिङ्गं स्नापयित्वा मृदादिभिः ॥ शिल्पिनं तोषयित्वा तु दद्याद्गां गुरवे ततः ॥ ६२ ॥ लिङ्गं धूपादिभिः प्रार्च्य गायेयुर्भर्तृगाः स्त्रियः ॥ सव्येन चापसव्येन सूत्रेणाथ कुशेन वा ॥ ६३ ॥ स्मृत्वा च रोचनं दत्त्वा कुर्य्यान्निर्मन्थनादिकम् ॥ गुडलवणधान्याक्षदानेन विसृजेच्च ताः ॥ ६४ ॥ गुरुर्मूर्त्तिधरैः

सार्द्धं हृदा वा प्रणवेन वा ॥ मृत्स्नागोमयगोमूत्रभस्मभिः सलिलान्तरम् ॥६५॥ स्नापयेत्पञ्चगव्येन पञ्चामृतपुरःसरम् ॥ विरूक्षणं
कषायेश्च सर्वौषधिजलेन वा ॥ ६६ ॥ शुभ्रपुष्पफलस्वर्णरत्नशृङ्ग्यवोदकैः ॥ तथा धारासहस्रेण दिव्यौषधिजलेन च ॥ ६७ ॥
तीर्थोदकेन गाङ्गेन चन्दनेन च वारिणा ॥ क्षीरार्णवोदभिः कुम्भैः शिवकुम्भजलेन च ॥ ६८ ॥ विरूक्षणं विलेपं च
सुगन्धैश्चन्दनादिभिः ॥ सम्पूज्य ब्रह्मभिः पुष्पैर्वर्मणा रक्तचीवरैः ॥ ६९ ॥ रक्तरूपेण नीराज्य रक्षातिलकपूर्वकम् ॥ घृतौर्वैर्जल-
दुग्धैश्च कुशाद्यैरर्घ्यसूचितैः ॥ ॥ ७० ॥ द्रव्यैः स्तुत्यादिभिस्तुष्टमर्चयेत्पुरुषाणुना ॥ समाचम्य हृदा देवं ब्रूयादुत्थीयतां प्रभो
॥७१॥ देवं ब्रह्मरथेनैव क्षिप्रं द्रव्याणि तन्नयेत् ॥ मण्डपे पश्चिमद्वारे शय्यायां विनिवेशयेत् ॥७२॥ शक्त्यादिमूर्तिपर्य्यन्ते विन्य-
सेदासने शुभे ॥ पश्चिमे पिण्डिकां तस्य न्यसेद्ब्रह्मशिलां तथा ॥७३॥ शस्त्रमस्त्रशतालब्धनिद्राकुम्भं ध्रुवासनम् ॥ प्रकल्प्य शिव-
कोणे च दत्त्वार्घ्यं हृदयेन तु ॥७४॥उत्थाप्योक्तासने लिङ्गं शिरसा पूर्वमस्तकम् ॥ समारोप्य न्यसेत्तस्मिन्सृष्ट्या धर्मादिवन्दनम्
॥ ७५ ॥ दद्याद्धूपं च सम्पूज्य तथा वासांसि वर्मणा ॥ गृहोपकृतिनैवेद्यं हृदा दद्यात्स्वशक्तितः ॥७६॥ घृतक्षौद्रयुतं पात्रमभ्यङ्गाय
पदान्तिके ॥ देशिकश्च स्थितस्तत्र षट्त्रिंशत्तत्त्वसञ्चयम् ॥ ७७ ॥ शक्त्यादिभूमिपर्य्यंतं स्वतत्त्वाधिपसंयुतम् ॥ विन्यस्य पुष्प-
मालाभिस्त्रिखण्डं परिकल्पयेत् ॥ ७८ ॥ मायापदेशशक्त्यन्तं तुर्य्यांशाष्टांशवर्तुलम् ॥ तत्रात्मतत्त्वविद्याख्यं शिवं सृष्टिक्रमेण
तु ॥ ७९ ॥ एकशः प्रतिभागेषु ब्रह्मविष्णुहराधिपान् ॥ विन्यस्य मूर्तिमूर्तीशान्पूर्वादिक्रमतो यथा ॥ ८० ॥ क्ष्मावह्नियजमाना-
र्कजलवायुनिशाकरान् ॥ आकाशमूर्त्तिरूपांस्तान्न्यसेत्तदधिनायकान् ॥ ८१ ॥ शर्वं पशुपतिं चोग्रं रुद्रं भवमथेश्वरम् ॥ महादेवं
च भीमं च मन्त्रास्तद्वाचका इमे ॥ ८२ ॥ लवशषचयसाश्च इकारश्च त्रिमात्रिकाः ॥ प्रणवो हृदयाणुवा मूलमन्त्रोऽथ वा
क्वचित् ॥ ८३ ॥ पञ्चकुण्डात्मके यागे मूर्तीः पञ्चाथ वा न्यसेत् ॥ पृथिवीजलतेजांसि वायुमाकाशमेव च ॥ ८४ ॥ क्रमात्तद-
धिपान्पञ्च ब्रह्माणं धरणीधरम् ॥ रुद्रमीशं सदाख्यं च सृष्टिन्यायेन मन्त्रवित् ॥ ८५ ॥ मुमुक्षोर्वो निवृत्ताद्या अजाताद्यास्तदी-
श्वराः ॥ त्रितत्त्वं वाथ सर्वत्र न्यसेद्व्यास्यात्मकारणम् ॥ ८६ ॥ शुद्धे चात्मनि विद्येशा अशुद्धे लोकनायकाः ॥ द्रष्टव्या मूर्त्ति-

पाशैव भोगिनो मन्त्रनायकाः ॥ ८७ ॥ पञ्चविंशत्तथैवाष्ट पञ्च त्रीणि यथाक्रमम् ॥ एषां तत्त्वं तदीशानामिन्द्रादीनां ततो यथा ॥ ८८ ॥ ओं हां शक्तितत्त्वाय नम इत्यादि ओं हां शक्तितत्त्वाधिपाय नम इत्यादि ओं हां क्ष्मामूर्त्तये नमः ओं हां क्ष्मामूर्त्यधीशाय शिवाय नम इत्यादि ओं हां पृथिवीमूर्त्तये नमः ओं हां मूर्त्यधिपाय ब्रह्मणे नमः इत्यादि ओं हां शिवतत्त्वाधिपाय रुद्राय नम इत्यादि । नाभिकन्दात्समुच्चार्य्य घण्टानादविसर्प्पणम् ॥ ब्रह्मादिकारणत्यागाद्वादशान्तसमाश्रितम् ॥ ८९ ॥ मन्त्रं च मनसा भिन्नं प्राप्तानन्दरसोपमम् ॥ द्वादशान्तात्समानीय निष्कलं व्यापकं शिवम् ॥ ९० ॥ अष्टत्रिंशत्कलोपेतं सहस्रकिरणोज्वलम् ॥ सर्वशक्तिमयं साङ्गं ध्यात्वा लिङ्गे निवेशयेत् ॥ ९१ ॥ जीवन्यासो भवेदेवं लिङ्गे सर्वार्थसाधकः ॥ पिण्डिकादिषु तु न्यासः प्रोच्यते साम्प्रतं तथा ॥ ९२ ॥ पिण्डिकां च कृतस्नानां विलिप्तां चन्दनादिभिः ॥ सद्वस्त्रैश्च समाच्छाद्य रन्ध्रे च भगलक्षणे ॥ ९३ ॥ पञ्चरत्नादिसंयुक्तां लिङ्गस्योत्तरतः स्थिताम् ॥ लिङ्गवत्कृतविन्यासां विधिवत्सम्प्रपूजयेत् ॥ ९४ ॥ कृतस्नानादिकां तत्र लिङ्गमूले शिलां न्यसेत् ॥ कृतस्नानादिसंस्कारं शक्त्यन्तं वृषभं तथा ॥ ९५ ॥ प्रणवपूर्वं हूं पूं ह्रीं मध्यादन्यतमेन च ॥ क्रियाशक्तियुतां पिण्डीं शिलामाधाररूपिणीम् ॥ ९६ ॥ भस्मदर्भतिलैः कुर्य्यात्प्राकारात्रितयं ततः ॥ रक्षायै लोकपालांश्च सायुधान्पूजयेद्बहिः ॥ ९७ ॥ ॐ हूं हं क्रियाशक्तये नमः । ॐ हूं हां हः महागौरी रुद्रदयिते स्वाहेति च पिण्डिकायाम् । ॐ हां आधारशक्तये नमः । ॐ हां वृषभाय नमः । धारिका दीप्तिमत्युग्रा ज्योत्स्ना चैता बलोत्कटाः ॥ तथा धात्री विधात्री च न्यसेद्वा पञ्चनायिकाः ॥ ९८ ॥ वामा ज्येष्ठा क्रिया ज्ञाना वेधा तिस्रोऽथ वा न्यसेत् ॥ क्रिया ज्ञाना तथेच्छा च पूर्ववच्छान्तिमूर्तिषु ॥ ९९ ॥ तमी मोहा क्षमी निष्ठा मृत्युर्मायाभवज्वराः ॥ पञ्च चाथ महामोहा घोरा च त्रितयज्वरा ॥ १०० ॥ तिस्रोऽथ वा क्रिया ज्ञाना तथा बाधाविनायिका ॥ आत्मादित्रिषु तत्त्वेषु तीव्रमूर्तिषु विन्यसेत् ॥ १०१ ॥ अत्रापि पिण्डिका ब्रह्मशिलादिषु यथाविधि ॥ गौर्य्यादिसञ्चरैरेव पूर्ववत्सर्वमाचरेत् ॥ १०२ ॥ एवं विधाय विन्यासं गत्वा कुण्डान्तिकं ततः ॥ कुण्डमध्ये महेशानं मेखलासु महेश्वरम् ॥ १०३ ॥ क्रियाशक्तिं तथान्यासु नादमोष्ठे च विन्यसेत् ॥ घटं स्थण्डिलवह्नीशौनाडी-

सन्धानकं ततः ॥ १०४ ॥ पद्मतन्तुसमां शक्तिमुद्धातेन समुद्यताम् ॥ विशन्तीं सूर्य्यमार्गेण निःसरन्तीं समुद्गताम् ॥१०५॥ पुनश्च शून्यमार्गेण विशंतीं स्वस्य चिन्तयेत् ॥ एवं सर्वत्र सन्धेयं मूर्तिपैश्च परस्परम् ॥ १०६ ॥ सम्पूज्य धारिकां शक्तिं कुण्डे सन्तर्प्य च क्रमात् ॥ तत्त्वतत्त्वेश्वरान्मूर्त्तिर्मूर्तीशांश्च घृतादिभिः ॥ १०७ ॥ सम्पूज्य तर्प्पयित्वा तु सन्निधौ सहिताणुभिः ॥ शतं सहस्रमर्द्धं वा पूर्णया सह होमयेत् ॥ १०८ ॥ तत्त्वतत्त्वेश्वरान्मूर्त्तिर्मूर्तीशांश्च करेणुकान् ॥ तथा सन्तर्प्य सान्निध्ये जहुर्मूर्त्तिपा अपि ॥ १०९ ॥ ततो ब्रह्मभिरङ्गैश्च द्रव्यकालानुरोधतः ॥ सन्तर्प्य शक्तिं कुम्भाम्भः प्रोक्षिते कुशमूलतः ॥ ११० ॥ लिङ्गमूलं च संस्पृश्य जपेयुर्होमसङ्ख्यया ॥ सन्निधानं हृदा कुर्य्युर्वर्म्मणा चावकुण्ठनम् ॥ १११ ॥ एवं संशोध्य ब्रह्मादि विष्ण्वन्तादि विशुद्धये ॥ विधाय पूर्ववत्सर्वं होमसङ्ख्याजपादिकम् ॥ ११२ ॥ कुशमध्याग्रयोगेन लिङ्गमध्याग्रकं स्पृशेत् ॥ यथा यथा च सन्धानं तदिदानीमिहोच्यते ॥ ११३ ॥ ॐ हां हैं ॐ ॐ ॐ एँ ॐ भूँ भूँ बाह्यमूर्त्तये नमः ॐ हाँ वाँ ॐ ॐ ॐ षाँ ॐ भूँ भूँ वाँ वह्निमूर्त्तये नमः । एवं च यजमानादिमूर्त्तिभिरभिसन्धेयम् ॥ पञ्चमूर्त्यात्मकेऽप्येवं सन्धानं हृदयादिभिः ॥ ११४॥ मूलेन स्वीयबीजैर्वा ज्ञेयं तत्त्वत्रयात्मके ॥ शिलापिण्डीवृषेष्वेवं पूर्णाच्छिन्नं सुसंवरैः ॥ ११५ ॥ भागाभागविशुद्ध्यर्थं होमं कुर्य्याच्छतादिकम् ॥ न्यूनादिदोषमोषाय शिवेनाष्टाधिकं शतम् ॥ ११६ ॥ हुत्वाथ यत्कृतं कर्म्म शिवश्रोत्रे निवेदयेत् ॥ एतत्समन्वितं कर्म त्वच्छक्तौ च मया प्रभो ॥ ११७ ॥ ॐ नमो भगवते रुद्राय रुद्रदेव नमोऽस्तु ते ॥ विधिपूर्णमपूर्णं वा स्वशक्त्यापूर्य्य गृह्यताम् ॥ ११८ ॥ ॐ ह्रीं शाङ्करि पूरय स्वाहा इति पिण्डिकायाम् ॥ अथ लिङ्गे न्यसेज्ज्ञानी क्रियाख्यं पीठविग्रहे ॥ ११९ ॥ आधाररूपिणीं शक्तिं न्यसेद्ब्रह्मशिलोपरि ॥ निबध्य सप्तरात्रं वा पञ्चरात्रं त्रिरात्रकम् ॥ १२० ॥ एकरात्रमथो वापि यद्वा सद्योऽधिवासनम् ॥ विनाधिवासनं यागः कृतोऽपि न फलप्रदः ॥ १२१ ॥ स्वमन्त्रैः प्रत्यहं देयमाहुतीनां शतं शतम् ॥ शिवकुम्भादिपूजां च दिग्बालिं च निवेदयेत् ॥ १२२ ॥ गुर्वादिसहितो वासो रात्रौ नियमपूर्वकम् ॥ अधिवासः सवसतेरघेभवे च ईरितः ॥ १२३ ॥ इत्यादिमहापुराणे आग्नेये प्रतिष्ठायामधिवासनविधिर्नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

अथ शिवप्रतिष्ठाविधानम् ॥ ईश्वर उवाच ॥ प्रातर्नित्यावीधिं कृत्वा द्वारपालप्रपूजनम् ॥ प्रविश्य प्राग्विधानेन देहशुद्ध्यादिमाचरेत् ॥ १ ॥ दिक्पतींश्च समभ्यर्च्य शिवकुम्भं च वर्द्धनीम् ॥ अष्टमुष्टिकया लिङ्गं वह्निं सन्तर्प्य च क्रमात् ॥ २ ॥ शिवाज्ञातस्ततो गच्छेत्प्रासादं शस्त्रमुच्चरन् ॥ तद्गतान्प्रक्षिपेद्विघ्नान्हुम्फडन्तशराणुना ॥ ३ ॥ न मध्ये स्थापयेल्लिङ्गं वेधदोषविशङ्कया ॥ तस्मान्मध्यं परित्यज्य यवार्द्धेन यवेन वा ॥ ४ ॥ किञ्चिदीशानमाश्रित्य शिलामध्ये निवेशयेत् ॥ मूलेन तामनन्तारूयां सर्वाधारस्वरूपिणीम् ॥ ५ ॥ सर्वगां सृष्टियोगेन विन्यसेदचलां शिलाम् ॥ अथवानेन मन्त्रेण शिवस्यासनरूपिणीम् ॥ ६ ॥ ॐ नमो यापिनि भगवति स्थिरेऽचले ध्रुवे ह्रं लं ह्रीं स्वाहा ॥ त्वया शिवाज्ञया शक्ते स्थातव्यमिह सन्ततम् ॥ ७ ॥ इत्युक्त्वा च समभ्यर्च्य निरुध्याद्रौद्रमुद्रया ॥ वज्रादीनि च रत्नानि तथोशीरादिकौषधीः ॥ ८ ॥ लोहान्हेमादिकांस्यान्तान्हरितालादिकांस्तथा ॥ धान्यप्रभृतिसस्यांश्च पूर्वमुक्ताननुक्रमात् ॥ ९ ॥ प्रभारागत्वदेहत्ववीर्य्यशक्तिमयानिमान् ॥ भावयन्नेकचित्तस्तु लोकपालेशशंबरैः ॥.१० ॥ पूर्वादिषु च गर्तेषु न्यसेदेकैकशः क्रमात् ॥ हेमजं तारजं कूर्म्मं वृषं वा द्वारसम्मुखम् ॥ ११ ॥ सरित्तटमृदा युक्तं पर्वताग्रमृदाथवा ॥ प्रक्षिपेन्मध्यगर्त्तादौ यद्वा मेरुं सुवर्णजम् ॥ १२ ॥ मधूकाक्षतसंयुक्तमञ्जनेन समन्वितम् ॥ पृथिवीं राजतीं यद्वा यद्वा हेमसमुद्भवाम् ॥ १३ ॥ सर्वबीजसुवर्णाभ्यां संमायुक्तां विनिक्षिपेत् ॥ स्वर्णजं राजतं वापि सर्वलोहसमुद्भवम् ॥ १४ ॥ सुवर्णं कृशरायुक्तं पद्मनालं ततो न्यसेत् ॥ देवदेवस्य शक्त्यादिमूर्तिपर्य्यन्तमासनम् ॥ १५ ॥ प्रकल्प्य पायसेनाथ लिप्त्वा गुग्गुलुनाथ वा.॥ श्वभ्रमाच्छाद्य वस्त्रेण तनुत्रेणास्त्ररक्षितम् ॥ १६ ॥ दिक्पतिभ्यो बलिं दत्त्वा समाचान्तोऽथ देशिकः ॥ शिवेन वा शिलाश्वभ्रसंगदोषनिवृत्तये ॥ १७॥ शस्त्रेण वा शतं सम्यग्जुहुयात्पूर्णया सह ॥ एकैकाहुतिदानेन सन्तर्प्य वास्तुदेवताः ॥ १८ ॥ समुत्थाप्य हृदा देवमासनं मंगलादिभिः ॥ गुरुर्देवाग्रतो गच्छेन्मूर्त्तिपैश्च दिशि स्थितैः ॥ १९ ॥ चतुर्भिः सह कर्त्ता तु देवयज्ञस्य पृष्ठतः ॥ प्रासादादि परिभ्रम्य भद्राख्यद्वारसम्मुखम् ॥ २० ॥ लिंगं संस्थाप्य दत्त्वार्घ्यं प्रासादं सन्निवेशयेत् ॥ द्वारेण द्वारबन्धेन द्वारदेशेन तच्छिला ॥ २१ ॥ द्वारबन्धे शिखाशून्ये तदर्द्धेनाथ.तद्दते ॥ वर्जयन्द्वारसंस्पर्शं

द्वारेणैव महेश्वरम् ॥ २२ ॥ देवगृहसमारम्भे कोणेनापि प्रवेशयेत् ॥ अयमेव विधिर्ज्ञेयो व्यक्तलिंगेऽपि सर्वतः ॥ २२ ॥ गृहे प्रवेशनं द्वारे लोकैरपि समीरितम् ॥ अपद्वारप्रवेशेन विदुर्गोत्रक्षयं गृहम् ॥ २४ ॥ अथ पीठे च संस्थाप्य लिंगं द्वारस्य सम्मुखम् ॥ तूर्य्यमङ्गलनिर्घोषैर्दूर्व्वाक्षतसमन्वितम् ॥ २५ ॥ समुत्तिष्ठ हृदेत्युक्त्वा महापाशुपतं पठेत् ॥ अपनीय घटं श्वभ्रा- देशिको मूर्त्तिपैः सह ॥ २६ ॥ मन्त्रं सन्धारयित्वा तु विलिप्तं कुङ्कुमादिभिः ॥ शक्तिशक्तिमतोरैक्यं ध्यात्वा चैव तु रक्षितम् ॥ ॥ २७ ॥ लयान्तं मूलमुच्चार्य्य स्पृष्ट्वा श्वभ्रे निवेशयेत् ॥ अंशेन ब्रह्मभागस्य यद्वा अंशद्वयेन च ॥ २८ ॥ अर्द्धेन वाष्टमांशेन सर्वस्याथ प्रवेशनम् ॥ पिधाय सीसकं नाभिर्दीर्घाभिः सुसमाहितः ॥ २९ ॥ श्वभ्रं वालुकयापूर्य्य ब्रूयात्स्थिरीभवेति च ॥ ततो लिङ्गे स्थिरीभूते ध्यात्वा सकलरूपिणम् ॥. ३० ॥ मूलमुच्चार्य्य शक्त्यन्तं सृष्ट्वा च निष्कलं न्यसेत् ॥ स्थाप्यमानं यदा लिंगं यां यां दिशमथाश्रयेत् ॥ ३१ ॥ तत्तद्दिगीशमन्त्रेण पूर्णान्तं दक्षिणान्वितम् ॥ सव्ये स्थाने च वक्रे च चलिते स्फु- टितेऽपि वा ॥ ३२ ॥ जुहुयान्मलमन्त्रेण बहुरूपेण वा शतम् ॥ किञ्चान्येष्वपि दोषेषु शिवशान्तिं समाश्रयेत् ॥ ३३ ॥ युक्तं न्यासादिभिर्लिङ्गं कुर्वन्नेवं न दोषभाक् ॥ पीठबन्धमतः कृत्वा लक्षणस्यांशलक्षणम् ॥ ३४ ॥ गौरीमन्त्रं लयं नीत्वा सृष्ट्वा पिण्डीं च विन्यसेत् ॥ सम्पूर्य्य पार्श्वसंधिं च वालुकावज्रलेपनम् ॥ ३५ ॥ ततो मूर्त्तिधरैः सार्द्धं गुरुः शान्तिघटोद्धृतः ॥ संस्नाप्य कलशैरन्यैस्तद्वत्पञ्चामृतादिभिः ॥ ३६ ॥ विलिप्य चन्दनाद्यैश्च सम्पूज्य जगदीश्वरम् ॥ उमामहेश्व- मन्त्राभ्यां तौ स्पृशेल्लिङ्गमुद्रया ॥ ३७ ॥ ततस्त्रितत्त्वविन्यासं षडर्चादिपुरःसरम् ॥ कृत्वा मूर्तिं तदीशानामङ्गानां ब्रह्मणामथ ॥ ३८ ॥ ज्ञानी लिङ्गे क्रियापीठे विन्यस्य स्नापयेत्ततः ॥ गन्धैर्विलिप्य संधूप्य व्यापित्वेन शिवे न्यसेत् ॥ ३९ ॥ स्रग्धूपदीपनैवेद्यैर्हृदयेन फलानि च ॥ विनिवेद्य यथाशक्ति समाचम्य महेश्वरम् ॥ ४० ॥ दत्त्वार्घ्यं च जपं कृत्वा निवेद्य वरदे करे ॥ चन्द्रार्कतारकं यावन्मन्त्रेण शैवमूर्तिपैः ॥ ४१ ॥ स्वेच्छयैव त्वया नाथ स्थातव्यमिह मन्दिरे ॥ प्रणम्येवं बहिर्गत्वा हृदा वा प्रणवेन वा ॥ ४२ ॥ संस्थाप्य वृषभं पश्चात्पूर्ववद्बलिमाचरेत् ॥ न्यूनादिदोषमोषाय ततो मृत्युजिता

शतम् ॥ ४३ ॥ शिवेन सशिवो हुत्वा शान्त्यर्थं पायसेन च ॥ ज्ञानाज्ञानकृतं यच्च तत्पूरय महाविभो ॥ ४४ ॥ हिरण्यपशु-
भूम्यादिगीतवाद्यादिहेतवे ॥ अम्बिकेशाय तद्भक्त्या शक्त्या सर्वं निवेदयेत् ॥ ४५ ॥ दानं महोत्सवं पश्चात्कुर्य्याद्दिन-
चतुष्टयम् ॥ त्रिसन्ध्यं त्रिदिनं मन्त्री होमयेन्मूर्त्तिपैः सह ॥ ४६ ॥ चतुर्थेऽहनि पूर्णां च चरुकं बहुरूपिणा ॥ निवेद्य सर्वकुण्डेषु
सम्पाताहुतिशोधितम् ॥ ४७ ॥ दिनचतुष्टयं यावत्तन्निर्म्मालयं तदूर्ध्वतः ॥ निर्म्मालयापनयं कृत्वा स्नापयित्वा तु पूजयेत् ॥
॥ ४८ ॥ पूजा सामान्यलिङ्गेषु कार्य्या साधारणाणुभिः ॥ विहाय लिङ्गचैतन्यं कुर्य्यात्स्थाणुविसर्जनम् ॥ ४९ ॥
असाधारणलिङ्गेषु क्षमस्वेति विसर्जनम् ॥ आवाहनमभिव्यक्तिर्विसर्गः शक्तिरूपता ॥ ५० ॥ प्रतिष्ठान्ते क्वचित्प्रोक्तं स्थिरा-
द्याहुतिसप्तकम् ॥ स्थिरस्तथाप्रमेयश्चानादिबोधस्तथैव च ॥ ५१ ॥ नित्योऽथ सर्वगश्चैवाविनाशी दृष्ट एव च ॥ एते गुणा
महेशस्य सन्निधानाय कीर्त्तिताः ॥ ५२ ॥ ॐ नमः शिवाय स्थिरो भवेत्याहुतीनां क्रमः ॥ एवमेतच्च सम्पाद्य विधाय शिव-
कुम्भवत् ॥ ५३ ॥ कुम्भद्वयं च तन्मध्यादेककुम्भाम्भसा भवम् ॥ संस्नाप्य तद्वितीयं तु कर्तृस्नानाय धारयेत् ॥ ५४ ॥
दत्त्वा बलिं समाचम्य बहिर्गच्छेच्छिवाज्ञया ॥ जगतीबाह्यतश्चण्डमैशान्यां दिशि मन्दिरे ॥ ५५ ॥ धामगर्भप्रमाणे च सुपीठे
कल्पितासने ॥ पूर्ववन्न्यासहोमादि विधाय ध्यानपूर्वकम् ॥ ५६ ॥ संस्थाप्य विधिवत्तत्र ब्रह्माङ्गैः पूजयेत्ततः ॥ अङ्गानि
पूर्वयुक्तानि ब्रह्माणि त्वर्चना यथा ॥ ५७ ॥ एव सद्योजाताय ॐ हं फट् नमः ॥ ॐ विं वामदेवाय हूं फट् नमः । ॐ वुम्
अघोराय हूं फट् नमः । ओं वें तत्पुरुषाय ओंवोमीशानाय च हूं फट् नमः ॥ जपं निवेद्य सन्तर्प्य विज्ञाप्य नतिपूर्वकम् ॥
देवः सन्निहितो यावत्तावत्त्वं सन्निधौ भव ॥ ५८ ॥ न्यूनाधिकं च यत्किञ्चित्कृतमज्ञानतो मया ॥ त्वत्प्रसादेन चण्डेश तत्सर्वं
परिपूरय ॥ ५९ ॥ बाणलिङ्गे बाणरोहे सिद्धलिङ्गे स्वयंभुवि ॥ प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ॥ ६० ॥
अद्वैतभावनायुक्ते स्थण्डिलेशविधावपि ॥ अभ्यर्च्य चण्डं ससुतं यजमानं हि भार्य्यया ॥ ६१ ॥ पूर्वस्थापितकुंभेन स्नापये-
त्स्नापकः स्वयम् ॥ स्नापकं यजमानोऽपि सम्पूज्य च महेशवत् ॥ ६२ ॥ वित्तशाठ्यं विना दद्याद्धिरण्यादिदक्षिणाम् ॥

मूर्तिपान्विधिवत्पश्चाज्जापकान्ब्राह्मणांस्तथा ॥ ६३ ॥ दैवज्ञं शिल्पिनं प्राच्यं दीनानाथादि भोजयेत् ॥ यदत्र सम्मुखीभावे
खेदितो भगवन् मया ॥ ६४ ॥ क्षमस्व नाथ तत्सर्वं कारुण्याम्बुनिधे मम ॥ इति विज्ञप्तियुक्ताय यजमानाय सद्गुरुः ॥ ६५ ॥
प्रतिष्ठापुण्यसद्भावं स्फुरत्तारकसप्रभम् ॥ कुशपुष्पाक्षतोपेतं स्वकरेण समर्पयेत् ॥ ६६ ॥ ततः पाशुपतोपेतं प्रणम्य परमेश्वरम् ॥
ततोऽपि बलिभिर्भूतान्सन्निधाय निबोधयेत् ॥ ६७ ॥ स्थातव्यं भवता तावद्यावत्सन्निहितो हरः ॥ गुरुर्वस्त्रादिसंयुक्तं गृह्णी-
याद्यागमण्डपम् ॥ ६८ ॥ सर्वोपकरणं शिल्पी तथा स्नापनमण्डपम् ॥ अन्ये देवादयः स्थाप्या मन्त्रैरागमसंभवैः ॥ ६९ ॥
आदिवर्णस्य भेदाद्वा सुतत्त्वव्याप्तिभाविताः ॥ साध्यप्रमुखदेवाश्च सरिदोषधयस्तथा ॥ ७० ॥ क्षेत्रपाः किन्नराद्याश्च पृथिवी-
तत्त्वमाश्रिताः ॥ स्नानं सरस्वतीलक्ष्मीनदीनाम्भसि क्वचित् ॥ ७१ ॥ भुवनाधिपतीनां च स्थानं यत्र व्यवस्थितिः ॥
अण्डवृद्धिप्रधानान्तं त्रितत्त्वं ब्रह्मणः पदम् ॥ ७२ ॥ तन्मात्रादिप्रधानान्तं पदमेतत्त्रिकं हरेः ॥ नाट्येशगणमातॄणां यक्षेशशार-
जन्मनाम् ॥ ७३ ॥ अण्डजाः शुद्धविद्यान्तं पदं गणपतेस्तथा ॥ मायांशदेशशक्त्यन्तं शिवाशिवोत्तरोचिषाम् ॥ ७४ ॥ पदमी-
श्वरपर्य्यन्तं व्यक्तार्चासु च कीर्तितम् ॥ कूर्माद्यं कीर्त्तितं यच्च यच्च रत्नादिपञ्चकम् ॥ ७५ ॥ प्रक्षिपेत्पीठगर्त्ते च पञ्च ब्रह्मशिलां
विना ॥ षड्भिर्विभाजिते गर्त्ते त्यक्त्वा भागं च पृष्ठतः ॥ ७६ ॥ स्थापनं पञ्चमांशे च यदि वा वसुभाजिते ॥ स्थापनं सप्तमे
भागे प्रतिमासु सुखावहम् ॥ ७७ ॥ धारणाभिर्विशुद्धिः स्यात्स्थापने लेपचित्रयोः ॥ स्नानादि मानसं तत्र शिलारत्नादिवेश-
नम् ॥ ७८ ॥ नेत्रोद्घाटनमन्त्रेष्टमासनादिप्रकल्पनम् ॥ पूजा निरम्बुभिः पुष्पैर्यथा चित्रं न दुष्यति ॥ ७९ ॥ विधिस्तु
चललिङ्गेषु सम्प्रत्येव निगद्यते ॥ पञ्चभिर्वा त्रिभिर्वापि पृथक्कुर्य्याद्विभाजिते ॥ ८० ॥ भागत्रयेण भागांशो भवेद्रागद्वयेन वा ॥
स्वपीठेष्वापि तद्वत्स्याल्लिङ्गेषु तत्त्वभेदतः ॥ ८१ ॥ सृष्टिमन्त्रेण संस्कारो विधिवत्स्फाटिकादिषु ॥ किञ्च ब्रह्मशिलारत्नप्रभूतेश्चा-
निवेदनम् ॥ ८२ ॥ योजनं पिण्डिकायाश्च मनसा परिकल्पयेत् ॥ स्वयम्भुबाणलिङ्गादौ संस्कृतौ नियमो न हि ॥ ८३ ॥
स्नापनं संहितामन्त्रैर्न्यासं होमं च कारयेत् ॥ नदीसमुद्ररोहाणां स्थापनं पूर्ववन्मतम् ॥ ८४ ॥ ऐहिकं मृन्मयं लिंगं पिष्टकादि च

तत्क्षतम् ॥ कृत्वा संपूजयेच्छुद्धं दीक्षणादिविधानतः ॥८५॥ समादाय ततो मन्त्रानात्मानं सन्निधाय च ॥ तज्जले प्रक्षिपेल्लिंगं वत्स-
रात्कामदं भवेत् ॥८६॥ विष्ण्वादिस्थापनं चैव पृथङ्मन्त्रैः समाचरेत् ॥ इत्यादिमहापुराणे आग्नेये शिवप्रतिष्ठाविधिर्नाम सप्तनवति-
तमोऽध्यायः ॥ ९७ ॥ अथ गौरीप्रतिष्ठाविधानम् ॥ ईश्वर उवाच ॥ वक्ष्ये गौरीप्रतिष्ठां च पूजया सहितां शृणु ॥ मण्डपाद्यं पुरो
यच्च संस्थाप्य चाधिरोपयेत् ॥ १ ॥ शय्यायां तांश्च विन्यस्य मन्त्रान्मूर्त्यादिकान्गुह ॥ आत्मविद्याशिवान्तं च कुर्यादीशनिवेश-
नम् ॥ २ ॥ शक्तिं परां ततो न्यस्य हुत्वा जप्त्वा च पूर्ववत् ॥ सन्धाय च तथा पिण्डीं क्रियाशक्तिस्वरूपिणीम् ॥ ३ ॥ सदेशव्यापिकां
ध्यात्का न्यस्ते रत्नादिकान्तथा ॥ एवं संस्थाप्य तां पश्चादेवीं तस्यां नियोजयेत् ॥४॥ परशक्तिस्वरूपां तां स्वाणुना शक्तियोगतः ॥
ततो न्यसेत्क्रियाशक्तिं पीठे ज्ञानं च विग्रहे ॥ ५ ॥ ततोऽपि व्यापिनीं शक्तिं समावाह्य नियोजयेत् ॥ अम्बिकां शिवनाम्नीं च
समालभ्य प्रपूजयेत् ॥६॥ ओं आधारशक्तये नमः । ओं कूर्माय नमः । ओं स्कन्दाय च तथा नमः । ओं ह्रीं नारायणाय नमः ।
ओं ऐश्वर्याय नमः । ओं अं अघश्छदनाय नमः । ओं पद्मासनाय नमः । ओं ऊर्ध्वच्छदनाय नमः । ॐ पद्मासनाय नमः । अथ
सम्पूज्याः केशवास्तथा । ओं ह्रीं कर्णिकायै नमः । ओं क्षं पुष्कराक्षेभ्य इहार्चयेत् । ॐ हां पुष्टयै ह्रीं च ज्ञानायै हूं क्रियायै ततो
नमः । ओं नालाय नमः । रुं धर्माय नमः । रुं ज्ञानाय वै नमः । ओं वैराग्याय नमः । ओं वै अधर्माय नमः । ओं रुं अज्ञानाय
वै नमः । ओं अवैराग्याय वै नमः । ओं अनैश्वर्याय नमः । हुं वाचे हुं च रागिण्यै क्रैं ज्वालिन्यै ततो नमः । ओं ह्रौं शमायै च
नमः । हुं ज्येष्ठायै ततो नमः । ओं ह्रौं रौं क्रौं नवशक्तयै गौं च गौर्यासनाय च गों गौरीमूर्तये नमः । गौर्या मूलमथोच्यते । ओं
ह्रीं साः महागौरि रुद्रदयिते स्वाहा गौर्यै नमः । गां हूं ह्रीं शिवो गूं स्याच्छिखायै कवचाय च । गों नेत्राय च गोम् अस्त्राय ओं गौं
विज्ञानशक्तये ॥ ७ ॥ ओं गूं क्रियाशक्तये नमः पूर्वादौ शक्रादिकान् ॥ ओं सुं सुभगायै नमः ह्रीं बीजललिता ततः ॥८॥ ओं ह्रीं
कामिन्यै च नमः ओं हूं स्यात् कामशालिनी ॥ मन्त्रैर्गौरीं प्रतिष्ठाप्य प्राच्यं जप्त्वाथ सर्वभाक् ॥ ९ ॥ इत्यादिमहापुराणे
आग्नेये गौरीप्रतिष्ठाविधानं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ अथ सूर्य्यप्रतिष्ठाविधानम् ॥ ईश्वर उवाच ॥ वक्ष्ये सूर्य्यप्रतिष्ठां

च पूर्ववन्मण्डपादिकम् ॥ स्नानादिकं च सम्पाद्य पूर्वोक्तविधिना ततः ॥ १ ॥ विद्यामासनशय्यायां साङ्गं विन्यस्य भास्करम् ॥ त्रितत्त्वं विन्यसेत्तत्र सस्वरं खादिपञ्चकम् ॥ २ ॥ शुद्ध्यादि पूर्ववत्कृत्वा पिण्डीं संशोध्य पूर्ववत् ॥ सदेशपदपर्य्यन्तं विन्यस्य तत्तु पञ्चकम् ॥ ३ ॥ शक्त्या च सर्वतोमुख्या संस्थाप्य विधिवत्ततः ॥ खाणुना विधिवत्सूर्य्यं शक्त्यन्तं स्थापयेद्गुरुः ॥ ४ ॥ स्वाम्यन्तमथ वादित्यं पादान्तं नाम धारयेत् ॥ सूर्य्यमंत्रास्तु पूर्वोक्ता द्रष्टव्याः स्थापनेऽपि च ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये सूर्यप्रतिष्ठाविधानं नाम नवनवतितमोऽध्यायः ॥ ९९ ॥ अथ द्वारप्रतिष्ठाविधानम् ॥ ईश्वर उवाच ॥ द्वाराश्रितप्रतिष्ठाया वक्ष्यामि विधिमप्यथ ॥ द्वाराङ्गाणि कषायाद्यैः संस्कृत्य शयने न्यसेत् ॥ १ ॥ मूलमध्याग्रभागेषु त्रयमात्मादिसेश्वरम् ॥ विन्यस्य सन्निवेश्याथ हुत्वा जप्त्वात्र रूपतः ॥ २ ॥ द्वारादधो यजेद्वास्तुं तत्रैवानन्तमन्ततः ॥ रत्नादिपञ्चकं न्यस्य शान्तिहोमं विधाय च ॥ ३ ॥ यवसिद्धार्थकाक्रान्ता ऋद्धिवृद्धिमहातिलाः ॥ गोमृत्सर्षपरागेन्द्रमोहनीलक्ष्मणाऽमृताः ॥ ४ ॥ रोचानारुग्वचादूर्वा प्रासादाघश्च पोटलीम् ॥ प्रकृत्योदुम्बरे बद्धा रक्षार्थं प्रणवेन तु ॥ ५ ॥ द्वारमुत्तरतः किञ्चिदाश्रितं सन्निवेशयेत् ॥ आत्मतत्त्वमधो न्यस्य विद्यातत्त्वं च शाखयोः ॥ ६ ॥ शिवमाकाशदेशे च व्यापकं सर्वमण्डले ॥ ततो महेशनाथं च विन्यसेन्मूलमंत्रतः ॥ ७ ॥ द्वाराश्रितांश्च तत्पादीन्कृतयुक्तैः स्वनामभिः ॥ जुहुयाच्छतमर्द्धं वा द्विगुणं शक्तितोऽथ वा ॥ ८ ॥ न्यूनादिदोषमोषार्थं हेतितो जुहुयाच्छतम् ॥ दिग्बालैं पूर्ववद्दत्त्वा प्रदद्याद्दक्षिणादिकम् ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये द्वारप्रतिष्ठाविधानं नाम शततमोऽध्यायः ॥ १०० ॥ अथ प्रासादप्रतिष्ठाविधिः ॥ ईश्वर उवाच ॥ प्रासादस्थापनं वक्ष्ये तच्चैतन्यं स्वयोगतः ॥ शुकनासासमाप्तौ तु पूर्ववद्यांश्च मध्यतः ॥ १ ॥ आधारशक्तितः पद्मे विन्यस्ते प्रणवेन च ॥ स्वर्णाद्येकतमोद्भूतं पञ्चगव्येन संयुतम् ॥ २ ॥ मधुक्षीरयुतं कुम्भं न्यस्तरत्नादिपञ्चकम् ॥ सग्वस्त्रं गन्धलिप्तं च गन्धवत्पुष्पभूषितम् ॥ ३ ॥ चूतादिपल्लवानांच कृती कृत्यं च विन्यसेत् ॥ पूरकेण समादाय सकलीकृतविग्रहः ॥ ४ ॥ सर्वात्मभिन्नमात्मानं स्वाणुना स्वान्तमारुतः ॥ आज्ञया बोधयेच्छम्भोः रेचकेन ततो गुरुः ॥ ५ ॥ द्वादशान्तात्समादाय स्फुरद्बिन्दुकणोपमम् ॥

निक्षिपेत्कुम्भगर्भे च न्यस्ततन्त्रातिवाहिकम् ॥ ६ ॥ विग्रहं तद्गुणानां च बोधकं च कलादिकम् ॥ क्षान्तं वागीश्वरं तनु व्रातं तत्र निवेशयेत् ॥ ७ ॥ दश नाडीर्दश प्राणानिन्द्रियाणि त्रयोदश ॥ तदधिपांश्च संयोज्य प्रणवाद्यैः स्वनामभिः ॥ ८ ॥ स्वकार्य्यकारणत्वेन मायाकालनियामिकाः ॥ विद्येशान्प्रेरकाञ्छम्भुं व्यापिनं च सुसम्भरैः ॥ ९ ॥ अङ्गानि च विनिक्षिप्य निरुन्ध्याद्रोधमुद्रया ॥ सुवर्णाद्युद्भवं यद्वा पुरुषं पुरुषानुगम् ॥ १० ॥ पञ्चगव्यकषायाद्यैः पूर्ववत्संस्कृतं ततः ॥ शय्यायां कुम्भमारोप्य ध्यात्वा रुद्रमुमापतिम् ॥ ११ ॥ तस्मिंश्च शिवमन्त्रेण व्यापकत्वेन विन्यसेत् ॥ सन्निधानाय होमं च प्रोक्षणं स्पर्शनं जपम् ॥ १२ ॥ सान्निध्यबोधनं सर्वं भागत्रयविभागतः ॥ विधायैवं प्रकृत्यन्ते कुम्भे तं विनिवेशयेत् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये प्रासादप्रतिष्ठाविधानं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ अथ ध्वजारोपणादिविधिः ॥ ईश्वर उवाच ॥ चूलके ध्वजदण्डे च ध्वजे देवकुले तथा ॥ प्रतिष्ठा च यथोद्दिष्टा तथा स्कन्द वदामि ते ॥ १ ॥ तडागार्द्धप्रवेशाद्वा यद्वा सर्वार्द्धवेशनात् ॥ ऐष्टके दारुजः शूलः शैलजे धाम्नि शैलजः ॥ २ ॥ वैष्णवादौ च चक्राढ्यः कुम्भः स्यान्मूर्तिमानतः ॥ स च त्रिशूलयुक्तस्तु अग्रचूलाभिधो मतः ॥३॥ ईशशूलः समाख्यातो मूर्ध्नि लिङ्गसमन्वितः ॥ बीजपूरकयुक्तो वा शिवशास्त्रेषु तद्विधः ॥ ४ ॥ चित्रो ध्वजश्च जङ्घातो यथा जङ्घाद्वतो भवेत् ॥ भवेद्वा दण्डमानस्तु यदि वा तद्यदृच्छया ॥ ५ ॥ महाध्वजः समाख्यातो यस्तु पीठस्य वेष्टकः ॥ शक्रैर्ग्रहै रसैर्वापि हस्तैर्दण्डस्तु सम्मितः ॥ ६ ॥ उत्तमादिक्रमेणैव विज्ञेयः सूरिभिस्ततः ॥ वंशजः शालजादिर्वा स दण्डः सर्वकामदः ॥७॥ अयमारोप्यमाणस्तु भङ्गमायाति वै यदि ॥ राज्ञोऽनिष्टं विजानीयाद्यजमानस्य वा तथा ॥८॥ मन्त्रेण बहुरूपेण पूर्ववच्छान्तिमाचरेत् ॥ द्वारपालादिपूजां च मन्त्राणां तर्पणं तथा ॥ ९ ॥ विधाय चूलकं दण्डं स्नापयेदस्त्रमन्त्रतः ॥ अनेनैव तु मन्त्रेण ध्वजं संप्रोक्ष्य देशिकः ॥ १० ॥ मृत्कषायादिभिः स्नानं प्रासादं कारयेत्ततः ॥ विलिप्य रसमाच्छाद्य शय्यायां न्यस्य पूर्ववत् ॥ ११ ॥ चूलके लिङ्गवन्न्यासो न च ज्ञानं न च क्रिया ॥ विशेषार्था चतुर्थी च न च कुण्डस्य कल्पना ॥ १२ ॥ दण्डे तथार्थतत्त्वं च विद्यातत्त्वं द्वितीयकम् ॥ सद्योजातादिवक्त्राणि शिवतत्त्वं पुनर्ध्वजे ॥ १३ ॥ निष्कलं च शिवं तत्र न्यस्तांगानि

सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात् ॥ भागौ द्वौ मध्यमे गर्भे ज्येष्ठभागद्वयेन तु ॥ ३ ॥ त्रिभिस्तु कलशीगर्भः शेषो भित्तिरिति क्वचित् ॥ षोढा भक्तेऽथ वा क्षेत्रे भित्तिर्भागैकविस्तरात् ॥ ४ ॥ गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका ॥ विस्ताराद्द्विगुणो वापि सपादद्विगुणोऽपि वा ॥ ५ ॥ अर्द्धार्द्धद्विगुणो वापि त्रिगुणः क्वचिदुच्छ्रयः ॥ जगती विस्तरार्द्धेन त्रिभागेन क्वचिद्भवेत ॥ ६ ॥ नेमिः पादोनविस्तीर्णा प्रासादस्य समन्ततः ॥ परिधिरुर्यंशको मध्ये रथकांस्तत्र कारयेत् ॥ ७ ॥ चामुण्डं भैरवं तेषु नाट्येशं च निवेशयेत् ॥ प्रासादार्द्धेन देवानामष्टौ वा चतुरोऽपि वा ॥ ८ ॥ प्रदक्षिणावहाः कुर्य्यात्प्रासादादिषु वा न वा ॥ आदित्याः पूर्वतः स्थाप्याः स्कन्दोऽग्निर्वायुगोचरे ॥ ९ ॥ एवं यमादयो न्यस्याः स्वस्यां स्वस्यां दिशि स्थिताः ॥ चतुर्द्धा शिखरं कृत्वा शुकनासा द्विभागिका ॥ १० ॥ तृतीये वेदिका त्वग्रेः सकण्ठो मलसारकः ॥ वैराजः पुष्पकश्चान्यः कैलासो मणिकस्तथा ॥ ११ ॥ त्रिविष्टपं च पञ्चैव मेरुमूर्द्धनि संस्थिताः ॥ चतुरस्रस्तु तत्राद्यो द्वितीयोऽपि तदायतः ॥ १२ ॥ वृत्तो वृत्तायतश्चान्यो ह्यष्टास्रश्चापि पञ्चमः ॥ एकैको नवधा भेदैश्चत्वारिंशच्च पञ्च च ॥ १३ ॥ प्रासादः प्रथमो मेरुर्द्वितीयो मन्दरस्तथा ॥ विमानं च तथा भद्रः सर्वतोभद्र एव च ॥ १४ ॥ चरुको नन्दिको नन्दिर्वर्द्धमानस्तथापरः ॥ श्रीवत्सश्चेति वैराजान्ववाये च समुत्थिताः ॥ १५ ॥ वलभी गृहराजश्च शालागृहं च मन्दिरम् ॥ विशालश्च समो ब्रह्ममन्दिरं भुवनं तथा ॥ १६ ॥ प्रभवः शिबिका वेश्म नवैते पुष्पकोद्भवाः ॥ वलयो दुन्दुभिः पद्मो महापद्मक एव च ॥ १७ ॥ वर्द्धनी वान्य उष्णीषः शङ्खश्च कलशस्तथा ॥ स्ववृक्षश्च तथाप्येते वृत्ताः कैलाससम्भवाः ॥ १८ ॥ गजोऽथ वृषभो हंसो गरुत्मान्नृक्षनायकः ॥ भूषणो भूधरश्चान्ये श्रीजयः पृथिवीधरः ॥ १९ ॥ वृत्तायतात्समुद्भूता नवैते मणिकाह्वयात् ॥ वज्रं चक्रं तथा चान्यत्स्वास्तिकं वज्रस्वस्तिकम् ॥ २० ॥ चित्रं स्वस्तिकखड्गं च गदा श्रीकण्ठ एव च ॥ विजयो नामतश्चैते त्रिविष्टपसमुद्भवाः ॥ २१ ॥ नगराणामिमाः सञ्ज्ञा लाटादीनामिमास्तथा ॥ ग्रीवार्द्धेनोन्नतं चूलं पृथुलं च विभागतः ॥ २२ ॥ दशधा वेदिकां कृत्वा पञ्चभिः स्कन्धविस्तरः ॥ त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु प्रचण्डकम् ॥ २३ ॥ दिक्षु

द्वाराणि कार्याणि न विदिक्षु कदाचन ॥ पिण्डिका कोणविस्तीर्णा मध्यमान्ता ह्युदाहृता ॥ २४ ॥ क्वचित्पञ्चमभागेन महतां गर्भपादतः ॥ उच्छ्राया द्विगुणास्तेषामन्यथा वा निगद्यते ॥ २५ ॥ षष्ट्याधिकात्समारभ्य अङ्गुलानां शताद्दिह ॥ उत्तमान्यपि चत्वारि द्वाराणि दशहानितः ॥ २६ ॥ त्रीण्येव मध्यमानि स्युस्त्रीण्येव कनीयांस्यधः ॥ उच्छ्रायार्द्धेन विस्तारो ह्युच्छ्रायोऽभ्यधिकस्त्रिधा ॥ २७ ॥ चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः ॥ उच्छ्रायात्पादविस्तीर्णा विशाखास्तदुदुम्बरे ॥ २८ ॥ विस्तरार्द्धेन बाहुल्यं सर्वेषामेव कीर्त्तितम् ॥ द्विपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्टदम् ॥ २९ ॥ अधःशाखाचतुर्थांशे प्रतीहारौ निवेशयेत् ॥ मिथुनैः पादवर्णाभिः शाखाशेषं विभूषयेत् ॥ ३० ॥ स्तम्भविद्धे भृत्यता स्याद्वृक्षविद्धे त्वभूतिता ॥ कूपविद्धे भयं द्वारे क्षेत्रविद्धे धनक्षयः ॥३१॥ प्रासादगृहशालादिमार्गविद्धेषु बन्धनम् ॥ सभाविद्धेन दारिद्र्यं वर्णविद्धे निराकृतिः ॥ ३२ ॥ उलूखलेन दारिद्र्यं शिलाविद्धेन शत्रुताम् ॥ छायाविद्धेन दारिद्र्यं वेधदोषो न जायते ॥ ३३ ॥ छेदादुत्पाटनाद्वापि तथा प्राकारलक्षणात् ॥ सीमाया द्विगुणत्यागाद्वेधदोषो न जायते ॥ ३४॥ इत्यादिमहापुराणे आग्नेये सामान्यप्रासादलक्षणं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ अथ नगरादिवास्तुनिरूपणम् ॥ ईश्वर उवाच ॥ नगरग्रामदुर्गाद्या गृहप्रासादवृद्धये ॥ एकाशीतिपदैर्वास्तुं पूजयेत्सिद्धये ध्रुवम् ॥ १ ॥ प्रागास्या दशधा नाड्यस्तासां नामानि च ब्रुवे ॥ शान्ता यशोवती कान्ता विशाला प्राणवाहिनी ॥ २ ॥ सती वसुमती नन्दा सुभद्राथ मनोरमा ॥ उत्तरा द्वादशान्याश्च एकाशीत्यंघ्रिकारिका ॥ ३ ॥ हरिणी सुप्रभा लक्ष्मीर्विभूतिर्विमला प्रिया ॥ जया ज्वाला विशोका च स्मृतास्तत्र च पादतः ॥ ४ ॥ ईशाद्यष्टाष्टकं दिक्षु यजेदीशं धनञ्जयम् ॥ शक्रमर्कं तथा सत्यं भृशं व्योम च पूर्वतः ॥ ५ ॥ हव्यवाहं च पूषाणं वितथं भौममेव च ॥ कृतान्तमथ गन्धर्वं भृङ्गं मृगं च दक्षिणे ॥ ६ ॥ पितरं द्वारपालं च सुग्रीवं पुष्पदन्तकम् ॥ वरुणं दैत्यशेषौ च यक्ष्माणं पश्चिमे सदा ॥ ७ ॥ रोगाहिमुख्यौ भल्लाटः सोमोऽदितिर्दितिः ॥ नवान्तः पदगो ब्रह्मा पूज्योऽर्द्धे च षडंघ्रिगाः ॥ ८ ॥ ब्रह्मेशान्तरकोष्ठस्थमायारूर्या तु पदद्वये ॥ तदधश्चापवत्साख्यं केन्द्रान्तरेषु षट्पदे ॥ ९ ॥ मरीचिकाग्निमध्ये तु सविता द्विपदस्थितः ॥ सावित्री तदधो द्व्यंशे

विवस्वांन्षट्पदे त्वधः ॥ १० ॥ पितृब्रह्मान्तरे विष्णुमिन्दुमिन्द्रं त्वधो जयम् ॥ वरुणब्रह्मणोर्म्मध्ये मित्राख्यं षट्पदे यजेत् ॥ ११ ॥ रोगब्रह्मान्तरे नित्यं द्विपञ्च रुद्रदासकम् ॥ तदधो द्व्यंघ्रिगं यक्ष्म षट् सौम्येषु धराधरम् ॥ १२ ॥ चरकीं स्कन्दविकटं विदारीं पूतनां क्रमात् ॥ जम्भं पापं पिलिपिच्छं यजेदीशादिबाह्यतः ॥ १३ ॥ एकाशीतिपदं वेश्म मण्डपश्च शतांघ्रिकः ॥ पूर्ववद्देवताः पूज्या ब्रह्मा तु षोडशांशके ॥ १४ ॥ मरीचिश्च विवस्वांश्च मित्रं पृथ्वीधरस्तथा ॥ दशकोष्ठस्थितां दिक्षु त्वन्ये वेशादिकोणगाः ॥ १५ ॥ दैत्यैमाता तथेशाग्नी मृगाख्यौ पितरौ तथा ॥ पापयक्ष्मानिलौ देवाः सर्वे सार्द्धांशके स्थिताः ॥ १६ ॥ यत्पाद्यौकः प्रवक्ष्यामि संक्षेपेण क्रमाद्बुध ॥ स दिग्विंशतिकैर्दैर्घ्यादष्टाविंशति विस्तरात् ॥ १७ ॥ शिवाश्रयः शिवाख्यश्च रुद्रहीनः सदोभयोः ॥ रुद्रद्विगुणितानाद्याः पृथुष्णोभिर्विना त्रिभिः ॥ १८ ॥ स्याद्बुधद्विगुणं दैर्घ्यात्तिथिभिश्चैव विस्तरात् ॥ सावित्रः सालयः कुड्यास्तथा त्रिंशांशतः पृथक् ॥ १९ ॥ कुड्यपृथूपजङ्घोच्चात्कुड्यं तु त्रिगुणोच्छ्रयम् ॥ कुड्यसूत्रसमा पृथ्वी वीथिभेदादनेकधा ॥ २० ॥ भद्रे तुल्यं च वीथीभिर्द्वारवीथी विनाग्रतः ॥ श्रीजयं पृष्ठतो हीनं भद्रोऽयं पार्श्वयोर्विना ॥ २१ ॥ गर्भपृथुसमा वीथी तदर्द्धार्द्धेन वा क्वचित् ॥ वीथ्यर्द्धेनोपवीथ्याद्यमेकद्वित्रिपुरान्वितम् ॥ २२ ॥ सामान्यान्यगृहं वक्ष्ये सर्वेषां सर्वकामदम् ॥ एकद्वित्रिचतुःशालमष्टशालं यथाक्रमात् ॥ २३ ॥ एकं याम्ये च सौम्यास्यं द्वे चेत्पश्चात्पुरोमुखम् ॥ चतुःशालं तु साम्मुख्यात्तयोरिन्द्रेन्द्रमुक्तयोः ॥ २४ ॥ शिवास्यमम्बुपास्यैष इन्द्रास्ये यममूर्य्यकम् ॥ प्राक्सौम्यस्थे च दण्डाख्यं प्राग्याम्ये वातसंज्ञकम् ॥ २५ ॥ आप्येन्दौ गृहबल्याख्यं त्रिशूलं तद्विनार्द्धिकृत् ॥ पूर्वशालाविहीनं स्यात्सुक्षेत्रं वृद्धिदायकम् ॥ २६ ॥ याम्ये हीने भवेच्छूली त्रिशालं वृद्धिकृत् परम् ॥ यक्षघ्नं जलहीनोकः सुतघ्नं बहुशत्रुकृत् ॥ २७ ॥ इन्द्रादिक्रमतो वह्निध्वजाद्यष्टौ गृहाण्यहम् ॥ प्रक्षालानुत्सगावासमग्नौ तस्य महानसम् ॥ २८ ॥ याम्ये रसक्रिया शय्या धनुःशस्त्राणि रक्षसि ॥ धनुर्भुक्त्यम्बुपेशाख्ये सम्यगन्धौ च मारुते ॥ २९ ॥ सौम्ये धनपशू कुर्य्यादीशे दीक्षावरालयम् ॥ स्वामिहस्तमितं वेश्म विस्तारायामपिण्डिकम् ॥ ३० ॥ त्रिगुणं हस्तसंयुक्तं कृत्वाष्टांशैर्हृतं तथा ॥ तच्छेषोऽयं स्थितस्तेन वायसान्तं ध्वजादिकम् ॥ ३१ ॥ त्रय.

पक्षाग्निवेदेषु रसर्षिवसुतो भवेत् ॥ सर्वनाशकरं वेश्म मध्ये चान्ते च संस्थितम् ॥ ३२ ॥ तस्माच्च नवमे भागे शुभकृन्निर्व्रणो मतः ॥ तन्मध्ये मण्डपः शस्तः समो वा द्विगुणायतः ॥ ३३ ॥ प्रत्यगाप्ये चेन्दुयमे हृद्ब एव गृहावली ॥ एकैकभवनाख्यानि दिक्ष्वष्टाष्टकसंख्यया ॥ ३४ ॥ ईशाद्यादितिकान्तानि फलान्येषां यथाक्रमम् ॥ भयं नारी चलत्वं च जयो वृद्धिः प्रतापकः ॥ ३५ ॥ धर्मः कलिश्च नैर्ऋत्यं च प्राग्द्वारेष्वष्टसु ध्रुवम् ॥ दाहोऽसुखं सुहृन्नाशो धननाशो मृतिर्धनम् ॥ ३६ ॥ शिल्पित्वं तनयः स्याच्च याम्यद्वारफलाष्टकम् ॥ आयुः प्राव्राज्यसस्यानि धनशान्त्यर्थसङ्क्षयाः ॥ ३७ ॥ शोषं भोगं चापत्यं च जलद्वारफलानि च ॥ रोगो मदार्त्तिमुख्यत्वं चार्थायुः कृशता मतिः ॥ मानं च द्वारतः पूर्वे उत्तरस्यां दिशि क्रमात् ॥ ३८॥ इत्यादिमहापुराणे आग्नेये गृहादिवास्तुर्नाम पञ्चाऽधिकशततमोऽध्यायः ॥ १०५ ॥ अथ नगरादिकवास्तुकथनम् ॥ ईश्वर उवाच ॥ नगरादिकवास्तुं च वक्ष्ये राज्यादिवृद्धये ॥ योजनं योजनार्द्धं वा तदर्थं स्थानमाश्रयेत् ॥ १ ॥ अभ्यर्च्य वास्तुनगरं प्राकाराद्यं तु कारयेत् ॥ ईशादिर्त्रिंशत्पदके पूर्वद्वारं च सूर्यके ॥ २ ॥ गन्धर्वाभ्यां दक्षिणे स्याद्वारुण्ये पश्चिमे तथा ॥ सौम्यद्वारं सौम्यपदे कार्या हट्टास्तु विस्तराः ॥ ३ ॥ येनेभादि सुखं गच्छेत्कुर्याद्द्वारं तु षट्करम् ॥ छिन्नकर्णं विभिन्नं च चन्द्रार्द्धाभं पुरं न हि ॥ ॥ ४ ॥ वज्रसूचीमुखं नेष्टं सकृद्विश्रिसमागमम् ॥ चापाभं वज्रनागाभं पुरारम्भे हि शान्तिकृत् ॥ ५ ॥ प्रार्च्य विष्णुहरार्कादीन्नत्वा दद्याद्बलिं बली ॥ आग्नेये स्वर्णकर्मारान्पुरस्य विनिवेशयेत् ॥ ६ ॥ दक्षिणे नृत्यवृत्तीनां वेश्यास्त्रीणां गृहाणि च ॥ नटानां चक्रिकादीनां कैवर्त्तादेश्च नैर्ऋते ॥ ७ ॥ रथानामायुधानां च कृपाणानां च वारुणे ॥ शौण्डिकाः कर्माधिकृता वायव्ये परिकर्मिणः ॥ ८ ॥ ब्राह्मणा यतयः सिद्धाः पुण्यवन्तस्तथोत्तरे ॥ फलाद्यादिविक्रयिण ईशाने च वणिग्जनाः ॥ ९ ॥ पूर्वतश्च बलाध्यक्षा आग्नेये विविधं बलम् ॥ स्त्रीणामादेशिनो दक्षे काण्डारान्नैर्ऋते न्यसेत् ॥ १० ॥ पश्चिमे च महामात्यान्कोशपालांश्च कारुकान् ॥ उत्तरे दण्डनाथांश्च नायकद्विजसङ्कुलान् ॥ ११ ॥ पूर्वतः क्षत्रियान्दक्षे वैश्याञ्छूद्रां च पश्चिमे ॥ दिक्षु वैद्यान्वाजिनश्च बलानि च चतुर्दिशम् ॥ १२ ॥ पूर्वेण चरलिङ्गचार्दाञ्छशानार्दानि दक्षिणे ॥ पश्चिमे गोधनाद्यं च कृषिकर्तॄंस्तथोत्तरे ॥ १३ ॥

न्यसेन्म्लेच्छांश्च कोणेषु ग्रामादिषु तथा स्थितम् ॥ श्रियं वैश्रवणं द्वारि पूर्व्वे तो पश्यतां श्रियम् ॥ १४ ॥ देवादीनां पश्चिमतः पूर्वास्यानि गृहाणि हि ॥ पूर्वतः पश्चिमास्यानि दक्षिणे चोत्तराननान् ॥ १५ ॥ नाकेशविष्ण्वादिधामानि रक्षार्थं नगरस्य च ॥ निर्दैवतं तु नगरंग्रामदुर्गगृहादिकम् ॥ १६ ॥ भुज्यते तत्पिशाचाद्यै रोगाद्यैः परिभूयते ॥ नगरादि सदैवं हि जयदं भुक्तिमुक्तिदम् ॥ १७ ॥ पूर्व्वायां श्रीगृहं प्रोक्तमाग्नेय्यां वै महानसम् ॥ शयनं दक्षिणस्यां तु नैर्ऋत्यामायुधाश्रयम् ॥ १८ ॥ भोजनं पश्चिमायां तु वायव्यां धान्यसंग्रहः ॥ उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम् ॥ १९ ॥ चतुःशालं त्रिशालं वा द्विशालं चैकशालकम् ॥ चतुःशालगृहाणां तु शालालिंन्दकभेदतः ॥ २० ॥ शतद्वयं तु जायन्ते पञ्चाशत्पंच तेष्वपि ॥ त्रिशालानि तु चत्वारि द्विशालानि तु पञ्चधा ॥ २१ ॥ एकशालानि चत्वारि एकालिन्दानि वच्मि च ॥ अष्टाविंशत्यलिन्दानि गृहाणि नगराणि च ॥ २२ ॥ चतुर्भिः सप्तभिश्चैव पञ्चपञ्चाशदेव तु षडलिन्दानि विंशैव अष्टाभिर्विंश एव हि ॥ अष्टालिन्दं भवेदेवं नगरादौ गृहाणि हि ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये नगरादिवास्तुर्नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥ अथ स्वायम्भुवसर्गकथनम् ॥ अग्निरुवाच ॥ वक्ष्ये भुवनकोशं च पृथ्वीद्वीपादिलक्षणम् ॥ अग्नीध्रश्चाग्निबाहुश्च वपुष्मान्द्युतिमांस्तथा ॥ १ ॥ मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ॥ ज्योतिष्मान्दशमस्तेषां सत्यनामा सुतोऽभवत् ॥ २ ॥ प्रियव्रतसुताः ख्याताः सप्तद्वीपान्ददौ पिता ॥ जम्बूद्वीपमथाग्नीध्रे पुक्षं मेधातिथेर्ददौ ॥ ३ ॥ वपुष्मते शाल्मलं च ज्योतिष्मते कुशाह्वयम् ॥ क्रौञ्चद्वीपं द्युतिमते शाकं भव्याय दत्तवान् ॥ ४ ॥ पुष्करं सवनायादादग्नीध्रेऽदात्सुते शतम् ॥ जम्बूद्वीपं पिता लक्षं नाभेर्दत्तं हिमाह्वयम् ॥ ५ ॥ हेमकूटं किम्पुरुषे हरिवर्षाय नैषधम् ॥ इलावृते मेरुमध्यं रम्ये नीलाचलाश्रितम् ॥ ६ ॥ हिरण्वते श्वेतवर्षं कुरूंस्तु कुरवे ददौ ॥ भद्राश्वाय च भद्राश्वं केतुमालाय पश्चिमम् ॥ ७ ॥ मेरोः प्रियव्रतः पुत्रानभिषिच्य ययौ वनम् ॥ शालग्रामे तपस्तप्त्वा ययौ विष्णोर्लयं नृपः ॥ ८ ॥ यानि किम्पुरुषाद्यानि ह्यष्टवर्षाणि सत्तम ॥ तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः ॥ ९ ॥ जरामृत्युभयं नास्ति धर्माधर्मौ युगादिकम् ॥ नाधमं मध्यमं तुल्या हिमादेश्चात्तु

नाभितः ॥१०॥ ऋषभो मेरुदेव्यां च ऋषभाद्भरतोऽभवत् ॥ ऋषभो दत्तश्रीः पुत्रे शालग्रामे हरिं गतः ॥११॥ भरताद्भारतं वर्षं भरतात्सुमतिस्त्वभूत् ॥ भरतो दत्तलक्ष्मीकः शालग्रामे हरिं गतः ॥ १२ ॥ स योगी योगप्रस्तावे वक्ष्ये तच्चरितं पुनः ॥ सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत ॥ १३ ॥ परमेष्ठी ततस्तस्मात्प्रतीहारस्तदन्वयः ॥ प्रतीहारात्प्रतिहर्त्ता प्रतिहर्तुर्भुवस्ततः ॥ ॥ १४ ॥ उद्गीतोऽथ च प्रस्तारो विभुः प्रस्तारतः सुतः ॥ पृथुश्चैव ततो नक्तो नक्तस्यापि गयः सुतः ॥ १५ ॥ नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ॥ तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत ॥१६॥ महान्तस्तत्सुतश्चाभून्मनस्यस्तस्य चात्मजः ॥ त्वष्टा त्वष्टुश्च विरजा रजस्तस्याप्यभूत्सुतः ॥ १७ ॥ सत्याजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने ॥ विश्वज्योतिःप्रधानास्ते भारतं तौर्विवार्द्धितम् ॥ कृतत्रेतादिसर्गेण सर्गः स्वायम्भुवः स्मृतः ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये स्वायम्भुवसर्गो नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ अथ भुवनकोशनिरूपणम् ॥ अग्निरुवाच ॥ जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो महान् ॥ कुशः क्रौञ्चस्तथा शाकः पुष्करश्चेति सप्तमः ॥ १ ॥ एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम् ॥ २ ॥ जम्बूद्वीपो द्वीपमध्ये तन्मध्ये मेरुरुच्छ्रितः ॥ चतुरशीतिमाहस्रो भूयिष्ठः षोडशाद्विराट् ॥. ३ ॥ द्वात्रिंशन्मूर्ध्नि विस्तारात्षोडशावः सहस्रवान् ॥ भूयस्तस्यास्य शैलोऽसौ कर्णिकाकारसंस्थितः ॥ ४ ॥ हिमवान्हेमकूटश्च निषधश्चास्य दक्षिणे ॥ नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ ५ ॥ लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे ॥ सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥ ६ ॥ भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम् ॥ हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ॥ ७ ॥ रम्यकं चोत्तरं वर्षं तथैवान्यद्धिरण्यकम् ॥ उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ ८ ॥ नवसाहस्रमेकैकमेतेषां मुनिसत्तम ॥ इलावृतं च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः ॥ ९ ॥ मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् ॥ इलावृतं महाभाग चत्वारश्चात्र पर्वताः ॥ १० ॥ विष्कम्भा रचिता मेरोर्योजनायुतविस्तृताः ॥ पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः ॥ ११ ॥ विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥ कदंबस्तेषु जंबूश्च पिप्पलो वट एव च ॥ १२ ॥ एकादश शतायामाः पादपा

गारकतवः ॥ जंबूद्वीपेति संज्ञा स्यात्फलं जम्ब्वा गजोपमम् ॥ १३ ॥ जंबूनदीरसेनास्यास्त्विदं जांबूनदं परम् ॥ सुपार्श्वः पूर्वतो मेरोः केतुमालस्तु पश्चिमे ॥ १४ ॥ वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनः ॥ वैभ्राजं पश्चिमे सौम्ये नन्दनं च सरांस्यथ ॥ १५ ॥ अरुणोदं महाभद्रं शीतोदं मानसं तथा ॥ सितांभश्चक्रमुञ्जायाः पूर्वतः केशराचलाः ॥ १६ ॥ दक्षिणेऽद्रेस्त्रिकूटाद्याः शिशिवासमुखा जले ॥ शंखकूटादयः सौम्ये मेरौ च ब्रह्मणः पुरी ॥ १७ ॥ चतुर्दशसहस्राणि योजनानां च दिक्षु च ॥ इन्द्रादिलोकपालानां समन्ताद्ब्रह्मणः पुरः ॥ १८ ॥ विष्णुपादात्प्लावयित्वा चन्द्रं स्वर्गात्पतन्त्यपि ॥ पूर्वेण शीता भद्राश्वाच्छैलाच्छैलाद्गतार्णवम् ॥ १९ ॥ तथैवालकनन्दापि दक्षिणेनैव भारतम् ॥ प्रयाति सागरं कृत्वा सप्तभेदाथ पश्चिमम् ॥ २० ॥ अब्धिं च चक्षुःसौम्याब्धिं भद्रोत्तरकुरूनपि ॥ आनीलनिषधायामौ माल्यवद्गन्धमादनौ ॥ २१ ॥ तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥ भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ॥ २२ ॥ पत्राणि लोकपद्मस्य मर्य्यादाशैलबाह्यतः ॥ जठरो देवकूटश्च मर्य्यादापर्वतावुभौ ॥ २३ ॥ तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥ गन्धमादनकैलासौ पूर्ववच्चायतावुभौ ॥ ॥ २४ ॥ अशीतियोजनायामावर्णवान्तर्व्यवस्थितौ ॥ निषधः पारियात्रश्च मर्य्यादापर्वतावुभौ ॥ २५ ॥ मेरोः पश्चिमदिग्भागे यथा पूर्वे तथा स्थितौ ॥ त्रिशृंगो रुधिरश्चैवं उत्तरौ वर्षपर्वतौ ॥ २६ ॥ पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥ जाठराद्याश्च मर्य्यादाशैला मेरोश्चतुर्दिशम् ॥ २७ ॥ केसरादिषु या द्रोण्यस्तासु सन्ति पुराणि हि ॥ लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम ॥ २८ ॥ भौमानां स्वर्गधर्माणां न पापास्तत्र यान्ति च ॥ भद्राश्वेऽस्ति हयग्रीवो वराहः केतुमालके ॥ २९ ॥ भारते कूर्मरूपी च मत्स्यरूपः कुरुष्वपि ॥ विश्वरूपेण सर्वत्र पूज्यते भगवान्हरिः ॥ ३० ॥ किम्पुरुषाद्यष्टसु क्षुद्रीतिशोकादिकं न च ॥ चतुर्विंशतिसाहस्रं प्रजा जीवन्त्यनामयाः ॥ ३१ ॥ कृतादिकल्पना नास्ति भौमान्यंभासि नांबुदाः ॥ सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ॥ ३२ ॥ नद्यश्च शतशस्तेभ्यस्तीर्थभूताः प्रजज्ञिरे ॥ भारते यानि तीर्थानि तानि तीर्थानि वच्मि ते ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेये भुवनकोशनिरूपणं नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥ अथ तीर्थयात्रामाहात्म्यम् ॥ अग्निरुवाच ॥

माहात्म्यं सर्वतीर्थानां वक्ष्ये यद्भुक्तिमुक्तिदम् ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ १ ॥ विद्या तपश्च कीर्तिश्च स तीर्थ-
फलमश्नुते ॥ प्रतिग्रहादुपावृत्तो लघ्वाहारो जितेन्द्रियः ॥ २ ॥ निष्पापस्तीर्थयात्री तु सर्वयज्ञफलं लभेत् ॥ अनुपोष्य त्रिरात्राणि
तीर्थान्यनभिगम्य च ॥ ३ ॥ अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते ॥ तीर्थाभिगमने तत्स्याद्यद्यज्ञेनाप्यते फलम् ॥ ४ ॥
पुष्करं परमं तीर्थं सान्निध्यं हि त्रिसन्ध्यकम् ॥ दशकोटिसहस्राणि तीर्थानां विप्र पुष्करे ॥ ५ ॥ ब्रह्मा सह सुरैरास्ते मुनयः
सर्वमिच्छवः ॥ देवाः प्राप्ताः सिद्धिमत्र स्नाताः पितृसुरार्च्चकाः ॥ ६ ॥ अश्वमेधफलं प्राप्य ब्रह्मलोकं प्रयान्ति ते ॥ कार्त्तिक्यामन्नदानाच्च
निर्म्मलो ब्रह्मलोकभाक् ॥ ७ ॥ पुष्करे दुष्करं गन्तुं पुष्करे दुष्करं तपः ॥ दुष्करं पुष्करे दानं वस्तुं चैव सुदुष्करम् ॥ ८ ॥
तत्र वासाज्जपाच्छ्राद्धात्कुलानां शतमुद्धरेत् । जम्बूमार्गश्च तत्रैव तीर्थं तण्डुलिकाश्रमम् ॥ ९ ॥ कण्वाश्रमं कोटितीर्थं नर्म्मदा
चार्बुदं परम् ॥ तीर्थं चर्म्मण्वती सिन्धुः सोमनाथः प्रभासकम् ॥ १० ॥ सरस्वत्यब्धिसङ्गश्च सागरं तीर्थमुत्तमम् ॥ पिण्डारकं
द्वारका च गोमती सर्वसिद्धिदा ॥ ११ ॥ भूमितीर्थं ब्रह्मतुङ्गं तीर्थं पञ्चनदं परम् ॥ भीमतीर्थं गिरीन्द्रं च देविका पापनाशिनी ॥ १२ ॥
तीर्थं विनशनं पुण्यं नागोद्भेदमघार्द्दनम् ॥ तीर्थं कुमारकोटिश्च सर्वदानीरितानि च ॥ १३ ॥ कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ॥
य एवं सततं ब्रूयात्सोऽमलः प्राप्नुयाद्दिवम् ॥ १४ ॥ तत्र विष्ण्वादयो देवास्तत्र वासाद्धरिं व्रजेत् ॥ सरस्वत्यां सन्निहि (ह) त्यां
स्नानकृद्ब्रह्मलोकभाक् ॥ १५ ॥ पांसवोऽपि कुरुक्षेत्रे नयन्ति परमां गतिम् ॥ धर्म्मतीर्थं सुवर्णाख्यं गङ्गाद्वारमनुत्तमम् ॥ १६ ॥
तीर्थं कनखलं पुण्यं भद्रकर्णह्रदं तथा ॥ गङ्गासरस्वतीसङ्गं ब्रह्मावर्त्तमघार्द्दनम् ॥ १७ ॥ भृगुतुङ्गं च कुब्जाम्रं गङ्गोद्भेदमघान्तकम् ॥
वाराणसी वरं तीर्थमविमुक्तमनुत्तमम् ॥ १८ ॥ कपालमोचनं तीर्थं तीर्थराजं प्रयागकम् ॥ गोमतीगङ्गयोः सङ्गं गङ्गा सर्वत्र नाकदा ॥
॥ १९ ॥ तीर्थं राजगृहं पुण्यं शालग्राममघान्तकम् ॥ वटेशं वामनं तीर्थं कालिकासङ्गमुत्तमम् ॥ २० ॥ लौहित्यं करतोयाख्यं शोणं
चार्थर्षभं परम् ॥ श्रीपर्वतं कोल्वगिरिं सह्याद्रिर्म्मलयो गिरिः ॥ २१ ॥ गोदावरी तुङ्गभद्रा कावेरी वरदा नदी ॥ तापी पयोष्णी रेवा च
दण्डकारण्यमुत्तमम् ॥ २२ ॥ कालञ्जरं मुञ्जवटं तीर्थं सूर्पारकं परम् ॥ मन्दाकिनी चित्रकूटं शृङ्गवेरपुरं परम् ॥ २३ ॥

अवन्ती परमं तीर्थमयोध्या पापनाशिनी ॥ नैमिषं परमं तीर्थं भुक्तिमुक्तिप्रदायकम् ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये तीर्थयात्रा-
माहात्म्यं नाम नवाधिकशततमोऽध्यायः ॥ १०९ ॥ अथ गङ्गामाहात्म्यम् ॥ अग्निरुवाच ॥ गङ्गामाहात्म्यमाख्यास्ये सेव्या
सा भुक्तिमुक्तिदा ॥ येषां मध्ये याति गङ्गा ते देशाः पावना वराः ॥ १ ॥ गतिर्गङ्गा तु भूतानां गतिमन्वेषतां सदा ॥ गङ्गा
तारयते चोभौ वंशौ नित्यं हि सेविता ॥ २ ॥ चान्द्रायणसहस्राच्च गङ्गाम्भःपानमुत्तमम् ॥ गङ्गां मासं तु
संसेव्य सर्वयज्ञफलं लभेत् ॥ ३ ॥ सकलाघहरी देवी स्वर्गलोकप्रदायिनी ॥ यावदस्थि च गङ्गायां तावत्स्वर्गे स तिष्ठति
॥ ४ ॥ अन्धादयस्तु तां सेव्य देवैर्गच्छन्ति तुल्यताम् ॥ गङ्गातीर्थसमुद्भूतमृद्धारी सोऽघहार्कवत् ॥ ५ ॥ दर्शनात्स्पर्शनात्पा-
नात्तथा गङ्गेतिकीर्त्तनात् ॥ पुनाति पुण्यपुरुषाञ्छतशोऽथ सहस्रशः ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये गङ्गामाहात्म्यं नाम
दशाऽधिकशततमोऽध्यायः ॥ ११० ॥ अथ प्रयागमाहात्म्यम् ॥ अग्निरुवाच ॥ वक्ष्ये प्रयागमाहात्म्यं भुक्तिमुक्तिप्रदं परम् ॥
प्रयागे ब्रह्मविष्ण्वाद्या देवा मुनिवराः स्थिताः ॥ १ ॥ सरितः सागराः सिद्धा गन्धर्वाप्सरसस्तथा ॥ तत्र त्रीण्यग्निकुण्डानि
तेषां मध्ये तु जाह्नवी ॥ २ ॥ वेगेन समतिक्रान्ता सर्वतीर्थपुरस्कृता ॥ तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता ॥ ३ ॥ गङ्गाय-
मुनयोर्म्मध्यं पृथिव्या जघनं स्मृतम् ॥ प्रयागं जघनस्यान्तरुपस्थमृषयो विदुः ॥ ४ ॥ प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ ॥
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः ॥ ५ ॥ तत्र वेदाश्च यज्ञाश्च मूर्तिमन्तः प्रयागके ॥ स्तवनादस्य तीर्थस्य नामसङ्की-
र्त्तनादपि ॥ ६ ॥ मृत्तिकालम्भनाद्वापि सर्वपापैः प्रमुच्यते ॥ प्रयागे संगमे दानं श्राद्धं जप्यादि चाक्षयम् ॥ ७ ॥ न वेदवचना-
द्विप्र न लोकवचनादपि ॥ मतिरुत्क्रमणीयाऽन्ते प्रयागे मरणं प्रति ॥ ८ ॥ दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः ॥ तेषां
सान्निध्यमत्रैव प्रयागं परमं ततः ॥ ९ ॥ वासुकेर्भोगवत्यत्र हंसप्रपतनं परम् ॥ गवां कोटिप्रदानाद्यत्फलं स्नानस्य तत्फलम्
॥ १० ॥ प्रयागे माघमासे तु एवमाहुर्म्मनीषिणः ॥ सर्वत्र सुलभा गंगा त्रिषु स्थानेषु दुर्लभा ॥ ११ ॥ गङ्गाद्वारे प्रयागे च
गङ्गासागरसङ्गमे ॥ अत्र दानादिवं याति राजेन्द्रो जायतेऽत्र च ॥ १२ ॥ वटमूले सङ्गमादौ मृतो विष्णुपुरीं व्रजेत् ॥ उर्वशीपुलिनं रम्यं

तीर्थं सन्ध्यावटस्तथा ॥ १३ ॥ कोटितीर्थं चाश्वमेधं गङ्गायमुनमुत्तमम् ॥ मानसं रजसा हीनं तीर्थं वासरकं परम् ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये प्रयागमाहात्म्यं नाम एकादशाऽधिकशततमोऽध्यायः ॥ १११ ॥ अथ वाराणसीमाहात्म्यम् ॥ अग्निरुवाच ॥ वाराणसी परं तीर्थं गौर्य्यै प्राह महेश्वरः ॥ भुक्तिमुक्तिप्रदं पुण्यं वसतां गृणतां हरिम् ॥ १ ॥ रुद्र उवाच ॥ गौरि क्षेत्रं न मुक्तं वै अविमुक्तं ततः स्मृतम् ॥ जप्तं तप्तं हुतं दत्तमविमुक्ते किलाक्षयम् ॥ २ ॥ अश्मना चरणौ हत्वा वसेत्काशीं न हि त्यजेत् ॥ हरिश्चन्द्रं परं गुह्यं गुह्यमाप्रातकेश्वरम् ॥ ३ ॥ जप्येश्वरं परं गुह्यं गुह्यं श्रीपर्वतं तथा ॥ महालयं परं गुह्यं भृगुश्च (भूमिच) ण्डेश्वरं तथा ॥ ४ ॥ केदारं परमं गुह्यमष्टौ सन्त्यविमुक्तके ॥ गुह्यानां परमं गुह्यमविमुक्तं परं मम ॥ ५ ॥ द्वियोजनं तु पूर्वं स्याद्योजनार्द्धं तदन्यथा ॥ वरणा च नदी चासीन्मध्ये वाराणसी तयोः ॥ ६ ॥ अत्र स्नानं जपो होमो मरणं देवपूजनम् ॥ श्राद्धं दानं निवासश्च यद्यत्स्याद्भुक्तिमुक्तिदम् ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये वाराणसीमाहात्म्यं नाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ अथ नर्मदादिमाहात्म्यम् ॥ अग्निरुवाच ॥ नर्मदादिकमाहात्म्यं वक्ष्येहं नर्मदां पराम् ॥ सद्यः पुनाति गाङ्गेयं दर्शनाद्धारि नार्म्मदम् ॥ १ ॥ विस्ताद्योजनशतं योजनद्वयमायता ॥ षष्टिस्तीर्थसहस्राणि षष्टिकोट्यस्तथापराः ॥ २ ॥ पर्वतस्यं समन्तात्तु तिष्ठन्त्यमरकण्टके ॥ कावेरीसङ्गमं पुण्यं श्रीपर्वतमतः शृणु ॥ ३ ॥ गौरी श्रीरूपिणी तेपे तपस्तामब्रवीद्धरिः ॥ अवाप्स्यसि त्वमध्यात्मनाम्ना श्रीपर्वतस्तव ॥ ४ ॥ समन्ताद्योजनशतं महापुण्यं भविष्यति ॥ अत्र दानं तपो जप्यं श्राद्धं सर्वमथाक्षयम् ॥ ५ ॥ मरणं शिवलोकाय सर्वदं तीर्थमुत्तमम् ॥ हरोऽत्र क्रीडते देव्या हिरण्यकशिपुस्तथा ॥ तपस्तप्त्वा बली चाभून्मुनयः सिद्धिमाप्नुवन् ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये नर्मदाश्रीपर्वतादिमाहात्म्यं नाम त्रयोदशाऽधिकशततमोऽध्यायः ॥ ११३ ॥ अथ गयामाहात्म्यम् ॥ अग्निरुवाच ॥ गयामाहात्म्यमाख्यास्ये गयातीर्थोत्तमोत्तमम् ॥ गयासुरस्तपस्तेपे तत्तपस्तापिभिः सुरैः ॥ १ ॥ उक्तः क्षीराब्धिगो विष्णुः पालयास्मान्गयासुरात् ॥ तथेत्युक्त्वा हरिर्दैत्यं वरं ब्रूहीति चाब्रवीत् ॥ २ ॥ दैत्योऽब्रवीत्पवित्रोऽहं भवेयं सर्वतीर्थतः ॥ तथेत्युक्त्वा गतो विष्णुर्दैत्यं दृष्ट्वा न वा हरिम् ॥ ३ ॥ गताः शून्या मही स्वर्गे देवा ब्रह्मादयः सुराः ॥ गता ऊचुर्हरिं देवाः शून्या भूस्त्रिदिवं हरे ॥ ४ ॥ दैत्यस्य दर्शनादेव ब्रह्माणं चाब्रवीद्धरिः ॥ यागार्थं दैत्यदेहं त्वं

प्रार्थय त्रिदशैः सह ॥ ५ ॥ तच्छ्रुत्वा ससुरो ब्रह्मा गयासुरमथाब्रवीत् ॥ अतिथिः प्रार्थयामि त्वां देहं यागाय पावनम् ॥ ६ ॥ गयासुरस्तथेत्युक्त्वापतत्तस्य शिरस्यथ ॥ यागं चकार चलिते देहि पूर्णाहुतिं विभुः ॥ ७ ॥ पुनर्ब्रह्माब्रवीद्विष्णुं पूर्णकालेऽसुरोऽचलत् ॥ विष्णु र्धर्ममथाहूय प्राह देवमयीं शिलाम् ॥ ८ ॥ धारयध्वं सुराः सर्वे यस्यामुपरि सन्तु ते ॥ गदाधरो मदीयाथ मूर्त्तिः स्थास्यति सामरैः ॥ ९ ॥ धर्मः शिलां देवमयीं तच्छ्रुत्वाऽधारयत्पराम् ॥ या धर्माद्धर्मवत्यां च जाता धर्मव्रता सुता ॥ १० ॥ मरीचिर्ब्रह्मणः पुत्रस्तामुवाह तपोन्विताम् ॥ यथा हरिः श्रिया रेमे गौर्य्या शम्भुस्तथा तया ॥ ११ ॥ कुशपुष्पाद्यरण्याच्च ह्यानीयातिश्रमान्वितः ॥ भुक्त्वा धर्मव्रतां प्राह पादसंवाहनं कुरु ॥ १२ ॥ विश्रान्तस्य मुनेः पादौ तथेत्युक्त्वा प्रियाकरोत् ॥ एतस्मिन्नन्तरे ब्रह्मा मुनौ सुप्ते तथाऽऽगतः ॥ १३ ॥ धर्मव्रतांचिन्तयच्च किं ब्रह्माणं समर्च्चये ॥ पादसंवाहनं कुर्वे ब्रह्मा पूज्यो गुरोर्गुरुः ॥ १४ ॥ विचिन्त्य पूजयामास ब्रह्माणं चार्हणादिभिः ॥ मरीचिस्तामपश्यत्स शशापोक्तिव्यतिक्रमात् ॥ १५ ॥ शिला भविष्यसि क्रोधाद्धर्मव्रताऽब्रवीच्च तम् ॥ पादाभ्यङ्गं परित्यज्य त्वद्गुरुः पूजितो मया ॥ १६ ॥ अदोषाहं यतस्त्वं हि शापं प्राप्स्यसि शङ्करात् ॥ धर्मव्रता पृथक् शापं धारयित्वाग्निमध्यगात् ॥ १७ ॥ तपश्चचार वर्षाणां सहस्राण्ययुतानि च ॥ ततो विष्ण्वादयो देवा वरं ब्रूहीति चाब्रुवन् ॥ १८ ॥ धर्मव्रताऽब्रवीद्देवाञ्छापं निर्वर्त्तयन्तु मे ॥ देवा ऊचुः ॥ दत्तो मरीचिना शापो भविष्यति न चान्यथा ॥ १९ ॥ शिला पवित्रा देवाङ्घ्रिलक्षिता त्वं भविष्यसि ॥ देवव्रता देवशिला सर्वदेवादिरूपिणी ॥ २० ॥ सर्वदेवमयी पुण्या निश्चला यासुरस्य हि ॥ देवव्रतोवाच ॥ यदि तुष्टाः स्थ मे सर्वे मयि तिष्ठन्तु सर्वदा ॥ २१ ॥ ब्रह्मा विष्णुश्च रुद्राद्या गौरीलक्ष्मीमुखाः सुराः ॥ अग्निरुवाच ॥ देवव्रतावचः श्रुत्वा तथेत्युक्त्वा दिवं गताः ॥ २२ ॥ सा धर्मेणासुरस्यास्य धृता देवमयी शिला ॥ साशिलश्चालितो दैत्यः स्थिता रुद्रादयस्ततः ॥ २३ ॥ सदेवश्चालितो दैत्यस्ततो देवैः प्रसादितः ॥ क्षीराब्धिगो हरिः प्रादात्स्वमूर्त्तिं श्रीगदाधरम् ॥ २४ ॥ गच्छन्तु भोः स्वयं यास्यो मूर्त्त्या वै देवगम्यया ॥ स्थितो गदाधरो देवो व्यक्ताव्यक्तोभयात्मकः ॥ २५ ॥ निश्चलार्थं स्वयं देवः स्थित आदिगदाधरः ॥ गदो नामासुरो दैत्यः स हतो विष्णुना पुरा ॥ २६ ॥ तदास्थिनिर्मिता चाद्या गदा या विश्वकर्मणा ॥ आद्यया गदया हेतिप्रमुखा राक्षसा हताः ॥ २७ ॥ गदाधरेण विधिवत्तस्मादादिगदाधरः ॥ देवमय्यां शिलायां च स्थिते चादिगदाधरे ॥ २८ ॥

गयासुरे निश्चलेऽथ ब्रह्मा पूर्णाहुतिं ददौ ॥ गयासुरोऽब्रवीद्देवान्किमर्थं वञ्चितो ह्यहम् ॥२९॥ विष्णोर्वचनमात्रेण किं न स्यां निश्चलो ह्यहम् ॥ आक्रान्तो यद्यहं देवा दातुमर्हत मे वरम् ॥ ३० ॥ देवा ऊचुः ॥ तीर्थस्य करणे यत्त्वमस्माभिर्निश्चलीकृतः ॥ विष्णुः शम्भोर्ब्रह्मणश्च क्षेत्रं तव भविष्यति ॥ ३१ ॥ प्रसिद्धं सर्वतीर्थेभ्यः पित्रादेर्ब्रह्मलोकदम् ॥ इत्युक्त्वा ते स्थिता देवा देव्यस्तीर्थादयः स्थिताः ॥ ३२ ॥ यागं कृत्वा ददौ ब्रह्मा ऋत्विग्भ्यो दक्षिणां तदा ॥ पञ्चक्रोशं गयाक्षेत्रं पञ्चाशत्पञ्च चार्पयेत् ॥ ३३ ॥ ग्रामान्स्वर्णगिरीन्कृत्वा नदीर्दुग्धमधुस्रवाः ॥ सरोवराणि दध्याज्यैर्बहून्नाद्रिपर्वतान् ॥ ३४ ॥ कामधेनुं कल्पतरुं स्वर्णरूप्यगृहाणि च ॥ न याचयन्तु विप्रेन्द्राअल्पानुक्त्वा ददौ प्रभुः ॥ ३५ ॥ धर्मयागे प्रलोभात्तु प्रतिगृह्य धनादिकम् ॥ स्थिता यदा गयायां ते शप्तास्ते ब्रह्मणा तदा ॥ ३६ ॥ विद्याविवर्जिता यूयं तृष्णायुक्ता भविष्यथ ॥ दुग्धादिवर्जिता नद्यः शैलाः पाषाणरूपिणः ॥३७॥ ब्रह्माणं ब्राह्मणाश्चोचुर्न्नष्टं शापेन चाखिलम् ॥ जीवनाय प्रसादं नः कुरु विप्रांश्च सोऽब्रवीत् ॥ ३८ ॥ तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥ ये युष्मान्पूजयिष्यन्ति गयायामागता नराः ॥ ३९ ॥ इव्यकव्यैर्धनैः श्राद्धैस्तेषां कुलशतं व्रजेत् ॥ नरकात्स्वर्गलोकाय स्वर्गलोकात्परां गतिम् ॥ ४० ॥ गयोऽपि चाकरोद्यागं बह्वन्नं बहुदक्षिणम् ॥ गया पुरी तेन नाम्ना पाण्डवा ईजिरे हरिम् ॥४१॥ इत्यादिमहापुराणे आग्नेये गयामाहात्म्यं नाम चतुर्दशाधिकशततमोऽध्यायः ॥११४॥ अथ गयायात्राविधिः ॥ अग्निरुवाच ॥ उद्यतश्चेद्गयां यातुं श्राद्धं कृत्वा विधानतः ॥ विधाय कार्पटीवेषं ग्रामस्यापि प्रदक्षिणम् ॥ १ ॥ कृत्वा प्रतिदिनं गच्छेत्संयतश्चाप्रतिग्रही ॥ गृहाच्चलितमात्रस्य गयाया गमनं प्रति ॥ २ ॥ स्वर्गारोहणसोपानं पितॄणां तु पदे पदे ॥ ब्रह्मज्ञानेन किं कार्य्यं गोगृहे मरणेन किम् ॥३॥ किं कुरुक्षेत्रवासेन यदा पुत्रो गयां व्रजेत् ॥ गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् ॥४॥ पद्भ्यामपि जलं स्पृष्ट्वा अस्मभ्यं किं न दास्यति ॥ ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ॥५॥ वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥ कांक्षन्ति पितरः पुत्रं नरकाद्भयभीरवः ॥ ६ ॥ गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ॥ मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ ७ ॥ न कालादिर्गयातीर्थे दद्यात्पिण्डांश्च नित्यशः ॥ पक्षत्रयनिवासी च पुनात्यासप्तमं कुलम् ॥ ८ ॥ अष्टकासु च वृद्धौ च गयायां मृतवासरे ॥ अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥ ९ ॥ पित्रादिनवदैवत्यं तथा द्वादशदैवतम् ॥ प्रथमे दिवसे

स्नायात्तीर्थे ह्युत्तरमानसे ॥ १० ॥ उत्तरे मानसे पुण्ये आयुरारोग्यवृद्धये ॥ सर्वापापविघाताय स्नानं कुर्य्याद्विमुक्तये ॥ ११ ॥ सन्तर्प्य देवपित्रादीन्श्राद्धकृत्पिण्डदो भवेत् ॥ दिव्यान्तरिक्षभौमस्थान्देवान्सन्तर्पयाम्यहम् ॥ १२ ॥ दिव्यान्तरिक्षभौमादि पितृमात्रादि तर्पयेत् ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ १३ ॥ माता पितामही चैव तथैव प्रपितामही ॥ मातामहः प्रमातामहो वृद्धप्रमातामहः ॥ १४ ॥ तेभ्योऽन्येभ्य इमान्पिण्डानुद्धाराय ददाम्यहम् ॥ ओं नमः सूर्य्यदेवाय सोमभौमेज्ञरूपिणे ॥ १५ ॥ जीवशुक्रशनैश्चारिराहुकेतुस्वरूपिणे । उत्तरे मानसे स्नात उद्धरेत्सकलं कुलम् ॥ १६ ॥ सूर्य्य नत्वा व्रजेन्मौनी नरो दक्षिणमानसम् ॥ दक्षिणे मानसे स्नानं करोमि पितृतृप्तये ॥ १७ ॥ गयायामागतः स्वर्गं यान्तु मे पितरोऽखिलाः । श्राद्धं पिण्डं ततः कृत्वा सूर्य्य नत्वा वदेदिदम् ॥ १८ ॥ ओं नमो भानवे भर्त्रे भवाय भव मे विभो ॥ भुक्तिमुक्तिप्रदः सर्वपितृणां भवभावितः ॥ १९ ॥ कव्यवाहोऽनलः सोमो यमश्चैवार्य्यमा तथा ॥ अग्निष्वात्ता बर्हिषद आज्यपाः पितृदेवताः ॥ २० ॥ आगच्छन्तु महाभागा युष्माभी रक्षितास्त्विह ॥ मदीयाः पितरो ये च मातृमातामहादयः ॥ २१ ॥ तेषां पिंण्डप्रदाताहमागतोऽस्मि गयामिमाम् ॥ उदीच्यां मुण्डपृष्ठस्य देवर्षिगणपूजितम् ॥ २२ ॥ नाम्ना कनखलं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ सिद्धानां प्रीतिजननैः पापानां च भयङ्करैः ॥ २३ ॥ लेलिहानैर्महानागै रक्ष्यते चैव नित्यशः ॥ तत्र स्नात्वा दिवं यान्ति क्रीडन्ते भुवि मानवाः ॥ २४ ॥ फल्गुतीर्थं ततो गच्छेन्महानद्यां स्थितं परम् ॥ नागाज्जनार्दनात्कूपाद्वटाच्चोत्तरमानसात् ॥ २५ ॥ एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥ मुण्डपृष्ठनगाद्यांश्च सारात्सारमथान्तरम् ॥ २६ ॥ यस्मिन्फलति श्रीर्गौर्वा कामधेनुर्जलं मही ॥ दृष्टिरग्यादिकं यस्मात्फल्गुतीर्थं न फल्गुवत् ॥ २७ ॥ फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम्॥ एतेन किं न पर्य्याप्तं नृणां सुकृतकारिणाम् ॥ २८ ॥ पृथिव्यां यानि तीर्थानि आसमुद्रात्सरांसि च ॥ फल्गुतीर्थं गमिष्यन्ति वारमेकं दिने दिने ॥ २९ ॥ फल्गुतीर्थे तीर्थराजे करोति स्नानमादृतः ॥ पितॄणां ब्रह्मलोकाप्त्यै आत्मनो भुक्तिमुक्तये ॥ ३० ॥ स्नात्वा श्राद्धी पिण्डदोऽथ नमेद्देवं पितामहम् ॥ कलौ माहेश्वरा लोका अत्र देवो गदाधरः ॥ ३१ ॥ पितामहो लिङ्गरूपी तन्नमामि महेश्वरम् ॥ गदाधरं बलं काममनिरुद्धं नरायणम् ॥ ३२ ॥ ब्रह्मविष्णुनृसिंहाख्यं वराहादिं नमाम्यहम् ॥ ततो

गदाधरं दृष्ट्वा कुलानां शतमुद्धरेत् ॥ ३३ ॥ धर्मारण्यं द्वितीयेऽह्नि मतङ्गस्याश्रमे वरे ॥ मतङ्गवाप्यां संस्नाय श्राद्ध-कृत्पिण्डदो भवेत् ॥ ३४ ॥ मतङ्गेशं सुसिद्धेशं नत्वा चेदमुदीरयेत् ॥ प्रमाणं देवताः सन्तु लोकपालाश्च साक्षिणः ॥ ३५ ॥ मयागत्य मतङ्गेऽस्मिन्पितॄणां निष्कृतिः कृता ॥ स्नानतर्पणश्राद्धादिर्ब्रह्मतीर्थेऽथ कूपके ॥ ३६ ॥ तत्कूपयूपयोर्मध्ये श्राद्धं कुलशतोद्धरौ ॥ महाबोधतरुं नत्वा धर्मवान्स्वर्गलोकभाक् ॥ ३७ ॥ तृतीये ब्रह्मसरसि स्नानं कुर्य्याद्यतव्रतः ॥ स्नानं ब्रह्मसरस्तीर्थं करोमि ब्रह्मभूतये ॥ ३८ ॥ पितॄणां ब्रह्मलोकाय ब्रह्मर्षिगणसेविते ॥ तर्पणं श्राद्धकृत्पिण्डं प्रदद्यात्तु प्रसेचनम् ॥ कुर्य्याच्च वाजपेयार्थी ब्रह्मयूपंप्रदक्षिणम् ॥ ३९ ॥ एको मुनिः कुम्भकुशाग्रहस्त आम्रस्य मूले सलिलं ददाति ॥ आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥ ४० ॥ ब्रह्माण च नमस्कृत्य कुलानां शतमुद्धरेत् ॥ फल्गुतीर्थे चतुर्थेऽह्नि स्नात्वा देवादितर्पणम् ॥ ॥ ४१ ॥ कृत्वा श्राद्धं सपिण्डं च गयाशिरसि कारयेत् ॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ ४२ ॥ तत्र पिण्डप्रदानेन कुलानां शतमुद्धरेत् ॥ मुण्डपृष्ठे पदं न्यस्तं महादेवेन धीमता ॥ ४३ ॥ मुण्डपृष्ठे शिरः साक्षाद्गयाशिर उदाहृतम् ॥ साक्षाद्गयाशिरस्तत्र फल्गुतीर्थाश्रमं कृतम् ॥ ४४ ॥ अमृतं तत्र वहति पितॄणां दत्तमक्षयम् ॥ स्नात्वा दशाश्वमेधे तु दृष्ट्वा देवं पितामहम् ॥ ४५ ॥ रुद्रपादं नरः स्पृष्ट्वा नेह भूयोऽभिजायते ॥ शमीपत्रप्रमाणेन पिण्डं दत्त्वा गयाशिरे ॥ ४६ ॥ नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥ पायसेनाथ पिष्टेन सक्तुना चरुणा तथा ॥ ४७ ॥ पिण्डदानं तण्डुलैश्च गोधूमैस्तिलमिश्रितैः ॥ पिण्डं दत्त्वा रुद्रपदे कुलानां शतमुद्धरेत् ॥ ॥ ४८ ॥ तथा विष्णुपदे श्राद्धपिण्डदो ह्यृणमुक्तिकृत् ॥ पित्रादीनां शतकुलं स्वात्मानं तारयेन्नरः ॥ ४९ ॥ तथा ब्रह्मपदे श्राद्धी ब्रह्मलोकं नयेत्पितॄन् ॥ दक्षिणाग्निपदे तद्वद्गार्हपत्यपदे तथा ॥ ५० ॥ पदे वाऽऽहवनीयस्य श्राद्धी यज्ञफलं लभेत् ॥ आवसथ्यस्य चन्द्रस्य सूर्यस्य च गणस्य च ॥ ५१ ॥ अगस्त्यकार्त्तिकेस्य श्राद्धी तारयते कुलम् ॥ आदित्यस्य रथं नत्वा कर्णादित्यं नमेन्नरः ॥ ५२ ॥ कनकेशपदं नत्वा गयाकेदारकं नमेत् ॥ सर्वपापविनिर्मुक्तः पितॄन्ब्रह्मपुरं नयेत् ॥ ५३ ॥ विशालोऽपि गयाशीर्षे पिण्ड-दोऽभूच्च पुत्रवान् ॥ विशालायां विशालोऽभूद्राजपुत्रोऽब्रवीद्द्विजान् ॥ ५४ ॥ कथं पुत्रादयः स्युर्मे द्विजा ऊचुर्विशालकम् ॥ गयायां

पिण्डदानेन तव सर्वं भविष्यति ॥ ५५ ॥ विशालोऽपि गयाशीर्षे पितृपिण्डान्ददौ ततः ॥ दृष्ट्वाकाशे सितं रक्तं पुरुषांस्तांश्च पृष्टवान् ॥ ५६ ॥ के यूयं तेषु चैवैकः सितः प्रोचे विशालकम् ॥ अहं सितस्ते जनक इन्द्रलोकं गतः शुभात् ॥ ५७ ॥ मम रक्तः पिता पुत्र कृष्णश्चैव पितामहः ॥ अब्रवीन्नरकं प्राप्तास्त्वया मुक्तीकृता वयम् ॥ ५८ ॥ पिण्डदानाद्ब्रह्मलोकं व्रजाम इति ते गताः ॥ विशालः प्राप्तपुत्रादिः राज्यं कृत्वा हरिं ययौ ॥ ५९ ॥ प्रेतराजः स्वमुक्त्यै च वणिजं चेदमब्रवीत् ॥ प्रेतैः सर्वैः सहार्तः सन्सुकृतं भुज्यते फलम् ॥ ६० ॥ श्रवणद्वादशीयोगे कुम्भः सान्नश्च सोदकः ॥ दत्तः पुरा स मध्याह्ने जीवनायोपतिष्ठते ॥ ६१ ॥ धनं गृहीत्वा मे गच्छ गयायां पिण्डदो भव ॥ वणिग्धनं गृहीत्वा तु गयायां पिण्डदोऽभवत् ॥ ६२ ॥ प्रेतराजः सह प्रेतैर्मुक्तो नीतो हरेः पुरम् ॥ गयाशीर्षे पिण्डदानादात्मानं स्वापितॄंस्तथा ॥ ६३ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥ ६४ ॥ ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥ ६५ ॥ विरूपा आमगर्भा ये ज्ञाताज्ञाताः कुले मम ॥ तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ६६ ॥ ये केचित्प्रेतरूपेण तिष्ठन्ति पितरो मम ॥ ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा ॥ ६७ ॥ पिण्डो देयस्तु सर्वेभ्यः सर्ववै कुलतारकैः ॥ आत्मनस्तु तथा देयो ह्यक्षयं लोकमिच्छता ॥ ६८ ॥ पञ्चमेऽह्नि गदालोले स्नायान्मन्त्रेण बुद्धिमान् ॥ गदाप्रक्षालने तीर्थे गदालोलेऽतिपावने ॥ ६९ ॥ स्नानं करोमि संसारगदशान्त्यै जनार्दन ॥ नमोऽक्षयवटायैव अक्षयस्वर्गदायिने ॥ ७० ॥ पित्रादीनामक्षयाय सर्वपापक्षयाय च ॥ श्राद्धं वटतले कुर्य्याद्ब्राह्मणानां च भोजनम् ॥ ७१ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ किम्पुनर्बहुभिर्भुक्तैः पितॄणां दत्तमक्षयम् ॥ ७२ ॥ गयायामन्नदाता यः पितरस्तेन पुत्रिणः ॥ वटं वटेश्वरं नत्वा पूजयेत्प्रपितामहम् ॥ ॥ ७३ ॥ अक्षयाँल्लभते लोकान्कुलानां शतमुद्धरेत् ॥ क्रमतोऽक्रमतो वापि गयायात्रा महाफला ॥ ७४ ॥ इत्यादिमहापुराणे आग्नेये गयामाहात्म्ये गयायात्रा नाम पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

तदेव ॥ अग्निरुवाच ॥ गायत्र्यैव महानद्यां स्नातः सन्ध्यां समाचरेत् ॥ गायत्र्या अग्रतः प्रातः श्राद्धपिण्डमथाक्षयम् ॥ १ ॥ मध्याह्ने चोद्यति स्नात्वा गीतवाद्यैर्ह्युपास्य च ॥ सावित्रीपुरतः सन्ध्यां पिण्डदानं च तत्पदे ॥ २ ॥ अगस्त्यस्य पदे कुर्य्याद्योनिद्वारं प्रविश्य च ॥

निर्गतो न पुनर्योनिं प्रविशेन्मुच्यते भवात् ॥ ३ ॥ बलिं काकशिलायां च कुमारं च नमेत्ततः ॥ स्वर्गद्वार्य्यां सोमकुण्डे वायुतीर्थेऽथ पिण्डदः ॥ ४ ॥ भवेदाकाशगङ्गायां कपिलायां च पिण्डदः ॥ कपिलेशं शिवं नत्वा रुक्मिकुण्डे च पिण्डदः ॥ ५ ॥ कोटीतीर्थे च कोटीशं नत्वामोघपदे नरः ॥ गदालोले वानरके गोप्रचारे च पिण्डदः ॥ ६ ॥ नत्वा. गावं वैतरण्यामेकविंशकुलोद्धृतिः ॥ श्राद्धपिण्डप्रदाता स्यात्क्रौञ्चपादे च पिण्डदः ॥ ७ ॥ तृतीयायां विशालायां निश्चिरायां च पिण्डदः ॥ ऋणमोक्षे पापमोक्षे भस्मकुण्डेऽथ भस्मना ॥ ८ ॥ स्नानकृन्मुच्यते पापान्नमेदेवं जनार्दनम् ॥ एष पिण्डो मया दत्तस्तव हस्ते जनार्दन ॥ ९ ॥ परलोकगते मह्यमक्षय्यमुपतिष्ठताम् ॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ १० ॥ तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते वै ऋणत्रयात् ॥ मार्कण्डेयेश्वरं नत्वा नमेद्वृषेश्वरं नरः ॥ ११ ॥ मूलक्षेत्रे महेशस्य धारायां पिण्डदो भवेत् ॥ गृध्रकूटे गृध्रवटे धौतपादे च पिण्डदः ॥ १२ ॥ पुष्करिण्यां कर्दमाले रामतीर्थे च पिण्डदः ॥ प्रभासेशं नमेत्प्रेतशिलायां पिण्डदो भवेत् ॥ १३ ॥ दिव्यान्तरिक्षभूमिष्ठाः पितरो बान्धवादयः ॥ प्रेतादिरूपा मुक्ताः स्युः पिण्डैर्दत्तैर्मयाखिलाः ॥ १४ ॥ स्थानत्रये प्रेतशिला गयाशिरसि पावनी ॥ प्रभासे प्रेतकुण्डे च पिण्डदस्तारयेत्कुलम् ॥ १५ ॥ वशिष्ठेशं नमस्कृत्य तदग्रे पिण्डदो भवेत् ॥ गयानाभौ सुषुम्णायां महाकोष्ठ्यां च पिण्डदः ॥ १६ ॥ गदाधराग्रतो मुण्डपृष्ठे देव्याश्च सन्निधौ ॥ मुण्डपृष्ठं नमेदादौ क्षेत्रपालादिसंयुतम् ॥ १७ ॥ पूजयित्वा भयं न स्याद्विषरोगादिनाशनम् ॥ ब्रह्माणं च नमस्कृत्य ब्रह्मलोकं नयेत्कुलम् ॥ १८ ॥ सुभद्रां बलभद्रं च प्रपूज्य पुरुषोत्तमम् ॥ सर्वकामसमायुक्तः कुलमुद्धृत्य नाकभाक् ॥ ॥ १९ ॥ हृषीकेशं नमस्कृत्य तदग्रे पिण्डदो भवेत् ॥ माधवं पूजयित्वा च देवो वैमानिको भवेत् ॥ २० ॥ महालक्ष्मीं प्राच्यं गौरीं मङ्गलां च सरस्वतीम् ॥ पितॄनुद्धृत्य स्वर्गस्थो भुक्तभोगोऽत्र शास्त्रधीः ॥ २१ ॥ द्वादशार्कादित्यमभ्यर्च्य वह्निं स्वेन्तामिन्द्रकम् ॥ रोगादिमुक्तः स्वर्गी स्याच्छ्रीकपर्दिविनायकम् ॥ २२ ॥ प्रपूज्य कार्त्तिकेयं च निर्विघ्नः सिद्धिमाप्नुयात् ॥ सोमनाथं च कालेशं केदारं प्रपितामहम् ॥ २३ ॥ सिद्धेश्वरं च रुद्रेशं रामेशं ब्रह्मकेश्वरम् ॥ अष्टलिङ्गानि गुह्यानि पूजयित्वा तु सर्वभाक् ॥ २४ ॥ नारायणं वराहं च नारसिंहं नमोच्छ्रिये ॥ ब्रह्मविष्णुमहेशाख्यं त्रिपुरघ्नमशेषदम् ॥ २५ ॥ सीतां रामं च गरुडं वामनं सम्प्रपूज्य च ॥ सर्वकामानवाप्नोति

ब्रह्मलोकं नयेत्पितॄन् ॥ २६ ॥ देवैः सार्द्धं सम्प्रपूज्य देवमादिगदाधरम् ॥ ऋणत्रयविनिर्मुक्तस्तारयेत्सकलं कुलम् ॥ २७ ॥ देवरूपा शिला पुण्या तस्मादेवमयी शिला ॥ गयायां न हि तत्स्थानं यत्र तीर्थं न विद्यते ॥ २८ ॥ यन्नाम्ना पातयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतम् ॥ फल्गवीशं फल्गुचण्डीं च प्रणम्याङ्गारकेश्वरम् ॥ २९ ॥ मतङ्गस्य पदे श्राद्धी भरताश्रमके भवेत् ॥ हंसतीर्थे कोटितीर्थे यत्र पाण्डुशिलान्नदः ॥ ३० ॥ तत्र स्यादग्निधारस्यां मधुस्रवसि पिण्डदः ॥ रुद्रेशं किलिकिलेशं नमेद्धादि विनायकम् ॥ ३१ ॥ पिण्डदो धेनुकारण्ये पदे धेनोर्नमेच्च गाम् ॥ सर्वान्पितॄंस्तारयेच्च सरस्वत्यां च पिण्डदः ॥ ३२ ॥ सन्ध्यामुपास्य सायाह्ने नमेद्देवीं सरस्वतीम् ॥ त्रिसन्ध्याकृद्धवेद्विप्रो वेदवेदाङ्गपारगः ॥ ३३ ॥ गयां प्रदक्षिणीकृत्य गयाविप्रान्प्रपूज्य च ॥ अन्नदानादिकं सर्वं कृतं तत्राक्षयं भवेत् ॥ ॥ ३४ ॥ स्तुत्वा सम्प्रार्थयेदेवमादिदेवं गदाधरम् ॥ गदाधरं गयावासं पित्रादीनां गतिप्रदम् ॥ ३५ ॥ धर्म्मार्थकाममोक्षार्थं योगदं प्रणमाम्यहम् ॥ देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् ॥ ३६ ॥ नित्यशुद्धं बुद्धियुक्तं सत्यं ब्रह्म नमाम्यहम् ॥ आनन्दमद्वयं देवं देवदानववन्दितम् ॥ ३७ ॥ देवदेवीवृन्दयुक्तं सर्वदा प्रणमाम्यहम् ॥ कलिकल्मषकालार्त्तिदमनं वनमालिनम् ॥ ३८ ॥ पालिताखिललोकेशं कुलोद्धरणमानसम् ॥ व्यक्ताव्यक्तविभक्तात्माविभक्तात्मानमात्मनि ॥ ३९ ॥ स्थितं स्थिरतरं सारं वन्दे घोराघमर्दनम् ॥ आगतोऽस्मि गयां देव पितृकार्य्ये गदाधर ॥ ४० ॥ त्वं मे साक्षीभवाद्येह अनृणोऽहमृणत्रयात् ॥ साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ॥ ॥ ४१ ॥ मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥ गयामाहात्म्यपठनाच्छ्राद्धादौ ब्रह्मलोकभाक् ॥ पितॄणामक्षयं श्राद्धमक्षयं ब्रह्मलोकदम् ॥ ४२ ॥ इत्यादिमहापुराणे आग्नेये गयामाहात्म्यं नाम षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ अथ श्राद्धकल्पः ॥ अग्निरुवाच ॥ कात्यायनो मुनीनाह यथा श्राद्धं तथा वदे ॥ श्राद्धं गयादौ कुर्वीत संक्रान्त्यादौ विशेषतः ॥ १ ॥ कालेवाऽपरपक्षे च चतुर्थ्यामूर्ध्वमेव वा ॥ सम्पाद्य च पदर्क्षे च पूर्वेद्युश्च निमन्त्रयेत् ॥ २ ॥ यतीन्गृहस्थसाधूंन्वा स्नातकाञ्छ्रोत्रियान्द्विजान् ॥ अनवद्यान्कर्म्मनिष्ठाञ्शिष्टानाचारसंयुतान् ॥ ३ ॥ वर्ज्जयेच्छ्वित्रिकुष्ठ्यादीन्न गृह्णीयान्निमन्त्रितान् ॥ स्नाताञ्छुचींस्तथा दान्तान्प्राङ्मुखान्देवकर्म्मणि ॥ ॥ ४ ॥ उपवेशयेत्त्रीन्पित्र्यादीनेकैकमुभयत्र वा ॥ एवं मातामहादेश्च शाकैरपि च कारयेत् ॥ ५ ॥ तदह्नि ब्रह्मचारी स्यादकोपोऽत्वरितो

मृदुः ॥ सत्योऽप्रमत्तोऽनध्वन्यो अस्वाध्यायश्च वाग्यतः ॥ ६ ॥ सर्वांश्च पङ्क्तिमूर्द्धन्यान्पृच्छेत्प्रश्ने तथासने ॥ दर्भानास्तीर्य्य द्विगुणान्पित्रे
देवादिकं चरेत् ॥ ७ ॥ विश्वान्देवानावाहयिष्ये पृच्छेदावाहयेति च ॥ विश्वेदेवास आवाह्य विकीर्य्याथ यवाञ्जपेत् ॥ ८ ॥ विश्वेदेवाः
शृणुतेमं पितॄनावाहयिष्ये च ॥ पृच्छेदावाहयेत्युक्ते उशन्तस्त्वा समाह्वयेत् ॥ ९ ॥ तिलान्विकीर्य्याथ जपेदायन्तित्यादि पैतृके ॥ सपवित्रे
निषिञ्चेद्धा शन्नो देवीरभिष्टयृचा ॥ १० ॥ यवोऽसीति यवान्दत्त्वा पित्रे सर्वत्र वै तिलान् ॥ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः ॥
प्रत्नवद्भिः प्रत्तः स्वधयेहि इमान्पितॄन् लोकान् प्रीणाहि नः स्वधा नमः इति ॥ श्रीश्च ते इति ददेत्पुष्पं पात्रे हैमेऽथ राजते ॥ ११ ॥
औदुम्बरे वा खड्गे वा पर्णपात्रे प्रदक्षिणम् ॥ देवानामपसव्यं तु पितॄणां सव्यमाचरेत् ॥ १२ ॥ एकैकस्य चैकैकेन सपवित्रकरेषु च ॥
या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्ष उत पार्थिवीर्य्याः ॥ हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शँ स्योनाः सुवहा भवन्तु ॥
विश्वेदेवा एष वोऽर्घः स्वाहा च पितरेष ते ॥ १३ ॥ स्वधैवं पितामहादेः संस्रवात्प्रथमे चरेत् ॥ पितृभ्यः स्थानमसीति न्युब्जपात्रं करो-
त्यधः ॥ १४ ॥ अत्र गन्धपुष्पधूपदीपाच्छादनदानकम् ॥ घृताक्तमन्नमुद्धृत्य पृच्छत्यग्नौ करिष्ये च ॥ १५ ॥ कुरुष्वेत्यभ्यनुज्ञातो
जुहुयात्साग्निको नमेत् ॥ अनग्निकः पितृहस्ते सपवित्रे तु मन्त्रतः ॥ १६ ॥ अग्नये कव्यवाहनाय स्वाहेति प्रथमाहुतिः ॥ सोमाय
पितृमतेऽथ यमायाङ्गिरसे परे ॥ १७ ॥ हुतशेषं चान्नपात्रे दत्त्वा पात्रं समालभेत् ॥ पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे
अमृते अमृतं जुहोमि स्वाहेति ॥ जत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥ १८ ॥ अपहतेति च तिलान् विकीर्य्यान्नं प्रदापयेत् ॥
जुषध्वमिति चोक्त्वाथ गायत्र्यादि ततो जपेत् ॥ १९ ॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वधायै स्वाहायै
नित्यमेव नमो नमः ॥ २० ॥ तृप्ताञ्ज्ञात्वान्नं विकिरेदपो दद्यात्सकृत्सकृत् ॥ गायत्रीं पूर्ववज्जप्त्वा मधु मध्विति वै
जपेत् ॥ २१ ॥ तृप्ताः स्थ इति सम्पृच्छेत्तृप्ताः स्म इति वै वदेत् ॥ शेषमन्नमनुज्ञाप्य सर्वमन्नमथैकतः ॥ २२ ॥
उद्धृत्योच्छिष्टपार्श्वे तु कृत्वा चैवावनेजनम् ॥ दद्यात्कुशेषु त्रीन्पिण्डानाचान्तेषु परे जगुः ॥ २३ ॥ आचान्तेषूदकं
पुष्पाण्यक्षतानि प्रदापयेत् ॥ अक्षय्योदकमेवाथ आशिषः प्रार्थयेन्नरः ॥ २४ ॥ अघोराः पितरः सन्तु गोत्रं नो वर्द्धतां सदा ॥ दातारो

नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ २५ ॥ श्रद्धा च नो माव्यगमद्बहु देयं च नोऽस्त्विति ॥ अन्नं च नो बहु भवेदातिथींश्च लभेमहि ॥ ॥ २६ ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ स्वधावाचनीयान्कुशानास्तीर्य्य सपवित्रकान् ॥ २७ ॥ स्वधां वाचयिष्ये पृच्छेदनुज्ञातश्च वाच्यताम् ॥ पितृभ्यः पितामहेभ्यः प्रपितामहमुख्यके ॥ २८ ॥ स्वधोच्यतामस्तु स्वधा उच्यमानस्तथैव च ॥ अपो निषिञ्चेदुत्तानं पात्रं कृत्वाथ दक्षिणाम् ॥ २९ ॥ यथाशक्ति प्रदद्याच्च दैवे पैत्रेऽथ वाचयेत् ॥ विश्वेदेवाः प्रीयन्तां च वाजे वाजे विसर्जयेत् ॥ ३० ॥ आमावाजस्येत्यनुव्रज्य कृत्वा विप्रान्प्रदक्षिणम् ॥ गृहे विशेदमावास्यां मासि मासि चरेत्तथा ॥ ३१ ॥ एकोद्दिष्टं प्रवक्ष्यामि श्राद्धं पूर्ववदाचरेत् ॥ एकं पवित्रमेकार्घमेकं पिण्डं प्रदापयेत् ॥ ३२ ॥ नावाहनाग्नौकरणं विश्वेदेवा न चात्र हि ॥ तृप्तिप्रश्ने स्वदितमिति वदेत्सुस्वदितं द्विजः ॥ ३३ ॥ उपतिष्ठतामित्यक्षय्ये विसर्गे चाभिरम्यताम् ॥ अभिरताः स्म इत्यपरे शेषं पूर्ववदाचरेत् ॥ ३४ ॥ सपिण्डीकरणं वक्ष्ये अब्दान्ते मध्यतोऽपि वा ॥ पितॄणां त्रीणि पात्राणि एकं प्रेतस्य पात्रकम् ॥ ३५ ॥ सपवित्राणि चत्वारि तिलपुष्पयुतानि च ॥ गन्धोदकेन युक्तानि पूरयित्वाभिषिञ्चति ॥ ३६ ॥ प्रेतपात्रं पितृपात्रे ये समाना इति द्वयात् ॥ पूर्ववत्पिण्डदानादि प्रेतानां पितृता भवेत् ॥ ३७ ॥ अथाभ्युदयिकं श्राद्धं वक्ष्ये सर्वं तु पूर्ववत् ॥ जपेत्पितृमन्त्रवर्ज्जं पूर्वाह्णे तत्प्रदक्षिणम् ॥ ३८ ॥ उपचारा ऋजुकुशास्तिलार्थैश्च यवैरिह ॥ तृप्तिप्रश्नस्तु सम्पन्नं सुसम्पन्नं वदेद्द्विजः ॥ ३९ ॥ दध्यक्षतबदराद्याः पिण्डा नान्दीमुखान्पितॄन् ॥ आवाहयिष्ये पृच्छेच्च प्रीयन्तामिति चाक्षये ॥ ४० ॥ नान्दीमुखाश्च पितरो वाचयिष्येऽथ पृच्छति ॥ नान्दीमुखान्पितृगणान्प्रीयन्तामित्यथो वदेत् ॥ ४१ ॥ नान्दीमुखाश्च पितरस्तान्पिता प्रपितामहः ॥ मातामहः प्रमातामहो वृद्धप्रमातामहः ॥ ४२ ॥ स्वधाकारं न युञ्जीत युग्मान्विप्रांश्च भोजयेत् ॥ तृप्तिं वक्ष्ये पितॄणां च ग्राम्यैरोषधिभिस्तथा ॥ ४३ ॥ मासं तृप्तिस्तथारण्यैः कन्दमूलफलादीभिः ॥ मत्स्यैर्मासद्वयं मार्गैस्त्रयं वै शाकुनेन च ॥ ४४ ॥ चतुरो रौरवेणाथ पञ्च षट् छागलेन तु ॥ कूर्मेण सप्त चाष्टौ च वाराहेण नवैव तु ॥ ४५ ॥ मेषमांसेन दश च माहिषैः पार्वतैः शिवैः ॥ संवत्सरं तु गव्येन पयसा पायसेन वा ॥४६॥ वार्द्धीनसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ खड्गमांसं कालशाकं लोहितच्छागलो मधु ॥४७॥ महाशल्काश्च वर्षासु मघाश्राद्धमथाक्षयम् ॥ मन्त्राध्याय्यग्निहोत्री च

शाखाध्यायी षडङ्गवित् ॥ ४८ ॥ त्रिणाचिकेतः त्रिमधुर्धर्मद्रोणस्य पाठकः ॥ त्रिसुपर्णज्येष्ठसामज्ञानी स्युः पंक्तिपावनाः ॥ ४९ ॥
काम्यानां कल्पमाख्यास्ये प्रतिपत्सु धनं बहु ॥ स्त्रियः परा द्वितीयायां चतुर्थ्यां धर्मकामदः ॥ ५० ॥ पञ्चम्यां पुत्रकामस्तु षष्ठ्यां
च श्रैष्ठ्यभागपि ॥ कृषिभागी च सप्तम्यामष्टम्यामर्थलाभकः ॥ ५१ ॥ नवम्यां च एकशफा दशम्यां गोगणो भवेत् ॥ एकादश्यां
परिवारी द्वादश्यां धनधान्यकम् ॥ ५२ ॥ ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां च शस्त्रतः ॥ मृतानां श्राद्धं सर्वाप्तममावास्यां समीरितम् ॥
॥ ५३ ॥ सप्त व्याधा दशारण्ये मृगाः कालञ्जरे गिरौ ॥ चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥ ५४ ॥ तेऽपि जाताः कुरुक्षेत्रे
ब्राह्मणा-वेदपारगाः ॥ प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदत ॥ ५५ ॥ श्राद्धादौ पठिते श्राद्धं पूर्णं स्याद्ब्रह्मलोकदम् ॥ श्राद्धं कुर्य्याच्च
पुत्रादिः पितुर्जीवति तत्पितुः ॥ ५६ ॥ तत्पितुस्तत्पितुः कुर्य्याज्जीवति प्रपितामहे ॥ पितुः पितामहस्याथ परस्य प्रपितामहात् ॥ ५७ ॥
एवं मात्रादिकस्यापि तथा मातामहादिके ॥ श्राद्धकल्पं पठेद्यस्तु स लभेच्छ्राद्धकृत्फलम् ॥ ५८ ॥ तीर्थे युगादौ मन्वादौ श्राद्धं
दत्तमथाक्षयम् ॥ आश्वयुक्छुक्लनवमी द्वादशी कार्त्तिके तथा ॥ ५९ ॥ तृतीया चैव माघस्य तथा भाद्रपदस्य च ॥ फाल्गुनस्याप्य-
मावास्या पौषस्यैकादशी तथा ॥ ६० ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ श्रावणे चाष्टमी कृष्णा तथाषाढे च पूर्णिमा ॥
॥ ६१ ॥ कार्त्तिकी फाल्गुनी तद्वज्ज्येष्ठे पञ्चदशी सिता ॥ स्वायंभुवाद्या मनवस्तेषामाद्याः कलाक्षयाः ॥ ६२ ॥ गया प्रयागो गङ्गा च
कुरुक्षेत्रं च नर्म्मदा ॥ श्रीपर्वतः प्रभासश्च शालग्रामो वाराणसी ॥ गोदावरी तेषु श्राद्धं श्रीपुरुषोत्तमादिषु ॥ ६३ ॥ इत्यादिमहापुराणे
आग्नेये श्राद्धकल्पो नाम सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ अथ भारतवर्षवर्णनम् ॥ अग्निरुवाच ॥ उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव
दक्षिणम् ॥ वर्षं तद्भारतं नाम नवसाहस्रविस्तृतम् ॥ १ ॥ कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ॥ महेन्द्रो मलयः सह्यः शुक्तिमान्हेम-
पर्वतः ॥ २ ॥ विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥ ३ ॥ नागद्वीपस्तथा सौम्यो
गान्धर्वस्त्वथ वारुणः ॥ अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ ४ ॥ योजनानां सहस्राणि द्वीपोऽयं दक्षिणोत्तरात् । नव भेदा भारत-
स्य मध्यभेदेऽथ पूर्वतः ॥ ५ ॥ किराता यवनाश्चापि ब्राह्मणाद्याश्च मध्यतः ॥ वेदस्मृतिमुखा नद्यः पारियात्रोद्भवास्तथा ॥ ६ ॥

विन्ध्याच्च नर्मदाद्याः स्युः सह्यात्तापी पयोष्णिका । गोदावरी भीमरथी कृष्णवेणादिकास्तथा ॥ ७ ॥ मलयात्कृतमालाद्यास्त्रिसामाद्या महेन्द्रजाः । कुमाराद्याः शुक्तिमतो हिमाद्रेश्चन्द्रभागका ॥ पश्चिमे कुरुपाञ्चालमध्यदेशादयः स्थिताः ॥ ८ ॥ इत्यादिमहापुराणे आग्नेये भारतवर्षवर्णनं नामाऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥ अथ महाद्वीपादिवर्णनम् ॥ अग्निरुवाच ॥ लक्षयोजनविस्तारं जम्बूद्वीपं समावृतम् ॥ लक्षयोजनमानेन क्षारोदेन समन्ततः ॥ १ ॥ संवेष्टय क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥ सप्त मेधातिथेः पुत्रा प्लक्षद्वीपेश्वरास्तथा ॥ २ ॥ स्याच्छान्तभयः शिशिरः सुखोदय इतः परः ॥ आनन्दश्च शिवः क्षेमो ध्रुवस्तन्नामवर्षकम् ॥ ३ ॥ मर्य्यादाशैलो गोमेधश्चन्द्रो नारददुन्दुभी ॥ सोमकः सुमनाः शैलो वैभ्राजास्तज्जनाः शुभाः ॥ ॥ ४ ॥ नद्यः प्रधानाः सप्तात्र प्लक्षाच्छाकान्तिकेषु च ॥ जीवनं पञ्चसाहस्रं धर्मो वर्णाश्रमात्मकः ॥ ५ ॥ आर्य्यकाः कुरवश्चैव विविंशा भाविनश्च ते ॥ विप्राद्यास्तैश्च सोमोऽर्च्यो द्विलक्षश्चाब्धिलक्षकः ॥ ६ ॥ मानेनेक्षुरसोदेन वृतो द्विगुणशाल्मलः ॥ वपुष्मतः सप्त पुत्राः शाल्मलेशास्तथाभवन् ॥ ७ ॥ श्वेतोऽथ हरितश्चैव जीमूतो लोहितः क्रमात् ॥ वैद्युतो मानसश्चैव सुप्रभो नाम वर्षकः ॥ ८ ॥ द्विगुणो द्विगुणेनैव सुरोदेन समावृतः ॥ कुमुदश्चानलश्चैव तृतीयस्तु बलाहकः ॥ ९ ॥ द्रोणः कङ्कोऽथ महिषः ककुद्मान् सप्त निम्नगाः ॥ कापिलाश्चारुणाः पीताः कृष्णाः स्युर्ब्राह्मणादयः ॥ १० ॥ वायुरूपं यजन्ति स्म सुरोदेनायमावृतः ॥ ज्योतिष्मतः कुशेशाः स्युरुद्भिदो धेनुमान् सुतः ॥ ११ ॥ द्वैरथो लम्बनो धैर्य्यः कपिलश्च प्रभाकरः ॥ विप्राद्या दधिमुख्यास्तु ब्रह्मरूपं यजन्ति ते ॥ १२ ॥ विद्रुमो हेमशैलश्च द्युतिमान्पुष्पवांस्तथा ॥ कुशेशयो हरिः शैलो वर्षार्थे मन्दराचलः ॥ १३ ॥ वेष्टितोऽयं घृतोदेन क्रौञ्चद्वीपेन सोऽप्यथ ॥ क्रौञ्चेश्वराः द्युतिमतः पुत्रास्तन्नामवर्षकाः ॥ १४ ॥ कुशलो मनोनुगश्चोष्णः प्रधानोऽथान्धकारकः ॥ मुनिश्च दुन्दुभिः सप्त सप्त शैलाश्च निम्नगाः ॥ ॥ १५ ॥ क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ॥ देवावृत्पुण्डरीकश्च दुन्दुभिर्द्विगुणो मिथः ॥ १६ ॥ द्वीपा द्वीपेषु ये शैला यथा द्वीपानि ते तथा ॥ पुष्कराः पुष्कला धन्यास्तीर्था विप्रादयो हरिम् ॥ १७ ॥ यजन्ति क्रौञ्चद्वीपस्तु दधिमण्डोदकावृतः ॥ संवृतः शाकद्वीपेन ह्यव्याच्छाकेश्वराः सुताः ॥ १८ ॥ जलदश्च कुमारश्च सुकुमारो मणीवकः ॥ कुशोत्तरोऽथ मोदाकी द्रुमस्तन्नामवर्षकाः ॥ १९ ॥

उदयाख्यो जलधरो रैवतः श्यामकोद्रकौ ॥ आम्बिकेयस्तथा रम्यः केसरी सत निम्नगाः ॥ २० ॥ मगा मगधमानस्या मन्दगाश्च द्विजातयः ॥ यजन्ति सूर्य्यरूपं तु शाकः क्षीराब्धिना वृतः ॥ २१ ॥ पुष्करेणावृतः सोऽपि द्वौ पुत्रौ सवनस्य च ॥ महावीतो धातकिश्च वर्षे द्वे नामचिह्निते ॥२२॥ एकोऽद्रिर्म्मानसाख्योऽत्र मध्यतो वलयाकृतिः ॥ योजनानां सहस्राणि विस्तारोच्छ्रायतः समः ॥२३ ॥ जीवनं दशसाहस्रं सुरैर्ब्रह्मात्र पूज्यते ॥ स्वादूदकेनोदधिना वेष्टितो द्वीपमानतः ॥२४॥ ऊनातिरिक्तता चापां समुद्रेषु न जायते ॥ उदयास्तमनेष्विन्दोः पक्षयोः शुक्लकृष्णयोः ॥२५॥ दशोत्तराणि पञ्चैव अङ्गुलानां शतानि वै ॥ अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ॥ २६ ॥ स्वादूदका बहुगुणां भूर्हैमी जन्तुवर्जिता ॥ लोकालोकस्ततः शैलो योजनायुतविस्तृतः ॥२७॥ लोकालोकस्तु तमसाऽऽवृतोऽथाण्डकटाहतः ॥ भूमिः साण्डकटाहेन पञ्चाशत्कोटिविस्तृता ॥२८॥ इत्यादिमहापुराणे आग्नेये महाद्वीपादिवर्णनं नामैकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९॥ अथ भुवनकोशवर्णनम् ॥ अग्निरुवाच ॥ विस्तारस्तु स्मृतो भूमेः सहस्राणि च सप्ततिः ॥ उच्छ्रायो दशसाहस्रं पातालं चैकमेककम् ॥ ॥ १ ॥ अतलं वितलं चैव नितलं च गभास्तिमत् ॥ महाख्यं सतलं चाढ्यं पातालं चापि सप्तमम् ॥ २ ॥ कृष्णपीतारुणाः शुक्लशर्करा-शैलकाञ्चनाः ॥ भूमयस्तेषु रम्येषु सन्ति दैत्यादयः सुखम् ॥ ३ ॥ पातालानामधश्चास्ते शेषो विष्णुश्च तामसः ॥ गुणान्यान्तस्य चानन्तः शिरसा धारयन्महीम् ॥ ४ ॥ भुवोऽधो नरका नैके न पतेत्तत्र वैष्णवः ॥ रविणा भासिता पृथ्वी यावत्तावन्नभो मतम् ॥ ५ ॥ भूमेर्योजनलक्षं तु वसिष्ठ रविमण्डलम् ॥ रवेर्लक्षेण चन्द्रश्च लक्षान्नाक्षत्रमिन्दुतः ॥६ ॥ द्विलक्षाद्बुधश्चास्ते बुधाच्छुक्रो द्विलक्षतः ॥ द्विलक्षेण कुजः शुक्राद्भौमाद्विलक्षतो गुरुः ॥७॥ गुरोर्द्विलक्षतः सौरिर्लक्षात्सप्तर्षयः शनेः ॥ लक्षाद्ध्रुवो ह्यृषिभ्यस्तु त्रैलोक्यं चोच्छ्रयेण च ॥ ॥ ८ ॥ ध्रुवात्कोट्या महर्लोको यत्र ते कल्पवासिनः ॥ जनो द्विकोटितस्तस्माद्यत्रासन्सनकादयः ॥ ९ ॥ जनात्तपश्चाष्टकोट्या वैराजा यत्र देवताः ॥ षण्णवत्या तु कोटीनां तपसः सत्यलोककः ॥ १० ॥ अपुनर्म्मारका यत्रं ब्रह्मलोको हि स स्मृतः ॥ पादगम्यस्तु भूर्लोको भुवः सूर्य्यान्तरः स्मृतः ॥ ११ ॥ स्वर्गलोको ध्रुवान्तस्तु नियुतानि चतुर्दश ॥ एतदण्डकटाहेन वृतो ब्रह्माण्डविस्तरः ॥ १२ ॥ वारि-वह्न्यनिलाकाशैस्ततो भूतादिना बहिः ॥ वृतं दशगुणैरण्डं भूतादिर्म्महता तथा ॥ १३ ॥ दशोत्तराणि शेषाणि एकैकस्मान्महामुने ॥

क्षणी भूमावधोमुखीकृतम् ॥ ॐ हूं सः सम्पुटं नाम ॐ हूं सः पत्राष्टके क्रमात् ॥ १९ ॥ गोरोचनाकुङ्कुमेन भूर्जे मृत्युनिवारणम् ॥ एक-
पञ्चनवप्रीत्ये द्विषट्द्वादशयोगकः ॥ २० ॥ त्रिसप्तैकादशे लाभो वेदाष्टद्वादशे रिपुः ॥ तनुर्धनं च सहजः सुहृत्सुतो रिपुस्तथा ॥ २१ ॥
जाया निधनधर्म्मौ च कर्म्मायव्ययकं क्रमात् ॥ स्फुटं मेषादिलग्नेषु नवतारावलं वदेत् ॥ २२ ॥ जन्म सम्पद्विपत्क्षेमं प्रत्यरिः साधकः
क्रमात् ॥ निधनं मित्रपरममित्रं ताराबलं विदुः ॥ २३ ॥ वारे ज्ञगुरुशुक्राणां सूर्य्याचन्द्रमसोस्तथा ॥ माघादिमासषट्के तु क्षौरमाद्यं
प्रशस्यते ॥ २४ ॥ कर्णवेधो बुधे जीवे पुष्ये श्रवणचित्रयोः ॥ पञ्चमेऽब्दे चाध्ययनं षष्ठीं प्रतिपदं त्यजेत् ॥ २५ ॥ रिक्तां पञ्चदशीं
भौमं प्राच्यं वाणीं हरिं श्रियम् ॥ माघादिमासषट्के तु मेखलाबन्धनं शुभम् ॥ २६ ॥ चूडाकरणकाद्यं च श्रावणादौ न शस्यते ॥
अस्तं याते गुरौ शुक्रे क्षीणे च शशलाञ्छने ॥ २७ ॥ उपनीतस्य विप्रस्य मृत्युं जाड्यं विनिर्दिशेत् ॥ क्षौरर्क्षं शुभवारे च समावर्त-
नामिष्यते ॥ २८ ॥ शुभक्षेत्रे विलग्नेषु शुभयुक्तेक्षितेषु च ॥ अश्विनीमघाचित्रासु स्वातीयाम्योत्तरासु च ॥ २९ ॥ पूनर्वसौ तथा पुष्ये
धनुर्वेदः प्रशस्यते ॥ भरण्यार्द्रा मघाश्लेषा वह्निभर्गर्क्षयोस्तथा ॥ ३० ॥ जिजीविषुर्न कुर्वीत वस्त्रप्रावरणं नरः ॥ गुरौ शुक्रे बुधे वस्त्रं
विवाहादौ न भादिकम् ॥ ३१ ॥ रेवत्यश्विधनिष्ठासु हस्तादिषु च पञ्चसु ॥ शंखविद्रुमरत्नानां परिधानं प्रशस्यते ॥ ३२ ॥ याम्य-
सर्पधनिष्ठासु त्रिषु पूर्वेषु वारुणे ॥ क्रीतं हानिकरं द्रव्यं विक्रीतं हानिकृद्भवेत् ॥ ३३ ॥ आश्विनीस्वातीचित्रासु रेवत्यां वारुणे हरौ ॥
क्रीतं लाभकरं द्रव्यं विक्रीतं हानिकृद्भवत् ॥ ३४ ॥ भरणी त्रीणि पूर्वाणि आर्द्राश्लेषामघानिलाः ॥ वह्निज्येष्ठाविशाखासु स्वामिनो
नोपतिष्ठते ॥ ३५ ॥ द्रव्यं दत्तं प्रयुक्तं वा यत्र निक्षिप्यते धनम् ॥ उत्तरे श्रवणे शक्रे कुर्याद्राजाभिषेचनम् ॥ ॥ ३६ ॥ चैत्रं ज्येष्ठं तथा
भाद्रमाश्विनं पौषमेव च ॥ माघं चैव परित्यज्य शेषमासे गृहं शुभम् ॥ ३७ ॥ अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ॥ स्वाती
हस्तानुराधा च गृहारम्भे प्रशस्यते ॥ ३८ ॥ आदित्यभौमवर्जं तु वापीप्रासादके तथा ॥ सिंहराशिगते जीवे गुर्वादित्ये मलिम्लुचे ॥ ॥ ९१ ॥
॥ ३९ ॥ बाले वृद्धेऽस्तगे शुक्रे गृहकर्म्म विवर्जयेत् ॥ अग्निदाहो भयं रोगो राजपीडा धनक्षतिः ॥ ४० ॥ संग्रहे तृणकाष्ठानां कृते
श्रवणपञ्चके ॥ गृहप्रवेशनं कुर्य्याद्धनिष्ठोत्तरवारुणे ॥ ४१ ॥ नौकाया घटने द्वित्रिपञ्चसप्तत्रयोदशी ॥ नृपदर्शो धनिष्ठासु हस्तपौष्णा-

श्विनीषु च ॥ ४२ ॥ पूर्वात्रयं धनिष्ठार्द्रा वह्निः सौम्यविशाखयोः ॥ आश्लेषा चाश्विनी चैव यात्रासिद्धिस्तु सम्पदा ॥ ४३ ॥ त्रिषू-
त्तरेषु रोहिण्यां सिनिवाली चतुर्द्दशी ॥ श्रवणं चैव हस्तो वै चित्रा वै वैष्णवी तथा ॥ ४४ ॥ गोष्ठयात्रां न कुर्वीत
प्रवेशं नैव कारयेत् ॥ अनिलोत्तररोहिण्यां मृगमूलपुनर्वसौ ॥ ४५ ॥ पुष्यश्रवणहस्तेषु कृषिकर्म्म समाचरेत् ॥ पुनर्वसूत्तरास्वाती-
भगमूलेन्द्रवारुणे ॥ ४६ ॥ गुरोः शुक्रस्य वारे वा वारे वा सोमभास्वतोः ॥ वृषलग्ने च कर्त्तव्यं कन्यायां मिथुने तथा ॥ ४७ ॥ द्विपञ्च
दशमी सप्त तृतीया च त्रयोदशी ॥ रेवतीरोहिणीन्द्राग्निहस्तमैत्रोत्तरेषु च ॥ ४८ ॥ मन्दारवर्ज्जबीजानि वापयेत्सम्पदर्थ्यापि ॥ रेवतीहस्त-
मूलेषु श्रवणे भगमैत्रयोः ॥ ४९ ॥ पितृदैवे तथा सौम्ये धान्यच्छेदं मृगोदये ॥ हस्तचित्रादितिस्वातीरेवतीश्रवणत्रये ॥ ५० ॥ स्थिरे
लग्ने गुरोर्वारेऽथ वा भार्गवसौम्ययोः ॥ याम्यादितिमघाज्येष्ठासूत्तरेषु प्रवेशयेत् ॥ ५१ ॥ ओं धनदाय सर्व्वधनेशाय देहि मे धनं स्वाहा ॥
ओं नवे वर्षे इलादेवि लोकसंवर्द्धनि कामरूपिणि देहि मे धनं (धान्यं) स्वाहा ॥ पत्रस्थं लिखितं धान्यराशिस्थं धान्यवर्द्धनम् ॥
त्रिपूर्वासु विशाखायां धनिष्ठावारुणेऽपि च ॥ ५२ ॥ एतेषु षट्सु विज्ञेयं धान्यनिष्क्रमणं बुधैः ॥ देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ
॥ ५३ ॥ मिथुनस्थे रवौ दर्शाद्यदि स्याद्वादशी तिथिः । सदा तत्रैव कर्त्तव्यं शयनं चक्रपाणिनः ॥ ५४॥ सिंहं तौलिं गते चार्के दर्शाद्यद्वा-
दशीद्वयम् ॥ आदाविन्द्रसमुत्थानं प्रबोधश्च हरेः क्रमात् ॥ ५५ ॥ तथा कन्यागते भानौ दुर्गोत्थाने तथाष्टमी ॥ त्रिपादेषु च ऋक्षेषु
यदा भद्रा तिथिर्भवेत् ॥ ५६ ॥ भौमादित्यशनैश्चारि विज्ञेयं तत्त्रिपुष्करम् ॥ सर्वकर्म्मण्युपादेया विशुद्धिश्चन्द्रतारयोः ॥ ५७ ॥ जन्मा-
श्रितास्त्रिषष्ठश्च सप्तमो दशमस्तथा ॥ एकादशः शशी येषां तेषामेव शुभं वदेत् ॥ ५८ ॥ शुक्लपक्षे द्वितीयश्च पञ्चमो नवमः शुभः ॥
मित्रातिमित्रसाधकसम्पत्क्षेमादितारकाः ॥ ५९ ॥ जन्मना मृत्युमाप्नोति विपदा धनसङ्क्षयम् ॥ प्रत्यरौ मरणं विद्यान्निधने याति पञ्चताम्
॥ ६० ॥ कृष्णाष्टमीदिनादूर्द्ध्वं यावच्छुक्लाष्टमीदिनम् ॥ तावत्कालं शशी क्षीणः पूर्णस्तत्रोपरि स्मृतः ॥ ६१ ॥ वृषे च मिथुने भानौ जीवे
चन्द्रेन्द्रदैवते ॥ पौर्णमासी गुरोर्वारे महाज्येष्ठी प्रकीर्त्तिता ॥ ६२ ॥ ऐन्द्रो गुरुः शशी चैव प्राजापत्ये रविस्तथा ॥ पूर्णिमा ज्येष्ठमासस्य
महाज्येष्ठी प्रकीर्तिता ॥ ६३ ॥ स्वात्यन्तरे यन्त्रनिष्ठे शक्रस्योत्थापयेद्ध्वजम् ॥ हर्य्यृक्षपादे चाश्विन्यां सप्ताहान्ते विसर्जयेत् ॥ ६४ ॥

सर्वं हेमसमं दानं सर्वे ब्रह्मसमा द्विजाः ॥ सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥ ६५ ॥ घाङ्घी महोदरी घोरा मन्दा मन्दाकिनी द्विजाः ॥ राक्षसी च क्रमेणार्कात्संक्रान्तिर्नामभिः स्मृता ॥ ६६ ॥ बालवे कौलवे नागे तैतिले करणे यदि ॥ उत्तिष्ठन्सङ्क्रमत्यर्कस्तदा लोकः सुखी भवेत् ॥ ६७ ॥ गरे बवे वणिग्विष्टौ किंस्तुघ्ने शकुनौ व्रजेत् ॥ राज्ञो दोषेण लोकोऽयं पीड्यते सम्पदा समम् ॥ ६८ ॥ चतुष्पाद्विष्टिवाणिज्ये शायितः सङ्क्रमेद्रविः ॥ दुर्भिक्षं राजसङ्ग्रामो दम्पत्योः संशयो भवेत् ॥ ६९ ॥ आधाने जन्मनक्षत्रे व्याधौ क्लेशादिकं भवेत् ॥ कृत्तिकायां नवादिनं त्रिरात्रं रोहिणीषु च ॥ ७० ॥ मृगशिरः पञ्चरात्रमार्द्रासु प्राणनाशनम् ॥ पुनर्वसौ च पुष्ये च सप्तरात्रं विधीयते ॥ ७१ ॥ नवरात्रं तथाश्लेषा श्मशानान्तं मघासु च ॥ द्वौ मासौ पूर्वफाल्गुन्यामुत्तरासु त्रिपञ्चकम् ॥ ॥ ७२ ॥ हस्ते तु दृश्यते चित्रा ह्यर्द्धमासं तु पीडनम् ॥ मासद्वयं तथा स्वातीविशाखा विंशतिर्दिनम् ॥ ७३ ॥ मैत्रे चैव दशाहानि ज्येष्ठास्वेवार्द्धमासकम् ॥ मूले न जायते मोक्षः पूर्वाषाढा त्रिपञ्चकम् ॥ ७४ ॥ उत्तरा दिनाविंशत्या द्वौ मासौ श्रवणेन च ॥ धनिष्ठा चार्द्धमासं च वारुणे च दशाहकम् ॥ ७५ ॥ न च भाद्रपदे मोक्ष उत्तरासु त्रिपञ्चकम् ॥ रेवती दशरात्रं च अहोरात्रं तथाश्विनी ॥ ७६ ॥ भरण्यां प्राणहानिः स्याद्गायत्रीहोमतः शुभम् । पञ्चधान्यतिलाज्याद्यैर्धेनुदानं द्विजे शुभम् ॥ ७७ ॥ दशा सूर्य्यस्य षष्ठाब्दा इन्दोः पञ्चदशैव तु ॥ अष्टौ वर्षाणि भौमस्य दशसप्त दशा बुधे ॥ ७८ ॥ दशाब्दानि दशा पङ्क्तेरूनविंशद्गुरोर्दशा ॥ राहोर्द्वादश वर्षाणि भार्गवस्यैकविंशतिः ॥ ७९ ॥ इत्यादिमहापुराणे आग्नेये ज्योतिःशास्त्रसारो नामैकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥ अथ कालगणनम् ॥ अग्निरुवाच ॥ कालः समागणो वक्ष्ये गणितं कालबुद्धये ॥ कालः समागणोऽर्कघ्नो मासैश्चैत्रादिभिर्युतः ॥ १ ॥ द्विघ्नो द्विष्टः सवेदः स्यात्पञ्चाङ्गाष्टयुतो गुणः ॥ त्रिष्टो मघ्यो वसुगुणः पुनर्वेदगुणश्च सः ॥ २ ॥ अष्टरन्ध्राग्निहीनः स्यादधः सैकरसाष्टकैः ॥ मध्यो हीनः षष्टिहतो लब्धयुक्तस्तथोपरि ॥ ३ ॥ न्यूनः सप्तकृतो वारस्तदधस्तिथिनाडयः ॥ सुगुणो द्विगुणश्चोर्द्ध त्रिभिरूनो गुणः पुनः ॥ ॥ ४ ॥ अधः खरामसंयुक्तो रसार्काष्टफलैर्युतः ॥ अष्टाविंशच्छेषपिण्डस्तिथिनाड्या अधः स्थितः ॥ ५ ॥ गुणास्तिसृभिरूनोर्द्धे द्वाभ्यां च गुणयेत्पुनः ॥ मध्ये रुद्रगुणः कार्य्यो ह्यधः सैको नवाग्निभिः ॥ ६ ॥ लब्धहीनो भवेन्मध्यो द्वाविंशतिविवर्जितः ॥ षष्टिशेषे ऋणं ज्ञेयं

लब्धमूर्द्धं विनिःक्षिपेत् ॥ ७ ॥ सप्तविंशतिशेषस्तु ध्रुवो नक्षत्रयोगयोः ॥ मासि मासि क्षिपेद्वारं द्वात्रिंशद्घटिकास्तिथौ ॥ ८ ॥ द्वे पिण्डे द्वे च नक्षत्रे नाड्य एकादश ध्रुवे ॥ वारस्थाने तिथिं दद्यात्सप्तभिर्भागमाहरेत् ॥ ९ ॥ शेषवाराश्च सूर्य्याद्या घटिकासु च पातयेत् ॥ पिण्डकेषु तिथिं दद्याद्धरेच्चैव चतुर्दश ॥ १० ॥ ऋणं धनं धनमृणं क्रमाज्ज्ञेयं चतुर्दशे ॥ प्रथमे त्रयोदशे पञ्च द्वितये द्वादशे दश ॥ ११ ॥ पञ्चदशस्तृतीये च तथा चैकादशे स्मृतम् ॥ चतुर्थे दशमे चैव भवेदेकोनविंशतिः ॥ १२ ॥ पञ्चमे नवमे चैव द्वाविंशतिरुदाहृताः ॥ षष्ठाष्टमे त्वखण्डाः स्युश्चतुर्विंशतिरेव च ॥ १३ ॥ सप्तमे पञ्चविंशः स्यात्खण्डशः पिण्डकाद्भवेत् ॥ कर्कटादौ हरेद्राशिमृतुवेदत्रयैः क्रमात् ॥ १४ ॥ तुलादौ प्रातिलोम्येन त्रयो वेदरसाः क्रमात् ॥ मकरादौ दीयते च रसवेदत्रयः क्रमात् ॥ १५ ॥ मेषादौ प्रातिलोम्येन त्रयो वेदरसाः क्रमात् ॥ खेषवः खयुगा मैत्रं मेषादौ विकला धनम् ॥ १६ ॥ कर्कटे प्रातिलोम्यं स्यादृणमेतत्तुलादिके ॥ चतुर्गुणा तिथिर्ज्ञेया विकलाश्चेह सर्वदा ॥ १७ ॥ हन्याल्लिप्तागतागामिपिण्डसङ्ख्याफलान्तरैः ॥ षष्ट्यातं प्रथमोच्चार्य्यं हानौ देयं धने धनम् ॥ १८ ॥ द्वितीयोच्चरिते वर्गे वैपरीत्यमिति स्थितिः ॥ तिथिर्द्विगुणिता कार्य्या षड्भागपरिवर्जिता ॥ १९ ॥ रविकर्म्मविपरीता तिथिनाडीसमायुता ॥ ऋणे शुद्धे तु नाड्यः स्युर्ऋणं शुध्येत नो यदा ॥ २० ॥ सषष्टिकं प्रदेयं तत्षष्ट्याधिक्ये च तत्त्यजेत् ॥ नक्षत्रं तिथिमिश्रं स्याच्चतुर्भिर्गुणिता तिथिः ॥ २१ ॥ तिथिस्त्रिभागसंयुक्ता ध्रुवेण च तथान्विता ॥ तिथिरत्र चिता कार्य्या तद्वेदाद्योगशोधनम् ॥ २२ ॥ रविचन्द्रौ समौ कृत्वा योगो भवति निश्चलः ॥ एकोना तिथिर्द्विगुणा सप्तभिन्नाकृतिर्द्विधा ॥ २३ ॥ तिथिश्च द्विगुणैकोना कृताङ्गैः करणं निशि ॥ कृष्णचतुर्दश्यन्ते शकुनिः पर्वणीह चतुष्पदम् ॥ प्रथमे तिथ्यर्द्धतो हि किंस्तुघ्नं प्रतिपन्मुखे ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये कालगणनं नाम द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥ अथ युद्धजयार्णवे नानायोगाः ॥ अग्निरुवाच ॥ वक्ष्ये जयशुभाद्यर्थं सारं युद्धजयार्णवे ॥ अइउएओ स्वराः स्युः क्रमान्नन्दादिका तिथिः ॥ १ ॥ कादिहान्ता भौमरवी ज्ञसोमौ गुरुभार्गवौ ॥ शनिर्दक्षिणनाड्यां तु भौमार्कशनयः परे ॥ २ ॥ स्वार्णवः स्वरसैर्मुण्यो रुद्रैर्भागं समाहरेत् ॥ रसाहतं तु तत्कृत्वा पूर्वभागेन भाजयेत् ॥ ३ ॥ वह्निभिश्चाहतं कृत्वा रूपं तत्रैव निःक्षिपेत् ॥ स्पन्दनं नाड्याः पलानि सप्राणस्पन्दनं पुनः ॥ ४ ॥ अनेनैव तु मानेन ह्युदयन्ति दिने दिने ॥ स्फुरणैस्त्रिभि-

रुच्छ्वास उच्छ्वासैस्तु पलं स्मृतम् ॥ ५ ॥ षष्टिभिश्च पलैर्लिप्ता लिप्तषष्टिस्त्वहर्निशम् ॥ पञ्चमाद्योदये बालकुमारयुववृद्धकाः ॥ ६ ॥ मृत्युर्येनोदयस्तेन चास्तमेकादशांशकैः ॥ कुलागमे भवेद्भङ्गः समृत्युः पञ्चमोऽपि वा ॥ ७ ॥ स्वरोदयचक्रम् ॥ शनिचक्रे चार्द्धमासं ग्रहाणामुदयः क्रमात् ॥ विभागैः पञ्चदशभिः शनिभागस्तु मृत्युदः ॥ ८ ॥ इति शनिचक्रम् ॥ दशकोटिसहस्राणि ह्यर्बुदान्यर्बुदं हरेत् ॥ त्रयोदशे च लक्षाणि प्रमाणं कूर्म्मरूपिणः ॥ ९ ॥ मघादौ कृत्तिकाद्यन्तस्तदेशान्तः शनिस्थितौ ॥ इति कूर्म्मचक्रम् ॥ राहुचक्रे च सप्तोर्ध्वमधः सप्त च संलिखेत्॥ १० ॥ वाय्वग्न्योश्चैव नैर्ऋत्ये पूर्णिमाग्नेयभागतः ॥ अमावास्यां वायवे च राहुर्वै तिथिरूपकः ॥ ११ ॥ रकारं दक्षभागे तु हकारं वायवे लिखेत् ॥ प्रतिपदादौ ककारादीन्सकारं नैर्ऋते पुनः ॥ १२ ॥ राहोर्मुखे तु भङ्गः स्यादिति राहुरुदाहृतः ॥ विष्टिरग्नौ पौर्णमास्यां करालीन्द्रे तृतीयकम् ॥ १३ ॥ घोरा याम्यां तु सप्तम्यां दशम्यां रौद्रसौम्यगा ॥ चतुर्दश्यां तु वायव्ये चतुर्थ्यां वरुणाश्रये ॥ १४ ॥ शुक्लाष्टम्यां दक्षिणे च एकादश्यां भृशं त्यजेत् ॥ रौद्रश्चैव तथा श्वेतो मैत्रः सारभटस्तथा ॥ १५ ॥ सावित्रो विरोचनश्च जयदेवोऽभिजित्तथा ॥ रावणो विजयश्चैव नन्दी वरुण एव च ॥ १६ ॥ यमसौम्यौ भवश्चान्ते दशपञ्चमुहूर्त्तकाः ॥ रौद्रे रौद्राणि कुर्वीत श्वेते स्नानादिकं चरेत् ॥ १७ ॥ मैत्रे कन्याविवाहादि शुभं सारभटे चरेत् ॥ सावित्रे स्थापनाद्यं वा विरोचने नृपक्रिया ॥ १८ ॥ जयदेवे जयं कुर्य्याद्रावणे रणकर्म्म च ॥ विजये कृषिवाणिज्यं पट्टबन्धं च नान्दिनि ॥ १९ ॥ वरुणे च तडागादि नाशकर्म्म यमे चरेत् ॥ सौम्ये सौम्यादि कुर्वीत भवेल्लग्नमहर्दिवा ॥ २० ॥ योगा नाम्ना विरुद्धाः स्युर्योगा नाम्नैव शोभनाः ॥ राहुरिन्द्रात्समरिं च वायोर्दक्षं यमाच्छिवम् ॥ २१ ॥ शिवादाप्यञ्जलादग्निरग्नेः सौम्यं ततस्त्रयम् ॥ ततश्च संक्रमं हन्ति चतस्रो घटिका भ्रमन् ॥ २२ ॥ इति राहुचक्रम् ॥ चण्डीन्द्राणी वाराही च मुसली गिरिकर्णिका ॥ बला चातिबला क्षीरी मल्लिकाजातियूथिकाः ॥ २३ ॥ यथालाभं धारयेत्ताः श्वेतार्कश्च शतावरी ॥ गुडूची वागुरी दिव्या ओषध्यो धारिता जये ॥ २४ ॥ ओं नमो भैरवाय खड्गपरशुहस्ताय ओं हूं विघ्नविनाशाय ओं हूं फट् ॥ अनेनैव तु मन्त्रेण शिखाबन्धादिकृज्जये ॥ तिलकं चाञ्जनं चैव धूपलेपनमेव च ॥२५॥ स्नानपानानि तैलानि योगधूलिमतः शृणु ॥ सुभगा मनःशिला तालं लाक्षारससमन्वितम् ॥ २६ ॥ तरुणीक्षीरसंयुक्तो ललाटे तिलको वशे ॥

विष्णुक्रान्ता च सर्पाक्षी सहदेवं च रोचना ॥ २७॥ अजादुग्धेन संपिष्टं तिलको वश्यकारकः ॥ प्रियङ्गु कुङ्कुमं कुष्ठं मोहनी तगरं घृतम् ॥ २८ ॥ तिलको वश्यकृत्तच्च रोचना रक्तचन्दनम् ॥ निशा मनःशिला तालं प्रियङ्गु सर्षपास्तथा ॥ २९ ॥ मोहिनी हरिता कान्ता सहदेवी शिखा तथा ॥ मातुलङ्गरसैः पिष्टं ललाटे तिलको वशे ॥ ३० ॥ सेन्द्राः सुरा वशं यान्ति किं पुनः क्षुद्रमानुषाः ॥ माञ्जिष्ठा चन्दनं रक्तं कटुकन्दा विलासिनी ॥ ३१ ॥ पुनर्नवासमायुक्तो लेपोऽयं भास्करो वशे । चन्दनं नागपुष्पं च माञ्जिष्ठा तगरं वचा ॥ लोध्रं प्रियङ्गु रजनी मांसीतिलं वशङ्करम् ॥ ३२ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे नानायोगा नाम त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३॥ अथ युद्धजयार्णवे ज्योतिःशास्त्रसारः॥ अग्निरुवाच ॥ ज्योतिःशास्त्रादिसारं च वक्ष्ये युद्धजयार्णवे ॥ विना मन्त्रौषधाद्यं च यथोमामीश्वरोऽब्रवीत् ॥ २ ॥ देव्युवाच ॥ देवैर्जिता दानवाश्च येनोपायेन तद्वद ॥ शुभाशुभविवेकाद्यं ज्ञानं युद्धजयार्णवम् ॥ २ ॥ ईश्वर उवाच ॥ मूलदेवेच्छया जाता शक्तिः पञ्चादशाक्षरा ॥ चराचरं ततो जातं यमाराध्याखिलार्थवित् ॥ ३ ॥ मन्त्रपीठं प्रवक्ष्यामि पञ्चमन्त्रसमुद्भवम् ॥ ते मन्त्राः सर्वमन्त्राणां जीविते मरणे स्थिताः ॥ ४ ॥ ऋग्यजुःसामाथर्वाख्यवेदमन्त्राः क्रमेण ते ॥ सद्योजातादयो मन्त्रा ब्रह्मा विष्णुश्च रुद्रकः ॥ ५ ॥ ईशः सप्तशिखा देवाः शक्राद्याः पञ्च च स्वराः ॥ अइउएओ कलाश्च मूलं ब्रह्मेति कीर्त्तितम् ॥ ६ ॥ काष्ठमध्ये यथा वह्निरप्रबुद्धो न दृश्यते ॥ विद्यमाना तथा देहे शिवशक्तिर्न दृश्यते ॥ ७ ॥ आदौ शक्तिः समुत्पन्ना ओङ्कारस्वरभूषिता ॥ ततो बिन्दुर्महादेवि एकारेण व्यवस्थितः ॥ ८ ॥ जातो नाद उकारस्तु नदते हृदि संस्थितः ॥ अर्द्धचन्द्र इकारस्तु मोक्षमार्गस्य बोधकः ॥ ९ ॥ अकारो व्यक्त उत्पन्नो भोगमोक्षप्रदः परः ॥ अकार ऐश्वरे भूमिर्निवृत्तिश्च कला स्मृता ॥ १० ॥ गन्धो नबीजः प्राणाख्य इडाशक्तिः स्थिरा स्मृता ॥ इकारश्च प्रतिष्ठाख्यो रसो पालश्च पिङ्गला ॥ ११ ॥ क्रूरा शक्तिरबीजः स्यादुग्रबीजोऽग्निरूपवान् ॥ विद्या समाना गान्धारी शक्तिश्च दहनी स्मृता ॥ १२ ॥ प्रशान्तिर्वार्य्युस्पर्शी यश्चोदानश्चला क्रिया ॥ ओङ्कारः शान्त्यतीतारख्यः स्वशब्दयूथपाणिनः ॥ १३ ॥ पञ्च वर्गाः स्वरा जाताः कुजज्ञगुरुभार्गवाः ॥ शनिः क्रमादकाराद्याः ककाराद्यास्त्वधःस्थिताः ॥ १४ ॥ एतन्मूलमतः सर्वं ज्ञायते सचराचरम् ॥ विद्यापीठं प्रवक्ष्यामि प्रणवः शिव ईरितः ॥ १५ ॥ उमा सोमः

स्वयं शक्तिर्वामा ज्येष्ठा च रौद्र्यपि ॥ ब्रह्मा विष्णुः क्रमाद्रुद्रो गुणाः सर्गादयस्त्रयः ॥ १६ ॥ रत्ननाडीत्रयं चैव स्थूलः सूक्ष्मः
परोऽपरः ॥ चिन्तयेच्छ्वेतवर्णं तं मुञ्चमानं परामृतम् ॥ १७ ॥ प्लाव्यमानं यथात्मानं चिन्तयेत्तं दिवानिशम् ॥ अजरत्वं भवेद्देवि
शिवत्वमुपपद्यते ॥ १८ ॥ अङ्गुष्ठादौ न्यसेदङ्गान्नेत्रं मध्येऽथ देहके ॥ मृत्युञ्जयं ततः प्राच्यं रणादौ विजयो भवेत् ॥ १९ ॥ शून्यो निरा-
लम्बः शब्दः स्पर्शो तिर्यङ्नतं स्पृशेत् ॥ रूपस्योर्द्धगतिः प्रोक्ता जलस्याधः समाश्रिता ॥ २० ॥ सर्वस्थानविनिर्मुक्तो गन्धो मध्ये च मूल-
कम् ॥ नाभिमूले स्थितं कन्दं शिवरूपं तु मण्डितम् ॥ २१ ॥ शक्तिव्यूहेन सोमोऽर्को हरिस्तत्र व्यवस्थितः ॥ दशवायुसमोपेतं पञ्चत-
न्मात्रमण्डितम् ॥ २२ ॥ कालानलसमाकारं प्रस्फुरन्तं शिवात्मकम् ॥ तज्जीवं जीवलोकस्य स्थावरस्य चरस्य च ॥ तस्मिन्नष्टे मृतं मन्ये
मन्त्रपीठेऽनिलात्मकम् ॥२३॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे ज्योतिःशास्त्रसारो नाम चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥
अथ युद्धजयार्णवे नानाचक्राणि ॥ ईश्वर उवाच ॥ ओं ह्रीं कर्णमोटनि बहुरूपे बहुदंष्टे हूं फट् ॥ ओं हः ओं ग्रस ग्रस कृन्त कृन्त छक
छक हूं फट् नमः ॥ पठ्यमानो ह्ययं मन्त्रः क्रुद्धैः संरक्तलोचनैः ॥ मारणे पातने वापि मोहनोच्चाटने भवेत् ॥ १ ॥ कर्णमोटीमहाविद्या
सर्ववर्णेषु रक्षिका ॥ नानाविद्या ॥ पञ्चोदयं प्रवक्ष्यामि स्वरोदयसमाश्रितम् ॥ २ ॥ नाभिहृदान्तरं यावत्तावच्चरति मारुतः ॥ उच्चाट्ये-
द्रणादौ तु कर्णाक्षीणि प्रभेदयेत् ॥ ३ ॥ करोति साधकः क्रुद्धो जपहोमपरायणः ॥ हृदयात्पायुकं कण्ठं ज्वरदाहारिमारणे ॥ ४ ॥ कण्ठो-
द्भवो रसो वायुः शान्तिकं पौष्टिकं रसम् ॥ दिव्यं स्तम्भं समाकर्षे गन्धो नासान्तिको ध्रुवः ॥ ५ ॥ गन्धलीनं मनः कृत्वा स्तम्भयेन्नात्र
संशयः ॥ स्तम्भनं कीलनाद्यं च करोत्येव हि साधकः ॥ ६ ॥ चण्डघण्टा करालीं च सुमुखी दुर्मुखी तथा ॥ रेवती प्रथमा घोरा वायुचक्रेषु
ता यजेत् ॥ ७ ॥ उच्चाटकारिका देव्यः स्थितास्तेजसि संस्थिताः ॥ सौम्या च भीषणा देवी जया च विजया तथा ॥ ८ ॥ अजिता चाप-
राजिता महाकोटी च रौद्रया ॥ शुष्ककाया प्राणहरा रसचक्रे स्थिता अमूः ॥ ९ ॥ विरूपाक्षी परा दिव्यास्तथा चाकाशमातरः ॥ संहारी
जातहरिं च दंष्ट्राला शुष्करेवती ॥ १० ॥ पिपीलिका पुष्टिहारा महापुष्टिप्रवर्द्धना ॥ भद्रकाली सुभद्रा च भद्रभीमा सुभद्रिका ॥ ११ ॥
स्थिरा च निष्ठुरा दिव्या निष्कम्पा गदिनी तथा ॥ द्वात्रिंशन्मातरश्चक्रे ह्यष्टाष्ट क्रमशः स्थिताः ॥ १२ ॥ एक एव रविश्चन्द्र एकश्चैकैक-

शक्तिका ॥ भूतभेदेन तीर्थानि यथा तोयं महीतले ॥ १३ ॥ प्राण एको मण्डलैश्च भिद्यते भूतपञ्जरे ॥ वामदक्षिणयोगेन दशधा सम्प्रवर्त्तते ॥ १४ ॥ बिन्दुमुण्डविचित्रं च तत्त्ववस्त्रेण वेष्टितम् ॥ ब्रह्माण्डेन कपालेन पिबेत्तु परमामृतम् ॥ १५ ॥ पञ्चवर्गबलाद्युद्धे जयो भवति तच्छृणु । अआकचटतपयाः श आद्यो वर्ग ईरितः ॥ १६ ॥ इईखछठथफराः सो वर्गश्च द्वितीयकः ॥ उऊगजडदबलाः सो वर्गश्च तृतीयकः ॥ १७ ॥ एऐघझढधभवा होवर्गश्च चतुर्थकः ॥ ओ औ अं अः ङञणना मोवर्गः पञ्चमो भवेत् ॥ १८ ॥ वर्णाश्चाभ्युदये नृणां चत्वारिंशच्च पञ्च च ॥ बालः कुमारो युवा स्याद्वृद्धो मृत्युश्च नामतः ॥ १९ ॥ आत्मपीडा शोषकः स्यादुदासीनश्च कालकः ॥ कृत्तिका प्रतिपद्भौम आत्मनो लाभदः स्मृतः ॥ २० ॥ षष्ठी भौमो मघा पीडा ह्यार्द्रा चैकादशी कुजः ॥ मृत्युर्मघा द्वितीया ज्ञो लाभश्चार्द्रा च सप्तमी ॥ २१ ॥ बुधे हानिर्भरणी ज्ञः श्रवणं काल ईदृशः ॥ जीवो लाभाय च भवेत्तृतीया पूर्वफल्गुनी ॥ २२ ॥ जीवोऽष्टमी धनिष्ठार्द्रा जीवोऽश्लेषा त्रयोदशी ॥ मृत्यौ शुक्रश्चतुर्थी स्यात्पूर्वभाद्रपदा श्रिये ॥ २३ ॥ पूर्वाषाढा च नवमी शुक्रः पीडाकरो भवेत् ॥ भरणी भूतजा शुक्रो यमदण्डो हि हानिकृत् ॥ २४ ॥ कृत्तिका पञ्चमी मन्दो लाभाय तिथिरीरिता ॥ आश्लेषा दशमी मन्दो योगः पीडाकरो भवेत् ॥ २५ ॥ मघा शनिः पूर्णिमा च योगो मृत्युकरः स्मृतः ॥ अथ तिथियोगः ॥ पूर्वोत्तराग्निनैर्ऋत्यदक्षिणानिलचन्द्रमाः ॥ २६ ॥ ब्रह्माद्याः स्युर्दृष्टयः स्युः प्रतिपन्नवमीमुखाः ॥ राशिभिः सहिता दृष्टा ग्रहाद्याः सिद्धये स्मृताः ॥ २७ ॥ मेषाद्याश्चतुरः कुम्भा जयः पूर्णेऽन्यथा मृतिः ॥ सूर्य्यादिरिक्ता पूर्णा च क्रमादेवं प्रदापयेत् ॥ २८ ॥ रणे सूर्य्ये फलं नास्ति सोमे भङ्गः प्रशाम्यति ॥ कुजेन कलहं विद्याद्बुधः कामाय वै गुरुः ॥ २९ ॥ जयाय मनसे शुक्रो मन्दे भङ्गो रणे भवेत् ॥ देयानि पिङ्गलाचक्रे सूर्य्यगानि च भानि हि ॥ ३० ॥ मुखे नेत्रे ललाटेऽथ शिरोहस्तोरुपादके ॥ पादे मृतिस्त्रिऋक्षे स्यात्त्रीणि पक्षेऽर्थनाशनम् ॥ ३१ ॥ मुखस्थे च भवेत्पीडा शिरःस्थे कार्य्यनाशनम् ॥ कुक्षिस्थिते फलं स्याच्च राहुचक्रं वदाम्यहम् ॥ ३२ ॥ इन्द्राच्च नैर्ऋतङ्गच्छेन्नैर्ऋतात्सोममेव च ॥ सोमाद्धुताशनं वह्नेराप्यमाप्याच्छिवालयम् ॥ ३३ ॥ रुद्राद्यमं यमाद्वायुं वायोश्चन्द्रं व्रजेत्पुनः ॥ भुङ्क्ते चतस्रो नाड्यस्तु राहुपृष्ठे जयो रणे ॥ ३४ ॥ अग्रतो मृत्युमाप्नोति तिथिराहुं वदामि ते ॥ आग्नेयादिशिवान्तं च पूर्णिमामादितः प्रिये ॥ ३५ ॥ पूर्वे कृष्णाष्टमीं यावद्राहुदृष्टौ भयो भवेत् ॥

ऐशान्याग्नेयनैर्ऋत्यवायव्ये फणिराडुकः ॥ ३६ ॥ मेषाद्या दिशि पूर्वादौ यत्रादित्योऽग्रतो मृतिः ॥ तृतीया कृष्णपक्षे तु सप्तमी दशमी तथा ॥ ३७ ॥ चतुर्दशी तथा शुक्ले चतुर्थ्येकादशी तिथिः ॥ पञ्चदशी विष्टयः स्युः पूर्णिमाग्नेयवायवे ॥ ३८ ॥ अकचटतपयशा वर्गाः सूर्य्यादयो ग्रहाः ॥ गृध्रोलूकश्येनकाश्च पिङ्गलः कौशिकः क्रमात् ॥ ३९ ॥ सारसश्च मयूरश्च गोरङ्गुः पक्षिणः स्मृताः ॥ आदौ साध्यो हुतो मन्त्र उच्चाटे पल्लवः स्मृतः ॥ ४० ॥ वश्ये ज्वरे तथाकर्षे प्रयोगः सिद्धिकारकः ॥ शान्तौ प्रीतौ नमस्कारो वौषट् पुष्टौ वशादिषु ॥ ४१ ॥ हुं मृत्यौ प्रीतिसन्त्राशे विद्वेषोच्चाटने च फट् ॥ वषट् सुते च दीप्त्यादौ मन्त्राणां जातयश्च षट् ॥ ४२ ॥ ओषधीः सम्प्रवक्ष्यामि महारक्षाविधायिनीः ॥ महाकाली तथा चण्डी वाराही चेश्वरी तथा ॥ ४३ ॥ सुदर्शना तथेन्द्राणी गात्रे-स्था रक्षयन्ति तम् ॥ बला चातिबला भीरुर्मुसली सहदेव्यपि ॥ ४४ ॥ जाती च मल्लिका यूथी गारुडी तुङ्गराजकः ॥ चक्ररूपा महौ-षध्यो धारिता विजयादिदाः ॥ ४५ ॥ ग्रहणे च महादेवी उद्धृताः शुभदायिकाः ॥ मृदा च कुञ्जरं कृत्वा सर्वलक्षणलक्षितम् ॥ ४६ ॥ तस्य पादतले कृत्वा स्तम्भयेच्छत्रुमात्मनः ॥ नगाग्रे चैत्यवृक्षे च वज्राहतप्रदेशके ॥ ४७ ॥ वल्मीकमृदमाहृत्य मातरौ योजयेत्ततः ॥ ॐ नमो महाभैरवाय विकृतदंष्ट्रोग्ररूपाय पिङ्गलाक्षाय त्रिशूलखड्गधराय वौषट् ॥ पूजयेत्कर्दमं देवि स्तम्भयेच्छस्त्रजालकम् ॥ ४८ ॥ अग्निकार्य्यं प्रवक्ष्यामि रणादौ जयवर्द्धनम् ॥ श्मशाने निशि काष्ठाग्नौ नग्नो मुक्तशिखो नरः ॥ ४९ ॥ दक्षिणास्यस्तु जुहुयान्नरमांसं रुधिरं विषम् ॥ तुषास्थिखण्डमिश्रं तु शत्रुनाम्ना शताष्टकम् ॥५०॥ ॐ नमो भगवति कौमारि लल लल लालय लालय घण्टादेवि अमुकं मारय मारय सहसा नमोऽस्तु ते भगवति विद्ये स्वाहा ॥ अनया विद्यया होमाद्बन्धनं जायते रिपोः ॥ ॐ वज्रकाय वज्रतुण्ड कपिलपिङ्गलकरा-लवदन ऊर्ध्वकेश महाबल रक्तमुख तडिज्जिह्व महारौद्रदंष्ट्रोत्कट कह करालिन् महादृढप्रहार लङ्केश्वर सेतुबन्धशैलप्रवाह गगनचर एह्येहि भगवन्महाबल पराक्रम भैरवो ज्ञापयति एह्येहि महारौद्र दीर्घलांगूलेन अमुकं वेष्टय वेष्टय जम्भय जम्भय खन खन वैते हूं फट् । अष्टत्रिंशच्छतं देवि हनुमान्सर्वकर्मकृत् ॥ पटे हनूमत्सन्दर्शाद्भङ्गमायान्ति शत्रवः ॥५१॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे नानाचक्रवर्णनं नाम पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥ अथ नक्षत्रनिर्णयः ॥ ईश्वर उवाच ॥ वक्ष्याम्यृक्षात्मकं पिण्डं शुभा-

शुभविवृद्धये ॥ यस्मिन्नृक्षे भवेत्सूर्य्यस्तदादौ त्रीणि मूर्द्धनि ॥ १ ॥ एकं मुखे द्वयं नेत्रे हस्तपादे चतुष्टयम् ॥ हृदि पञ्च सुते जानौ आयुर्वृद्धिं विचिन्तयेत् ॥ २ ॥ शिरस्थे तु भवेद्राज्यं पिण्डतो वक्रयोगतः ॥ नेत्रयोः कान्तिसौभाग्यं हृदये द्रव्यसंग्रहः ॥ ३ ॥ हस्ते धृतं तस्करत्वं गतासुरध्वगः पदे ॥ कुम्भाष्टके भानि लिख्य सूर्यकुम्भस्तु रिक्तकैः ॥ ४ ॥ अशुभः सूर्यकुम्भः स्याच्छुभः पूर्वादिसंस्थितः ॥ फणिराहुं प्रवक्ष्यामि जयाजयविवेकदम् ॥ ५ ॥ अष्टाविंशाँल्लिखेद्भिन्दून्पुनर्भाज्यस्त्रिभिस्त्रिभिः ॥ अथ ऋक्षाणि चत्वारि रेखास्तत्रैव दापयेत् ॥ ६ ॥ यस्मिन्नृक्षे स्थितो राहुस्तदृक्षं फणिमूर्द्धनि ॥ तदादि विन्यसेद्भानि सप्तविंशक्रमेण तु ॥ ७ ॥ वक्रे सप्तगते ऋक्षे म्रियते सर्व आहवे ॥ स्कन्धे भङ्गं विजानीयात्सप्तभेषु च मध्यतः ॥ ८ ॥ उदरस्थेन पूजा च जयश्चैवात्मनस्तथा ॥ कटिदेशे स्थिते योध आहवे हरते परान् ॥ ९ ॥ पुच्छस्थितेन कीर्त्तिः स्याद्राहुदृष्टे च भे मृतिः ॥ पुनरन्यं प्रवक्ष्यामि रविराहुबलं तव ॥ १० ॥ रविः शुक्रो बुधश्चैव सोमः सौरिर्गुरुस्तथा ॥ लोहितः सैंहिकश्चैव ह्येते यामार्द्धभागिनः ॥ ११ ॥ सौरिं रविं च राहुं च कृत्वा यत्नेन पृष्ठतः ॥ स जयेत्सैन्यसङ्घातं द्यूतमध्वानमाहवम् ॥ १२ ॥ रोहिणी चोत्तरास्तिस्रो मृगः पञ्च स्थिराणि हि ॥ अश्विनी रेवती स्वाती धनिष्ठा शततारका ॥ १३ ॥ क्षिप्राणि पञ्च भान्येव यात्रार्थी चैव योजयेत् ॥ अनुराधाहस्तमूलं मृगः पुष्यं पुनर्वसुः ॥ १४ ॥ सर्वकार्य्येषु चैतानि ज्येष्ठा चित्रा विशाखया ॥ पूर्वास्तिस्रोऽग्निभरणी मघार्द्राश्लेषादारुणाः ॥ १५ ॥ स्थावरेषु स्थिरं वृक्षं यात्रायां क्षिप्रमुत्तमम् ॥ सौभाग्यार्थं मृदून्येव उग्रेषूग्रं तु कारयेत् ॥ १६ ॥ दारुणे दारुणं कुर्य्याद्भक्ष्ये चाधोमुखादिकम् ॥ कृत्तिका भरण्याश्लेषा विशाखा पितृनैर्ऋतम् ॥ १७ ॥ पूर्वात्रयमधोवक्त्रं कर्म्म चाधोमुखं चरेत् ॥ एषु कूपतडागादिविद्याकर्म्मभिषक्क्रिया ॥ १८ ॥ स्थापनं नौकाभूपादिविधानं खननं तथा ॥ रेवती चाश्विनी चित्रा हस्तः स्वाती पुनर्वसुः ॥ १९ ॥ अनुराधा मृगो ज्येष्ठा त्रय वै पार्श्वतोमुखाः ॥ एषु राज्याभिषेकं च पट्टबन्धं गजाश्वयोः ॥ २० ॥ आरामगृहप्रासादं प्राकारं क्षेत्रतोरणम् ॥ ध्वजचिह्नपताकाश्च सर्वानेतांश्च कारयेत् ॥ ॥ २१ ॥ द्वादशी सूर्य्यदग्धा तु चन्द्रेणैकादशी तथा ॥ भौमेन दशमी दग्धा तृतीया वै बुधेन च ॥ २२ ॥ षष्ठी च गुरुणा दग्धा द्वितीया भृगुणा तथा ॥ सप्तमी सूर्य्यपुत्रेण त्रिपुष्करमथो वदे ॥ २३ ॥ द्वितीया द्वादशी चैव सप्तमी वै तृतीयका ॥ रविर्भौमस्तथा सौरिः

षडेतास्तु त्रिपुष्कराः ॥ २४ ॥ विशाखा कृत्तिका चैव ह्युत्तरे द्वे पुनर्वसुः ॥ पूर्वभाद्रपदा चैव षडेते तु त्रिपुष्कराः ॥ २५ ॥ लाभो हानिर्जयो वृद्धिः पुत्रजन्म तथैव च ॥ नष्टं भ्रष्टं विनष्टं वा तत्सर्व्वं त्रिगुणं भवेत् ॥ २६ ॥ अश्विनी भरणी चैव ह्याश्लेषा पुष्यमेव च ॥ स्वाति-श्चैव विशाखा च श्रवणं सप्तमं पुनः ॥ २७ ॥ एतानि दृढचक्षूंषि पश्यन्ति च दिशो दश ॥ यात्रासु दूरगस्यापि ह्यागमः पुण्यगोचरे ॥ ॥ २८ ॥ आषाढे रेवती चित्रा केकराणि पुनर्व्वसुः ॥ एषु पञ्चसु ऋक्षेषु निर्गतस्यागमो भवेत् ॥२९॥ कृत्तिका रोहिणी सोम्यं फल्गुनी च मघा तथा ॥ मूलं ज्येष्ठानुराधा च धनिष्ठा शततारका ॥ ३० ॥ पूर्व्वभाद्रपदा चैव चिपिटानि च तानि हि ॥ अध्वानं व्रजमानस्य पुनरेवागमो भवेत् ॥ ३१ ॥ हस्त उत्तरभाद्रश्च आर्द्राषाढा तथैव च ॥ नष्टार्थाश्चैव दृश्यन्ते संग्रामो नैव विद्यते ॥ ३२ ॥ पुनर्वक्ष्यामि गण्डान्तमृक्षमध्ये यथा स्थितम् ॥ रेवत्यन्ते चतुर्नाडी अश्विन्यादि चतुष्टयम् ॥ ३३ ॥ उभयोर्यामभागं तु वर्जयेत्तत्प्रयत्नतः ॥ आश्लेषान्ते मघादौ तु घटिकानां चतुष्टयम् ॥ ३४ ॥ द्वितीयं गण्डमाख्यातं तृतीयं भैरवि शृणु ॥ ज्येष्ठाभमूलयोर्म्मध्ये उग्ररूपं तु यामकम् ॥ ३५ ॥ न कुर्य्याच्छुभकर्म्माणि यदीच्छेदात्मजीवितम् ॥ दारके जातकाले च म्रियते पितृमातरौ ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये नक्षत्रनिर्णयो नाम षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ अथ नानाबलानि ॥ ईश्वर उवाच ॥ विष्कुम्भे घटिकास्तिस्रः शूले पञ्च विवर्जयेत् ॥ षट् षट् गण्डेऽतिगण्डे च नव व्याघातवज्रयोः ॥ १ ॥ परिघे चैं व्यतीपाते ह्युभयोरपि तद्दिनम् ॥ वैधृतौ तद्दिने चैव यात्रायुद्धादिकं त्यजेत् ॥२॥ ग्रहैः शुभाशुभं वक्ष्ये देवि मेषादिराशितः ॥ चन्द्रशुक्रौ च जन्मस्थौ वर्जितौ शुभदायकौ ॥ ३ ॥ द्वितीयो मङ्गलोऽथार्कः सौरिश्चैव तु सैंहिकः ॥ द्रव्यनाशमलाभं च ह्याहवे भङ्गमादिशेत् ॥ ४ ॥ सोमो बुधो भृगुर्जीवो द्वितीयस्थाः शुभावहाः ॥ तृतीयस्थो यदा भानुः शनिर्भौमो भृगुस्तथा ॥ ५ ॥ बुधश्चैवेन्दुराहुश्च सर्वे ते फलदा ग्रहाः ॥ बुधशुक्रौ चतुर्थौ तु शेषाश्चैव भयावहाः ॥ ६ ॥ पञ्चमस्थो यदा जीवः शुक्रः सौम्यश्च चन्द्रमाः ॥ ददेत चेप्सितं लाभं षष्ठे स्थाने शुभो रविः ॥ ७ ॥ चन्द्रः सौरिर्म्मङ्गलश्च ग्रहा देवि स्वराशितः ॥ बुधश्च शुभदः षष्ठे त्यजेत्षष्ठं गुरुं भृगुम् ॥ ८ ॥ सप्तमोऽर्कः शनिर्भौमो राहुर्हान्ये सुखाय च ॥ जीवो भृगुश्च सौम्यश्च ज्ञशुक्रौ चाष्टमौ शुभौ ॥ ९ ॥ शेषा ग्रहास्तथा हान्यै ज्ञभृगू नवमौ शुभौ ॥ शेषा हान्यै

च लाभाय दशमो भृगुभास्करौ ॥ १० ॥ शनिर्भौमश्च राहुश्च चन्द्रः सौम्यः शुभावहः ॥ शुभाश्चैकादशे सर्वे वर्जयेद्दशमं गुरुम् ॥ ११ ॥ बुधशुक्रौ द्वादशस्थौ शेषान्द्वादशगांस्त्यजेत् ॥ अहोरात्रे द्वादश स्यू राशयस्तान्वदाम्यहम् ॥ १२ ॥ मीनो मेषोऽथ मिथुनं चतस्रो नाडयो वृषः ॥ षट् कर्कसिंहकन्याश्च तुला पञ्च च वृश्चिकः ॥ १३ ॥ धनुर्नक्रो घटश्चैव सूर्य्यगोराशिराद्यकः ॥ चरस्थिरद्विस्वभावा मेषाद्याः स्युर्यथाक्रमम् ॥ १४ ॥ कुलीरो मकरश्चैव तुलामेषादयश्चराः ॥ चरकार्य्य जयं काममाचरेच्च शुभाशुभम् ॥ १५ ॥ स्थिरो वृषो हरिः कुम्भो वृश्चिकः स्थिरकार्य्यके ॥ शीघ्रः समागमो नास्ति रोगात्तों नैव मुच्यते ॥ १६ ॥ मिथुनं कन्यका मीनो धनुश्च द्विस्वभावकः ॥ द्विस्वभावाः शुभाश्चैते सर्वकार्य्येषु नित्यशः ॥ १७ ॥ यात्रावाणिज्यसंग्रामे विवाहे राजदर्शने ॥ वृद्धिं जयं तथा लाभं युद्धे जयमवाप्नुयात् ॥ १८ ॥ अश्विनी विंशतिराश्च तुरगस्याकृतिर्यथा ॥ यद्यत्र कुरुते वृष्टिमेकरात्रं प्रवर्षति ॥ यमभे तु यदा वृष्टिः पक्षमेकं तु वर्षति ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे नानाबलनिरूपणं नाम सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥ अथ कोटचक्रम् ॥ ईश्वर उवाच ॥ कोटचक्रं प्रवक्ष्यामि चतुरस्रं पुरं लिखेत् ॥ चतुरस्रं पुनर्म्मध्ये तन्मध्ये चतुरस्रकम् ॥ १ ॥ नाडीत्रितयचिह्नाढ्यं मेषाद्याः पूर्वदिङ्मुखाः ॥ कृत्तिका पूर्वभागे तु आश्लेषाग्नेयगोचरे ॥ २ ॥ भरणीं दक्षिणे देया विशाखां नैर्ऋते न्यसेत् ॥ अनुराधां पश्चिमे च श्रवणं वायुगोचरे ॥३॥ धनिष्ठां चोत्तरे न्यस्य ऐशान्यां रेवतीं तथा ॥ बाह्यनाडयां स्थितान्येव अष्टौ ऋक्षाणि यत्नतः ॥ ४ ॥ रोहणीपुष्यफल्गुन्यः स्वाती ज्येष्ठा क्रमेण तु ॥ अभिजिच्छततारा तु अश्विनी मध्यनाडिका ॥ ५ ॥ कोटमध्ये तु या नाडी कथयामि प्रयत्नतः ॥ मृगश्चाभ्यन्तरे पूर्वं तस्याग्नेये पुनर्वसुः ॥ ६ ॥ उत्तराफल्गुनी याम्ये चित्रा नैर्ऋतसंस्थिता ॥ मूलं तु पश्चिमे न्यस्योत्तराषाढां तु वायवे ॥ ७ ॥ पूर्वभाद्रपदा सौम्ये रेवती चेशगोचरे ॥ कोटस्याभ्यन्तरे नाडी ऋक्षाष्टकसमन्विता ॥ ८ ॥ आर्द्रा हस्तस्तथाषाढा चतुष्कं चोत्तरात्रिकम् ॥ मध्ये स्तम्भचतुष्कं तु दद्यात्कोटस्य कोटरे ॥ ९ ॥ एवं दुर्गस्य विन्यासं बाह्ये स्थानं दिशाधिपात् ॥ आगन्तुको यदा योद्धा ऋक्षवान्स्यात्फलान्वितः ॥ १० ॥ कोटमध्ये ग्रहाः सौम्या यदा ऋक्षान्विताः पुनः ॥ जयं मध्यस्थितानां तु भङ्गमागामिनो विदुः ॥११॥ प्रवेशभे प्रवेष्टव्यं निर्गमे भे च निर्गमेत् ॥ भृगुः सौम्यस्तथा

भौम ऋक्षान्तं सकलं यदा ॥ १२ ॥ तदा भङ्गं विजानीयाज्जयमागन्तुकस्य च ॥ प्रवेशर्क्षचतुष्के तु सङ्ग्रामं चारभेद्यदा ॥ तदा सिध्यति तद्दुर्गं न कुर्य्यात्तत्र विस्मयम् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे कोटचक्रं नामाऽष्टाविंशत्यधिकशततमोऽध्यायः ॥ ॥ १२८ ॥ अथाऽर्घकाण्डम् ॥ ईश्वर उवाच ॥ अर्घमाने प्रवक्ष्यामि उल्कापातोऽथ भूश्चला ॥ निर्घातो ग्रहणे वेशो दिशां दाहो भवेद्यदा ॥ १ ॥ लक्ष्येन्मासि मास्यैवं यद्येते स्युश्च चैत्रके ॥ अलङ्कारादि सङ्गृह्य षड्भिर्मासैश्चतुर्गुणम् ॥ २ ॥ वैशाखे चाष्टमे मासि षड्गुणं सर्वसङ्ग्रहम् ॥ ज्येष्ठे मासि तथाषाढे यवगोधूमधान्यकैः ॥ ३ ॥ श्रावणे घृततैलाद्यैराश्विने वस्त्रधान्यकैः ॥ कार्त्तिके धान्यकैः क्रीतैर्म्मासे स्यान्मार्गशीर्षके ॥ ४ ॥ पुष्ये कुङ्कुमगन्धाद्यैर्लाभो धान्यैश्च माघके ॥ गन्धाद्यैः फाल्गुने क्रीतैरर्घकाण्डमुदाहृतम् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये अर्घकाण्डं नामोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥ अथ मण्डलवर्णनम् ॥ ईश्वर उवाच ॥ मण्डलानि प्रवक्ष्यामि चतुर्द्धा विजयाय हि ॥ कृत्तिका च मघा पुष्यं पूर्व्वा चैव तु फाल्गुनी ॥ १ ॥ विशाखा भरणी चैव पूर्वभाद्रपदा तथा ॥ आग्नेयमण्डलं भद्रे तस्य वक्ष्यामि लक्षणम् ॥ २ ॥ यद्यत्र चलते वायुर्वेष्टनं शशिसूर्य्ययोः ॥ भूमिकम्पोऽथ निर्घातो ग्रहणं चन्द्रसूर्य्ययोः ॥ ३ ॥ धूमज्वाला दिशां दाहः केतोश्चैव प्रदर्शनम् ॥ रक्तवृष्टिश्चोपतापः पाषाणपतनं तथा ॥ ४ ॥ नेत्ररोगोऽतिसारश्च अग्निश्च प्रबलो भवेत् ॥ स्वल्पक्षीरास्तथा गावः स्वल्पपुष्पफला द्रुमाः ॥ ५ ॥ विनाशश्चैव सस्यानां स्वल्पवृष्टिं विनिर्दिशेत् ॥ चातुर्व्वर्णाः प्रपीडयन्ते क्षुधार्त्ता आकुला नराः ॥ ६ ॥ सैन्धवा यामुनाश्चैव गुर्जरा भोजवाह्लिकाः ॥ जालन्धरं च काश्मीरं सप्तमं चोत्तरापथम् ॥ ७ ॥ देशाश्चैते विनश्यन्ति तस्मिन्नुत्पातदर्शने ॥ हस्तश्चित्रा मघा स्वाती मृगो वाथ पुनर्वसुः ॥ ८ ॥ उत्तराफल्गुनी चैव अश्विनी च तथैव च ॥ यदात्र भवते किञ्चिद्वायव्यं तं विनिर्दिशेत् ॥ ९ ॥ नष्टधर्म्माः प्रजाः सर्व्वा हाहाभूता विचेतसः ॥ डाहलः कामरूपं च कलिङ्गः कोसलस्तथा ॥ १० ॥ अयोध्या च ह्यवन्ती च नश्यन्ते कोङ्कणान्ध्रकाः ॥ आश्लेषा चैव मूलं तु पूर्व्वाषाढा तथैव च ॥ ११ ॥ रेवती वारुणं ऋक्षं तथा भाद्रपदोत्तरा ॥ यदात्र चलते किञ्चिदारुणं तं विनिर्दिशेत् ॥ १२ ॥ बहुक्षीरघृता गावो बहुपुष्पफला द्रुमाः ॥ आरोग्यं तत्र जायेत बहुसस्या च मेदिनी ॥ १३ ॥ धान्यानि च समर्घाणि सुभिक्षं पार्थिवं भवेत् ॥ परस्परं

नरेन्द्राणां सङ्ग्रामो दारुणो भवेत् ॥१४॥ ज्येष्ठा च रोहिणी चैव अनुराधा च वैष्णवम् ॥ धनिष्ठा चोत्तराषाढा अभिजित्सप्तमं तथा ॥ १५ ॥ यदात्र चलते किञ्चिन्माहेन्द्रं तं विनिर्दिशेत् ॥ प्रजाः समुदितास्तस्मिन्सर्वरोगविवर्जिताः ॥ १६ ॥ सन्धिं कुर्वन्ति राजानः सुभिक्षं पार्थिवं शुभम् ॥ ग्रामस्तु द्विविधो ज्ञेयो मुखपुच्छकरो महान् ॥ १७ ॥ चन्द्रो राहुस्तथादित्य एकराशौ यदि स्थितः ॥ मुखग्रामस्तु विज्ञेयो यात्रित्रे पुच्छ उच्यते ॥ १८ ॥ भानोः पञ्चदशे ह्यृक्षे यदा चरति चन्द्रमाः ॥ तिथिच्छेदे तु सम्प्राप्ते सोमग्रामं विनिर्दिशेत् ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे मण्डलवर्णनं नाम त्रिंशदधिकशततमोऽध्यायः॥ १३० ॥ अथ घातचक्रादिकम् ॥ ईश्वर उवाच ॥ प्रदक्षिणमकारादीन्स्वरान्पूर्वादितो लिखेत् ॥ चैत्राद्यं भ्रमणाच्चक्रं प्रतिपत्पूर्णिमा तिथिः ॥ १ ॥ त्रयोदशी चतुर्दशी ह्यष्टम्येका च सप्तमी ॥ प्रतिपत्त्रयोदश्यन्तास्तिथयो द्वादश स्मृताः ॥ २ ॥ चैत्रचक्रे तु संस्पर्शाज्जयलाभादिकं विदुः॥ विषमे तु शुभं ज्ञेयं समे चाशुभमीरितम् ॥ ३ ॥ युद्धकाले समुत्पन्ने यस्य नाम ह्युदाहृतम् ॥ मात्रारूढं तु यन्नाम ह्यादित्यो गुरुरेव च ॥ ४ ॥ जयस्तस्य सदाकालं संग्रामे चैव भीषणे ॥ ह्रस्वनाम यदा योधो म्रियते ह्यनिवारितः ॥ ५ ॥ प्रथमो दीर्घ आदिस्थो द्वितीयो मध्ये ह्यन्तकः ॥ द्वौ मध्ये न प्रथमान्तौ जायेते नात्र संशयः ॥ ६ ॥ पुनश्चान्ते यदा चादौ स्वसरूढं तु दृश्यते ॥ ह्रस्वस्य मरणं विद्यादीर्घस्यैव जयो भवेत् ॥ ७ ॥ नरचक्रं प्रवक्ष्यामि ह्यृक्षपिण्डात्मकं यथा ॥ प्रतिमामालिखेत्पूर्वं पश्चादृक्षाणि विन्यसेत् ॥ ८ ॥ शीर्षे त्रीणि मुखे चैकं द्वे ऋक्षे नेत्रयोर्न्यसेत् ॥ वेदसङ्ख्यानि हस्ताभ्यां कर्णे ह्यृक्षद्वयं पुनः ॥ ९ ॥ हृदये भूतसङ्ख्यानि षड्ऋक्षाणि तु पादयोः ॥ नाम ह्यृक्षं स्फुटं कृत्वा चक्रमध्ये तु विन्यसेत् ॥ १० ॥ नेत्रे शिरोदक्षकर्णे याम्यहस्ते च पादयोः ॥ हाद्रीवावामहस्ते तु पुनर्गुह्ये तु पादयोः ॥ ११ ॥ यस्मिन्नृक्षे स्थितः सूर्य्यः सौरिर्भौमस्तु सैंहिकः ॥ तस्मिन्स्थाने स्थिते विद्याद्घातमेव न संशयः॥ १२ ॥ जयचक्रं प्रवक्ष्यामि आदिहान्तांश्च वै लिखेत् ॥ रेखास्त्रयोदशालिख्य पञ्चरेखास्तिर्यगालिखेत् ॥ १३ ॥ दिग्ग्रहा मुनयः सूर्य्या ऋत्विसुद्रस्थितिः क्रमात् ॥ मूर्च्छनास्मृतिवेदर्क्षजिना अकडमा ह्यधः ॥ १४ ॥ आदित्याद्याः सप्तान्ते नामान्ते बलिनो ग्रहाः ॥ आदित्यसौरिभौमाख्या जये सौम्याश्च सन्धये ॥ १५ ॥ रेखा द्वादश चोद्धृत्य षट् च याम्यास्तथोत्तराः ॥ मनुश्चैव तु ऋक्षाणि नेत्रे च रविमण्ड-

लम् ॥ १६ ॥ तिथयश्च रसा वेदा, अग्निः सप्तदशाथ वा ॥ वसुरन्ध्राः समाख्याता अकटपानधो न्यसेत् ॥ १७ ॥ एकैकमक्षरं न्यस्य शेषाण्येवं क्रमान्न्यसेत् ॥ नामाक्षरकृतं पिण्डं वसुभिर्भाजयेत्ततः ॥ १८ ॥ वायसान्मण्डलोऽत्युग्रो मण्डलाद्रासभो वरः ॥ रासभाद्वृषभः श्रेष्ठो वृषभात्कुञ्जरो वरः ॥ १९ ॥ कुञ्जराच्च पुनः सिंहः सिंहाच्चैव स्वरुर्वरः ॥ स्वरोश्चैव बली धूम्र एवमादि बलाबलम् ॥ २० ॥ इत्यादि-महापुराणे आग्नेये घातचक्रादिकं नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ अथ सेवाचक्रम् ॥ ईश्वर उवाच ॥ सेवाचक्रं प्रवक्ष्यामि लाभालाभार्थसूचकम् ॥ पिता माता तथा भ्राता दम्पती च विशेषतः ॥ १ ॥ तस्मिंश्चक्रे तु विज्ञेयं यो यस्माल्लभते फलम् ॥ षड्दीर्घाः स्थापयेद्रेखा भिन्नाश्चाष्टौ तु तिर्य्यगाः ॥ २ ॥ कोष्ठकाः पञ्चत्रिंशच्च तेषु वर्णान्समालिखेत् ॥ स्वरान्पञ्च समुद्धृत्य स्पर्शान्पञ्चात्समालिखेत् ॥ ३ ॥ ककारादिहकारान्तान्हीनाङ्गांस्त्रीन्विवर्जयेत् ॥ सिद्धः साध्यः सुसिद्धश्च ह्यरिर्मृत्युश्च नामतः ॥ ४ ॥ अरिर्मृत्युश्च द्वावेतौ वर्जयेत्सर्वकर्म्मसु ॥ एषां मध्ये यदा नाम लक्षयेत्तु प्रयत्नतः ॥ ५ ॥ आत्मपक्षे स्थिताः सत्त्वाः सर्वे ते शुभदायकाः ॥ द्वितीयः पोषकश्चैव तृतीयश्चार्थदायकः ॥ ६ ॥ आत्मनाशश्चतुर्थस्तु पञ्चमो मृत्युदायकः ॥ स्थानमेवार्थलाभाय मित्रभृत्यादिबान्धवाः ॥ ७ ॥ सिद्धः साध्यः सुसिद्धश्च सर्वे ते फलदायकाः ॥ अरिर्मृत्युश्च द्वावेतौ वर्जयेत्सर्वकर्म्मसु ॥ ८ ॥ अकारान्तं यथा प्रोक्तम् अइउएओ विदुस्तथा ॥ पुनश्चैवांशकान्वक्ष्ये वर्गाष्टकसुसंस्कृतान् ॥ ९ ॥ देवा अकारवर्गे तु दैत्याः कवर्गमाश्रिताः ॥ नागाश्चैव चवर्गाः स्युर्गन्धर्वाश्च टवर्गजाः ॥ १० ॥ तवर्गे ऋषयः प्रोक्ताः पवर्गे राक्षसाः स्मृताः ॥ पिशाचाश्च यवर्गे च शवर्गे मानुषाः स्मृताः ॥ ११ ॥ देवेभ्यो बलिनो दैत्या दैत्येभ्यः पन्नगास्तथा ॥ पन्नगेभ्यश्च गन्धर्वा गन्धर्वाद्दषयो वराः ॥ १२ ॥ ऋषिभ्यो राक्षसाः शूरा राक्षसेभ्यः पिशाचकाः ॥ पिशाचेभ्यो मानुषाः स्युर्दुर्बलं वर्जयेद्बली ॥ १३ ॥ पुनर्मित्रविभागं तु ताराचक्रं क्रमाच्छृणु ॥ नामाद्यक्षरमृक्षं तु स्फुटं कृत्वा तु पूर्वतः ॥ १४ ॥ ऋक्षे तु संस्थितास्तारा नवत्रिका यथाक्रमात् ॥ जन्म सम्पद्विपत्क्षेमं नामर्क्षात्तारका इमाः ॥ १५ ॥ प्रत्यरिर्धनदा षष्ठी नैधनामैत्रके परे ॥ परमैत्रान्तिमा तारा जन्मतारा त्वशोभना ॥ १६ ॥ सम्पत्तारा महाश्रेष्ठा विपत्तारा तु निष्फला ॥ क्षेमतारा सर्वकार्य्ये प्रत्यरिर्हार्थनाशिनी ॥ १७ ॥ धनदा राज्यलाभादि नैधना कार्य्यनाशिनी ॥ मैत्रतारा च मित्राय परमित्रा हितावहा ॥ १८ ॥ मात्रा वै स्वर-

सञ्ज्ञा स्यान्नाममध्ये क्षिपेत्प्रिये ॥ विंशत्या च हरेद्भागं यच्छेषं तत्फलं भवेत् ॥ १९ ॥ उभयोर्नाममध्ये तु लक्षयेच्च धनं ऋणम् ॥ हीनमात्रा ऋणं ज्ञेयं धनं मात्राधिकं पुनः ॥ २० ॥ धनेन मित्रता नृणामृणेनैव ह्युदासता ॥ सेवाचक्रमिदं प्रोक्तं लाभालाभादिदर्शकम् ॥ २१ ॥ मेषमिथुनयोः प्रीतिर्मैत्री मिथुनसिंहयोः ॥ तुलासिंहौ महामैत्री चैवं धनुर्घटे पुनः ॥२२॥ मित्रसेवां न कुर्वीत मित्रौ मीनवृषौ मतौ ॥ वृषकर्कटयोर्मैत्री कुलीरघटयोस्तथा ॥ २३ ॥ कन्यावृश्चिकयोरेवं तथा मकरकीटयोः ॥ मीनमकरयोर्मैत्री तृतीयैकादशे स्थिता ॥ २४ ॥ तुलामेषौ महामैत्री विद्विष्टौ वृषवृश्चिकौ ॥ मिथुनधनुषोः प्रीतिः कर्कटमकरयोस्तथा ॥ २५ ॥ मृगकुम्भकयोः प्रीतिः कन्यामीनौ तथैव च ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे सेवाचक्रं नाम द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ अथ नानाबलानि ॥ ईश्वर उवाच ॥ गर्भजातस्य वक्ष्यामि क्षेत्राधिपस्वरूपकम् ॥ नातिदीर्घः कृशः स्थूलः समाङ्गो गौरपैत्तिकः ॥ १ ॥ रक्ताक्षो गुणवाञ्छूरो गृहे सूर्य्यस्य जायते ॥ सौभाग्यो मृदुसारश्च जातश्चन्द्रग्रहोदये ॥ २ ॥ वाताधिकोऽतिलुब्धादिर्जातो भूमिभुवो गृहे ॥ बुद्धिमान्सुभगो मानी जातः सौम्यग्रहोदये ॥ ३ ॥ बृहत्क्रोधश्च सुभगो जातो गुरुगृहे नरः ॥ त्यागी भोगी च सुभगो जातो भृगुग्रहोदये ॥ ४ ॥ बुद्धिमान्सुभगो मानी जातश्चार्किगृहे नरः ॥ सौम्यलग्ने तु सौम्यः स्यात्क्रूरः स्यात्क्रूरलग्नके ॥ ५ ॥ दशाफलं गौरि वक्ष्ये नामराशौ तु संस्थितम् ॥ गजाश्वधनधान्यानि राज्यश्रीर्विपुला भवेत् ॥ ६ ॥ पुनर्धनागमश्चापि दशायां भास्करस्य तु ॥ दिव्यस्त्रादि चन्द्रदशा भूमिलाभः सुखं कुजे ॥ ७ ॥ भूमिर्धान्यं धनं बोधे गजाश्वादिधनं गुरौ ॥ खाद्यपानधनं शुक्रे शनौ व्याध्यादिसंयुतः ॥ ८ ॥ स्त्रानसेवादिना ध्यानं वाणिज्यं राहुदर्शने ॥ वामनाडीप्रवाहे स्यान्नाम चेद्विषमाक्षरम् ॥ ९ ॥ तदा जयति सङ्ग्रामे शनिभौमससैंहिकाः ॥ दक्षनाडीप्रवाहेऽर्के वाणिज्ये चैव निष्फला ॥ १० ॥ सङ्ग्रामे जयमाप्नोति समनामा नरो ध्रुवम् ॥ अथश्चारे जयं विद्यादूर्द्धचारे रणे मृतिम् ॥ ११ ॥ ओं हूं ओं हं ओं स्फे अस्त्रं मोटय ओं चूर्णय चूर्णय ओं सर्वशत्रुं मर्दय मर्दय ओं हूं ओं हः फट् ॥ सप्तवारं न्यसेन्मन्त्रं ध्यात्वात्मानं तु भैरवम् ॥ चतुर्भुजं दशभुजं विंशद्बाह्वात्मकं शुभम् ॥ १२ ॥ शूलखड्गाङ्गहस्तं तु खड्गकट्टारिकोद्यतम् ॥ भक्षणं परसैन्यानामात्मसैन्यपराङ्मुखम् ॥ १३ ॥ सम्मुखं शत्रुसैन्यस्य शतमष्टोत्तरं जपेत् ॥ जपाड्डमरुकाच्छब्दाच्छस्त्रं त्यत्क्वा पलायते ॥ १४ ॥ परसैन्यं शृणु भङ्गप्रयोगेण पुनर्वदे ॥ श्मशानाङ्गन-

मादाय विष्ठां चोलूककाकयोः ॥१५॥ कर्पटे प्रतिमां लिख्य साध्यस्यैवाक्षरं यथा ॥ नामाथ नवधाऽऽलिख्य रिपोश्चैव यथाक्रमम् ॥ १६ ॥ मूर्ध्नि वक्त्रे ललाटे च हृदये गुह्यपादयोः ॥ पृष्ठे तु बाहुमध्ये तु नाम वै नवधा लिखेत् ॥ १७॥ मोटयेद्युद्धकाले तु उच्चरित्वा तु विद्यया ॥ तार्क्ष्यचक्रं प्रवक्ष्यामि जयार्थं त्रिमुखाक्षरम् ॥ १८ ॥ क्षिप ओं स्वाहा तार्क्ष्यात्मा शत्रुरोगविषादिनुत् ॥ दुष्टभूतग्रहार्त्तस्य व्याधितस्यातुरस्य च ॥ १९ ॥ करोति यादृशं कर्म तादृशं सिध्यते खगात् ॥ स्थावरं जङ्गमं चैव लूतांश्च कृत्रिमं विषम् ॥ २० ॥ तत्सर्वं नाशमायाति साधकस्यावलोकनात् ॥ पुनर्ध्यायेन्महातार्क्ष्यं द्विपक्षं मानुषाकृतिम् ॥ २१ ॥ द्विभुजं वक्रचञ्चुं च गजकूर्म्मधरं प्रभुम् ॥ असंख्योरगपादस्थमागच्छन्तं स्वमध्यतः ॥२२॥ ग्रसन्तं चैव खादन्तं तुदन्तं चाहवे रिपून् ॥ चंच्वाहताश्च द्रष्टव्याः केचित्पादैश्च चूर्णिताः ॥ २३ ॥ पक्षपातैश्चूर्णिताश्च केचिन्नष्टा दिशो दश ॥ तार्क्ष्यध्यानान्वितो यश्च त्रैलोक्ये ह्यजयो भवेत् ॥२४॥ पिच्छिकां तु प्रवक्ष्यामि मन्त्रसाधनजां क्रियाम् ॥ ओं हूं पक्षिन् क्षिप ओं हूं सः महाबलपराक्रम सर्वसैन्यं भक्षय २ ओं मर्दय ओं चूर्णय २ ओं विद्रावय २ ओं हूं स्वः ओं भैरवो ज्ञापयति स्वाहा ॥ अमुं चन्द्रग्रहणे तु जप्त्वा कृत्वा तु पिच्छिकाम् ॥ २५ ॥ मन्त्रयेद्भ्रामयेत्सैन्यं सम्मुखं गजसिंहयोः ॥ ध्यानाद्द्रवान्मर्दयेच्च सिंहारूढो मृगाधिकान् ॥ २६ ॥ शब्दाद्भङ्गं प्रवक्ष्यामि दूरं मन्त्रेण बोधयेत् ॥ मातृणां चरुकं दद्यात्कालरात्र्या विशेषतः ॥ २७ ॥ श्वशानभस्मसंयुक्तं मालती चामरी तथा ॥ कार्पासमूलमात्रं तु तेन दूरन्तु बोधयेत् ॥ २८ ॥ ओं अहे हे महेन्द्रि अहे महेन्द्रि हि ओं जहि मसानं हि खाहि २ लिलि किलि ओं हुं फट् ॥ अरेर्नाशं दूरशब्दाज्ञप्तया भङ्गविद्यया ॥ अपराजिता च धुस्तूरस्ताभ्यां भञ्ज तु तिलकेन हि ॥ २९ ॥ ओं किलि किलि विकिलि इच्छाकिलि भूतहनि शङ्खिनि उमे दण्डहस्ते रौद्रि माहेश्वरि उल्कामुखि ज्वालामुखि शङ्कुकर्णे शुष्कजङ्घे अलम्बुषे हर ओं सर्वदुष्टान् खन ओं यन्मां निरीक्षयेद्देवि तांस्तान् मोहय ओं रुद्रस्य हृदये स्थिता रौद्रि सौम्येन भावेन आत्मरक्षां ततः कुरु स्वाहा ॥ बाह्यतो मातृः संलिख्य सकलाकृतिवेष्टिताः ॥ नागपत्रे लिखेद्विद्यां सर्वकार्यार्थसाधनीम् ॥ ३० ॥ हस्ताद्यैर्द्धारिता पूर्वं ब्रह्मरुद्रेन्द्रविष्णुभिः ॥ गुरुसङ्ग्रामकाले तु विद्यया रक्षिताः सुराः ॥ ३१ ॥ रक्षया नारसिंह्या च भैरव्या शक्तिरूपया ॥ सर्वे त्रैलोक्यमोहिन्या गौर्य्या देवासुरे रणे ॥ ३२ ॥ बीजसम्पुटितं नाम कर्णिकायां दलेषु च ॥ पूजाक्रमेण

चाङ्गानि रक्षायन्त्रं स्मृतं शुभे ॥ ३३ ॥ मृत्युञ्जयं प्रवक्ष्यामि नाम संस्कारमध्यगम् ॥ कलाभिर्वेष्टित पश्चात्सकारेण निबोधितम् ॥ ३४ ॥ जकारं बिन्दुसंयुक्तम् ओङ्कारेण समन्वितम् ॥ धकारोदरमध्यस्थं वकारेण निबोधितम् ॥ ३५ ॥ चन्द्रसम्पुटमध्यस्थं सर्वदुष्टविमर्दकम् ॥ अथवा कर्णिकायां च लिखेन्नाम च कारणम् ॥ ३६ ॥ पूर्वे दले नथोङ्कारं स्वदक्षे चोत्तरे लिखेत् ॥ आग्नेय्यादौ च हूङ्कारं दले षोडशके स्वरान् ॥ ३७ ॥ चतुस्त्रिंशद्दले काद्यान्बाह्ये मन्त्रं च मृत्युजित् ॥ लिखेद्वै भूर्जपत्रे तु रोचनाकुङ्कुमेन च ॥ ३८ ॥ कर्पूरचन्दनाभ्यां च श्वेतसूत्रेण वेष्टयेत् ॥ सिक्थकेन परिच्छाद्य कलशोपरि पूजयेत् ॥ ३९ ॥ यन्त्रस्य धारणाद्रोगाः शाम्यन्ति रिपवो मृतिः ॥ विद्यां तु भेलस्वीं वक्ष्ये विप्रयोगमृतेर्हरीम् ॥४०॥ आं वातले वितले विडालमुखि इन्द्रपुत्रि उद्भवो वायुदेवेन खीलि आजी हाजा मयि वाह इत्यादिदुःखानित्यकण्ठोच्चैर्मुहूर्त्तान्वया अह मां यस्मह मुपाडि ओं भेलस्वि ओं स्वाहा ॥ नवदुर्गासप्तजप्तान्मुखस्तम्भो मुखस्थितात् ॥ ओं चण्डि ओं हूं फट् स्वाहा ॥ गृहीत्वा सप्तजप्तं तु खड्गयुद्धेऽपराजितः ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे नानाबलानिरूपणं नाम त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥ अथ त्रैलोक्यविजयविद्या ॥ ईश्वर उवाच ॥ त्रैलोक्यविजयां वक्ष्ये सर्वयन्त्रविमर्दिनीम् ॥ ओं हूं क्ष्रूं ह्रूं ओं नमो भगवति दंष्ट्रिणि भीमवक्त्रे महोग्ररूपे हिलि हिलि रक्तनेत्रे किलि किलि महानिस्वने कुलु ओं विद्युज्जिह्वे कुलु ओं निर्म्मांसे कट कट गोनसाभरणे चिलि चिलि शवमालाधारिणि द्रावय ओं महारौद्रि सार्द्रचर्म्मकृताच्छदे विजृम्भ ओं नृत्य असिलताधारिणि भृकुटीकृतापाङ्गे विषमनेत्रकृताननने वसामेदोविलिप्तगात्रे कह २ ओं हस २ कुद्ध २ ओं नीलजीमूतवर्णे अभ्रमालाकृताभरणे विस्फुर ओं घण्टारवावकीर्णदेहे ओं सिंहासस्थे अरुणवर्णे ओं हां हीं हूं रौद्ररूपे हूं हीं क्ष्रीं ओं हीं हूं ओं आकर्ष ओं धून २ ओं हे हः स्वः वज्रिणि हूं क्ष्रूं क्षां क्रोधरूपिणि प्रज्वल २ ओं भीमभीषणे भिन्द ओं महाकाये च्छिन्द ओं कराल्यिनि किटि २ महाभूतमातः सर्वदुष्टनिवारिणि जये ओं विजये ओं त्रैलोक्यविजये हूं फट् स्वाहा ॥ नीलवर्णां प्रेतसंस्थां विंशहस्तां यजेज्जये ॥ १ ॥ न्यासं कृत्वा तु पञ्चाङ्गं रक्तपुष्पाणि होमयेत् ॥ संग्रामे सैन्यभङ्गः स्यात्त्रैलोक्यविजयापठात् ॥ २ ॥ ओं बहुरूपाय स्तम्भय स्तम्भय ओं मोहय ओं सर्वशत्रून्द्रावय ओं ब्रह्माणमाकर्षय विष्णुमाकर्षय ओं महेश्वरमाकर्षय ओं इन्द्रं टालय ओं पर्वतान् चालय ओं सप्त-

सागरान् शोषय ओं छिन्द छिन्द बहुरूपाय नमः ॥ भुजङ्गं नाम मृन्मूर्त्तिसंस्थं विद्यादारिं ततः ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे त्रैलोक्यविजयविद्या नाम चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ अथ सङ्ग्रामविजयविद्या ॥ ईश्वर उवाच ॥ सङ्ग्रामविजयां विद्यां पदमालां वदाम्यहम् ॥ ओं ह्रीं चामुण्डे श्मशानवासिनि खड्गाङ्गकपालहस्ते महाप्रेतसमारूढे महाविमानसमाकुले कालरात्रि महागणपरिवृते महामुखे बहुभुजे घण्टाडमरुकिङ्किणि अट्टाट्टहासे किलि किलि किलि ओं हूं फट् दंष्ट्राघोरान्धकारिणि नादशब्दबहुले गजचर्म्मप्रावृतशरीरे मांसदिग्धे लेलिहानोग्रजिह्वे महाराक्षसि रौद्रदंष्ट्राकराले भीमाट्टाट्टहासे स्फुरद्विद्युत्प्रभे चल चल ओं चकोरनेत्रे चिलि चिलि ओं ललज्जिह्वे ओं भीं भ्रुकुटीमुखि हुङ्कारभयत्रासिनि कपालमालावेष्टितजटामुकुटशशाङ्कधारिणि अट्टाट्टहासे किलि किलि ओं हूं दंष्ट्राघोरान्धकारिणि सर्वविघ्नविनाशिनि इदं कर्म्म साधय साधय ओं शीघ्रं कुरु कुरु ओं फट् ओं अङ्कुशेन शमय प्रवेशय ओं रङ्ग रङ्ग कम्पय कम्पय ओं चालय ओं रुधिरमांसमद्यप्रिये हन हन ओं कुट्ट कुट्ट ओं छिन्द ओं मारय ओं अनुक्रमय ओं वज्रशरीरं पातय ओं त्रैलोक्यंगतं दुष्टमदुष्टं वा गृहीतमगृहीतं वा आवेशय ओं नृत्य ओं वन्द ओं कोटराक्षि ऊर्ध्वकेशि उलूकवदने करङ्किणि ओं करङ्कमालाधारिणि दह ओं पच पच गृह्ण ओं मण्डलमध्ये प्रवेशय ओं किं विलम्बसि ब्रह्मसत्येन विष्णुसत्येन रुद्रसत्येन ऋषिसत्येन आवेशय ओं किलि किलि ओं खिलि खिलि विलिविलि ओं विकृतरूपधारिणि कृष्णभुजङ्गवेष्टितशरीरे सर्वग्रहावेशनि प्रलम्बौष्ठिनि भ्रूभङ्गललग्ननासिके विकटमुखि कपिलजटे ब्राह्मि भञ्ज ओं ज्वालामुखि स्वन ओं पातय ओं रक्ताक्षि घूर्णय भूमिं पातय ओं शिरो गृह्ण चक्षुर्मीलय ओं हस्तपादौ गृह्ण ओं मुद्रां स्फोटय ओं फट् ओं विदारय ओं त्रिशूलेन च्छेदय ओं वज्रेण हन ओं दण्डेन ताडय ताडय ओं चक्रेण च्छेदय च्छेदय ओं शक्त्या भेदय दंष्ट्रया कीलय ओं कर्णिकया पाटय ओं अङ्कुशेन गृह्ण ओं शिरोऽक्षिज्वरमेकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं डाकिनीस्कन्दग्रहान् मुञ्च मुञ्च ओं पच ओं उत्सादय ओं भूमिं पातय ओं गृह्ण ओं ब्रह्माणि ओं एहि माहेश्वरि एहि ओं कौमारि एहि ओं वैष्णवि एहि ओं वाराहि एहि ओं ऐन्द्रि एहि ओं चामुण्डे एहि ओं रेवति एहि ओं आकाशरेवति एहि ओं हिमवच्चारिणि एहि ओं रुरुमर्द्दिनि असुरक्षयङ्करि आकाशगामिनि पाशेन बन्ध बन्ध अङ्कुशेन कट कट समयं तिष्ठ ओं मण्डलं प्रवेशय ओं गृह्ण मुखम्बन्ध ओं चक्षुर्बन्ध हस्त-

पादौ च बन्ध दुष्टग्रहान्सर्वान्बन्ध ओं दिशो बन्ध ओं विदिशो बन्ध अधस्ताद्बन्ध ओं सर्वं बन्ध ओ भस्मना पानीयेन वा मृत्तिकया सर्षपैर्व्वा सर्वानावेशय ॐ पातय ॐ चामुण्डे किलि किलि ॐ विच्चे हूं फट् स्वाहा ॥ पदमालाजयाख्येयं सर्वकर्म्मप्रसाधिका ॥ १ ॥ सर्वदा होमजप्याद्यैः पाठाद्यैश्च रणे जयः ॥ अष्टाविंशभुजा ध्येया असिखेटकवत्करौ ॥ २ ॥ गदादण्डयुतौ चान्यौ शरचापधरौ परौ ॥ मुष्टिमुद्गरयुक्तौ च शङ्खखड्गयुतौ परौ ॥ ३ ॥ ध्वजवज्रधरौ चान्यौ सचक्रपरशू परौ ॥ डमरूदर्पणाढ्यौ च शक्तिकुन्तधरौ परौ ॥४॥ हलेन मुसलेनाढ्यौ पाशतोमरसंयुतौ ॥ ढक्कापणवसंयुक्तावभयमुष्टिकान्वितौ ॥ ५ ॥ तर्जयन्ती च महिषं घातनी होमतोऽरिजित् ॥ त्रिमध्वाक्त-तिलैर्होमो न देयो यस्य कस्यचित् ॥६॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे संग्रामविजयविद्या नाम पंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ अथ नक्षत्रचक्रम् ॥ ईश्वर उवाच ॥ अथ चक्रं प्रवक्ष्यामि यात्रादौ च फलप्रदम् ॥ अश्विन्यादौ लिखेच्चक्रं त्रिनाडीपरिभू-षितम् ॥ १ ॥ अश्विन्यार्द्रादिभिः पूर्वा ततश्चोत्तरफल्गुनी ॥ हस्तो ज्येष्ठा तथा मूलं वारुणं चाप्यजैकपात् ॥ २ ॥ नाडीयं प्रथमा चान्या याम्यं मृगशिरस्तथा ॥ पुष्यं भाग्यं तथा चित्रा मैत्रं चाप्यं च वासवम् ॥ ३ ॥ अहिर्बुध्न्यं तृतीयाथ कृत्तिका रोहिणी ह्यहिः ॥ चित्रा स्वाती विशाखा च श्रवणा रेवती च भम् ॥ ४ ॥ नाडीत्रितयसञ्जुष्टग्रहाज्ज्ञेयं शुभाशुभम् ॥ चक्रं फणीश्वरं तन्तु त्रिनाडीपरिभूषितम् ॥ ५ ॥ रविभौमार्करादुस्थमशुभं स्याच्छुभं परम् ॥ देशग्रामयुता भर्तृभार्य्याद्या एकशः शुभाः ॥ ६ ॥ अ, भ, कृ, रो, मृ, आ, पु, पु, आ म, पू, उ, ह, चि, स्वा, वि, अ, ज्ये, मू, पू, उ, श्र, ध, श, पू, उ, रे, अत्र सप्तविंशतिनक्षत्राणि ज्ञेयानि ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे नक्षत्रचक्रं नाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ अथ महामारी विद्या ॥ ईश्वर उवाच ॥ महामारीं प्रव-क्ष्यामि विद्यां शत्रुविमर्दिनीम् ॥ ॐ ह्रीं महामारि रक्ताक्षि कृष्णवर्णे यमस्याज्ञाकारिणि सर्वभूतसंहारकारिणि अमुकं हन २ ॐ दह २ ॐ पच २ छिन्द २ ॐ मारय २ ॐ उत्सादय २ ॐ सर्वसत्त्ववशङ्करि सर्वकामिके हूं फट् स्वाहेति ॥ ॐ मारि हृदयाय नमः ॥ ॐ महामारि शिरसे स्वाहा ॐ कालरात्रि शिखायै वौषट् ॐ कृष्णवर्णे खः कवचाय हूं ॥ ॐ तारकाक्षि विद्युज्जिह्वे सर्वसत्त्वभयङ्करि रक्ष २ सर्वकार्य्येषु हं त्रिनेत्राय वषट् ॥ ओं महामारि सर्वभूतदमनि महाकालि अस्त्राय हुं फट् ॥ एष न्यासो महादेवि कर्त्तव्यः साधकेन

तु ॥ १ ॥ शवादिवस्त्रमादाय चतुरस्रं त्रिहस्तकम् ॥ कृष्णवर्णां त्रिवक्त्रां च चतुर्बाहुं समालिखेत् ॥ २ ॥ पटे विचित्रवर्णैश्च धनुः शूलं च कर्तृकाम् ॥ खट्वाङ्गं धारयन्तीं च कृष्णाभं पूर्वमाननम् ॥ ३ ॥ तस्य दृष्टिनिपातेन भक्षयेदग्रतो नरम् ॥ द्वितीयं याम्यभागे तु रक्तजिह्वं भयानकम् ॥ ४ ॥ लेलिह्यनं करालं च दंष्ट्रोत्कटभयानकम् ॥ तस्य दृष्टिनिपातेन भक्षमाणं हयादिकम् ॥ ५ ॥ तृतीयं च मुखं देव्याः श्वेतवर्णं गजादिनुत् ॥ गन्धपुष्पादिमद्वाजैः पश्चिमाभिमुखं यजेत् ॥ ६ ॥ मन्त्रस्मृतेरक्षिरोगाशिरोरोगादि नश्यति ॥ वश्याः स्युर्यक्षरक्षांसि नाशमायान्ति शत्रवः ॥ ७ ॥ समिधो निम्बवृक्षस्य ह्यजारक्तविमिश्रिताः ॥ मारयेत्क्रोधसंयुक्तो होमादेव न संशयः ॥ ८ ॥ परसैन्यमुखो भूत्वा सप्ताहं जुहुयाद्यदि ॥ व्याधिभिर्गृह्यते सैन्यं भङ्गो भवति वैरिणः ॥ ९ ॥ समिधोऽष्टसहस्रं तु यस्य नाम्ना तु होमयेत् ॥ अचिरान्म्रियते सोऽपि ब्रह्मणा यदि रक्षितः ॥ १० ॥ उन्मत्तसमिधो रक्तविषयुक्तसहस्रंकम् ॥ दिनत्रयं ससैन्यश्च नाशमायाति वै रिपुः ॥ ११ ॥ राजकालवणैर्होमाद्भङ्गोऽरेः स्यादिनत्रयात् ॥ खररक्तसमायुक्तहोमादुच्चाटयेद्रिपुम् ॥ १२ ॥ काकरक्तसंमायोगाद्धोमादुत्सादनं ह्यरेः ॥ वधाय कुरुते सर्व्वं यत्किञ्चिन्मनसेप्सितम् ॥ १३ ॥ अथ सङ्ग्रामसमये गजारूढस्तु साधकः ॥ कुमारीद्वयसंयुक्तो मन्त्रसन्नद्धविग्रहः ॥ १४ ॥ दूरशङ्खादिवाद्यानि विद्यया ह्यभिमन्त्रयेत् ॥ महामायापटं गृह्य उच्छेत्तव्यं रणाजिरे ॥ १५ ॥ परसैन्यमुखो भूत्वा दर्शयेत्तं महापटम् ॥ कुमारीभोजयेत्तत्र पंचान्पिण्डीं च भ्रामयेत् ॥ १६ ॥ साधकश्चिन्तयेत्सैन्यं पाषाणमिव निश्चलम् ॥ निरुत्साहं विभग्नं च मुह्यमानं च भावयेत् ॥ १७ ॥ एष स्तम्भो मया प्रोक्तो न देयो यस्य कस्य चित् ॥ त्रैलोक्यविजया माया दुर्गैवं भैरवी तथा ॥ कुब्जिका भैरवी रुद्रो नारसिंहपटादिना ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे महामारीविद्या नाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ अथ षट्कर्माणि ॥ ईश्वर उवाच ॥ षट कर्माणि प्रवक्ष्यामि सर्व्वमन्त्रेषु तच्छृणु ॥ आदौ साध्यं लिखेत्पूर्वं चान्ते मन्त्रसमन्वितम् ॥ १ ॥ पल्लवः स तु विज्ञेयो महोच्चाटकरः परः ॥ आदौ मन्त्रस्ततः साध्यो मध्ये साध्यः पुनर्म्मनुः ॥ २ ॥ योगाख्यः सम्प्रदायोऽयं कुलोत्सादेषु योजयेत् ॥ आदौ मन्त्रपदं दद्यान्मध्ये साध्यं नियोजयेत् ॥ ३ ॥ पुनश्चान्ते लिखेन्मन्त्रं साध्यं मन्त्रपदं पुनः ॥ रोधकः सम्प्रदायस्तु स्तम्भनादिषु योजयेत् ॥ ४ ॥ अधोर्द्ध याम्यवामे

तु मध्ये साध्यं तु योजयेत् ॥ सम्पुटः स तु विज्ञेयो वश्यकार्येषु योजयेत् ॥ ५ ॥ मन्त्राक्षरं यदा साध्यं प्रथितं चाक्षराक्षरम् ॥ प्रथमः सम्प्रदायः स्यादाकृष्टिवशकारकः ॥ ६ ॥ मन्त्राक्षरद्वयं लिख्य एकं साध्याक्षरं पुनः ॥ विदर्भः स तु विज्ञेयो वश्यकार्येषु योजयेत् ॥ ७ ॥ आकर्षणादि यत्कर्म्म वसन्ते चैव कारयेत् ॥ तापज्वरे तथा वश्ये स्वाहा चाकर्षणे शुभम् ॥ ८ ॥ नमस्कारपदं चैव शान्तिवृद्धौ प्रयोजयेत् ॥ पौष्टिकेषु वषट्कारमाकर्षे वश्यकर्म्मणि ॥ ९ ॥ विद्वेषोच्चाटने मृत्यौ फट् स्यात्खण्डी कृतौ शुभे ॥ लाभादौ मन्त्रदीक्षादौ वषट्कारस्तु सिद्धिदः ॥ १० ॥ यमोऽसि यमराजोऽसि कालरूपोऽसि धर्म्मराट् ॥ मया दत्तमिमं शत्रुमाचिरेण निपातय ॥ ११ ॥ निपातयामि यत्नेन निर्वृतो भव साधक ॥ संहृष्टमनसा ब्रूयाद्दोशिकोऽरिप्रसूदनः ॥ १२ ॥ पक्षे शुक्ले यमं प्राच्यं होमादेतत्प्रसिद्ध्यति ॥ आत्मानं भैरवं ध्यात्वा ततो मध्ये कुलेश्वरीम् ॥ १३ ॥ रात्रौ वार्त्तां विजानाति आत्मनश्च परस्य च ॥ दुर्गे दुर्गे रक्षणीति दुर्गां प्राच्यांरिहा भवेत् ॥ १४ ॥ जप्त्वा हसक्षमलवरयूं भैरवीं घातयेदरिम् ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे षट्कर्मनिरूपणं नामाष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ अथ पष्टिसंवत्सरफलम् ॥ ईश्वर उवाच ॥ षष्टयब्दानां प्रवक्ष्यामि शुभाशुभमतः शृणु ॥ प्रभवे यज्ञकर्म्माणि विभवे सुखिनो जनाः ॥ १ ॥ शुक्ले च सर्वसस्यानि प्रमोदेन प्रमोदिताः ॥ प्रजापतौ प्रवृद्धिः स्यादङ्गिरा भोगवर्द्धनः ॥ २ ॥ श्रीमुखे वर्द्धते लोको भावे भावः प्रवर्द्धते ॥ यूना च पूर्यते शुक्रो धाता सर्वौषधीकरः ॥ ३ ॥ ईश्वरः क्षेमस्वारोग्यः बहुधान्यसुभिक्षदः ॥ प्रमाथी मध्यवर्षस्तु विक्रमे सस्यसम्पदः ॥ ४ ॥ वृषो वृष्यति सर्वीश्च चित्रभानुश्च चित्रताम् ॥ स्वर्भानुः क्षेममारोग्यं तारणे जलदाः शुभाः ॥ ५ ॥ पार्थिवे सस्यसम्पत्तिरतिवृष्टिस्तथा जयः ॥ सर्वजित्युत्तमा वृष्टिः सर्वधारी सुभिक्षदः ॥ ६ ॥ विरोधी जलदान्हन्ति विकृतश्च भयङ्करः ॥ खरे भवेत्पुमान्वीरो नन्दने नन्दते प्रजा ॥ ७ ॥ विजयः शत्रुहन्ता च शत्रुरोगादि मर्दयेत् ॥ ज्वरार्त्तो मन्मथे लोको दुष्करे दुष्कराः प्रजाः ॥८॥ दुर्मुखे दुर्मुखो लोको हेमलम्बे न सम्पदः ॥ संवत्सरो महादेवि विलम्बस्तु सुभिक्षदः ॥ ९ ॥ विकारी शत्रुकोपाय विजये सर्वदा क्वचित् ॥ प्लवे प्लवन्ति तोयानि शोभने शुभकृत्प्रजा ॥ १० ॥ राक्षसे निष्ठुरो लोको विविधं धान्यमानने (ले) ॥ सुवृष्टिः पिङ्गले क्वापि काले शुक्लो घनक्षयः ॥ ११ ॥ सिद्धार्थे सिध्यते सर्वं रौद्रे रौद्रं प्रवर्त्तते ॥ दुर्म्मतौ मध्यमा वृष्टिर्दुन्दुभिः क्षेमधान्यकृत् ॥ १२ ॥ स्रवन्ते रुधिरोद्गारी रक्ताक्षः

तु ॥ १ ॥ शवादिवस्त्रमादाय चतुरस्रं त्रिहस्तकम् ॥ कृष्णवर्णां त्रिवक्त्रां च चतुर्बाहुं समालिखेत् ॥ २ ॥ पटे विचित्रवर्णैश्च धनुः शूलं
च कर्तृकाम् ॥ खड्गाङ्गं धारयन्तीं च कृष्णाभं पूर्वमाननम् ॥ ३ ॥ तस्य दृष्टिनिपातेन भक्षयेदग्रतो नरम् ॥ द्वितीयं याम्यभागे तु
रक्तजिह्वं भयानकम् ॥ ४ ॥ लेलिह्यनं करालं च दंष्ट्रोत्कटभयानकम् ॥ तस्य दृष्टिनिपातेन भक्षमाणं हयादिकम् ॥ ५ ॥ तृतीयं च
मुखं देव्याः श्वेतवर्णं गजादिनुत् ॥ गन्धपुष्पादिमध्वाज्यैः पश्चिमाभिमुखं यजेत् ॥ ६ ॥ मन्त्रस्मृतेरक्षिरोगाशिरोरोगादि नश्यति ॥
वश्याः स्युर्यक्षरक्षांसि नाशमायान्ति शत्रवः ॥ ७ ॥ समिधो निम्बवृक्षस्य घृताक्तरुधिरमिश्रिताः ॥ मारयेत्क्रोधसंयुक्तो होमादेव न
संशयः ॥ ८ ॥ परसैन्यमुखो भूत्वा सप्ताहं जुहुयाद्यदि ॥ व्याधिभिर्गृह्यते सैन्यं भङ्गो भवति वैरिणः ॥ ९ ॥ समिधोऽष्टसहस्रं तु यस्य
नाम्ना तु होमयेत् ॥ अचिरान्म्रियते सोऽपि ब्रह्मणा यदि रक्षितः ॥ १० ॥ उन्मत्तसमिधो रक्तविषयुक्तसहस्रकम् ॥ दिनत्रयं ससैन्यश्च
नाशमायाति वै रिपुः ॥ ११ ॥ राजिकालवणैर्होमाद्भङ्गोऽरेः स्यादिनत्रयात् ॥ खरकर्कसमायोगाद्धोमादुत्सादनं ह्यरेः ॥ वधाय कुरुते सर्वं यत्किञ्चिन्मनसेप्सितम् ॥ १२ ॥ अथ सङ्ग्रामसमये
काकरक्तसमायोगाद्धोमादुच्चाटयेद्रिपुम् ॥ १३ ॥ गजारूढस्तु साधकः ॥ कुमारीद्वयसंयुक्तो मन्त्रमन्त्रद्वयग्रहः ॥ १४ ॥ दूरशङ्खादिवाद्यानि विद्यया ह्यभिमन्त्रयेत् ॥
महामायापटं गृह्य उच्छेत्तव्यं रणाजिरे ॥ १५ ॥ परसैन्यमुखो भूत्वा दर्शयेत्तं महापटम् ॥ कुमारीभोजयेत्तत्र पंचान्पिण्डीं च
भ्रामयेत् ॥ १६ ॥ साधकश्चिन्तयेत्सैन्यं पाषाणमिव निश्चलम् ॥ निरुत्साहं विभग्नं च मुह्यमानं च भावयेत् ॥ १७ ॥ एष स्तम्भो मया
प्रोक्तो न देयो यस्य कस्य चित् ॥ त्रैलोक्यविजया माया दुर्गैवं भैरवी तथा ॥ कुब्जिका भैरवी रुद्रो नारसिंहपटादिना ॥ १८ ॥ इत्यादिम-
हापुराणे आग्नेये युद्धजयार्णवे महामारीविद्या नाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ अथ षट्कर्माणि ॥ ईश्वर उवाच ॥ षट्
कर्माणि प्रवक्ष्यामि सर्वमन्त्रेषु तच्छृणु ॥ आदौ साध्यं लिखेत्पूर्वं चान्ते मन्त्रसमन्वितम् ॥ १ ॥ पल्लवः स तु विज्ञेयो महोच्चाटकरः परः ॥
आदौ मन्त्रस्ततः साध्यो मध्ये साध्यः पुनर्मनुः ॥ २ ॥ योगाख्यः सम्प्रदायोऽयं कुलोत्सादेषु योजयेत् ॥ आदौ मन्त्रपदं दद्यान्मध्ये साध्यं
नियोजयेत् ॥ ३ ॥ पुनश्चान्ते लिखेन्मन्त्रं साध्यं मन्त्रपदं पुनः ॥ रोधकः सम्प्रदायस्तु स्तम्भनादिषु योजयेत् ॥ ४ ॥ अधोर्द्ध याम्यवामे

तु मध्ये साध्यं तु योजयेत् ॥ सम्पुटः स तु विज्ञेयो वश्यकार्येषु योजयेत् ॥ ५ ॥ मन्त्राक्षरं यदा साध्यं प्रथितं चाक्षराक्षरम् ॥ प्रथमः सम्प्रदायः स्यादाकृष्टिवशकारकः ॥ ६ ॥ मन्त्राक्षरद्वयं लिख्य एकं साध्याक्षरं पुनः ॥ विदर्भः स तु विज्ञेयो वश्यकार्येषु योजयेत् ॥ ७ ॥ आकर्षणादि यत्कर्म्म वसन्ते चैव कारयेत् ॥ तापज्वरे तथा वश्ये स्वाहा चाकर्षणे शुभम् ॥ ८ ॥ नमस्कारपदं चैव शान्तिवृद्धौ प्रयोजयेत् ॥ पौष्टिकेषु वषट्कारमाकर्षे वश्यकर्म्मणि ॥ ९ ॥ विद्वेषोच्चाटने मृत्यौ फट् स्यात्खण्डी कृतौ शुभे ॥ लाभादौ मन्त्रदीक्षादौ वषट्कारस्तु सिद्धिदः ॥ १० ॥ यमोऽसि यमराजोऽसि कालरूपोऽसि धर्म्मराट् ॥ मया दत्तमिमं शत्रुमाचिरेण निपातय ॥ ११ ॥ निपातयामि यत्नेन निर्वृतो भव साधक ॥ संहृष्टमनसा ब्रूयादोशिकोऽरिनिसूदनः ॥ १२ ॥ पक्षे शुक्ले यमं प्राच्यं होमादेतत्प्रसिद्ध्यति ॥ आत्मानं भैरवं ध्यात्वा ततो मध्ये कुलेश्वरीम् ॥ १३ ॥ रात्रौ वार्त्तां विजानाति आत्मनश्च परस्य च ॥ दुर्गे दुर्गे रक्षणीति दुर्गा प्राच्यांरिहा भवेत् ॥ १४ ॥ जप्त्वा हृत्सक्षमलवरयूं भैरवीं घातयेदरिम् ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे षट्कर्मनिरूपणं नामाष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ अथ षष्टिसंवत्सरफलम् ॥ ईश्वर उवाच ॥ षष्टिवर्षाणां प्रवक्ष्यामि शुभाशुभमतः शृणु ॥ प्रभवे यज्ञकर्म्माणि विभवे सुखिनो जनाः ॥ १ ॥ शुक्ले च सर्वसस्यानि प्रमोदेन प्रमोदिनाः ॥ प्रजापतौ प्रवृद्धिः स्यादाङ्गिरा भोगवर्द्धनः ॥ २ ॥ श्रीमुखे वर्द्धते लोको भावे भावः प्रवर्द्धते ॥ यूना च पूर्यते शुक्रो धाता सर्वौषधीकरः ॥ ३ ॥ ईश्वरः क्षेमस्वारोग्यः बहुधान्यसुभिक्षदः ॥ प्रमाथी मध्यवर्षन्तु विक्रमे सस्यसम्पदः ॥ ४ ॥ वृषो वृष्यति सर्वांश्च चित्रभानुश्च चित्रताम् ॥ स्वर्भानुः क्षेममारोग्यं तारणे जलदाः शुभाः ॥ ५ ॥ पार्थिवे सस्यसम्पत्तिरतिवृष्टिस्तथा जयः ॥ सर्वजित्युत्तमा वृष्टिः सर्वधारी सुभिक्षदः ॥ ६ ॥ विरोधी जलदान्हन्ति विकृतश्च भयङ्करः ॥ खरे भवेत्पुमान्वीरो नन्दने नन्दते प्रजा ॥ ७ ॥ विजयः शत्रुहन्ता च शत्रुरोगादि मर्दयेत् ॥ ज्वरार्त्तो मन्मथे लोको दुष्करे दुष्कराः प्रजाः ॥ ८ ॥ दुर्मुखे दुर्मुखो लोको हेमलम्बे न सम्पदः ॥ संवत्सरो महादेवि विलम्बस्तु सुभिक्षदः ॥ ९ ॥ विकारी शत्रुकोपाय विजये सर्वदा क्वचित् ॥ प्लवे प्लवन्ति तोयानि शोभने शुभकृत्प्रजा ॥ १० ॥ राक्षसे निष्ठुरो लोको विविधं धान्यमानने (ले) ॥ सुवृष्टिः पिङ्गले क्वापि काले शुक्लो धनक्षयः ॥ ११ ॥ सिद्धार्थे सिध्यते सर्वं रौद्रे रौद्रं प्रवर्त्तते ॥ दुर्म्मतौ मध्यमा वृष्टिर्दुन्दुभिः क्षेमधान्यकृत् ॥ १२ ॥ स्रवन्ते रुधिरोद्गारी रक्ताक्षः

क्रोधनो जयः ॥ क्षये क्षीणधनो लोकः षष्टिसंवत्सराणि तु ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे षष्टिसंत्सरफलनिरूपणं नामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ अथ (पो०) वश्यादियोगाः ॥ ईश्वर उवाच ॥ वश्यादियोगान्वक्ष्यामि लिखेद्व्यष्टपदे त्विमान् ॥ भृङ्गराजः सहदेवी मयूरस्य शिखा तथा ॥ १ ॥ पुत्रं जीवकृतं जाली ह्यधःपुष्पा रुदन्तिका ॥ कुमारी रुद्रजटा स्याद्विष्णुक्रान्ता सितोऽर्ककः ॥ २ ॥ लज्जालुका मोहलना कृष्णधुस्तूरसाह्वया ॥ गोरक्षः कर्कटी चैव मेषशृङ्गी स्नुही तथा ॥ ३ ॥ ऋत्वि (१६) जो वह्नयो (३) नागा (८) पक्षौ (२) मुनि (७) मनू (१४) शिवः (११) ॥ वसवो (८) दि (१०) ग्रसा (६) वेदा (४) ग्रह (९) र्तु (६) रवि (१२) चन्द्रमाः (१) ॥ ४ ॥ नियतश्च (१९) क्रमाद्भागा ओषधीनां प्रदक्षिणम् ॥ प्रथमेन चतुष्केण धूपश्चोद्वर्त्तनं परम् ॥ ५ ॥ तृतीयेनाञ्जनं कुर्यात्स्नानं कुर्य्याच्चतुष्कतः ॥ भृङ्गराजानुलोमाच्च चतुर्द्धा लेपनं स्मृतम् ॥ ६ ॥ मुनयो दक्षिणे पार्श्वे युगाद्याश्चोत्तराः स्मृताः ॥ भुजगाः पादसंख्याश्च ह्यीश्वरा मूर्द्धि संस्थिताः ॥ ७ ॥ मध्येन सार्कशाशिभिर्धूपः स्यात्सर्वकार्य्यके ॥ एतैर्विलिप्तदेहस्तु त्रिदशैरपि पूज्यते ॥ ८ ॥ धूपस्तु षोडशाद्यस्तु गृहाद्युद्वर्त्तने स्मृतः ॥ युगाद्याश्चाञ्जने प्रोक्ता बाणाद्याः स्नानकर्म्मणि ॥ ९ ॥ रुद्राद्या भक्षणे प्रोक्ताः पक्षाद्याः पानके स्मृताः ॥ ऋत्विग्वेदर्तुनयनैस्तिलकं लोकमोहनम् ॥ १० ॥ सूर्य्यत्रिदशपक्षैश्च शैलैः स्त्री लेपतो वशा ॥ चन्द्रेन्द्रफणिरुद्रैश्च योनिलेपाद्वशाः स्त्रियः ॥ ११ ॥ तिथिदिग्युगबाणैश्च गुटिका तु वशङ्करी ॥ भक्ष्ये भोज्ये तथा पाने दातव्या गुटिका वशे ॥ १२ ॥ ऋत्विग्ग्रहाक्षिशैलैश्च शास्त्रस्तम्भे मुखे धृता ॥ शैलेन्द्रवेदरन्ध्रैश्च ह्यङ्गलेपाज्जले वसेत् ॥ १३ ॥ बाणाक्षिमनुरुद्रैश्च गुटिका क्षुत्तृषादिनुत् ॥ त्रिषोडशादिशाबाणैर्लेपात्स्त्री दुर्भगा शुभा ॥ १४ ॥ त्रिदशाक्षिदिशानेत्रैर्लेपात्क्रीडेच्च पन्नगैः ॥ त्रिदशाक्षेशभुजगैर्लेपात् स्त्री सूयते सुतम् ॥ १५ ॥ सतदिड्मुनिरन्ध्रैश्च द्यूतजिद्वस्त्रलेपतः ॥ त्रिदशाक्ष्याब्धिमुनिभिर्वज्रलेपाद्गतो सुतः ॥ १६ ॥ ग्रहाब्धिसर्पत्रिदशैर्गुटिका स्याद्वशङ्करी ॥ ऋत्विक्पदास्थितौषध्याः प्रभावः प्राणिपादिनः ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे षोडशपदकं (व० यो०) नाम चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ अथषट्त्रिंशत्पदकम् ॥ ईश्वर उवाच ॥ षट्त्रिंशत्पदसंस्थानामौषधीनां वदे फलम् ॥ अमरीकरणं नृणां ब्रह्मरुद्रेन्द्रसेवितम् ॥ १ ॥ हरीतक्यक्षिधात्र्यश्च मरीचं

पिप्पली शिफा ॥ वह्निः शुण्ठी पिप्पली च गुडूचीवचनिम्बकाः ॥ २ ॥ वासकः शतमूली च सैन्धवं सिन्धुवारकम् ॥ कण्टकारी गोक्षुरका बिल्वं पौनर्नवं बला ॥ ३ ॥ एरण्डमुण्डी रुचको भृङ्गः क्षारोऽथ पर्पटः ॥ धान्याको जीरकश्चैव शतपुष्पी जवानिका ॥ ४ ॥ विडङ्गः खादिरश्चैव कृतमालो हरिद्रया ॥ वचा सिद्धार्थ एतानि षट्त्रिंशत्पदकानि हि ॥ ५ ॥ क्रमादेकादिसञ्ज्ञानि ह्यौषधानि महान्ति हि ॥ सर्वरोगहराणि स्युरमरीकरणानि च ॥ ६ ॥ वलीपालितभेत्तृणि सर्वकोष्ठगतानि तु ॥ एषां चूर्णे च वटिका रसेन परिभाविता ॥ ७ ॥ अवलेहः कषायो वा मोदका गुडखण्डकः ॥ मधुतो घृततो वापि घृतं तैलमथापि वा ॥ ८ ॥ सर्वात्मनोपयुक्तं हि मृतसञ्जीवनं भवेत् ॥ कर्षार्द्धं कर्षमेक वा पलार्द्धं पलमेककम् ॥ ९ ॥ यथेष्टाचारनिरतो जीवेद्वर्षशतत्रयम् ॥ मृतसञ्जीवनीकल्पे योगो नास्मात्परोऽस्ति हि ॥ १० ॥ प्रथमान्नवकाद्योगात्सर्वरोगैः प्रमुच्यते ॥ द्वितीयाच्च तृतीयाच्च चतुर्थान्मुच्यते रुजः ॥ ११ ॥ एवं पञ्चकाच्च प्रथमाद्द्वितीयाच्च तृतीयतः ॥ चतुर्थात्पञ्चमात्षष्ठात्तथा नवचतुष्कतः ॥ १२ ॥ एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टमतोऽनिलात् ॥ अग्निभास्करषड्विंशसप्तविंशैश्च पित्ततः ॥ १३ ॥ बाणर्तुशैलवसुभिस्तिथिभिर्मुच्यते कफात् ॥ वेदाग्निभिर्बाणगुणैः षड्गुणैः स्याद्वृशे घृते ॥ १४ ॥ ग्रहादिग्रहणान्तैश्च सर्वरोगैर्विमुच्यते ॥ एकद्वित्रिरसैः शैलैर्वसुग्रहशिवैः क्रमात् ॥ १५ ॥ द्वात्रिंशत्तिथिसूर्य्यैश्च नात्र कार्य्या विचारणा ॥ षट्त्रिंशत्पदकज्ञानं न देयं यस्य कस्यचित् ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे षट्त्रिंशत्पदकं नामैकचत्वारिंशदधिकशततमोऽध्यायः ॥१४१॥ अथ मन्त्रौषधादिः ॥ ईश्वर उवाच ॥ मन्त्रौषधानि चक्राणि वक्ष्ये सर्वप्रदानि च ॥ चौरनाम्नो वर्णगणो द्विघ्नो मात्राश्चतुर्गुणाः ॥ १ ॥ नाम्ना हृते भवेच्छेषः चौरोऽथ जातकं वदे ॥ प्रश्ने ये विषमा वर्णास्ते गर्भे पुत्रजन्मदाः ॥ २ ॥ नामवर्णैः समैः काणो वामऽक्षि विषमैः पुनः ॥ दक्षिणाक्षि भवेत्काणं स्त्रीपुन्नामाक्षरस्य च ॥ ३ ॥ मात्रावर्णाश्चतुर्निघ्ना वर्णपिण्डे गुणे कृते ॥ समे स्त्री विषमे ना स्याद्विशेषे च मृतिः स्त्रियाः ॥ ४ ॥ प्रथमं रूपशून्येऽथ प्रथमं म्रियते पुमान् ॥ प्रश्नं सूक्ष्माक्षरैर्गृह्य द्रव्यैर्भागेऽखिले मतम् ॥ ५ ॥ शनिचक्रं प्रवक्ष्यामि तस्य दृष्टिं परित्यजेत् ॥ राशिस्थः सप्तमे दृष्टिश्चतुर्दशशतोर्द्धिका ॥ ६ ॥ एकद्व्यष्टद्वादशगः पाददृष्टिश्च तं त्यजेत् ॥ दिनाधिपः प्रहरभाक् शेषा यामार्द्धभागिनः ॥ ७ ॥ शनिभागं त्यजेद्बुद्धे दिनरात्रिं वदामि ते ॥

रवौ पूर्वेऽनिले मन्दे गुरौ याम्येऽनल भृगौ ॥ ८ ॥ अग्नौ कुजे भवेत्सौम्ये स्थिते राहुबुधे सदा ॥ फणिराहुस्तु प्रहरमैशे वह्नौ च राक्षसे ॥ ९ ॥ वायौ संवेष्टयित्वा च शत्रुं हन्तीशसम्मुखम् ॥ तिथिराहुं प्रवक्ष्यामि पूर्णिमाग्नेयगोचरे ॥ १० ॥ अमावास्या वायवे च राहुः सम्मुखशत्रुहा ॥ काद्या जान्ताः सम्मुखे स्युः साद्या दान्ताश्च दक्षिणे ॥ ११ ॥ शुक्ले त्यजेत्कुजगुणान्धाद्या मान्ताश्च पूर्वतः ॥ याद्या हान्ता उत्तरे स्युस्तिथिदृष्टिं विवर्जयेत् ॥ १२ ॥ पूर्वाश्च दक्षिणाग्नितरो रेखा वै मूलभेदके ॥ सूर्य्यराश्यादि संलिख्य दृष्टौ हानिर्जयोऽन्यथा ॥ १३ ॥ विष्टिराहुं प्रवक्ष्यामि अष्टौ रेखास्तु पातयेत् ॥ शिवाद्यमं यमाद्वायुं वायोरिन्द्रं ततोऽम्बुपम् ॥ १४ ॥ नैर्ऋताच्च नयेच्चन्द्रं चन्द्रादग्निं ततो जले ॥ जलादीशे चरेद्राहुर्विष्टया सह महाबलः ॥ १५ ॥ ऐशान्यां च तृतीयादौ सप्तम्यादौ च याम्यके ॥ एवं कृष्णे सिते पक्षे वायौ राहुश्च हन्त्यरीन् ॥ १६ ॥ इन्द्रादीन्भैरवादींश्च ब्रह्माद्यादीन्ग्रहादिकान् ॥ अष्टाष्टकं च पूर्वादौ याम्यादौ वातयोगिनीम् ॥ १७ ॥ यां दिशं वहते वायुस्तत्ररथो घातयेदरीन् ॥ दृढीकरणमाख्याग्ये कण्ठे बाह्वादिधारिता ॥ १८ ॥ पुष्योद्धृता कण्डलक्ष्यं वारयेच्छरपुङ्खिका ॥ तथापराजिता पाटा द्वाभ्यां खड्गं निवारयेत् ॥ १९ ॥ ओं नमो भगवति वज्रशृङ्खले हन २ ॐ भक्ष भक्ष ॐ खाद ॐ अरे रक्तं पिब कपालेन रक्ताक्षि रक्तपटे भस्माङ्गि भस्मलिप्तशरीरे वज्रायुधे वज्रप्राकारानिचिते पूर्वां दिशं बन्ध २ ॐ दक्षिणां दिशं बन्ध २ ॐ पाश्चिमां दिशं बन्ध २ उत्तरां दिशं बन्ध २ नागान् बन्ध २ नागपत्नीर्बन्ध २ ओं असुरान् बन्ध २ ॐ यक्षराक्षसपिशाचान् बन्ध २ ॐ प्रेतभूतगन्धर्वादयो ये केचिदुपद्रवास्तेभ्यो रक्ष २ ॐ ऊर्ध्वं रक्ष २ अधो रक्ष २ ॐ क्षुरिकं बन्ध २ ॐ ज्वल महाबले घटि २ ॐ मोटि २ सटावालिवज्राग्निवज्रप्राकारे हूं फट् ह्रीं हूं श्रीं फट् ह्रीं हः फूं फें फः सर्वग्रहेभ्यः सर्वव्याधिभ्यः सर्वदुष्टोपद्रवेभ्यो ह्रीं अशेषेभ्योरक्ष २ ग्रहज्वरादिभूतेषु सर्वकर्मसु योजयेत् ॥ २० ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे मन्त्रौषधादिर्नाम द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ अथकुब्जिकापूजा ॥ ईश्वर उवाच ॥ कुब्जिकाक्रमपूजां च वक्ष्ये सर्वार्थसाधनीम् ॥ यया जिताः सुरा देवैः शस्त्राद्यै राज्यसंयुतैः ॥ १ ॥ मायाबीजं च गुह्याङ्गे षट्कमस्त्रं करे न्यसेत् ॥ काली कालीति हृदयं दुष्टचाण्डालिका शिरः ॥ २ ॥ ह्रीं स्फें ह स ख क छ ड ओंकारो भैरवः शिखा ॥ भेलखी कवचं दूती नेत्रास्या रक्तचण्डिका ॥ ३ ॥ ततो गुह्यकुब्जिकास्त्रं मण्डले स्थानके यजेत् ॥ आग्नौ कूर्चशिरो रुद्रे नैर्ऋत्येऽथ शिखा-

निले ॥ ४ ॥ कवचं मध्यतो नेत्रं ह्यस्त्रं दिक्षु च मण्डले ॥ द्वात्रिंशता कार्णिकायां स्त्रों ह्सक्षमलनववषट्सचात्ममन्त्रबीजकम् ॥५॥ ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ॥ वाराही चैव माहेन्द्री चामुण्डा चाण्डिकेन्द्रकात् ॥ ६ ॥ यजेद्वलकसहाच्छिवेन्द्राग्नियमेऽग्निपे ॥ जले तु कुसुममालामद्रिकाणां च पञ्चकम् ॥ ७ ॥ जालन्धरं पूर्णगिरिं कामरूपं क्रमाद्यजेत् ॥ मरुदीशाग्निनैर्ऋत्ये मध्ये वै वज्रकुञ्जिकाम् ॥ ८ ॥ अनादिविमलः पूज्यः सर्वज्ञाविमलस्ततः ॥ प्रासिद्धविमलश्चाथ संयोगविमलस्ततः ॥ ९ ॥ समयाख्योऽथ विमलो ह्येतद्विमलपञ्चकम् ॥ मरुदीशाननैर्ऋत्ये वह्नौ चोत्तरशृङ्गके ॥ १० ॥ कुब्जार्था खिड्डिनी पष्ठा सोपन्ना सुस्थिरा तथा ॥ रत्नसुन्दरी चेशाने शृङ्गे चाष्टादिनाथकाः ॥११॥ मित्र ओडीशषष्ठ्याख्यो वर्षा अग्न्यम्बुपेऽनिले ॥ भवेद्गगनरत्नं स्याच्चाप्ये कवचरत्नकम् ॥१२॥ बुं मर्त्यः पञ्चनामाख्यो मरुदीशानवह्निगाः ॥ याम्याग्नेये पञ्चरत्नं ज्येष्ठा रौद्री तथाऽन्तिका ॥१३॥ निम्नो ह्यासां महावृद्धाः पञ्चप्रणवतोऽखिलाः ॥ सप्तविंशत्यष्टविंशभेदात्सम्पूजनं द्विधा ॥१४॥ ओं ऐं गूं क्रमगणपतिं प्रणवं बटुकं यजेत् ॥ चतुरस्रे मण्डले च दक्षिणे गणपं यजेत्॥१५॥ वामे च बटुकं कोणे गुरून्पोडशनाथकान् ॥ वायव्यादौ चाष्टदश प्रतिषट्कोणके ततः ॥ १६ ॥ ब्रह्माद्याश्चाष्ट परितस्तन्मध्ये च नवात्मकः ॥ कुञ्जिका कुलटा चैव क्रमपूजा तु सर्वदा ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे कुञ्जिकाजा नाम त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ ॥ १४३ ॥ अथ कुञ्जिकापूजा ॥ ईश्वर उवाच ॥ श्रीमतीं कुञ्जिकां वक्ष्ये धर्मार्थादिजयप्रदाम् ॥ पूजयेन्मूलमन्त्रेण परिवारयुतेन वा ॥ १ ॥ ॐ ऐं ह्रीं श्रीं स्त्रैं हं ह्सक्षमलवरयऊम्भगवति अम्बिके ह्रीं ह्रीं क्ष्रीं क्ष्रौं क्ष्रूं क्रीं कुञ्जिके ह्रीं ॐ डःभणनमे अघोरमुखि वां छ्रां छ्रीं किलि किलि क्ष्रौं विच्चे ल्यों श्रीं क्रों ॐ ह्रों ऐं वज्रकुञ्जिनि स्त्रीं त्रैलोक्याकर्षिणि ह्रीं कामाङ्गद्राविणि ह्रीं स्त्रीं महाक्षोभकारिणि ऐं ह्रीं क्ष्रौं ऐं ह्रीं श्रीं फें क्ष्रौं नमो भगवति क्ष्रौं कुञ्जिके ह्रीं ह्रीं क्रैं डःभणनमे अघोरमुखि छ्रां छ्रां विच्चे ओं किलि किलि ॥ कृत्वा कराङ्गन्यासं च सन्ध्यावन्दनमाचरेत् ॥ कामा ज्येष्ठा तथा रौद्री सन्ध्यात्रयमनुक्रमात् ॥ २ ॥ कुलवागीशि विद्महे महाकालीति धीमहि तन्नः काली प्रचोदयात् ॥ मन्त्राः पञ्च प्रणवाद्याः पादुकां पूजयामि च ॥ मध्ये नाम चतुर्थ्यन्तं द्विनवात्मकबीजकाः ॥ ३ ॥ नमोन्ता वाऽथ षष्ठ्या तु सर्वे ज्ञेया वदामि तान् ॥ कौलीशनाथो मुकला जन्मतः कुञ्जिका ततः ॥ ४ ॥ श्रीकण्ठनाथः कौलेशो गगनानन्दना-

थकः ॥ चटुला देवी मैत्रीशी करालो तूर्णनाथकः ॥ ५ ॥ अतलदेवी श्रीचन्द्रादेवीत्यन्तास्तत्तस्त्विमे ॥ भगात्मपुङ्गणदेवमोहनीं पादुकां यजेत् ॥ ६ ॥ अतीतभुवनानन्दरत्नाढ्यां पादुकां यजेत् ॥ ब्रह्मज्ञानाऽथ कमला परमा विद्यया सह ॥ ७ ॥ विद्यादेवीगुरु-शुद्धिस्त्रिशुद्धिं प्रवदामि ते ॥ गगनश्चटुली चात्मा पद्मानन्दो मणिः कला ॥ ८ ॥ कमलो माणिक्यकण्ठो गगनः कुमुदस्ततः ॥ श्रीपद्मो भैरवानन्दो देवः कमल इत्यतः ॥ ९ ॥ शिवो भवोऽथ कृष्णश्च नव सिद्धाश्च षोडश ॥ चन्द्रपूरोऽथ गुल्मश्च शुभः कामोऽतिमुक्तकः ॥ १० ॥ कण्ठो वीरः प्रयोगोऽथ कुशलो देवभोगकः ॥ विश्वदेवः खड्गदेवो रुद्रो धाताऽसिरेव च ११ ॥ मुद्रास्फोटो वंशपूरो भोजः षोडश सिद्धकाः ॥ समयान्यस्तु देहस्तु षोढा न्यासेन यन्त्रितः ॥ १२ ॥ प्रक्षिप्य मण्डले पुष्पं मण्डलान्यथ पूजयेत् ॥ अनन्तं च महान्तां च सर्वदा शिवपादुकाम् ॥ १३ ॥ महाव्याप्तिं च शून्यं च पञ्चतत्त्वात्ममण्डलम् ॥ श्रीकण्ठनाथपादुकां शङ्करानन्तकौ यजेत् ॥ ॥ १४ ॥ सदाशिवः पिंगलश्च भृग्वानन्दश्च नाथकः ॥ लांगूलानन्दसंवर्तौ मण्डलस्थानके यजेत् ॥ १५ ॥ नैर्ऋत्ये श्रीमहाकालः पिनाकी च महेन्द्रकः ॥ खड्गो भुजङ्गो बाणश्च अधासिः शब्दको वशः ॥ १६ ॥ आज्ञारूपो नन्दरूपो बलिं दत्त्वा क्रमं यजेत् ॥ ह्रीं खं खं हूँ ह्रौं बटुकाय अरु २ अर्घं पुष्पं धूपं दीपं गन्धं बलिं पूजां गृह्ण २ नमस्तुभ्यम् ॥ ओं ह्रां ह्रीं ह्रूं क्षें क्षेत्रपालाय अवतर २ महा-कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख एह्योहि गन्धं पुष्पं बलिपूजां गृह्ण २ खः खः ओं कः ओं लः ओं महाडामराधिपतये स्वाहा ॥ बलिशेषेऽथ यजेत् ह्रीं हूं ह्रां श्रीं वै त्रिकूटकम् ॥ १७ ॥ वामे च दक्षिणे ह्यग्रे याम्ये निशानाथपादुकाः ॥ दक्षे तमोऽरिनाथस्य ह्यग्रे कालानलस्य च ॥ १८ ॥ उड्डियाणं जालन्धरं पूर्णं वै कामरूपकम् ॥ गगनानन्ददेवं च स्वर्गानन्दं सवर्गकम् ॥ १९ ॥ परमानन्ददेवं च सत्यानन्दस्य पादुकाम् ॥ नागानन्दं च वर्गाख्यमुक्तं ते रत्नपञ्चकम् ॥ २० ॥ सौम्ये शिवे यजेत्षट्कं सुरनाथस्य पादुकाम् ॥ श्री-मत्समयकोटीशं विद्याकोटीश्वरं यजेत् ॥ २१ ॥ कोटीशं बिन्दुकोटीशं सिद्धकोटीश्वरं तथा ॥ सिद्धचतुष्कमाग्नेय्याममरीशेश्वरं यजेत् ॥ २२ ॥ चक्रीशनाथं कुरङ्गेशं वृत्रेशं चन्द्रनाथकम् ॥ यजेद्गन्धादिभिश्चैतान्याम्ये विमलपञ्चकम् ॥२३॥ यजेदनादिविमलं सर्व्वज्ञविमलं ततः ॥ यजेद्योगीशविमलं सिद्धाख्यं समयाख्यकम् ॥ २४ ॥ नैर्ऋत्ये चतुरो देवान्यजेत्कन्दर्पनाथकम् ॥ पूर्वाः शक्तीश्च सर्वाश्च कुब्जिका

पादुकां यजेत् ॥ २५ ॥ नवात्मकेन मन्त्रेण पञ्चप्रणवकेन वा ॥ सहस्राक्षमनवद्यं विष्णुं शिवं सदा यजेत् ॥ २६ ॥ पूर्व्वोच्छिवान्तं ब्रह्मादिं ब्रह्माणी च महेश्वरी ॥ कौमारी वैष्णवी चैव वाराही शक्रशक्तिका ॥ २७ ॥ चामुण्डा च महालक्ष्मीः. पूर्व्वादीशान्तमर्च्चयेत् ॥ डाकिनी राकिणी पूज्या लाकिनी काकिनी तथा ॥ २८ ॥ शाकिनी याकिनी पूज्या वायव्यादुग्रपट्सु च ॥ यजेद्ध्यात्वा ततो देवीं द्वात्रिंशद्वर्णकात्मकाम् ॥ २९ ॥ पञ्चप्रणवकेनापि हींकारेणाथ वा यजेत् ॥ नीलोत्पलदलश्यामा पङ्क्ति षट्प्रकारिका ॥ ३० ॥ चिच्छक्तिरष्टादशारव्या बाहुद्वादशसंयुता ॥ सिंहासनसुखासीना प्रेतपद्मोपरि स्थिता ॥ ३१ ॥ कुलकोटिसहस्राढ्या ककोंटो मेखलास्थितः ॥ तक्षकेणोपरिष्टाच्च गले हारश्च वासुकिः ॥ ३२ ॥ कुलिकः कर्णयोर्यस्याः कूर्म्मः कुण्डलमण्डलः ॥ भुवोः पद्मो महापद्मो वामे नागः कपालकः ॥ ३३ ॥ अक्षसूत्रं च खड्गाङ्गं शङ्खं पुस्तं च दक्षिणे ॥ त्रिशूलं दर्पणं खड्गं रत्नमालाङ्कुशं धनुः ॥ ३४ ॥ श्वेतमूर्द्धमुखं देव्या ह्यूर्द्धश्वेतं तथापरम् ॥ पूर्व्वास्यं पाण्डुरं क्रोधि दक्षिणं कृष्णवर्णकम् ॥ ३५ ॥ हिमकुन्देन्दुभं सौम्यं ब्रह्मा पादतले स्थितः ॥ विष्णुस्तु जघने रुद्रो हृदि कण्ठे तथेश्वरः ॥ ३६ ॥ सदाशिवो ललाटे स्याच्छिवस्तस्योर्द्धतः स्थितः ॥ आघूर्णिता कुब्जिकैवं ध्येया पूजादिकर्म्मसु ॥ ॥ ३७ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे कुब्जिकापूजा नाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥१४४॥ अथ मालिनीनानामन्त्राः ॥ ईश्वर उवाच ॥ नानामन्त्रान्प्रवक्ष्यामि पीठा न्यासपुरःसरम् ॥ न्यासस्त्रिधा तु पीठा स्युः शाक्तशाम्भवयामलाः ॥ १ ॥ शाम्भवे शब्दराशिः षट् पीठशग्रन्थिरूपवान् ॥ त्रिविद्या तद्वहो न्यासस्त्रितत्त्वात्माभिधानकः ॥ २ ॥ चतुर्थो वनमालायाः श्लोकद्वादशरूपवान् ॥पञ्चमो पञ्चरत्नात्मा नवात्मा षष्ठ ईरितः ॥ ३ ॥ शाक्ते पक्षे च मालिन्यास्त्रिविद्यात्मा द्वितीयकः ॥ अघोर्य्यष्टकरूपोऽन्यो द्वादशाङ्गश्चतुर्थकः ॥ ४ ॥ पञ्चमस्तु षडङ्गः स्याच्छक्तिश्चान्यास्त्रचण्डिका ॥ क्रीं ह्रौं क्रीं श्रीं कूं फट् त्रयं स्यात्तूर्य्याख्यं सर्वसाधकम् ॥ मालिन्या नादिफान्तं स्यान्नादिनी च शिखा स्मृता ॥ अग्रसनी शिरासि स्याच्छिरोमालानिवृत्तिः शः ॥ ६ ॥ ट शान्तिश्च शिरो भूयाच्चामुण्डा च त्रिनेत्रगा ॥ ढ प्रियदृष्टिर्द्विनेत्रे च नासागा गुह्यशक्तिनी ॥ ७ ॥ न नारायणी द्विकर्णे च दक्षकर्णे त मोहनी ॥ ज प्रज्ञा वामकर्णस्था वक्त्रे च वाग्रिणी स्मृता ॥८॥ क करालो दक्षदंष्ट्रा वामांसा स कपालिनी ॥ ग शिवा ऊर्द्धदंष्ट्रा स्याद् घ घोरा वाम-

दंष्ट्रिका ॥ ९ ॥ उ शिखा दन्तविन्यासा ईं माया जिह्वया स्मृता ॥ अ स्यात्रागेश्वरी वाचि व कण्ठे शिखिवाहिनी ॥ १० ॥ भ भीषणी दक्षस्कन्धे वायुवेगा म वामके ॥ ङनामा दक्षबाहौ तु ढ वामे च विनायका ॥ ११ ॥ प पूर्णिमा द्विहस्ते तु ओकाराद्यङ्गुलयिके ॥ अं दर्शनी वामाङ्गुल्यः अः स्यात्सञ्जीवनी करे ॥ १२ ॥ ट कपालिनी कपालं शूलदण्डे त दीपनी ॥ त्रिशूले ज जयन्ती स्याद्वृद्धिर्यः साधनी स्मृता ॥ १३ ॥ जीवेशपरमाख्या स्याद् हः प्राणे चाम्बिका स्मृता ॥ दक्षस्तने छ शरीरा न वामे पूतना स्तने ॥ १४ ॥ अ स्तनक्षीर आ मोटा स्तम्बोदर्य्युदरे च थ ॥ नाभौ संहारिका क्ष स्यान्महाकालीनितम्बकम् ॥ १५ ॥ गुह्ये सकुसुममाला प शुक्रे शुक्रदेविका ॥ ऊरुद्वये त तारा स्यादज्ञानादक्षजानुनि ॥ १६ ॥ वामे स्यादौ क्रियाशक्तिरौ गायत्री च जङ्घगा ॥ ओं सावित्री वामजङ्घा दक्षे दो दोहनी पदे ॥ १७ ॥ फ फेत्कारी वामपदे नवात्मा मालिनी मनुः ॥ अ श्रीकण्ठाः शिखायां स्यादा वक्त्रे स्यादनन्तकः ॥ ॥ १८ ॥ इ सूक्ष्मो दक्षनेत्रे स्यादि त्रिमूर्त्तिस्तु वामके ॥ उ दक्षकर्णेऽमरीश ऊ कर्णेघाशकोऽपरे ॥ १९ ॥ ऋ भावभूतिनासाग्रे वामनासा तिथीश ॠ ॥ ऌ स्थाणुर्दक्षगण्डे स्याद्वामगण्डे हरश्च ॡ ॥ २० ॥ कटीशो दन्तपङ्क्तावे भूतीशश्चोर्द्धदन्त ऐ ॥ सद्योजात ओ अधरे ऊर्द्धौष्ठेऽनुग्रहीश औं ॥ २१ ॥ अं क्रूरो घाटकायां स्यादः महासेनजिह्वया ॥ क क्रोधीशो दक्षस्कन्धे खश्चण्डीशश्च बाहुषु ॥ २२ ॥ पञ्चान्तकः कूर्परे ग घ शिखी दक्षकङ्कणे ॥ ङ एकपादश्चाङ्गुल्यो वामस्कन्धे च कूर्म्मकः ॥ २३ ॥ छ एकनेत्रो बाहौ स्याच्चतुर्वक्त्रो ज कूर्परे ॥ झ राजसः कङ्कणगः ञ सर्वकामदोऽङ्गुली ॥ २४ ॥ ट सोमेशो नितम्बे स्याद्दक्ष ऊरुष्ठ लाङ्गली ॥ ड दारुको दक्षजानौ जङ्घा ढोर्द्धजलेश्वरः ॥ २५ ॥ ण उमाकान्तकोऽङ्गुल्यस्त आषाढी नितम्बके ॥ थ दण्डी वाम ऊरौ स्याद् भिदो वामजानुनि ॥ २६ ॥ ध मीनो वामजंघायां न मेषश्चरणाङ्गुली ॥ प लोहितो दक्षकुक्षौ फ शिखी वामकुक्षिगः ॥ २७ ॥ ब गलण्डः पृष्ठवंशे भ नाभौ च द्विरण्डकः ॥ म महाकालो हृदये य वाणीशस्त्वविस्मृतः ॥ २८ ॥ र रक्ते स्याद्रुजङ्गेशो ल पिनाकी च मांसके ॥ व खड्गीशः स्वात्मनि स्याद्वक्त्वास्थिनि शः स्मृतः ॥ २९ ॥ ष श्वेतश्चैव मज्जायां स भृगुः शुक्रधातुके ॥ प्राणे ह नकुलीशः स्यात् क्ष संवर्त्तश्च काशगः ॥ ३० ॥ रुद्रशक्ती प्रपूज्य ह्रीं बीजेनाखिलमाप्नुयात् ॥ इत्यादिमहापुराणे आग्नेये मालिनीमन्त्रो नाम पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

अष्टाष्टकदेव्यः ॥ ईश्वर उवाच ॥ त्रिखण्डीं सम्प्रवक्ष्यामि ब्रह्मविष्णुमहेश्वरीम् ॥ ओं नमो भगवते रुद्राय नमः नमश्चामुण्डे नमश्चाकाशमातॄणां सर्व्वकामार्थसाधनीनामजरामरीणां सर्व्वत्राप्रतिहतगतीनां स्वरूपरूपपरिवर्त्तिनीनां सर्व्वसत्त्ववशीकरणोत्सादनोन्मूलनसमस्तकर्म्मप्रवृत्तानां सर्वमातृर्गुह्यं हृदयं परमसिद्धं परकर्म्मच्छेदनं परमसिद्धिकरं मातॄणां वचनं शुभम् ॥ ब्रह्मखण्डपदे रुद्रैरेकविंशाधिकं शतम् ॥ १ ॥ तद्यथा ओं नमश्चामुण्डे ब्रह्माणि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे माहेश्वरि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे कौमारि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे वैष्णवि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे वाराहि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे इन्द्राणि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे चण्डि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ ओं नमश्चामुण्डे ईशानि अघोरे अमोघे वरदे विच्चे स्वाहा ॥ यथाक्षरपदानि हि विष्णुखण्ड द्वितीयकम् ॥ ओं नमश्चामुण्डे ऊर्द्धकेशि ज्वालितशिखरे विद्युज्जिह्वे तारकाक्षि पिङ्गलभ्रुवे विकृतदंष्ट्रे कुब्जे ओं मांसशोणितसुरासवप्रिये हस २ ओं नृत्य २ ओं विजृम्भय २ ओं मायात्रैलोक्यरूपसहस्रपरिवर्त्तिनीनां ओं बन्ध २ ओं कुट्ट २ चिरि २ हिरि २ भिरि २ त्रासनि २ भ्रामणि २ ओं द्रावणि २ क्षोभणि २ मारणि २ संजीवनि २ हेरि २ गेरि २ घेरि २ ओं मुरि २ ओं नमो मातृगणायें नमो नमो विच्चे ॥ एकत्रिंशत्पदं शम्भोः शतमन्त्रैकसप्ततिः ॥ २ ॥ हे घों पञ्चप्रणवाद्यन्तां त्रिखण्डीञ्च जपेद्यजेत् ॥ हे घों श्रीकुब्जिकाहृदयं पदमन्त्रौ तु योजयेत् ॥ ३ ॥ अकुलादित्रिमध्यस्थं कुलादेश्च त्रिमध्यगम् ॥ मध्यमादित्रिमध्यस्थं पिण्डं पादे त्रिमध्यगम् ॥ ४ ॥ त्र्यार्द्धमात्रासंयुक्तं प्रणवाद्यं शिखा शिवाम् ॥ ओं क्षौं शिखाभैरवाय नमः ॥ स्त्रीं स्त्रीं स्त्रें सबीजत्र्यक्षरः ॥ हां हीं हैं निर्बीजं त्र्यर्णं द्वात्रिंशद्वर्णकं परम् ॥ ५ ॥ क्षादयश्च ककारान्ता अकुला च कुलक्रमात् ॥ शाशिनी भावनी चैव पावनी शिव इत्यतः ॥ ६ ॥ गान्धारी णश्च पिण्डाक्षी चपला गजजिह्विका ॥ मभृपा भयसारा स्यान्मध्यमा फोऽजरा य च ॥ ७ ॥ कुमारी कालरात्री न सङ्कटा दंष्ट्र कालिका ॥ फ शिवा भवघोरा ण ठ बीभत्सा त विद्युता ॥ ८ ॥ ठ विश्वम्भरा शंसिन्या ढ ज्वालामालया तथा ॥ करालो दुर्जया रङ्गी वामा ज्येष्ठा च रौद्र्यपि ॥ ९ ॥ त्र काली क कुलालम्बी ह्यनुलोमा वद पिण्डिनी ॥ आ वेदिनी इरूपी वै शान्तिर्मूर्त्तिः कलाकुला ॥ १० ॥ ऋ खड्गिनी उ बालिना ऌ कुलौ

लृ तथा यादे ॥ सुभगा वेदनादिन्या करालो अं च मध्यमा ॥ ११ ॥ अः अपेतरया पीठे पूज्याश्च शक्तयः क्रमात् ॥ स्वा स्त्रीं स्त्रीं महाभैरवाय नमः । अक्षोद्या वृक्षकर्णी च राक्षसी क्षपणक्षया ॥ १२॥ पिङ्गाक्षी चाक्षया क्षेमा ब्रह्माण्यष्ट दलसंस्थिताः ॥ इला लीलावती नीला लङ्का लङ्केश्वरी तथा ॥ १३ ॥ लालसा विमला माला माहेश्वर्य्यष्टके स्थिताः ॥ हुताशना विशालाक्षी हुङ्कारी वडवामुखी ॥ १४ ॥ हाहारवा तथा क्रूरा क्रोधा बाला सुरानना ॥ कौमार्य्यो देहसम्भूताः पूजिताः सर्वसिद्धिदाः ॥ १५ ॥ सर्वज्ञा तरला तारा ऋग्वेदा च हयानना ॥ सारासारस्वयंग्राहा शाश्वती वैष्णवीकुले ॥ १६ ॥ तालुजिह्वा च रक्ताक्षी विद्युज्जिह्वा करङ्किणी ॥ मेघनादा प्रचण्डाग्नी कालकर्णी कलिप्रया ॥ १७ ॥ वाराही कुलसम्भूताः पूजनीया जयार्थिना ॥ चम्पा चम्पावती चैव प्रचम्पा ज्वलितानना ॥ १८ ॥ पिशाची पिचुवक्त्रा च लोलुपा ऐन्द्री स सम्भवाः ॥ पवनी यामनी चैव वामनी दमनी तथा ॥ १९ ॥ बिन्दुवेला बृहत्कुक्षी विद्युता विश्वरूपिणी ॥ चामुण्डा कुलसम्भूता मण्डले पूजिता जये ॥ २० ॥ यमजिह्वा जयन्ती च दुर्जया च यमान्तिका ॥ विडाली रेवती चैव जया च विजया तथा ॥ महालक्ष्मीकुले जाता अष्टाष्टकमुदाहृतम् ॥ २१॥ इत्यादिमहापुराणे आग्नेये अष्टाष्टकादिकं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ अथ त्वरितापूजादिः ॥ ईश्वर उवाच ॥ ओं गुह्यकुब्जिके फट् हुं मम सर्वोपद्रवान् यन्त्रमन्त्रतन्त्रचूर्णप्रयोगादिकं येन कृतं कारितं कुरुते करिष्यति कारयिष्यति तान्सर्वान् हन हन दंष्ट्राकरालिनि हें हीं हुं गुह्यकुब्जिकायै स्वाहा हों ओं खें वों गुह्यकुब्जिकायै नमः ॥ हीं सर्वजनक्षोभणी जनानुकर्षिणी ततः ओं खें ख्यां सर्वजनवशङ्करी तथा स्याज्जनमोहिनी ॥ १ ॥ ओं ख्यों सर्वजनस्तम्भनी ऐं खं ख्रां क्षोभणी तथा ॥ ऐं त्रितत्त्वं बीजं श्रेष्ठकुल पञ्चाक्षरी तथा ॥ २ ॥ फं श्रीं क्षीं श्रीं हीं क्षें वच्छे क्षे क्षे हूं फट् हीं नमः ॥ ओं हां क्षे वच्छे क्षे क्षो हीं फट् नवेयं त्वरिता पुनर्ज्ञेयाऽर्चिता जये ॥ हों सिंहायेत्यासनं स्यात् हीं क्षे हृदयमीरितम् ॥ वच्छेऽथ शिरसे स्वाहा त्वरितायाः शिवे स्मृतः ॥ ७ ॥ क्षें हीं शिखायै वौषट् स्याद्भवेत् क्षें कवचाय हुम् ॥ कु नेत्रत्रयाय वौषट् हीमन्तश्च फडन्तकम् ॥ ४ ॥ हींकारी खेचरी चण्डा छेदनी क्षोभणी क्रिया ॥ क्षेमकारी च हींकारी फट्कारी नवशक्तयः ॥ ५ ॥ अथ दूतीः प्रवक्ष्यामि पूज्या इन्द्रादिगाश्च ताः ॥ हीं नले बहुतुण्डे

च खगे ह्रीं खेचर ज्वालिनी ज्वल ख खे छ छे शववि भीषणे च छ चण्डे छेदनि करालि ख खे छे खे खरहाङ्गी ह्रीं क्षे वक्षे कपिले ह क्षे ह्रूं कुन्तेजोवति रौद्रि मातः ह्रीं फे वे फे फे वक्के बरी फे पुटि पुटि घोरे ह्रूं फट् ब्रह्मवेताले मध्ये ॥ गुह्याङ्गानि च तत्त्वानि त्वरितायाः पुनर्वदे ॥ ६ ॥ ह्रौं ह्रूं हः हृदये प्रोक्तं ह्रौं हश्च शिरः स्मृतम् ॥ फां ज्वल ज्वलेति च शिखा वर्म्म इले हं हुंम् ॥ ७ ॥ क्रौं क्षूं श्रीं नेत्रमित्युक्तं क्षौं अस्त्रं वै ततश्च फट् ॥ हुं खे वच्छे क्षेः ह्रीं क्षें हुं फट् वा ॥ हुं शिरश्चैव मध्ये स्यात्पूर्वादौ खे सदाशिवे ॥ व ईशः छे मनोन्मनी मक्षे ताक्षौं ह्रौं च माधवः ॥ ८ ॥ क्षें ब्रह्मा हुं तथादित्यो दारुणं फट् स्मृताः सदा ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे त्वरितापूजादिकं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥ अथ संग्रामविजयपूजा ॥ ईश्वर उवाच ॥ ओं डे ख ख्यां सूर्य्याय संग्रामविजयाय नमः ह्रां ह्रीं ह्रूं ह्रें ह्रौं ह्रः षडङ्गानि तु सूर्य्यस्य संग्रामे जयदस्य हि ॥ ओं ह्रं खं खखोल्काय स्वाहा ॥ स्फूं ह्रूँ हुं क्रूं ओं ह्रों क्रेम् ॥ प्रभूतं विमलं सारमाराध्यं परमं सुखम् ॥ १ ॥ धर्म्मज्ञानं च वैराग्यमैश्वर्य्याद्यष्टकं यजेत् ॥ अनन्तासनं सिंहासनं पद्मासनमतः परम् ॥ ॥ २ ॥ कर्णिकाकेसराण्येव सूर्यसोमाग्निमण्डलम् ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ ३ ॥ अमोघा वैद्युता पूज्या नवमी सर्वतोमुखी ॥ सत्त्वं रजस्तमश्चैव प्रकृतिं पुरुषं तथा ॥ ४ ॥ आत्मानञ्चान्तरात्मानं परमात्मानमर्चयेत् ॥ सर्वे विन्दुसमायुक्ता मायानिलसमन्विताः ॥ ५ ॥ उषा प्रभा च सन्ध्या च साया माया बलान्विता ॥ विन्दुविष्णुसमायुक्ता द्वारपालास्तथाष्टकम् ॥ ६ ॥ सूर्य्यं चण्डं प्रचण्डं च पूजयेद्वन्धकादिभिः ॥ पूजया जपहोमाद्यैर्युद्धादौ विजयो भवेत् ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे संग्रामविजयपूजा नामाऽष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ अथ लक्षहोमकोटिहोमः ॥ ईश्वर उवाच ॥ होमाद्रणादौ विजयो राज्यान्तिर्विघ्ननाशनम् ॥ कृच्छ्रेण शुद्धिमुत्पाद्य प्राणायामशतेन च ॥ १ ॥ अन्तर्जले च गायत्रीं जप्त्वा षोडशधाऽचरेत् ॥ प्राणायामांश्च पूर्वाह्णे जुहुयात्पावके हविः ॥ २ ॥ भैक्ष्ययावकभक्षी च फलमूलाशनोऽपि वा ॥ क्षीरसघृताहार एकमाहारमाश्रयेत् ॥ ३ ॥ यावत्समाप्तिर्भवति लक्षहोमस्य पार्वति ॥ दक्षिणा लक्षहोमान्ते गावो वस्त्राणि काञ्चनम् ॥४॥ सर्वोत्पातसमुत्पत्तौ पञ्चभिर्दशभिर्दिनैः ॥ नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति ॥ ५ ॥ माङ्गल्यं परमं नास्ति यदस्मादतिरिच्यते ॥ कोटिहोमं तु यो राजा कारयेत्पूर्ववत्

द्विजैः ॥ ६ ॥ न तस्य शत्रवः सङ्घे जातु तिष्ठन्ति कर्हिचित् ॥ न तस्य मारको देशे व्याधिर्वा जायते क्वचित् ॥ ७ ॥ अतिवृष्टिर-
नावृष्टिर्मूषकाः शलभाः शुकाः ॥ राक्षसाद्याश्च शाम्यन्ति सर्वे च रिपवो रणे ॥ ८ ॥ कोटिहोमे तु वरयेद्ब्राह्मणान्विंशतिं तथा ॥ शतं
चाथ सहस्रं वा यथेष्टां भूतिमाप्नुयात् ॥ ९ ॥ कोटिहोमं तु यः कुर्य्याद्द्विजो भूपोऽथ वा च विट् ॥ यदिच्छेत्प्राप्नुयात्तत्तत्सशरीरो दिवं
व्रजेत् ॥ १० ॥ गायत्र्या ब्रह्ममन्त्रैर्वा कुष्माण्डीजातवेदसैः ॥ ऐन्द्रवारुणवायव्ययाम्याग्नेयैश्च वैष्णवैः ॥ ११ ॥ शाक्तैर्यैः शाम्भवैः
सौरैर्मन्त्रैर्होमार्चनात्ततः ॥ अयुतेनाल्पसिद्धिः स्याल्लक्षहोमोऽखिलार्त्तिनुत् ॥ १२ ॥ सर्वपीडादिनाशाय कोटिहोमोऽखिलार्थदः ॥ यव-
व्रीहितिलक्षीरघृतकुशप्रसाति (काशि) काः ॥ १३ ॥ पङ्कजोशीरबिल्वाम्रदला होमे प्रकीर्त्तिताः ॥ अष्टहस्तप्रमाणेन कोटिहोमेषु खात-
कम् ॥ १४ ॥ (तस्मादर्द्धप्रमाणेन कोटिहोमेषु खातकम्) ॥ १४ ॥ तस्मादर्द्धप्रमाणेन लक्षहोमे विधीयते ॥ होमोऽयुतेन लक्षेण कोट्या-
ज्याद्यैः प्रकीर्त्तितः ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये युद्धजयार्णवे अयुतलक्षकोटिहोमो नामैकोनपञ्चादशदधिकशततमोऽध्यायः ॥
॥ १४९ ॥ अथ मन्वन्तराणि ॥ अग्निरुवाच ॥ मन्वन्तराणि वक्ष्यामि ह्याद्यः स्वायम्भुवो मनुः ॥ अग्नीध्राद्यास्तस्य सुता यमो नाम तदा
सुराः ॥ १ ॥ और्वाद्याश्च सप्तर्षय इन्द्रश्चैव शनक्रतुः ॥ पारावताः सतुषिता देवाः स्वारोचिषेऽन्तरे ॥ २ ॥ विपश्चित्तत्र देवेन्द्र ऊर्जस्त-
म्भादयो द्विजाः ॥ चैत्रकिम्पुरुषाः पुत्रास्तृतीयश्चोत्तमो मनुः ॥ ३ ॥ सुशान्तिरिन्द्रो देवाश्च सुधामाद्या वसिष्ठजाः ॥ सप्तर्षयोऽजाद्याः
पुत्राश्चतुर्थस्तामसो मनुः ॥ ४ ॥ स्वरूपाद्याः सुरगणाः शिखिरिन्द्रः सुरेश्वरः ॥ ज्योतिर्द्धामादयो विप्रा नव ख्यातिमुखाः सुताः ॥ ५ ॥
रैवते विनथश्चेन्द्रो ह्यमिताभास्तथा सुराः ॥ हिरण्यरोमाद्या मुनयो बलबन्धादयः सुताः ॥६॥ मनोजवश्चाक्षुषेऽथ इन्द्रः स्वात्यादयः सुराः ॥
सुमेधाद्या महर्षयः पूरुप्रभृतयः सुताः ॥७॥ विवस्वतः सुतो विप्रः श्राद्धदेवो मनुस्ततः ॥ आदित्यवसुरुद्राद्या देवा इन्द्रः पुरन्दरः ॥ ८ ॥
वसिष्ठः काश्यपोऽथात्रिर्जमदग्निः सगौतमः ॥ विश्वामित्रभरद्वाजौ मुनयः सप्त साम्प्रतम् ॥ ९ ॥ इक्ष्वाकुप्रमुखाः पुत्रा अंशेन हरिराभवत् ॥
स्वायम्भुवे मानसोऽभूदजितस्तदनन्तरे ॥ १० ॥ सत्यो हरिर्देवरो वै वैकुण्ठो वामनः क्रमात् ॥ छायाजः सूर्यपुत्रस्तु भविता चाष्टमो
मनुः ॥ ११ ॥ पूर्वस्य च सवर्णोऽसौ सावर्णिर्भविताष्टमः ॥ सुतपाद्या देवगणा दीप्तिमद्भौणिकादयः ॥ १२ ॥ मुनयो बलिरिन्द्रश्च विरज

प्रमुखाः सुताः ॥ नवमो दक्षसावर्णिः पाराद्याश्च तदा सुराः ॥ १३ ॥ इन्द्रश्चैवाद्भुतस्तेषां सवनाद्या द्विजोत्तमाः ॥ धृतकेत्वादयः पुत्रा ब्रह्मसावर्णिरित्यतः ॥ १४ ॥ सुखोदायो देवगणास्तेषां शान्तिः शतक्रतुः ॥ हविष्याद्याश्च मुनयः सुक्षेत्राद्याश्च तत्सुताः ॥ १५ ॥ धर्मसावर्णिकश्चायं विहङ्गाद्यास्तदा सुराः ॥ गणश्चैन्द्रो निश्चराद्या मुनयः पुत्रका मनोः ॥ १६ ॥ सर्वत्रगाद्या रुद्राख्यः सावर्णिर्भविता मनुः ॥ ऋतधामा सुरेन्द्रश्च हरिताद्याश्च देवताः ॥ १७ ॥ तपस्याद्याः सप्तर्षयः सुता वै देववन्मुखाः ॥ मनुस्त्रयोदशो रौच्यः सुत्रामाणादयः सुराः ॥ १८ ॥ इन्द्रो दिवस्पतिस्तेषां दानवादिविमर्दनः ॥ निर्मोहाद्याः सप्तर्षयश्चित्रसेनादयः सुताः ॥ १९ ॥ मनुश्चतुर्दशो भौत्यः शुचिरिन्द्रो भविष्यति ॥ चाक्षुषाद्याः सुरगणा अग्निबाह्वादयो द्विजाः ॥ २० ॥ चतुर्दशस्य भौत्यस्य पुत्रा ऊरुमुखा मनोः ॥ प्रवर्त्तयन्ति वेदांश्च भुवि सप्तर्षयो दिवः ॥ २१ ॥ देवा यज्ञभुजस्ते तु भूः पुत्रैः परिपाल्यते ॥ ब्रह्मगो दिवसे ब्रह्मन् मनवस्तु चतुर्दश ॥ २२ ॥ मन्वाद्याश्च हरिर्वेदं द्वापरान्ते विभेद सः ॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः ॥ २३ ॥ एकश्चासीद्यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत् ॥ आध्वर्य्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः ॥ २४ ॥ औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥ प्रथमं व्यासशिष्यस्तु पैलो बह्वृचपारगः ॥ २५ ॥ इन्द्रप्रमितये प्रादाद्बाष्कलाय च संहिताम् ॥ बोध्यादिभ्यो ददौ सोऽपि चतुर्द्धा निजसंहिताम् ॥ २६ ॥ यजुर्वेदतरोः शाखाः सप्तविंशन्महामतेः ॥ वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥ २७ ॥ काण्वा वाजसनेयाद्या याज्ञवल्क्यादिभिः स्मृताः ॥ सामवेदतरोः शाखाः व्यासशिष्यः स जैमिनिः ॥२८॥ सुमन्तुश्च सुकर्मा च ह्येकैकां संहितां ततः ॥ गृहीत्वा च सुकर्माख्यः सहस्रं संहिता गुरुः ॥२९॥ सुमन्तुश्चाथर्वतरुं व्यासशिष्यो विभेद तम् ॥ शिष्यानध्यापयामास पैप्पलादान्सहस्रशः ॥३०॥ पुराणसंहितां चक्रे सूतो व्यासप्रसादतः ॥ इत्यादिमहापुराणे आग्नेये मन्वन्तरवेदविभागो नामपञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥ अथ वर्णाश्रमेतरधर्माः ॥ अग्निरुवाच ॥ मन्वादयो भुक्तिमुक्तिधर्म्माश्चीर्त्वाप्नुवन्ति यान् ॥ प्रोचे परशुरामाय वरुणोक्तं तु पुष्करः ॥ १ ॥ पुष्कर उवाच ॥ वर्णाश्रमेतराणां ते धर्मान्वक्ष्यामि सर्वदान् ॥ मन्वादिभिर्निगदितान्वासुदेवादितुष्टिदान् ॥ २ ॥ अहिंसा सत्यवचनं दया भूतेष्वनुग्रहः ॥ तीर्थानुसरणं दानं ब्रह्मचर्य्यममत्सरः ॥३॥ देवद्विजातिशुश्रूषा गुरूणां च भृगूत्तम ॥ श्रवणं सर्वधर्माणां पितॄणां पूजनं तथा ॥४॥ भक्तिश्च नृपतौ नित्यं तथा सच्छास्त्रनेत्रता ॥

आनृशंस्यं तितिक्षा च तथा चास्तिक्यमेव च ॥५॥ वर्णाश्रमाणां सामान्यधर्म्मो धर्म समीरितम् ॥ यजनं याजनं दानं वेदाद्यध्यापनक्रिया ॥ ६ ॥ प्रतिग्रहं चाध्ययनं विप्रकर्माणि निर्दिशेत् ॥ दानमध्ययनं चैव यजनं च यथाविधि ॥७॥ क्षत्रियस्य सवैश्यस्य कर्मेदं परिकीर्त्तितम् ॥ क्षत्रियस्य विशेषेण पालनं दुष्टनिग्रहः ॥ ८ ॥ कृषिगोरक्ष्यवाणिज्यं वैश्यस्य परिकीर्त्तितम् ॥ शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ ॥९॥ मौञ्जीबन्धनतो जन्म विप्रादेश्च द्वितीयकम् ॥ आनुलोम्येन वर्णानां जातिर्म्मातृसमा स्मृता ॥१०॥ चण्डालो ब्राह्मणीपुत्रः शूद्राच्च प्रतिलोमतः ॥ सूतस्तु क्षत्रियाज्जातो वैश्याद्वै देवलस्तथा ॥ ११ ॥ पुक्कसः क्षत्रियापुत्रः शूद्रात्स्यात्प्रतिलोमजः ॥ मागधः स्यात्तथा वैश्याच्छूद्रादायोगवोऽभवत् ॥ १२ ॥ वैश्यायां प्रतिलोमेभ्यः प्रतिलोमाः सहस्रशः ॥ विवाहः सदृशैस्तेषां नोत्तमैर्नाधमैस्तथा ॥ १३ ॥ चण्डालकर्म निर्दिष्टं वध्यानां घातनं तथा ॥ स्त्रीजीवनं तु तद्प्रोक्तं वैदेहकस्य च ॥१४॥ सूतानामश्वसारथ्यं पुक्कसानां च व्याधता ॥ स्तुतिक्रिया मागधानां तथा चायोगवस्य च ॥ १५ ॥ रङ्गावतरणं प्रोक्तं तथा शिल्पैश्च जीवनम् ॥ बहिर्ग्रामनिवासश्च मृतचैलस्य धारणम् ॥ १६ ॥ न संस्पर्शस्तथैवान्यैश्चण्डालस्य विधीयते ॥ ब्राह्मणार्थे गवार्थे वा देहत्यागोऽत्र यः कृतः ॥ १७ ॥ स्त्रीबालाद्युपपत्तौ वा बाह्यानां सिद्धिकारणम् ॥ सङ्करे जातयो ज्ञेयाः पितुर्मातुश्च कर्मतः ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये वर्णान्तरधर्मो नामैकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥ अथ गृहस्थंवृत्तिः ॥ पुष्कर उवाच ॥ आजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा ॥ क्षत्रविट्शूद्रधर्मेण जीवेन्नैव तु शूद्रजात् ॥ १ ॥ कृषिवाणिज्यगोरक्ष्यं कुसीदं च द्विजश्चरेत् ॥ गोरसं गुडलवणलाक्षामांसानि वर्जयेत् ॥ २ ॥ भूमिं भित्त्वौषधीश्छित्वा हत्वा कीटपिपीलिकाः ॥ पुनन्ति खलु यज्ञेन कर्षका देवपूजनात् ॥ ३॥ हलमष्टगवं धर्म्यं षड्गवं जीवितार्थिनाम् ॥ चतुर्गवं नृशंसानां द्विगवं धर्मघातिनाम् ॥४॥ ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥५॥ इत्यादिमहापुराणे आग्नेये गृहस्थवृत्तिवर्णनं नाम द्विपंचाशदधिकशततमोऽध्यायः ॥१५२॥ अथ ब्रह्मचर्य्याश्रमधर्मः ॥ पुष्कर उवाच ॥ धर्ममाश्रमिणां वक्ष्ये भुक्तिमुक्तिप्रदं शृणु ॥ षोडशर्तुर्निशाः स्त्रीणामाद्यास्तिस्रस्तु गर्हिताः ॥ १ ॥ व्रजेद्युग्मासु पुत्रार्थी कर्माधानिकमिष्यते ॥ गर्भस्य स्पष्टताज्ञाने सवनं स्पन्दनात्पुरा ॥ २ ॥ षष्ठेऽष्टमे वा सीमन्तं पुत्रीयं नामभं शुभम् ॥ अच्छिन्ननाड्यां कर्त्तव्यं जातकर्म विच

क्षणैः ॥ आशौचे तु व्यतिक्रान्ते नामकर्म विधीयते ॥ ३ ॥ शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु ॥ गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥ ४ ॥ बालं निवेदयेद्धात्रे तव पुत्रोऽयमित्युत ॥ ५ ॥ यथाकुलं तु चूडाकृद्ब्राह्मणस्योपनायनम् ॥ गर्भाष्टमेऽष्टमे वाब्दे गर्भादेकादशे नृपे ॥ ६ ॥ गर्भात्तु द्वादशे वैश्ये षोडशाब्दादितो न हि ॥ मुञ्जानां वल्कलानां तु क्रमान्मौञ्ज्यः प्रकीर्त्तिताः ॥ ७ ॥ मार्गवैयाघ्रबास्तानि चर्माणि व्रतचारिणाम् ॥ पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्तिताः ॥ ८ ॥ केशदेशललाटास्यतुल्याः प्रोक्ताः क्रमण तु ॥ अवक्राः सत्वचः सर्वे नाविप्लुष्टास्तु दण्डकाः ॥ ९ ॥ वासापर्वाते कार्पासक्षौमोर्णानां यथाक्रमम् ॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षितम् ॥ १० ॥ प्रथमं तत्र भिक्षेत यत्र भिक्षा ध्रुवं भवेत् ॥ स्त्रीणाममन्त्रतस्तानि विवाहस्तु समन्त्रकः ॥ ११ ॥ उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ॥ आचारमग्निकार्य्यं च सन्ध्योपासनमेव च ॥ १२ ॥ आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ॥ श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः ॥ १३ ॥ सायं प्रातश्च जुहुयान्नामेध्यं व्यन्नहस्तकम् ॥ मधु मांसं जनैः सार्द्धं गीतं नृत्यं च वै त्यजेत् ॥ १४ ॥ हिंसां परापवादं वै ह्यश्लीलं च विशेषतः ॥ दण्डादि धारयेन्नष्टमप्सु क्षिप्त्वान्यधारणम् ॥ १५ ॥ वेदस्वीकरणं कृत्वा स्नायाद्वै दत्तदक्षिणः ॥ नैष्ठिको ब्रह्मचारी वा देहान्तं निवसेद्गुरौ ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मचर्याश्रमो नाम त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३॥ अथ विवाहः ॥ पुष्कर उवाच ॥ विप्रश्चतस्रो विन्देत भार्य्यास्तिस्रस्तु भूमिपः ॥ द्वे च वैश्यो यथाकामं भार्य्यैकामपि चान्त्यजः ॥ १ ॥ धर्म्मकार्य्याणि सर्वाणि न कार्याण्यसवर्णया ॥ पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् ॥ २ ॥ वैश्या प्रतोदमादद्याद्दशां वै चान्त्यजा तथा ॥ सकृत्कन्या प्रदातव्या हरंस्तां चोरदण्डभाक् ॥ ३ ॥ अपत्यविक्रयासक्ते निष्कृतिर्न्न विधीयते ॥ कन्यादानं शचीयागो विवाहोथ चतुर्थिका ॥ ४ ॥ विवाहमेतत्कथितं नामकर्म्मचतुष्टयम् ॥ नष्ट मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥ ५ ॥ पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ मृते तु देवरे देया तदभावे यथेच्छया ॥६॥ पूर्वात्रितयमाग्नेयं वायव्यं चोत्तरात्रयम् ॥ रोहिणी चेति चरणे भगणः शस्यते सदा ॥ ७ ॥ नैकगोत्रां तु वरयेन्नैकार्षेयां च भार्गव ॥ पितृतः सप्तमादूर्ध्वं मातृतः पञ्चमात्तथा ॥ ८ ॥ आहूय दानं ब्राह्मः स्यात्कुलशीलयुताय तु ॥ पुरुषांस्तारयेत्तज्ज्ञो नित्यं कन्याप्रदानतः ॥ ९ ॥ तथा गोमिथुना-

दानाद्विवाहस्त्वार्ष उच्यते ॥ प्रार्थिता दीयते यस्य प्राजापत्यः स धर्म्मकृत् ॥ १० ॥ शुल्केन चासुरो मन्दो गान्धर्वो वरणान्मिथः ॥ राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात् ॥ ११ ॥ वैवाहिकेऽह्नि कुर्वीत कुम्भकारमृदा शचीम् ॥ जलाशये तु तां पूज्य वाद्यादैः स्त्री गृहं नयेत् ॥ १२ ॥ प्रसुप्ते केशवे नैव विवाहः कार्य्य एव हि ॥ पौषे चैत्रे कुजदिने रिक्ताविष्टितिथौ न च ॥ १३ ॥ न शुक्रजीवेऽस्तमिते न शशाङ्के ग्रहार्दिते ॥ अर्कार्किभौमयुक्ते भे व्यतीपातहते न हि ॥ १४ ॥ सौम्यं पित्र्यं च वायव्यं सावित्रं रोहिणी तथा ॥ उत्तराश्त्रितयं मूलं मैत्रं पौष्णं विवाहभम् ॥ १५ ॥ मानुपाख्यस्तथा लग्नो मानुपाख्यांशकः शुभः ॥ तृतीये च तथा षष्ठे दशमैकादशेऽष्टमे ॥ १६ ॥ अर्कार्किचन्द्रतनयाः प्रशस्ता न कुजोऽष्टमः ॥ सप्तान्त्याष्टमवर्गेषु शेषाः शस्ता ग्रहोत्तमाः ॥ १७ ॥ तेषामपि तथा मध्यात्पष्टः शुक्रो न शस्यते ॥ वैवाहिके भे कर्त्तव्या तथैव च चतुर्थिका ॥ १८ ॥ न दातव्या ग्रहास्तत्र चतुराद्यास्तथैकगाः ॥ पर्ववर्जं स्त्रियं गच्छेत्सत्या दत्ता सदा रतिः ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये विवाहो नाम चतुष्पंचाशदधिकशततमोऽध्यायः ॥ १५४ ॥ अथाचारः ॥ पुष्कर उवाच ॥ ब्राह्मे मुहूर्त्ते चोत्थाय विष्ण्वादीन्देवताः स्मरेत् ॥ उभे मूत्रपुरीषे तु दिवा कुर्य्यादुदङ्मुखः ॥ १ ॥ रात्रौ च दक्षिणे कुर्य्यादुभे सन्ध्ये यथा दिवा ॥ न मार्गादौ जले वीथ्यां सतृणायां सदाचरेत् ॥ २ ॥ शौचं कृत्वा मृदाचम्य भक्षयेदन्तधावनम् ॥ नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ॥ ३ ॥ क्रियास्नानं तथा षष्ठं पोडा स्नानं प्रकीर्त्तितम् ॥ अस्नातस्याफलं कर्म्म प्रातः स्नानं चरेत्ततः ॥ ४ ॥ भूमिष्ठमुद्धतात्पुण्यं ततः प्रस्रवणोदकम् ॥ ततोऽपि सारसं पुण्यं तस्मान्नादेयमुच्यते ॥ ५ ॥ तीर्थतोयं ततः पुण्यं गाङ्गं पुण्यं तु सर्वतः ॥ संशोधितमलः पूर्वं निमग्नश्च जलाशये ॥६॥ उपस्पृश्य ततः कुर्य्यादम्भसः परिमार्जनम् ॥ हिरण्यवर्णाम्त्रिसृभिः शन्नो देवीति चाप्यथ ॥७॥ आपो हि ष्ठेति तिसृभिरिदमापस्तथैव च ॥ ततो जलाशये मग्नः कुर्य्यादन्तर्जलं जपम् ॥८॥ तत्राघमर्षणं सूक्तं द्रुपदां वा तथा जपेत् ॥ युञ्जते मन इत्येवं सूक्तं वाप्यथ पौरुषम् ॥९॥ गायत्रीं तु विशेषेण अघमर्षणसूक्तके ॥ देवता भाववृत्तं तु ऋषिश्चैवाघमर्षणः ॥१०॥ छन्दश्चानुष्टुभं तस्य भाववृत्तो हरिः स्मृतः ॥ आपीडमानः शाटीं तु देवतापितृतर्पणम् ॥ ११ ॥ पौरुषेण तु सूक्तेन ददेच्चैवोदकाञ्जलिम् ॥ ततोऽग्निहवनं कुर्य्यादानं दत्त्वा तु शक्तितः ॥ १२ ॥ ततः समभिगच्छेन योगक्षेमार्थमीश्वरम् ॥ आसनं शयनं यानं जायाऽ-

पत्यं कमण्डलुः ॥ १३ ॥ आत्मनः शुचिरेतानि परेषां न शुचिर्भवेत् ॥ भाराक्रान्तस्य गुर्विण्याः पन्था देयो गुरुष्वपि ॥ १४ ॥ न पश्येच्चार्कमुद्यन्तं नास्तं यन्तं न चाम्भसि ॥ नेक्षेन्नग्नां स्त्रियं कूपं सुरास्थानमघौघिनम् ॥ १५ ॥ कार्पासास्थि तथा भस्म नाक्रामेद्यच्च कुत्सितम् ॥ अन्तःपुरं वित्तगृहं परदौत्यं व्रजेन्न हि ॥ १६ ॥ नारोहेद्विषमां नावं न वृक्षं न च पर्वतम् ॥ अर्थायतनशास्त्रेषु तथैव स्यात्कुतूहली ॥ १७ ॥ लोष्टमर्दी तृणच्छेदी नखखादी विनश्यति ॥ मुखादिवादनं नेहेद्विना दीपं न रात्रिगः ॥ १८ ॥ नाद्वारेण विशेद्वेश्म न च वक्रं विरागयेत् ॥ कथाभङ्गं न कुर्वीत न च वासोविपर्य्ययम् ॥ १९ ॥ भद्रं भद्रमिति ब्रूयान्नानिष्टं कीर्त्तयेत्क्वचित् ॥ पालाशमासनं वर्ज्यं देवादिच्छायया व्रजेत् ॥ २० ॥ न मध्ये पूज्ययोर्यायान्नोच्छिष्टस्तारकादिदृक् ॥ नद्यां नान्यां नदीं ब्रूयान्न कण्डूयेद्विहस्तकम् ॥ २१ ॥ असन्तर्प्य पितॄन्देवान्नदीपारञ्च न व्रजेत् ॥ मलादि प्राक्षिपेन्नाप्सु न नग्नः स्नानमाचरेत् ॥ २२ ॥ ततः समभिगच्छेत योगक्षेमार्थमीश्वरम् ॥ स्रजं नात्मनोपनयेत्स्वरादिकरजस्त्यजेत् ॥ २३ ॥ हीनान्नावहसेद्वृच्छेन्नादेशे निवसेच्च नैः ॥ वैद्यराजनदीहीने म्लेच्छस्त्रीबहुनायके ॥ २४ ॥ रजस्वलादिपतितैर्नैव भाषेत्कश्चं स्मरेत् ॥ नासवृतमुखः कुर्य्याद्धासं जृम्भां तथा क्षुतम् ॥ २५ ॥ प्रभोरप्यवमानं स्वं गोपयेद्वचनं बुधः ॥ इन्द्रियाणां नानुकूली वेगरोधं न कारयेत् ॥ २६ ॥ नोपेक्षितव्यो व्याधिः स्याद्विपुरल्पोऽपि भार्गव ॥ रथ्यानिगः सदाचामेद्विभृयान्नाग्निवारिणी ॥ २७ ॥ न हुङ्कुर्य्याच्छिवं पूज्यं पादं पादेन नाक्रमेत् ॥ प्रत्यक्षं वा परोक्षं वा कस्य चिन्नाप्रियं वदेत् ॥२८॥ वेदशास्त्रनरेन्द्रार्षिदेवानिन्दां विवर्जयेत् ॥ स्त्रीणामीर्षा न कर्त्तव्या विश्वासं तासु वर्जयेत् ॥२९॥ धर्मश्रुतिं देवरातिं कुर्य्याद्धर्मादि नित्यशः ॥ सोमस्य पूजां जन्मर्क्षे विप्रदेवादिपूजनम् ॥ ३० ॥ षष्ठीचतुर्दश्यष्टम्यामभ्यङ्गं वर्जयेत्तथा ॥ दूराद्दूरान्मूत्रविष्टे नोत्तमैर्वैरमाचरेत् ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये आचारवर्णनं नाम पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५॥ अथ द्रव्यशुद्धिः ॥ पुष्कर उवाच ॥ द्रव्यशुद्धिं प्रवक्ष्यामि पुनः पाकेन मृन्मयम् ॥ शुध्यन्मूत्रपुरीषाद्यैः स्पृष्टं ताम्रं सुवर्णकम् ॥ १॥ आवर्त्तितं चान्यथा तु वारिणाम्लेन ताम्रकम् ॥ क्षारेण कांस्यलोहानां मुक्तादेः क्षालनेन तु ॥ २ ॥ अज्जानां चैव भाण्डानां सर्वस्याश्ममयस्य च ॥ शाकरज्जुमूलफलवेदलानां तथैव च ॥ ३ ॥ मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्म्मणि ॥ उष्णाम्बुना सस्नेहानां शुद्धिः सम्मार्जनाद्गृहे ॥ ४ ॥ शोध-

नान्म्रक्षणाद्वस्त्रे मृत्तिकाद्विर्विशोधनम् ॥ बहुवस्त्रे प्रोक्षणाच्च दारवाणां च तक्षणात् ॥ ५ ॥ प्रोक्षणात्संहतानां तु द्रवाणां च तथोत्प्लवात् ॥ शयनासनयानानां शूर्पस्य शकटस्य च ॥ ६ ॥ शुद्धिः सम्प्रोक्षणाज्ज्ञेया पलालेन्धनयोस्तथा ॥ सिद्धार्थकानां कल्केन शृङ्गदन्तमयस्य च ॥ ७ ॥ गोवालैः पलपात्राणामम्भसां म्याच्छृङ्गवत्तथा ॥ निर्यासानां गुडानां च लवणानां च शोधणात् ॥ ८ ॥ कुसुम्भकुसुमानां च द्यूर्णाकार्पासयोस्तथा ॥ शुद्धं नदीगतं तोयं पुण्यं तद्वत्प्रसारितम् ॥ ९ ॥ मुखवर्जं च गौः शुद्धा शुद्धमश्वाजयोर्मुखम् ॥ नारीणां चैव वत्सानां शकुनीनां शुनो मुखम् ॥ १० ॥ मुखैः प्रस्रवण वृत्ते मृगयायां सदा शुचि ॥ भुक्त्वा क्षुत्वा तथा सुप्त्वा पीत्वा चाम्भो विगाह्य च ॥ ११ ॥ स्थ्यामाक्रम्य चाचामेद्वासो विपरिधाय च ॥ मार्जारश्वङ्गमाच्छुद्धश्चतुर्थेह्नि रजस्वला ॥ १२ ॥ स्नाता स्त्री पञ्चमे योग्या देवे पित्र्ये च कर्मणि ॥ पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः ॥ १३ ॥ एकां लिङ्गे मृदं दद्यात्करयोस्त्रिद्विमृत्तिकाः ॥ ब्रह्मचारिवनस्थानां यतीनां च चतुर्गुणम् ॥ १४ ॥ श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥ शुद्धिः पर्युक्ष्य तोयेन मृगलोम्नां प्रकीर्त्तिता ॥ १५ ॥ पुष्पाणां च फलानां च प्रोक्षणाज्जलतोऽखिलम् ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये द्रव्यशुद्धिर्नाम षट्पंचाशदधिकशततमोऽध्यायः ॥ १५६ ॥ अथ शावाशौचादिकम् ॥ पुष्कर उवाच ॥ प्रेतशुद्धिं प्रवक्ष्यामि सूतिकाशुद्धिमेव च ॥ दशाहं शावमाशौचं सापिण्डेषु विधीयते ॥ १ ॥ जनने च तथा शुद्धिर्ब्राह्मणानां भृगूत्तम ॥ द्वादशाहेन राजन्यः पक्षाद्वैश्योऽथ मासतः ॥ २ ॥ शूद्रोऽनुलोमतो दासे स्वामितुल्यं त्वशौचकम् ॥ षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ॥ ३ ॥ ब्राह्मणः शुद्धिमाप्नोति क्षत्रियस्तु तथैव च ॥ विट्शूद्रयोनेः शुद्धिः स्यात्क्रमात्परशुरामक ॥ ४ ॥ पक्षत्रयेण त्रिरात्रेण षड्भिः शूद्रे तथा विशः ॥ आदन्तजननात्सद्य आचूडान्नैशिकी श्रुतिः ॥ ५ ॥ त्रिरात्रमात्रतादेशादशरात्रमतः परम् ॥ ऊनत्रैवार्षिके शूद्र पञ्चाहाच्छुद्धिरिष्यते ॥ ६ ॥ द्वादशाहेन शुद्धिः स्यादतीते वत्सरत्रये ॥ गतैः संवत्सरैः षड्भिः शुद्धिर्मासेन कीर्त्तिता ॥ ७ ॥ स्त्रीणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता ॥ तथा च कृतचूडानां त्र्यहाच्छुध्यन्ति बान्धवाः ॥ ८ ॥ विवाहितासु नाशौचं पितृपक्षे विधीयते ॥ पितुर्गृहे प्रसूतानां विशुद्धिर्नैशिकी स्मृता ॥ ९ ॥ सूतिका दशरात्रेण शुद्धिमाप्नोति नान्यथा ॥ विवाहिता हि चेत्कन्या म्रियते पितृवेश्मनि ॥ १० ॥ तस्यास्त्रिरात्राच्छुध्यन्ति बान्धवा नात्र संशयः ॥ समानं लघ्वशौचं तु प्रथमेन समापयेत् ॥ ११ ॥

असमानं द्वितीयेन धर्म्मराजवचो यथा ॥ देशान्तरस्थः श्रुत्वा तु कुल्यानां मरणोद्भवौ ॥ १२ ॥ यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥ अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत् ॥ १३ ॥ तथा संवत्सरेऽतीते स्नात एव विशुध्यति ॥ मातामहे तथाऽतीते ह्याचार्य्ये च तथा मृते ॥ १४ ॥ रात्रिभिर्म्मासतुल्याभिर्गर्भस्रावे विशोधनम् ॥ सपिण्डे ब्राह्मणे वर्णाः सर्व्व एवाविशेषतः ॥ १५ ॥ दशरात्रेण शुध्यन्ति द्वादशाहेन भूमिपः ॥ वैश्याः पञ्चदशाहेन शूद्रा मासेन भार्गव ॥ १६ ॥ उच्छिष्टसन्निधावेकं तथा पिण्डं निवेदयेत् ॥ कीर्त्तयेच्च तथा तस्य नामगोत्रे समाहितः ॥ १७ ॥ भुक्तवत्सु द्विजेन्द्रेषु पूजितेषु धनेन च ॥ विसृष्टाक्षतनीरेषु गोत्रनामानुकीर्त्तनैः ॥ ॥ १८ ॥ चतुरङ्गुलविस्तारं तत्खातं तावदन्तरम् ॥ वितस्तिदीर्घं कर्त्तव्यं विकर्पूणां तथा त्रयम् ॥ १९ ॥ विकर्पूणां समीपे च ज्वालयेज्ज्वलनत्रयम् ॥ सोमाय वह्नये राम यमाय च समासनः ॥ २० ॥ जुहुयादाहुतीः सम्यक्सर्व्वत्रैव चतुस्त्रयः ॥ पिण्डनिर्व्वापणं कुर्य्यात्प्राग्वदेव पृथक् पृथक् ॥ २१ ॥ अन्नेन दध्ना मधुना तथा मांसेन पूरयेत् ॥ मध्ये चेदधिमासः स्यात्कुर्य्यादभ्यधिकं तु तत् ॥ २२ ॥ अथवा द्वादशाहेन सर्वमेतत्समापयेत् ॥ संवत्सरस्य मध्ये च यदि स्यादधिमासकः ॥ २३ ॥ तदा द्वादशके श्राद्धे कार्य्यं तदधिकं भवेत् ॥ संवत्सरे समाप्ते तु श्राद्धं श्राद्धवदाचरेत् ॥ २४ ॥ प्रेताय तत ऊर्ध्वं च तस्यैव पुरुषत्रये ॥ पिण्डान्विनिर्वपेत्तद्वच्चतुरस्तु समाहितः ॥ २५ ॥ सम्पूज्य दत्त्वा पृथिवी समाना इति चाप्यथ ॥ योजयेत्प्रेतपिण्डं तु पिण्डेष्वन्येषु भार्गव ॥ २६ ॥ प्रेतपात्रं च पात्रेषु तथैव विनियोजयेत् ॥ पृथक् पृथक् प्रकर्त्तव्यं कर्म्मैतत्कर्म्मपात्रके ॥ २७ ॥ मन्त्रवर्जमिदं कर्म्म शूद्रस्य तु विधीयते ॥ सापिण्डीकरणं स्त्रीणां कार्य्यमेवं तदा भवेत् ॥ २८ ॥ श्राद्धं कुर्य्याच्च प्रत्यब्दं प्रेते कुम्भान्नमन्दकम् ॥ गङ्गायाः सिकता धारा यथा वर्षति वासवे ॥ २९ ॥ शक्या गणयितुं लोके न त्वनीताः पितामहाः ॥ काले सतनये स्थैर्य्ये नाम्न तस्मात्क्रियां चरेत् ॥ ३० ॥ देवत्वे यातनास्थाने प्रेतः श्राद्धं कृतं लभेत् ॥ नोपकुर्य्यान्नरः शोचन्प्रेतस्यात्मन एव वा ॥ ३१ ॥ भृग्वग्निपाशकाम्भोभिर्म्मृतानामात्मघातिनाम् ॥ पतितानां च नाशौचं विद्युच्छस्त्रहताश्च ये ॥ ३२ ॥ यतिव्रतिब्रह्मचारिनृपकारुकदीक्षिताः ॥ राजाज्ञाकारिणो ये च स्नायाद्धे प्रेतगाम्यपि ॥ ३३ ॥ मैथुने कटधूमे च सद्यः स्नानं विधीयते ॥ द्विजं न निर्हरेत्प्रेतं शूद्रेण तु कथञ्चन ॥ ३४ ॥ न च शूद्रं द्विजेनापि तयोर्दोषो हि जायते ॥

अनाथविप्रप्रेतस्य वहनात्स्वर्गलोकभाक् ॥ ३५ ॥ सङ्ग्रामे जयमाप्नोति प्रेतेऽनाथे च काष्ठदः ॥ संकल्प्य बान्धवं प्रेतमपसव्येन तां चितिम् ॥ ३६ ॥ परिक्रम्य ततः स्नानं कुर्य्युः सर्व्वे सवाससः ॥ प्रेताय च तथा दद्युस्त्रीस्त्रीश्चैवोदकाञ्जलीन् ॥ ३७ ॥ द्वार्य्यश्मनि पदं दत्त्वा प्रविशेयुस्तथा गृहम् ॥ अक्षतान्निक्षिपेद्वह्नौ निम्बपत्रं विदश्य च ॥ ३८॥ पृथक् शयीरन्भूमौ च क्षीतलघ्वाशनो भवेत् ॥ एकः पिण्डो दशाहे तु श्मश्रुकर्म्मकरः शुचिः ॥ ३९ ॥ सिद्धार्थकैस्तिलैर्विद्वान्मज्जेद्वासोऽपरं दधत् ॥ अजातदन्ते तनये शिशौ गर्भमृते तथा ॥ ४० ॥ कार्य्यो नैवाग्निसंस्कारो नैव चाम्योदकक्रिया ॥ चतुर्थे च दिने कार्य्यमन्तथास्थ्नां चैव सञ्चयः ॥ आस्थिसञ्चयनादूर्द्धमङ्ग-स्पर्शो विधीयते ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये शावाशौचादिकं नाम सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥ अथ स्रावा-द्याशौचम् ॥ पुष्कर उवाच ॥ स्रावाशौचं प्रवक्ष्यामि मन्वादिमुनिसम्मतम् ॥ रात्रिभिर्म्मासतुल्याभिर्गर्भस्रावे त्र्यहेण वा ॥ १ ॥ चातु-र्म्मासिकपातान्ते दशाहं पञ्चमासतः ॥ राजन्ये च चतूरात्रं वैश्ये पञ्चाहमेव च ॥ २ ॥ अष्टाहेन तु शूद्रस्य द्वादशाहादनः परम् ॥ स्त्रीणां विशुद्धिरुदिता स्नानमात्रेण वै पितुः ॥ ३ ॥ न स्नानं हि सपिण्डे स्यात्त्रिरात्रं सप्तमाष्टमे ॥ सद्यः शौचं सपिण्डानामादन्तजननात्तथा ॥ ४ ॥ आचूडादेकरात्रं स्यादाव्रताच्च त्रिरात्रकम् ॥ दशरात्रं भवेदस्मान्मातापित्रोस्त्रिरात्रकम् ॥ ५ ॥ अजातदन्ते तु मृते कृतचूडे ऽर्भके तथा ॥ प्रेते न्यूने त्रिभिर्व्वर्षैर्मृते शुद्धिस्तु नैशिकी ॥ ६ ॥ द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्व्वैश्ये मृते तथा ॥ शुद्धिः शूद्रे पञ्चभिः स्यात्प्राग्विवाहाद्विपट् त्वहः ॥ ७ ॥ यत्र त्रिरात्रं विप्राणामाशौचं सम्प्रदृश्यते ॥ तत्र शूद्रे द्वादशाहः षण्णव क्षत्रवैश्ययोः ॥ ८ ॥ द्व्यब्दे नैवाग्निसंस्कारो मृते तन्निखनेद्भुवि ॥ न चोदकक्रिया तस्य नाम्न चापि कृते सति ॥ ९ ॥ जातदन्तस्य वा कार्य्या स्यादुपनयनाद्दश ॥ एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ॥ १० ॥ हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा ॥ पञ्चाहेनाग्निहीनस्तु दशाहाद्ब्राह्मणध्रुवः ॥ ११ ॥ क्षत्रियो नवसप्ताहाच्छुध्येद्विप्रो गुणैर्युतः ॥ दशाहात्सगुणो वैश्यो विंशाहाच्छूद्र एव च ॥१२॥ दशाहाच्छुध्यते विप्रो द्वादशाहेन भूमिपः ॥ वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ १३ ॥ गुणोत्कर्षे दशाहानौ त्र्यहमेकाहकं त्र्यहे ॥ एकाहानौ सद्यः शौचं सर्व-त्रैवं समूहयेत् ॥ १४ ॥ दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः ॥ स्वामितुल्यमशौचं स्यान्मृते पृथक्पृथग्भवेत ॥ १५ ॥ मरणा-

देव कर्त्तव्यं संयोगो यस्य नाग्निभिः ॥ दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः ॥ १६ ॥ सर्वेषामेव वर्णानां त्रिभागात्स्पर्शनं भवेत् ॥ त्रिचतुष्पञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु ॥ १७ ॥ चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा ॥ अस्थिसञ्चयनं कार्य्यं वर्णानामानुपूर्वशः ॥ १८ ॥ अहस्त्वदत्तकन्यासु प्रदत्तासु त्र्यहं भवेत् ॥ पक्षिणी संस्कृतास्वेव स्वस्रादिषु विधीयते ॥ १९ ॥ पितृगोत्रं कुमारीणां व्यूढानां भर्तृगोत्रता ॥ जलप्रदानं पित्रे च ह्युद्वाहे चोभयत्र तु ॥ २० ॥ दशाहोपरि पित्रोश्च दुहितुर्मरणे त्र्यहम् ॥ सद्यः शौचं सापिण्डानां पूर्वं चूडाकृतोर्द्विज ॥२१ ॥ एकाहतो ह्याविवाहादूर्ध्वं हस्तोदकात्र्यहम् ॥ पक्षिणी भ्रातृपुत्रस्य सपिण्डानां च सद्यतः ॥ २२ ॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु ॥ षड्भिस्त्रिभिरहैकेन क्षत्रविट्शूद्रयोनिषु ॥ २३ ॥ एतज्ज्ञेयं सपिण्डानां वक्ष्ये चानौरसादिषु ॥ अनौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ॥ २४ ॥ परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते ॥ वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ॥ २५ ॥ आत्मनस्त्यागिनां चैव निवर्त्तेनोदकक्रिया ॥ मात्रेकया द्विपितरौ भ्रातरावन्यगामिनौ ॥ २६ ॥ एकाहः सूतके तत्र मृतके तु द्व्यहो भवेत् ॥ सपिण्डानामशौचं हि समानोदकतां वदे ॥ २७ ॥ बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ॥ सवासा जलमाविश्यं सद्य एव विशुध्यति॥२८॥दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ॥ त्रिरात्रेण सकुल्यास्तु स्नानाच्छुध्यन्ति गोत्रिणः॥२९॥ सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ॥ समानोदकभावस्तु निवर्त्तनाचतुर्दशात् ॥ ३० ॥ जन्म नामस्मृते वैतत्तत्परं गोत्रमुच्यते ॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ॥ ३१ ॥ यच्छेषं दशरात्रस्य नावदेवाशुचिर्भवेत् ॥ अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ॥ ३२ ॥ संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥ मातुले पक्षिणी रात्रिः शिष्यर्त्विग्बान्धवेषु च ॥ ३३ ॥ मृते जामातरि प्रेते दौहित्रे भगिनीसुते ॥ श्यालके तत्सुते चैव स्नानमात्रं विधीयते ॥ ३४ ॥ मातामह्यां तथाचार्य्ये मृते मातामहे त्र्यहम् ॥ दुर्भिक्षे राष्ट्रसंपाते ह्यागतायां तथापदि ॥ ३५ ॥ उपसर्गमृतानां च दाहे ब्रह्मविदां तथा ॥ सत्रिव्रतिव्रह्मचारिसङ्ग्रामे देशविप्लवे ॥ ३६ ॥ दाने यज्ञे विवाहे च सद्यः शौचं विधीयते ॥ विप्रगोनृपहन्तॄणामनुक्तं चात्मघातिनाम् ॥ ३७ ॥ असाध्यव्याधियुक्तस्य स्वाध्याये चाक्षमस्य च ॥ प्रायश्चित्तमनुज्ञातमग्नितोयप्रवेशनम् ॥ ३८ ॥ अपमानात्तथा क्रोधात्स्नेहात्परिभवाद्भयात् ॥ उद्बध्य म्रियते नारी पुरुषो वा कथ-

श्चन ॥ ३९ ॥ आत्मघाती चैकलक्षं वसेत्स नरकेऽशुचौ ॥ वृद्धः शौतस्मृतेर्लुप्तः परित्यजति यस्त्वपून् ॥ ४० ॥ त्रिरात्रं तत्र चाशौचं
द्वितीये चास्थिसञ्चयम् ॥ तृतीये तूदकं कार्य्यं चतुर्थे श्राद्धमाचरेत् ॥ ४१॥ विद्युदग्निहतानां च त्र्यहं शुद्धिः सपिण्डके ॥ पाषण्डा-
श्रितभर्तृघ्न्यो नाशौचोदकगाः स्त्रियः ॥ ४२ ॥ पितृमात्रादिपाते तु आद्रवासा ह्युपोषितः ॥ अनेनैवाब्दे प्रकुर्वीत प्रेतकार्य्यं यथाविधि
॥ ४३ ॥ यः कश्चित्तु हरेत्प्रेतमसपिण्डं कथञ्चन ॥ स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ॥ ४४ ॥ यद्यन्नमत्ति तेषां तु दशाहे-
नैव शुध्यति ॥ अनदन्नन्नमश्नन्वै न वै तस्मिन्गृहे वसेत् ॥ ४५ ॥ अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ॥ पदे पदे यज्ञफलं शुद्धिः
स्यात्स्नानमात्रतः ॥ ४६ ॥ प्रेतीभूतं द्विजः शूद्रमनुगच्छंस्त्र्यहाच्छुचिः ॥ मृतस्य बान्धवैः सार्द्धं कुर्वन्नपि च परिदेवनम् ॥ ४७ ॥ वर्ज-
येत्तदहोरात्रं दानश्राद्धादि कामतः ॥ शूद्रायाः प्रसवो गेहे शूद्रस्य मरणं तथा ॥ ४८ ॥ भाण्डानि तु परित्यज्य त्र्यहाद्भूलेपनः शुचिः ॥
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ॥ ४९ ॥ नयेत्प्रेतं स्नापितं च पूजितं कुसुमैर्दहेत् ॥ नग्नं दहेन्न दहेन्नैव किञ्चिद्देहं परित्यजेत् ॥
॥ ५० ॥ गोत्रजस्तु गृहीत्वा तु चितां चारोपयेत्तदा ॥ आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ॥ ५१ ॥ अनाहिताग्निरेकेन लौकि-
केनापरस्तथा ॥ अस्मात्त्वमभिजातोऽसि त्वदयं जायतां पुनः ॥ ५२ ॥ असौ स्वर्गाय लोकाय मुखाग्निं प्रददेत्सुतः ॥ सकृत्प्रसिञ्चन्त्युद-
दकं नामगोत्रेण बान्धवाः ॥ ५३ ॥ एवं मातामहाचार्य्यप्रेतानां चोदकक्रिया ॥ काम्योदकं सखिप्रेतस्वस्रीयश्वशुरर्त्विजाम् ॥ ५४ ॥
अप नः शोशुचदघं दशाहं च सुनोऽर्पयेत् ॥ ब्राह्मणे दश पिण्डाः स्युः क्षत्रिये द्वादश स्मृताः ॥ ५५ ॥ वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंश-
त्प्रकीर्तिताः ॥ पुत्रो वा पुत्रिकान्यो वा पिण्डं दद्याच्च पुत्रवत् ॥ ५६ ॥ विदिश्य निम्बपत्राणि नियतो द्वारि वेश्मनः ॥ आचम्य चाग्निमु-
दकं गोमयं गौरसर्षपान् ॥ ५७ ॥ प्राविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥ अक्षारलवणान्नाः स्युर्निर्मांसा भूमिशायिनः ॥ ५८ ॥
कृतलब्धाशनाः स्नाता आदिकर्त्ता दशाहकृत् ॥ अभावे ब्रह्मचारी तु कुर्य्यात्पिण्डोदकादिकम् ॥ ५९ ॥ यथेदं शावमाशौचं सापि- ॥११२॥
ण्डेषु विधीयते ॥ जननेऽप्येवमेवं स्यान्निपुणां शुद्धिमिच्छताम् ॥ ६० ॥ सर्वेषां शावमाशौचं मातापित्रोश्च सूतकम् ॥ सूतकं मातुरेव
स्यादुपस्पृश्य पिता शुचिः ॥६१॥ पुत्रजन्मदिने श्राद्धं कर्त्तव्यामीति निश्चितम ॥ तदहस्तन्प्रदानार्थं गोहिरण्यादिवाससाम् ॥ ६२ ॥ मरणं

मरणेनैव सूतकं सूतकेन तु ॥ उभयोरपि यत्पूर्वं तेनाशौचेन शुध्यति ॥ ६३ ॥ सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् ॥ तत्राधि-
कृत्य मृतकं शौचं कुर्य्यान्न सूतकम् ॥ ६४ ॥ समानं लघ्वशौचं तु प्रथमेन समापयेत् ॥ असमानं द्वितीयेन धर्मराजवचो यथा ॥ ६५ ॥
शावेन्तः शाव आयाते पूर्वाशौचेन शुध्यति ॥ गुरुणा लघु बाध्येन लघुनानेव तद्गुरु ॥६६॥ मृतके सूतके वापि रात्रिमध्येऽन्यदापतेत् ॥
तच्छेषेणैव शुध्येरन्रात्रिशेषे द्वयहाधिकात ॥ ६७ ॥ त्रिरात्रे यद्यशौचं स्याच्छुध्येरंश्च त्रिभिर्दिनैः ॥ उभयत्र दशाहानि कुलस्यान्नं न
भुज्यते ॥ ६८ ॥ दानादि विनिवर्त्तेन भोजनैः कृत्यमाचरेत् ॥ अज्ञाते पातकं नाद्ये भोक्तुरेकमहोऽन्यथा ॥ ६९ ॥ इत्यादिमहापुराणे
आग्नेये स्नावाद्याशौचं नामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥ अथ असंस्कृतादिशौचम् ॥ पुष्कर उवाच ॥ संस्कृतस्यासंस्कृ-
तस्य स्वर्गो मोक्षो हरिस्मृतेः ॥ अस्थां गङ्गाम्भसि क्षेपात्प्रेतस्याभ्युदयो भवेत् ॥ १ ॥ गङ्गातोये नरस्यास्थि यावत्तावादिवि स्थितिः ॥
आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ॥ २ ॥ तेषामपि तथा गाङ्गे तोयेऽस्थां पतनं हितम् ॥ तेषां दत्तं जलं चान्नं गगने
तत्प्रलीयते ॥ ३ ॥ अनुग्रहेण महता प्रेतस्य पतितस्य च ॥ नारायणबलिः कार्य्यस्तेनानुग्रहमश्नुते ॥ ४ ॥ अक्षयः पुण्डरीकाक्षस्तत्र दत्तं
न नश्यति ॥ पतनाद्त्रायते यस्मात्तस्मात्पात्रं जनार्दनः ॥ ५ ॥ पतनं भुक्तिमुक्त्यादिप्रद एको हरिर्ध्रुवम् ॥ दृष्ट्वा लोकान्म्रियमाणान्महायं
धर्ममाचरेत् ॥ ६ ॥ मृतोऽपि बान्धवः शक्तो नानुगन्तुं नरं मृतम् ॥ जायावर्जं हि सर्वस्य याम्यः पन्था विभिद्यते ॥ ७ ॥ धर्म एको व्रज-
त्येनं यत्र क्वचन गामिनम् ॥ श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥ ८ ॥ नहि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥ क्षेत्रापण-
गृहासक्तमन्यत्र गतमानसम् ॥ ९ ॥ वृकीवोरणमासाद्य मृत्युर्गदाय गच्छति ॥ न कालस्य प्रियः कश्चिद्वेष्यश्चास्य न विद्यते ॥ १० ॥
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ॥ नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ॥ ११ ॥ कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥
औषधानि न मन्त्राद्यास्त्रायन्ते मृत्युनान्वितम् ॥ १२ ॥ यत्करोत्याकृतं कर्म कर्त्तारं विन्दति ध्रुवम् ॥ अव्यक्तादि व्यक्तमव्यमव्यक्तनिधनं
जगत् ॥ १३ ॥ कौमारादि यथा देहे तथा देहान्तरागमः ॥ नवमन्यद्यथा वस्त्रं गृह्णात्येवं शरीरकम् ॥ देही नित्यमवध्योऽयं यतः शोकं
ततस्त्यजेत् ॥ १४ ॥ इत्यादिमहापुराणे आग्नेयेऽसंस्कृतादि शौच० नामैकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥ अथ वानप्रस्थधर्मानि० ॥

पुष्कर उवाच ॥ वानप्रस्थयतीनां च धर्मं वक्ष्येऽधुना शृणु ॥ जटित्वमग्निहोत्रित्वं भूशय्याजिनधारणम् ॥ १ ॥ वने वासः पयोमूलनीवा-
रफलवृत्तिता ॥ प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं ब्रह्मचारिता ॥ २ ॥ देवातिथीनां पूजा च धर्मोऽयं वनवासिनः ॥ गृही ह्यपत्यापत्यं च दृष्ट्वा-
रण्यं समाश्रयेत् ॥ ३ ॥ तृतीयमायुषो भागमेकाकी वा सभार्य्यकः ॥ ग्रीष्मे पञ्चतपा नित्यं वर्षास्वभ्रावकाशिकः ॥ ४ ॥ आर्द्रवासाश्च
हेमन्ते तपश्चोग्रं चरेद्बली ॥ अपावृत्तिमास्थाय व्रजेदिशमजिह्मगः ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये वानप्रस्थधर्म०नाम षष्ट्यधिकशत-
ततमोऽध्यायः ॥ १६० ॥ अथ यतिधर्मानि० ॥ पुष्कर उवाच ॥ यतिधर्मं प्रवक्ष्यामि ज्ञानमोक्षादिदर्शकम् ॥ चतुर्थमायुषो भागं प्राप्य
सङ्गान्परित्रजेत् ॥ १ ॥ यदह्नि विरजेद्धीरस्तदह्नि च परिव्रजेत् ॥ प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ॥ २ ॥ आत्मन्यग्नीन्समारोप्य
प्रव्रजेद्ब्राह्मणो गृहात् ॥ एक एव चरेन्नित्यं ग्राममन्नार्थमाश्रयेत् ॥ ३ ॥ उपेक्षकोऽसञ्चयिको मुनिर्ज्ञानसमन्वितः ॥ कपालं वृक्षमूलं च
कुचैलमसहायता ॥ ४ ॥ समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ नाभिनन्देत मरणं नाभिनन्देत जीवनम् ॥ ५ ॥ कालमेव प्रतीक्षेत
निदेशं भृतको यथा ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ ६ ॥ सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ आलाबुदारुपात्राणि
मृण्मयं वैणवं यतेः ॥ ७ ॥ विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ॥ वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥ ८ ॥ माधूकरमसं-
क्लृप्तं प्राक्प्रणीतमयाचितम् ॥ तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम् ॥ ९ ॥ पाणिपात्री भवेद्वापि पात्रे पात्रात्समाचरेत् ॥ अवे-
क्षेत गतिं नृणां कर्मदोषसमुद्भवाम् ॥ १० ॥ शुद्धभावश्चरेद्धर्मं यत्र तत्राश्रमे रतः ॥ समाः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ११ ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ॥ न नामग्रहणादेव तस्य वारि प्रसीदति ॥ १२ ॥ अलिङ्गः पण्डकः पङ्गुरन्धो बधिर एव च ॥
सद्भिश्च मुच्यतेऽसद्भिरज्ञानात्संसृतो द्विजः ॥ १३ ॥ अह्नि रात्र्यां च यान्जन्तून्हिनस्त्यज्ञाननो यतिः ॥ तेषां स्नात्वा विशुद्ध्यर्थं प्राणाया-
मान्षडाचरेत् ॥ १४ ॥ अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ॥ चर्मावनद्धं दुर्गन्धपूर्णं मूत्रपूरीषयोः ॥ १५ ॥ जराशोकसमाविष्टं
रोगायतनमातुरम् ॥ रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ १६ ॥ धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ॥ ह्रीर्विद्या सत्यमक्रोधो
दशकं धर्मलक्षणम् ॥ १७ ॥ चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ ॥ हंसः परमहंसश्च यो यः पश्चात्त उत्तमः ॥ १८ ॥ एक दण्डी त्रिदण्डी

वा योगी मुच्येत बन्धनात् ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्य्याऽपरिग्रहौ ॥ १९ ॥ यमाः पञ्चाथ नियमाः शौचं सन्तोषणं तपः ॥ स्वाध्याये-श्वरपूजा च पद्मकाद्यासनं यतेः ॥२०॥ प्राणायामस्तु द्विविधः सगर्भोऽगर्भ एव च ॥ जपध्यानयुतो गर्भो विपरीतस्त्वगर्भकः ॥२१॥ प्रत्येकं त्रिविधः सोपि पूरकुम्भकरेचकैः ॥ पूरणात्पूरको वायोर्निश्चलत्वाच्च कुम्भकः ॥ २२ ॥ रेचनाद्रेचकः प्रोक्तो मात्राभेदेन च त्रिधा ॥ द्वादशातु चतुर्विंशः षट्त्रिंशन्मात्रिकोऽपरः ॥ २३ ॥ तालो लघ्वक्षरो मात्राप्रणवादि चरेच्छनैः ॥ प्रत्याहारो जापकानां ध्यानमीश्वरचिन्तनम् ॥ २४ ॥ मनोधृतिर्धारणा स्यात्समाधिर्ब्रह्मणि स्थितिः ॥ अयमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ॥ २५ ॥ विज्ञानमानन्दं ब्रह्म तत्त्व-मस्यहमस्मि तत् ॥ परं ब्रह्म ज्योतिरात्मा वामदेवो विमुक्त ओं ॥ २६ ॥ देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् ॥ जाग्रत्स्वप्नसुषुप्त्यादिमुक्तं ब्रह्म तुरीयकम् ॥ २७ ॥ नित्यशुद्धबुद्धमुक्तसत्यमानन्दमद्वयम् ॥ अहं ब्रह्म परं ज्योतिरक्षरं सर्वगं हरिः ॥ २८ ॥ योऽसावादित्यपुरुषः सोऽसावहमखण्ड ओं ॥ सर्वारम्भपरित्यागी समदुःखसुखः क्षमी ॥ २९ ॥ भावशुद्धश्च ब्रह्माण्डं भित्त्वा ब्रह्म भवेन्नरः ॥ आषाढ्यां पौर्ण-मास्यां च चातुर्मास्यव्रतं चरेत् ॥ ३० ॥ ततो व्रजेन्नवम्यादौ ह्यृतुसन्धिषु वापयेत् ॥ प्रायश्चित्तं यतीनां च ध्यानं वायुयमस्तथा ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये यतिधर्मो नामैकषष्ट्यधिकशततमोऽध्यायः ॥ ३६१ ॥ अथ धर्मशास्त्रनिरूपणम् ॥ पुष्कर उवाच ॥ मनुर्विष्णु-र्याज्ञवल्क्यो हारीतोऽत्रिर्यमोऽङ्गिराः ॥ वसिष्ठदक्षसंवर्त्तशातातपपराशराः ॥ १ ॥ आपस्तम्बोशनोव्यासाः कात्यायनबृहस्पती ॥ गौतमः शङ्खलिखितौ धर्ममेते यथाब्रुवन् ॥ २ ॥ तथा वक्ष्ये समासेन मुक्तिमुक्तिप्रदं शृणु ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म्म वैदिकम् ॥ ३ ॥ काम्यं कर्म्म प्रवृत्तं स्यान्नित्यं नैमित्तिकं तथा ॥ निवृत्तं ज्ञानपूर्वकम् ॥ वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः ॥ ४ ॥ अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥ सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ॥ ५ ॥ तज्ज्ञाप्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ ६ ॥ समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥ आत्मज्ञाने समे च स्याद्वेदाभ्यासे च यत्नवान् ॥ ७ ॥ एतद्विजन्मसामर्थ्यं ब्राह्म-णस्य विशेषतः ॥ वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ॥ ८ ॥ इहैव लोके निष्ठन्हि ब्रह्मभूयाय कल्पते ॥ स्वाध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ॥ ९ ॥ हस्ते चौषधिवारे च पञ्चम्यां श्रवणस्य वा ॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥ १० ॥ जलान्ते

छन्दसां कुर्य्यादुत्सर्गं विधिवद्बहिः ॥ त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ॥ ११ ॥ उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा ॥ सन्ध्यागर्जितनिर्घाते भूकम्पोल्कानिपातने ॥ १२ ॥ समाप्य वेदं ह्यनिशमारण्यकमथोत्य च ॥ पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ॥१३॥ ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥ शशमण्डूकनकुलश्वाहिमार्जारमूकरैः॥१४॥ कृतेन्तरे त्वहोरात्रं शुक्रपाते तथोच्छ्राये ॥ श्वक्रोष्टुगर्दभोलूकमासवाणर्तुनिःस्वने ॥ १५ ॥ अमेध्यशवशूद्रान्त्यश्मशानपतिनान्तिके ॥ अशुभासु च तारासु विद्युत्स्तनितसम्प्लवे ॥ १६ ॥ भुक्त्वार्द्रपाणिरम्भोऽन्तरर्द्धरात्रेऽतिमारुते ॥ पांसुवर्षे दिशां दाहे सन्ध्यानीहारभीनिषु ॥ १७ ॥ यावतः प्राणिबाधे च शिष्टे च गृहमागते ॥ खरोष्ट्रयानहस्त्यश्वनौकावृक्षादिरोहणे ॥ सप्तविंशदनध्यायानेतांस्तान्कालिकान्विदुः ॥ १८ ॥ इत्याद्दिमहापुराणे आग्नेये धर्मशास्त्रनि० नाम द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥ अथ श्राद्धकल्पनिरूपणम् ॥ पुष्कर उवाच ॥ श्राद्धकल्पं प्रवक्ष्यामि भुक्तिमुक्तिप्रदं शृणु ॥ निमन्त्र्य विप्रान्पूर्वेद्युः स्वागमनापराह्णतः ॥ १ ॥ प्राच्योपवेशयेत्पीठे युग्मान्दैवेऽथ पित्र्यके ॥ अयुग्मान् प्राङ्मुखान्दैवे त्रीन्पैत्र्ये चैकमेव वा ॥ २ ॥ मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम् ॥ पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि ॥ ३ ॥ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥ यवैरन्नवकीर्य्यार्थं भाजने सपवित्रके ॥ ४ ॥ शन्नो देवीं पयः क्षित्वा यवोसीति यवास्तथा ॥ या दिव्या इतिमन्त्रेण हस्ते ह्यर्घं विनिक्षिपेत् ॥ ५ ॥ दत्त्वोदकं गन्धमाल्यं धूपदानं प्रदीपकम् ॥ अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम् ॥ ६ ॥ द्विगुणांस्तु कुशान्कृत्वा ह्युशन्तस्त्वेत्यृचा पितॄन् ॥ आवाह्य तदनुज्ञातो जपेदायान्तु नस्ततः ॥ ७ ॥ यवार्थास्तु तिलैः कार्य्याः कुर्यादर्घ्यादि पूर्ववत् ॥ दत्त्वार्घ्यं संस्रवाञ्छेषान्पात्रे कृत्वा विधानतः॥८॥ पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥ अग्नौ करिष्य आदाय पृच्छत्यन्नं घृतप्लुतम् ॥ ९ ॥ कुरुष्वेति ह्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् ॥ हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः ॥ १० ॥ यथालाभोपपन्नेषु रौप्येषु तु विशेषतः ॥ दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम् ॥ ११ ॥ कृत्केदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥ सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचम् ॥ १२ ॥ जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥ अन्नमिष्टं हविष्यं च दद्याज्जप्त्वा पवित्रकम् ॥१३॥ अन्नमादाय तृप्ताः स्थ शेषं चैवान्नमस्य च ॥ तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् ॥ १४ ॥

सर्वमन्नमुपादाय सातिलं दक्षिणामुखः ॥ उच्छिष्टसन्निधौ पिण्डान्प्रदद्यात्पितृयज्ञवत् ॥ १५ ॥ मातामहानामप्येवं दद्यादाचमनं ततः ॥ स्वस्ति वाच्यं ततः कुर्य्यादक्षय्योदकमेव च ॥ १६ ॥ दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ॥ वाच्यतामित्यनुज्ञातः स्वपितृभ्यः स्वधोच्यताम् ॥ १७ ॥ कुर्य्युरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम् ॥ प्रीयन्तामिति वा देवे विश्वेदेवा जलं ददेत् ॥ १८ ॥ दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो माव्यगमद्बहु देयं च नोऽस्त्विति ॥ १९ ॥ इत्युक्त्वा तु प्रिया वाचः प्रणिपत्य विसर्जयेत् ॥ वाजे वाज इति प्रीतपितृपूर्वं विसर्जनम् ॥२० ॥ यस्मिंस्तु संस्रवाः पूर्वमर्घपात्रे निपातिताः ॥ पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् ॥२१॥ प्रदक्षिणमनुव्रज्य भुक्त्वा तु पितृसेवितम् ॥ ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह ॥ २२ ॥ एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दीमुखान्पितॄन् ॥ यजेत दधिकर्कन्धुमिश्रान्पिण्डान्यवैः क्रिया ॥२३॥ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकम् ॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ २४ ॥ उपतिष्ठतामित्यक्षय्यस्थाने पितृविसर्जने ॥ अभिरम्यतामिति वदेदृयुस्तेऽभिरताः स्म ह ॥२५॥ गन्धोदकतिलैर्युक्तं कुर्य्यात्पात्रचतुष्टयम् ॥ अर्घार्थपितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥२६॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥ एतत्सापिण्डीकरणमेकोद्दिष्टं स्त्रिया सह ॥२७॥ अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्भवेत् ॥ तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विज ॥ २८ ॥ मृताहनि च कर्त्तव्यं प्रतिमासं तु वत्सरम् ॥ प्रतिसंवत्सरं कार्य्यं श्राद्धं वै मासिकान्नवत् ॥ २९ ॥ हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ॥ मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥ ३० ॥ ऐणरौरववाराहशशैर्मासैर्यथाक्रमम् ॥ मासवृद्ध्याऽभितृप्यन्ति दत्तैरेव पितामहाः ॥ ३१ ॥ खड्गामिषं महाशल्कं मधुयुक्तान्नमेव च ॥ लोहामिषं कालशाकं मांसं वार्धीणसस्य च ॥ ३२ ॥ यददाति गयास्थश्च सर्वमानन्त्यमुच्यते ॥ तथा वर्षात्रयोदश्यां मघासु च न संशयः ॥ ३३ ॥ कन्यां प्रजां बन्दिनश्च पशून्मुख्यान्सुतानपि ॥ घृतं कृषिं च वाणिज्यं द्विशफैकशफं तथा ॥ ३४ ॥ ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके ॥ ज्ञातिश्रेष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥ ३५ ॥ प्रतिपत्प्रभृतिष्वेतान्वर्जयित्वा चतुर्दशीम् ॥ शस्त्रेण तु हता ये वै तेषां तत्र प्रदीयते ॥ ३६ ॥ स्वर्गं ह्यपत्यमोजश्च शौर्य्यं क्षेत्रं बलं तथा ॥ पुत्रश्रेष्ठ्यं ससौभाग्यमपत्यं मुख्यतां सुतान् ॥ ३७ ॥ प्रवृत्तचक्रतां पुत्रान्वाणिज्यं प्रभुतां तथा ॥ अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥ ३८ ॥

धनं विद्यां भिषक्सिद्धिं रूप्यं गाश्चाप्यजाविकम् ॥ अश्वानायुश्च विधिवद्यः श्राद्धं सम्प्रयच्छति ॥ ३९ ॥ कृत्तिकादिभरण्यन्ते स कामा-
नाप्नुयादिमान् ॥ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥४०॥ प्रीणयन्ति मनुष्याणां पितॄंश्छ्राद्धेन तर्पिताः ॥ आयुः प्रजां धनं विद्यां
स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ॥४१॥ इत्यादिमहापुराणे आग्नेये श्राद्धकल्प० नाम त्रिषष्ट्यधि-
कशततमोऽध्यायः ॥ १६३ ॥ अथ नवग्रहहोमानि० ॥ पुष्कर उवाच ॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत् ॥ वृष्ट्यायुःपुष्टि-
कामो वा तथैवाभिचरन्पुनः ॥ १ ॥ सूर्य्यः सोमो मङ्गलश्च बुधश्चाथ बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥ २ ॥
ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णकादुभौ ॥ रजतादयसः सीसाद्ग्रहाः कार्य्याः क्रमादिमे ॥ ३ ॥ सुवर्णैर्वा यजेल्लिख्य गन्धमण्डलकेषु
वा ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥४॥ गन्धाश्च बलयश्चैव धूपो देयस्तु गुग्गुलुः ॥ कर्त्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम्
॥ ५ ॥ आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ॥ उद्बुध्यस्वेति च ऋचो यथासङ्ख्यं प्रकीर्त्तिताः ॥ ६ ॥ बृहस्पते अतियदर्य्यस्त-
थैवान्नात्परिश्रुतः ॥ शन्नो देवीस्तथा काण्डात्केतुं कृण्वन्निमांस्तथा ॥ ७ ॥ अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः ॥ उदुम्बरः
शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ ८ ॥ एकैकस्यात्राष्टशतमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ॥ ९ ॥
गुडौदनं पायसं च हविष्यं क्षीरयष्टिकम् ॥ दध्योदनं हविः पूपान्मांसं चित्रान्नमेव च ॥ १० ॥ दद्याद्ग्रहक्रमादेतद्विजेभ्यो भोजनं बुधः ॥
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम् ॥ ११ ॥ धेनुः शङ्खस्तथानड्वान्हेम वासो हयस्तथा ॥ कृष्णा गौरायसश्छाग एता वै
दक्षिणाः क्रमात् ॥ १२ ॥ यश्च यस्य यदा दूष्यः स तं यत्नेन पूजयेत् ॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजितस्य च ॥ १३ ॥ ग्रहा-
धीना नरेन्द्राणामुच्छ्रायाः पतनानि च ॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये
नवग्रहहोमानि ० नाम चतुःषष्ट्यधिकशततमोऽध्यायः ॥१६४॥ अथ नानाधर्मानि० ॥ अग्निरुवाच ॥ ध्येय आत्मा स्थितो योऽसौ हृदये ॥११७॥
दीपवत्प्रभुः ॥ अनन्यविषयं कृत्वा मनोबुद्धिरमूर्तीन्द्रियम् ॥ १ ॥ श्राद्धं तु ध्यायिने देयं गव्यं दधि घृतं पयः ॥ प्रियङ्गवो मसूराश्च वार्त्ता-
कुः कोद्रवो न हि ॥ २ ॥ सैंहिकेयो यदा सूर्य्यं ग्रसते पर्वसन्धिषु ॥ हस्तिच्छाया तु सा ज्ञेया श्राद्धदानादिकेऽक्षया ॥ ३ ॥ पैत्रे चैव यदा

सामा हंस चैव करे स्थिते ॥ तिथिर्वैवस्वती नाम सा छाया कुञ्जरस्य तु ॥ ४ ॥ अग्नौकरणशेषं तु न दद्याद्धैश्वदैविके ॥ अन्यभावे तु विप्रस्य हस्ते दद्यात्तु दक्षिणे ॥५॥ न स्त्री दुष्यति जारेण न विप्रोऽवेदकर्म्मणा ॥ बलात्कारोपभुक्ता चेद्वैरिहस्तगतापि वा ॥ ६ ॥ सन्त्यजेद्दूषितां नारीमृतुकालेन शुध्यति ॥ पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः ॥ ७ ॥ भुञ्जते मानुषाः पश्चान्नैता दुष्यन्ति केनचित् ॥ असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते ॥ ८ ॥ अशुद्धा तु भवेन्नारी यावच्छल्यं न मुञ्चति ॥ निःसृते तु ततः शल्ये रजसा शुध्यते ततः ॥ ९ ॥ य आत्मव्यतिरेकेण द्वितीयं नात्र पश्यति ॥ १० ॥ ब्रह्मभूतः स एवेह योगी चात्मरतोऽमलः ॥ विषयेन्द्रियसंयोगात्केचिद्योगं वदन्ति वै ॥ ११ ॥ अधर्मो धर्मबुद्ध्या तु गृहीतस्तैरपण्डितैः ॥ आत्मनो मनसश्चैव संयोगं च तथा परे ॥ १२ ॥ वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञे परमात्मनि ॥ एकीकृत्य विमुच्येत बन्धाद्योगोऽयमुत्तमः ॥ १३ ॥ कुटुम्बैः पञ्चभिर्ग्रामः षष्टस्तत्र महत्तरः ॥ देवासुरमनुष्यैर्वा स जेतुं नैव शक्यते ॥ १४ ॥ बाह्यमुखानि सर्वाणि कृत्वा चाभिमुखानि वै ॥ मनस्येवेन्द्रियग्रामं मनश्चात्मनि योजयेत् ॥ १५ ॥ सर्वभावाविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत् ॥ एतज्ज्ञानं च ध्यानं च शेषोऽन्यो ग्रन्थविस्तरः ॥ १६ ॥ यन्नास्ति सर्वलोकस्य तदस्तीति निरुध्यते ॥ कथ्यमानं तथाऽन्यस्य हृदये नावतिष्ठते ॥ १७ ॥ असंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा ॥ अयोगी नैव जानाति जात्यन्धो हि घटं यथा ॥ १८ ॥ सन्न्यसन्तं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः ॥ एष मे मण्डलं भित्त्वा परं ब्रह्माऽधिगच्छति ॥ १९ ॥ उपवासव्रतं चैव स्नानं तीर्थे फलं तपः ॥ द्विजसम्पादनं चैव सम्पन्नं तस्य तत्फलम् ॥ २० एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥ सावित्र्यास्तु परं नास्ति पावनं परमं स्मृतम् ॥ ध्यानेन सदृशं नास्ति शोधनं पापकर्म्मणाम् ॥ २१ ॥ श्वपाकेष्वपि भुञ्जानो ध्यानेन हि विशुध्यति ॥ आत्मा ध्याता मनो ध्यानं ध्येयो विष्णुः फलं हरिः ॥२२॥ अक्षयाय यतिः श्राद्धे पंक्तिपावनपावनः ॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः ॥ २३ ॥ प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा ॥ ये च प्रव्रजिताः पत्न्यां या चैषां बीजसन्ततिः ॥ २४ ॥ विदुला नाम चाण्डाला जायन्ते नात्र संशयः ॥ शतिको म्रियते गृध्रः श्वासौ द्वादशिकस्तथा ॥ २५ ॥ भासो विंशतिवर्षाणि सूकरो दशभिस्तथा ॥ अपुष्पो विफलो वृक्षो जायते कण्टकावृतः ॥ २६ ॥ ततो दावाग्निदग्धस्तु स्थाणुर्भवति

सानुगः ॥ ततो वर्षशतान्यष्टौ द्वे च तिष्ठत्यचेतनः ॥ २७ ॥ पूर्णे वर्षसहस्रे तु जायते ब्रह्मराक्षसः ॥ प्लवेन लभते मोक्षं कुलस्योत्सादनेन वा ॥ योगमेव निषेवेत नान्यं मन्त्रमघापहम् ॥ २८ ॥ इत्यादिमहापुराणे आग्नेये नानाधर्मो नाम पञ्चषष्ट्यधिकशततमोऽध्यायः ॥१६५॥

अथ वर्णधर्मादिकथनम् ॥ पुष्कर उवाच ॥ वेदस्मार्त्तं प्रवक्ष्यामि धर्मं वै पञ्चधा स्मृतम् ॥ वर्णत्वमेकमाश्रित्य योऽधिकारः प्रवर्त्तते ॥ १ ॥ वर्णधर्मः स विज्ञेयो यथोपनयनं त्रिषु ॥ यस्त्वाश्रमं समाश्रित्य पदार्थः संविधीयते ॥ २ ॥ उक्त आश्रमधर्मस्तु भिन्नपिण्डादिको यथा ॥ उभयेन निमित्तेन यो विधिः सम्प्रवर्त्तते ॥ ३ ॥ नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥ ब्रह्मचारी गृही चापि वानप्रस्थो यतिर्नृपः ॥ ४ ॥ उक्त आश्रमधर्म्मस्तु धर्म्मः स्यात्पञ्चधा परः ॥ पाद्गुण्यस्याभिधाने यो दृष्टार्थः स उदाहृतः ॥ ५ ॥ स त्रेधा मन्त्रयागाद्यदृष्टार्थ इति मानवाः ॥ उभयार्थो व्यवहारस्तु दण्डधारणमेव च ॥ ६ ॥ तुल्यार्थानां विकल्पः स्याद्यागमूलः प्रकीर्तितः ॥ वेदे तु विहितो धर्म्मः स्मृतौ तादृश एव च ॥ ७ ॥ अनुवादं स्मृतिः सूते कार्य्यार्थमिति मानवाः ॥ गुणार्थः परिसंख्यार्थो वानुवादो विशेषतः ॥ ८ ॥ विशेषदृष्ट एवासौ फलार्थ इति मानवाः ॥ स्यादृष्टचत्वारिंशद्भिः संस्कारैर्ब्रह्मलोकगः ॥ ९ ॥ गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः ॥ जातकर्म्म नामकृतिरन्नप्राशनचूडकम् ॥ १० ॥ संस्कारश्चोपनयनं वेदव्रतचतुष्टयम् ॥ स्नानं स्वधर्म्मचारिण्या योगः स्याद्यज्ञपञ्चकम् ॥ ११ ॥ देवयज्ञः पितृयज्ञो मनुष्यभूतयज्ञकौ ॥ ब्रह्मयज्ञः सप्तपाकयज्ञसंस्थाः पुरोऽष्टकाः ॥ १२ ॥ पार्वणश्राद्धं श्रावण्याग्रहायणी च चैत्र्यपि ॥ आश्वयुजी सप्तहविर्यज्ञसंस्थास्ततः स्मृताः ॥ १३ ॥ अग्न्याधेयमग्निहोत्रं दर्शः स्यात्पौर्णमासकः ॥ चातुर्मास्याग्रहायण्येष्टिर्निरूढः पशुबन्धकः ॥ १४ ॥ सौत्रामणिः सप्तसोमसंस्थाग्निष्टोम आदितः ॥ अत्यग्निष्टोम उक्थश्च षोडशी वाजपेयकः ॥ १५ ॥ अतिरात्रस्तथा स्तोमा अष्टौ चात्मगुणास्ततः ॥ दया क्षमाऽनसूया च अनायासोऽथ मङ्गलम् ॥ १६ ॥ अकार्पण्यास्पृहा शौचं यस्येते स परं व्रजेत् ॥ प्रचारे मैथुने चैव प्रस्रावे दन्तधावने ॥ १७ ॥ स्नानभोजनकाले च षट्सु मौनं समाचरेत् ॥ पुनर्दानं पृथक्पानमाज्येन पयसा निशि ॥ १८ ॥ दन्तच्छेदनमुष्णं च सप्त सत्सु वर्जयेत् ॥ स्नात्वा पुष्पं न गृह्णीयादेवायोग्यं तदीरितम् ॥ १९ ॥ अन्यगोत्रोऽप्यसम्बन्धः प्रेतस्याग्निं ददाति यः ॥ पिण्डं चोदकदानं च स दशाहं समापयेत् ॥ २० ॥ उदकं च तृणं भस्म द्वारं पन्थास्त-

यैव च ॥ एभिरन्तरितं कृत्वा पङ्क्तिदोषो न विद्यते ॥ पञ्च प्राणाहुतीर्दद्यादनामाङ्गुष्ठयोगतः ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये वर्ण-
धर्मादिव० नाम षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ अथ पुनरयुतलक्षकोटिहोमाः ॥ अग्निरुवाच ॥ श्रीशान्तिविजयाद्यर्थं ग्रहयज्ञं
पुनर्वदे ॥ ग्रहयज्ञोऽयुतहोमलक्षकोत्यात्मकास्त्रिधा ॥ १ ॥ वेदेरेशे ह्यग्निकुण्डाद्ध्यानावाह्य मण्डले ॥ सौम्ये गुरुर्बुधश्चेशे शुक्रः पूर्वदले
शशी ॥ २ ॥ आग्नेये दक्षिणे भौमे मध्ये स्याद्भास्करस्तथा ॥ शनिराप्येऽथ नैर्ऋत्ये राहुः केतुश्च वायवे ॥ ३ ॥ ईशश्चोमा गुहो विष्णु-
ब्रह्मेन्द्रो यमकालकौ ॥ चित्रगुप्तश्चाधिदेवा अग्निरापः क्षितिर्हरिः ॥ ४ ॥ इन्द्र ऐन्द्री देवता च प्रजेशोऽहिर्विधिः क्रमात् ॥ एते प्रत्यधि-
देवाश्च गणेशो दुर्गयानिलः ॥ ५ ॥ स्वमश्विनी तान्सम्पूज्य यजेद्वीजैश्च वेदजैः ॥ अर्कः पलाशः खदिरो ह्यपामार्गश्च पिप्पलः ॥ ६ ॥
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ मध्वाज्यदधिसंमिश्रा होतव्याश्चाष्टधा शतम् ॥ ७ ॥ एकाष्टचतुरः कुम्भान्पूर्य्य पूर्णो-
हुतिं तथा ॥ वसोर्धारां ततो दद्याद्दक्षिणां च ततो ददेत् ॥ ८ ॥ यजमानं चतुर्भिस्तैरभिषिञ्चेत्समन्त्रकैः ॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्म-
विष्णुमहेश्वराः ॥ ९ ॥ वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ १० ॥ आखण्डलोऽग्निर्भगवान्य-
मो वै नैर्ऋतस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ११ ॥ ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु वः सदा ॥ कीर्त्तिर्लक्ष्मी-
र्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ १२ ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥ एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः समा-
गताः ॥ १३ ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ १४ ॥ देवदानवगन्धर्वा
यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ १५ ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशा-
स्त्राणि राजानो वाहनानि च ॥ १६ ॥ ओषधानि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ १७ ॥
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ अलङ्कृतस्ततो दद्याद्धेनुं वस्त्रयुतादिकम् ॥ १८ ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ १९ ॥ पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ॥ विष्णुना विधृतो नित्यमतः
शान्तिं प्रयच्छ मे ॥ २० ॥ धर्म्म त्वं वृषरूपेण जगदानन्दकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ॥ २१ ॥ हिरण्यगर्भ-

गर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ २२ ॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ॥ प्रदानात्तस्य वै विष्णुरतः शान्तिं प्रयच्छ मे ॥ २३ ॥ विष्णुस्त्वं मत्स्यरूपेण यस्मादमृतसम्भवः ॥ चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ॥ २४ ॥ यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा ॥ सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥ २५ ॥ यस्मादायस कर्माणि तवाधीनानि सर्वदा ॥ लाङ्गलाद्यायुधादीनि ह्यतः शान्तिं प्रयच्छ मे ॥ २६ ॥ यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः ॥ योनिर्विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥ २७ ॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ २८ ॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥ शय्या ममाप्यशून्याऽस्तु दत्ता जन्मनि जन्मनि ॥ २९ ॥ यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः ॥ तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥ ३० ॥ यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ॥ दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह ॥ ३१ ॥ ग्रहयज्ञोऽयुतहोमो दक्षिणाभी रणे जितिः ॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु ॥ ३२ ॥ सर्वकामार्तये लक्षकोटिहोमद्वयं मतम् ॥ गृहदेशे मण्डपेऽथ ह्ययुते हस्तमात्रकम् ॥ ॥ ३३ ॥ मेखलायोनिसंयुक्तं कुण्डं चत्वार ऋत्विजः ॥ स्वयमेकोऽपि वा लक्षे सर्वं दशगुणं हि तत् ॥ ३४ ॥ चतुर्हस्तं द्विहस्तं वा तार्क्ष्यं चात्राधिकं यजेत् ॥ सामघ्वनिशरीरस्त्वं वाहनं परमेष्ठिनः ॥ ३५ ॥ विपयापहरो नित्यमतः शान्तिं प्रयच्छ मे ॥ पूर्ववत्कुण्डमा- मन्त्र्य लक्षहोमं समाचरेत् ॥ ३६ ॥ वसोर्धारां ततो दद्याच्छय्याभूषादिकं ददेत् ॥ तत्रापि दश चाष्टौ च लक्षहोमे तथर्त्विजः ॥ ३७ ॥ पुत्रान्नराज्यविजयभुक्तिमुक्त्यादि चाप्नुयात् ॥ दक्षिणाभिः फलेनास्माच्छत्रुघ्नः कोटिहोमकः ॥ ३८ ॥ चतुर्हस्तं चाष्टहस्तं कुण्डं द्वादश च द्विजाः ॥ पञ्चविंशं षोडशं वा पटे द्वारे चतुष्टयम् ॥ ३९ ॥ कोटिहोमी सर्वकामी विष्णुलोकं स गच्छति ॥ होमस्तु ग्रहमन्त्रैर्वा गायत्र्या वैष्णवैरपि ॥ ४० ॥ जातवेदोमुखैः शैवैर्वैदिकैः प्रार्थितैरपि ॥ तिलैर्यवैर्घृतैर्धान्यैरश्वमेधफलादिभाक् ॥ ४१ ॥ विद्वेषणाभिचारेषु त्रिकोणं कुण्डमिष्यते ॥ सामिधो वामहस्तेन श्येनास्थ्यनलसंयुताः ॥ ४२ ॥ रक्तभूषैर्मुक्तकेशैर्ध्यायद्भिरशिवं रिपोः ॥ दुर्मित्रियास्तस्य सन्तु यो द्वेष्टि हुं फडिति च ॥ ४३ ॥ छिन्द्यात्क्षुरेण प्रतिमां पिष्टरूपं रिपुं हनेत् ॥ यजेदेकं पिण्डकं वा यः स कृत्वा दिवं व्रजेत् ॥ ४४ ॥ इत्या-

दिमहापुराण आग्नेयऽयुतलक्षकाटहोमो नाम सप्तषष्ट्याधिकशततमोऽध्यायः ॥ १६७ ॥ अथ महापातकादिप्रायश्चित्तम् ॥ पुष्कर उवाच ॥ दण्डं कुर्य्यान्नृपो नृणां प्रायश्चित्तमकुर्वताम् ॥ कामतोऽकामतो वापि प्रायश्चित्तं कृतं चरेत् ॥ १ ॥ मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन ॥ महापातकिना स्पृष्टं यच्च स्पृष्टमुदक्यया ॥ २ ॥ गणान्नं गणिकान्नं च वार्द्धुषेर्गायकस्य च ॥ अभिशप्तस्य पण्ढस्य यस्याश्नोपपतिर्गृहे ॥ ३ ॥ रजकस्य नृशंसस्य बन्दिनः कितवस्य च ॥ मिथ्यानपास्विनश्चैव चौरदण्डिकयोस्तथा ॥ ४ ॥ कुण्ड-गोलस्त्रीजितानां वेदविक्रयिणस्तथा ॥ शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च ॥ ५ ॥ कर्मारस्य निषादस्य चैलनिर्णेजकस्य च ॥ मिथ्याप्रव्रजितस्यान्नं पुंश्चल्यास्तौलिकस्य च ॥ ६ ॥ आरूढपतितस्यान्नं विद्विष्टान्नं च वर्जयेत् ॥ तथैव ब्राह्मणस्यान्नं ब्राह्मणेनानिमन्त्रितः ॥ ७ ॥ ब्राह्मणान्नं च शूद्रान्नं नाद्याच्चैव निमन्त्रितः ॥ एषामन्यतमस्यान्नममन्या वा त्र्यहं क्षिपेत् ॥ ८ ॥ मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च ॥ चण्डालश्वपचान्नं तु भुक्त्वा चान्द्रायणं चरेत् ॥ ९ ॥ अनिर्दशं च प्रेतान्नं गवाघ्रातं तथैव च ॥ शूद्रोऽच्छिष्टं शुनोच्छिष्टं पतितान्नं तथैव च ॥ १० ॥ तप्तकृच्छ्रं प्रकुर्वीत ह्याशौचे कृच्छ्रमाचरेत् ॥ आशौचे यस्य यो भुङ्क्ते सोऽप्यशुद्धस्तथा भवेत् ॥ ११ ॥ मृतपञ्चनखान्कूपादमेध्येन सकृद्युतान् ॥ अपः पीत्वा त्र्यहं निष्टेत्सोपवासो द्विजोत्तमः ॥ १२ ॥ सर्वत्र शूद्रे पादः स्याद्धितयं वैश्यभूपयोः ॥ विड्गाहखरोष्ट्राणां गोमायोः कपिकाकयोः ॥ १३ ॥ प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् ॥ शुष्काणि जग्ध्वा मांसानि प्रेतान्नं करकाणि च ॥ १४ ॥ क्रव्यादसूकरोष्ट्राणां गोमायोः कपिकाकयोः ॥ गोनराश्वखरोष्ट्राणां छत्राकं ग्रामकुक्कुटम् ॥ १५ ॥ मांसं जग्ध्वा कुञ्जरस्य तप्तकृच्छ्रेण शुध्यति ॥ आमश्राद्धे तथा भुक्त्वा ब्रह्मचारी मधु त्वदन् ॥ १६ ॥ लशुनं गृञ्जनं चाद्यात्राजापत्यादिना शुचिः ॥ भुक्त्वा चान्द्रायणं कुर्य्यान्मांसं चात्मकृतं तथा ॥ १७ ॥ पेलु गव्यं च पेयूषं तथा श्लेष्मातकं मृदम् ॥ वृथाकृसरसंयावपायसा-पूपशष्कुलीः ॥ १८ ॥ अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ गवां च माहिषाणां च वर्जयित्वा तथाप्यजाम् ॥ १९ ॥ सर्वक्षीराणि व-र्ज्यानि नासां चैवाप्यनिर्दशम् ॥ शशकः सल्लकी गोधा खड्गः कूर्म्मस्तथैव च ॥ २० ॥ भक्ष्याः पञ्चनखाः प्रोक्ता परिशेषाश्च वर्जिताः ॥ पाठीनरोहितान्मत्स्यान्सिंहतुण्डांश्च भक्षयेत् ॥ २१ ॥ यवगोधूमजं सर्वं पयसश्चैव विक्रियाः ॥ वागपाङ्नवचक्रादीन्सस्नेहमुषितं

तथा ॥ २२ ॥ अग्निहोत्रपरीद्धाग्निर्ब्राह्मणः कामचारतः ॥ चान्द्रायणं चरेन्मासं वीरध्वासनं हितम् ॥ २३ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ॥ महान्ति पातकान्याहुः संयोगश्चैव तैः सह ॥ २४ ॥ अनृते च समुत्कर्षो राजगामि च पैशुनम् ॥ गुरोश्चालीकनिर्बन्धः समानं ब्रह्महत्यया ॥ २५ ॥ ब्रह्मोज्झ्यं वेदनिन्दा च कौटसाक्ष्यं सुहृद्वधः ॥ गर्हितान्नाज्ययोर्जग्धिः सुरापानसमानि षट् ॥ २६ ॥ निक्षेपस्यापहरणं नराश्वरजतस्य च ॥ भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम् ॥ २७ ॥ रेतःसेकः स्वयोन्यासु कुमारीष्वन्त्यजासु च ॥ सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥ २८ ॥ गोवधोऽयाज्ययाज्यं पारदार्य्यात्मविक्रयः ॥ गुरुमातृपितृत्यागः स्वध्यायाग्न्योः सुतस्य च ॥ २९ ॥ परिवित्तितानुजेन पारिवेदनमेव च ॥ तयोर्दानं च कन्यायास्तयोरेव च याजनम् ॥ ३० ॥ कन्याया दूषणं चैव वार्द्धुष्यं व्रतलोपनम् ॥ तडागारामदाराणामपत्यस्य च विक्रयः ॥ ३१ ॥ व्रात्यता बान्धवत्यागो भृताध्यापनमेव च ॥ भृताध्ययनादानमविक्रेयस्य विक्रयः ॥ ३२ ॥ सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम् ॥ हिंसौषधीनां रुध्याजीवः क्रियालङ्घनमेव च ॥ ३३ ॥ इन्धनार्थमशुष्काणां द्रुमाणां चैव पातनम् ॥ योषितां ग्रहणं चैव स्त्रीनिन्दकसमागमः ॥ ३४ ॥ आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥ अनाहिताग्नितास्तेयमृणानां चानपक्रिया ॥ ३५ ॥ असच्छास्त्राधिगमनं दौःशील्यं व्यसनक्रिया ॥ धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम् ॥ ३६ ॥ स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम् ॥ ब्राह्मणस्य रुजः कृत्यं घातिरग्रेयमद्ययोः ॥ ३७ ॥ जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥ श्वखरोष्ट्रमृगेन्द्राणामजाव्योश्चैव मारणम् ॥ ३८ ॥ सङ्कीर्णकरणं ज्ञेयं मीनाहिनकुलस्य च ॥ निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ॥ ३९ ॥ अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥ कृमिकीटवयोहत्यामद्यानुगतभोजनम् ॥ फलेधःकुसुमस्तेयमधैर्य्यं च मलावहम् ॥ ४० ॥ इत्यादिमहापुराणे आग्नेये महापातकादिप्रायश्चित्तं नामाऽष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥ पुनः प्रायश्चित्तानि ॥ पुष्कर उवाच ॥ एतत्प्रभृति पापानां प्रायश्चित्तं वदामि ते ॥ ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् ॥ १ ॥ भिक्षेतात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥ प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥ २ ॥ यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा ॥ जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ॥ ३ ॥ सर्वस्वं वा वेदविदे ब्राह्मणा-

योपपादयेत् ॥ व्रतैरेतैर्व्यपोहन्ति महापातकिनो मलम् ॥ ४ ॥ उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् ॥ कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः ॥ ५ ॥ चतुर्थकालमश्नीयादक्षारलवणं मितम् ॥ गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः ॥ ६ ॥ दिवानुगच्छेद्गाश्चैव निष्ठ-ष्ठूर्द्धं रजः पिबेत् ॥ वृषभैकादशागास्तु दद्याद्धि चरितव्रतः ॥ ७ ॥ अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ॥ पादमेकं चरद्रोधे द्वौ पादौ बन्धने चरेत् ॥ ८ ॥ योजने पादहीनं स्याच्चरेत्सर्वं निपातने ॥ कान्तारेष्वथ दुर्गेषु विषमेषु भयेषु च ॥ ९ ॥ यदि तत्र विपत्तिः स्यादेकपादो विधीयते ॥ घण्टाभरणदोषेण तथैवार्द्धं विनिर्दिशेत् ॥ १० ॥ दमने दामने रोधे शकटस्य नियोजने ॥ स्तंभशृङ्गलपाशेषु मृते पादोनमाचरेत् ॥ ११ ॥ शृङ्गभङ्गेऽस्थिभङ्गे च लांगुलच्छेदने तथा ॥ यावकं तु पिबेत्तावद्यावत्सुस्था तु गौर्भवेत् ॥ १२ ॥ गोमतीं च जपेद्विद्यां गोस्तुतिं गोमतीं स्मरेत् ॥ एका चेद्बहुभिर्दैवाद्यत्र व्यापादिता भवेत् ॥ १३ ॥ पादंपादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥ उपकारे क्रियमाणे विपत्तौ नास्ति पातकम् ॥ १४ ॥ एतदेव व्रतं कुर्युरुपपातकिनस्तथा ॥ अवकीर्णिव्रजं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥ १५ ॥ अवकीर्णी तु कालेन गर्दभेन चतुष्पथे ॥ पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥ १६ ॥ कृत्वाग्निं विधिवद्धीमानन्ततस्तु सामित्यृचा ॥ चन्द्रेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतिम् ॥ १७ ॥ अथवा गार्दभं चर्म्म वासित्वाब्दं चरेन्महीम् ॥ हत्वा गर्भमविज्ञातं ब्रह्महत्याव्रतं चरेत् ॥ १८ ॥ सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् ॥ गोमूत्रमाग्निवर्णं वा पिबेदुदकमेव वा ॥ १९ ॥ सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु ॥ स्वकर्म्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति ॥२०॥ गृहीत्वा मुसलं राजा सकृद्धन्यात्स्वयङ्कृतम् ॥ वधेन शुध्यते स्तेयो ब्राह्मणस्तपसैव वा ॥२१ ॥ गुरुतल्पो निकृत्यैव शिश्नं च वृषणं स्वयम् ॥ निधाय चाञ्जलौ गच्छेदानिपाताच्च नैर्ऋतिम् ॥ २२ ॥ चान्द्रायणान्वा त्रीन्मासानभ्यसेन्नियतेन्द्रियः ॥ जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया ॥२३॥ चरेन्मान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥ सङ्करीपात्रकृत्यासु मासं शोधनमैन्दवम् ॥ २४ ॥ मालिनीकरणीयेषु तप्तं स्याद्यावकं त्र्यहम् ॥ तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः ॥२५॥ वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः ॥ मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ॥ २६ ॥ श्वगोधोलूककाकांश्च शूद्र-हत्याव्रतं चरेत् ॥ चतुर्णामपि वर्णानां नारीं हत्वानवस्थिताम् ॥ २७ ॥ अमत्यैव प्रमाप्य स्त्रीं शूद्रहत्याव्रतं चरेत् ॥ सर्पादीनां वधे नक्त-

मनस्थां वायुसंयमः ॥ २८ ॥ द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः ॥ चरेत्सान्तपनं कृच्छ्रं व्रतं निर्वाप्य शुध्यति ॥ २९ ॥ भक्ष्यभो-
ज्यापहरणे यानशय्यासनस्य च ॥ पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥३०॥ तृणकाष्ठद्रुमाणां तु शुष्कान्नस्य गुडस्य च ॥ चैलच-
र्म्मामिषाणां तु त्रिरात्रं स्यादभोजनम् ॥ ३१ ॥ मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च ॥ अयःकांस्योपलानां च द्वादशाहं कणान्नभुक्
॥ ३२ ॥ कार्पासकीटजोर्णानां त्रिशफैकशफस्य च ॥ पक्षिगन्धौषधीनां तु रज्ज्वाश्चैव त्र्यहं पयः ॥ ३३ ॥ गुरुतल्पव्रतं कुर्य्याद्रेतः सिक्त्वा
स्वयोनिषु ॥ सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥३४॥ पैतृष्वस्रेयी भगिनी स्वस्रीयां मातुरेव च ॥ मातुश्च भ्रातुरात्तस्य गत्वा
चान्द्रायणं चरेत् ॥ ३५ ॥ अमानुषीषु पुरुष उदक्यायामयोनिषु ॥ रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत् ॥३६॥ मैथुनं तु समा-
सेव्य पुंसि योषिति वा द्विजः ॥ गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥ ३७ ॥ चाण्डालान्त्यस्त्रियौ गत्वा भुक्त्वा च प्रतिगृह्य
च ॥ पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ ३८॥ विप्रदुष्टां स्त्रियं भर्त्ता निरुन्ध्यादेकवेश्मनि ॥ यत्पुंसः परदारेषु तदेनां चारये-
द्व्रतम् ॥ ३९ ॥ सा चेत्पुनः प्रदुष्येत सदृशेनोपमन्त्रिता ॥ कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम् ॥ ४० ॥ यत्करोत्येकरात्रेण
वृषलीसेवनं द्विजः ॥ तद्वैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये प्रायश्चित्तनि० नामैकोनसप्तत्यधिक-
शततमोऽध्यायः ॥ १६९ ॥ पुनः प्रायश्चित्तानि ॥ पुष्कर उवाच ॥ महापापानुयुक्तानां प्रायश्चित्तानि वच्मि ते ॥ संवत्सरेण पतति पति-
तेन सहाचरन् ॥ १ ॥ याजनाध्यापनाद्योनान्न तु यानाशनासनात् ॥ यो येन पतितेनैषां संसर्गं याति मानवः ॥ २ ॥ स तस्यैव व्रतं
कुर्य्यात्तत्संसर्गस्य शुद्धये ॥ पतितस्योदकं कार्य्यं सापिण्डैर्बान्धवैः सह ॥ ३ ॥ निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥ दासी
घटमपां पूर्णं पर्य्यस्येत्प्रेतवत्पदा ॥ ४ ॥ अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥ निवर्त्तयेरंस्तस्मात्तु ज्येष्ठांशं भापणादिके ॥ ५ ॥
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः ॥ प्रायश्चित्ते तु चरिते पूर्णं कुम्भमपां नवम् ॥ ६ ॥ तेनैव सार्द्धं प्राश्येयुः स्नात्वा पुण्य-
जलाशये ॥ एवमेव विधिं कुर्युर्योषित्सु पतितास्वपि ॥ ७ ॥ वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके ॥ तेषां द्विजानां सावित्री नानूद्येत
यथाविधि ॥ ८ ॥ तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥ विकर्मस्थाः परित्यक्तास्तेषामप्येतदादिशेत् ॥ ९ ॥ जपित्वा त्रीणि

सावित्र्याः सहस्राणि समाहितः ॥ मास गाष्ठ पयः पात्वा मुच्यतऽसत्प्रतिग्रहात् ॥ १० ॥ व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च ॥ अभिचारमहीनानां त्रिभिः कृच्छ्रैर्व्यपोहति ॥ ११ ॥ शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः ॥ संवत्सरं मिताहारस्तत्पापमपसेधति ॥१२॥ श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ॥ नरोष्ट्राश्वैर्वराहैश्च प्राणायामेन शुध्यति ॥१३॥ स्नातकव्रतलोपे च कर्मत्यागे ह्यभोजनम् ॥ हुङ्कारं ब्राह्मणस्योक्त्वा तुङ्कारं च गरीयसः ॥ १४ ॥ स्नात्वानश्नन्नहः शेषमभिवाद्य प्रसादयेत् ॥ अवगूर्य्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ॥ १५ ॥ कृच्छ्रातिकृच्छ्रं कुर्वीत विप्रस्योत्पाद्य शोणितम् ॥ चाण्डालादिरविज्ञातो यस्य निष्ठेत्तु वेश्मनि ॥ १६ ॥ सम्यग्ज्ञातस्तु कालेन तस्य कुर्वीत शोधनम् ॥ चान्द्रायणं पराकं वा द्विजानां तु विशोधनम् ॥ १७ ॥ प्राजापत्यं तु शूद्राणां शेषं तदनुसारतः ॥ गुडं कुसुम्भं लवणं तथा धान्यानि यानि च ॥१८॥ कृत्वा गृहे ततो द्वारि तेषां दद्याद्धुताशनम् ॥ मृन्मयानां तु भाण्डानां त्याग एव विधीयते ॥१९॥ द्रव्याणां परिशेषाणां द्रव्यशुद्धिर्विधीयते ॥ कूपैकपानसक्ता ये स्पर्शात्सङ्कल्पदूषिताः ॥ २० ॥ शुध्येयुरुपवासेन पञ्चगव्येन वाप्यथ ॥ यस्तु संस्पृश्य चण्डालमश्नीयाच्च स्वकामतः ॥ २१ ॥ द्विजश्चान्द्रायणं कुर्य्यात्तप्तकृच्छ्रमथापि वा ॥ भाण्डसङ्कुलसङ्कीर्णश्चाण्डालादि-जुगुप्सितैः ॥ २२ ॥ भुक्त्वा पीत्वा तथा तेषां पड्रात्रेण विशुध्यति ॥ अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ॥ २३ ॥ व्रतं चान्द्रा-यणं कुर्य्युस्त्रिरात्रं शूद्र एव तु ॥ चाण्डालकूपभाण्डेषु अज्ञानात्पिबते जलम् ॥ २४ ॥ द्विजः सान्तपनं कुर्य्याच्छूद्रश्चोपवसेद्दिनम् ॥ चाण्डालेन तु संस्पृष्टो यस्त्वपः पिबते द्विजः ॥ २५ ॥ त्रिरात्रं तेन कर्त्तव्यं शूद्रश्चोपवसेद्दिनम् ॥ उच्छिष्टेन यदि स्पृष्टः शुना शूद्रेण वा द्विजः ॥ २६ ॥ उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥ वैश्येन क्षत्रियेणैव स्नानं नक्तं समाचरेत् ॥ २७ ॥ अज्ञानं प्रस्थितो विप्रः कान्तारे यद्यनूदके ॥ पक्वान्नेन गृहीतेन मूत्रोच्चारं करोति वै ॥ २८ ॥ अनिधायैव तद्द्रव्यं अङ्गे कृत्वा तु संस्थितम् ॥ शौचं कृत्वान्न-मभ्युक्ष्य अर्कस्याग्नेश्च दर्शयेत् ॥ २९ ॥ म्लेच्छैर्गतानां चोरैर्वा कान्तारे वा प्रवासिनाम् ॥ भक्ष्याभक्ष्यविशुद्ध्यर्थं तेषां वक्ष्यामि निष्कृतिम् ॥ ३० ॥ पुनः प्राप्य स्वदेशं च वर्णानामानुपूर्वशः ॥ कृच्छ्रस्यान्ते ब्राह्मणस्तु पुनः संस्कारमर्हति ॥ ३१ ॥ पादोनान्ते क्षत्रियश्च अर्द्धान्ते वैश्य एव च ॥ पादं कृत्वा तथा शूद्रो दानं दत्त्वा विशुध्यति ॥ ३२ ॥ उदक्या तु सवर्णा या स्पृष्टा चेत्स्यादुद-

क्यया ॥ तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयम् ॥ ३३ ॥ रजस्वला तु नाश्नीयात्संस्पृष्टा हीनवर्णया ॥ यावन्न शुद्धिमाप्नोति शुद्धस्नानेन शुध्यति ॥ ३४ ॥ मूत्रं कृत्वा व्रजन्वर्त्म स्मृतिभ्रंशाज्जलं पिबेत् ॥ अहोरात्रोषितो भूत्वा प्रश्चगव्येन शुध्यति ॥ ३५ ॥ मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः ॥ मोहाद्भुक्त्वा त्रिरात्रं तु यवान्पीत्वा विशुध्यति ॥ ३६ ॥ ये प्रत्यवसिता विप्राः प्रव्रज्यादिबलात्तथा ॥ अनाशकनिवृत्ताश्च तेषां शुद्धिः प्रचक्ष्यते ॥ ३७ ॥ चारयेत्त्रीणि कृच्छ्राणि चान्द्रायणमथापि वा ॥ जातकर्म्मोदिसंस्कारैः संस्कुर्य्यात्तं तथा पुनः ॥ ३८ ॥ उपानहममेध्यं च यस्य संस्पृशते मुखम् ॥ मृत्तिकागोमयौ तत्र पञ्चगव्यं च शोधनम् ॥ ३९ ॥ वापनं विक्रयं चैव नीलवस्त्रादिधारणम् ॥ तपनीयं हि विप्रस्य त्रिभिः कृच्छ्रैर्विशुध्यति ॥ ४० ॥ अन्त्यजातिश्वपाकेन संस्पृष्टा स्त्री रजस्वला ॥ चतुर्थेऽहनि शुद्धा सा त्रिरात्रं तत्र चाचरेत् ॥ ४१ ॥ चाण्डालश्वपचौ स्पृष्ट्वा तथा पूयं च सूतिकाम् ॥ शवं तत्स्पर्शिनं स्पृष्ट्वा सद्यःस्नानेन शुध्यति ॥ ४२ ॥ नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ॥ रथ्याकर्दमतोयेन ह्यथो नाभेर्नृदोदकैः ॥ ४३ ॥ वान्तो विरिक्तः स्नात्वा तु घृतं प्राश्य विशुध्यति ॥ स्नानात्क्षुरकर्मकर्त्ता कृच्छ्रकृद्व्रहणेऽन्नभुक् ॥ ४४ ॥ अपांक्तेयाशी गव्याशी शुना दष्टस्तथाऽशुचिः ॥ कृमिदष्टश्चात्मघाती कृच्छ्राज्जाप्याच्च होमतः ॥ ४५ ॥ होमाद्यैश्चानुतापेन पूयन्ते पापिनोऽखिलाः ॥ इत्यादिमहापुराणे आग्नेये प्रायश्चित्तनि० नाम सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ पुनः प्रायश्चित्तानि ॥ पुष्कर उवाच ॥ प्रायश्चित्तं रहस्यादि वक्ष्ये शुद्धिकरं परम् ॥ पौरुषेण तु सूक्तेन मासं जप्यादिनाघहा ॥ १ ॥ मुच्यते पातकैः सर्वैर्जप्त्वा त्रिरघमर्षणम् ॥ वेदजप्याद्वायुयमाद्वायव्या व्रततोऽघहा ॥ २ ॥ मुण्डनं सर्वकृच्छ्रेषु स्नानं होमो हरेर्यजिः ॥ उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि ॥ ३ ॥ एतद्वीरासनं प्रोक्तं कृच्छ्रकृत्तेन पापहा ॥ अष्टभिः प्रत्यहं ग्रासैर्यतिचान्द्रायणं स्मृतम् ॥ ४ ॥ प्रातश्चतुर्भिः सायं च शिशुचान्द्रायणं स्मृतम् ॥ यथाकथञ्चित्पिण्डानां चत्वारिंशच्छतद्वयम् ॥ ५ ॥ मासेन भक्षयेदेतत्सुरचान्द्रायणं चरेत् ॥ त्र्यहमुष्णं पिबेदापस्त्र्यहमुष्णं पयः पिबेत् ॥ ६ ॥ त्र्यहमुष्णं घृतं पीत्वा वायुभक्षी भवेत्र्यहम् ॥ तप्तकृच्छ्रमिदं प्रोक्तं शीतैः शीतं प्रकीर्त्तितम् ॥ ७ ॥ कृच्छ्रातिकृच्छ्रं पयसा दिवसानेकविंशतिम् ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥८॥ एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ एतच्च प्रत्य-

॥१२०॥

द्वाभ्यस्तं महासान्तपनं स्मृतम् ॥ ९ ॥ त्र्यहाभ्यस्तमर्यकैकमतिसान्तपनं स्मृतम् ॥ कृच्छ्रं पराकसञ्ज्ञं स्याद्वादशाहमभोजनम् ॥ १० ॥ एकभक्तं त्र्यहाभ्यस्तं क्रमान्नक्तमयाचितम् ॥ प्राजापत्यमुपोष्यान्ते पादः स्यात्कृच्छ्रपादकः ॥ ११ ॥ फलैर्मासं फलं कृच्छ्रं बिल्वैः श्रीकृच्छ्र ईरितः ॥ पद्माक्षैः स्यादामलकैः पुष्पकृच्छ्रं तु पुष्पकैः ॥ १२ ॥ पत्रकृच्छ्रं तथा पत्रैस्तोयकृच्छ्रं जलेन तु ॥ मूलकृच्छ्रं तथा मूलैर्दध्ना क्षीरेण तक्रतः ॥ १३ ॥ मासं वायव्यकृच्छ्रं स्यात्पाणिपूरान्नभोजनात् ॥ तिलैर्द्वादशरात्रेण कृच्छ्रमाग्नेयमार्त्तिनुत् ॥ १४ ॥ पक्षं प्रसृत्या लाजानां ब्रह्मकूर्च्चं तथा भवेत् ॥ उपोषितश्चतुर्दश्यां पञ्चदश्यामनन्तरम् ॥ १५ ॥ पञ्चगव्यं समश्नीयाद्विष्याशीत्यनन्तरम् ॥ मासेन द्विर्नरः कृत्वा सर्वपापैः प्रमुच्यते ॥ १६ ॥ श्रीकामः पुष्टिकामश्च स्वर्गकामोऽघनष्टये ॥ देवताराधनपरः कृच्छ्रकारी स सर्वभाक् ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये रहस्यादिप्रायश्चित्तं नामैकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ अथ पुनः स्तोत्रप्रायश्चित्तानि ॥ पुष्कर उवाच ॥ परदारपरद्रव्यजीवहिंसादिके यदा ॥ प्रवर्त्तते नृणां चित्तं प्रायश्चित्तं स्तुतिस्तदा ॥ १ ॥ विष्णवे विष्णवे नित्यं विष्णवे विष्णवे नमः ॥ नमामि विष्णुं चित्तस्थमहङ्कारगतिं हरिम् ॥ २ ॥ चित्तस्थमीशमव्यक्तमनन्तमपराजितम् ॥ विष्णुमीड्यमशेषेण ह्यनादिनिधनं विभुम् ॥ ३ ॥ विष्णुश्चित्तगतो यन्मे विष्णुर्बुद्धिगतश्च यत् ॥ यच्चाहङ्कारगो विष्णुर्यद्विष्णुर्मयि संस्थितः ॥ ४ ॥ करोति कर्मभूतोऽसौ स्थावरस्य चरस्य च ॥ तत्पापं नाशमायातु तस्मिन्नेव हि चिन्तिते ॥ ५ ॥ ध्यातो हरति यत्पापं स्वप्ने दृष्टस्तु भावनात् ॥ नमुपेन्द्रमहं विष्णुं प्रणतार्तिहरं हरिम् ॥ ६ ॥ जगत्यस्मिन्निराधारे मज्जमाने तमस्यधः ॥ हस्तावलम्बनं विष्णुं प्रणमामि परात्परम् ॥ ७ ॥ सर्वेश्वरेश्वर विभो परमात्मन्नधोक्षज ॥ हृषीकेशं हृषीकेश हृषीकेश नमोऽस्तु ते ॥ ८ ॥ नृसिंहानन्त गोविंद भूतभावन केशव ॥ दुरुक्तं दुष्कृतं ध्यातं शमयाघं नमोऽस्तु ते ॥ ९ ॥ यन्मया चिन्तितं दुष्टं स्वचित्तवशवर्त्तिना ॥ अकार्य्यं महदत्युग्रं तच्छमं नय केशव ॥ १० ॥ ब्रह्मण्यदेव गोविन्द परमार्थपरायण ॥ जगन्नाथ जगद्धातः पापं प्रशमयाच्युत ॥ ११ ॥ यथापराह्णे सायाह्णे मध्याह्ने च तथा निशि ॥ कायेन मनसा वाचा कृतं पापमजानता ॥ १२ ॥ जानता च हृषीकेश पुण्डरीकाक्ष माधव ॥ नामत्रयोच्चारणतः स्वप्ने यातु मम क्षयम् ॥ १३ ॥ शरीरं मे हृषीकेश पुण्डरीकाक्ष माधव ॥ पापं प्रशमयाद्य त्वं वाक्कृतं मम माधव ॥ १४ ॥ यद्दु-

अन्यत्स्वपांस्तिष्ठन्गच्छन्नाग्नेयदास्थितः ॥ कृतवान्पापमद्याहं कायेन मनसा गिरा ॥ १५ ॥ यत्स्वल्पमपि यत्स्थूलं कुयोनिनरकावहम् ॥ तद्यातु प्रशमं सर्वं वासुदेवानुकीर्त्तनात् ॥ १६ ॥ परं ब्रह्म परं धाम पवित्रं परमं च यत् ॥ तस्मिन्प्रकीर्त्तिते विष्णौ यत्पापं तत्प्रणश्यतु ॥ १७ ॥ यत्प्राप्य न निवर्त्तन्ते गन्धस्पर्शादिवर्जितम् ॥ सूरयस्तत्पदं विष्णोस्तत्सर्वं शमयत्वघम् ॥ १८ ॥ पापप्रणाशनं स्तोत्रं यः पठेच्छृणुयादपि ॥ शारीरैर्म्मानसैर्वाग्जैः कृतैः पापैः प्रमुच्यते ॥ १९ ॥ सर्वपापग्रहांदिभ्यो याति विष्णोः परं पदम् ॥ तस्मात्पापे कृते जप्यं स्तोत्रं सर्वाघमर्दनम् ॥ २० ॥ प्रायश्चित्तमघौघानां स्तोत्रं व्रतकृते वरम् ॥ प्रायश्चित्तैः स्तोत्रजपैर्व्रतैर्नश्यति पातकम् ॥ ततः कार्य्याणि संसिद्ध्यै तानि वै भुक्तिमुक्तये ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये सर्वपापप्रायश्चित्ते पापनाशनस्तोत्रं नाम द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ पुनः प्रायश्चित्तानि ॥ अग्निरुवाच ॥ प्रायश्चित्तं ब्रह्मणोक्तं वक्ष्ये पापोपशान्तिदम् ॥ स्यात्प्राणवियोगफलो व्यापारो हननं स्मृतम् ॥ १ ॥ रागद्वेषात्प्रमादाच्च स्वतः परत एव वा ॥ ब्राह्मणं घातयेद्यस्तु स भवेद्ब्रह्मघातकः ॥ २ ॥ बहूनामेककार्य्याणां सर्वेषां शस्त्रधारिणाम् ॥ यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः ॥ ३ ॥ आक्रोशितस्ताडितो वा धनैर्वा परिपीडितः ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥ ४ ॥ औषधाद्युपकारे तु न पापं स्यात्कृते मृते ॥ पुत्रं शिष्यं तथा भार्य्यां शासने न मृते ह्यघम् ॥ ५ ॥ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ॥ प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ॥ ६ ॥ गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान्परित्यजेत् ॥ प्रास्येदात्मानमग्नौ वा मुच्यते ब्रह्महत्यया ॥ ७ ॥ शिरःकपाली ध्वजवान्भैक्षाशी कर्म्म वेदयन् ॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ ८ ॥ षड्भिर्वर्षैः शुद्धचारी ब्रह्महा पूयते नरः ॥ विहितं यदकामानां कामात्तु द्विगुणं स्मृतम् ॥ ९ ॥ प्रायश्चित्तं प्रवृत्तस्य वधे स्यात्तु त्रिवार्षिकम् ॥ ब्रह्माग्नि क्षत्रे द्विगुणं विट्शूद्रे द्विगुणं त्रिधा ॥ १० ॥ अन्यत्र विप्रे सकलं पादोनं क्षत्रिये मतम् ॥ वैश्येऽर्द्धपादं क्षत्रे स्याद्वृद्धस्त्रीबालरोगिषु ॥ ११ ॥ तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतम् ॥ वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः ॥ १२ ॥ अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत् ॥ पञ्चगव्यं पिबेद्दोग्ध्री मासमासीत संयतः ॥ ॥ १३ ॥ गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुध्यति ॥ कृच्छ्रं चैवातिकृच्छ्रं वा पादहासो नृपादिषु ॥ १४ ॥ अतिवृद्धामतिकुमारीमतिबालां

च रोगिणीम् ॥ हत्वा पूर्वविधानेन चरेदर्द्धव्रतं द्विजः ॥ १५ ॥ ब्राह्मणान्भोजयेच्छक्त्या दद्याद्धेमतिलादिकम् ॥ मुष्टिचपेटकीलेन तथा शृङ्गादिमोटने ॥ १६ ॥ लगुडादिप्रहारेण गोवधं तत्र निर्दिशेत् ॥ दमने दामने चैव शकटादौ च योजने ॥ १७ ॥ स्तम्भशृंखलपाशैर्वा मृते पादोनमाचरेत् ॥ काष्ठे सान्तपनं कुर्य्यात्प्राजापत्यं तु लोष्टके ॥ १८ ॥ तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम् ॥ मार्जारगोधानकुलमण्डूकश्ववपत्त्रिणः ॥ १९ ॥ हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं चान्द्रायणं चरेत् ॥ व्रतं रहस्ये रहसि प्रकाशेऽपि प्रकाशकम् ॥ २० ॥ प्राणायामशतं कार्य्यं सर्वपापापनुत्तये ॥ पानकं द्राक्षमधुकं खार्जूरं तालमैक्षवम् ॥ २१ ॥ माध्वीकं टङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥ न मद्यान्यपि मद्यानि पैष्टी मुख्या सुरा स्मृता ॥ २२ ॥ त्रैवर्ण्यस्य निषिद्धानि पीत्वा तम्बाप्यपः शुचिः ॥ कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ॥ २३ ॥ सुरापानापनुत्यर्थं बालवासा जटी ध्वजी ॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ॥ २४ ॥ पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ मद्यभाण्डस्थिता आपः पीत्वा सप्तदिनं व्रती ॥ २५ ॥ चाण्डालस्य तु पानीयं पीत्वा स्यात्पञ्चदिनं व्रती ॥ चाण्डालकूपभाण्डेषु पीत्वा सान्तपनं चरेत् ॥ २६ ॥ पञ्चगव्यं त्रिरात्र्यन्ते पीत्वा चान्त्यजलं द्विजः ॥ मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्दकान् ॥ २७ ॥ पीत्वा नवोदकं चैव पञ्चगव्येन शुध्यति ॥ शवकूपोदकं पीत्वा त्रिरात्रेण विशुध्यति ॥ २८ ॥ अन्त्यावसायिनामन्नं भुक्त्वा चान्द्रायणं चरेत् ॥ आपत्काले शूद्रगृहे मनस्तापेन शुध्यति ॥ २९ ॥ शूद्रभाजनभुग्विप्रः पञ्चगव्यादुपोषितः ॥ कन्दुपक्वं स्नेहपक्वं स्नेहं च दधिसक्तवम् ॥ ३० ॥ शूद्रादनिन्द्यान्येतानि गुडक्षीररसादिकम् ॥ अस्नातभुक् चोपवासी दिनान्ते तु जपाच्छुचिः ॥ ३१ ॥ मूत्रोच्चार्य्यशुचिर्भुक्त्वा त्रिरात्रेण विशुध्यति ॥ केशकीटावपन्नं च पादस्पृष्टं च कामतः ॥ ३२ ॥ भ्रूणघ्नावेक्षितं चैव संस्पृष्टं वाप्युदवयया ॥ काकाद्यैरवलीढं च शुना संस्पृष्टमेव च ॥ ३३ ॥ गवाद्यैरन्नमाघ्रातं भुक्त्वा त्र्यहमुपावसेत् ॥ रेतोविण्मूत्रभक्षी तु प्राजापत्यं समाचरेत् ॥ ३४ ॥ चान्द्रायणं नवश्राद्धे पराको मासिके मतः ॥ पक्षत्रयेऽतिकृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव च ॥ ३५ ॥ आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके ॥ पूर्वेद्युर्वार्षिकं श्राद्धं परेद्युः पुनराब्दिकम् ॥ ३६ ॥ निषिद्धभक्षणे भुक्ते प्रायश्चित्तमुपोषणम् ॥ भूस्तृणं लशुनं भुक्त्वा शिग्रुकं कृच्छ्रमाचरेत् ॥ ३७ ॥ अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्ट-

मेव च ॥ जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं पयः पिबेत् ॥ ३८ ॥ मधु मांसं च याऽश्नायाच्छ्राद्धे सौतकमेव वा ॥ प्राजापत्यं चरेत्कृच्छ्रं ब्रह्मचारी यतिर्व्रती ॥ ३९ ॥ अन्यायेन परस्वापहरणं स्तेयमुच्यते ॥ मुसलेन हतो राज्ञा स्वर्णस्तेयी विशुध्यति ॥ ४० ॥ अधःशायी जटाधारी पर्णमूलफलाशनः ॥ एककालं समश्नानो द्वादशाब्दे विशुध्यति ॥४१॥ रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ॥ स्तेयं कृत्वा सुरां पीत्वा कृच्छ्रं चान्द्रं चरेन्नरः ॥४२॥ माणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च ॥ अयस्कांस्योपलानां च द्वादशाहं कणान्नभुक् ॥४३॥ मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च ॥ वापीकूपतडागानां शुद्धिश्चान्द्रायणं स्मृतम् ॥४४॥ भक्ष्यभोज्यापहरणे यानशय्यासनस्य च ॥ पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥४५॥ तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च ॥ चैलचर्म्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥ ४६ ॥ पितुः पत्नीं च भगिनीमाचार्य्यतनयां तथा ॥ आचार्य्याणीं सुतां स्वां च गच्छंश्च गुरुतल्पगः ॥ ४७ ॥ गुरुतल्पेऽभिभाष्यैनस्तप्ते पच्यादयोमये ॥ सूर्मीं ज्वलन्तीं चाश्लिष्य मृत्युना स विशुध्यति ॥ ४८ ॥ चान्द्रायणान्वा त्रीन्मासान्नभ्यस्य गुरुतल्पगः ॥ एवमेव विधिं कुर्य्याद्योषित्सु पतितास्वपि ॥ ४९ ॥ यत्पुंसः परदारेषु तच्चैनां कारयेद्व्रतम् ॥ रेतः सिक्त्वा कुमारीषु चाण्डालीषु सुतासु च ॥ ५० ॥ सपिण्डापत्यदारेषु प्राणत्यागो विधीयते ॥ यत्करोत्येकरात्रेण वृषलीसेवनं द्विजः ॥ ५१ ॥ तद्वैश्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ पितृव्यदारगमने भ्रातृभार्य्यागमे तथा ॥ ५२ ॥ चाण्डालीं पुक्कसीं वापि स्नुषां च भगिनीं सखीम् ॥ मातुः पितुः स्वसारं च निक्षिप्तां शरणागताम् ॥ ५३ ॥ मातुलानीं स्वसारं च स्वगोत्रामन्यमिच्छतीम् ॥ शिष्यभार्य्यां गुरोर्भार्य्यां गत्वा चान्द्रायणं चरेत् ॥ ५४ ॥ इत्यादिमहापुराणे आग्नेये प्रायश्चित्तानि० नाम त्रिसप्तत्यधिकशततमोऽध्यायः ॥१७३॥ पुनः प्रायश्चित्तानि ॥ अग्निरुवाच ॥ ॥ देवाश्रमार्च्चनादीनां प्रायश्चित्तं तु लोपकः ॥ पूजालोपे चाष्टशतं जपेद्द्विगुणपूजनम् ॥ १ ॥ पञ्चोपनिषदैर्मन्त्रैर्हुत्वा ब्राह्मणभोजनम् ॥ सूतिकान्त्यजकोदक्या स्पृष्टे देवे शतं जपेत् ॥ २ ॥ पञ्चोपनिषदैः पूजां द्विगुणं स्नानमेव च ॥ विप्रभोज्यं होमलोपे होमस्नानं तथार्च्चनम् ॥ ३ ॥ होमद्रव्ये मूषिकाद्यैर्भक्षिते कीटसंयुते ॥ तावन्मात्रं परित्यज्य प्रोक्ष्य देवादि पूजयेत् ॥ ४ ॥ अङ्कुरार्पणमात्रं तु छिन्नं भिन्नं परित्यजेत् ॥ अस्पृश्यैश्चैव संस्पृष्टे ह्यन्यपात्रे तदर्पणम् ॥ ५ ॥ देवमानुषविघ्नघ्नं पूजाकाले तथैव च ॥ मन्त्रद्रव्यादिव्यत्यासे मूलं

जप्त्वा पुनर्जपेत् ॥ ६ ॥ कुम्भे नष्टे शतजपो देवे तु पतिते करात् ॥ भिन्ने नष्टे चोपवासः शतहोमाच्छुभं भवेत् ॥ ७ ॥ कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ॥ प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥ ८ ॥ चान्द्रायणं पराको वा प्राजापत्यमघौघनुत् ॥ सूर्यसूर्ये शशक्तिश्रीशादिमन्त्रजप्यमघौघनुत् ॥ ९ ॥ गायत्रीप्रणवस्तोत्रमन्त्रजप्यमघान्तकम् ॥ काद्यैराबीजसंयुक्तैराद्यैराद्यैस्तदन्तकैः ॥ १० ॥ शशक्तिश्रीशादिमन्त्राः कोट्यधिकाः पृथक् ॥ ओंह्रीमाद्याश्चतुर्थ्यन्ता नमोऽन्ताः सर्वकामदाः ॥ ११ ॥ नृसिंहद्वादशाष्टाणमालामन्त्राद्यघौघनुत् ॥ आग्नेयस्य पुराणस्य पठनं श्रवणादिकम् ॥ १२ ॥ द्विविद्यारूपको विष्णुराग्निरूपस्तु गीयते ॥ परमात्मा देवमुखं सर्ववेदेषु गीयते ॥ १३ ॥ प्रवृत्तौ तु निवृत्तौ तु इज्यते भुक्तिमुक्तिदः ॥ अग्निरूपस्य विष्णोर्हि हवनं ध्यानमर्चनम् ॥ १४ ॥ जप्यं स्तुतिश्च प्रणतिः शारीरस्थाद्यघौघनुत् ॥ दशवर्णानि दानानि धान्यद्वादशमेव च ॥ १५ ॥ तुलापुरुषमुख्यानि महादानानि षोडश ॥ अन्नदानानि मुख्यानि सर्वाण्यघहराणि हि ॥ १६ ॥ तिथिवारर्क्षसङ्क्रान्तियोगमन्वादिकालक ॥ व्रतादिसूर्यैशशक्तिश्रीशादेरघघातनम् ॥ १७ ॥ गङ्गा गया प्रयागश्च काश्यवन्तिका ॥ कुरुक्षेत्रं पुष्करं च नैमिषं पुरुषोत्तमः ॥ १८ ॥ शालग्रामप्रभासाद्यं तीर्थं चाघौघघातकम् ॥ अहं ब्रह्म परं ज्योतिरिति ध्यानमघौघनुत् ॥ १९ ॥ पुराणं ब्रह्म चाग्नेयं ब्रह्मा विष्णुर्महेश्वरः ॥ अवतारा सर्वपूजाः प्रतिष्ठाप्रतिमादिकम् ॥ २० ॥ ज्योतिःशास्त्रपुराणानि स्मृतयस्तु तपोव्रतम् ॥ अर्थशास्त्रं च सर्गाद्या आयुर्वेदो धनुर्मतिः ॥ २१ ॥ शिक्षा छन्दो व्याकरणं निरुक्तं चाभिधानकम् ॥ कल्पो न्यायश्च मीमांसा ह्यन्यत्सर्वं हरिः प्रभुः ॥ २२ ॥ एको द्वयोर्यतो यस्मिन्यः सर्वमिति वेद यः ॥ तं दृष्ट्वान्यस्य पापानि विनश्यंति हरिश्च सः ॥ २३ ॥ विद्याष्टादशरूपश्च सूक्ष्मः स्थूलोऽपरो हरिः ॥ ज्योतिः सदक्षरं ब्रह्म परं विष्णुश्च निर्मलः ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये प्रायश्चित्तानि० नाम चतुःसप्तत्याधिकशततमोऽध्यायः ॥ १७४ ॥ अथ व्रतपरिभाषा ॥ अग्निरुवाच ॥ तिथिवारर्क्षादिवसमासर्त्वब्दार्कसङ्क्रमे ॥ नृस्त्रीव्रतादि वक्ष्यामि वसिष्ठ शृणु तत्क्रमात् ॥ १ ॥ शास्त्रोदितो हि नियमो व्रतं तच्च तपो मतम् ॥ नियमास्तु विशेषास्तु व्रतस्यैव दमादयः ॥ २ ॥ व्रतं हि कर्तृसन्तापात्तप इत्यभिधीयते ॥ इन्द्रियग्रामनियमो नियमश्चाभिधीयते ॥ ३ ॥ अनग्नयस्तु ये विप्रास्तेषां श्रेयोऽभिधीयते ॥ व्रतोपवासनियमैर्नानादानैस्तथा द्विजः ॥ ४ ॥ तं स्युर्देवादयः प्रीता भुक्तिमुक्तिप्रदायकाः ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ ५ ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ कांस्यं

मांसं मसूरं च चणकं कोरदूषकम् ॥६॥ शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियम् ॥ पुष्पालङ्कारवस्त्राणि धूपगन्धानुलेपनम् ॥७॥ उपवासे न शस्यन्ति दन्तधावनमञ्जनम् ॥ दन्तकाष्टं पञ्चगव्यं कृत्वा प्रातर्व्रतं चरेत् ॥ ८ ॥ असकृज्जलपानाच्च ताम्बूलस्य च भक्षणात् ॥ उपवासः प्रदुष्येत दिवास्वप्नाच्च मैथुनात् ॥ ९ ॥ क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः ॥ देवपूजाग्निहरणं सन्तोषोऽस्तेयमेव च ॥ १० ॥ सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः ॥ पवित्राणि जपेच्चैव जुहुयाच्चैव शक्तितः ॥ ११ ॥ नित्यस्नायी मिताहारी गुरुदेवद्विजार्चकः ॥ क्षारं क्षौद्रं च लवणं मधु मांसानि वर्जयेत् ॥ १२ ॥ तिलमुद्गादते शस्यं सस्ये गोधूमकोद्रवौ ॥ चीनकं देवधान्यं च शमीधान्यं तथैक्षवम् ॥१३॥ शितधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः ॥ व्रीहिपष्टिकमुद्गाश्च कलायाः सतिला यवाः ॥१४॥ श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ कूष्माण्डालाबुवार्त्ताकान्पालङ्कीं पूतिकां त्यजेत् ॥ १५ ॥ चरुर्भक्ष्यं सकुकणाः शाकं दधि घृतं पयः ॥ श्यामाकशालिनीवारा यवकं मूलतण्डुलम् ॥ १६ ॥ हविष्यं व्रतनक्तादावग्निकार्य्यादिके हितम् ॥ मधु मांसं विहायान्यद्व्रते वा हितमीरितम् ॥१७॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ॥ त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥१८॥ एकैकं ग्रासमश्नीयात्त्रयहाणि त्रीणि पूर्ववत् ॥ त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः ॥ १९ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्॥ एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥२०॥ पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः ॥ सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनोऽघहा ॥ २१ ॥ द्वादशाहोपवासेन पराकः सर्वपापहा ॥ महापराकस्त्रिगुणस्त्वयमेव प्रकीर्त्तितः ॥२२॥ पौर्णमास्यां पञ्चदश ग्रास्यमावास्यभोजनः ॥ एकापाये ततो वृद्धौ चान्द्रायणमतोऽन्यथा ॥२३॥ कपिलागोः पलं मूत्रमर्द्धाढ्यं च गोमयम् ॥ क्षीरं सप्तपलं दद्याद्दध्नश्चैव पलद्वयम् ॥२४॥ घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ॥ गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम् ॥ २५ ॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ तेजोऽसीति तथा चाज्यं देवस्य योनि कुशोदकम् ॥२६॥ ब्रह्मकूर्चो भवत्येवमापोहिष्ठेत्यृचं जपेत् ॥ अघमर्षणसूक्तेन संयोज्य प्रणवेन वा ॥२७॥ पीत्वा सर्वाघनिर्मुक्तो विष्णुलोकी ह्युपोषितः ॥ उपवासी सायम्भोजी यतिः षष्ठात्मकालवान् ॥ २८ ॥ मांसवर्जी चाश्वमेधी सत्यवादी दिवं व्रजेत् ॥ अग्न्याधेयं प्रतिष्ठा च यज्ञदानव्रतानि च ॥२९॥ देवव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥ माङ्गल्यमाभिषेकं च मलमासे विवर्जयेत् ॥ ३० ॥

दर्शादर्शस्तु चान्द्रः स्यात्त्रिंशाहश्चैव सावनः ॥ मासः सौरस्तु संक्रान्तेर्नाक्षत्रो भविवर्तनात् ॥ ३१ ॥ सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ॥ आब्दिके पितृकार्य्ये च चान्द्रो मासः प्रशस्यते ॥ ३२ ॥ आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः ॥ कुर्य्याच्छ्राद्धं तत्र रविः कन्यां गच्छतु वा न वा ॥ ३३ ॥ प्राप्ति संवत्सरे चैव तिथिर्द्वेधं यदा भवेत् ॥ तत्रोत्तरोत्तमा ज्ञेयपूर्वा तु स्यान्मालिम्लुचा ॥ ३४ ॥ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः ॥ दिवा पुण्यास्तु तिथयो रात्रौ नक्तव्रते शुभाः ॥ ३५ ॥ युग्माग्नियुगभूतानि पण्मुन्योर्वसुरन्ध्रयोः ॥ रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥ ३६ ॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् ॥ एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम् ॥ ३७ ॥ नरेन्द्रमन्त्रिव्रतिनां विवाहोपद्रवादिषु ॥ सद्यः शौचं समाख्यातं कान्तारापदि संसदि ॥ ३८ ॥ आरब्धदीर्घतपसां न राज्ञा व्रतहा स्त्रियाः ॥ गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ॥ ३९ ॥ यदाऽशुद्धा तदान्येन कारयेत क्रियाः सदा ॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि ॥ ४० ॥ दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा ॥ असामर्थ्ये व्रतकृतो पत्नी वा कारयेत्सुतम् ॥ ४१ ॥ सूतके मृतके कार्य्यं प्रारब्धं पूजनोज्झितम् ॥ व्रतस्थं मूर्च्छितं दुग्धपानाद्यैरुद्धरेद्गुरुः ॥ ४२ ॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ४३ ॥ कीर्त्तिसन्ततिविद्यादिसौभाग्यारोग्यवृद्धये ॥ नैर्मल्यभुक्तिमुक्त्यर्थं कुर्वे व्रतपते व्रतम् ॥ ४४ ॥ इदं व्रतं मया श्रेष्ठं गृहीतं पुरतस्तव ॥ निर्विघ्नां सिद्धिमायातु त्वत्प्रसादाज्जगत्पते ॥ ४५ ॥ गृहीतेऽस्मिन्व्रतवरे यद्यपूर्णं त्रिये ह्यहम् ॥ तत्सर्वं पूर्णमेवास्तु प्रसन्ने त्वयि सत्पतौ ॥ ४६ ॥ व्रतमूर्ति जगद्धातिं मण्डले सर्वसिद्धये ॥ आवाहये नमस्तुभ्यं सन्निधौ भव केशव ॥ ४७ ॥ मनसा कल्पितैर्भक्त्या पञ्चमव्यैर्जलैः शुभैः ॥ पञ्चामृतैः स्नापयामि त्वं मे च भव पापहा ॥ ४८ ॥ गन्धपुष्पोदकैर्युक्तमर्घ्यमर्घ्यपते शुभम् ॥ गृहाण पाद्यमाचाममर्घ्यार्हं कुरु मां सदा ॥ ४९ ॥ वस्त्रं वस्त्रपते पुण्यं गृहाण कुरु मां सदा ॥ भूषणाद्यैः सुवस्त्राद्यैश्छादितं व्रतसत्पते ॥ ५० ॥ सुगन्धिगन्धं विमलं गन्धमूर्ते गृहाण वै ॥ पापगन्धविहीनं मां कुरु त्वं हि सुगन्धिनम् ॥ ५१ ॥ पुष्पं गृहाण पुष्पाद्यैः पूर्णं मां कुरु सर्वदा ॥ पुष्पगन्धं सुविमलं आयुरारोग्यवृद्धये ॥ ५२ ॥ दशाङ्गं गुग्गुलुघृतयुक्तं धूपं गृहाण वै ॥ स धूपधूपितं मां त्वं

कुरु धूपित सत्पते ॥ ५३ ॥ दीपमूर्ध्वशिखं दीप्तं गृहाणाखिलभासकम् ॥ दीपमूर्ते प्रकाशाढ्यं सर्वदोर्द्धगतिं कुरु ॥ ५४ ॥ अन्नादिकं च नैवेद्यं गृहाणान्नादि सत्पते ॥ अन्नादि पूर्णं कुरु मा अन्नदं सर्वदायकम् ॥ ५५ ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं मया प्रभो ॥ यत्पूजितं व्रतपते परिपूर्णं तदस्तु मे ॥ ५६ ॥ धनं देहि धनं देहि सौभाग्यं गुणसन्ततिम् ॥ कीर्त्तिं विद्यां देहि चायुः स्वर्गं मोक्षं च देहि मे ॥ ५७ ॥ इमां पूजां व्रतपते गृहीत्वा व्रज साम्प्रतम् ॥ पुनरागमनायैव वरदानाय वै प्रभो ॥ ५८ ॥ स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः ॥ पूज्याः सुवर्णजाम्बा वै शक्त्या वै भूमिशायिना ॥ ५९ ॥ जपो होमश्च सामान्यं व्रतान्ते दानमेव च ॥ चतुर्विंशतिद्वादश वा पञ्च वा त्रय एककः ॥ ६० ॥ विप्राः प्रपूज्याः गुरवो भोज्याः शक्त्या तु दक्षिणा ॥ देया गावः सुवर्णाद्याः पादुकोपानहौ पृथक् ॥ ॥ ६१ ॥ जलपात्रं चान्नपात्रमृत्तिकाच्छत्रमासनम् ॥ शय्या वस्त्रयुगं कुम्भाः परिभाषेयमीरिता ॥ ६२ ॥ इत्यादिमहापुराणे आग्नेये व्रतपरिभाषा नाम पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ अथ प्रतिपद्व्रतानि ॥ अग्निरुवाच ॥ वक्ष्ये प्रतिपदादीनि व्रतान्यखिलदानि ते ॥ कार्त्तिकाश्वयुजे चैत्रे प्रतिद्वल्लणस्तिथिः ॥ १ ॥ पञ्चदश्यां निराहारः प्रतिपद्यर्चयेदजम् ॥ ओं तत्सद्वल्लणे नमो गायत्र्या वाग्भवैककम् ॥ २ ॥ अक्षमालां सुवं दक्षे वामे सुचं कमण्डलुम् ॥ लम्बकूर्चं च जटिलं हंसं ब्रह्माणमर्चयेत् ॥ ३ ॥ शक्त्या श्रीरं प्रदद्याद्यु ब्रह्मा मे प्रीयतामिति ॥ निर्मलो भोगभुक् स्वर्गे भूयो विप्रो धनी भवेत् ॥ ४ ॥ धन्यं व्रतं प्रवक्ष्यामि ह्यधन्यो धन्यतां व्रजेत् ॥ मार्गशीर्षे प्रतिपदि नक्तं हुत्वाप्युपोषितः ॥ ५ ॥ अग्नये नम इत्यग्निं सार्च्यार्च्यं सर्वभाग्भवेत् ॥ प्रतिपद्येकभक्ताशी सव्रते कपिलाप्रदः ॥ वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम् ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये प्रतिपद्व्रतानि नाम षट्सप्तत्यधिकशततमोऽध्यायः ॥ ॥ १७६ ॥ अथ द्वितीयाव्रतानि ॥ अग्निरुवाच ॥ द्वितीयाव्रतकं वक्ष्ये भुक्तिमुक्त्यादिदायकम् ॥ पुष्पाहारी द्वितीयायामाश्विनौ पूजयेत्सुरौ ॥ १ ॥ अब्दं स्वरूपसौभाग्यं स्वर्गभाग् जायते व्रती ॥ कार्त्तिके शुक्लपक्षस्य द्वितीयायां यमं यजेत् ॥ २ ॥ अब्दमुपोषितः स्वर्गं गच्छेन्न नरकं व्रती ॥ अशून्यशयनं वक्ष्ये ह्यवैधव्यादिदायकम् ॥ ३ ॥ कृष्णपक्षे द्वितीयायां श्रावणस्य चरेदिदम् ॥ श्रीवत्सधारिन् श्रीकान्त श्रीधामन् श्रीपतेऽव्यय ॥ ४ ॥ गार्हस्थ्यं मा प्रणाशं मे यातु धर्म्मार्थकारदम् ॥ अग्नयो मा प्रणश्यंतु मा प्रणश्यंतु

देवताः ॥ ५ ॥ पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः ॥ लक्ष्म्या वियुज्यते देवो न कदाचिद्यथा भवान् ॥ ६ ॥ तथा कलत्रसम्बन्धो देव मा मे विभिद्यताम् ॥ लक्ष्म्या न शून्यं वरद यथा ते शयनं विभो ॥ ७ ॥ शय्या ममाप्यशून्यास्तु तथैव मधुसूदन ॥ लक्ष्मीं विष्णुं यजेदेवं दद्याच्छय्यां फलानि च ॥८॥ प्रतिमासं च सोपाय दद्यादर्घ्यं समन्त्रकम् ॥ गगनाङ्गणसन्दीप दुग्धाब्धिमथनोद्भव ॥ ९ ॥ भाभासितदिगाभोग रमानुज नमोऽस्तु ते ॥ ओं श्रीधराय नमः सोमात्मानं हरिं यजेत् ॥१०॥ घं ढं भं हं श्रियै नमो दशरूपमहात्मने॥ घृतेन होमो नक्तं च शय्यां दद्याद्विजातये ॥ ११ ॥ दीपान्नभाजनैर्युक्तं छत्रोपानहमासनम् ॥ सोदकुम्भं च प्रतिमां विप्रायाथ च पात्रकम् ॥ १२ ॥ पत्न्या य एवं कुरुते भुक्तिमुक्तिमवाप्नुयात् ॥ कान्तिव्रतं प्रवक्ष्यामि कार्त्तिकस्य सिते चरेत् ॥ १३ ॥ नक्तभोजी द्वितीयायां पूजयेद्बलकेशवौ ॥ वपुः प्राप्नोति वै कान्तिमायुरारोग्यकादिकम् ॥१४॥ अथ विष्णुव्रतं वक्ष्ये मनोवाञ्छितदायकम् ॥ पौषशुक्लद्वितीयादि कृत्वा दिनचतुष्टयम् ॥ १५ ॥ पूर्वं सिद्धार्थकैः स्नानं नृतः कृष्णतिलैः स्मृतम् ॥ वचया च तृतीयेऽह्नि सर्वौषध्या चतुर्थके ॥ १६ ॥ सुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ॥ शटी चम्पकमुस्तं च सर्वौषधिगणः स्मृतः ॥ १७ ॥ नाम्ना कृष्णाच्युतानन्त हृषीकेशेति पूजयेत् ॥ पादे नाभ्यां चक्षुषि च क्रमाच्छिरसि पुष्पकैः ॥ १८ ॥ शंशिचन्द्रशशाङ्केन्दुसञ्ज्ञाभिश्चार्घ्यमिन्दवे ॥ नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ॥ १९ ॥ षण्मासं पावनं चाब्दं प्राप्नुयात्सकलं व्रती ॥ एतद्व्रतं नृपैः स्त्रीभिः कृतं पूर्वं सुरादिभिः ॥२० ॥ इत्यादिमहापुराणे आग्नेये द्वितीयाव्रतानि नाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ अथ तृतीयाव्रतानि ॥ अग्निरुवाच ॥ तृतीयाव्रतान्याख्यास्ये भुक्तिमुक्तिप्रदानि ते ॥ ललितायां तृतीयायां मूलगौरीव्रतं शृणु ॥ १ ॥ तृतीयायां चैत्रशुक्ले ह्यूढा गौरी हरेण हि ॥ तिलैः स्नातोऽर्चयेच्छम्भुं गौर्य्या हैमफलादिभिः ॥ २ ॥ नमोऽस्तु पाटलायैव पादौ देव्याः शिवस्य च ॥ शिवायेति च संकीर्त्य जयायै गुल्फयोर्यजेत् ॥ ३ ॥ त्रिपुरघ्नाय रुद्राय भवान्यै जङ्घयोर्द्वयोः ॥ शिवं रुद्रायेश्वराय विजयायै च जानुनी ॥ ४ ॥ ईशायेति कटिं देव्याः शंकरायेति शंकरम् ॥ कुक्षिद्वयं च कोटव्यै शूलिनं शूलपाणये ॥ ५ ॥ मङ्गलायै नमस्तुभ्यमुदरं चाभिपूजयेत् ॥ सर्वात्मने नमो रुद्रमैशान्यै च कुचद्वयम् ॥ ६ ॥ शिवं देवात्मने तद्वद्भद्रादिन्यै कण्ठमर्चयेत् ॥ महादेवाय शिवमनन्तायै करद्वयम् ॥ ७ ॥

त्रिलोचनायेति हरं बाहुं कालानलप्रिये ॥ सौभाग्यायै महेशाय भूषणानि प्रपूजयेत् ॥ ८ ॥ अशोकमधुवासिन्यै चेश्वरायेति चौष्ठका ॥ चतुर्मुखप्रिया चाम्यं हराय स्थाणवे नमः ॥ ९ ॥ नमोऽर्द्धनारीशहरमिताङ्घ्रये च नासिकाम् ॥ नम उग्राय लोकेशं ललिनेति पुनर्भ्रुवौ ॥ १० ॥ शर्वाय पुरहन्तारं वासन्त्यै चैव तालुकम् ॥ नमः श्रीकण्ठनाथाय शितिकण्ठाय केशकम् ॥ ११ ॥ भीमोग्राय सुरूपिण्यै शिरः सर्व्वात्मने नमः ॥ मल्लिकाशोककमलकुन्दं नगरमालती ॥ १२ ॥ कदम्बकरवीरं च बाणमम्लानकुङ्कुमम् ॥ सिन्धुवारं च मासेषु सर्वेषु क्रमशः स्मृतम् ॥ १३ ॥ उमामहेश्वरौ पूज्य सौभाग्याष्टकमग्रतः ॥ स्थापयेद्घृतनिष्पावकुसुम्भक्षीरजीवकम् ॥ १४ ॥ तरुराजेक्षुलवणं कुस्तुम्बरुमथाष्टमम् ॥ चैत्रे शृङ्गोदकं प्राश्य देवदेव्यग्रतः स्वपेत् ॥ १५ ॥ प्रातः स्नात्वा समभ्यर्च्य विप्रदाम्पत्यमर्चयेत् ॥ तदष्टकं द्विजे दद्याल्ललिता प्रीयतां मम ॥ १६ ॥ शृङ्गोदकं गोमयं च मन्दारं बिल्वपत्रकम् ॥ कुंशोदकं दधि क्षीरं कार्तिके पृषदाज्यकम् ॥ १७ ॥ गोमूत्राज्यं कृष्णतिलं पञ्चगव्यं क्रमाशनम् ॥ ललिता विजया भद्रा भवानी कुमुदा शिवा ॥ १८ ॥ वासुदेवी तथा गौरी मङ्गला कमला सती ॥ चैत्रादौ दानकाले च प्रीयतामिति चार्चयेत् ॥ १९ ॥ फलमेकं पवित्याज्यं व्रतान्ते शयनं ददेत् ॥ उमामहेश्वरं हैमं वृषभं च गवा सह ॥ २० ॥ गुरुं च मिथुनान्यर्च्य वस्त्राद्यैर्भुक्तिमुक्तिभाक् ॥ सौभाग्यारोग्यरूपायुःसौभाग्यशयनव्रतात् ॥ २१ ॥ नभस्ये वाथ वैशाखे कुर्य्यान्मार्गशिरस्यथ ॥ शुक्लपक्षे तृतीयायां ललितायै नमो यजेत् ॥ २२ ॥ प्रतिपक्षं ततः प्राच्यं व्रतान्ते मिथुनानि च ॥ चतुर्विंशतिमभ्यर्च्य वस्त्राद्यैर्भुक्तिमुक्तिभाक् ॥ २३ ॥ उक्तो मार्गो द्वितीयोऽयं सौभाग्यव्रतमाप्नुयात् ॥ फाल्गुनादितृतीयायां लवणं यस्तु वर्जयेत् ॥ २४ ॥ समाप्ते शयनं दद्याद्गृहं चोपस्करान्वितम् ॥ सम्पूज्य विप्रमिथुनं भवानी प्रीयतामिति ॥ २५ ॥ सौभाग्यार्थं तृतीयोक्ता गौरीलोकादिदायिनी ॥ माघे भाद्रे च वैशाखे तृतीयाव्रतकृत्तथा ॥ २६ ॥ दमनकतृतीयाकृच्चैत्रे दमनकैर्यजेत् ॥ आत्मतृतीया मार्गस्य प्राच्यैश्छाभोजनादिना ॥ २७ ॥ गौरी काली ह्युमा भद्रा दुर्गा कान्तिः सरस्वती ॥ वैष्णवी लक्ष्मीः प्रकृतिः शिवा नारायणी क्रमात् ॥ मार्गतृतीयामारभ्य सौभाग्यं स्वर्गमाप्नुयात् ॥ २८ ॥ इत्यादिमहापुराणे आग्नेये तृतीयाव्रतानि नामाऽष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ अथ चतुर्थीव्रतानि ॥ अग्निरुवाच ॥ चतुर्थीव्रतान्याख्यास्ये भुक्तिमुक्तिप्रदानि ते ॥ माघे

शुक्लचतुर्थ्यां तु ह्युपवासी यजेद्गणम् ॥ १ ॥ पञ्चम्यां च तिलान्नादी वर्षान्निर्विघ्नतः सुखा ॥ गं स्वाहा मूलमन्त्रोऽयं गमाद्यं हृदयादिकम् ॥ २ ॥ आगच्छोल्काय चावाह्य गच्छोल्काय विसर्जनम् ॥ उल्कान्तैर्गा दिगन्ताद्यैः पूजयेन्मोदकादिभिः ॥ ३ ॥ ओं महोल्काय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् मासि भाद्रपदे चापि चतुर्थीकृच्छ्रवं व्रजेत् ॥ चतुर्थ्यङ्गारकेऽभ्यर्च्य गणं सर्वमवाप्नुयात् ॥ ४ ॥ चतुर्थ्यां फाल्गुने नक्तमविघ्नाख्या चतुर्थ्यपि ॥ चतुर्थ्यां दमनैः पूज्य चैत्रे प्रार्च्य गणं सुखी ॥५॥ इत्यादिमहापुराणे आग्नेये चतुर्थीव्रतानि नामैकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥ अथ पञ्चमीव्रतानि ॥ अग्निरुवाच ॥ पञ्चमीव्रतकं वक्ष्ये आरोग्यस्वर्गमोक्षदम् ॥ नभो नभस्याश्विने च कार्त्तिके शुक्लपक्षके ॥ १ ॥ वासुकिस्तक्षकः पूज्यः कालीयो मणिभद्रकः ॥ ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥ एते प्रयच्छन्त्यभयमायुर्विद्यायशःश्रियम् ॥ २ ॥ इत्यादिमहापुराणे आग्नेये पञ्चमीव्रतानि नामाशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ अथ षष्ठीव्रतानि ॥ अग्निरुवाच ॥ षष्ठीव्रतानि वक्ष्यामि कार्त्तिकादौ समाचरेत् ॥ षष्ठ्यां फलाशनोऽभ्यर्च्यभुक्तिमुक्तिमवाप्नुयात् ॥ १ ॥ स्कन्दषष्ठीव्रतं प्रोक्तं भाद्रे षष्ठ्यामथाक्षयम् ॥ कृष्णषष्ठीव्रतं वक्ष्ये मार्गशीर्षे चरेच्च तत् ॥ अनाहारो वर्षमेकं भुक्तिं मुक्तिमवाप्नुयात् ॥ २॥ इत्यादिमहापुराणे आग्नेये षष्ठीव्रतानि नामैकाशीत्यधिकशततमोऽध्यायः॥ १८१॥ अथ सप्तमीव्रतानि ॥ अग्निरुवाच ॥ सप्तमीव्रतकं वक्ष्ये सर्वेषां भुक्तिमुक्तिदम् ॥ माघमासेऽब्जके शुक्ले सूर्य्यं प्रार्च्य विशोकभाक् ॥ १ ॥ सर्वावाप्तिस्तु सप्तम्यां मासि भाद्रेऽर्कपूजनात् ॥ पौषे मासि सिते ऽनश्नन्प्रार्च्यार्कं पापनाशनम् ॥२॥ कृष्णपक्षे तु माघस्य सर्वावाप्तिस्तु सप्तमी ॥ फाल्गुने तु सिते नन्दा सप्तमी चार्कपूजनात् ॥ ३ ॥ मार्गशीर्षे सिते प्रार्च्य सप्तमी चापराजिता ॥ मार्गशीर्षे सिते चाब्दं पुत्रीया सप्तमी स्त्रियाः ॥ ४ ॥ इत्यादिमहापुराणे आग्नेये सप्तमीव्रतानि नाम द्व्यशीत्यधिकशततमोऽध्यायः ॥१८२॥ अथाष्टमीव्रतानि ॥ अग्निरुवाच ॥ वक्ष्ये व्रतानि चाष्टम्यां रोहिण्यां प्रथमं व्रतम् ॥ मासि भाद्रपदेऽष्टम्यां रोहिण्यामर्द्धरात्रके ॥१॥ कृष्णो जातो यतस्तस्यां जयन्ती स्यात्ततोऽष्टमी ॥ सप्तजन्मकृतात्पापान्मुच्यते चोपवासतः ॥ २ ॥ कृष्णपक्षे भाद्रपदे ह्यष्टम्यां रोहिणीयुते ॥ उपोषितोऽर्चयेत्कृष्णं भुक्तिमुक्तिप्रदायकम् ॥ ३ ॥ आवाहयाम्यहं कृष्णं बलभद्रं च देवकीम् ॥ वसुदेवं यशोदां गाः पूजयामि नमोऽस्तु ते ॥ ४ ॥ योगाय योगपतये यागेशाय नमो नमः ॥ योगादिसम्भवा-

येव गोविन्दाय नमो नमः ॥ ५ ॥ स्नानं कृष्णाय दद्यात्तु ह्यर्घ्यं चानेन दापयेत् ॥ यज्ञाय यज्ञेश्वराय यज्ञानां पतये नमः ॥ ६ ॥ यज्ञादिसम्भवायैव गोविन्दाय नमो नमः ॥ गृहाण देव पुष्पाणि सुगन्धीनि प्रियाणि ते ॥ ७ ॥ सर्वकामप्रदो देव भव मे देववन्दित ॥ धूपधूपितधूपं त्वं धूपितस्त्वं गृहाण मे ॥ ८ ॥ सुगन्धधूपगन्धाढ्यं कुरु मां सर्वदा हरे ॥ दीपदीप्तमहादीपं दीपदीप्तिद सर्वदा ॥ ९ ॥ मया दत्तं गृहाण त्वं कुरु चोर्ध्वगतिं च माम् ॥ विश्वाय विश्वपतये विश्वेशाय नमो नमः ॥ १० ॥ विश्वादिसम्भवायैव गोविंदाय निवेदितम् ॥ धर्माय धर्मपतये धर्मेशाय नमो नमः ॥ ११ ॥ धर्मादिसम्भवायैव गोविन्द शयनं कुरु ॥ सर्वाय सर्वपतये सर्वेशाय नमो नमः ॥ १२ ॥ सर्वादिसम्भवायैव गोविन्दाय च पावनम् ॥ क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ॥ १३ ॥ गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥ स्थण्डिले स्थापयेद्देवं सचन्द्रां रोहिणीं यजेत् ॥ १४ ॥ देवकीं वसुदेवं च यशोदां नन्दकं बलम् ॥ अर्द्धरात्रे पयोधाराः पातयेद्भुडतपिंपा ॥ १५ ॥ वस्त्रहेमादिकं दद्याद्ब्राह्मणान्भोजयेद्व्रती ॥ जन्माष्टमीव्रतकरः पुत्रवान्विष्णुलोकभाक् ॥ १६ ॥ वर्षे वर्षे तु यः कुर्य्यान्पुत्रार्थी वेत्ति नो भयम् ॥ पुत्रान्देहि धनं देहि ह्यायुरारोग्यसन्ततिम् ॥ धर्मं कामं च सौभाग्यं स्वर्गं मोक्षं च देहि मे ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये जयन्त्यष्टमीव्रतं नाम त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥ अथाष्टमीव्रतानि ॥ अग्निरुवाच ॥ ब्रह्मादिमातृयजनाज्जपेन्मातृगणाष्टमीम् ॥ कृष्णाष्टम्यां चैत्रमासे पूज्याब्दं कृष्णमर्थभाक् ॥ १ ॥ कृष्णाष्टमीव्रतं वक्ष्ये मासे मार्गशिरे चरेत् ॥ नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राशयेन्निशि ॥ २ ॥ भूमिशायी निशायां च शङ्करं पूजयेद्व्रती ॥ पौषे शम्भुं घृतं प्राश्य माघे क्षीरं महेश्वरम् ॥ ३ ॥ महादेवं फाल्गुने च तिलाशी समुपोषितः ॥ चैत्रे स्थाणुं यवाशी च वैशाखेऽथ शिवं यजेत् ॥ ४ ॥ कुशोदाशी पशुपतिं ज्येष्ठे शृङ्गोदकाशनः ॥ आषाढे गोमयाश्युग्रं श्रावणे सर्वकर्मभुक् ॥ ५ ॥ त्र्यम्बकं च भाद्रपदे बिल्वपत्राशनो निशि ॥ तण्डुलाशी चाश्वयुजे चेशं रुद्रं तु कार्त्तिके ॥ ६ ॥ दध्याशी होमकारी स्याद्वर्षान्ते मण्डले यजेत् ॥ गोवस्त्रहेम गुरवे दद्याद्विप्रेभ्य ईदृशम् ॥ ७ ॥ प्रार्थयित्वा द्विजान्भोज्य भुक्तिं मुक्तिमवाप्नुयात् ॥ नक्ताशी त्वष्टमीषु स्याद्वत्सरान्ते च धेनुदः ॥ ८ ॥ पौरन्दरं पदं याति स्वर्गतिव्रतमुच्यते ॥ अष्टमी बुधवारेण पक्षयोरुभयोर्यदा ॥ ९ ॥ तदा व्रतं प्रकुर्वीत ह्यथ वा सगुडाशिता ॥ तस्यां नियमकर्त्तारो न स्युः खण्डितसम्पदः ॥ १० ॥ तण्डु-

लस्याष्टमुष्टीनां वर्जयित्वाङ्गुलीद्वयम् ॥ भक्तं कृत्वा चाम्रपुटे सकुशे सकुलाम्बिकाम् ॥ ११ ॥ सात्त्विकं पूजयित्वाङ्गं भुञ्जीत च कथाश्रवात् ॥ शक्तितो दक्षिणां दद्यात्कर्कटीं तण्डुलान्विताम् ॥ १२ ॥ धीरो द्विजोऽस्य भार्य्यास्ति रम्भा पुत्रस्तु कौशिकः ॥ दुहिता विजया तस्य धीरस्य धनदो वृषः ॥ १३ ॥ कौशिकस्तं गृहीत्वा तु गोपालश्चारयन्वृषम् ॥ गङ्गायां स्नानकृत्येऽथ नीतश्चौरैर्वृषस्तदा ॥ १४ ॥ स्नात्वा वृषमपश्यन्स वृषं मार्गितुमागतः ॥ विजयाभागिनीयुक्तो ददर्श स सरोवरे ॥ १५ ॥ दिव्यस्त्रीयोषितां वृन्दमब्रवीद्देहि भोजनम् ॥ स्त्रीवृन्दमूचे व्रतकृद्बुभुक्ष्व त्वमतिथिर्यतः ॥ १६ ॥ व्रतं कृत्वा स बुभुजे प्राप्तवान् वनपालकम् ॥ गतो धीरः सवृषभो विजयासहितस्तदा ॥ १७ ॥ धीरेण विजया दत्ता यमायान्तरितः पिता ॥ व्रतभावात्कौशिकोऽपि ह्ययोध्यायां नृपोऽभवत् ॥ १८॥ पित्रोस्तु नरके दृष्ट्वा विजयार्त्तिं यमे गता ॥ मृगयामागतं प्रोचे मुच्यते नरकात्कथम् ॥ १९ ॥ व्रतद्वयाद्यमः प्रोचे प्राप्य तत्कौशिको ददौ ॥ बुधाष्टमीद्वयफलं स्वर्गतौ पितरौ ततः ॥ २० ॥ विजया हर्षिता चक्रे व्रतं भुक्त्यादिसिद्धये ॥ अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ॥ २१ ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥ त्वमशोकहराभीष्ट मधुमाससमुद्भव ॥ २२ ॥ पिबामि शोकसन्तप्तो मां सशोकं सदा कुरु ॥ चैत्रादौ मातृपूजाकृदष्टम्यां जयते रिपून् ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये अष्टमीव्रतनिरूपणं नाम चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥ अथ नवमीव्रतानि ॥ अग्निरुवाच ॥ नवमीव्रतकं वक्ष्ये भुक्तिमुक्त्यादिसिद्धिदम् ॥ देवी पूज्याश्विने शुक्ले गौर्य्याख्या नवमीव्रतम् ॥ १ ॥ पिष्टकाख्या तु नवमी पिष्टाशी देविपूजनात् ॥ अष्टम्यामाश्विने शुक्ले कन्यार्के मूलभे यदा ॥ २ ॥ अघार्दना सर्वदा वै महती नवमी स्मृता ॥ दुर्गा तु नवगेहस्था ह्येकागारस्थिताऽथ वा ॥ ३ ॥ पूजिताष्टादशभुजा शेषाः षोडशसत्कराः ॥ शेषाः षोडशहस्ताः स्युरञ्जनं डमरुं तथा ॥ ४ ॥ रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥ चण्डा चण्डवती पूज्या चण्डरूपातिचण्डिका ॥ ५ ॥ क्रमान्मध्ये चोग्रचण्डा दुर्गा महिषमर्दिनी ॥ ओं दुर्गे दुर्गरक्षणि स्वाहा दशाक्षरो मन्त्रः ॥ ६ ॥ दीर्घाकारादि मन्त्रादिर्नवनेत्रो नमोऽन्तकः ॥ षड्भिः पदैर्नमः स्वधावषट्कारहृदादिकम् ॥ ७ ॥ अङ्गुष्ठादिकनिष्ठान्तं न्यस्याङ्गानि जपेच्छिवाम् ॥ एवं जपार्त्तिं यो गुह्यं नासौ केनापि बाध्यते ॥ ८ ॥ कपालं खेटकं घण्टां दर्पणं तर्जनीं धनुः ॥ ध्वजं डमरुकं

पाशं वामहस्तेषु बिभ्रतीम् ॥ ९ ॥ शक्तिमुद्गरशूलानि वज्रं खड्गं च कुन्तकम् ॥ शङ्खं चक्रं शलाकां च ह्यायुधानि च पूजयेत् ॥ १० ॥ पशुं च कालीं कालीति जप्त्वा खड्गेन घातयेत् ॥ कालि कालि वज्रेश्वरि लोहदण्डाये नमः ॥ ११ ॥ तदुत्थं रुधिरंमांसं पूतनाये च नैर्ऋते ॥ वायव्यां पापराक्षस्यै चरक्यै नम ईश्वरे ॥ १२ ॥ विदारिकायै चाग्नेय्यां महाकौशिकमग्नये ॥ तस्याग्रतो नृपः स्नायाच्छत्रुं पिष्टमयं हरेत् ॥ १३ ॥ दद्यात्स्कन्दविशाखाभ्यां ब्राह्म्याद्या निशि ता यजेत् ॥ जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥ १४ ॥ दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ देवीं पञ्चामृतैः स्नाप्य पूजयेच्चार्हणादिना ॥ ध्वजादिरथयात्रादिबलिदानवरादिकृत् ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये नवमीव्रतनिरूपणं नाम पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥ अथ दशमीव्रतानि ॥ अग्निरुवाच ॥ दशमीव्रतकं वक्ष्ये धर्म्मकामादिदायकम् ॥ दशम्यामेकभक्ताशी समाते दशधेनुदः ॥ दिशश्च काश्चनीर्दद्याद्ब्राह्मणाधिपतिर्भवेत् ॥ १ ॥ इत्यादिमहापुराणे आग्नेये दशमीव्रतनिरूपणं नाम षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥ अथैकादशीव्रतानि ॥ अग्निरुवाच ॥ एकादशीव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकम् ॥ दशम्यां नियताहारो मांसमैथुनवर्जितः ॥ १ ॥ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ द्वादश्येकादशी यत्र तत्र सन्निहितो हरिः ॥ २ ॥ तत्र क्रतुशतं पुण्यं त्रयोदशी तु पारणे ॥ एकादश्यां कला यत्र परतो द्वादशी गता ॥ ३ ॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणे । दशम्येकादशीमिश्रा नोपोष्या नरकप्रदा ॥ ॥ ४ ॥ एकादश्यां निराहारो भुक्त्वा चैवापरेऽहनि ॥ भोक्ष्येऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ ५ ॥ एकादश्यां सिते पक्षे पुष्यर्क्षं तु यदा भवेत् ॥ सोपोष्याक्षय्यफलदा प्रोक्ता सा पापनाशिनी ॥ ६ ॥ एकादशी द्वादशी या श्रवणेन च संयुता ॥ विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥ ७ ॥ एषैव फाल्गुने मासि पुष्यर्क्षेण च संयुता ॥ विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा ॥ ८ ॥ एकादश्यां विष्णुपूजा कार्य्या सर्व्वोपकारिणी ॥ धनवान्पुत्रवाँल्लोके विष्णुलोके महीयते ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये एकादशीव्रतनिरूपणं नाम सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ अथ द्वादशीव्रतानि ॥ अग्निरुवाच ॥ द्वादशीव्रतकं वक्ष्ये भुक्तिमुक्तिप्रदायकम् ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ १ ॥ उपवासेन

भैक्ष्येण चैव द्वादशिकव्रती ॥ चैत्रे मासि सिते पक्षे द्वादश्यां मदनं हरिम् ॥ २ ॥ पूजयेद्भुक्तिमुक्त्यर्थी मदनद्वादशीव्रती ॥ माघशुक्ले तु द्वादश्यां भीमद्वादशिकव्रती ॥ ३ ॥ नमो नारायणायेति यजेद्विष्णुं स सर्वभाक् ॥ फाल्गुने च सिते पक्षे गोविन्दद्वादशीव्रती ॥ ४ ॥ विशोकद्वादशीकारी यजेदाश्वयुजे हरिम् ॥ श्रवणं मार्गशीर्षे तु कृष्णमभ्यर्च्य यो नरः ॥ ५ ॥ ददाति शुक्लद्वादश्यां स सर्वरसदायकः ॥ गोवत्सं पूजयेद्भाद्रे गोवत्सद्वादशीव्रती ॥ ६ ॥ माघ्यां तु समतीतायां श्रवणेन तु संयुता ॥ द्वादशी या भवेत्कृष्णा प्रोक्ता सा तिलद्वादशी ॥ ७ ॥ तिलैः स्नानं तिलैर्होमो नैवेद्यं तिलमोदकम् ॥ दीपश्च तिलतैलेन तथा देयं तिलोदकम् ॥ ८ ॥ तिलाश्च देया विप्रेभ्यः फलं होमोपवासतः ॥ ओं नमो भगवतेऽथो वासुदेवाय वै यजेत् ॥ ९ ॥ सकुलः स्वर्गमाप्नोति पङ्क्तितिलद्वादशीव्रती ॥ मनोरथद्वादशी कृत्फाल्गुने तु सितेऽर्चयेत् ॥ १० ॥ नामद्वादशीव्रतकृत्केशवाद्यैश्च नामभिः ॥ वर्षं यजेद्धरिं स्वर्गी न भवेन्नारकी नरः ॥ ११ ॥ फाल्गुनस्य सितेऽभ्यर्च्य सुमतिद्वादशीव्रती ॥ मासि भाद्रपदे शुक्ले ह्यनन्तद्वादशीव्रती ॥ १२ ॥ आश्लेषर्क्षे तु मूले वा माघे कृष्णाय वै नमः ॥ यजोत्तिलांश्च जुहुयात्तिलद्वादशीकृन्नरः ॥ १३ ॥ सुगतिद्वादशीकारी फाल्गुने तु सिते यजेत् ॥ जय कृष्ण नमस्तुभ्यं वर्षं स्याद्भुक्तिमुक्तिगः ॥ पौषशुक्ले तु द्वादश्यां संप्राप्तिद्वादशीव्रती ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये नानाद्वादशीव्रतानि नामाऽष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ अथ श्रवणद्वादशीव्रतम् ॥ अग्निरुवाच ॥ श्रवणद्वादशीं वक्ष्ये माघे भाद्रपदे सिते ॥ श्रवणेन युता श्रेष्ठा महती सा ह्युपोषिता ॥ १ ॥ सङ्गमे सरितां स्नानाच्छ्रवणद्वादशीफलम् ॥ बुधश्रवणसंयुक्ता दानादौ सुमहाफला ॥ २ ॥ निषिद्धमपि कर्त्तव्यं त्रयोदश्यां तु पारणम् ॥ द्वादश्यां च निराहारो वामनं पूजयाम्यहम् ॥ ३ ॥ उदकुम्भे स्वर्णमयं त्रयोदश्यां तु पारणम् ॥ आवाहयाम्यहं विष्णुं वामनं शङ्खचक्रिणम् ॥ ४ ॥ सितवस्त्रयुगच्छन्ने घटे सच्छत्रपादुके ॥ स्नापयामि जलैः शुद्धैर्विष्णुं पञ्चामृतादिभिः ॥ ५ ॥ छत्रदण्डधरं विष्णुं वामनाय नमो नमः ॥ अर्घ्यं ददामि देवेश अर्घ्याहार्घ्यैः सदार्चितः ॥ ६ ॥ भुक्तिमुक्तिप्रजाकीर्तिसर्वैश्वर्ययुतं कुरु ॥ वामनाय नमो गन्धं होमोऽनेनाष्टकं शतम् ॥ ७ ॥ ओं नमो वासुदेवाय शिरः सम्पूजयेद्धरेः ॥ श्रीधराय मुखं तद्वत्कण्ठे कृष्णाय वै नमः ॥ ८ ॥ नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे ॥ व्यापकाय नमो नाभिं वामनाय नमः कटिम् ॥ ९ ॥ त्रैलोक्यजननायेति मेढ्रं

जङ्घे यजेद्धरेः ॥ सर्वाधिपतये पादौ विष्णोः सर्वात्मने नमः ॥ १० ॥ घृतपक्वं च नैवेद्यं दद्याद्ध्योदनैर्घटान् ॥ रात्रौ च जागरं कृत्वा प्रातः स्नात्वा च सङ्गमे ॥ ११ ॥ गन्धपुष्पादिभिः पूज्य वदेत्पुष्पाञ्जलिस्त्विदम् ॥ नमो नमस्ते गोविंद बुधश्रवणसञ्ज्ञित ॥ १२ ॥ अघौघसङ्क्षयं कृत्वा सर्वसौख्यप्रदो भव ॥ प्रीयतां देव देवेश मम नित्यं जनार्दन ॥ १३ ॥ वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयम् ॥ वामनः प्रतिगृह्णाति वामनो मे ददाति च ॥ १४ ॥ द्रव्यस्थो वामनो नित्यं वामनाय नमो नमः ॥ प्रदत्तदक्षिणो विप्रान्सम्भोज्यान्नं स्वयं चरेत् ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये श्रवणद्वादशीव्रतं नामैकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

अथाखण्डद्वादशीव्रतम् ॥ अग्निरुवाच ॥ अखण्डद्वादशी वक्ष्ये व्रतसम्पूर्णताकृतम् ॥ मार्गशीर्षे सिते विष्णुं द्वादश्यां समुपोषितः ॥ १ ॥ पञ्चगव्यजले स्नातो यजेत्तन्प्राशनो व्रती ॥ यवव्रीहियुतं पात्रं द्वादश्यां हि द्विजेऽर्पयेत् ॥ २ ॥ सप्तजन्मनि यत्किञ्चिन्मया खण्डं व्रतं कृतम् ॥ भगवंस्त्वत्प्रसादेन तदखण्डमिहास्तु मे ॥ ३ ॥ यथाऽखण्डं जगत्सर्वं त्वमेव पुरुषोत्तम ॥ तथाखिलान्यखण्डानि व्रतानि मम सन्तु वै ॥ ४ ॥ एवमेवानुमासं च चातुर्मास्यो विधिः स्मृतः ॥ अन्यच्चैत्रादिमासेषु सकुपात्राणि चार्पयेत् ॥ ५ ॥ श्रावणादिषु चारभ्य कार्त्तिकान्तेषु पारणम् ॥ सप्तजन्मसु वैकल्यं व्रतानां सफलं कृते ॥ आयुरारोग्यसौभाग्यराज्यभोगादिमाप्नुयात् ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये अखण्डद्वादशीव्रतं नाम नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

अथ त्रयोदशीव्रतानि ॥ अग्निरुवाच ॥ त्रयोदशीव्रतानीह सर्वदानि वदामि ते ॥ अनङ्गेन कृतामादौ वक्ष्येऽनङ्गत्रयोदशीम् ॥ १ ॥ त्रयोदश्यां मार्गशीर्षे शुक्लेऽनङ्गं हरं यजेत् ॥ मधु सम्प्राशयेद्रात्रौ घृतहोमस्तिलाक्षतैः ॥ २ ॥ पौषे योगेश्वरं प्रार्च्य चन्दनाशी कृताहुतिः ॥ महेश्वरं मौक्तिकाशी माघेऽभ्यर्च्य दिवं व्रजेत् ॥ ३ ॥ काकोलं प्राश्य नीरं तु फाल्गुने पूजयेद्व्रती ॥ कर्पूराशी स्वरूपं च चैत्रे सौभाग्यवान्भवेत् ॥ ४ ॥ महारूपं तु वैशाखे यजेज्जातीफलाश्यपि ॥ लवङ्गाशी ज्येष्ठदिने प्रद्युम्नं पूजयेद्व्रती ॥ ५ ॥ तिलोदाशी तथाषाढे चोमाभर्त्तारमर्च्चयेत् ॥ श्रावणे गन्धतोयाशी पूजयेच्छूलपाणिनम् ॥ ६ ॥ सद्योजातं भाद्रपदे प्राशीतागुरुमर्च्चयेत् ॥ सुवर्णवारि सम्प्राश्य ह्याश्विने त्रिदशाधिपम् ॥ ७ ॥ विश्वेश्वरं कार्त्तिके तु मदनाशी यजेद्व्रती ॥ शिवं

हैमं तु वर्षान्ते सच्छाद्याम्रदलेन तु ॥ ८ ॥ वस्त्रेण पूजयित्वा तु दद्याद्विप्राय गां तथा ॥ शयनं छत्रकलशान्पादुकारसभाजनम् ॥ ९ ॥ त्रयोदश्यां सिते चैत्रे रतिप्रीतियुतं स्मरन् ॥ अशोकाख्यं नगं लिख्य सिन्दूररजनीमुखैः ॥ अब्दं यजेत्तु कामार्थी कामत्रयोदशीव्रतम् ॥ १० ॥ इत्यादिमहापुराणे आग्नेये त्रयोदशीव्रतानि नामैकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ अथ चतुर्दशीव्रतानि ॥ अग्निरुवाच ॥ व्रतं वक्ष्ये चतुर्दश्यां भुक्तिमुक्तिप्रदायकम् ॥ कार्त्तिके तु चतुर्दश्यां निराहारो यजेच्छिवम् ॥ १ ॥ वर्षं भोगधनायुष्मान्कुर्वञ्शिवचतुर्दशीम् ॥ मार्गशीर्षे सितेऽष्टम्यां तृतीयायां मुनिव्रतः ॥ २ ॥ द्वादश्यां वा चतुर्दश्यां फलाहारो यजेत्सुरम् ॥ त्यक्त्वा फलानि दद्यात्तु कुर्वन्फलचतुर्दशीम् ॥ ३ ॥ चतुर्दश्यामथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ॥ अनश्नन्पूजयेच्छम्भुं स्वर्ग्युभयचतुर्दशीम् ॥ ४ ॥ कृष्णाष्टम्यां तु नक्तेन तथा. कृष्णचतुर्दशीम् ॥ इह भोगानवाप्नोति परत्र च शुभां गतिम् ॥ ५ ॥ कार्त्तिके च चतुर्दश्यां कृष्णायां स्नानकृत्सुखी ॥ आराधिते महेन्द्रे तु ध्वजाकारासु यष्टिषु ॥ ६ ॥ ततः शुक्लचतुर्दश्यामनन्तं पूजयेद्धरिम् ॥ कृत्वा दर्भमयं चैव वारिधानीसमन्वितम् ॥ ७ ॥ शालिप्रस्थस्य पिष्टस्य पूपनाम्नः कृतस्य च ॥ अर्द्धं विप्राय दातव्यमर्द्धमात्मनि योजयेत् ॥ कर्त्तव्यं सरितां चान्ते कथां कृत्वा हरेरिति ॥ ८ ॥ अनन्तसंसारमहासमुद्रे मग्नान्समभ्युद्धर वासुदेव ॥ अनन्तरूपे विनियोजयस्व ह्यनन्तरूपाय नमो नमस्ते ॥ ९ ॥ अनेन पूजयित्वाथ सूत्रं बद्ध्वा तु मन्त्रितम् ॥ स्वके करे वा कण्ठे वा त्वनन्तव्रतकृत्सुखी ॥ १० ॥ इत्यादिमहापुराणे आग्नेये नानाचतुर्दशीव्रतानि नाम द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥ अथ शिवरात्रिव्रतम् ॥ अग्निरुवाच ॥ शिवरात्रिव्रतं वक्ष्ये भुक्तिमुक्तिप्रदं शृणु ॥ माघफाल्गुनयोर्मध्ये कृष्णा या तु चतुर्दशी ॥ १ ॥ कामयुक्ता तु सोपोष्या कुर्वञ्जागरणं व्रती ॥ शिवरात्रिव्रतं कुर्वे चतुर्दश्यामभोजनम् ॥ २ ॥ रात्रिजागरणेनैव पूजयामि शिवं व्रती ॥ आवाहयाम्यहं शम्भुं भुक्तिमुक्तिप्रदायकम् ॥ ३ ॥ नरकार्णवकोत्तारनावं शिव नमोऽस्तु ते ॥ नमः शिवाय शान्ताय प्रजाराज्यादिदायिने ॥ ४ ॥ सौभाग्यारोग्यविद्यार्थस्वर्गमार्गप्रदायिने ॥ धर्म्मं देहि धनं देहि कामभोगादि देहि मे ॥ ५ ॥ गुणकीर्तिसुखं देहि स्वर्गं मोक्षं च देहि मे ॥ लुब्धकः प्राप्तवान्पुण्यं पापी सुन्दरसेनकः ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये शिवरात्रिव्रतं नाम त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ अथाशोकपूर्णिमादित्र० ॥ अग्निरुवाच ॥ अ शोकपूर्णिमां वक्ष्ये भूधरं च

भुवं यजेत् ॥ फाल्गुन्यां सितपक्षायां वर्षं स्याद्भुक्तिमुक्तिभाक् ॥ १ ॥ कार्त्तिक्यां तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ॥ शैवं पदमवाप्नोति वृषव्रतामिदं परम् ॥ २ ॥ पित्र्या यामावसी तस्यां पितॄणां दत्तमक्षयम् ॥ उपोष्याब्दं पितॄनिष्ट्वा निष्पापः स्वर्गमाप्नुयात् ॥३॥ पञ्चदश्यां च माघस्य पूज्याजं सर्वमाप्नुयात् ॥ वक्ष्ये सावित्र्यमावास्यां भुक्तिमुक्तिकरीं शुभाम् ॥४॥ पञ्चदश्यां त्रयी ज्येष्ठे वटमूले महासतीम् ॥ त्रिरात्रोपोषिता नारीं सप्तधान्यैः प्रपूजयेत् ॥ ५ ॥ प्ररूढैः कण्टसूत्रैश्च रजन्यां कुङ्कुमादिभिः ॥ वटावलम्बनं कृत्वा नृत्यगीतैः प्रभातके ॥ ६ ॥ नमः सावित्र्यै सत्यवते नैवेद्यं चार्पयेद्द्विजे ॥ वेश्म गत्वा द्विजान्भोज्य स्वयं भुक्त्वा विसर्जयेत् ॥ सावित्री प्रीयतां देवी सौभाग्यादिकमाप्नुयात् ॥ ७ ॥ इत्यादिमहापुराणे आग्नेये तिथिव्रतानि नाम चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥ अथ वारव्रतानि ॥ अग्निरुवाच ॥ वारव्रतानि वक्ष्यामि भुक्तिमुक्तिप्रदानि हि ॥ करं पुनर्वसुः सूर्ये स्नाने सर्वौषधी शुभा ॥ १॥ श्राद्धी चादित्यवारे तु सप्तजन्मस्वरोगभाक् ॥ संक्रान्तौ सूर्य्यवारो यः सोऽर्कस्य हृदयः शुभः ॥ २ ॥ कृत्वा हस्ते सूर्य्यवारं नक्तेनाब्दं स सर्वभाक् ॥ चित्राभसोमवाराणि सप्त कृत्वा सुखी भवेत् ॥ ३ ॥ स्वात्यां गृहीत्वा चाङ्गारं सप्तनक्त्यार्त्तिवर्जितः ॥ विशाखायां बुधं गृह्य सप्तनक्ती ग्रहार्तिनुत् ॥ ४ ॥ अनुराधे देवगुरुं सप्तनक्ती ग्रहार्तिनुत् ॥ शुक्रं ज्येष्ठासु संगृह्य सप्तनक्ती ग्रहार्त्तिनुत् ॥ मूले शनैश्चरं गृह्य सप्तनक्ती ग्रहार्त्तिनुत् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये वारव्रतानि नाम पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ अथ नक्षत्रव्रतानि ॥ अग्निरुवाच ॥ नक्षत्रव्रतकं वक्ष्ये भे हरिः पूजितोऽर्थदः ॥ नक्षत्रपुरुषं चादौ चैत्रमासे हरिं यजेत् ॥ १ ॥ मूले पादौ यजेज्जङ्घे रोहिणीस्वर्च्चयेद्धरिम् ॥ जानुनी चाश्विनीयोगे ह्याषाढासूरुसञ्ज्ञके ॥ २ ॥ मेढ्रं पूर्वोत्तरास्वेव कटिं वै कृत्तिकासु च ॥ पार्श्वे भाद्रपदाभ्यां तु कुक्षिं वै रेवतीषु च ॥ ३ ॥ स्तनौ चैवानुराधासु धनिष्ठासु च पृष्ठकम् ॥ भुजौ पूज्यौ विशाखासु पुनर्वस्वङ्गुलीर्यजेत् ॥ ४ ॥ आश्लेषासु नखान्पूज्य कण्ठं ज्येष्ठासु पूजयेत् ॥ श्रोत्रे विष्णोश्च श्रवणे मुखे पुष्ये हरेर्यजेत् ॥ ५ ॥ यजेत्स्वातिषु दन्ताग्रमास्यं वारुणतोऽर्चयेत् ॥ मघासु नासां नयने मृगशीर्षे ललाटकम् ॥ ६ ॥ चित्रासु चार्द्रासु कचानब्दान्ते स्वर्णकं हरिम् ॥ गुडपूर्णे घटेऽभ्यर्च्च शय्यागोऽर्थादिदक्षिणा ॥ ७ ॥ नक्षत्रपुरुषो विष्णुः पूजनीयः शिवात्मकः ॥ शाम्भवायनीयव्रतकृन्मासभे पूजयेद्धरिम् ॥ ८ ॥ कार्त्तिके कृत्तिकायां च मृगशीर्षे मृगास्यके ॥

नामभिः केशवाद्यैस्तु अच्युताय नमोऽपि वा ॥ ९ ॥ कार्तिके कृत्तिकाभेऽह्नि मासनक्षत्रगं हरिम् ॥ शाम्भवायनयिव्रतक करिष्ये भुक्तिमुक्तिदम् ॥ १० ॥ केशवादिमहामूर्त्तिमच्युतं सर्वदायकम् ॥ आवाहयाम्यहं देवमायुरारोग्यवृद्धिदम् ॥ ११ ॥ कार्तिकादौ सकासारमन्नं मासचतुष्टयम् ॥ फाल्गुनादौ च कृसरमाषाढादौ च पायसम् ॥ १२ ॥ देवाय ब्राह्मणेभ्यश्च नक्तं नैवेद्यमाशयेत् ॥ पञ्चगव्यजले स्नातस्तस्यैव प्राशनाच्छुचिः ॥ १३ ॥ अर्वाग्विसर्जनाद्यं नैवेद्यं सर्वमुच्यते ॥ विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात् ॥ १४ ॥ नमो नमस्तेऽच्युत मे क्षयोऽस्तु पापस्य वृद्धिं समुपेतु पुण्यम् ॥ ऐश्वर्यवित्तादि सदाक्षयं मे क्षयं च मा सन्ततिरभ्युपैतु ॥ १५ ॥ यथाच्युतस्त्वं परतः परस्तात्स ब्रह्मभूतः परतः परात्मन् ॥ तथाच्युत त्वं कुरु वाञ्छितं मे मया कृतं पापहराप्रमेय ॥ १६ ॥ अच्युतानन्त गोविन्द प्रसीद यदभीप्सितम् ॥ अक्षयं माममेयात्मन्कुरुष्व पुरुषोत्तम ॥ १७ ॥ सप्त वर्षाणि सम्पूज्य भुक्तिमुक्तिमवाप्नुयात् ॥ अनन्तव्रतमाख्याम्ये नक्षत्रव्रतकेऽर्थदम् ॥ १८ ॥ मार्गशीर्षे मृगाशिरे गोमूत्राशी यजेद्धरिम् ॥ अनन्तं सर्वकामानामनन्तो भगवान्फलम् ॥ १९ ॥ ददात्यनन्तं च पुनस्तदेवान्यत्र जन्मनि ॥ अनन्तपुण्योपचयं करोत्येतन्महाव्रतम् ॥ २० ॥ यथाभिलषितप्राप्तिं करोत्यक्षयमेव च ॥ पादादि पूज्य नक्ते तु भुञ्जीयात्तैलवर्जितम् ॥ २१ ॥ घृतेनानन्तमुद्दिश्य होमो मासचतुष्टयम् ॥ चैत्रादौ शालिना होमः पयसा श्रावणादिषु ॥ २२ ॥ मान्धातामूद्युवनाश्वादनन्तव्रतकात्सुतः ॥ इत्यादिमहापुराणे आग्नेये नक्षत्रव्रतानि नाम षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥ अथ दिवसव्रतानि ॥ अग्निरुवाच ॥ दिवसव्रतकं वक्ष्ये ह्यादौ धेनुव्रतं वदे ॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ॥ १ ॥ दिनं पयोव्रतास्तिष्टेत्स याति परमं पदम् ॥ त्र्यहं पयोव्रतं कृत्वा काञ्चनं कल्पपादपम् ॥ २ ॥ दत्त्वा ब्रह्मपदं याति कल्पवृक्षव्रतं स्मृतम् ॥ दद्याद्विंशत्पलादूर्ध्वं महीं कृत्वा तु काञ्चनीम् ॥ ३ ॥ दिनं पयोव्रतस्तिष्ठेद्रुद्रगः स्यादिवाव्रती ॥ पक्षे पक्षे त्रिरात्रं तु भक्तेनैकेन यः क्षपेत् ॥ ४ ॥ विपुलं धनमाप्नोति त्रिरात्रव्रतकृद्दिनम् ॥ मासेमासे त्रिरात्राशी ह्येकभक्ती गणेशताम् ॥ ५ ॥ यस्त्रिरात्रव्रतं कुर्य्यात्समुद्दिश्य जनार्दनम् ॥ कुलानां शतमादाय स याति भवनं हरेः ॥ ६ ॥ नवम्यां च सिते पक्षे नरो मार्गशिरस्यथ ॥ प्रारभेत त्रिरात्राणां व्रतं तु विधिवद्व्रती ॥ ७ ॥ ओं नमो वासुदेवाय सहस्रं वा शतं जपेत् ॥ अष्टम्यामे-

कभक्ताशी दिनत्रयमुपावसेत् ॥ ८ ॥ द्वादश्यां पूजयोद्विष्णुं कार्त्तिके कारयेद्व्रतम् ॥ विप्रान्सम्भोज्य वस्त्राणि शयनान्यासनानि च ॥ ९ ॥ छत्रोपवीतपात्राणि ददेत्सम्प्रार्थयेद्द्विजान् ॥ व्रतेऽस्मिन्दुष्करे चापि विकलं यदभून्मम ॥ १० ॥ भवद्भिस्तदनुज्ञातं परिपूर्णं भवत्विति ॥ भुक्तभोगो व्रजेद्विष्णुं त्रिरात्रव्रतकव्रती ॥ ११ ॥ कार्त्तिकव्रतकं वक्ष्ये भुक्तिमुक्तिप्रदायकम् ॥ दशम्यां पञ्चगव्याशी एकादश्यामुपोषितः ॥ १२ ॥ कार्त्तिकस्य सितेऽभ्यर्च्य विष्णुं देवविमानगः ॥ चैत्रे त्रिरात्रं नक्ताशी ह्यजापञ्चप्रदः सुखी ॥ १३ ॥ त्रिरात्रं पयसः पानमुपवासपरस्त्वहम् ॥ षष्ठ्यादि कार्त्तिके शुक्ले कृच्छ्रो माहेन्द्र उच्यते ॥ १४ ॥ पञ्चरात्रं पयः पीत्वा दध्याहारो ह्युपोषितः ॥ एकादश्यां कार्त्तिके तु कृच्छ्रोऽयं भास्करोऽर्थदः ॥ १५ ॥ यवागूं यावकं शाकं दधि क्षीरं घृतं जलम् ॥ पञ्चम्यादिसिते पक्षे कृच्छ्रः सान्तपनः स्मृतः ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये दिवसव्रतानि नाम सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥ अथ मासव्रतानि ॥ अग्निरुवाच ॥ मासव्रतकमाख्यास्ये भुक्तिमुक्तिप्रदायकम् ॥ आषाढादिचतुर्मासमभ्यङ्गं वर्जयेत्सुधीः ॥ १ ॥ वैशाखे पुष्पलवणं त्यक्त्वा गोदो नृपो भवेत् ॥ गोदो मासोपवासी च भौमव्रतकरो हरिः ॥ २ ॥ आषाढादिचतुर्मासं प्रातःस्नायी च विष्णुगः ॥ माघे मास्यथ चैत्रे वा गुडधेनुप्रदो भवेत् ॥ ३ ॥ गुडव्रतस्तृतीयायां गौरीशः स्यान्महाव्रती ॥ मार्गशीर्षादिमासेषु नक्तकृद्विष्णुलोकभाक् ॥ ४ ॥ एकभक्तव्रती तद्वद्वादशीव्रतकं पृथक् ॥ फलव्रती चतुर्मासं फलं त्यक्त्वा प्रदापयेत् ॥ ५ ॥ श्रावणादिचतुर्मासं व्रतैः सर्वं लभेद्व्रती ॥ आषाढस्य सिते पक्षे ह्येकादश्यामुपोषितः ॥ ६ ॥ चातुर्मास्यव्रतानां तु कुर्वीत परिकल्पनम् ॥ आषाढ्यां चाथ संक्रान्तौ कर्कटस्य हरिं यजेत् ॥ ७ ॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नां सिद्धिमायातु प्रसन्ने त्वयि केशव ॥ ८ ॥ गृहीतेऽस्मिन्व्रते देव यद्यपूर्णे ह्रिये ह्यहम् ॥ तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥ ९ ॥ मांसादि त्यक्त्वा विप्रः स्यात्तैलत्यागी हरिं यजेत् ॥ एकान्तरोपवासी च त्रिरात्रं विष्णुलोकभाक् ॥ १० ॥ चान्द्रायणी विष्णुलोकी मौनी स्यान्मुक्तिभाजनम् ॥ प्राजापत्यव्रती स्वर्गी सकृद्यावकभक्षकः ॥ ११ ॥ दुग्धाद्याहारवान्स्वर्गी पञ्चगव्याम्बुभुक्तथा ॥ शाकमूलफलाहारी नरो विष्णुपुरीं व्रजेत् ॥ १२ ॥ मांसवर्जी यवाहारो रसवर्जी हरिं व्रजेत् ॥ कौमुदव्रतमाख्यास्ये आश्विने समुपोषितः ॥ १३ ॥ द्वादश्यां पूजयेद्विष्णुं प्रलिप्याब्जोत्पलादिभिः ॥ घृतेन तिलतैलेन दीपनैवेद्यमर्पयेत् ॥ १४ ॥ ओं नमो वासुदेवाय मालत्या

मालया यजेत् ॥ धर्मकामार्थमोक्षांश्च प्राप्नुयात् कौमुदव्रती ॥ सर्वं लभेद्धीरः प्रार्च्य मासोपवासकव्रती ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये मासव्रतानि नाम अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ अथ नानाव्रतानि ॥ अग्निरुवाच ॥ ऋतुव्रतान्यहं वक्ष्ये भुक्तिमुक्ति-प्रदानि ते ॥ इन्धनानि तु यो दद्याद्वर्षादिचतुरो ह्यतून् ॥ १ ॥ घृतधेनुप्रदश्चान्ते ब्राह्मणोऽग्निव्रती भवेत् ॥ कृत्वा मौनं तु सन्ध्यायां मासान्ते घृतकुम्भदः ॥२॥ तिलपृष्टावस्त्रदाता सुखी सारस्वतव्रती ॥ पञ्चामृतेन स्नपनं कृत्वाब्दं धेनुदो नृपः ॥३॥ एकादश्यां तु नक्ताशी चैत्रे भक्तं निवेदयेत् ॥ हैमं विष्णोः पदं याति मासान्ते विष्णुभद्व्रती ॥ ४ ॥ पायसाशी गोयुगदः श्रीभाग्देवीव्रती भवेत् ॥ निवेद्य पितृदे-वेभ्यो यो भुंक्ते स भवेन्नृपः ॥ ५ ॥ वर्षव्रतानि चोक्तानि सङ्क्रान्तिव्रतकं वदे ॥ सङ्क्रान्तौ स्वर्गलोकी स्याद्रात्रिजागरणान्नरः ॥ ६ ॥ अमावास्यां तु सङ्क्रान्तौ शिवार्क्कयजनात्तथा ॥ उत्तरे त्वयने चाज्यप्रस्थस्नानेन केशवे ॥ ७ ॥ द्वात्रिंशत्पलमानेन सर्वपापैः प्रमुच्यते ॥ घृतक्षीरादिना स्नाप्य प्राप्नोति विषुवादिषु ॥८॥ स्त्रीणामुमाव्रतं श्रीदं तृतीयास्वष्टमीषु च ॥ गौरीं महेश्वरं चापि यजेत्सौभाग्यमाप्नुयात् ॥९॥ उमामहेश्वरौ प्रार्च्य ह्यवियोगादि चाप्नुयात् ॥ मूलव्रतकरी स्त्री च द्युमेशव्रतकारिणी ॥ सूर्य्यभक्ता तु या नारी ध्रुवं सा पुरुषो भवेत् ॥ १० ॥ इत्यादिमहापुराणे आग्नेये नानाव्रतानि नामैकोनशताधिकशततमोऽध्यायः ॥ १९९ ॥ अथ दीपदानव्रतम् ॥ अग्निरुवाच ॥ दीपदानव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकम् ॥ देवद्विजातिकगृहे दीपदोऽब्दं स सर्वभाक् ॥ १ ॥ चतुर्मासं विष्णुलोकी कार्त्तिके स्वर्गलोक्यपि ॥ दीपदाना-त्परं नास्ति न भूतं न भविष्यति ॥ २ ॥ दीपेनायुष्यचक्षुष्मान्दीपाल्लक्ष्मीसुतादिकम् ॥ सौभाग्यं दीपदः प्राप्य स्वर्गलोके महीयते ॥ ३ ॥ विदर्भराजदुहिता ललिता दीपदात्मभाक् ॥ चारुधर्मक्ष्मापपत्नी शतभार्य्याधिकाऽभवत् ॥ ४॥ ददौ दीपसहस्रं सा विष्णोरायतने सती ॥ पृष्टा सा दीपमाहात्म्यं सपत्नीभ्य उवाच ह ॥५॥ ललितोवाच ॥ सौवीरराजस्य पुरा मैत्रेयोऽभूत्पुरोहितः ॥ तेन चायतनं विष्णोः कारितं देविकातटे ॥६॥ कार्तिके दीपकस्तेन दत्तः सम्प्रेरितो मया ॥ वक्रप्रान्तेन नश्यन्त्या मार्जारस्य तदा भयात् ॥ ७ ॥ निर्वाणवान्प्रदीप्तोऽ-भूद्वर्त्या मूषिकया तदा ॥ मृता राज्ञान्मजा जाता राजपत्नी शताधिका ॥ ८ ॥ असङ्कल्पितमप्यस्य प्रेरणं यत्कृतं मया ॥ विष्ण्वायतन-दीपस्य तस्येदं भुज्यते फलम् ॥ ९ ॥ जातिस्मरा ह्यतो दीपान्प्रयच्छामि त्वहर्निशम् ॥ एकादश्यां दीपदो वै विमाने दिवि मोदते ॥ १० ॥

जायते दीपहर्त्ता तु मूको वा जड एव च ॥ अन्धे तमसि दुष्पारे नरके पतते किल ॥ ११ ॥ विक्रोशमानांश्च नरान्यमकिङ्कर आह तान् ॥ विलापैरलमत्रापि किं वो विलपिते फलम् ॥ १२ ॥ यदा प्रमादिभिः पूर्वमन्यन्तसमुपेक्षितः ॥ जन्तुर्जन्मसहस्रेभ्यो ह्येकस्मिन् मानुषो यदि ॥ १३ ॥ तत्राप्यनिर्विमूढात्मा किं भोगानभिधावति ॥ स्वहितं विषयास्वादैः क्रन्दनं तदिहागतम् ॥ १४ ॥ भुज्यते च कृतं पूर्वमेतत्किं वो न चिन्तितम् ॥ परस्त्रीषु कुचाद्यङ्गं प्रीतये दुःखदं हि वः ॥ १५ ॥ मुहूर्तविषयास्वादोऽनेककोट्यब्ददुःखदः ॥ परस्त्रीहारि यद्दीनं हा मातः किं विलप्यते ॥ १६ ॥ कोऽतिभारो हरेर्नाम्नि जिह्वया परिकीर्त्तने ॥ वर्त्तितैलेऽल्पमूल्येऽपि यदग्निर्लभ्यते सदा ॥ १७ ॥ दानामर्केहरेर्दीपो हृतस्तद्रोऽस्ति दुःखदम् ॥ इदानीं किं विलापेन सह्यं यदुपागतम् ॥ १८ ॥ अग्निरुवाच ॥ ललितोक्तं च ताः श्रुत्वा दीपदानादिवं ययुः ॥ तस्मादीपप्रदानेन व्रतानामधिकं फलम् ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये दीपदानव्रतं नाम द्विशततमोऽध्यायः ॥ २०० ॥ अथ नवव्यूहार्चनम् ॥ अग्निरुवाच ॥ नवव्यूहार्चनं वक्ष्ये नारदाय हरीरितम् ॥ मण्डलेऽब्जेऽर्चयेन्मध्ये ह्यबीजं वासुदेवकम् ॥ १ ॥ आबीजं च सङ्कर्षणं प्रद्युम्नं च दक्षिणे ॥ अः अग्निरुद्धं नैर्ऋते ओं नारायणमप्सु च ॥ २ ॥ तत्सद्ब्रह्माणमनिलं हुं विष्णुं शों नृसिंहकम् ॥ उत्तरे भूवराहं च त्वीशे द्वारि च पश्चिमे ॥ ३ ॥ कं टं सं शं गरुत्मन्तं पूर्ववक्त्रं च दक्षिणे ॥ खं छं वं हुं फडिनि च खं ठं फं शं गदां विधौ ॥ ४ ॥ वं णं मं क्षं कोणेशं च धं दं भं हं श्रियं यजेत् ॥ दक्षिणे चोत्तरे पुष्टिं गं डं वं शं स्वबीजकम् ॥ ५ ॥ पीठस्य पश्चिमे धं वं वनमालां च पश्चिमे ॥ श्रीवत्सं चैव मं हं लं छं तं यं कौस्तुभं जले ॥ ६ ॥ दशमाङ्गक्रमाद्विष्णोर्नमोऽनन्तमधोऽर्चयेत् ॥ दशाङ्गादिमहेन्द्रादीन्पूर्वादौ चतुरो घटान् ॥ ७ ॥ तोरणानि वितानं च अस्त्रनिलेन्दुबीजकैः ॥ मण्डलानि क्रमाद्यजेत्वा तनुं वन्द्य ततः प्रविशेत् ॥ ८ ॥ ॥ अम्बरस्थं ततो ध्यात्वा सूक्ष्मरूपमथात्मनः ॥ सितामृते निमग्नं च चंद्रबिम्बात्सुतेन च ॥ ९ ॥ तंदेव चात्मनो बीजमसृतं प्लवसंस्कृतम् ॥ उत्पद्यशानं पुरुषमात्मानमुपकल्पयेत् ॥ १० ॥ उत्पन्नोऽस्मि स्वयं विष्णुर्बीजं द्वादशकं न्यसेत् ॥ हृच्छिरस्तु शिखा चैव कवचं चास्त्रमेव च ॥ ११ ॥ वक्षोमूर्द्धशिखापृष्ठलोचनेषु न्यसेत्पुनः ॥ अस्त्रं करद्वये न्यस्य ततो दिव्यतनुर्भवेत् ॥ १२ ॥ यथात्मनि यथा देवे शिष्यदेहे न्यसेत्तथा ॥ अनिर्माल्या स्मृता पूजा यद्धरेः पूजनं हृदि ॥ १३ ॥ सानिर्माल्या मण्डलादौ

बद्धनेत्राश्च शिष्यकाः ॥ पुष्पं क्षिपेयुर्यन्मूर्तौ तस्य तन्नाम कारयेत् ॥ १४ ॥ निवेश्य वामतः शिष्यांस्तिलव्रीहिघृतं हुनेत् ॥ शतमष्टोत्तरं हुत्वा सहस्रं कायशुद्धये ॥ १५ ॥ नवव्यूहस्य मूर्त्तीनामङ्गानां च शताधिकम् ॥ पूर्णां दत्त्वा दीक्षयेत्तान्गुरुः पूज्यश्च तैर्धनैः ॥ ॥ १६ ॥ इत्यादिमहापुराणे आग्नेये नवव्यूहार्चनं नामैकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ अथ पुष्पाध्यायकथनम् ॥ अग्निरुवाच ॥ पुष्पगन्धधूपदीपनैवेद्यैस्तुप्यते हरिः ॥ पुष्पाणि देवयोग्यानि ह्ययोग्यानि वदामि ते ॥ १॥ पुष्पं श्रेष्ठं मालती च तमालो भुक्तिमुक्तिमान् ॥ मल्लिका सर्वपापघ्नी यूथिका विष्णुलोकदा ॥ २ ॥ अतिमुक्तमयं तद्वत्पाटला विष्णुलोकदा ॥ करवीरैर्विष्णुलोकी जपापुष्पैश्च पुण्यवान् ॥ ३ ॥ पावन्ती कुब्जकाद्यैश्च नगैर्विष्णुलोकभाक् ॥ कर्णिकारैर्विष्णुलोकः कुरुण्टैः पापानाशनम् ॥ ४ ॥ पद्मैश्च केतकीभिश्च कुन्दपुष्पैः परा गतिः ॥ बाणपुष्पैर्बर्बराभिः कृष्णाभिर्हरिलोकभाक् ॥ ५ ॥ अशोकैस्तिलकैस्तद्वदटरूपभवैस्तथा ॥ मुक्तिभागी बिल्वपत्रैः शमीपत्रैः परा गतिः ॥ ६ ॥ विष्णुलोकी भृङ्गराजैस्तमालस्य दलैस्तथा ॥ तुलसी कृष्णगौराख्या कह्लारोत्पलकानि च ॥ ७॥ पद्मं कोकनदं पुण्यं शताब्जमालया हरिः ॥ नीपार्जुनकदम्बैश्च वकुलैश्च सुगन्धिभिः ॥ ८ ॥ किंशुकैर्मुनिपुष्पैस्तु गोकर्णैर्नागकर्णकैः ॥ सन्ध्यापुष्पैर्बिल्वतकै रंजनीकेतकीभवैः ॥ ९ ॥ कूष्माण्डनिम्बिरोन्थैश्च कुशकाशशरोद्भवैः ॥ द्यूतादिभिर्मरुवकैः पत्रैरन्यैः सुगन्धकैः ॥ ॥ १० ॥ भुक्तिर्मुक्तिः पापहानिर्भक्त्या सर्वैस्तु तुप्यति ॥ स्वर्णलक्षाधिकं पुष्पं माला कोटिगुणाधिका ॥ ११ ॥ स्ववनेऽन्यवने पुष्पैस्त्रिगुणं वनजैः फलम् ॥ विशीर्णैर्नार्चयेद्विष्णुं नाधिकाङ्गैर्न मोटितैः ॥ १२ ॥ काञ्चनारैस्तथोन्मत्तैर्गिरिकर्णिकया तथा ॥ कुटजैः शाल्मलीयैश्च शिरीषैर्नरकादिकम् ॥ १३ ॥ सुगन्धैर्वल्लपद्मैश्च पुष्पैर्नीलोत्पलैर्हरिः ॥ अर्कमन्दारधुस्तूरकुसुमैरर्च्यते हरः ॥ १४ ॥ कुटजैः कर्कटीपुष्पैः केतकीं न शिवे ददेत् ॥ कूष्माण्डनिम्बसम्भूतं पैशाचं गन्धवर्जितम् ॥ १५ ॥ अहिंसा चेन्द्रियजयः क्षान्तिर्ज्ञानं दया श्रुतम् ॥ भावाष्टपुष्पैः सम्पूज्य देवान्म्याद्भुक्तिमुक्तिभाक् ॥ १६॥ अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ॥ सर्वपुष्पं दया भूते पुष्पं शांतिर्विशिष्यते ॥ १७॥ शमः पुष्पं तपः पुष्पं ध्यानं पुष्पं च सप्तमम् ॥ सत्यं चैवाष्टमं पुष्पमेतैस्तुप्यति केशवः ॥ १८॥ एतैरेवाष्टभिः पुष्पैस्तुप्यत्येवार्चितो हरिः ॥ पुष्पान्तराणि सन्त्यत्र बाह्यानि मनुजोत्तम ॥ १९॥ भक्त्या दयान्वितैर्विष्णुः पूजितः परितुष्यति ॥ वारुणं सलिलं

पुष्पं सौम्यं घृतपयोदधि ॥ २० ॥ प्राजापत्यं तथान्नादी ह्याग्नेयं धूपदीपकम् ॥ फलपुष्पादिकं चैव वानस्पत्यं तु पञ्चमम् ॥ २१ ॥ पार्थिवं कुशंमूलाद्यं वायव्यं गन्धचन्दनम् ॥ श्राद्धाख्यं विष्णुपुष्पं च सर्वदा चाष्टपुष्पिका ॥ २२ ॥ आसनं मूर्त्तिपञ्चाङ्गं विष्णुर्वा चाष्टपुष्पिका ॥ विष्णोस्तु वासुदेवाद्यैरीशानाद्यैः शिवस्य वा ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये पुष्पाऽध्यायो नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

अथ नरकस्वरूपम् ॥ अग्निरुवाच ॥ पुष्पाद्यैः पूजनाद्विष्णोर्न याति नरकान्नरः ॥ आयुषोऽन्ते नरः प्राणैरनिच्छन्नपि मुच्यते ॥ १ ॥ जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः ॥ निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते ॥ २ ॥ अन्यच्छरीरमादत्ते यातनीयं स्वकर्मभिः ॥ भुङ्क्तेऽथ पापकृद्दुःखं सुखं धर्माय सज्जनः ॥ ३ ॥ नीयते यमदूतैस्तु यमं प्राणिभयङ्करैः ॥ कुपथे दक्षिणद्वारि धार्मिकः पश्चिमादिभिः ॥ ४ ॥ यमाज्ञप्तैः किङ्करैस्तु पात्यते नरकेषु च ॥ स्वर्गे तु नीयते धर्माद्विसिष्ठाद्युक्तिसंश्रयात् ॥ ५ ॥ गोघाती तु महावीच्यां वर्षलक्षं तु पीड्यते ॥ ताम्रकुम्भे महादीप्ते ब्रह्महा भूमिहारकः ॥ ६ ॥ महाप्रलयकं यावद्रौरवे पीड्यते शनैः ॥ स्त्रीबालवृद्धहन्ता तु यावदिन्द्राश्चतुर्दश ॥ ७ ॥ महारौरवके रौद्रे गृहक्षेत्रादिदीपकः ॥ दह्यते कल्पमेकं स चौरस्तामिस्रके पतेत् ॥ ८ ॥ नैककल्पं तु शूलाद्यैर्भिद्यते यमकिङ्करैः ॥ महातामिस्रके सर्पजलौकाद्यैश्च पीड्यते ॥ ९ ॥ यावद्भूमिर्मातृहाद्या ह्यसिपत्रवनेऽसिभिः ॥ नैककल्पं तु नरके करम्भवालुकासु च ॥ १० ॥ येन दग्धो जनस्तत्र दह्यते वालुकादिभिः ॥ काकोले कृमिविष्ठाशी एकाकी मिष्टभोजनः ॥ ११ ॥ कुट्टले मूत्ररक्ताशी पञ्चयज्ञक्रियोज्झितः ॥ सुदुर्गन्धे रक्तभोजी भवेच्चाभक्ष्यभक्षकः ॥ १२ ॥ तैलपाके तु तिलवत्पीड्यते परपीडकः ॥ तैलपाके तु पच्येत शरणागतघातकः ॥ १३ ॥ निरुच्छ्वासे दाननाशी रसविक्रयकोऽध्वरे ॥ नाम्रा वज्रकवाटेन महापाते तदाऽनृती ॥ १४ ॥ महाज्वाले पापबुद्धिः ककचेऽगम्यगामिनः ॥ सङ्करी गुडपाके च प्रतुदेत्परमर्मनुत् ॥ १५ ॥ क्षारह्रदे प्राणिहन्ता क्षुरधारे च भूमिहृत् ॥ अम्बरीषे गोस्वर्णहृद्दुमच्छिद्व्रजशस्त्रके ॥ १६ ॥ मधुहर्त्ता परीतापे कालसूत्रे परार्थहृत् ॥ कश्मलेऽत्यन्तमांसाशी उग्रगन्धे ह्यपिण्डदः ॥ १७ ॥ दुर्द्धरे तूत्कोचभक्षी वन्दिग्राहरताश्च ये ॥ मञ्जूषे नरके लोहेऽप्रतिष्ठे श्रुतिनिन्दकः ॥ १८ ॥ पूतिवक्त्रे कूटसाक्षी परिलुण्ठेद्धनापहा ॥ बालस्त्रीवृद्धघाती च कराले ब्राह्मणार्त्तिकृत् ॥ १९ ॥ विलेपे

मद्यपो विप्रो महाताम्रे तु भेदिनः ॥ तथाक्रम्य परदारान् ज्वलन्तीमायसीं शिलाम् ॥ २० ॥ शाल्मलाख्ये तमालिङ्गेन्नारी बहुनरङ्गमा ॥ आस्फोटजिह्वोद्धरणं स्त्रीक्षणान्नेत्रभेदनम् ॥ २१ ॥ अङ्गारराशौ क्षिप्यन्ते मातापुत्र्यादिगामिनः ॥ चौराः क्षुरैश्च भिद्यन्ते स्वमांसाशी च मांसभुक् ॥ २२ ॥ मासोपवासकर्त्ता वै न याति नरकं नरः ॥ एकादशीव्रतकरो भीष्मपञ्चकसद्व्रती ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये नरकस्वरूपवर्णनं नाम त्र्यधिकद्विशततमोऽध्यायः ॥२०३॥ अथ मासोपवासव्रतम् ॥ अग्निरुवाच ॥ व्रतं मासोपवासं च सर्वोत्कृष्टं वदामि ते ॥ कृत्वा तु वैष्णवं यज्ञं गुरोराज्ञामवाप्य च ॥ १ ॥ कृच्छ्राद्यैः स्वबलं बुद्ध्वा कुर्य्यान्मासोपवासकम् ॥ वानप्रस्थो यतिर्वाथ नारी वा विधवा मुने ॥ २ ॥ आश्विनस्यामले पक्षे एकादश्यामुपोषितः ॥ व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशादिनानि तु ॥ ३ ॥ अद्यप्रभृत्यहं विष्णो यावदुत्थानकं तव ॥ अर्चये त्वामनश्नन् हि यावत्त्रिंशदिनानि तु ॥ ४ ॥ कार्त्तिकाश्विनयोर्विष्णोर्यावदुत्थानकं तव ॥ म्रिये यद्यन्तरालेऽहं व्रतभङ्गो न मे भवेत् ॥५॥ त्रिकालं पूजयेद्विष्णुं त्रिःस्नातो गन्धपुष्पकैः ॥ विष्णोर्गीतादिकं जप्यं ध्यानं कुर्य्याद्व्रती नरः ॥६॥ वृथावादं परिहरेदर्थाकांक्षां विवर्जयेत् ॥ नाव्रतस्थं स्पृशेत्कञ्चिद्विकर्मस्थान्न चालपेत् ॥७॥ देवतायतनं तिष्ठेद्यावत्त्रिंशदिनानि तु ॥ द्वादश्यां पूजयित्वां तु भोजयित्वा द्विजान्व्रती ॥ ८ ॥ समाप्य दक्षिणां दत्त्वा पारणं तु समाचरेत् ॥ भुक्तिमुक्तिमवाप्नोति कल्पांश्चैव त्रयोदश ॥ ९ ॥ कारयेद्वैष्णवं यज्ञं यजेद्विप्रांस्त्रयोदश ॥ तावन्ति वस्त्रयुग्मानि भाजनान्यासनानि च ॥ १० ॥ छत्राणि सपवित्राणि तथोपानद्युगानि च ॥ योगपट्टोपवीतानि दद्याद्विप्राय तन्मतः ॥ ११ ॥ अन्यविप्राय शय्यायां हेमं विष्णुं प्रपूज्य च ॥ आत्मनश्च तथा मूर्तिं वस्त्राद्यैश्च प्रपूजयेत् ॥ १२ ॥ सर्वपापविनिर्मुक्तो विप्रो विष्णुप्रसादतः ॥ विष्णुलोकं गमिष्यामि विष्णुरेव भवाम्यहम् ॥ १३ ॥ व्रज व्रज देववुद्धे विष्णोः स्थानमनामयम् ॥ विमानेनामलस्तत्र तिष्ठेद्विष्णुस्वरूपधृक् ॥ १४ ॥ द्विजानुक्त्वाथ तां शय्यां गुरवेऽथ निवेदयेत् ॥ कुलानां शतमुद्धृत्य विष्णुलोकं नयेद्व्रती ॥ १५ ॥ मासोपवासी यद्देशे स देशो निर्मलो भवेत् ॥ किं पुनस्तत्कुलं सर्वं यत्र मासोपवासकृत् ॥ १६ ॥ व्रतस्थं मूर्च्छितं दृष्ट्वा क्षीराज्यं चैव पाययेत् ॥ नैते व्रतं विनिघ्नन्ति हाविर्विप्रानुमोदितम् ॥१७॥ क्षीरं गुरोर्हितौषध्य आपो मूलफलानि च ॥ विष्णुर्महौषधं कर्त्ता व्रतमस्मात्समुद्धरेत् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये मासोपवासव्रतं नाम चतुरधिकद्विशततमोऽ-

ध्यायः ॥२०४॥ अथ भीष्मपञ्चकव्रतम् ॥ अग्निरुवाच ॥ भीष्मपञ्चकमाख्यास्ये व्रतराजं तु सर्वदम् ॥ कार्तिकस्यामले पक्षे ह्येकादश्यां समाचरेत् ॥१॥ दिनानि पञ्च त्रिस्नायी पञ्चत्रीहितिलैस्तथा ॥ तर्पयेद्देवपित्रादीन्मौनी सम्पूजयेद्धरिम् ॥ २ ॥ पञ्चगव्येन संस्नाप्य देवं पञ्चामृतेन च ॥ चन्दनाद्यैः समालिप्य गुग्गुलुं सघृतं दहेत् ॥३॥ दीपं दद्यादिवारात्रौ नैवेद्यं परमान्नकम् ॥ ओं नमो वासुदेवाय जपेदष्टोत्तरं शतम् ॥ ४ ॥ जुहुयाच्च घृताभ्यक्तांस्तिलव्रीहींस्ततो व्रती ॥ षडक्षरेण मन्त्रेण स्वाहाकारान्वितेन च ॥ ५ ॥ कमलैः पूजयेत्पादौ द्वितीये बिल्वपत्रकैः ॥ जानुसक्थि तृतीयेऽथ नाभिं भृङ्गरजेन तु ॥ ६ ॥ बाणबिल्वजपार्भिस्तु चतुर्थे पञ्चमेऽहनि ॥ मालत्या भूमिशायी स्यादेकादश्यां तु गोमयम् ॥ ७ ॥ गोमूत्रं दधि दुग्धं च पञ्चमे पञ्चगव्यकम् ॥ पौर्णमास्यां चरेन्नक्तं मुक्तिं मुक्तिं लभेद्व्रती ॥ ८ ॥ भीष्मः कृत्वा हरिं प्राप्तस्तेनैतद्भीष्मपंचकम् ॥ ब्रह्मणः पूजनाद्यैश्च ह्युपवासादिकं व्रतम् ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये भीष्मपञ्चकं नाम पञ्चाऽधिकद्विशततमोऽध्यायः ॥ २०५ ॥ अथागस्त्यार्घ्यदानकथनम् ॥ अग्निरुवाच ॥ अगस्त्यो भगवान्विष्णुस्तमभ्यर्च्यामुयाद्धरिम् ॥ अप्राप्ते भास्करे कन्यां सत्रिभागैस्त्रिभिर्दिनैः ॥ १ ॥ अर्घ्यं दद्यादगस्त्याय पूजयित्वा ह्युपोषितः ॥ काशपुष्पमयीं मूर्तिं प्रदोषे विन्यसेद्घटे ॥ २ ॥ मुनेर्यजेत्तां कुम्भस्थां रात्रौ कुर्यात्प्रजागरम् ॥ अगस्त्य मुनिशार्दूल तेजोराशे महामते ॥ ३ ॥ इमां मम कृतां पूजां गृहीष्व प्रियया सह ॥ आवाह्यार्घ्यैश्च सम्मुख्यं प्रार्चयेच्चन्दनादिना ॥ ४ ॥ जलाशयसमीपे तु प्रातर्नीत्वार्घ्यमर्पयेत् ॥ काशपुष्पप्रतीकाश अग्निमारुतसम्भव ॥ ५ ॥ मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ आताप्यर्भक्षितो येन वाताप्यश्च महासुरः ॥ ६ ॥ समुद्रः शोषितो येन सोऽगस्त्यः सम्मुखोऽस्तु मे ॥ अर्घ्यं ते प्रार्थयिष्यामि कर्मणा मनसा गिरा ॥ ७ ॥ अर्चयिष्याम्यहं नित्यं परलोकाभिकाङ्क्षया ॥ द्वीपान्तरसमुत्पन्नं देवानां परमं प्रियम् ॥ ८ ॥ राजानं सर्ववृक्षाणां चन्दनं प्रतिगृह्यताम् ॥ धर्मार्थकाममोक्षाणां भाजनं पापनाशनं ॥ ९ ॥ सौभाग्यारोग्यलक्ष्मीदा पुष्पमाला प्रगृह्यताम् ॥ धूपोऽयं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ॥ १० ॥ ईप्सितं मे वरं देहि परत्र च शुभां गतिम् ॥ सुरासुरैर्मुनिश्रेष्ठ सर्वकामफलप्रद ॥ ११ ॥ वस्त्रव्रीहिफलैर्हेम्ना दत्तस्त्वर्घ्यो ह्ययं मया ॥ अगस्त्यं बोधयिष्यामि यन्मया मनसोद्धृतम् ॥ १२ ॥ फलैरर्घ्यं

प्रदास्यामि गृहाणार्घ्यं महामुने ॥ अगस्त्य एवं स्तूयमानः स्वानेत्रैः प्रजापत्यं बलमाहमानः ॥ उभौ कर्णावृषिरुग्रतेजाः पुपोष सत्या देवेष्वाशिषो वै जगाम ॥ १३ ॥ राजपुत्रि नमस्तुभ्यं मुनिपत्नि महाव्रते ॥ अर्घ्यं गृह्णीष्व देवेशि लोपामुद्रे यशस्विनि ॥ १४ ॥ पञ्च-रत्नसमायुक्तं हेमरूप्यसमन्वितम् ॥ सप्तधान्यवृतं पात्रं दधिचन्दनसंयुतम् ॥ १५ ॥ अर्घ्यं दद्यादगस्त्याय स्त्रीशूद्राणामवैदिकम् ॥ अगस्त्य मुनिशार्दूल तेजोराशे च सर्वदा ॥ १६ ॥ इमां मम कृतां पूजां गृहीत्वा व्रज शान्तये ॥ त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम् ॥ १७ ॥ ततोऽन्नं भोजयेद्विप्रान्घृतपायसमोदकान् ॥ गां वासांसि सुवर्णं च तेभ्यो दद्याच्च दक्षिणाम् ॥ १८ ॥ घृतपायसयुक्तेन पात्रेणाच्छादिताननम् ॥ सहिरण्यं च तं कुम्भं ब्राह्मणायोपकल्पयेत् ॥ १९ ॥ सप्तवर्षाणि दत्त्वार्घ्यं सर्वे सर्वमवाप्नुयुः ॥ नारी पुत्रांश्च सौभाग्यं पतिं कन्या नृपोद्भवम् ॥ २० ॥ इत्यादिमहापुराणे आग्नेये अगस्त्यार्घ्यदानव्रतं नाम षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥ अथ कौमुदव्रतम् ॥ अग्निरुवाच ॥ कौमुदाख्यं मयोक्तं च चरेदाश्वयुजे सिते ॥ हरिं यजेन्मासमेकमेकादश्यामुपोषितः ॥ १ ॥ आश्विने शुक्लपक्षेऽहमेकाहारो हरिं जपन् ॥ मासमेकं मुक्तिमुक्त्यै करिष्ये कौमुदं व्रतम् ॥ २ ॥ उपोष्य विष्णुं द्वादश्यां यजेदेवं विलिप्य च ॥ चन्दनागुरुकाश्मीरैः कंमलोत्पलपुष्पकैः ॥ ३ ॥ कह्लारैर्वाथ मालत्या दीपं तैलेन वाग्यतः ॥ अहोरात्रं च नैवेद्यं पायसापूपमोदकैः ॥४॥ ओं नमो वासुदेवाय विज्ञाप्याथ समापयेत् ॥ भोजनादि द्विजे दद्याद्यावद्देवः प्रबुध्यते ॥ तावन्मासोपवासः स्यादाधिकं फलमप्यतः ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये कौमुदव्रतं नाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ अथ व्रतदानादिसमुच्चयः ॥ अग्निरुवाच ॥ व्रतदा-नानि सामान्यं प्रवदामि समासतः ॥ तिथौ प्रतिपदादौ च सूर्य्यादौ कृत्तिकासु च ॥ १ ॥ विष्कुम्भादौ च मेषादौ काले च ग्रहणादिके ॥ यत्काले यद्व्रतं दानं यद्द्रव्यं नियमादि यत् ॥ २ ॥ तद्द्रव्याख्यं च कालाख्यं सर्वं वै विष्णुदैवतम् ॥ रवीशब्रह्मलक्ष्म्याद्याः सर्वे विष्णोर्विभूतयः ॥ ३ ॥ समुद्दिश्य व्रतं दानं पुजादि स्याच्च सर्वदम् ॥ जगत्पते समागच्छ ह्यासनं पाद्यमर्घ्यकम् ॥ ४ ॥ मधुपर्कं तथा-चामं स्नानं वस्त्रं च गन्धकम् ॥ पुष्पं धूपश्च दीपश्च नैवेद्यादि नमोऽस्तु ते ॥ ५ ॥ इति पूजाव्रते दाने दानवाक्यं समं शृणु ॥ अद्या-मुकसगोत्राय विप्रायामुकशर्मणे ॥ ६ ॥ एतद्द्रव्यं विष्णुदैवं सर्वपापोपशान्तये ॥ आयुरारोग्यवृद्ध्यर्थं सौभाग्यादिविवृद्धये ॥ ७ ॥ गोत्र-

सन्तानवृद्ध्यर्थं विजयाय धनाय च ॥ धर्मायैश्वर्य्यकामाय तत्पापशमनाय च ॥ ८ ॥ संसारमुक्तये दानं तुभ्यं सम्प्रददे ह्यहम् ॥ एत-
द्दानप्रतिष्ठार्थं तुभ्यमेतद्ददाम्यहम् ॥ ९ ॥ एतेन प्रीयतां नित्यं सर्वलोकपतिः प्रभुः ॥ यज्ञदानव्रतपते विद्याकीर्त्यादि देहि मे ॥ १० ॥
धर्मकामार्थमोक्षांश्च देहि मे मनसेप्सितम् ॥ यः पठेच्छृणुयान्नित्यं व्रतदानसमुच्चयम् ॥११॥ स प्राप्तकामो विमलो भुक्तिं मुक्तिमवाप्नु-
यात् ॥ तिथिवारर्क्षसंक्रान्तियोगमन्वादिकं व्रतम् ॥ नैकधा वासुदेवादेर्नियमान्पूजनाद्भवेत् ॥ १२ ॥ इत्यादिमहापुराणे आग्नेये व्रतदा-
नसममुच्चयो नामाऽष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥ अथ दानपरिभाषाक० ॥ अग्निरुवाच ॥ दानधर्म्मान्प्रवक्ष्यामि भुक्ति-
मुक्तिप्रदाञ्छृणु ॥ दानमिष्टं तथा पूर्त्तं धर्मं कुर्वन्हि सर्वभाक् ॥ १ ॥ वापीकूपतडागानि देवतायतनानि च ॥ अन्नप्रदानमारामाः पूर्त्तं
धर्मं च मुक्तिदम् ॥ २ ॥ अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ॥ आतिथ्यं वैश्वदेवं च प्राहुरिष्टं च नाकदम् ॥ ३ ॥ ग्रहोपरागे
यदानं सूर्य्यसङ्क्रमणेषु च ॥ द्वादश्यादौ च यदानं पूर्त्तं तदपि नाकदम् ॥ ४ ॥ देशे काले च पात्रे च दानं कोटिगुणं भवेत् ॥ अयने
विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ ५ ॥ युगादिषु च सङ्क्रान्तौ चतुर्दश्यष्टमीषु च ॥ सितपञ्चदशीसर्वद्वादशीष्वष्टकासु च ॥ ६ ॥ यज्ञो-
त्सवविवाहेषु तथा मन्वन्तरादिषु ॥ वैधृतौ दृष्टदुःस्वप्ने द्रव्यब्राह्मणलाभतः ॥ ७ ॥ श्रद्धा वा यदिने तत्र सदा वा दानमिष्यते ॥ अयने
द्वे विषुवे द्वे चतस्रः षडशीतयः ॥ ८ ॥ चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादशोत्तमाः ॥ कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः ॥
॥ ९ ॥ षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः ॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने ॥ १० ॥ त्रिंशत्कर्कटके नाड्यो मकरे
विंशतिः स्मृताः ॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥ ११ ॥ षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः ॥ पुण्याख्या
विष्णुपद्यां च प्राक्पश्चादपि षोडश ॥ १२ ॥ श्रवणाश्विधनिष्ठासु नागदैवतमस्तके ॥ यदा स्याद्रविवारेण व्यतीपातः स उच्यते ॥
॥ १३ ॥ नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात्कृतम् ॥ त्रेता सिततृतीयायां वैशाखे द्वापरं युगम् ॥ १४ ॥ दर्शे वे
माघमासस्य त्रयोदश्यां नभस्यके ॥ कृष्णे काले विजानीयाज्ज्ञेया मन्वन्तरादयः ॥ १५ ॥ अश्वयुक्छुक्लनवमी द्वादशी
कार्त्तिके तथा ॥ तृतीया चैव माघस्य तथा भाद्रपदस्य च ॥ १६ ॥ फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ॥

आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ १७ ॥ श्रावणे चाष्टमी कृष्णा तथाषाढ च पूर्णमा ॥ कार्त्तिक फाल्गुन तद्वज्ज्येष्ठ
पञ्चदशी तथा ॥ १८ ॥ ऊर्ध्वं चैवाग्रहायण्या अष्टकास्तिस्र ईरिताः ॥ अष्टकाख्या चाष्टमी स्यादासु दानानि चाक्षयम् ॥ १९ ॥
गयागङ्गाप्रयागादौ तीर्थे देवालयादिषु ॥ अप्रार्थितानि दानानि विद्यार्थकन्यकानि हि ॥ २० ॥ दद्यात्पूर्वमुखो दानं गृह्णीयादु-
त्तरामुखः ॥ आयुर्विवर्द्धते दातुर्गृहीतुः क्षीयते न तत् ॥ २१ ॥ नाम गोत्रं समुच्चार्य्य संप्रदानस्य चात्मनः ॥ सम्प्रदेयं प्रयच्छन्ति कन्या-
दाने पुनस्त्रयम् ॥ २२ ॥ स्नात्वाभ्यर्च्य व्याहृतिभिर्दद्यादानं तु सोदकम् ॥ कनकाश्वतिला नागा दासीरथमहीगृहाः ॥ २३ ॥ कन्या
च कापिला धेनुर्महादानानि वै दश ॥ श्रुतशौर्य्यतपःकन्यायाज्यशिष्यादुपागतम् ॥ २४ ॥ शुल्कं धनं हि सकलं शुल्कं शिल्पानुवृ-
त्तितः ॥ कुसीदकृषिवाणिज्यप्राप्तं यदुपकारतः ॥ २५ ॥ पाशकद्यूतचौर्य्यादिप्रतिरूपकसाहसैः ॥ व्याजेनोपार्जितं कृत्स्नं त्रिविधं
त्रिविधं फलम् ॥ २६ ॥ अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ॥ भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ २७ ॥ ब्रह्मक्षत्रविशां
द्रव्यं शूद्रस्येषामनुग्रहात् ॥ बहुभ्यो न प्रदेयानि गोर्गृहं शयनं स्त्रियः ॥ २८ ॥ कुलानां तु शतं हन्यादप्रयच्छन्प्रतिश्रुतम् ॥ देवानां
च गुरूणां च मातापित्रोस्तथैव च ॥ २९ ॥ पुण्यं देयं प्रयत्नेन यत्पुण्यं चार्जितं क्वचित् ॥ प्रतिलाभेच्छया दत्तं यद्धनं तदपार्थकम्
॥ ३० ॥ श्रद्धया साध्यते धर्मो दत्तं वार्यापि चाक्षयम् ॥ ज्ञानशीलगुणोपेतः परपीडाबहिष्कृतः ॥ ३१ ॥ अज्ञानां पालनात्त्राणात्तत्प्राप्तं
परमं स्मृतम् ॥ मातुः शतगुणं दानं महस्रं पितुरुच्यते ॥ ३२ ॥ अनन्तं दुहितुर्दानं सोदर्य्ये दत्तमक्षयम् ॥ अमनुष्ये समं दानं पापे ज्ञेयं
महाफलम् ॥ ३३ ॥ वर्णसङ्करे द्विगुणं शूद्रे दानं चतुर्गुणम् ॥ वैश्ये चाष्टगुणं क्षत्रे षोडशत्वं द्विजब्रुवे ॥ ३४ ॥ वेदाध्याये शतगुणमनन्तं
वेदबोधके ॥ पुरोहिते याजकादौ दानमक्षयमुच्यते ॥ ३५ ॥ श्रीविहीनेषु यद्दत्तं तदनन्तं च यज्वनि ॥ अनधीयानः प्रतिग्रहरु-
द्विर्जिचः ॥ ३६ ॥ अम्भस्यश्मप्लवेनैव सह तेनैव मज्जति ॥ स्नातः सम्यगुपस्पृश्य गृह्णीयात्प्रयतः शुचिः ॥ ३७ ॥ प्रतिगृह्णीता सावित्रीं
सर्वदैव प्रकीर्त्तयेत् ॥ ततस्तु कीर्त्तयेत्साद्धं द्रव्येण सह देवतम् ॥ ३८ ॥ प्रतिग्राही पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ॥ मन्दं पठेत्क्षत्रियात्तु
ह्युपांशु च तथा विशः ॥ ३९ ॥ मनसा च तथा शूद्रात्स्वस्तिवाचनकं तथा ॥ अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता ॥ ४० ॥ कन्या दासस्तथा

दासी प्राजापत्याः प्रकीर्त्तिताः ॥ प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः ॥४१॥ तथा चैकशफं सर्वं याम्यश्च महिषस्तथा ॥ उष्ट्रश्च नैर्ऋतो धेनू रौद्री छागोऽनलस्तथा ॥४२॥ आप्यो मेषो हरिः क्रोड आरण्याः पशवोऽनिलाः ॥ जलाशयं वारुणं स्याद्वारिधानी घटादयः ॥४३॥ समुद्रजानि रत्नानि हेमलोहानि चानलः ॥ प्राजापत्यानि शय्यानि पक्कान्नमपि सत्तम ॥४४॥ गान्धर्वं गन्धमित्याहुर्वस्त्रं बार्हस्पतं स्मृतम् ॥ वायव्याः पक्षिणः सर्वे विद्या ब्राह्मी तथाङ्कनम् ॥ ४५ ॥ सारस्वतं पुस्तकादि विश्वकर्मा तु शिल्पके ॥ वनस्पतिर्द्रुमादीनां द्रव्यदेवा हरेस्तनुः ॥ ४६ ॥ छत्रं कृष्णाजिनं शय्या रथ आसनमेव च ॥ उपानहौ तथा यानमुत्तानाङ्गिर ईरितम् ॥ ४७ ॥ रणोपकरणं शस्त्रं ध्वजाद्यं सर्वदैवतम् ॥ गृहं च सर्वदैवत्यं सर्वेषां विष्णुदेवता ॥ ४८ ॥ शिवो वा न ततो द्रव्यं व्यतिरिक्तं यतोऽस्ति हि ॥ द्रव्यस्य नाम गृह्णीयाद्ददानीति तथा वदेत् ॥ ४९ ॥ तोयं दद्यात्ततो हस्ते दाने विधिरयं स्मृतः ॥ विष्णुर्दाता विष्णुर्द्रव्यं प्रतिगृह्णामि वै वदेत् ॥ ५० ॥ स्वस्ति प्रतिग्रहं धर्मं भुक्तिमुक्तिफलद्वयम् ॥ गुरुन्भृत्यानुज्झितीर्पुरर्चिष्यन्देवताः पितॄन् ॥ ५१ ॥ सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥ शूद्रीयं न तु यज्ञार्थं धनं शूद्रस्य तत्फलम् ॥ ५२ ॥ गुडतक्रसाद्याश्च शूद्राद्ग्राह्या निवर्त्तिना ॥ सर्वतः प्रतिगृह्णीयादवृत्त्याकर्शितो द्विजः ॥ ५३ ॥ नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ॥ दोषो भवति विप्राणां ज्वलनार्कसमा हि ते ॥ ५४ ॥ कृते तु दीयते गत्वा त्रेतास्वानीय दीयते ॥ द्वापरे याचमानाय कलौ त्वनुगमान्विते ॥ ५५ ॥ मनसा पात्रमुद्दिश्य जलं भूमौ विनिःक्षिपेत् ॥ विद्यते सागरस्यान्तो नान्तो दानस्य विद्यते ॥ ५६ ॥ अद्य सोमार्कग्रहणसंक्रान्त्यादौ च कालके ॥ गङ्गागयाप्रयागादौ तीर्थदेशे महागुणे ॥ ५७ ॥ तथा चामुकगोत्राय तथा चामुकशर्मणे ॥ वेदवेदाङ्गयुक्ताय पात्राय सुमहात्मने ॥ ५८ ॥ यथानाम महाद्रव्यं विष्णुरुद्रादिदैवतम् ॥ पुत्रपौत्रगृहैश्वर्य्यपत्नीधर्मार्थसद्गुणाः ॥ ५९ ॥ कीर्त्तिविद्यामहाकामसौभाग्यारोग्यवृद्धये ॥ सर्वपापोपशान्त्यर्थं स्वर्गार्थं भुक्तिमुक्तये ॥ ६० ॥ एतत्तुभ्यं सम्प्रददे प्रीयतां मे हरिः शिवः ॥ दिव्यान्तरिक्षभौमादिसमुत्पातौघघातकृत् ॥ ६१ ॥ धर्मार्थकाममोक्षाप्त्यै ब्रह्मलोकप्रदोऽस्तु मे ॥ यथानामसगोत्राय विप्रायामुकशर्मणे ॥ ६२ ॥ एतद्दानप्रतिष्ठार्थं सुवर्णं दक्षिणां ददे ॥ अनेन दानवाक्येन सर्वदानानि वै ददेत् ॥ ६३ ॥ इत्यादिमहापुराणे आग्नेये दानपरिभाषा नाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

अथ महादानानि ॥ अग्निरुवाच ॥ सर्वदानानि वक्ष्यामि महादानानि षोडश ॥ तुलापुरुष आद्यं तु हिरण्यगर्भदानकम् ॥ १ ॥ ब्रह्माण्डं कल्पवृक्षश्च गोसहस्रं च पञ्चमम् ॥ हिरण्यकामधेनुश्च हिरण्याश्वश्च सप्तमम् ॥ २ ॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा ॥ पञ्चलाङ्गलकं तद्वद्धरादानं तथैव च ॥ ३ ॥ विश्वचक्रं कल्पलता सप्तसागरकं परम् ॥ रत्नधेनुर्महाभूतघटः शुभदिनेपर्येत् ॥ ४ ॥ मण्डपे मण्डले दानं देवान्प्रार्च्यार्पयेद्द्विजे ॥ मेरुदानानि पुण्यानि मेरवो दश तान्शृणु ॥ ५ ॥ धान्यद्रोणसहस्रेण ह्युत्तमोऽर्द्धार्द्धतः परौ ॥ उत्तमः षोडशद्रोणः कर्त्तव्यो लवणाचलः ॥ ६ ॥ दशभारैर्गुडाद्रिः स्यादुत्तमोऽर्द्धार्द्धतः परौ ॥ उत्तमः पलसाहस्रैः स्वर्णमेरुस्तथा परौ (रः) ॥ ७ ॥ दशद्रोणैस्तिलाद्रिः स्यात्पञ्चभिश्च त्रिभिः क्रमात् ॥ कार्पासपर्वतो विंशभारैश्च दशपञ्चभिः ॥ ८ ॥ विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः ॥ दशभिः पलसाहस्रैरुत्तमो रजताचलः ॥ ९ ॥ अष्टभारैः शर्कराद्रिर्मध्यो मन्दोऽर्द्धतोऽर्द्धतः ॥ दश धेनूः प्रवक्ष्यामि यां दत्त्वा भुक्तिमुक्तिभाक् ॥ १० ॥ प्रथमा गुडधेनुः स्याद्घृतधेनुस्तथाऽपरा ॥ तिलधेनुस्तृतीया च चतुर्थी जलधेनुका ॥ ११ ॥ क्षीरधेनुर्मधुधेनुः शर्करादधिधेनुके ॥ रसधेनुः स्वरूपेण दशमी विधिरुच्यते ॥ १२ ॥ कुम्भाः स्युर्द्रवधेनूनामितरासां तु राशयः ॥ कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि ॥ १३ ॥ गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वतः ॥ लक्ष्मणकाजिनं तद्वदुत्सस्य परिकल्पयेत् ॥ १४ ॥ प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥ उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयात् ॥ १५ ॥ वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता ॥ अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु ॥ १६ ॥ चतुर्थांशेन वत्सः स्याद्गुडवित्तानुसारतः ॥ पञ्च कृष्णलका मापस्ते सुवर्णस्तु षोडश ॥ १७ ॥ पलं सुवर्णाश्चत्वारस्तुला पलशतं स्मृतम् ॥ स्याद्भारो विंशतितुला द्रोणस्तु चतुराढकः ॥ १८ ॥ धेनुवत्सौ गुडस्योभौ सितसूक्ष्माम्बरावृतौ ॥ शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ॥ १९ ॥ सितसूत्रशिरालौ च सितकम्बलकम्बलौ ॥ ताम्रगडूकपृष्ठौ नौ सितचामररोमकौ ॥ २० ॥ विद्रुमभ्रुयुगावेतौ नवनीतस्तनान्वितौ ॥ क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥ २१ ॥ सुवर्णशृङ्गाभरणौ रजतक्षुरसंयुतौ ॥ नानाफलमया दन्ता गन्धघ्राणप्रकल्पितौ ॥ २२ ॥ रचयित्वा यजेद्धेनुमिमैर्मन्त्रैर्द्विजोत्तम ॥ या

लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ॥ २३ ॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु ॥ देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया ॥ २४ ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ विष्णुवक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ॥ २५ ॥ चन्द्रार्कऋक्षशक्तिर्या धेनुरूपास्तु सा श्रिये ॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ॥ २६ ॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे ॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ॥ २७ ॥ सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥ एवमामन्त्रितां धेनुं ब्राह्मणाय निवेदयेत् ॥ २८ ॥ समानं सर्वधेनूनां विधानं चैतदेव हि ॥ सर्वयज्ञफलं प्राप्य निर्मलो भुक्तिमुक्तिभाक् ॥२९॥ स्वर्णशृङ्गी शफै रोप्यैः सुशीला वस्त्रसंयुता ॥ कांस्योपदोहा दातव्या क्षीरिणी गौः सदक्षिणा ॥ ३० ॥ दातास्याः स्वर्गमाप्नोति वत्सरात्रोमसम्मितान् ॥ कपिला चेत्तारयतिं भूयश्चासप्तमं कुलम् ॥ ३१ ॥ स्वर्णशृङ्गीं रौप्यखुरां कांस्यदोहनकान्विताम् ॥ शक्तितो दक्षिणायुक्तां दत्त्वा स्याद्भुक्तिमुक्तिभाक् ॥३२॥ सवत्सरोमतुल्यानि युगान्युभयतोमुखीम् ॥ दत्त्वा स्वर्गमवाप्नोति पूर्वेण विधिना ददेत् ॥३३॥ आसन्नमृत्युना देया सवत्सा गौस्तु पूर्ववत् ॥ यमद्वारे महाघोरे तप्ता वैतरणी नदी ॥ तां तर्तुं च ददाम्येनां कृष्णां वैतरणीं च गाम् ॥ ३४ ॥ इत्यादिमहापुराणे आग्नेये महादानानि नाम दशाधिकद्विशततमोऽध्यायः ॥२१०॥ अथ नानादानानि ॥ अग्निरुवाच ॥ एकां गां दशगुर्दद्याद्दश दद्याच्च गोशतीं ॥ शतं सहस्रगुर्दद्यात्सर्वे तुल्यफला हि ते ॥ १ ॥ प्रासादा यत्र सौवर्णा वसोर्धारा च यत्र सा ॥ गन्धर्वाप्सरसो यत्र तत्र यान्ति सहस्रदाः ॥ २ ॥ गवां शतप्रदानेन मुच्यते नरकार्णवात् ॥ दत्त्वा वत्सतरीं चैव स्वर्गलोके महीयते ॥३॥ गोदानादायुरारोग्यं सौभाग्यस्वर्गमाप्नुयात् ॥ इन्द्रादिलोकपालानां या राजमहिषी शुभा ॥४॥ महिषीदानमाहात्म्यादस्तु मे सर्वकामदा ॥ धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः ॥५॥ महिषासुरस्य जननी या सास्तु वरदा मम ॥ महिषीदानाच्च सौभाग्यं वृषदानाद्दिवं व्रजेत् ॥६॥ संयुक्तहलपङ्क्त्याख्यं दानं सर्वफलप्रदम् ॥ पंक्तिर्दशहला प्रोक्ता दारुजा वृषसंयुता ॥ ७ ॥ सौवर्णपट्टसन्नद्धान्दत्त्वा स्वर्गे महीयते ॥ दशानां कपिलानां तु दत्तानां ज्येष्ठपुष्करे ॥ ८ ॥ तत्फलं चाक्षयं प्रोक्तं वृषभस्य तु मोक्षणे ॥ धर्मोऽसि त्वं चतुष्पादश्चतस्रस्ते प्रिया इमाः ॥ ९ ॥ नमो ब्रह्मण्य देवेश पितृभूतर्षिपोषक ॥ त्वयि मुक्तेऽक्षया लोका मम सन्तु निरामयाः ॥ १० ॥ मा मे ऋणोऽस्तु दैवत्यो भीतः पैत्रोऽथ मानुषः ॥ धर्मस्त्वं त्वत्प्रपन्नस्य या गतिः

साऽस्तु मे ध्रुवा ॥ ११ ॥ अङ्क्येचक्रशूलाभ्यां मन्त्रेणानेन चोत्सृजेत् ॥ एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ॥ १२ ॥ मुच्यते
प्रेतलोकात्तु षण्मासे चाब्दिकादिषु ॥ दशहस्तेन कु (द) ण्डेन त्रिंशत्कु (द) ण्डान्निवर्त्तनम् ॥ १३ ॥ तान्येव दशविस्ताराद्गोचर्मैतत्प्र-
दोऽपभित् ॥ गोभूहिरण्यसंयुक्तं कृष्णाजिनं तु योऽर्पयेत् ॥ १४ ॥ सर्वदुष्कृतकर्मापि सायुज्यं ब्रह्मणो व्रजेत् ॥ भाजनं तिलसम्पूर्णं मधुना
पूर्णमेव च ॥ १५ ॥ दद्यात्कृष्णतिलानां च प्रस्थमेकं च मागधम् ॥ शय्यां दत्त्वा तु सगुणां भुक्तिमुक्तिमवाप्नुयात् ॥ १६ ॥ हैमीं प्रतिकृतिं
कृत्वा दत्त्वा स्वर्गस्तथात्मनः ॥ विपुलं तु गृहं कृत्वा दत्त्वा स्याद्भुक्तिमुक्तिभाक् ॥ १७ ॥ गृहं मठं सभां स्वर्गीं दत्त्वा स्याच्च प्रातिश्रयम् ॥
दत्त्वा कृत्वा गोगृहं च निष्पापः स्वर्गमाप्नुयात् ॥ १८ ॥ यममाहिषदानात्तु निष्पापः स्वर्गमाप्नुयात् ॥ ब्रह्मा हरो हरिर्देवैर्मैत्र्ये च यम-
दूतकः ॥ १९ ॥ पाशी तस्य शिरश्छित्त्वा तं दद्यात्स्वर्गभाग्भवेत् ॥ त्रिमुखाख्यामिदं दानं गृहीत्वा तु द्विजोऽघभाक् ॥ २० ॥ चक्रं
रूप्यमयं कृत्वाङ्के धृत्वा तत्प्रदापयेत् ॥ हेमयुक्तं द्विजायैतत्कालचक्रमिदं महत् ॥ २१ ॥ आत्मतुल्यं तु यो लोहं ददेन्न नरकं व्रजेत् ॥
पञ्चाशत्पलसंयुक्तं लौहदण्डं तु योऽर्पयेत् ॥ २२ ॥ वस्त्रेणाच्छाद्य विप्राय यमदण्डो न विद्यते ॥ मूलं फलादि वा द्रव्यं संहतं वाथ
चैकशः ॥ २३ ॥ मृत्युञ्जयं समुद्दिश्य दद्यादायुर्विवर्द्धये ॥ पुमान्कृष्णतिलैः कार्य्यो रौप्यदन्तः सुवर्णदृक् ॥ २४ ॥ खड्गोद्यतकरो दीर्घो
जपाकुसुममण्डलः ॥ रक्ताम्बरधरः स्रग्वी शङ्खमालाविभूषितः ॥ २५ ॥ उपानद्युगयुक्ताङ्घ्रिः कृष्णकम्बलपार्श्वकः ॥ गृहीतमांस-
पिण्डश्च वामे वै कालपूरुषः ॥ २६ ॥ सम्पूज्य तं च गन्धाद्यैः ब्राह्मणायोपपादयेत् ॥ मरणव्याधिहीनः स्याद्राजराजेश्वरो भवेत्
॥ २७ ॥ गोवृषौ तु द्विजे दत्त्वा भुक्तिमुक्तिमवाप्नुयात् ॥ रे (हे) वन्ताधिष्ठितं चाश्वं हैमं दत्त्वा न मृत्युभाक् ॥ २८ ॥ घण्टादिपूर्ण-
मप्येकं दत्त्वा स्याद्भुक्तिमुक्तिभाक् ॥ सर्वान्कामानवाप्नोति यः प्रयच्छति काञ्चनम् ॥ २९ ॥ सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते ॥
अन्येषामपि दानानां सुवर्णं दक्षिणा स्मृता ॥ ३० ॥ सुवर्णं रजतं ताम्रं तण्डुलं धान्यमेव च ॥ नित्यश्राद्धं देवपूजा सर्वमेतददक्षिणम्
॥ ३१ ॥ रजतं दक्षिणा पित्रे धर्मकामार्थसाधनम् ॥ सुवर्णं रजतं ताम्रं मणिमुक्तावमूनि च ॥ ३२ ॥ सर्वमेतन्महाप्राज्ञो ददाति वसुधां
ददत् ॥ पितॄंश्च पितृलोकस्थान्देवस्थाने च देवताः ॥ ३३ ॥ सन्तर्पयति शान्तात्मा यो ददाति वसुन्धराम् ॥ खर्वटं खेटकं वापि ग्रामं

वा सस्यशालिनम् ॥ ३४ ॥ निवर्त्तनशतं वापि तदर्द्धं वा गृहादिकम् ॥ अपि गोचर्ममात्रां वा दत्त्वोर्वीं सर्वभाग्भवेत् ॥ ३५ ॥ तैलबिन्दु-
र्यथा चाप्सु प्रसर्पेद्भूगतं तथा ॥ सर्वेषामेव दानानामेकजन्मानुगं फलम् ॥३६॥ हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥ त्रिसप्तकुलमु-
द्धृत्य कन्यादो ब्रह्मलोकभाक् ॥ ३७ ॥ गजं सदक्षिणं दत्त्वा निर्मलः स्वर्गभाग्भवेत् ॥ अश्वं दत्त्वायुरारोग्यसौभाग्यं स्वर्गमाप्नुयात् ॥ ३८ ॥
॥ ३८ ॥ दासीं दत्त्वा द्विजेन्द्राय अप्सरोलोकमाप्नुयात् ॥ दत्त्वा ताम्रमयीं स्थालीं पलानां पञ्चभिः शतैः ॥ ३९ ॥ अर्द्धैस्तदर्द्धैरर्द्धैर्वा
भुक्तिमुक्तिमवाप्नुयात् ॥ शकटं वृषसंयुक्तं दत्त्वा यानेन नाकभाक् ॥ ४० ॥ वस्त्रदानाल्लभेदायुरारोग्यं स्वर्गमक्षयम् ॥ धान्यगोधूमकल-
मयवादीन्स्वर्गभाग्ददत् ॥ ४१ ॥ आसनं तैजसं पात्रं लवणं गन्धचन्दनम् ॥ धूपं दीपं च ताम्बूलं लोहं रूप्यं च रत्नकम् ॥ ४२ ॥
दिव्यानि नानाद्रव्याणि दत्त्वा स्याद्भुक्तिमुक्तिभाक् ॥ तिलांश्च तिलपात्रं च दत्त्वा स्वर्गमवाप्नुयात् ॥ ४३॥ अन्नदानात्परं नास्ति न भूतं न
भविष्यति ॥ हस्त्यश्वरथदानानि दासीदासगृहाणि च ॥ ४४ ॥ अन्नदानस्य सर्वाणि कलां नार्हन्ति षोडशीम् ॥ कृत्वापि सुमहत्पापं
यः पश्चादन्नदो भवेत् ॥ ४५ ॥ सर्वपापविनिर्मुक्तो लोकानाप्नोति चाक्षयान् ॥ पानीयं च प्रपां दत्त्वा भुक्तिं मुक्तिमवाप्नुयात् ॥ ४६ ॥
अग्निं काष्ठं च मार्गादौ दत्त्वा दीप्त्यादिमाप्नुयात् ॥ देवगन्धर्वनारीभिर्विमाने सेव्यते दिवि ॥ ४७ ॥ घृतं तैलं च लवणं दत्त्वा सर्वमवा-
प्नुयात् ॥ छत्रोपानहकाष्ठादि दत्त्वा स्वर्गे सुखी वसेत् ॥ ४८ ॥ प्रतिपत्तिथिमुख्येषु विष्कुम्भादिकयोगके ॥ चैत्रादौ वत्सरादौ च
ह्यश्विन्यादौ हरिं हरम् ॥ ४९ ॥ ब्रह्माणं लोकपालादीन्प्रार्च्य दानं महाफलम् ॥ वृक्षारामान्भोजनादीन्मार्गसंवाहनादिकान् ॥ ५० ॥
पादाभ्यङ्गादिकं दत्त्वा भक्तिं मुक्तिमवाप्नुयात् ॥ त्रीणि तुल्यफलानीह गावः पृथ्वी सरस्वती ॥ ५१ ॥ ब्राह्मीं सरस्वतीं दत्त्वा
निर्मलो ब्रह्मलोकभाक् ॥ सप्तद्वीपमहीदः स ब्रह्मज्ञानं ददाति यः ॥ ५२ ॥ अभयं सर्वभूतेभ्यो यो दद्यात्सर्वभाङ्नरः ॥ पुराणं भारतं
वापि रामायणमथापि वा ॥ ५३ ॥ लिखित्वा पुस्तकं दत्त्वा भुक्तिं मुक्तिमवाप्नुयात् ॥ वेदशास्त्रं नृत्यगीतं योऽध्यापयति नाकभाक् ॥
॥ ५४ ॥ वित्तं दद्यादुपाध्याये छात्राणां भोजनादिकम् ॥ किमदत्तं भवेत्तेन धर्मकामादिदर्शिना ॥ ५५ ॥ वाजपेयसहस्रस्य सम्यग्द-
त्तस्य यत्फलम् ॥ तत्फलं सर्वमाप्नोति विद्यादानान्न संशयः ॥ ५६ ॥ शिवालये विष्णुगृहे सूर्यस्य भवने तथा ॥ सर्वदानप्रदः स

स्यात्पुस्तकं वाचयेतु यः ॥ ५७ ॥ त्रैलोक्ये सर्ववर्णाश्च चत्वारश्चाश्रमाः पृथक् ॥ ब्रह्माद्या देवताः सर्वा विद्यादाने प्रतिष्ठिताः ॥ ५८ ॥ विद्या कामदुघा धेनुर्विद्या चक्षुरनुत्तमम् ॥ उपवेदप्रदानेन गन्धर्वैः सह मोदते ॥ ५९ ॥ वेदाङ्गानां च दानेन स्वर्गलोकमवाप्नुयात् ॥ धर्मशास्त्रप्रदानेन धर्मेण सह मोदते ॥६०॥ सिद्धान्तानां प्रदानेन मोक्षमाप्नोत्यसंशयम् ॥ विद्यादानमवाप्नोति प्रदानात्पुस्तकस्य तु ॥६१॥ शास्त्राणि च पुराणानि दत्त्वा सर्वमवाप्नुयाम् ॥ शिष्यांश्च शिक्षयेद्यस्तु पौण्डरीकफलं लभेत् ॥६२॥ येन जीवति तद्दत्त्वा फलस्यान्तो न विद्यते ॥ लोके श्रेष्ठतमं सर्वमात्मनश्चापि यत्प्रियम् ॥ ६३ ॥ सर्वं पितृणां दातव्यं तेषामेवाक्षयार्थिना ॥ विष्णुं रुद्रं पद्मयोनिं देवीविघ्नेश्वरादिकान् ॥ ६४ ॥ पूजयित्वा प्रदद्याद्यः पूजाद्रव्यं स सर्वभाक् ॥ देवालयं च प्रतिमां कारयन्सर्वमाप्नुयात् ॥६५॥ सम्मार्जनं चोपलेपं कुर्वन्स्यान्निर्मलः पुमान् ॥ नानामण्डलकार्य्यग्रे मण्डलाधिपतिर्भवेत् ॥६६॥ गन्धं पुष्पं धूपदीपं नैवेद्यं च प्रदक्षिणम् ॥ घण्टाध्वजविनानं च प्रेक्षणं वाद्यगीतकम् ॥ ६७ ॥ वस्त्रादि दत्त्वा देवाय भुक्तिं मुक्तिमवाप्नुयात् ॥ कस्तूरिकां सिह्लकं च श्रीखण्डमगरुं तथा ॥ ॥६८॥ कर्पूरं च तथा मुस्तं गुग्गुलुं विजयं ददेत् ॥ घृतप्रस्थेन संस्थाप्य सङ्क्रान्त्यादौ स सर्वभाक् ॥६९ ॥ स्नानं पलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ॥ पलानां तु सहस्रेण महास्नानं प्रकीर्त्तितम् ॥ ७० ॥ दशापराधास्तोयेन क्षीरेण स्नापनाच्छतम् ॥ सहस्रं पयसा दध्ना घृतेनायुतमिष्यते ॥ ७१ ॥ दासीदासमलङ्कारं गोभूम्यश्वगजादिकम् ॥ देवाय दत्त्वा सौभाग्यं धनायुष्मान्व्रजेदिवम् ॥ ७२ ॥ इत्यादिमहापुराणे आग्नेये नानादानानि नामैकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥ अथ मेरुदानानि ॥ अग्निरुवाच ॥ काम्यदानानि वक्ष्यामिःसर्वकामप्रदानि ते ॥ नित्यपूजां मासि मासि कृत्वाथो काम्यपूजनम् ॥१॥ व्रतार्हणं गुरोः पूजा वत्सरान्ते महार्चनम् ॥ अश्वं वै मार्गशीर्षे तु कमलं पिष्टसम्भवम् ॥ २ ॥ शिवाय पूज्य यो दद्यात्सूर्य्यलोके चिरं वसेत् ॥ गजं पौषे पिष्टमयं त्रिसप्तकुलमुद्धरेत् ॥ ॥ ३ ॥ माघे चाश्वरथं पैष्टं दत्त्वा न नरकं व्रजेत् ॥ फाल्गुने तु वृषं पैष्टं स्वर्गभुक्स्यान्महीपतिः ॥ ४ ॥ चैत्रे चेक्षुमयीं गावं दासदासीसमन्विताम् ॥ दत्त्वा स्वर्गे चिरं स्थित्वा तदन्ते स्यान्महीपतिः ॥ ५ ॥ सप्तव्रीहींश्च वैशाखे दत्त्वा शिवमयो भवेत् ॥ बलिमण्डलकं चान्नैः कृत्वाषाढे शिवो भवेत् ॥ ६ ॥ विमानं श्रावणे पौष्पं दत्त्वा स्वर्गी ततो नृपः ॥ शतद्वयं फलानां तु दत्त्वोद्दत्य कुलं

नृपः ॥ ७ ॥ गुग्गुलादि ददेद्भद्रे स्वर्गी स स्यात्ततो नृपः ॥ क्षीरसर्पिर्भृतं पात्रमाश्विने स्वर्गदं भवेत् ॥ ८ ॥ कार्त्तिके गुडखण्डाज्यं दत्त्वा स्वर्गी ततो नृपः ॥ मेरुदानं द्वादशकं वक्ष्येऽहं भुक्तिमुक्तिदम् ॥ ९ ॥ मेरुव्रते तु कार्त्तिक्यां रत्नमेरुं ददेद्विजे ॥ सर्वेषां चैव मेरूणां प्रमाणं क्रमशः शृणु ॥ १० ॥ वज्रपद्ममहानीलनीलस्फटिकसंज्ञितः ॥ पुष्पं मरकतं मुक्ता प्रस्थमात्रेण चोत्तमः ॥ ११ ॥ मध्योऽर्द्धः स्यात्तदर्द्धोऽधो वित्तशाठ्यं विवर्जयेत् ॥ कर्णिकायां न्यसेन्मेरुं ब्रह्मविष्ण्वीशदैवतम् ॥ १२ ॥ माल्यवान्पूर्वतः पूज्यस्तत्पूर्वे भद्रसंज्ञितः ॥ अश्वरक्षस्ततः प्रोक्तो निषधो मेरुदक्षिणे ॥ १३ ॥ हेमकूटोऽथ हिमवांस्त्रयं सौम्ये तथा त्रयम् ॥ नीलः श्वेतश्च शृङ्गी च पश्चिमे गन्धमादनः ॥ १४ ॥ वैकङ्कः केतुमालः स्यान्मेरुर्द्वादशसंयुतः ॥ सोपवासोऽर्चयेद्विष्णुं शिवं वा स्नानपूर्वकम् ॥ १५ ॥ देवाग्रे चार्च्य मेरुं च मन्त्रैर्विप्राय वै ददेत् ॥ विप्रायामुकगोत्राय मेरुं द्रव्यमयं परम् ॥ १६ ॥ भुक्त्यै मुक्त्यै निर्मलत्वं विष्णुदैवं ददामि ते ॥ इन्द्रलोके ब्रह्मलोके शिवलोके हरेः पुरे ॥ १७ ॥ कुलमुद्धृत्य क्रीडेत विमाने देवपूजितः ॥ अन्येष्वपि च कालेषु सङ्क्रान्त्यादौ प्रदापयेत् ॥ १८ ॥ पलानां तु सहस्रेण हेममेरुं प्रकल्पयेत् ॥ शृङ्गत्रयसमायुक्तं ब्रह्मविष्णुहरान्वितम् ॥ १९ ॥ एकैकं पर्वतं तस्य शतैकैकेन कारयेत् ॥ मेरुणा सह शैलास्तु ख्यातास्तत्र त्रयोदश ॥ २० ॥ अयने ग्रहणादौ च विष्ण्वग्रे हरिमर्च्य च ॥ स्वर्णमेरुं द्विजायार्प्य विष्णुलोके चिरं वसेत् ॥ २१ ॥ परमाणवो यावन्त इह राजा भवेच्चिरम् ॥ रौप्यमेरुं द्वादशाद्रियुतं सङ्कल्पतो ददेत् ॥ २२ ॥ प्रागुक्तं च फलं तस्य विष्णुं विप्रं प्रपूज्य च ॥ भूमिमेरुं च विषयं मण्डलं ग्राममेव च ॥ २३ ॥ परिकल्प्याष्टमांशेन शेषांशाः पूर्ववत्फलम् ॥ द्वादशाद्रिसमायुक्तं हस्तिमेरुस्वरूपिणम् ॥ २४ ॥ ददेत्त्रिपुरुषैर्युक्तं दत्त्वानन्तं फलं लभेत् ॥ त्रिपञ्चाश्वैरश्वमेरुं हयद्वादशसंयुतम् ॥ २५ ॥ विष्ण्वादीन्पूज्य तं दत्त्वा भुक्तभोगो नृपो भवेत् ॥ अश्वसङ्ख्याप्रमाणेन गोमेरुं पूर्ववददेत् ॥ २६ ॥ पट्टवस्त्रैर्भारमात्रैर्वस्त्रमेरुश्च मध्यतः ॥ शैलैर्द्वादशवस्त्रैश्च दत्त्वा तं चाक्षयं फलम् ॥ २७ ॥ घृतपञ्चसहस्रैश्च पलानामाज्यपर्वतः ॥ शतं पञ्चभिरेकैकपर्वतेऽस्मिन् हरिं यजेत् ॥ २८ ॥ विष्ण्वग्रे ब्राह्मणायार्प्य सर्वं प्राप्य हरिं व्रजेत् ॥ एवं च खण्डमेरुं च कृत्वा दत्त्वामुयात्फलम् ॥ २९ ॥ धान्यमेरुः पञ्चसारिः पर एकैकसारिकाः ॥ स्वर्णत्रिशृङ्गकाः सर्वे ब्रह्मविष्णुमहेश्वरान् ॥ ३० ॥ सर्वेषु पूज्य विष्णुं वा विशेषादक्षयं फलम् ॥

एवं दशांशमानेन तिलमेरुं प्रकल्पयेत् ॥ ३१ ॥ शृङ्गाणि पूर्ववत्तस्य तथैवान्यनगेषु च ॥ तिलमेरुं प्रदायाथ बन्धुभिर्विष्णुलोक-
भाक् ॥ ३२ ॥ नमो विष्णुस्वरूपाय धराधाराय वै नमः ॥ ब्रह्मविष्ण्वीशशृङ्गाय धरानाभिस्थिताय च ॥ ३३ ॥ नगद्वादशनाथाय
सर्वपापापहारिणे ॥ विष्णुभक्ताय शान्ताय त्राणं मे कुरु सर्वथा ॥ ३४ ॥ निष्पापः पितृभिः सार्द्धं विष्णुं गच्छामि ओं नमः ॥ त्वं हरिस्तु
हरेरग्रे अहं विष्णुश्च विष्णवे ॥ निवेदयामि भक्त्या तु भुक्तिमुक्त्यर्थहेतवे ॥ ३५ ॥ इत्यादिमहापुराणे आग्नेये मेरुदानानि नाम द्वाद-
शाधिकद्वीशततमोऽध्यायः ॥ २१२ ॥ अथ पृथ्वीदानानि ॥ अग्निरुवाच ॥ पृथ्वीदानं प्रवक्ष्यामि पृथिवी त्रिविधा मता ॥ शतकोटि-
योजनानां सप्तद्वीपा ससागरा ॥ १ ॥ जम्बूद्वीपावधिः सा च ह्युत्तमा मेदिनीरिता ॥ उत्तमां पञ्चभिर्भारैः काञ्चनैश्च प्रकल्पयेत् ॥ २ ॥
तदर्द्धान्तरजं कूर्मं तथा पद्मं समादिशेत् ॥ उत्तमा कथिता पृथ्वीद्रचंशेनैव तु मध्यमा ॥ ३ ॥ कनीयसी त्रिभागेन त्रिहान्या कूर्म-
पङ्कजे ॥ पलानां तु सहस्रेण कल्पयेत्कल्पपादपम् ॥ ४ ॥ मूलदण्डं सपत्रं च फलपुष्पसमन्वितम् ॥ पञ्चस्कन्धं तु सङ्कल्प्य पञ्चानां
दापयेत्सुधीः ॥ ५ ॥ एतद्दाता ब्रह्मलोके पितृभिर्मोदते चिरम् ॥ विष्णवग्रे कामधेनुं तु पलानां पञ्चभिः शतैः ॥ ६ ॥ ब्रह्मविष्णुम-
हेशाद्या देवा धेनौ व्यवस्थिताः ॥ धेनुदानं सर्वदानं सर्वदं ब्रह्मलोकदम् ॥ ७ ॥ विष्णवग्रे कपिलां दत्त्वा तारयेत्सकलं कुलम् ॥
अलङ्कृत्य स्त्रियं दद्यादश्वमेधफलं लभेत् ॥ ८ ॥ भूमिं दत्त्वा सर्वभाक्स्यात्सर्वसस्यप्ररोहिणिम् ॥ ग्रामं वाथ पुरं वापि खेटकं च
ददत्सुखी ॥ कार्तिक्यादौ वृषोत्सर्गं कुर्वन्नारयते कुलम् ॥ ९ ॥ इत्यादिमहापुराणे आग्नेये पृथ्वीदानानि नाम त्रयोदशाधिकद्विशत-
तमोऽध्यायः ॥ २१३ ॥ अथ मन्त्रमाहात्म्यकथनम् ॥ अग्निरुवाच ॥ नाडीचक्रं प्रवक्ष्यामि यज्ज्ञानाज्ज्ञायते हरिः ॥ नाभेरधस्ताद्य-
त्कन्दमङ्कुरास्तत्र निर्गताः ॥ १ ॥ द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ॥ निर्य्यगूर्ध्वमधश्चैव व्याप्तं ताभिः समन्ततः ॥ २ ॥ चक्र-
वत्संस्थिता ह्येताः प्रधाना दश नाडयः ॥ इडा च पिङ्गला चैव सुषुम्णा च तथैव च ॥ ३ ॥ गान्धारी हस्तिजिह्वा च पृथा चैव यशा
यथा ॥ अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥ ४ ॥ दश प्राणहरा ह्येता नाडयः परिकीर्त्तिताः ॥ प्राणोऽपानः समानश्चोदान-
व्यानौ च वायवः ॥ ५ ॥ नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ प्राणस्तु प्रथमो वायुर्दशानामपि स प्रभुः ॥ ६ ॥ प्राणः प्राणयते

प्राणं विसर्गात्पूरणं प्राति ॥ नित्यमापूरयत्येष प्राणिनामुरासि स्थितः ॥ ७ ॥ निःश्वासोच्छ्वासकासैस्तु प्राणो जीवसमाश्रितः ॥ प्रयाणं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्त्तितः ॥ ८ ॥ अधो नयत्यपानस्तु आहारं च नृणामधः ॥ मूत्रशुक्रवहो वायुरपानस्तेन कीर्त्तितः ॥ ९ ॥ पीत-भक्षितमाघ्रातं रक्तपित्तकफानिलम् ॥ समं नयति गात्रेषु समानो नाम मारुतः ॥ १० ॥ स्पन्दयत्यधरं वक्त्रं नेत्ररागप्रकोपनम् ॥ उद्वेजयति मर्माणि उदानो नाम मारुतः ॥ ११ ॥ व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ॥ प्रतिदानं तथा कण्ठाद्व्यापनाद्व्यान उच्यते ॥ १२ ॥ उद्गारे नाग इत्युक्तः कूर्मश्चोन्मीलने स्थितः ॥ कृकरो भक्षणे चैव देवदत्तो विजृम्भिते ॥ १३ ॥ धनञ्जयः स्थितो घोषे मृतस्यापि न मुञ्चति ॥ जीवः प्रयाति दशधा नाडीचक्रं हि तेन तत् ॥ १४ ॥ संक्रान्तिर्विषुवं चैव ह्यहोरात्रायनानि च ॥ अधिमास ऋणं चैव ह्यूनरात्रं धनं तथा ॥ १५ ॥ ऊनरात्रं भवेद्धिक्का ह्यधिमासो विजृम्भिका ॥ ऋणं चात्र भवेत्कासो विश्वासो धनमुच्यते ॥ १६ ॥ उत्तरं दक्षिणं ज्ञेयं वामं दक्षिणसञ्ज्ञितम् ॥ मध्ये तु विषुवं प्रोक्तं पुटद्वयविनिःसृतम् ॥ १७ ॥ संक्रान्तिः पुनरस्यैव स्वस्थानान्त्था-नयोगतः ॥ सुषुम्णा मध्यमे ह्यङ्गे इडा वामे प्रतिष्ठिता ॥ १८ ॥ पिङ्गला दक्षिणे विप्र ऊर्ध्वं प्राणो ह्यहः स्मृतम् ॥ अपानो रात्रिरेवं स्यादेको वायुर्दशात्मकः ॥ १९ ॥ आयामो देहमध्यस्थः सोमग्रहणमिष्यते ॥ देहातितत्त्वमायाममादित्यग्रहणं विदुः ॥ २० ॥ उदरं पूरयेत्तावद्वायुना यावदीप्सितम् ॥ प्राणायामो भवेदेष पूरको देहपूरकः ॥ २१ ॥ पिधाय सर्वद्वाराणि निःश्वासोच्छ्वासवर्जितः ॥ सम्पू-र्णकुम्भवत्तिष्ठेत्प्राणायामः स कुम्भकः ॥ २२ ॥ मुञ्चेद्वायुं ततस्तूर्ध्वं श्वासेनैकेन मन्त्रवित् ॥ उच्छ्वासयोगयुक्तश्च वायुमूर्ध्वं विरेचयेत् ॥ २३ ॥ उच्चरति स्वयं यस्मात्स्वदेहावस्थितः शिवः ॥ तस्मात्तत्त्वविदां चैव स एव जप उच्यते ॥ २४ ॥ अयुते द्वे सहस्रैकं षट्श-तानि तथैव च ॥ अहोरात्रेण योगीन्द्रो जपसंख्यां करोति सः ॥ २५ ॥ अजपा नाम गायत्री ब्रह्मविष्णुमहेश्वरी ॥ अजपां जपते यस्तां पुनर्जन्म न विद्यते ॥ २६ ॥ चन्द्राग्निरविसंयुक्ता आद्या कुण्डलिनी मता ॥ हृत्प्रदेशे तु सा ज्ञेया अङ्कुराकारसंस्थिता ॥ २७ ॥ सृष्टिन्यासो भवेत्तत्र स वै सर्गावलम्बनात् ॥ स्रवन्तं चिन्तयेत्तस्मिन्नमृतं सात्त्विकोत्तमः ॥ २८ ॥ देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः ॥ हंसहंसेति यो ब्रूयाद्धंसो देवः सदाशिवः ॥ २९ ॥ तिलेषु च यथा तैलं पुष्पे गन्धः समाश्रितः ॥ पुरुषस्य तथा देहे स

बाह्याभ्यन्तरं स्थितः ॥ ३० ॥ ब्रह्मणो हृदये स्थानं कण्ठे विष्णुः समाश्रितः ॥ तालुमध्ये स्थितो रुद्रो ललाटे तु महेश्वरः ॥ ३१ ॥
प्राणाग्रं तु शिवं विद्यात्तस्यान्ते तु परापरम् ॥ पञ्चधा सकलः प्रोक्तो विपरीतस्तु निष्कलः ॥ ३२ ॥ प्रासादं नादमुत्थाप्य सततं तु
जपेद्यदि ॥ षण्मासात्सिद्धिमाप्नोति योगयुक्तो न संशयः ॥ ३३ ॥ गमागमस्य ज्ञानेन सर्वपापक्षयो भवेत् ॥ अणिमादिगुणैश्वर्य्यं
षड्भिर्मासैरवाप्नुयात् ॥ ३४ ॥ स्थूलः सूक्ष्मः परश्चेति प्रासादः कथितो मया ॥ ह्रस्वो दीर्घः प्लुतश्चेति प्रासादं
लक्षयेत्त्रिधा ॥ ३५ ॥ ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत् ॥ आप्यायने प्लुतश्चेति मूर्ध्नि बिन्दुविभूषितः ॥ ३६ ॥
आदावन्ते च ह्रस्वस्य फट्कारो मारणे हितः ॥ आदावन्ते च हृदयमाकृष्टौ सम्प्रकीर्त्तितम् ॥ ३७ ॥ देवस्य दक्षिणां
मूर्त्तिं पञ्चलक्षं स्थितो जपेत् ॥ जपान्ते घृतहोमस्तु दशसाहस्रिको भवेत् ॥ ३८ ॥ एकमाप्यायितो मन्त्रो वश्योच्चाटादि
कारयेत् ॥ ऊर्ध्वे शून्यमधः शून्यं मध्ये शून्यं निरामयम् ॥ ३९ ॥ त्रिशून्यं यो विजानाति मुच्यतेऽसौ ध्रुवं द्विजः ॥ प्रासादं यो न
जानाति पञ्चमन्त्रमहातनुम् ॥ ४० ॥ अष्टत्रिंशत्कलायुक्तं न स आचार्य्य उच्यते ॥ तथोङ्कारं च गायत्रीं रुद्रादीन्वेत्त्यसौ गुरुः ॥ ४१ ॥

इत्यादिमहापुराणे आग्नेये मन्त्रमाहात्म्यं नाम चतुर्दशाऽधिकद्विशततमोऽध्यायः ॥ २१४ ॥ अथ मन्त्र्याविधिः ॥ अग्निरुवाच ॥ ओङ्कारं
यो विजानाति स योगी स हरिः पुमान् ॥ ओङ्कारमभ्यसेत्तस्मान्मन्त्रसारं तु सर्वदम् ॥ १ ॥ सर्वमन्त्रप्रयोगेषु प्रणवः प्रथमः स्मृतः ॥
तेन सम्परिपूर्णं यत्तत्पूर्णं कर्म नेतरत् ॥ २ ॥ ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ॥ त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्
॥ ३ ॥ योऽधीतेऽहन्यहन्येतास्त्रीणि वर्षाण्यनन्द्रितः ॥ स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान् ॥ ४ ॥ एकाक्षरं परं ब्रह्म प्राणायामा-
त्परन्तपः ॥ सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥ ५ ॥ सप्तावर्त्ता पापहरा दशभिः प्रापयेद्दिवम् ॥ विंशावर्त्ता तु सा देवी
नयते हीश्वरालयम् ॥ ६ ॥ अष्टोत्तरशतं जप्त्वा तीर्णः संसारसागरात् ॥ रुद्रकूष्माण्डजप्येभ्यो गायत्री तु विशिष्यते ॥ ७ ॥ न गायत्र्याः
परं जप्यं न व्याहृतिसमं हुतम् ॥ गायत्र्याः पादमप्यर्द्धमृगर्धमृचमेव वा ॥ ८ ॥ ब्रह्महत्या सुरापानं सुवर्णस्तेयमेव च ॥ गुरुदारागमश्चैव
जप्येनैव पुनाति सा ॥ ९ ॥ पापे कृते तिलैर्होमो गायत्र्याजप ईरितः ॥ जप्त्वा सहस्रं गायत्र्या उपवासी स पापहा ॥ १० ॥ गोघ्नः पितृघ्नो

मातृघ्नो ब्रह्महा गुरुतल्पगः ॥ ब्रह्मघ्नः स्वर्णहारी च सुरापो लक्षजप्यतः ॥ ११ ॥ शुध्यते वाऽथ वा स्नात्वा शतमन्तर्जले जपेत् ॥ अपः शतेन पीत्वा तु गायत्र्याः पापहा भवेत् ॥ १२ ॥ शतं जप्ता तु गायत्री पापौघशमनी स्मृता ॥ सहस्रजप्ता सा देवी ह्युपपातकनाशिनी ॥ १३ ॥ अभीष्टदा कोटिजप्ता देवत्वं राजतामियात् ॥ ओङ्कारं पूर्वमुच्चार्य्य भूर्भुवः स्वस्तथैवच ॥ १४ ॥ गायत्री प्रणवश्चान्ते जपे चैवमुदाहृतम् ॥ विश्वामित्र ऋषिश्छन्दो गायत्रं सविता तथा ॥ १५ ॥ देवतोपनये जप्ये विनियोगो हुते तथा ॥ अग्निर्वायू रविर्विद्युद्यमो जलपतिर्गुरुः ॥ १६ ॥ पर्जन्य इन्द्रो गन्धर्वः पूषा च तदनन्तरम् ॥ मित्रोऽथ वरुणस्त्वष्टा वसवो मरुतः शशी ॥ १७ ॥ अङ्गिरा विश्वे नासत्यौ कस्तथा सर्वदेवताः ॥ रुद्रो ब्रह्मा च विष्णुश्च क्रमशोऽक्षरदेवताः ॥ १८ ॥ गायत्र्या जपकाले तु कथिताः पापनाशनाः ॥ पादाङ्गुष्ठौ च गुल्फौ च नलकौ जानुनी तथा ॥ १९ ॥ जंघे शिश्नश्च वृषणौ कटिर्नाभिस्तथोदरम् ॥ स्तनौ च हृदयं ग्रीवा मुखं तालु च नासिके ॥ २० ॥ चक्षुषी च भ्रुवोर्मध्यं ललाटं पूर्वमाननम् ॥ दक्षिणोत्तरपार्श्वे द्वे शिर आस्यमनुक्रमात् ॥ २१ ॥ पीतः श्यामश्च कपिलो मरकतोऽग्निसन्निभः ॥ रुक्मविद्युद्भ्रकृष्णरक्तगौरेन्द्रनीलभाः ॥ २२ ॥ स्फाटिकस्वर्णपाण्ड्राभाः पद्मरागोऽखिलद्युतिः ॥ हेमधूम्ररक्तनीलरक्तकृष्णसुवर्णभाः ॥२३॥ शुक्लकृष्णपलाशाभा गायत्र्या वर्णकाः क्रमात् ॥ ध्यानकाले पापहरा हुतैषा सर्वकामदा ॥ २४ ॥ गायत्र्या तु तिलैर्होमः सर्वपापप्रणाशनः ॥ शान्तिकामो यवैः कुर्य्यादायुष्कामो घृतेन च ॥ २५ ॥ सिद्धार्थकैः कर्मसिद्ध्यै पयसा ब्रह्मवर्चसे ॥ पुत्रकामस्तथा दध्ना धान्यकामस्तु शालिभिः ॥ २६ ॥ क्षीरिवृक्षसमिद्भिस्तु ग्रहपीडोपशान्तये ॥ धनकामस्तथा बिल्वैः श्रीकामः कमलैस्तथा ॥ २७ ॥ आरोग्यकामो दूर्वाभिर्गुरूत्पाते स एव हि ॥ सौभाग्येच्छुर्गुग्गुलुना विद्यार्थी पायसेन च ॥ २८ ॥ अयुतेनोक्तसिद्धिः स्याल्लक्षेण मनसेप्सितम् ॥ कोट्या ब्रह्मवधान्मुक्तः कुलोद्धारी हरिर्भवेत् ॥ २९ ॥ ग्रहयज्ञमुखो वापि होमोऽयुतमुखोऽर्थकृत् ॥ आवाहनं च गायत्र्यास्तत ओंकारमभ्यसेत् ॥ ३० ॥ स्मृत्वोङ्कारं तु गायत्र्या निबध्नीयाच्छिखां ततः ॥ पुनराचम्य हृदयं नाभिं स्कन्धौ च संस्पृशेत् ॥ ३१ ॥ प्रणवस्य ऋषिर्ब्रह्म गायत्रीच्छन्द एव च ॥ देवोऽग्निः परमात्मा स्याद्योगो वै सर्वकर्मसु ॥ ३२ ॥ शुक्ला चाग्निमुखी दिव्या कात्यायनसगोत्रजा ॥ त्रैलोक्यवरणा दिव्या पृथिव्याधारसंयुता ॥ अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥ ३३ ॥ ओं तेजोऽसि

महोऽसि बलमसि भ्राजोऽसि देवानान्धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः ओं आभि भूः ॥ आगच्छ वरदे देवि जप्ये मे
सन्निधौ भव ॥ ३४ ॥ व्याहृतीनां तु सर्वासामृषिरेव प्रजापतिः ॥ व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति ॥ ३५ ॥ विश्वामित्रो
जमदग्निर्भरद्वाजोऽथ गौतमः ॥ ऋषिरत्रिर्वशिष्ठश्च काश्यपश्च यथाक्रमम् ॥ ३६ ॥ अग्निर्वायू रविश्चैव वाक्पतिर्वरुणस्तथा ॥ इन्द्रो
विष्णुर्व्याहृतीनां देवतानि यथाक्रमम् ॥ ३७ ॥ गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ त्रिष्टुप् च जगती चेति छन्दांस्याहुरनुक्रमात्
॥ ३८ ॥ विनियोगो व्याहृतीनां प्राणायामे च होमके ॥ आपोहिष्ठेत्यृचा चापां द्रुपदादीति वा स्मृता ॥ ३९ ॥ तथा हिरण्यवर्णाभिः
पावमानीभिरन्ततः ॥ विप्रुषोऽष्टौ क्षिपेदूर्ध्वमाजन्मकृतपापाजित् ॥ ४० ॥ अन्तर्जले ऋतञ्चेति जपेत्त्रिरघमर्षणम् ॥ आपोहिष्ठेतिऋ-
चस्य सिन्धुद्वीप ऋषिः स्मृतः ॥ ४१ ॥ ब्राह्मस्नानाय छन्दोऽस्य गायत्री देवता जलम् ॥ मार्जने विनियोगोऽस्य ह्यावभृथके क्रतोः
॥ ४२ ॥ अघमर्षणसूक्तस्य ऋषिरेवाघमर्षणम् ॥ अनुष्टुप् च भवेच्छन्दो भाववृत्तस्तु दैवतम् ॥ ४३ ॥ आपोज्योती रस इति गाय-
त्र्यास्तु शिरः स्मृतम् ॥ ऋषिः प्रजापतिस्तस्य छन्दोहीनं यजुर्यतः ॥ ४४ ॥ ब्रह्माग्निवायुसूर्य्याश्च देवताः परिकीर्तिताः ॥
प्राणरोधात्तु वायुः स्याद्वायोरग्निश्च जायते ॥ ४५ ॥ अग्नेरापस्ततः शुद्धिस्ततश्चाचमनं चरेत् ॥ अन्तश्चरति भूतेषु गुहायां
विश्वमूर्तिषु ॥ ४६ ॥ तपोयज्ञवषट्कार आपोज्योती रसोऽमृतम् ॥ उदुत्यं जातवेदसमृषिः प्रष्कण्व उच्यते ॥ ४७ ॥
गायत्रीच्छन्द आख्यातं सूर्य्यश्चैव तु दैवतम् ॥ अनिरात्रे नियोगः स्यादग्नीषोमो नियोगकः ॥ ४८ ॥ चित्रं देवेति ऋचि च
ऋषिः कौत्स उदाहृतः ॥ त्रिष्टुप्छन्दो दैवतं च सूर्योऽस्याः परिकीर्तितम् ॥ ४९ ॥ इत्यादिमहापुराणे आग्नेये सन्ध्या-
विधिर्नाम पञ्चदशाऽधिकद्विशततमोऽध्यायः ॥ २१५ ॥ अथ गायत्रीनिर्वाणम् ॥ अग्निरुवाच ॥ एवं सन्ध्याविधिं कृत्वा गायत्रीं
च जपेत्स्मरेत् ॥ गायच्छिप्यान्यतस्त्रायेद्वाय्यौ प्राणांस्तथैव च ॥ १ ॥ ततः स्मृतेयं गायत्री सावित्रीयं ततो यतः ॥ प्रकाशनात्सा सवि-
तुर्वाग्रूपत्वात्सरस्वती ॥ २ ॥ तज्ज्योतिः परमं ब्रह्म भर्गस्तेजो यतः स्मृतम् ॥ भा दीप्तावीति रूपं हि भ्रस्ज पाकेऽथ तत्स्मृतम् ॥ ३ ॥
ओषध्यादिकं पचति भ्राजृ दीप्तौ तथा भवेत् ॥ भर्गः स्याद्भ्राजन इति बहुलं छन्द ईरितम् ॥ ४ ॥ वरेण्यं सर्वतेजोभ्यः श्रेष्ठं वै परमं

पदम् ॥ स्वर्गापवर्गकामैर्वा वरणीयं सदैव हि ॥ ५ ॥ वृणोतेर्वरणार्थत्वाज्जाग्रत्स्वप्नादिवर्जितम् ॥ नित्यशुद्धबुद्धमेकं सत्यं नं धीमहीश्वरम् ॥ ६ ॥ अहं ब्रह्म परं ज्योतिर्द्धर्यायेमहि विमुक्तये ॥ तज्ज्योतिर्भगवान्विष्णुर्जगज्जन्मादिकारणम् ॥ ७ ॥ शिवं केचित्पठन्ति स्म शक्तिरूपं पठन्ति च ॥ केचित्सूर्य्यं केचिदाग्निं वेदगा अग्निहोत्रिणः ॥ ८ ॥ अग्न्यादिरूपी विष्णुर्हि वेदादौ ब्रह्म गीयते ॥ तत्पदं परमं विष्णोर्देवस्य सवितुः स्मृतम् ॥ ९ ॥ महदाज्यं सूयते हि स्वयं ज्योतिर्हरिः प्रभुः ॥ पर्जन्यो वायुरादित्यः शीतोष्णाद्यैश्च पाचयेत् ॥ १० ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ११ ॥ दवानेवा धीमहीति मनसा धारयेमहि ॥ नोऽस्माकं यश्च भर्गश्च सर्वेषां प्राणिनां धियः ॥ १२ ॥ चोदयात्प्रेरयेद्बुद्धीर्भोक्तॄणां सर्वकर्मसु ॥ दृष्टादृष्टविपाकेषु विष्णुसूर्य्याग्निरूपवान् ॥ १३ ॥ ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥ ईशावास्यमिदं सर्वं महदादिजगद्धरिः ॥ १४ ॥ स्वर्गाद्यैः क्रीडने देवो योऽहं स पुरुषः प्रभुः ॥ आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः ॥ १५ ॥ जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च ॥ ध्यानेन पुरुषोऽयं च द्रष्टव्यः सूर्य्यमण्डले ॥ १६ ॥ तत्त्वं सदासि चिद्ब्रह्म विष्णोर्यत्परमं पदम् ॥ देवस्य सवितुर्भर्गो वरेण्यं हि तुरीयकम् ॥ १७ ॥ देहादिजाग्रदाब्रह्म अहं ब्रह्मेति धीमहि ॥ योऽसावादित्यपुरुषः सोऽसावहमनन्त ओम् ॥ ज्ञानानि शुभकर्मादीन्प्रवर्त्तयति यः सदा ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये गयत्रीनिर्वाणं नाम षोडशाधिकद्विशततमोध्यायः ॥२१६॥ पुनर्गायत्रीनिर्वाणम् ॥ अग्निरुवाच ॥ लिङ्गमूर्त्तिं शिवं स्तुत्वा गायत्र्या योगमाप्तवान् ॥ निर्वाणं परमं ब्रह्म वसिष्ठोऽन्यश्च शङ्करात् ॥ १ ॥ नमः कनकलिङ्गाय वेदलिङ्गाय वै नमः ॥ नमः परमलिङ्गाय व्योमलिङ्गाय वै नमः ॥ २ ॥ नमः सहस्रलिङ्गाय वह्निलिङ्गाय वै नमः ॥ नमः पुराणलिङ्गाय श्रुतिलिङ्गाय वै नमः ॥ ३ ॥ नमः पातललिङ्गाय ब्रह्मलिङ्गाय वै नमः ॥ नमो रहस्यलिङ्गाय सप्तद्वीपोर्ध्वलिङ्गिने ॥ ४ ॥ नमः सर्वात्मलिङ्गाय सर्वलोकाङ्गलिङ्गिने ॥ नमस्त्वव्यक्तलिङ्गाय बुद्धिलिङ्गाय वै नमः ॥ ५ ॥ नमोऽहङ्कारलिङ्गाय भूतलिङ्गाय वै नमः ॥ नम इन्द्रियलिङ्गाय नमस्तन्मात्रलिङ्गिने ॥ ६ ॥ नमः पुरुषलिङ्गाय भावलिङ्गाय वै नमः ॥ नमो रजोर्द्धलिङ्गाय सत्त्वलिङ्गाय वै नमः ॥ ७ ॥ नमस्ते भवलिङ्गाय नमस्त्रैगुण्यलिङ्गिने ॥ नमोऽनागतलिङ्गाय तेजोलिङ्गाय वै नमः ॥ ८ ॥ नमो वायूर्द्धलिङ्गाय श्रुतिलिङ्गाय वै नमः ॥ नमस्तेऽथर्वलिङ्गाय सामलिङ्गाय वै

नमः ॥९॥ नमो यज्ञाङ्गलिङ्गाय यज्ञलिङ्गाय वै नमः ॥ नमस्ते तत्त्वलिङ्गाय देवानुगतलिङ्गिने ॥१०॥ दिश नः परमं योगमपत्यं मत्समं तथा ॥ ब्रह्म चैवाक्षयं देव शमं चैव परं विभो ॥ ११ ॥ अक्षयं त्वं च वंशस्य धर्मे च मतिमक्षयाम् ॥ अग्निरुवाच ॥ वासिष्ठेन स्तुतः शम्भुस्तुष्टः श्रीपर्वते पुरा ॥ वसिष्ठाय वरं दत्त्वा तत्रैवान्तरधीयत ॥ १२ ॥ इत्यादिमहापुराणे आग्नेये गायत्रीनिर्वाणलिङ्गस्तोत्रं नाम सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥ अथ राजाभिषेककथनम् ॥ अग्निरुवाच ॥ पुष्करेण च रामाय राजधर्मं हि पृच्छते ॥ यथादौ कथितं तद्वसिष्ठ कथयामि ते ॥ १ ॥ पुष्कर उवाच ॥ राजधर्मं प्रवक्ष्यामि सर्वस्माद्राजधर्मतः ॥ राजा भवेच्छत्रुहन्ता प्रजापालः सुदण्डवान् ॥ २ ॥ पालयिष्यति वः सर्वान्धर्मस्थान्व्रतमाचरेत् ॥ संवत्सरं स वृणुयात्पुरोहितमथ द्विजम् ॥ ३ ॥ मन्त्रिणश्चाखिलात्मज्ञान्महिषीं धर्मलक्षणाम् ॥ संवत्सरं नृपः काले ससम्भारोऽभिषेचनम् ॥ ४ ॥ कुर्यान्मृते नृपे नात्र कालस्य नियमः स्मृतः ॥ तिलैः सिद्धार्थकैः स्नानं सांवत्सरपुरोहितौ ॥ ५ ॥ घोषयित्वा जयं राज्ञो राजा भद्रासने स्थितः ॥ अभयं घोषयेद्दुर्गान्मोचयेद्राज्यपालके ॥ ६ ॥ पुरोधसाऽभिषेकात्प्राक्काय्यैन्द्री शान्तिरेव च ॥ उपवास्याभिषेकाह्ने वेद्यग्नौ जुहुयान्मनून् ॥ ७ ॥ वैष्णवानैन्द्रमन्त्रांस्तु सावित्रान् वैश्वदैवतान् ॥ सौम्यान्स्वस्त्ययनं शमं आयुष्याभयदान्मनून् ॥ ८ ॥ अपराजितां च कलशं वह्नेर्दक्षिणपार्श्वगम् ॥ सम्पातवन्तं हेमं च पूजयेद्गन्धपुष्पकैः ॥ ९ ॥ प्रदक्षिणावर्त्तशिखस्तप्तजाम्बूनदप्रभः ॥ रथौघमेघनिर्घोषो विधूमश्च हुताशनः ॥ १० ॥ अनुलोमः सुगन्धश्च स्वस्तिकाकारसन्निभः ॥ प्रसन्नार्चिर्महाज्वालः स्फुलिङ्गरहितो हितः ॥ ११ ॥ न व्रजेयुश्च मध्येन मार्जारमृगपक्षिणः ॥ पर्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः ॥ १२ ॥ वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात् ॥ इन्द्रालयमृदा ग्रीवां हृदयं तु नृपालिरात् ॥ १३ ॥ करिदन्तोद्धृतमृदा दक्षिणं तु तथा भुजम् ॥ वृषशृङ्गोद्धृतमृदा वामं चैव तथा भुजम् ॥ १४ ॥ सरोमृदा तथा पृष्ठमुदरं संगमान्मृदा ॥ नदीतटद्वयमृदा पार्श्वे संशोधयेत्तथा ॥ १५ ॥ वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते ॥ यज्ञस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा ॥ १६ ॥ अश्वस्थानात्तथा जङ्घे रथचक्रमृदांघ्रिके ॥ मूर्द्धानं पञ्चगव्येन भद्रासनगतं नृपम् ॥ १७ ॥ अभिषिञ्चेदमात्यानां चतुष्टयमथो घटैः ॥ पूर्वतो हेमकुम्भेन घृतपूर्णेन ब्राह्मणः ॥ १८ ॥ रूप्यकुम्भेन याम्ये च क्षीरपूर्णेन क्षत्रियः ॥ दध्ना च ताम्रकुम्भेन वैश्यः पश्चि-

मगेन च ॥ १९ ॥ मृन्मयेन जलेनोदक् शूद्रामात्योऽभिषेचयेत् ॥ ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः ॥ २० ॥ कुर्वीत मधुना विप्र-श्छन्दोगश्च कुशोदकैः ॥ सम्पानवन्तं कलशं तथा गत्वा पुरोहितः ॥ २१ ॥ विधाय वह्निरक्षां तु सदस्येषु यथाविधि ॥ राजश्रियाभि-षेके च ये मन्त्राः परिकीर्तिताः ॥ २२ ॥ तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वनैस्तथा ॥ ततः पुरोहितो गच्छेद्वेदिमूलं न-देव तु ॥ २३ ॥ शतच्छिद्रेण पात्रेण सौवर्णेनाभिषेचयेत् ॥ या ओषधीत्योषधीभिरथेयुक्त्वेति गन्धकैः ॥ २४ ॥ पुष्पैः पुष्पवतीत्येव ब्राह्मणेति च बीजकैः ॥ रत्नैराशुः शिशानश्च ये देवाश्च कुशोदकैः ॥२५॥ यजुर्वेद्यथर्ववेदी गन्धद्वारेति संस्पृशेत् ॥ शिरः कण्ठं रोचनया सर्वतीर्थोदकैर्द्विजाः ॥ २६ ॥ गीतवाद्यादिनिर्घोषैश्चामरव्यजनादिभिः ॥ सर्वौषधिमयं कुम्भं धारयेयुर्नृपाग्रतः ॥ २७ ॥ तं पश्येद्दर्पणं राजा घृतं वै मङ्गलादिकम् ॥ अभ्यर्च्य विष्णुं ब्रह्माणमिन्द्रादींश्च ग्रहेश्वरान् ॥ २८ ॥ व्याघ्रचर्मोत्तरां शय्यामुपविष्टः पुरोहितः ॥ मधुपर्कादिकं दत्त्वा पट्टबन्धं प्रकारयेत् ॥ २९ ॥ राज्ञो मुकुटबन्धं च पञ्चचर्मोत्तरं ददेत् ॥ ध्रुवाद्यौरिति च विशेद्वृषभं वृषदंशजम् ॥ ॥ ३० ॥ द्वीपिजं सिंहजं व्याघ्रजातं चर्म तदासने ॥ अमात्यसचिवादींश्च प्रतीहारः प्रदर्शयेत् ॥ ३१ ॥ गोऽजाविगृहदानाद्यैः सांवत्स-रपुरोहितौ ॥ पूजयित्वा द्विजान्प्राच्यं ह्यन्याम्भूगोऽन्नमुख्यकैः ॥ ३२ ॥ वह्निं प्रदक्षिणीकृत्य गुरुं नत्वाथ पृष्ठतः ॥ वृषमालभ्य गां वत्सां पूजयित्वाथ मन्त्रितम्॥३३॥अश्वमारुह्य नागं च पूजयेत्तं समारुहेत् ॥ परिभ्रमेद्राजमार्गे बलयुक्तः प्रदक्षिणम्॥ पुरं विशेच्च दानाद्यैः प्रार्च्य सर्वान्विसर्जयेत् ॥३४॥ इत्यादिमहापुराणे आग्नेये राजाऽभिषेको नामाष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ अथाभिषेकमन्त्राः ॥ पुष्कर उवाच ॥ राजदेवाद्यभिषेकमन्त्रान्वक्ष्येऽघमर्दनान् ॥ कुम्भात्कुशोदकैः सिञ्चेत्तेन सर्वं हि सिध्यति॥ १॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णुमहेश्वराः ॥ वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥२॥ भवन्तु विजयायैते इन्द्राद्या दशदिग्गताः ॥ रुद्रो धर्मो मनुर्दक्षो रुचिः श्रद्धा च सर्वदा ॥३॥ भृगुरत्रिर्वसिष्ठश्च सनकश्च सनन्दनः॥ सनत्कुमारोऽङ्गिराश्च पुलस्त्यः पुलहः क्रतुः॥ ४ ॥ मरीचिः कश्यपः पान्तु प्रजेशाः पृथिवीपतिम् ॥ प्रभा सुरा बर्हिषदः ह्यग्निष्वात्ताश्च पान्तु ते ॥ ५ ॥ क्रव्यादाश्चोपहूताश्च ह्याज्यपाश्चसुकालिनः ॥ अग्निभिश्चाभिषिञ्चन्तु लक्ष्म्याद्या धर्मवल्लभाः॥६॥ आदित्याद्याः कश्यपस्य बहुपुत्रस्य वल्लभाः ॥ कृशाश्वस्याग्निपुत्रस्य भार्याश्चारिष्टनेमिनः ॥७॥ अश्विन्या-

द्याश्च चन्द्रस्य पुलहस्य तथा प्रियाः ॥ भूता च कपिशा दंष्ट्री सुरसा सरमा दनुः ॥ ८ ॥ श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुकी तथा ॥
पत्न्यस्त्वामभिषिञ्चन्तु अरुणश्चार्कसारथिः ॥ ९ ॥ आयतिर्नियती रात्रिर्निद्रा लोकास्थितौ स्थिताः ॥ उमा मेना शची पान्तु धूम्रोर्णा
निर्ऋतिर्जये ॥१०॥ गौरी शिवा च ऋद्धिश्च वेला या चैव नङ्गला ॥ असिक्नी च तथा ज्योत्स्ना देवपत्न्यो वनस्पतिः ॥ ११ ॥ महाकल्पश्च
कल्पश्च मन्वन्तरयुगानि च ॥ संवत्सराश्च वर्षाणि पान्तु त्वामयनद्वयम् ॥ १२ ॥ ऋतवश्च तथा मासाः पक्षा रात्र्यहनी तथा ॥ सन्ध्याति-
थिमुहूर्त्ताश्च कालस्यावयवाकृतिः ॥ १३ ॥ सूर्य्याद्याश्च ग्रहाः पान्तु मनुः स्वायम्भुवादिकः ॥ स्वायम्भुवः स्वारोचिष औत्तमिस्तामसो
मनुः ॥ १४ ॥ रैवतश्चाक्षुषः षष्ठो वैवस्वत इहेरितः ॥ सावर्णी ब्रह्मपुत्रश्च धर्मपुत्रश्च रुद्रजः ॥ १५ ॥ दक्षजो रौच्यभौत्यौ च मनवस्तु
चतुर्दश ॥ विश्वभुक् च विपश्चिच्च सुचित्तिश्च शिखी विभुः ॥ १६ ॥ मनोजवस्तथौजस्वी बलिरद्भुतशान्तयः ॥ वृषश्च ऋतधामा च दिवः-
स्पृक् कविरिन्द्रकः ॥१७॥ रैवन्तश्च कुमारश्च तथा वत्सविनायकः ॥ वीरभद्रश्च नन्दी च विश्वकर्मा पुरोजवः॥१८॥ एते त्वामभिषिञ्चन्तु
सुरमुख्याः समागताः ॥ नासत्यौ देवभिषजौ ध्रुवाद्या वसवोऽष्ट च॥१९॥ दश चाङ्गिरसो वेदास्त्वाभिषिञ्चन्तु सिद्धये ॥ आत्मा ह्यायुर्मनो
दक्षो मदः प्राणस्तथैव च ॥ २० ॥ हविष्मांश्च गरिष्ठश्च ऋतः सत्यश्च पान्तु वः ॥ ऋतुर्दक्षो वसुः सत्यः कालकामो धुरिर्जये ॥ २१ ॥
पुरूरवा माद्रवाश्च विश्वेदेवाश्च रोचनः ॥ अङ्गारकाद्याः सूर्य्यस्त्वां निर्ऋतिश्च तथा यमः ॥ २२ ॥ अजैकपादहिर्बुध्न्यो धूमकेतुश्च
रुद्रकः ॥ भरतश्च तथा मृत्युः कापालिरथ किङ्किणिः ॥ २३ ॥ भवनो भावनः पान्तु स्वजन्यः स्वजनस्तथा ॥ ऋतुश्रवाश्च मूर्द्धा च
याजनोऽभ्युशनास्तथा ॥२४॥ प्रसवश्चाव्ययश्चैव दक्षश्च भृगवः सुराः ॥ मनोऽनुमन्ता प्राणश्च नवोपानश्च वीर्य्यवान् ॥२५॥ वीतिहोत्रो
नयः साध्यो हंसो नारायणोऽचलु ॥ विभुश्चैव प्रभुश्चैव देवश्रेष्ठा जगद्धिताः ॥ २६ ॥ धाता मित्रोऽर्यमा पूषा शक्रोऽथ वरुणो भगः ॥ त्वष्टा
विवस्वान्सविता विष्णुर्दादश भास्कराः ॥ २७ ॥ एकज्योतिश्च द्विज्योतिस्त्रिज्योतिश्चतुज्योतिरेव च ॥ एकशृङ्गो द्विशृङ्गश्च त्रिशृङ्गश्च महाबलः
॥ २८ ॥ इन्द्रश्च मेत्यादिशतु ततः प्रतिमकृत्तथा ॥ मितश्च सम्मितश्चैव अमितश्च महाबलः ॥ २९ ॥ ऋतजित्सत्यजिच्चैव सुषेणः सेन-
जित्तथा ॥ अतिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥ ३० ॥ ऋतश्च ऋतवाग्धाता विधाता धारणो ध्रुवः ॥ विधारणो महातेजा वासवस्य

परः सखा ॥३१॥ईदृक्षश्चाप्यदृक्षश्च एतादृगमिताशनः॥ क्रीडितश्च सदृक्षश्च शरभश्च महातपाः॥३२॥धर्त्ता धुर्य्यो धुरिभींमो ह्यभिमुक्तोऽक्षपात्सह ॥ धृतिर्वसुरनाधृष्यो रामः कामो जयो विराट् ॥३३॥ देवा एकोनपञ्चाशन्मरुतस्त्वामवन्तु ते ॥ चित्राङ्गदश्चित्ररथः चित्रसेनश्च वै कलिः ॥ ३४ ॥ ऊर्णायुरुग्रसेनश्च धृतराष्ट्रश्च नन्दकः ॥ हाहा हूहूर्नारदश्च विश्वावसुश्च तुम्बुरुः ॥ ३५ ॥ एते त्वामभिषिञ्चन्तु गन्धर्वा विजयाय ते ॥ पान्तु ते कुरवो मुख्या दिव्याश्चाप्सरसां गणाः ॥ ३६ ॥ अनवद्या सुकेशी च मेनका सह जन्यया ॥ क्रतुस्थला घृताची च विश्वाची पुञ्जिकस्थला ॥३७॥ प्रम्लोचा चोर्वशी रम्भा पञ्चचूडा तिलोतमा ॥ चित्रलेखा लक्ष्मणा च पुण्डरीका च वारुणी ॥३८॥ प्रह्लादो विरोचनोऽथ बलिर्बाणोऽथ तत्सुताः॥एते चान्येऽभिषिञ्चन्तु दानवा राक्षसास्तथा ॥३९॥ हेतिश्चैव प्रहेतिश्च विद्युत्स्फूर्जथुरग्रकाः॥ यक्षः सिद्धात्मकः पातु मणिभद्रश्च नन्दनः ॥४०॥ पिङ्गाक्षो द्युतिमांश्चैव पुष्पवन्तो जयावहः ॥ शङ्खः पद्मश्च मकरः कच्छपश्च निधिर्जये ॥४१॥ पिशाचा ऊर्ध्वकेशाद्या भूता भूम्यादिवासिनः ॥ महाकालं पुरस्कृत्य नरसिंहं च मातरः ॥४२॥ गुहः स्कन्दो विशाखस्त्वां नैगमेयोऽभिषिञ्चतु ॥ डाकिन्यो याश्च योगिन्यः खेचरा भूचराश्च याः॥४३॥ गरुडश्चारुणः पान्तु सम्पातिप्रमुखाः खगाः ॥ अनन्ताद्या महानागाः शेषवासुकितक्षकाः ॥४४॥ ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥ शङ्खः ककोटकश्चैव धृतराष्ट्रो धनञ्जयः ॥ ४५ ॥ कुमदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ॥ सुप्रतीकोऽञ्जनोः नागाः पान्तु त्वां सर्वतः सदा॥४६॥पैतामहस्तथा हंसो वृषभः शङ्करस्य च ॥ दुर्गासिंहश्च पांतु त्वां यमस्य महिषस्तथा ॥ ४७ ॥ उच्चैःश्रवाश्चाश्वपतिस्तथा धन्वन्तरिः सदा ॥ कौस्तुभः शङ्खराजश्च वज्रं शूलं च चक्रकम् ॥ ४८ ॥ नन्दकोऽस्त्राणि रक्षन्तु धर्मश्च व्यवसायकः ॥ चित्रगुप्तश्च दण्डश्च पिङ्गलो मृत्युकालकौ ॥ ४९ ॥ वालखिल्यादिमुनयो व्यासवाल्मीकिमुख्यकाः ॥ पृथुर्दिलीपो भरतो दुष्यन्तः शक्रजिद्बली ॥ ५० ॥ मल्लः ककुत्स्थश्चानेन युवनाश्वो जयद्रथः ॥ मान्धाता मुचुकुन्दश्च पांन्तु त्वां च पुरूरवाः ॥ ५१ ॥ वास्तुदेवाः पञ्चविंशतत्त्वानि विजयाय ते ॥ रुक्मभौमः शिलाभौमः पातालो नीलमूर्त्तिकः ॥ ५२ ॥ पीतरक्तः क्षितिश्चैव श्वेतभौमो रसातलम् ॥ भूर्लोकोऽथ भुवर्मुख्या जम्बूद्वीपादयः प्रिये ॥ ५३ ॥ उत्तराः कुरवः पान्तु रम्या हिरण्यकस्तथा ॥ भद्राश्वः केतुमालश्च वर्षश्चैव बलाहकः ॥ ५४ ॥ हरिवर्षः किम्पुरुष इन्द्रद्वीपः कशेरुमान् ॥ ताम्रवर्णो गभास्तिमान्नागद्वीपश्च

सौम्यकः ॥ ५५ ॥ गन्धर्वो वरुणो यश्च नवमः पान्तु राज्यदः ॥ हिमवान्हेमकूटश्च निषधो नील एव च ॥ ५६ ॥ श्वेतश्च शृङ्गवान्मेरुर्मा-
ल्यवान्गन्धमादनः ॥ महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवान्गिरिः ॥ ५७ ॥ विन्ध्यश्च पारियात्रश्च गिरयः शान्तिदास्तु ते ॥ ऋग्वेदाद्याः
षडङ्गानि इतिहासपुराणकम् ॥ ५८ ॥ आयुर्वेदश्च गन्धर्वधनुर्वेदोपवेदकाः ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ ५९ ॥
छन्दोङ्गानि च वेदाश्च मीमांसा न्यायविस्तरः ॥ धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥ ६० ॥ माङ्गल्यं योगः पाशुपतं वेदा वै पाञ्च-
रात्रकम् ॥ कृतान्तपञ्चकं ह्येतद्गायत्री च शिवा तथा ॥ ६१ ॥ दुर्गा विद्या च गान्धारी पान्तु त्वां शान्तिदाश्च ते ॥ लवणेक्षुसुरासर्पिर्द-
धिदुग्धजलाब्धयः ॥ ६२ ॥ चत्वारः सागराः पान्तु तीर्थानि विविधानि च ॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषः परः ॥ ६३ ॥ गया-
शीर्षो ब्रह्मशिरस्तीर्थमुत्तरमानसम् ॥ कालोदको नन्दिकुण्डमग्नितीर्थं पञ्चनदमथा ॥ ६४ ॥ भृगुतीर्थं प्रभासं च तथा चामरकण्टकम् ॥
जम्बूमार्गश्च विमलः कपिलस्य तथाश्रमः ॥ ६५ ॥ गङ्गाद्वारकुशावर्तो विन्ध्यको नीलपर्वतः ॥ वराहपर्वतश्चैव तीर्थं कनखलं तथा ॥ ६६ ॥
कालञ्जरश्च केदारो रुद्रकोटिस्तथैव च ॥ वाराणसी महातीर्थं वदर्य्याश्रम एव च ॥ ६७ ॥ द्वारका श्रीगिरिस्तीर्थं तीर्थं च पुरुषोत्तमः ॥
शालग्रामोऽथ वाराहः सिन्धुसागरसङ्गमः ॥ ६८ ॥ फल्गुतीर्थं बिन्दुसरः करवीराश्रमस्तथा ॥ नद्यो गङ्गासरस्वत्यो शतद्रुर्गण्डकी तथा
॥ ६९ ॥ अच्छोदा च विपाशा च विनस्ता देविका नदी ॥ कावेरी वरुणा चैव निश्चिरा गोमती नदी ॥ ७० ॥ पारा चर्मण्वती रूपा मन्दा-
किनी महानदी ॥ तापी पयोष्णी वेणा च गौरी वैतरणी तथा ॥ ७१ ॥ गोदावरी भीमरथी तुङ्गभद्रारुणी तथा ॥ चन्द्रभागा शिवा गौरी
अभिषिञ्चन्तु पान्तु वः ॥ ७२ ॥ इत्यादिमहापुराणे आग्नेये अभिषेकमन्त्रा नामैकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥ अथ
राज्ञः सहायसम्पत्तिः ॥ पुष्कर उवाच ॥ सोऽभिषिक्तः सहामात्यो जयेच्छत्रूनृपोत्तमः ॥ राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियोऽथ
वा ॥ १ ॥ कुलीनो नीतिशास्त्रज्ञः प्रतीहारश्च नीतिवित् ॥ दूतश्च प्रियवादी स्यादक्षीणोऽतिबलान्वितः ॥ २ ॥ ताम्बूलधारी ना स्त्री वा
भक्तः क्लेशसहः प्रियः ॥ सन्धिविग्रहिकः कार्यः पाङ्गुण्यादिविशारदः ॥ ३ ॥ खड्गधारी रक्षकः स्यात्सारथिः स्याद्बलादिवित् ॥ सूदाध्यक्षो
हितो विज्ञो महानसगतो हि सः ॥ ४ ॥ सभासदस्तु धर्मज्ञा लेखकोऽक्षरविद्धितः ॥ आह्वानकालविज्ञाः स्युर्हिता दौवारिका जनाः ॥ ५ ॥

रत्नादिज्ञो धनाध्यक्ष अर्थद्वारे हितो नरः ॥ स्यादायुर्वेदविद्वैद्यो गजाध्यक्षोऽथ हस्तिवित् ॥ ६ ॥ जितश्रमो गजारोहो हयाध्यक्षो हयादिवित् ॥ दुर्गाध्यक्षो हितो धीमान्स्थपतिर्वास्तुवेदवित् ॥ ७ ॥ यन्त्रमुक्ते पाणिमुक्ते ह्यमुक्ते मुक्तधारिते ॥ अस्त्राचार्य्यो नियुद्धे च कुशलो नृपतेर्हितः ॥ ८ ॥ वृद्धश्चान्तःपुराध्यक्षः पञ्चाशद्वार्षिकस्त्रियः ॥ सप्तत्यब्दास्तु पुरुषाश्चरेयुः सर्वकर्मसु ॥ ९ ॥ आयत्स्यादायुधागारे ज्ञात्वा वृत्तिर्विधीयते ॥ उत्तमाधममध्यानि बुद्ध्वा कर्माणि पार्थिवः ॥ १० ॥ उत्तमाधममध्यानि पुरुषान्विनियोजयेत् ॥ जयेच्छुः पृथिवीं राजा सहायानानयेद्धितान् ॥ ११ ॥ धर्मिष्ठान्धर्मकार्य्येषु शूरान्सङ्ग्रामकर्मसु ॥ निपुणानर्थकृत्येषु सर्वत्र च तथा शुचीन् ॥ १२ ॥ स्त्रीषु षण्ढान्नियुञ्जीत तीक्ष्णान्दारुणकर्मसु ॥ यो यत्र विदितो राज्ञा शुचित्वेन तु तन्नरम् ॥ १३ ॥ धर्मे चार्थे च कामे च नियुञ्जीतांधमेऽधमान् ॥ राजा यथार्हं कुर्य्याच्च उपधाभिः परीक्षितान् ॥ १४ ॥ समन्त्री च यथान्यायात्कुर्य्याद्धास्तिवनेचरान् ॥ तत्पदान्वेषणे यत्तानध्यक्षांस्तत्र कारयेत् ॥ १५ ॥ यस्मिन्कर्मणि कौशल्यं यस्य तस्मिन्नियोजयेत् ॥ पितृपैतामहान्भृत्यान्सर्वकर्मसु योजयेत् ॥ १६ ॥ विना दायादकृत्येषु तत्र ते हि समागताः ॥ परराजगृहात्प्राप्ताञ्जनान्संश्रयकाम्यया ॥ १७ ॥ दुष्टानप्यथ वाऽदुष्टान्संश्रयेत प्रयत्नतः ॥ दुष्टं ज्ञात्वा विश्वसेन्न तद्वृत्तिं वर्त्तयेद्वशे ॥ १८ ॥ देशान्तरागतान्पार्श्वे चारैर्ज्ञात्वा हि पूजयेत् ॥ शत्रवोऽग्निर्विषं सर्पो निस्त्रिंशमपि चैकतः ॥ १९ ॥ भृत्या विशिष्टं विज्ञेयाः कुभृत्याश्च तथैकतः ॥ चारचक्षुर्भवेद्राजा नियुञ्जीत सदा चरान् ॥ २० ॥ जनस्याविहितान्सौम्यांस्तथाज्ञातान्परस्परम् ॥ वणिजो मन्त्रकुशलान्सांवत्सरचिकित्सकान् ॥ २१ ॥ तथा प्रव्रजिताकारान्बलाबलविवेकिनः ॥ नैकस्य राजा श्रद्दध्याच्छ्रद्दध्याद्बहुवाक्यतः ॥ २२ ॥ रागापरागौ भृत्यानां जनस्य च गुणागुणान् ॥ शुभानामशुभानां च ज्ञानं कुर्याद्वशाय च ॥ २३ ॥ अनुरागकरं कर्म चरेज्जह्याद्विरागजम् ॥ जनानुरागया लक्ष्म्या राजा स्याज्जनरञ्जनात् ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये राजसहायसम्पत्तिर्नाम विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥ अथानुजीविवृत्तम् ॥ पुष्कर उवाच ॥ भृत्यः कुर्य्यात्तु राजाज्ञां शिष्यवत्सच्छ्रियः पतेः ॥ न क्षिपेद्वचनं राज्ञो ह्यनुकूलं प्रियं वदेत् ॥ १ ॥ रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥ न नियुक्तो हरेद्वित्तं नोपेक्षेत्तस्य मानकम् ॥ २ ॥ राज्ञश्च न तथा कार्य्यं देशभाषाविचेष्टितम् ॥ अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः ॥ ३ ॥ संसर्गं न व्रजेद्भृत्यो राज्ञो गुह्यं

च गोपयेत् ॥ प्रदर्श्य कौशलं किञ्चिद्राजानं तु विशेषयेत् ॥ ४ ॥ राज्ञा यच्छावितं गुह्यं न तल्लोके प्रकाशयेत् ॥ आज्ञाप्यमाने वान्यस्मिन् किङ्करोमीति वा वदेत् ॥ ५ ॥ वस्त्रं रत्नमलङ्कारं राज्ञा दत्तं च धारयेत् ॥ नानिर्दिष्टो द्वारि विशेन्नायोग्ये भुवि राजदृक् ॥ ६ ॥ जृम्भां निष्ठीवनं कासं कोपं पर्य्यन्तिकाश्रयम् ॥ भृकुटीं वातमुद्गारं तत्समीपे विवर्जयेत् ॥ ७ ॥ स्वगुणाख्यापने युक्त्या परानेव नियोजयेत् ॥ शाठ्यं लौल्यं सपैशुन्यं नास्तिक्यं क्षुद्रतां तथा ॥८॥ चापल्यं च परित्याज्यं नित्यं राजानुजीविना ॥ श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ॥९॥ राजसेवां ततः कुर्य्याद्भूतये भूतिवर्द्धनः ॥ नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ॥ १० ॥ साचिवैर्नास्य विश्वासो राजचित्तप्रियश्चरेत् ॥ त्यजेद्विरक्तं रक्तात्तु वृत्तिमीहेत राजवित् ॥ ११ ॥ अपृष्टश्चास्य न ब्रूयात्कामं कुर्य्यात्तथापदि ॥ प्रसन्नो वाक्यसंग्राही रहस्ये न च शङ्कते ॥ १२ ॥ कुशलादिपरिप्रश्नं सम्प्रयच्छति चासनम् ॥ तत्कथाश्रवणाद्दृष्टो ह्यप्रियाण्यपि नन्दते ॥ १३ ॥ अल्पं दत्तं प्रगृह्णाति स्मरेत्कथान्तरेष्वपि ॥ इति रक्तस्य कर्त्तव्यं सेवामन्यस्य वर्जयेत् ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये अनुजीविवृत्तं नामैकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥ अथ दुर्गसम्पत्तिः ॥ पुष्कर उवाच ॥ दुर्गसम्पत्तिमाख्यास्ये दुर्गदेशे वसेन्नृपः ॥ १ ॥ वैश्यशूद्रजनप्रायो ह्यनाहार्य्यस्तथापरैः ॥ किञ्चिद्ब्राह्मणसंयुक्तो बहुकर्मकरस्तथा ॥ अदेवमातृको भक्तजलो (नो) देशः प्रशस्यते ॥ २ ॥ परैरपीडितः पुष्पफलधान्यसमन्वितः ॥ अगम्यः परचक्राणां व्यालतस्करवर्जितः ॥ ३ ॥ पण्णामेकतमं दुर्गं तत्र कृत्वा वसेद्बली ॥ धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च ॥ ४ ॥ वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च भार्गव ॥ सर्वोत्तमं शैलदुर्गमभेद्यं चान्यभेदनम् ॥ ५ ॥ पुरं तत्र च हट्टाद्यदेवतायतनादिकम् ॥ अनुयन्त्रायुधोपेतं सोदकं दुर्गमुत्तमम् ॥ ६ ॥ राजरक्षां प्रवक्ष्यामि रक्ष्यो भूपो विपादितः ॥ पञ्चाङ्गस्तु शिरीषः स्यान्मूत्रपिष्टा विषार्दनः ॥ ७ ॥ शातावरी छिन्नरुहा विषघ्नी तण्डुलीयकम् ॥ कोशातकी च कल्हारी ब्राह्मी चित्रपटोलिका ॥ ८ ॥ मण्डूकपर्णी वाराही धात्र्यानन्दकमेव च ॥ उन्मादिनी सोमराजी विषघ्नं रत्नमेव च ॥ ९ ॥ वास्तुलक्षणसंयुक्ते वसन्दुर्गे सुरान्यजेत् ॥ प्रजाश्च पालयेद्दृष्टाश्रयेदानानि दापयेत् ॥ १० ॥ देवद्रव्यादिहरणात्कल्पं तु नरके वसेत् ॥ देवालयांश्च कुर्वीत देवपूजारतो नृपः ॥ ११ ॥ सुरालयाः पालनीयाः स्थापनीयाश्च देवताः ॥ मृन्मयाद्दारुजं पुण्यं दारुजादिष्टकाम-

यम् ॥१२॥ ऐष्टकाच्छैलजं पुण्यं शैलजात्स्वर्णरत्नजम् ॥ क्रीडन्सुरगृहं कुर्वन्भुक्तिमुक्तिमवाप्नुयात् ॥ १३ ॥ चित्रकृद्गीतवाद्यादिप्रेक्षणीया-
दिदानकृत् ॥ तैलाज्यमधुदुग्धाद्यैः स्नाप्य देवं दिवं व्रजेत् ॥१४॥ पूजयेत्पालयेद्विप्रान्द्विजस्वं न हरेन्नृपः ॥ सुवर्णमेकं गामेकां भूमेरप्येक-
मङ्गुलम् ॥१५॥ हरन्नरकमाप्नोति यावदाभूतसम्प्लवम् ॥ दुराचारं न द्विषेच्च सर्वपापेष्वपि स्थितम् ॥ १६ ॥ नैवास्ति ब्राह्मणवधात्पापं गुरु-
तरं क्वचित् ॥ अदेवं दैवतं कुर्य्युः कुर्य्युर्दैवमदैवतम् ॥१७॥ ब्राह्मणा हि महाभागास्तान्नमस्येत्सदैव तु ॥ ब्राह्मणी रुदती हन्ति कुलं राज्यं
प्रजास्तथा ॥ १८ ॥ साध्वीस्त्रीणां पालनं च राजा कुर्य्याच्च धार्मिकः ॥ स्त्रिया प्रहृष्टया भाव्यं गृहकार्येकदक्षया ॥ १९॥ सुसंस्कृतोपस्क-
रया व्यये चामुक्तहस्तया ॥ यस्मै दद्यात्पिता त्वेनां शुश्रूषेत्तं पतिं सदा ॥ २० ॥ मृते भर्त्तरि स्वर्य्यायाद्ब्रह्मचर्य्ये स्थिताङ्गना ॥ परवे-
श्मरुचिर्न स्यान्न स्यात्कलहशालिनी ॥ २१ ॥ मण्डनं वर्जयेन्नारी तथा प्रोषितभर्तृका ॥ देवताराधनपरा तिष्ठेद्भर्तृहिते रता ॥ २२ ॥
धारयेन्मङ्गलार्थाय किञ्चिदाभरणं तथा ॥ भर्त्राग्निं या विशेन्नारी सापि स्वर्गमवाप्नुयात् ॥ २३ ॥ श्रियः सम्पूजनं कार्य्यं गृहसम्मार्जना-
दिकम् ॥ द्वादश्यां कार्त्तिके विष्णुं गां सवत्सां ददेत्तथा ॥२४॥ सावित्र्या रक्षितो भर्त्ता सत्याचारव्रतेन च ॥ सप्तम्यां मार्गशीर्षे तु सिते-
ऽभ्यर्च्य दिवाकरम् ॥ पुत्रानाप्नोति च स्त्रीह नात्र कार्य्या विचारणा ॥ २५ ॥ इत्यादिमहापुराणे आग्नेये दुर्गसम्पत्तिर्नाम द्वाविंशत्यधिक-
द्विशततमोऽध्यायः ॥ २२२ ॥ अथ राजधर्माः ॥ पुष्कर उवाच ॥ ग्रामस्याधिपतिं कुर्य्याद्दशग्रामाधिपं नृपः ॥ शतग्रामाधिपं चान्यं
तथैव विषयेश्वरम् ॥ १ ॥ तेषां भोगविभागश्च भवेत्कर्मानुरूपतः ॥ नित्यमेव तथा कार्यं तेषां चारैः परीक्षणम् ॥२॥ ग्रामे दोषान्समु-
त्पन्नान्ग्रामेशः प्रशमं नयेत् ॥ अशक्तो दशपालस्य स तु गत्वा निवेदयेत् ॥३॥ श्रुत्वापि दशपालोऽपि तत्र युक्तिमुपाचरेत् ॥ वित्ताद्या-
प्नोति राजा वै विषयांस्तु सुरक्षितात् ॥४॥ धनवान्धर्ममाप्नोति धनवान्कामममश्नुते ॥ उच्छिद्यन्ते विना ह्यर्थैः क्रिया ग्रीष्मे सरिद्यथा ॥५॥
विशेषो नास्ति लोकेषु पतितस्याधनस्य च ॥ पतितान्न तु गृह्णन्ति दरिद्रो न प्रयच्छति ॥ ६ ॥ धनहीनस्य भार्य्यापि नैका स्यादुपव-
र्त्तिनी ॥ राष्ट्रपीडाकरो राजा नरके वसते चिरम् ॥७॥ नित्यं राज्ञा तथा भाव्यं गर्भिणी सहधर्मिणी ॥ यथा स्वं सुखमुत्सृज्य गर्भस्य
सुखमावहेत् ॥ ८ ॥ किं यज्ञैस्तपसा तस्य प्रजा यस्य न रक्षिताः ॥ सुरक्षिताः प्रजा यस्य स्वर्गस्तस्य गृहोपमः ॥ ९ ॥ अरक्षिताः

प्रजा यस्य नरकं तस्य मन्दिरम् ॥ राजा षड्भागमादत्ते सुकृताद्दुष्कृतादपि ॥ १० ॥ धर्मागमो रक्षणाच्च पापमाप्नोत्यरक्षणात् ॥ सुभगा विटभीतेव राजवल्लभतस्करैः ॥ ११ ॥ भक्ष्यमाणाः प्रजा रक्ष्याः कायस्थैश्च विशेषतः ॥ रक्षिता तद्भयेभ्यस्तु राज्ञो भवति सा प्रजा ॥ १२ ॥ अरक्षिता सा भवति तेषामेवेह भोजनम् ॥ दुष्टसम्मर्दनं कुर्य्याच्छास्त्रोक्तं करमाददेत् ॥ १३ ॥ कोशे प्रवेशयेदर्द्धं नित्यं चार्द्धं द्विजे ददेत् ॥ निधिं द्विजोत्तमः प्राप्य गृह्णीयात्सकलं तथा ॥ १४ ॥ चतुर्थमष्टमं भागं तथा षोडशमं द्विजः ॥ वर्णक्रमेण दद्याच्च निधिं पात्रे तु धर्मतः ॥ १५ ॥ अनृतं तु वदन्दण्ड्यः सुवित्तस्यांशमष्टमम् ॥ प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दंनिधापयेत् ॥ १६ ॥ अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥ ममेदमिति यो ब्रूयात्सोऽर्थयुक्तो यथाविधि ॥ १७ ॥ सम्पाद्य रूपसङ्ख्यादीन्स्वामी तद्द्रव्यमर्हति ॥ बालदायादिकं रिक्थं तावद्राजानुपालयेत् ॥ १८ ॥ यावत्स्यात्स समावृत्तो यावद्वातीतशैशवः ॥ बालपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च ॥ १९ ॥ पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥ जीवन्तीनां तु तासां ये संहरेयुः स्वबान्धवाः ॥ २० ॥ ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥ सामान्यतो हृतं चौरैस्तद्वै दद्यात्स्वयं नृपः ॥ २१ ॥ चौररक्षाधिकारिभ्यो राजापि हृतमाप्नुयात् ॥ अहृते यो हृतं ब्रूयान्निःसार्य्यो दण्डच्य एव सः ॥ २२ ॥ न तद्राज्ञा प्रदातव्यं गृहे यद्दृग्गैर्हृतम् ॥ स्वराष्ट्रपण्यादादद्याद्राजा विंशतिगं द्विज ॥ २३ ॥ शुल्कांशं परदेशाच्च क्षयव्ययप्रकाशकम् ॥ ज्ञात्वा सङ्कल्पयेच्छुल्कं लाभं वणिग्यथाप्नुयात् ॥ २४ ॥ विंशांशं लाभमादद्याद्दण्डनीयस्ततोऽन्यथा ॥ स्त्रीणां प्रव्रजितानां च तरशुल्कं विवर्जयेत् ॥ २५ ॥ तरेषु दाशदोषेण नष्टं दाशांस्तु दापयेत् ॥ शूकधान्येषु षड्भागं शिम्बिधान्ये तथाष्टमम् ॥ २६ ॥ राजा वन्यार्थमादद्यादेशकालानुरूपकम् ॥ पञ्चषड्भागमादद्याद्राजा पशुहिरण्ययोः ॥ २७ ॥ गन्धौषधिरसानां च पुष्पमूलफलस्य च ॥ पत्रशाकतृणानां च वंशवेणवचर्मणाम् ॥ २८ ॥ वैदलानां च भाण्डानां सर्वस्याश्ममयस्य च ॥ षड्भागमेव चादद्यान्मधुमांसस्य सर्पिषः ॥ २९ ॥ म्रियमाणोपि नादद्याद्ब्राह्मणेभ्यस्तथा करम् ॥ यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ॥ ३० ॥ तस्य सीदति तद्राष्ट्रं व्याधिदुर्भिक्षतस्करैः ॥ श्रुतं वृत्तं तु विज्ञाय वृत्तिं तस्य प्रकल्पयेत् ॥ ३१ ॥ रक्षेच्च सर्वतस्त्वेनं पिता पुत्रमिवौरसम् ॥ संरक्ष्यमाणो राज्ञा यः कुरुते धर्ममन्वहम् ॥ ३२ ॥ तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव

च ॥ कर्म कुर्य्युर्नरेन्द्रस्य मासेनैकं च शिल्पिनः ॥ भुक्तमात्रेण ये चान्यं स्वशरीरोपजीविनः ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये राजधर्मो नाम त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥ पुनः राजधर्माः ॥ पुष्कर उवाच ॥ वक्ष्येऽन्तःपुरचिन्तां च धर्माद्याः पुरुषार्थकाः ॥ अन्योऽन्यरक्षया तेषां सेवा कार्या स्त्रिया नृपैः ॥ १ ॥ धर्ममूलोऽर्थविटपस्तथा कर्मफलो महान् ॥ त्रिवर्गपादपस्तत्र रक्षया फलभाग्भवेत् ॥ २ ॥ कामाधीनाः स्त्रियो राम तदर्थं रत्नसंग्रहः ॥ सेव्यान्ता नातिसेव्याश्च भूभुजा विषयैषिणा ॥ ३ ॥ आहारो मैथुनं निद्रा सेव्या नाति हि रुग्भवेत् ॥ मञ्चाधिकारे कर्त्तव्याः स्त्रियः सेव्या स्वगामिकाः ॥ ४ ॥ दुष्टान्याचरते या तु नाभिनन्दति तत्कथाम् ॥ ऐक्यं द्विषद्भिर्व्रजति गर्वं वहति चोद्धता ॥ ५ ॥ चुम्बिता मार्ष्टि वदनं दत्तं न बहु मन्यते ॥ स्वपित्यादौ प्रसुप्तापि तथा पश्चाद्विबुध्यते ॥ ६ ॥ स्पृष्टा धुनोति गात्राणि गात्रं च विरुणद्धि या ॥ ईषच्छृणोति वाक्यानि प्रियाण्यपि पराङ्मुखी ॥ ७ ॥ न पश्यत्यग्रदत्तं तु जघनं च निगूहति ॥ दृष्टे विवर्णवदना भित्त्वेवाथ पराङ्मुखी ॥ ८ ॥ तत्कामितासु च स्त्रीषु मध्यस्थेव च लक्ष्यते ॥ ज्ञातमण्डनकालापि न करोति च मण्डनम् ॥ ९ ॥ या सा विरक्ता नां त्यक्त्वा सानुरागां स्त्रियं भजेत् ॥ दृष्ट्वैव हृष्टा भवति वीक्षिते च पराङ्मुखी ॥ १० ॥ दृश्यमाना तथाऽन्यत्र दृष्टिं क्षिपति चञ्चलाम् ॥ तथाप्युपावर्त्तयितुं नैव शक्नोत्यशेषतः ॥ ११ ॥ विवृणोति तथाङ्गानि स्वस्यागुह्यानि भार्गव ॥ गर्हितं च तथैवाङ्गं प्रयत्नेन निगूहति ॥ १२ ॥ तद्दर्शने च कुरुते बालालिङ्गनचुम्बनम् ॥ आभाष्यमाणा भवति सत्यवाक्या तथैव च ॥ १३ ॥ स्पृष्टा पुलकितैरङ्गैः स्वेदेनैव च भज्यते ॥ करोति च तथा राम सुलभद्रव्ययाचनम् ॥ १४ ॥ ततः स्वल्पमपि प्राप्य करोति परमां मुदम् ॥ नामसङ्कीर्त्तनादेव मुदिता बहु मन्यते ॥ १५ ॥ करजाङ्काङ्कितान्यस्य फलानि प्रेषयत्यपि ॥ तत्प्रेषितं च हृदये विन्यसत्यपि चादरात् ॥ १६ ॥ आलिङ्गनैश्च गात्राणि लिम्पतीवामृतेन या ॥ सुप्ते स्वपित्यथादौ च तथा तस्य विबुध्यते ॥ १७ ॥ ऊरू स्पृशति चात्यर्थं सुप्तं चैनं विबुध्यते ॥ कपित्थचूर्णयोगेन तथा दध्नः स्रजा मुने ॥ १८ ॥ घृतं सुगन्धि भवति दुग्धैः क्षितैस्तथा यवैः ॥ भोज्यस्य कल्पनैवं स्याद्बन्धयुक्तिः प्रदर्श्यते ॥ १९ ॥ शौचमाचमनं राम तथैव च विरेचनम् ॥ भावना चैव पाकश्च बोधनं धूपनं तथा ॥ २० ॥ वासनं चैव निर्दिष्टं कर्माष्टकमिदं स्मृतम् ॥ कपित्थबिल्वजम्बाम्रकरवीरकपल्लवैः ॥ २१ ॥

कृत्वोदकं तु यद्द्रव्यं शोधितं शोधनं तु तत् ॥ तेषामभावे शौचं तु मृगदर्पाम्भसा भवेत् ॥ २२ ॥ नखं कुष्ठं घनं मांसी स्पृक्कशैले-
यजं जलम् ॥ तथैव कुङ्कुमं लाक्षा चन्दनागुरुनीरदम् ॥ २३ ॥ सरलं देवकाष्ठं च कर्पूरं कान्तया सह ॥ वालः कुन्दुरुकश्चैव गुग्गुलुः
श्रीनिवासकः ॥ २४ ॥ सह सर्जरसेनैवं धूपद्रव्यैकविंशतिः ॥ धूपद्रव्यगणादस्मादेकविंशाद्यथेच्छया ॥ २५ ॥ द्वे द्वे द्रव्ये समादाय
सर्जभागैर्नियोजयेत् ॥ नखपिण्याकमलयैः संयोज्य मधुना तथा ॥ ॥ २६ ॥ धूपयोगा भवन्तीह यथावत्स्वेच्छया कृताः ॥ त्वचं नाडीं
फलं तैलं कुङ्कुमं ग्रन्थिपर्वकम् ॥ २७ ॥ शैलेयं तगरं क्रान्तां चोलं कर्पूरमेव च ॥ मांसीं सुरां च कुष्ठं च स्नानद्रव्याणि निर्दिशेत्
॥ २८ ॥ एतेभ्यस्तु समादाय द्रव्यत्रयमथेच्छया ॥ मृगदर्पयुतं स्नानं कार्य्यं कन्दर्पवर्द्धनम् ॥ २९ ॥ त्वङ्मुरानलदैस्तुल्यैर्वालका-
र्द्धसमायुतैः ॥ स्नानमुत्पलगन्धि स्यात्सतैलं कुङ्कुमायते ॥ ३० ॥ जातीपुष्पसुगन्धि स्यात्तगरार्द्धेन योजितम् ॥ सद्वचामकं स्याद्र-
कुलैस्तुल्यगन्धि मनोहरम् ॥ ३१ ॥ मञ्जिष्ठा तगरं चोलं त्वचं व्याघ्रनखं नखम् ॥ गन्धपत्रं च विन्यस्य गन्धतैलं भवेच्छुभम् ॥ ३२ ॥
तैलं निपीडितं राम तिलैः पुष्पाधिवासितैः ॥ वासनात्तत्पुष्पसदृशं गन्धेन तु भवेद्ध्रुवम् ॥ ३३ ॥ एलालवङ्गकंकोलजातीफल-
निशाकराः ॥ जातीपत्रिकया सार्द्धं स्वतन्त्रा मुखवासकाः ॥ ३४ ॥ कर्पूरं कुङ्कुमं कान्ता मृगदर्पं हरेणुकम् ॥ कंकोलैलालवङ्गं च
जातीक्रोशकमेव च ॥ ३५ ॥ त्वक्पत्रं त्रुटिमुस्तौ च लतां कस्तूरिकां तथा ॥ कण्टकानि लवङ्गस्य फलपत्रे च जातितः ॥ ३६ ॥
कटुकं च फलं राम कार्षिकाण्युपकल्पयेत् ॥ तच्चूर्णे खदिरं सारं दद्यात्तुर्य्यं तु वासितम् ॥ ३७ ॥ सहकाररसेनास्मान्कर्त्तव्या
गुटिकाः शुभाः ॥ मुखन्यस्ताः सुगन्धास्ता मुखरोगविनाशनाः ॥ ३८ ॥ पूगं प्रक्षालितं सम्यक्पञ्चपल्लववारिणा ॥ शक्त्या तु गुटिका-
द्रव्यैर्वासितं मुखवासकम् ॥ ३९ ॥ कटुकं दन्तकाष्ठं च गोमूत्रे वासितं त्र्यहम् ॥ कृतं च पूगवद्राम मुखसौगन्धिकारकम् ॥ ४० ॥
त्वक्पथ्ययोः समावंशौ शाशिभागार्द्धसंयुतौ ॥ नागवल्लीसमो भाति मुखवासो मनोहरः ॥ ४१ ॥ एवं कुर्य्यात्सदा स्त्रीणां
रक्षणं पृथिवीपतिः ॥ न चासां विश्वसेज्जातु पुत्रमातुर्विशेषतः ॥ न स्वपेन्स्त्रीगृहे रात्रौ विश्वासः कृत्रिमो भवेत् ॥ ४२ ॥ इत्यादिमहापुराणे
आग्नेये स्त्रीरक्षादिकामशास्त्रं नाम चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥ अथ राजधर्माः ॥ पुष्कर उवाच ॥ राजपुत्रस्य रक्षा च

कर्त्तव्या पृथिवीभृता ॥ धर्मार्थकामशास्त्राणि धनुर्वेदं च शिक्षयेत् ॥ १ ॥ शिल्पानि शिक्षयेच्चैव मातैर्मिथ्याप्रियंवदैः ॥ शरीररक्षाव्यजेन रक्षिणोऽस्य नियोजयेत् ॥ २ ॥ न चास्य सङ्गो दातव्यः क्रुद्धलुब्धविमानतैः ॥ अशक्यं तु गुणाधानं कर्त्तुं तं बन्धयेत्सुखैः ॥ ३ ॥ अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ॥ मृगयां पानमक्षांश्च राज्यनाशांस्त्यजेन्नृपः ॥ ४ ॥ दिवास्वप्नं वृथाट्यां च वाक्पारुष्यं विवर्जयेत् ॥ निन्दां च दण्डपारुष्यमर्थदूषणमुत्सृजेत् ॥ ५ ॥ आकाराणां समुच्छेदो दुर्गादीनामसन्क्रिया ॥ अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥ ६ ॥ अदेशकाले यद्दानमपात्रे दानमेव च ॥ अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्त्तनम् ॥ ७ ॥ कामं क्रोधं मदं मानं लोभं दर्पं च वर्जयेत् ॥ ततो भृत्यजयं कृत्वा पौरजानपदं जयेत् ॥ ८ ॥ जयेद्बाह्यानरीन्पश्चाद्बाह्याश्च त्रिविधारयः ॥ गुरवस्ते यथापूर्वं कुल्यानन्तरकृत्रिमाः ॥ ९ ॥ पितृपैतामहं मित्रं सामन्तं च तथा रिपोः ॥ कृत्रिमं च महाभाग मित्रं त्रिविधमुच्यते ॥ १० ॥ स्वाम्यमात्यं जनपदा दुर्गं दण्डस्तथैव च ॥ कोशो मित्रं च धर्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥ ११ ॥ मूलं स्वामी स वै रक्ष्यस्तस्माद्राज्यं विशेषतः ॥ राज्याङ्गद्रोहिणं हन्यात्काले तीक्ष्णो मृदुर्भवेत् ॥ १२ ॥ एवं लोकद्वयं राज्ञो भृत्यैर्हासं विवर्जयेत् ॥ भृत्याः परिभवन्तीह नृपं हर्षणसत्कथम् ॥ १३ ॥ लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ॥ स्मितपूर्वाभिभाषी स्याल्लोकानां रञ्जनं चरेत् ॥ १४ ॥ दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवं भवेत् ॥ रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥ १५ ॥ अप्रिये चैव वक्तव्ये दीर्घसूत्रः प्रशस्यते ॥ गुप्तमन्त्रो भवेद्राजा नापदो गुप्तमन्त्रतः ॥ १६ ॥ ज्ञायते हि कृतं कर्म नारब्धं तस्य राज्यकम् ॥ आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥ १७ ॥ नेत्रवक्त्रविकाराभ्यां गृह्यते ऽन्तर्गतं पुनः ॥ नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ॥ १८ ॥ बहुभिर्मन्त्रयेत्कामं राजा मन्त्रान्पृथक्पृथक् ॥ मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥ १९ ॥ क्वापि कस्यापि विश्वासो भवतीह सदा नृणाम् ॥ निश्चयश्च तथा मन्त्रे कार्य्य एकेन सूरिणा ॥ ॥ २० ॥ नश्येदविनयाद्राजा राज्यं च विनयाल्लभेत् ॥ त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ॥ २१ ॥ आन्वीक्षिकीं चार्थविद्यां वार्त्तारम्भांश्च लोकतः ॥ जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥ २२ ॥ पूज्या देवा द्विजाः सर्वे दद्याद्दानानि तेषु च ॥ द्विजे दानं चाक्षयोऽयं निधिः कैश्चिन्न नाश्यते ॥ २३ ॥ संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनम् ॥ दानानि ब्राह्मणानां च राज्ञो निःश्रेयसं

परम् ॥ २४ ॥ कृपणानाथवृद्धानां विधवानां च योषिताम् ॥ योगक्षेमं च वृत्तिं च तथैव परिकल्पयेत् ॥२५॥ वर्णाश्रमव्यवस्थानं कार्य्यं तापसपूजनम् ॥ न विश्वसेच्च सर्वत्र तापसेषु च विश्वसेत् ॥२६॥ विश्वासयेच्चापि परं तत्त्वभूतेन हेतुना ॥ बकवच्चिन्तयेदर्थं सिंहवच्च पराक्रमेत् ॥ २७ ॥ वृकवच्चावलुम्पेन शशवच्च विनिष्पतेत् ॥ दृढप्रहारी च भवेत्तथा सूकरवन्नृपः ॥ २८ ॥ चित्राकारश्च शिखिवद्दृढभक्तिस्तथाश्ववत् ॥ भवेच्च मधुराभाषी तथा कोकिलवन्नृपः ॥ २९ ॥ काकाशङ्की भवेन्नित्यमज्ञातां वसतिं वसेत् ॥ नापरीक्षितपूर्वं च भोजनं शयनं स्पृशेत् ॥ ३० ॥ नाविज्ञातां स्त्रियं गच्छेन्नाज्ञातां नावमारुहेत् ॥ राष्ट्रकर्षी भ्रस्यते च राज्यार्थाच्चैव जीवितात् ॥ ३१ ॥ भृतो वत्सो जातबलः कर्मयोग्यस्तथा भवेत् ॥ तथा राष्ट्रं महाभाग भृतं कर्मसहं भवेत् ॥ ३२ ॥ सर्वं कर्मेदमायत्तं विधाने दैवपौरुषे ॥ तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥ जनानुरागप्रभवा राज्ञो राज्यमहीश्रियः ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेये राजधर्मो नाम पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ अथ सामाद्युपायकथनम् ॥ पुष्कर उवाच ॥ स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ॥ तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥ १ ॥ प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ॥ सात्त्विकात्कर्मणः पूर्वात्सिद्धिः स्यात्पौरुषं विना ॥ २ ॥ पौरुषं दैवसम्पत्त्या काले फलति भार्गव ॥ दैवं पुरुषकारश्च द्वयं पुंसः फलावहम् ॥ ३ ॥ कृषेर्वृष्टिसमायोगात्काले स्युः फलसिद्धयः ॥ स धर्म पौरुषं कुर्य्यन्नालसो न च दैववान् ॥ ४ ॥ सामादिभिरुपायैस्तु सर्वे सिध्यन्त्युपक्रमाः ॥ साम चोपप्रदानं च भेददण्डौ तथापरौ ॥ ५ ॥ मायोपेक्षेन्द्रजालं च ह्युपायाः सप्त तान्शृणु ॥ द्विविधं कथितं साम तथ्यं चातथ्यमेव च ॥ ६ ॥ तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते ॥ महाकुलीना ह्यृजवो धर्मनित्या जितेन्द्रियाः ॥७॥ साममाध्या अतथ्यैश्च गृह्यन्ते राक्षसा अपि ॥ तथा तदुपकाराणां कृतानां चैव वर्णनम् ॥ ८ ॥ परस्परं तु ये द्विष्टाः क्रुद्धभीतावमानिताः ॥ तेषां भेदं प्रयुञ्जीत. परमं दर्शयेद्भयम् ॥ ९ ॥ आत्मीयां दर्शयेदाशां येन दोषेण बिभ्यति॥ परास्तेनैव ते भेद्या रक्ष्यो वै ज्ञातिभेदकः ॥ १० ॥ सामन्तकोपो बाह्यस्तु मन्त्रामात्यात्मजादिकः ॥ अन्तःकोपं चोपशाम्यं कुर्वञ्छत्रोश्च तं जयेत् ॥ ११ ॥ उपायश्रेष्ठं दानं स्यादानादुभयलोकभाक् ॥ न सोऽस्ति नाम दानेन वशगो यो न जायते ॥ १२ ॥ दानवानेव शक्नोति संहतान्भेदितुं परान् ॥ त्रयासाध्यं साधयेत्तं दण्डेन च कृतेन च ॥ १३ ॥ दण्डे सर्वं स्थितं

दण्डो नाशयेद्दुपणीकृतः ॥ अदण्ड्यान्दण्डयन्नश्येद्दण्ड्यान्राजाप्यदण्डयन् ॥ १४ ॥ देवदैत्योरगनराः सिद्धा भूताः पतत्रिणः ॥ उत्क्रमेयुः स्वमर्य्यादां यदि दण्डान्न पालयेत् ॥ १५ ॥ यस्मादुदान्तान्दमयत्यदण्ड्यान्दण्डयत्यपि ॥ दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥ १६ ॥ तेजसा दुर्निरीक्ष्यो हि राजा भास्करवत्ततः ॥ लोकप्रसादं गच्छेत्तु दर्शनाच्चन्द्रवत्ततः ॥ १७ ॥ जगद्व्याप्नोति वै चारैस्तो राजा समीरणः ॥ दोषनिग्रहकारित्वाद्राजा वैवस्वतः प्रभुः ॥ १८॥ यदा दहति दुर्बुद्धिं तदा भवति पावकः ॥ यदा दानं द्विजातिभ्यो दद्यात्तस्माद्धनेश्वरः ॥ १९ ॥ धनधाराप्रवर्षित्वादेवादौ वरुणः स्मृतः ॥ क्षमया धारयँल्लोकान्पार्थिवः पार्थिवी भवेत् ॥ उत्साहमन्त्रशक्त्याद्यै रक्षेद्यस्माद्धरिस्ततः ॥ २०॥ इत्यादिमहापुराणे आग्नेये सामाद्युपायो नाम षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥ अथ दण्डप्रणयनम् ॥ श्रीपुष्कर उवाच ॥ दण्डप्रणयनं वक्ष्ये येन राज्ञः परा गतिः ॥ त्रियवं कृष्णलं विद्धि मापस्तत्पञ्चकं भवेत् ॥ १ ॥ कृष्णलानां तथा षष्ट्या कर्षार्द्धं राम कीर्त्तितम् ॥ सुवर्णश्च विनिर्दिष्टो राम षोडशमापकः ॥ २ ॥ निष्कः सुवर्णाश्चत्वारो धरणं दशभिस्तु तैः ॥ ताम्ररूप्यसुवर्णानां मानमेतत्प्रकीर्त्तितम् ॥ ३ ॥ ताम्रिकैः कार्षिको राम प्रोक्तः कार्षापणो बुधैः ॥ पणानां द्वे शते सार्द्धं प्रथमः साहसः स्मृतः ॥ ४ ॥ मध्यमः पञ्च विज्ञेयः सहस्रमपि चोत्तमः ॥ चोरैरमूषितो यस्तु मूषितोऽस्मीति भाषते ॥ ५ ॥ तत्प्रदातारि भूपाले सदण्ड्यस्तावदेव तु ॥ यो यावद्विपरीतार्थं मिथ्या वा यो वदेत्तु तम् ॥ ६ ॥ तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ॥ कूटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णांश्च प्रदापयेत् ॥ ७ ॥ विवासयेद्ब्राह्मणं तु भोज्यो विधिर्न हीयते ॥ निक्षेपस्य समं मूल्यं दण्ड्यो निक्षेपभुक्तथा ॥ ८ ॥ वस्त्रादिकस्य धर्मज्ञ तथा धर्मो न हीयते ॥ यो निक्षेपं घातयति यश्चानिक्षिप्य याचते ॥ ९ ॥ तावुभौ चौरवच्छास्यौ दण्ड्यौ वा द्विगुणं दमम् ॥ अज्ञानाद्यः पुमान्कुर्य्यात्परद्रव्यस्य विक्रयम् ॥ १० ॥ निर्दोषो ज्ञानपूर्वं तु चौरवद्दण्डमर्हति ॥ मूल्यमादाय यः शिल्पं न दद्याद्दण्ड्य एव सः ॥ ११ ॥ प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः ॥ भृतिं गृह्य न कुर्य्याद्यः कर्माष्टौ कृष्णला दमः ॥ १२ ॥ अकाले तु त्यजन्भृत्यं दण्ड्यः स्यात्तावदेव तु ॥ क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् ॥ १३ ॥ सोऽन्तर्दशाहात्तत्स्वामी दद्याच्चैवाददीत च ॥ परेण तु दशाहस्य नादद्यान्नैव

दापयेत् ॥ १४ ॥ आददद्धि ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥ वरे दोषानविख्याप्य यः कन्यां वरयेदिह ॥ १५ ॥ दत्ताप्यदत्ता सा तस्य राज्ञा दण्ड्यः शतद्वयम् ॥ प्रदाय कन्यां योऽन्यस्मै पुनस्तां सम्प्रयच्छति ॥ १६॥ दण्डः कार्य्यो नरेन्द्रेण तस्याप्युत्तमसाहसः ॥ सत्यङ्कारेण वाचा च युक्तं पुण्यमसंशयम् ॥ ॥ १७ ॥ लुब्धोऽन्यत्र च विक्रेता षट्शतं दण्डमर्हति ॥ दद्याद्धेनुं न यः पालो गृहीत्वा भक्तवेतनम् ॥ १८ ॥ स तु दण्ड्यः शतं राज्ञा सुवर्णे वाप्यरक्षिता ॥ धनुः शतं परीणाहो ग्रामस्य तु समन्ततः ॥ १९ ॥ द्विगुणं त्रिगुणं वापि नगरस्य च कल्पयेत् ॥ वृत्तिं तत्र प्रकुर्वीत यामुष्टो नावलोकयेत् ॥ २० ॥ नत्रापारिवृते धान्ये हिंसिते नैव दण्डनम् ॥ गृहं तटाकमारामं क्षेत्रं वा भीषया हरन् ॥२१॥ शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशती दमः ॥ मर्य्यादाभेदकाः सर्वे दण्ड्याः प्रथमसाहसम् ॥ २२ ॥ शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ॥ वैश्यश्च द्विशतं राम शूद्रश्च वधमर्हति ॥ २३ ॥ पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ॥ वैश्ये वाप्यर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥ २४ ॥ क्षत्रियस्यासुयाद्वैश्यः साहसं पूर्वमेव तु ॥ शूद्रः क्षत्रियमाक्रुश्य जिह्वाच्छेदनमाप्नुयात् ॥ २५ ॥ धर्मोपदेशं विप्राणां शूद्रः कुर्वंश्च दण्डभाक् ॥ श्रुतदेशादिवितथी दाप्यो द्विगुणसाहसम् ॥ २६ ॥ उत्तमः साहसस्तस्य यः पापैरुत्तमाक्षिपेत् ॥ प्रमादाद्यैर्मया प्रोक्तं प्रत्यिा दण्डार्द्धमर्हति ॥ २७ ॥ मातरं पितरं ज्येष्ठं भ्रातरं श्वशुरं गुरुम् ॥ आक्षारयच्छतं दण्ड्यः पन्थानं चाददद्गुरोः ॥२८॥ अन्त्यजातिर्द्विजातिं तु येनाङ्गेनापराध्नुयात् ॥ तदेव छेदयेत्तस्य क्षिप्रमेवाविचारयन् ॥ ॥ २९ ॥ अवनिं ष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ॥ अपमूत्रयतो मेढ्रमपशब्दयतो गुदम् ॥ ३० ॥ उत्कृष्टासनसंस्थस्य नीचस्याधोनिकृन्तनम् ॥ यो यदङ्गं च रुजयेत्तदङ्गं तस्य कर्त्तयेत् ॥ ३१ ॥ अर्द्धपादकराः कार्य्या गोगजाश्वोष्ट्रघातकाः ॥ वृक्षं तु विफलं कृत्वा सुवर्णं दण्डमर्हति ॥ ३२ ॥ द्विगुणं दापयेच्छिन्ने पथि सीम्नि जलाशये ॥ द्रव्याणि यो हरेद्यस्य ज्ञाननोऽज्ञाननोऽपि वा ॥ ३३ ॥ स तस्योत्पाद्य तुष्टिं तु राज्ञे दद्यात्ततो दमम् ॥ यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च तां प्रपाम् ॥ ३४ ॥ स दण्डं प्राप्नुयान्मासं दण्ड्यः स्यात्प्राणिताडने ॥ धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ॥ ३५ ॥ शेषेऽप्येकादशगुणं तस्य दण्डं प्रकल्पयेत् ॥ सुवर्णरजतादीनां नृस्त्रीणां हरणे वधः ॥ ३६ ॥ येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ॥ तत्तदेव हरेदस्य प्रत्यादेशाय पार्थिवः ॥ ३७ ॥

ब्राह्मणः शाकधान्यादि ह्यल्पं गृह्णन्न दोषभाक् ॥ गोदेवार्थं हरंश्चापि हन्याद्दुष्टं वधोद्यतम् ॥ ३८ ॥ गृहक्षेत्रापहर्त्तारं तथा पत्न्यभिगामिनम् ॥ अग्निदं गरदं हन्यात्तथा चाभ्युद्यतायुधम् ॥ ३९ ॥ राजा गवाभिचाराद्यं हन्याच्चैवाततायिनः ॥ परस्त्रियं न भाषेत प्रतिषिद्धो विशेन्न हि ॥ ४० ॥ अदण्ड्या स्त्री भवेद्राज्ञा वरयन्ती पतिं स्वयम् ॥ उत्तमां सेवमानः स्त्रीं जघन्यो वधमर्हति ॥ ४१ ॥ भर्त्तारं लङ्घयेद्या तां श्वभिः सङ्घातयेत्स्त्रियम् ॥ सवर्णदूषितां कुर्य्यात्पिण्डमात्रोपजीविनीम् ॥ ४२ ॥ ज्यायसा दूषिता नारी मुण्डनं समवाप्नुयात् ॥ वैश्यागमे तु विप्रस्य क्षत्रियस्यान्त्यजागमे ॥ ४३ ॥ क्षत्रियः प्रथमं वैश्यो दण्ड्यः शूद्रागमे भवेत् ॥ गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति ॥ ४४ ॥ वेतनं द्विगुणं दद्यादण्डं च द्विगुणं तथा ॥ भार्य्या पुत्राश्च दासाश्च शिष्यो भ्राता च सोदरः ॥ ४५ ॥ कृतापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ पृष्ठे न मस्तके हन्याच्चौरस्यापोति किल्बिषम् ॥ ४६ ॥ रक्षास्वधिकृतैर्यस्तु प्रजाभ्योर्थो विलुप्यते ॥ तेषां सर्वस्वमादाय राजा कुर्य्यात्प्रवासनम् ॥ ४७ ॥ ये नियुक्ताः स्वकार्य्येषु हन्युः कार्य्याणि कर्मिणाम् ॥ निर्घृणाः क्रूरमनसस्तान्निःस्वान्कारयेन्नृपः ॥ ४८ ॥ अमात्यः प्राड्विवाको वा यः कुर्य्यात्कार्य्यमन्यथा ॥ तस्य सर्वस्वमादाय तं राजा विप्रवासयेत् ॥ ४९ ॥ गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः ॥ स्तेयेषु श्वपदं विद्याद्ब्रह्महत्या शिरः पुमान् ॥ ५० ॥ शूद्रादीन्घातयेद्राजा पापान्विप्रान्प्रवासयेत् ॥ महापातकिनां वित्तं वरुणायोपपादयेत् ॥ ५१ ॥ ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः ॥ भाण्डारकोशदाश्चैव सर्वांस्तानपि घातयेत् ॥ ५२ ॥ राष्ट्रेषु राष्ट्राधिकृतान्सामन्तान्पापिनो हरेत् ॥ सन्धिं कृत्वा तु ये चौर्य्यं रात्रौ कुर्वन्ति तस्कराः ॥ ५३ ॥ तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् ॥ तटाकदेवतागारभेदकान् घातयेन्नृपः ॥ ५४ ॥ समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ॥ स हि कार्षापणं दण्ड्यस्तममेध्यं च शोधयेत् ॥ ५५ ॥ प्रतिमासं क्रमभिदो दद्युः पञ्चशतानि ते ॥ समैश्च विषमं यो वा चरते मूल्यतोऽपि वा ॥ ५६ ॥ समाप्नुयान्नरः पूर्वं दमं मध्यममेव वा ॥ द्रव्यमादाय वणिजामनर्घेणावरुन्धताम् ॥ ५७ ॥ राजा पृथक्पृथक् कुर्य्याद्दण्डमुत्तमसाहसम् ॥ द्रव्याणां दूषको यश्च प्रतिच्छन्दकविक्रयी ॥ ५८ ॥ मध्यमं प्राप्नुयाद्दण्डं कूटकर्त्ता तथोत्तमम् ॥ कलहापकृतं देयं दण्डश्च द्विगुणस्ततः ॥ ५९ ॥ अभक्ष्यभक्ष्ये विप्रे वा शूद्रे वा कृष्णलो

दमः ॥तुलाशासनकर्त्ता च कूटकृन्नाशकस्य च ॥ ६० ॥ एभिश्च व्यवहर्त्ता यः स दाप्यो दममुत्तमम् ॥ विपाग्निदां पानिगुरुवि-
प्रापत्यप्रमापिणीम् ॥ ६१ ॥ विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रवासयेत् ॥ क्षेत्रवेश्मग्रामवनविदारकास्तथा नरः ॥ ६२ ॥
राजपत्न्यभिगामी च दग्धव्यस्तु कटाग्निना ॥ ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनम् ॥ ३३ ॥ पारजायिकचौरौ च
मुञ्चत दण्ड उत्तमः ॥ राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ ६४ ॥ यो मन्येनाजितोऽस्मीति न्यायेनापि पराजितः ॥
तमायान्तं पराजित्य दण्डयेद्द्विगुणं दमम् ॥ ६५ ॥ आह्वानकारी वध्यः स्यादनाहूतमथाह्वयन् ॥ दाण्डिकस्य च यो हस्तादभिमुक्तः
पलायते ॥ हीनः पुरुषकारेण तद्दद्याद्दाण्डिको धनम् ॥ ६६ ॥ इत्यादिमहापुराणे आग्नेये दण्डप्रणयनं नाम सप्तविंशत्यधिकद्विशततमो-
ऽध्यायः ॥ २२७ ॥ अथ युद्धयात्रा ॥ पुष्कर उवाच ॥ यदा मन्यते नृपतिराक्रन्देन बलीयसा ॥ पार्ष्णिग्राहोऽभिभूतो मे तदा यात्रां
प्रयोजयेत् ॥ १ ॥ पुष्टा योधा भृता भृत्याः प्रभूतं च बलं मम ॥ मूलरक्षासमर्थोऽस्मि तैर्गत्वा शिबिरे व्रजेत् ॥ २ ॥ शत्रोर्वा व्यसने
यायादैवाद्यैः पीडितं परम् ॥ भूकम्पो यां दिशं यानि यां च केतुर्व्यदूषयत् ॥ ३ ॥ विद्विष्टनाशकं सैन्यं सम्भूतान्तःप्रकोपनम् ॥ शरीर-
स्फुरणे धन्ये तथा सुस्वप्नदर्शने ॥ ४ ॥ निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥ पदातिनागबहुलां सेनां प्रावृषि योजयेत् ॥ ५ ॥
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥ चतुरङ्गबलोपेतां वसन्ते वा शरन्मुखे ॥ ६ ॥ सेना पदातिबहुला शत्रुञ्जयति सर्वदा ॥ अङ्ग-
दक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् ॥ ७ ॥ न शस्तं तु तथा वामे पृष्ठस्य हृदयस्य च ॥ लाञ्छनं पिटकं चैव विज्ञेयं स्फुरणं तथा ॥
विपर्य्ययेणाभिहितं सव्ये स्त्रीणां शुभं भवेत् ॥ ८ ॥ इत्यादिमहापुराणे आग्नेये युद्धयात्रा नामाष्टाविंशत्यधिकद्विशततमोऽध्यायः
॥ २२८ ॥ अथ स्वप्नाध्यायः ॥ पुष्कर उवाच ॥ स्वप्नं शुभाशुभं वक्ष्ये दुःस्वप्नहरणं तथा ॥ नाभिं विनान्यत्र गात्रे तृणवृक्षसमुद्भवः
॥ १ ॥ चूर्णनं मूर्ध्नि कांस्यानां मुण्डनं नग्नता तथा ॥ मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता ॥ २ ॥ उच्चात्प्रपतनं चैव विवाहो
गीतमेव च ॥ तन्त्रीवाद्यविनोदश्च दोलारोहणमेव च ॥ ३ ॥ अर्जनं पद्मलोहानां सर्पाणामथ मारणम् ॥ रक्तपुष्पद्रुमाणां च चाण्डालस्य
तथैव च ॥ ४ ॥ वराहश्वखरोष्ट्राणां तथा चारोहणक्रिया ॥ भक्षणं पक्षिमांसानां तैलस्य कृसरस्य च ॥ ५ ॥ मातुः प्रवेशो जठरे चिता-

रोहणमेव च ॥ शक्रध्वजाभिपतनं पतनं शशिसूर्य्ययोः ॥ ६ ॥ दिव्यान्तरिक्षभौमानामुत्पातानां च दर्शनम् ॥ देवद्विजातिभूपानां गुरूणां कोप एव च ॥ ७ ॥ नर्त्तनं हसनं चैव विवाहो गीतमेव च ॥ तन्त्रीवाद्यविहीनानां वाद्यानामपि वादनम् ॥ ८ ॥ स्रोतोवहाधोगमनं स्नानं गोमयवारिणा ॥ पङ्कोदकेन च तथा मशीतोयेन वाप्यथ ॥ ९ ॥ आलिङ्गनं कुमारीणां पुरुषाणां च मैथुनम् ॥ हानिश्चैव स्वगात्राणां विरेको वमनक्रिया ॥ १० ॥ दक्षिणाशाप्रगमनं व्याधिनाभिभवस्तथा ॥ फलानामुपहानिश्च धातूनां भेदनं तथा ॥ ११ ॥ गृहाणां चैव पतनं गृहसम्मार्जनं तथा ॥ क्रीडा पिशाचक्रव्यादवानरान्त्यनरैरपि ॥ १२ ॥ परादभिभवश्चैव तस्माच्च व्यसनोद्भवः ॥ काषायवस्त्रधारित्वं तद्वस्त्रैः क्रीडनं तथा ॥ १३ ॥ स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम् ॥ इत्यधन्यानि स्वप्नानि तेषामकथनं शुभम् ॥ १४ ॥ भूयश्च स्वपनं तद्वत्कार्य्यं स्नानं द्विजार्चनम् ॥ तिलैर्होमो हरित्रह्माशिवार्कगणपूजनम् ॥ १५ ॥ तथा स्तुतिप्रपठनं पुंसूक्तादिजपस्तथा ॥ स्वप्नास्तु प्रथमे यामे संवत्सरविपाकिनः ॥ १६ ॥ षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्त्रियामिकाः॥ चतुर्थे त्वर्द्धमासेन दशाहादरुणोदये ॥ १७ ॥ एकस्यामथ चेद्रात्रौ शुभं वा यदि वाऽशुभम् ॥ पश्चाद्दृष्टस्तु यस्तत्र तस्य पाकं विनिर्दिशेत् ॥ १८ ॥ तस्मात्तु शोभने स्वप्ने पश्चात्स्वापो न शस्यते ॥ शैलप्रासादनागाश्ववृषभारोहणं हितम् ॥ १९ ॥ द्रुमाणां श्वेतपुष्पाणां गगने च तथा द्विज ॥ द्रुमे तृणोद्भवो नाभौ तथा च बहुबाहुता ॥ २० ॥ तथा च बहुशीर्षत्वं पलितोद्भव एव च ॥ सुशुक्लमाल्यधारित्वं सुशुक्लाम्बरधारिता ॥ २१ ॥ चन्द्रार्कताराग्रहणं परिमार्जनमेव च ॥ शक्रध्वजालिङ्गनं च ध्वजोच्छ्रायक्रिया तथा ॥ २२ ॥ भूम्यम्बुधाराग्रहणं शत्रूणां चैव विक्रिया ॥ जयो विवादे द्यूते च संग्रामे च तथा द्विज ॥ २३ ॥ भक्षणं चार्द्रमांसानां पायसस्य च भक्षणम् ॥ दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च ॥ २४ ॥ सुरारुधिरमद्यानां पानं क्षौरस्य वाप्यथ ॥ अस्त्रैर्विचेष्टनं भूमौ निर्मलं गगनं तथा ॥ २५ ॥ मुखेन दोहनं शस्तं महिषीणां तथा गवाम् ॥ सिंहीनां हस्तिनीनां च वडवानां तथैव च ॥ २६ ॥ प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा द्विज ॥ अम्भसा चाभिषेकस्तु गवां शृङ्गच्युतेन च ॥ २७॥ चन्द्रार्कदृष्टेन वा राम ज्ञेयं राज्यप्रदं हि तत् ॥ राज्याभिषेकश्च तथा छेदनं शिरसोऽप्यथ ॥२८॥ मरणं वह्निलाभश्च वह्निदाहो गृहादिषु ॥ लब्धिश्च राजलिङ्गानां तन्त्रीवाद्याभिवादनम् ॥ २९ ॥ यस्तु पश्यति

स्वप्नान्त राजानं कुञ्जरं हयम् ॥ हिरण्यं वृषभं गां च कुटुम्बस्तस्य वर्द्धते ॥ ३० ॥ वृषेभगृहशैलाग्रवृक्षारोहणरोदनम् ॥ घृतविष्ठानुलेपो वा ह्यगम्यागमनं तथा ॥ सितवस्त्रं प्रसन्नाम्भः फली वृक्षो नभोऽमलम् ॥ ३१ ॥ इत्यादिमहापुराणे आग्नेये स्वप्नाध्यायो नामैकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥ अथ शकुनानि ॥ पुष्कर उवाच ॥ ओषधानि च युक्तानि धान्यं कृष्णमशोभनम् ॥ कार्पासं तृणशुष्कञ्च गोमयं वै धनानि च ॥ १ ॥ अङ्गारं गुडसर्जौ च मुण्डाभ्यक्तञ्च नग्नकम् ॥ अयः पङ्कं चर्मकेशौ उन्मत्तं च नपुंसकम् ॥ २ ॥ चाण्डालश्वपचाद्यानि नरा बन्धनपालकाः ॥ गर्भिणी स्त्री च विधवाः पिण्याकादीनि वै मृतम् ॥ ३ ॥ तुषभस्मकपालास्थिभिन्नभाण्डमशस्तकम् ॥ अशस्तो वाद्यशब्दश्च भिन्नभैरवजर्जरः ॥ ४ ॥ एहीति पुरतः शब्दः शस्यते न तु पृष्टतः ॥ गच्छेति पश्चाच्छब्दोऽग्र्यः पुरस्तात्तु विगर्हितः ॥ ५ ॥ क्व यासि तिष्ठ मा गच्छ किन्ते तत्र गतस्य च ॥ अनिष्टशब्दा मृत्यर्थं क्रव्यादश्च ध्वजादिगः ॥ ६ ॥ स्खलनं वाहनानां च शस्त्रभङ्गस्तथैव च ॥ शिरोघातश्च द्वाराद्यैश्छत्रवासादिपातनम् ॥ ७ ॥ हरिमभ्यर्च्य संस्तुत्य स्यादमङ्गल्यनाशनम् ॥ द्वितीयं तु ततो दृष्ट्वा विरुद्धं प्रविशेद्गृहम् ॥ ८ ॥ श्वेताः सुमनसः श्रेष्ठाः पूर्णकुम्भो महोत्तमः ॥ मांसं मत्स्या दूरशब्दा वृद्धं एकः पशुस्त्वजः ९ ॥ गावस्तुरङ्गमा नागा देवाश्च ज्वलितोऽनलः ॥ दूर्वार्द्रगोमयं वेश्या स्वर्णरूप्यं च रत्नकम् ॥ १० ॥ वचासिद्धार्थकोपध्यो मुद्ग आयुधखड्गकम् ॥ छत्रं पीठं राजालिङ्गं शवं रुदितवर्जितम् ॥ ११ ॥ फलं घृतं दधि पयो ह्यक्षतादर्शमाक्षिकम् ॥ शङ्ख इक्षुः शुभं वाक्यं भक्तवादित्रगीतकम् ॥ १२ ॥ गम्भीरमेघस्तनितं तडित्तुष्टिश्च मानसी ॥ एकतः सर्वलिङ्गानि मनसस्तुष्टिरेकतः ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये माङ्गल्याध्यायो नाम त्रिंशदधिकद्विशततमोऽध्यायाः ॥ २३० ॥ पुनः शकुनानि ॥ पुष्कर उवाच ॥ तिष्टतो गमने प्रश्ने पुरुषस्य शुभाशुभम् ॥ निवेदयन्ति शकुना देशस्य नगरस्य च ॥ १ ॥ सर्वः पापफलो दाप्तो निर्दिष्टो दैवचिन्तकैः ॥ शान्तः शुभफलश्चैव दैवज्ञैः समुदाहृतः ॥ २ ॥ षट्प्रकारा विनिर्दिष्टा शकुनानां च दीप्तयः ॥ वेलादिग्देशकरणरुतजातिविभेदतः ॥ ३ ॥ पूर्वापूर्वा च विज्ञेया सा तेषां बलवत्तरा ॥ दिवाचरो रात्रिचरस्तथा रात्रौ दिवाचरः ॥ ४ ॥ क्रूरेषु दीप्ता विज्ञेया ह्यक्षलग्नग्रहादिषु ॥ धूमिता सा तु विज्ञेया यां गमिष्यति भास्करः ॥ ५ ॥ यस्यां स्थितः सा ज्वलिता मुक्ता चाङ्गा-

रिणी मता ॥ एतास्तिस्रः स्मृता दीप्ताः पञ्च शान्तास्तथापराः ॥ ६ ॥ दीप्तायां दिशि दिग्दीप्तं शकुनं परिकीर्त्तितम् ॥ ग्रामेऽरण्या
वने ग्राम्यास्तथा निन्दितपादपः ॥ ७ ॥ देशे चैवाशुभे ज्ञेयो देशदीप्तो द्विजोत्तमः ॥ क्रियादीप्तो विनिर्दिष्टः स्वजात्यनुचितक्रियः ॥ ८ ॥
रुतदीप्तश्च कथितो भिन्नभैरवनिःस्वनः ॥ जातिदीप्तस्तथा ज्ञेयः केवलं मांसभोजनः ॥ ९ ॥ दीप्ताच्छान्तो विनिर्दिष्टः सर्वेभ्यो दीप्तः प्रयत्नतः ॥
मिश्रैर्मिश्रो विनिर्दिष्टस्तस्य वाच्यं फलाफलम् ॥ १० ॥ गोश्वोष्ट्रगर्दभश्वानः सारिका गृहगोधिका ॥ चटका भासकूर्माद्याः कथिता
ग्रामवासिनः ॥ ११ ॥ अजाविशुकनागेन्द्राः कोलो महिषवायसौ ॥ ग्राम्यारण्या विनिर्दिष्टाः सर्वेऽन्ये वनगोचराः ॥ १२ ॥ मार्जारकुक्कुटौ
ग्राम्यौ नौ चैव वनगोचरौ ॥ नयोर्भवति विज्ञानं नित्यं वै रूपभेदतः ॥ १३ ॥ गोकर्णशिखिचक्राह्वखरहारीतवायसाः ॥ कुलाहकुक्कुभश्येन-
नफेरुंखञ्जनवानराः ॥ १४ ॥ शनघ्नचटकश्यामचापश्येनकपिञ्जलाः ॥ तित्तिरिः शतपत्रश्च कपोतश्च तथा त्रयः ॥ १५ ॥ खञ्जरीट-
कदात्यूहशुकराजीवकुक्कुटाः ॥ भारद्वाजश्च सारङ्ग इति ज्ञेया दिवाचराः ॥ १६ ॥ वागुर्युलूकशरभक्रौञ्चाः शशककच्छपाः ॥ लोमा-
सिकाः पिङ्गलिका कथिता रात्रिगोचराः ॥ १७ ॥ हंसाश्च मृगमार्जारनकुलर्क्षभुजङ्गमाः ॥ वृकारिसिंहव्याघ्रोष्ट्रग्रामसूकरमानुषाः ॥ १८ ॥
श्वाविद्वृषभगोमायुवृककोकिलसारसाः ॥ तुरङ्गकौपीननरा गोधा ह्युभयचारिणः ॥ १९ ॥ बलप्रस्थानयोः सर्वे पुरस्तात्सङ्गचारिणः ॥
जयावहा विनिर्दिष्टा पश्चान्निधनकारिणः ॥ २० ॥ गृहाद्गम्य यदा चापो व्याहरेत्पुरतः स्थितः ॥ नृपावमानं वदति वामः कलहभोजने ॥ २१ ॥
याने तद्दर्शनं शस्तं सव्यमङ्गस्य वाप्यथ ॥ चौरैर्मोषमथाख्याति मयूरो भिन्ननिःस्वनः ॥ २२ ॥ प्रयातस्याग्रतो राम मृगः प्राणहरो भवेत् ॥
ऋक्षाखुजम्बुकव्याघ्रसिंहमार्जारगर्दभाः ॥ २३ ॥ प्रतिलोमास्तथा राम स्वरश्च विकृतस्वनः ॥ वामः कपिञ्जलः श्रेष्ठस्तथा दक्षिणसंस्थितः ॥
॥ २४ ॥ पृष्ठतो निन्दितफलास्तित्तिरिस्तु न शस्यते ॥ एणा वराहाः पृषता वामा भूत्वा तु दक्षिणाः ॥ २५ ॥ भवन्त्यर्थकरा नित्यं
विपरीता विगर्हिताः ॥ वृषाश्वजम्बुकव्याघ्राः सिंहमार्जारगर्दभाः ॥ २६ ॥ वाञ्छितार्थकरा ज्ञेया दक्षिणाद्वामतो गताः ॥ शिवा श्यामानना-
च्छुच्छूः पिङ्गला गृहगोधिका ॥ २७ ॥ सूकरी परपुष्टा च पुन्नामानश्च वामतः ॥ स्त्रीसञ्ज्ञा भासकारूषकपिश्रीकर्णच्छित्करः ॥ २८ ॥
कपिश्रीकर्णपिप्पिका रुरुश्येनाश्च दक्षिणाः ॥ जातीक्षा (तिका) हिशशक्रोडगोधानां कीर्त्तनं शुभम् ॥ २९ ॥ ततः सन्दर्शनं नेष्टं

प्रतीपं वानरर्क्षयोः ॥ कार्य्यकृद्बली शकुनः प्रस्थितस्य हि योऽन्वहम् ॥ ३० ॥ भवेत्तस्य फलं वाच्यं तदेव दिवसं बुधैः ॥ मत्ता भक्ष्यार्थिनो बाला वैरसक्तास्तथैव च ॥ ३१ ॥ सीमान्तमभ्यन्तरिता विज्ञेया निष्फला द्विज ॥ एकद्वित्रिचतुर्भिस्तु शिवा धन्या रुतैर्भवेत् ॥ ॥ ३२ ॥ पञ्चभिश्च तथा षड्भिरधन्या परिकीर्त्तिता ॥ सप्तभिश्च तथा धन्या निष्फला परतो भवेत् ॥ ३३ ॥ नृणां रोमाञ्चजननी वाहनानां भयप्रदा ॥ ज्वालानला सूर्य्यमुखी विज्ञेया भयवर्धिनी ॥ ३४ ॥ प्रथमं सारङ्गे दृष्टे शुभे देशे शुभं वदेत् ॥ संवत्सरं मनुष्यस्य ह्यशुभे च शुभं तथा ॥ ३५ ॥ तथाविधं नरः पश्येत्सारङ्गं प्रथमेऽहनि ॥ आत्मनश्च तथात्वेन ज्ञातव्यं वत्सरं फलम् ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये शकुननिरूपणं नामैकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥ पुनः शकुनानि ॥ पुष्कर उवाच ॥ विशन्ति येन मार्गेण वायसा वहवः पुरम् ॥ तेन मार्गेण रुद्धस्य पुरस्य ग्रहणं भवेत् ॥ १ ॥ सेनायां यदि वासार्थे निविष्टो वायसो रुदन् ॥ वामो भयातुरस्त्रस्तो भयं वदति दुस्तरम् ॥ २ ॥ छायाङ्गवाहनोपानच्छत्रवस्त्रादिकुट्टने ॥ मृत्युस्तत्पूजने पूजा तादिष्टकरणे शुभम् ॥ ३ ॥ प्रोषितागमकृत्काकः कुर्वन्द्वारि गतागतम् ॥ रक्तं दग्धं गृहे द्रव्यं क्षिपन्वाह्निवेदकः ॥ ४ ॥ न्यसेद्रक्तं पुरस्ताच्च निवेदयति बन्धनम् ॥ पीतं द्रव्यं तथा रुक्म रूप्यमेव तु भार्गव ॥५॥ यच्चैवोपनयेद्द्रव्यं तस्य लब्धिं विनिर्दिशेत् ॥ द्रव्यं वापनयेद्यस्तु तस्य हानिं विनिर्दिशेत् ॥ ६॥ पुरतो धनलब्धिः स्यादाममांसस्य च्छर्दने ॥ भूलाब्धिः स्यान्मृदः क्षेपे राज्यं रत्नार्पणे महत् ॥ ७ ॥ यातुः काकोऽनुकूलस्तु क्षेमः कर्मक्षमो भवेत् ॥ न त्वर्थसाधको ज्ञेयः प्रतिकूलो भयावहः ॥ ८ ॥ सम्मुखऽभ्येति विरुदन्यात्राघातकरो भवेत् ॥ वामः काकः स्मृतो धन्यो दक्षिणोऽर्थविनाशकृत् ॥ ९ ॥ वामोऽनुलोमगः श्रेष्ठो मध्यमो दक्षिणः स्मृतः ॥ प्रतिलोमगतिर्वामो गमनप्रतिषेधकृत् ॥ १० ॥ निवेदयति यात्रार्थमभिप्रेतं गृहे गतः ॥ एकाक्षिचरणस्त्वर्कं वक्षिमाणो भयावहः ॥ ११ ॥ कोटरे वसमानश्च महानर्थकरो भवेत् ॥ न शुभस्तूपरे काकः पङ्काङ्गः स तु शस्यते ॥ १२॥ अमेध्यपूर्णवदनः काकः सर्वार्थसाधकः ॥ ज्ञेयाः पतत्रिणोऽन्येपि काकवद्भृगुनन्दन ॥१३॥ स्कन्धावारापसव्यस्थाः श्वानो विप्रविनाशकाः ॥ इन्द्रस्थाने नरेन्द्रस्य पुरेशस्य तु गोपुरे ॥१४॥ अन्तर्गृहे गृहेशस्य मरणाय भवेद्रपन् ॥ यस्य जिघ्रति वामाङ्गं तस्य स्यादर्थसिद्धये॥ १५॥ भयाय दक्षिणं चाङ्गं तथा भुजमदक्षिणम् ॥ यात्राघातकरो यातुर्भवेत्प्रतिमुखागतः ॥१६॥

मार्गावरोधको मार्गे चौरान्वदति भार्गव ॥ अलाभोऽस्थिमुखः पापो रज्जुक्षीरमुखस्तथा ॥ १७ ॥ सोपानत्कमुखो धन्यो मांसपूर्णमुखोऽपि च ॥ अमङ्गल्यमुखद्रव्यं केशं चैवाऽशुभं तथा ॥१८॥ अग्रभूव्याग्रतो याति यस्य तस्य भयं भवेत् ॥ यस्यावभूय व्रजति शुभं देशं तथा द्रुमम् ॥१९॥ मङ्गल्यं च तथा द्रव्यं तस्य स्यादर्थसिद्धये ॥ श्ववच्च गम विज्ञेयास्तथा वै जम्बुकादयः ॥२०॥ भयाय स्वामिनो ज्ञेयम-निमित्तं रुतं गवाम् ॥ निशि चौरभयाय स्याद्विकृतं मृत्यवे तथा ॥२१॥ शिवाय स्वामिनो रात्रौ बलीवर्दो नदन्भवेत् ॥ उत्सृष्टवृषभो राज्ञो विजयं सम्प्रयच्छति ॥२२॥ अभयं भक्षयन्त्यश्च गावो दत्तास्तथा स्वकाः॥त्यक्तस्नेहाः स्ववत्सेषु गर्भक्षयकरा मताः॥२३॥ भूमिं पादैर्विनि-घ्नन्त्यो दीना भीता भयावहाः ॥ आर्द्राङ्ग्यो हृष्टरोमाश्च शृङ्गलग्नमृदः शुभाः ॥ २४ ॥ महिष्यादिषु चाप्येतत्सर्वं वाच्यं विजानता ॥ आरोहणं तथाऽन्येन सपर्य्याणस्य वाजिनः ॥ २५ ॥ जलोपवेशनं नेष्टं भूमौ च परिवर्त्तनम् ॥ विपत्करं तुरङ्गस्य सुप्तं वाप्यनिमित्ततः ॥ २६ ॥ यवमोदकयोर्भक्षस्त्वकस्मात्च न शस्यते ॥ वदनाद्रुधिरोत्पत्तिर्वेपनं न च शस्यते ॥ २७ ॥ क्रीडन्वकेः कपोतैश्च सारि-काभिर्मृतिं वदेत् ॥ साश्रुनेत्रो जिह्वया च पादलेही विनष्टये ॥ २८ ॥ वामपादेन च तथा विलिखंश्च वसुन्धराम् ॥ स्वपेद्वा वामपा-र्श्वेन दिवा वा न शुभप्रदः ॥ २९ ॥ भयाय स्यात्सकृन्मूत्रं तथा निद्राविलाननः ॥ आरोहणं न चेदद्यात्प्रतीपं वा गृहं व्रजेत् ॥ ३० ॥ यात्राविघातमाचष्टे वामपार्श्वं तथा स्पृशन् ॥ हेषमाणः शत्रुयोधं पादस्पर्शी जयावहः ॥ ३१ ॥ ग्रामे व्रजति नागश्चेन्मैथुनं देशहा भवेत् ॥ प्रसूता नागवनिता मत्ता चान्नाय भूपतेः ॥ ३२ ॥ आरोहणं न चेदद्यात्प्रतीपं वा गृहं व्रजेत् ॥ मदं वा वारणो जह्याद्राज-घातकरो भवेत् ॥ ३३ ॥ वामं दक्षिणपादेन पादमाक्रमते शुभः ॥ दक्षिणं च तथा दन्तं परिमार्ष्टि करेण च ॥ ३४ ॥ वृषोऽश्वः कुञ्जरो वापि रिपुसैन्यगतोऽशुभः ॥ खण्डमेघातिवृष्ट्या तु सेना नाशमवाप्नुयात् ॥ ३५ ॥ प्रतिकूलग्रहर्क्षात्तु तथा सम्मुखमारुतात् ॥ यात्रा-काले रणे वापि छत्रादिपतनं भयम् ॥ ३६ ॥ दृष्टा नराश्चानुलोमा ग्रहा वै जयलक्षणम् ॥ काकैर्योधाभिभवनं क्रव्याद्भिर्मण्डलक्षयः ॥ प्राचीपश्चिमकैशानी सौम्या प्रेष्ठा शुभा च दिक् ॥ ३७ ॥ इत्यादिमहापुराणे आग्नेये शकुननिरूपणं नाम द्वात्रिंशदधिकद्विशततमोऽ-ध्यायः ॥ २३२ ॥ अथ यात्रामण्डलचिन्तादिः ॥ पुष्कर उवाच ॥ सर्वयात्रां प्रवक्ष्यामि राजधर्मसमाश्रयात् ॥ अस्तङ्गते नीचगते विकले

रिपुराशिगे ॥ १ ॥ प्रतिलोमे च विध्वस्ते शुक्रे यात्रां विसर्जयेत् ॥ प्रतिलोमे बुधे यात्रां दिक्पतौ च तथा ग्रहे ॥२॥ वैधृतौ च व्यतीपाते नागे च शकुनौ तथा ॥ चतुष्पादे च किंस्तुघ्ने तथा यात्रां विवर्जयेत् ॥३॥ विपत्तारे नैधने च प्रत्यरौ चाथ जन्मनि ॥ गण्डे विवर्जयेद्यात्रां रिक्तायां च तिथावपि ॥ ४ ॥ उदीची च तथा प्राची तयोरैक्यं प्रकीर्त्तितम् ॥ पश्चिमा दक्षिणा या दिक्तयोरैक्यं तथैव च ॥ ५ ॥ वाय्व ग्निदिक्समुद्भूतं परिघं न तु लङ्घयेत् ॥ आदित्यचन्द्रसौराम्तु दिवसाश्च न शोभनाः ॥६॥ कृत्तिकाद्यानि पूर्वेण मघाद्यानि च याम्यतः ॥ मैत्राद्यान्यपरे चाथ वासवाद्यानि वाप्युदक् ॥ ७ ॥ सर्वद्वाराणि शस्तानि च्छायामानं वदामि ते ॥ आदित्ये विंशतिर्ज्ञेया चन्द्रे षोडश कीर्त्तिताः ॥८॥ भौमे पञ्चदशैवोक्ताश्चतुर्दश तथा बुधे ॥ त्रयोदश तथा जीवे शुक्रे द्वादश कीर्त्तिताः ॥ ९ ॥ एकादश तथा सौरे सर्व-कर्मसु कीर्त्तिताः ॥ जन्मलग्ने शक्रचापे सम्मुखे न व्रजेन्नरः ॥ १० ॥ शकुनादौ शुभे यायाज्जयाय हरिमास्मरन् ॥ वक्ष्ये मण्डलचिन्तां ते कर्त्तव्यं राजरक्षणम्॥ ११ ॥ स्वाम्यमात्यं तथा दुर्गं कोशो दण्डस्तथैव च ॥ मित्रं जनपदश्चैव राज्यं सप्ताङ्गमुच्यते ॥ १२ ॥ सप्ताङ्गस्य तु राज्यस्य विघ्नकर्तृन्विनाशयेत् ॥ मण्डलेषु च सर्वेषु वृद्धिः कार्य्या महीक्षिता ॥ १३ ॥ आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत् ॥ सामन्तास्तस्य विज्ञेया रिपवो मण्डलस्य तु ॥ १४ ॥ उपेतस्तु सुहृज्ज्ञेयः शत्रुमित्रमतःपरम् ॥ मित्रमित्रं ततो ज्ञेयं मित्रमित्रारिपुस्ततः ॥ ॥ १५ ॥ एतत्पुरस्तात्कथितं पश्चादपि निबोध मे ॥ पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रन्द उच्यते ॥ १६ ॥ आसारस्तु ततोऽन्यः स्यादाक्रन्दासार उच्यते ॥ जिगीषोः शत्रुयुक्तस्य विमुक्तस्य तथा द्विज ॥ १७ ॥ नात्रापि निश्चयः शक्यो वक्तुं मनुजपुङ्गव ॥ निग्र-हानुग्रहे शक्तो मध्यस्थः परिकीर्त्तितः ॥ १८ ॥ निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत् ॥ उदासीनः स कथितो बलवान्पृथिवीपतिः ॥ १९ ॥ न कस्यचिद्रिपुर्मित्रं कारणाच्छत्रुमित्रके ॥ मण्डलं नव सम्प्राक्तमेतद्दशराजकम् ॥ २० ॥ त्रिविधा रिपवो ज्ञेयाः कुल्यान-न्तरकृत्रिमाः ॥ पूर्वपूर्वा गुरुस्तेषां दुश्चिकित्स्यतमो मतः ॥ २१ ॥ अनन्तरोऽपि यः शत्रु सोपि मे कृत्रिमो मतः ॥ पार्ष्णिग्राहो भवेच्छत्रोर्मित्राणि रिपवस्तथा ॥ २२ ॥ पार्ष्णिग्राहमुपायैश्च शमयेच्च तथा स्वकम् ॥ मित्रेण शत्रोरुच्छेदं प्रशंसन्ति पुरातनाः ॥ २३ ॥ मित्रं च शत्रुतामेति सामन्तत्वादनन्तरम् ॥ शत्रुं जिगीषुरुच्छिन्द्यात्स्वयं शक्नोति चेद्यदि ॥ २४ ॥ प्रतापवृद्धौ तेनापि नामित्राज्जायते

भयम् ॥ यथास्य नोद्विजेल्लोको विश्वासश्च यथा भवेत् ॥ जिगीषुर्धर्मविजयी तथा लोकं वशं नयेत् ॥ २९ ॥ इत्यादिमहापुराणे आग्नेये यात्रामण्डलचिन्तादिकं नाम त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥ अथ षाड्गुण्यम् ॥ पुष्कर उवाच ॥ सामभेदौ मया प्रोक्तौ दानदण्डौ तथैव च ॥ दण्डः स्वदेशे कथितः परदेशे ब्रवीमि ते ॥ १ ॥ प्रकाशश्चाप्रकाश्च द्विविधो दण्ड उच्यते ॥ लुण्ठनं ग्रामघातश्च सस्यघातोऽग्निदीपनम् ॥ २ ॥ प्रकाशोऽथ विषं वह्निर्विविधैः पुरुषैर्वधः ॥ दूष्यं चैव साधूनामुदकानां च दूषणम् ॥ ३ ॥ दण्डप्रणयनं प्रोक्तमुपेक्षां शृणु भार्गव ॥ यदा मन्येत नृपतीं रणेन मम विग्रहः ॥ ४ ॥ अनर्थायानुबन्धः स्यात्सन्धिना च तथा भवेत् ॥ सामलब्धास्पदं चात्र दानं चार्थक्षयङ्करम् ॥ ५ ॥ भेददण्डानुबन्धः स्यात्तदोपेक्षां समाश्रयेत् ॥ न चायं मम शक्नोति किञ्चित्कर्त्तुमुपद्रवम् ॥ ६ ॥ न चाहमस्य शक्नोमि तत्रोपेक्षां समाश्रयेत् ॥ अवज्ञोपहतस्तत्र राज्ञा कार्य्यो रिपुर्भवेत् ॥ ७ ॥ मायोपायं प्रवक्ष्यामि उत्पातैरनृतैश्चरन् ॥ शत्रोरुद्वेजनं शत्रोः शिविरस्थस्य पक्षिणः ॥ ८ ॥ स्थूलस्य तस्य पुच्छस्थां कृत्वोल्कां विपुलां द्विज ॥ विसृजेच्च ततश्चैवमुल्कापातं प्रदर्शयेत् ॥ ९ ॥ एवमन्ये दर्शनीया उत्पाता बहवोऽपि च ॥ उद्वेजनं तथा कुर्य्यात्कुहकैर्विविधैर्द्विषाम् ॥ १० ॥ सांवत्सरास्तापसाश्च नाशं ब्रूयुः परस्य च ॥ जिगीषुः पृथिवीं राजा तेन चोद्वेजयेत् परान् ॥ ११ ॥ देवतानां प्रसादश्च कीर्तनीयः परस्य तु ॥ आगतं नोऽमित्रबलं प्रहरध्वमभीतवत् ॥ १२ ॥ एवं ब्रूयाद्रणे प्राप्ते भग्नाः सर्वे परे इति ॥ क्ष्वेडाः किलकिलाः कार्य्या वाच्यः शत्रुर्हतस्तथा ॥ १३ ॥ देवाज्ञाबृंहितो राजा सन्नद्धः समरं प्रति ॥ इन्द्रजालं प्रवक्ष्यामि चेन्द्रं कालेन दर्शयेत् ॥ १४ ॥ चतुरङ्गं बलं राजा सहायार्थं दिवौकसाम् ॥ बलं तु दर्शयेत्प्राप्तं रक्तवृष्टिं चरेद्रिपौ ॥ १५ ॥ छिन्नानि रिपुशीर्षाणि प्रासादाग्रेषु दर्शयेत् ॥ षाड्गुण्यं सम्प्रवक्ष्यामि तद्वरौ सन्धिविग्रहौ ॥ १६ ॥ सन्धिश्च विग्रहश्चैव यानमासनमेव च ॥ द्वैधभावः संश्रयश्च षड्गुणाःपरिकीर्त्तिताः ॥ १७ ॥ पणबन्धः स्मृतः सन्धिरपकारस्तु विग्रहः ॥ जिगीषोः शत्रुविषये यानं यात्राऽभिधीयते ॥ १८ ॥ विग्रहेण स्वके देशे स्थितिरासनमुच्यते ॥ बलार्द्धेन प्रयाणं तु द्वैधीभावः स उच्यते ॥ १९ ॥ उदासीनो मध्यमो वा संश्रयात्संश्रयः स्मृतः ॥ समेन सन्धिरन्वेष्योऽहीनेन च बलीयसा ॥ २० ॥ हीनेन विग्रहः कार्य्यः स्वयं राज्ञा बलीयसा ॥ तत्रापि

शुद्धपार्ष्णिस्तु बलीयांसं समाश्रयेत् ॥ २१ ॥ आसीनः कर्मविच्छेदं शक्तः कर्त्तुं रिपोर्यदा ॥ अशुद्धपार्ष्णिश्चासीत विगृह्य वसुधाधिपः ॥ २२ ॥ अशुद्धपार्ष्णिर्बलवान्द्वैधीभावं समाश्रयेत् ॥ बलिना विगृहीतस्तु योऽसन्देहेन पार्थिवः ॥ २३ ॥ संश्रयस्तेन वक्तव्यो गुणानामधमो गुणः ॥ बहुव्ययव्ययायासं तेषां यानं प्रकीर्त्तितम् ॥ २४ ॥ बहुलाभकरं पश्चात्तदा राजा समाश्रयेत् ॥ सर्वशक्तिविहीनस्तु तदा कुर्य्यात्तु संश्रयम् ॥ २५ ॥ इत्यादिमहापुराणे आग्नेये उपायषड्गुणादिकं नाम चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥ अथ राज्ञो दिनचर्या ॥ पुष्कर उवाच ॥ अजस्रं कर्म वक्ष्यामि दिनं प्रति यदाचरेत् ॥ द्विमुहूर्त्तावशेषायां रात्रौ निद्रां त्यजेन्नृपः ॥ १ ॥ वाद्यवन्दिस्वनैर्गीतैः पश्येद्गूढांस्ततो नरान् ॥ विज्ञायते न ये लोकास्तदीया इति केनचित् ॥ २ ॥ आयव्ययस्य श्रवणं ततः कार्य्यं यथाविधि ॥ वेगोत्सर्गं ततः कृत्वा राजा स्नानगृहं व्रजेत् ॥ ३ ॥ स्नानं कुर्य्यान्नृपः पश्चादन्तर्धावन्पूर्वकम् ॥ कृत्वा सन्ध्यां ततो जप्यं वासुदेवं प्रपूजयेत् ॥ ४ ॥ वह्नौ पवित्राञ्जुहुयात्तर्पयेदुदकैः पितॄन् ॥ दद्यात्सकाञ्चनीं धेनुं द्विजाशीर्वादसंयुतः ॥ ५ ॥ अनुलिप्तोऽलंकृतश्च मुखं पश्येच्च दर्पणे ॥ ससुवर्णं घृते राजा शृणुयादिवसादिकम् ॥ ६ ॥ औषधं भिषजोक्तं च मङ्गलालम्भनं चरेत् ॥ पश्येद्गुरुं तेन दत्ताशीर्वादोऽथ व्रजेत्सभाम् ॥ ७ ॥ तत्रस्थो ब्राह्मणान्पश्येदमात्यान्मन्त्रिणस्तथा ॥ प्रकृतीश्च महाभाग प्रतीहारनिवेदिताः ॥ ८ ॥ श्रुत्वेतिहासं कार्य्याणि कार्य्याणां कार्य्यनिर्णयम् ॥ व्यवहारं ततः पश्येन्मन्त्रं कुर्य्यात्तु मन्त्रिभिः ॥ ९ ॥ नैकेन सहितः कुर्य्यान्न कुर्य्याद्बहुभिः सह ॥ न च मूर्खेण चानार्त्तगुप्तं न प्रकटं चरेत् ॥ १० ॥ मन्त्रं स्वधिष्ठितं कुर्य्याद्येन राष्ट्रं न बाधते ॥ आकारग्रहणे राज्ञो मन्त्ररक्षा परा मता ॥ ११ ॥ आकारैरिङ्गितैः प्राज्ञा मन्त्रं गृह्णन्ति पण्डिताः ॥ सांवत्सराणां वैद्यानां मन्त्रिणां वचने रतः ॥ १२ ॥ राजा विभूतिमाप्नोति धारयन्ति नृपं हि ते ॥ मन्त्रं कृत्वाथ व्यायामं चक्रे याने च शस्त्रके ॥ १३ ॥ निःसत्त्वा (युद्धा) दौ नृपः स्नातः पश्येद्विष्णुं सुपूजितम् ॥ हुतं च पावकं पश्येद्विप्रान्पश्येत्सुपूजितान् ॥ १४ ॥ भूषितो भोजनं कुर्य्यादानाद्यैः सुपरीक्षितम् ॥ भुक्त्वा गृहीतताम्बूलो वामपार्श्वेन संस्थितः ॥ १५ ॥ शास्त्राणि चिन्तयेद्वह्वा योधान्कोष्ठायुधं गृहम् ॥ अन्वास्य पश्चिमां सन्ध्यां कार्य्याणि च विचिन्त्य तु ॥ १६ ॥ चरान्सम्प्रेष्य भुक्त्वान्नमन्तःपुरचरो भवेत् ॥ वाद्यगीतैः रक्षितोऽन्यैरेवं नित्यं चरेन्नृपः ॥ १७ ॥ इत्यादिमहा-

पुराणे आग्नेये राज्ञो दिनचर्य्या नाम पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥ अथ रणदीक्षा ॥ पुष्कर उवाच ॥ यात्राविधानपूर्वं तु वक्ष्ये साङ्ग्रामिकं विधिम् ॥ सप्ताहेन यदा यात्रा भविष्यति महीपतेः ॥ १ ॥ पूजनीयो हरिः शम्भुर्मोदकाद्यैर्विनायकः ॥ द्वितीयेऽहनि दिक्पालान्सम्पूज्य शयनं चरेत् ॥ २ ॥ शय्यायां वा तदग्रेऽथ देवान्प्रार्च्य मनुं स्मरेत् ॥ नमः शम्भो त्रिनेत्राय रुद्राय वरदाय च ॥ ३ ॥ वामनाय विरूपाय स्वप्नाधिपतये नमः ॥ भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ ४ ॥ इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वत ॥ यज्ञाग्रतो दूरमिति पुरोधा मन्त्रमुच्चरेत् ॥ ५ ॥ तृतीयेऽहनि दिक्पालान्रुद्रांस्तान्दिक्पतीन्यजेत् ॥ ग्रहान्यजेच्चतुर्थेऽह्नि पञ्चमे चाश्विनौ यजेत् ॥ ६ ॥ मार्गे या देवतास्तासां नद्यादीनां च पूजनम् ॥ दिव्यान्तरिक्षभौमस्थदेवानां च तथा बलिः ॥ ७ ॥ रात्रौ भूतगणानां वासुदेवादेश्च पूजनम् ॥ भद्रकाल्याः श्रियः कुर्य्यात्प्रार्थयेत्सर्वदेवताः ॥ ८ ॥ वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ नारायणोऽब्जजो विष्णुर्नारसिंहो वराहकः ॥ ९ ॥ शिव ईशस्तत्पुरुषो ह्यघोरो राम सत्यजः ॥ सूर्य्यः सोमः कुजश्चान्द्रिजीवशुक्रशनैश्चराः ॥ १० ॥ राहुः केतुर्गणपतिः सेनानीश्चण्डिका ह्युमा ॥ लक्ष्मीः सरस्वती दुर्गा ब्रह्माणीप्रमुखा गणाः ॥ ११ ॥ रुद्रा इन्द्रादयो वह्निर्नागास्तार्क्ष्योऽपरे सुराः ॥ दिव्यान्तरिक्षभूमिष्ठा विजयाय भवन्तु मे ॥ १२ ॥ मर्दयन्तु रणे शत्रून्सम्यगृह्योपहारकम् ॥ सपुत्रमातृभृत्योऽहं देवा वः शरणं गतः ॥ १३ ॥ चमूनां पृष्ठतो गत्वा रिपुनाशो नमोऽस्तु वः ॥ विनिवृत्तः प्रदास्यामि दत्तादभ्यधिकं बलिम् ॥ १४ ॥ षष्ठेऽह्नि विजयस्नानं कर्त्तव्यं चाभिषेकवत् ॥ यात्रादिने सप्तमे च पूजयेच्च त्रिविक्रमम् ॥ १५ ॥ नीराजनोक्तमन्त्रैश्च आयुधं वाहनं यजेत् ॥ पुण्याहजयशब्देन मन्त्रमेतन्निशामयेत् ॥ १६ ॥ दिव्यान्तरिक्षभूमिष्ठाः सन्त्वायुर्दाः सुराश्च ते ॥ देवासिद्धिं प्रयुञ्जन्तु त्वं देवयात्रास्तु सा तव ॥ १७ ॥ रक्षन्तु देवताः सर्वा इति श्रुत्वा नृपो व्रजेत् ॥ गृहीत्वा सशरं चापं धनुर्नागेति मन्त्रतः ॥ १८ ॥ तद्विष्णोरिति जप्त्वाथ दद्याद्रिपुमुखे पदम् ॥ दक्षिणं पदं द्वात्रिंशद्दिक्षु प्राच्यादिषु क्रमात् ॥ १९ ॥ नागं रथं हयं चैव धुर्य्यांश्चैवारुहेत्क्रमात् ॥ आरुह्य वाद्यैर्गच्छेत्तु पृष्ठतो नावलोकयेत् ॥ २० ॥ क्रोशमात्रं गतस्तिष्ठेत्पूजयेद्देवता द्विजान् ॥ परदेशं व्रजेत्पश्चादात्मसैन्यं हि पालयन् ॥ २१ ॥ राजा प्राप्य विदेशं तु देशपालं तु पालयेत् ॥ देवानां पूजनं कुर्य्यान्नच्छिन्द्यादायमत्र तु ॥ २२ ॥ नाव-

मानयेत्तद्देश्यानागत्य स्वपुरं पुनः ॥ जयं प्राप्यार्च्चयेद्देवान्दद्याद्दानानि पार्थिवः ॥ २३ ॥ द्वितीयेऽहनि सङ्ग्रामो भविष्यति यदा तदा ॥ स्नापयेद्वृजमश्वादि यजेद्देवं नृसिंहकम् ॥ २४ ॥ छत्रादिराजलिङ्गानि शस्त्राणि निशि वै गणान् ॥ प्रातर्नृसिंहकं पूज्य वाहनाद्यमशेषतः ॥ २५ ॥ पुरोधसा हुतं पश्येद्वह्निं हुत्वा द्विजान्यजेत् ॥ गृहीत्वा सशरं चापं गजाद्यारुह्य वै व्रजेत् ॥ २६ ॥ देशे त्वदृश्यः शत्रूणां कुर्य्यात्प्रकृतिकल्पनाम् ॥ संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ॥ २७ ॥ सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ॥ व्यूहाः प्राण्यङ्गरूपाश्च द्रव्यरूपाश्च कीर्तिताः ॥ २८ ॥ गरुडो मकरव्यूहश्चक्रः श्येनस्तथैव च ॥ अर्द्धचन्द्रश्च वज्रश्च शकटव्यूह एव च ॥ २९ ॥ मण्डलं सर्वतोभद्रः सूचीव्यूहश्च ते नराः ॥ व्यूहानामथ सर्वेषां पञ्चधा सैन्यकल्पना ॥ ३० ॥ द्वौ पक्षावनुपक्षौ द्वाववश्यं पञ्चमं भवेत् ॥ एकेन यदि वा द्वाभ्यां भागाभ्यां युद्धमाचरेत् ॥ ३१ ॥ भागत्रयं स्थापयेत्तु तेषां रक्षार्थमेव च ॥ न व्यूहकल्पना कार्य्या राज्ञो भवति कर्हिचित् ॥ ३२ ॥ मूलच्छेदे विनाशः स्यान्न युध्येच्च स्वयं नृपः ॥ सैन्यस्य पश्चात्तिष्ठेत्तु क्रोशमात्रे महीपतिः ॥ ३३ ॥ भग्नसन्धारणं तत्र योधानां परिकीर्त्तितम् ॥ प्रधानभङ्गे सैन्यस्य नावस्थानं विधीयते ॥ ३४ ॥ न संहतान्न विरलान्योधान् व्यूहे प्रकल्पयेत् ॥ आयुधानां तु सम्मर्दो यथा न स्यात्परस्परम् ॥ ३५ ॥ भेत्तुकामः परानीकं संहतैरेव भेदयेत् ॥ भेदरक्ष्याः परेणापि कर्त्तव्याः संहतास्तथा ॥ ३६ ॥ व्यूहं भेदावहं कुर्य्यात्परव्यूहेषु चेच्छया ॥ गजस्य पादरक्षार्थाश्चत्वारस्तु तथा द्विज ॥ ३७ ॥ रथस्य चाश्वाश्चत्वारः समास्तस्य च चर्मिणः ॥ धन्विनश्चर्मिभिस्तुल्याः पुरस्ताच्चर्मिणो रणे ॥ ३८ ॥ पृष्ठतो धन्विनः पश्याद्धन्विनां तुरगा स्थाः ॥ रथानां कुञ्जराः पंश्चाद्दातव्याः पृथिवीक्षिता ॥ ३९ ॥ पदाति कुञ्जराश्वानां धर्मकार्य्ये प्रयत्नतः ॥ शूराः प्रमुखतो देयाः स्कन्धमात्रप्रदर्शनम् ॥ ४० ॥ कर्त्तव्यं भीरु सङ्घेन शत्रुविद्रावकारकम् ॥ दाग्यन्ति पुरस्तानु न देया भीरवः पुरः ॥ ४१ ॥ प्रोत्साहयन्त्येव रणे भीरून्शूराः पुरः स्थिताः ॥ प्रांशवः शुकनासाश्च ये चाजिह्मेक्षणा नराः ॥ ४२ ॥ संहतभ्रूयुगाश्चैव क्रोधनाः कलहप्रियाः ॥ नित्यहृष्टाः प्रहृष्टाश्च शूराः ज्ञेयाश्च कामिनः ॥ ४३ ॥ संहतानां हतानां च रणापनयनक्रिया ॥ प्रतियुद्धं गजानां च तोयदानादिकं च यत् ॥ ४४ ॥ आयुधानयनं चैव पत्तिकर्म विधीयते ॥ रिपूणां भेत्तुकामानां स्वसैन्यस्य तु रक्षणम् ॥ ४५ ॥ भेदनं संहतानां च

चर्मिणां कर्म कीर्त्तितम् ॥ विमुखीकरणं युद्धे धन्विनां च तथोच्यते ॥ ४६ ॥ दूरापसरणं यानं सुहृतस्य तथोच्यते ॥ त्रासनं रिपुसै-न्यानां रथकर्म तथोच्यते ॥ ४७ ॥ भेदनं संहतानां च भेदानामपि संहतिः ॥ प्राकारतोरणाट्टालद्रुमभङ्गश्च सद्मजे ॥ ४८ ॥ पत्तिभू-र्विषमा ज्ञेया रथाश्वस्य तथा समा ॥ सङ्कर्दमा च नागानां युद्धभूमिरुदाहृता ॥ ४९ ॥ एवं विरचितव्यूहः कृतपृष्ठदिवाकरः ॥ तथानुलो-मशुक्रार्किदिक्पालमरुद्गणाः ॥ ५० ॥ योधानुत्तेजयेत्सर्वान्नामगोत्रावदानतः ॥ भोगप्राप्त्या च विजये स्वर्गप्राप्त्या मृतस्य च ॥ ५१ ॥ जित्वारीन्भोगसम्प्राप्तिर्मृतस्य च परा गतिः ॥ निष्कृतिः स्वामिपिण्डस्य नास्ति युद्धसमा गतिः ॥ ५२ ॥ शूराणां रक्तमायाति तेन पापं त्यजन्ति ते ॥ घातादिदुःखसहनं रणे तत्परमं तपः ॥ ५३ ॥ वराप्सरःसहस्राणि यान्ति शूरं रणे मृतम् ॥ स्वामी सुकृतमादत्ते भग्नानां विनिवर्त्तिनाम् ॥ ५४ ॥ ब्रह्महत्याफलं तेषां तथा प्रोक्तं पदे पदे ॥ त्यक्त्वा सहायान्यो गच्छेद्देवास्तस्य विनष्टये ॥ ५५ ॥ अश्वमेधफलं प्रोक्तं शूराणामनिवर्त्तिनाम् ॥ धर्मनिष्ठे जयो राज्ञि योद्धव्याश्च समाः समैः ॥ ५६ ॥ गजाद्यैश्च गजाद्याश्च न हन्तव्याः पलायिनः ॥ न प्रेक्षकाः प्रविष्टाश्च ह्यशस्त्राः पतितादयः ॥ ५७ ॥ शान्ते निद्राभिभूते च अर्द्धोत्तीर्णे नदीवने ॥ दुर्दिने कूटयुद्धानि शत्रु-नाशार्थमाचरेत् ॥ ५८ ॥ बाहू प्रगृह्य विक्रोशेद्भग्ना भग्नाः परे इति ॥ प्राप्तं मित्रं बलं भूरि नायकोऽत्र निपातितः ॥ ५९ ॥ सेनानी-र्निहतश्चायं भूपतिश्चापि विप्लुतः ॥ विद्रुतानां तु योधानां सुखं घातो विधीयते ॥ ६० ॥ धूपाश्च देया धर्मज्ञ तथा च परमोहनाः ॥ पता-काश्चैव सम्भारो वादित्राणां भयावहः ॥ ६१ ॥ सम्प्राप्य विजयं युद्धे देवान्विप्रांश्च संयजेत् ॥ रत्नानि राजगामीनि अमात्येन कृते रणे ॥ ६२ ॥ तस्य स्त्रियो न कस्यापि रक्ष्यास्ताश्च परस्य च ॥ शत्रुं प्राप्य रणे मुक्तं पुत्रवत्परिपालयेत् ॥ ६३ ॥ पुनस्तेन न योद्धव्यं देशा-चारादि पालयेत् ॥ ततश्च स्वपुरं प्राप्य ध्रुवे भे प्रविशेद्गृहम् ॥ ६४ ॥ देवादिपूजनं कुर्य्याद्रक्षेद्योधकुटुम्बकम् ॥ संविभागं परावाप्तेः कुर्य्याद्भृत्यजनस्य च ॥ रणदीक्षा मयोक्ता ते जयाय नृपतेर्ध्रुवा ॥ ६५ ॥ इत्यादिमहापुराणे आग्नेये रणदीक्षा नाम षट्त्रिंशदधिकद्विशत-तमोऽध्यायः ॥२३६॥ अथ श्रीस्तोत्रम् ॥ पुष्कर उवाच ॥ राजलक्ष्मीस्थिरत्वाय यथेन्द्रेण पुरा श्रियः ॥ स्तुतिः कृता तथा राजा जयार्थं स्तुतिमाचरेत् ॥ १ ॥ इन्द्र उवाच ॥ नमस्ये सर्वलोकानां जननीमब्धिसम्भवाम् ॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ २ ॥

त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनि ॥ सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥ ३ ॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने॥आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥४॥ आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च ॥ सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ ५ ॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ॥ अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ ६ ॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ॥ विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ ७ ॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् ॥ भवन्त्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥८॥ शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥९॥ त्वमम्बा सर्वभूतानां देवदेवो हरिः पिता ॥ त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥ १० ॥ मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ ११ ॥ मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणम् ॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥ सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ॥ त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥ १३ ॥ त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्य्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १४ ॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥ १५ ॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥ न ते वर्णयितुं शक्ता गुणाञ्जिह्वापि वेधसः ॥ प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥ १७ ॥ पुष्कर उवाच ॥ एवं स्तुता ददौ श्रीश्च वरमिन्द्राय चेप्सितम् ॥ सुस्थिरत्वं च राज्यस्य सङ्ग्रामविजयादिकम् ॥ १८ ॥ स्वस्तोत्रपाठश्रवणकर्तॄणां भुक्तिमुक्तिदम् ॥ श्रीस्तोत्रं सततं तस्मात्पठेच्च शृणुयान्नरः ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये श्रीस्तोत्रं नाम सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥ अथ राम्मेकनीतिः ॥ अग्निरुवाच ॥ नीतिमत्ते पुष्करोक्ता तु रामोक्ता लक्ष्मणाय या ॥ जयाय तां प्रवक्ष्यामि शृणु धर्मादिवर्द्धिनीम् ॥ १ ॥ राम उवाच ॥ न्यायेनार्जनमर्थस्य वर्द्धनं रक्षणं चरेत् ॥ सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥२॥ नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात् ॥ विनयो हीन्द्रियजयस्तेर्युक्तः पालयेन्महीम् ॥ ३ ॥ शास्त्रे प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता ॥ उत्साहो वाग्मितौदार्य्यमापत्कालसहिष्णुता ॥ ४ ॥

प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता ॥ कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः ॥ ५ ॥ प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम् ॥ ज्ञानाङ्कुशेन कुर्वीत वश्यमिन्द्रियदन्तिनम् ॥ ६ ॥ कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ॥ षड्वर्गमुत्सृजेदेनमस्मिन्त्यक्ते सुखी नृपः ॥ ७ ॥ आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिं च पार्थिवः ॥ तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद्विनयान्वितः ॥ ८ ॥ आन्वीक्षिक्यार्थविज्ञानं धर्माधर्मौ त्रयीस्थितौ ॥ अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ ॥ ९ ॥ अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा ॥ वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥ १० ॥ प्रजाः समनुगृह्णीयात्कुर्य्यादाचारसंस्थितिम् ॥ वाक्सूनृता दया दानं हीनोपगतरक्षणम् ॥ ११ ॥ इतिवृत्तं सतां साधुहितं सत्पुरुषव्रतम् ॥ आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ॥ १२ ॥ को हि राजा शरीराय धर्मापेतं समाचरेत् ॥ न हि स्वसुखमन्विच्छन्पीडयेत्कृपणं जनम् ॥ १३ ॥ कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ॥ क्रियतेऽभ्यर्हणीयाय स्वजनाय यथाञ्जलिः ॥ १४ ॥ ततः साधुतरः कार्यो दुर्जनाय शिवार्थिना ॥ प्रियमेवाभिधातव्यं सत्सु नित्यं द्विषत्सु च ॥ १५ ॥ देवास्ते प्रियवक्तारः पशवः क्रूरवादिनः ॥ शुचिरास्तिक्यपूतात्मा पूजयेद्देवताः सदा ॥ १६ ॥ देवतावद्गुरुजनमात्मवच्च सुहृज्जनम् ॥ प्राणिपातेन हि गुरुं सतोऽमृषानुचेष्टितैः ॥ १७ ॥ कुर्वीताभिमुखान्भृत्यैर्देवान्सुकृतकर्मणा ॥ सद्भावेन हरेन्मित्रं सम्भ्रमेण च बान्धवान् ॥ १८ ॥ स्त्रीभृत्यान्प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् ॥ अनिन्दा परकृत्येषु स्वधर्मपरिपालनम् ॥ १९ ॥ कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ॥ प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ॥ २० ॥ गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥ स्वसमृद्धिष्वनुत्सेकः परवृद्धिष्वमत्सरः ॥ २१ ॥ अपरोपतापिवचनं मौनव्रतचरिष्णुता ॥ बन्धुभिर्बद्धसंयोगः स्वजने चतुरस्रता ॥ उचितानुविधायित्वमितिवृत्तं महात्मनाम् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये रामोक्तनीतिर्नामाष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ ॥ २३८ ॥ अथ पुनः श्रीराजधर्माः ॥ राम उवाच ॥ स्वाम्यमात्यं च राष्ट्रं च दुर्गं कोशो बलं सुहृत् ॥ परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥ १ ॥ राज्याङ्गानां वरं राष्ट्रं साधनं पालयेत्सदा ॥ कुलं शीलं वयः सत्त्वं दाक्षिण्यं क्षिप्रकारिता ॥ २ ॥ अविसंवादिता सत्यं वृद्धसेवा कृतज्ञता ॥ देवसम्पन्नता बुद्धिरक्षुद्रपरिवारता ॥ ३ ॥ शक्यसामन्तता चैव तथा च दृढभक्तिता ॥ दीर्घदर्शित्वमुत्साहः

शुचिता स्थूललक्षता ॥ ४ ॥ विनीतत्वं धार्मिकता साधोश्च नृपतेर्गुणाः ॥ प्रख्यातवंशमक्रूरं लोकसङ्ग्राहिणं शुचिम् ॥ ५ ॥ कुर्वीता-
त्महिताकाङ्क्षी परिचारं महीपतिः ॥ वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान्वशी ॥ ६ ॥ नेता दण्डस्य निपुणः कृतशिल्पपरिग्रहः ॥
पराभियोगप्रसहः सर्वदुष्टप्रातीकिया ॥ ७ ॥ परवृत्तान्तवेदी च सन्धिविग्रहतत्त्ववित् ॥ गूढमन्त्रप्रचारज्ञो देशकालविभागवित् ॥ ८ ॥
आदाता सम्यगर्थानां विनियोक्ता च पात्रवित् ॥ क्रोधलोभभयद्रोहदम्भचापलवर्जितः ॥ ९ ॥ परोपतापपैशुन्यमात्सर्य्येर्ष्यानृतातिगः ॥
वृद्धोपदेशसम्पन्नः शक्तो मधुरदर्शनः ॥ १० ॥ गुणानुरागस्थितिमानात्मसम्पद्गुणाः स्मृताः ॥ कुलीनाः शुचयः शूराः श्रुतवन्तो-
ऽनुरागिणः ॥११॥ दण्डनीतेः प्रयोक्तारः सचिवाः स्युर्महीपतेः ॥ सुविग्रहो जानपदः कुलशीलकलान्वितः ॥१२॥ वाग्मी प्रगल्भश्चक्षु-
ष्मानुत्साही प्रतिपत्तिमान् ॥ स्तम्भचापलहीनश्च मैत्रः क्लेशसहः शुचिः ॥१३ ॥ सत्यसत्त्वधृतिस्थैर्य्यप्रभावारोग्यसंयुतः ॥ कृतशिल्पश्च
दक्षश्च प्रज्ञावान्धारणान्वितः ॥ १४ ॥ दृढभक्तिरकर्त्ता च वैराणां सचिवो भवेत् ॥ स्मृतिस्तत्परतार्थेषु चित्तज्ञो ज्ञाननिश्चयः ॥ १५ ॥
दृढता मन्त्रगुप्तिश्च मान्त्रिसम्पत्प्रकीर्त्तिता ॥ त्रय्यां च दण्डनीत्यां च कुशलः स्यात्पुरोहितः ॥ १६ ॥ अथर्ववेदविहितं कुर्य्याच्छान्ति-
कपौष्टिकम् ॥ साधुतैषाममात्यानां तद्विद्यैः सह बुद्धिमान् ॥१७॥ चक्षुष्मत्तां च शिल्पं च परीक्षेत गुणद्वयम् ॥ स्वजनेभ्यो विजानीयात्
कुलं स्थानमवग्रहम् ॥ १८ ॥ पारिकर्मसु दक्षं च विज्ञानं धारयिष्णुताम् ॥ गुणत्रयं परीक्षेत प्रागल्भ्यं प्रीततां तथा ॥ १९ ॥
कथायोगेषु बुध्येत वाग्मित्वं सत्यवादिताम् ॥ उत्साहं च प्रभावं च तथा क्लेशसहिष्णुताम् ॥ २० ॥ धृतिं चैवानुरागं च
स्थैर्य्यं चापादि लक्षयेत् ॥ भक्तिं मैत्रीं च शौचं च जानीयाद्व्यवहारतः ॥ २१ ॥ संवासिभ्यो बलं सत्त्वमारोग्यं शीलमेव च ॥ अस्तब्ध-
तामचापल्यं वैराणां चाप्यकीर्त्तनम् ॥ २२ ॥ प्रत्यक्षतो विजानीयाद्भद्रतां क्षुद्रतामपि ॥ फलानुमेयाः सर्वत्र परोक्षगुणवृत्तयः ॥ २३ ॥
सस्याकरवती पुण्या खनिद्रव्यसमन्विता ॥ गोहिता भूरिसलिला पुण्यैर्जनपदैर्युता ॥ २४ ॥ रम्या सकुञ्जरबला वारिस्थलपथान्विता ॥
अदेवमातृका चोक्ति शस्यते भूरिभूतये ॥ २५ ॥ शूद्रकारुवणिक्प्रायो महारम्भकृषीवलः ॥ सानुरागो रिपुद्वेषी पीडासहकरः पृथुः ॥
॥ २६ ॥ नानादेश्यैः समाकीर्णो धार्मिकः पशुमान्बली ॥ ईदृग्जनपदः श्रस्तोऽमूर्खव्यसनिनायकः ॥ २७ ॥ पृथुसीमं महाख्यातमुच्च-

प्राकारतोरणम् ॥ पुरं समावसेच्छैलसरिन्मरुवनाश्रयम् ॥ २८ ॥ जलवद्धान्यधनवद्दुर्गं कालसहं महत् ॥ औदकं पार्वतं वार्क्षमैरिणं धन्विनं च षट् ॥ २९ ॥ ईप्सितद्रव्यसम्पूर्णः पितृपैतामहोचितः ॥ धर्मार्जितो व्ययसहः कोशो धर्मादिवृद्धये ॥ ३० ॥ पितृपैतामहो वश्यः संहतो दत्तवेतनः ॥ विख्यातपौरुषो जन्यः कुशलः शकुनैर्वृतः ॥ ३१ ॥ नानाप्रहरणोपेतो नानायुद्धविशारदः ॥ नानायोधसमाकीर्णो नीराजितहयद्विपः ॥ ३२ ॥ प्रवासायासदुःखेषु युद्धेषु च कृतश्रमः ॥ अद्वैधक्षत्रियप्रायो दण्डो दण्डवतां मतः ॥ ३३ ॥ योगविज्ञानसत्त्वाढ्यं महापक्षं प्रियंवदम् ॥ आयतिक्षममद्वैधं मित्रं कुर्वीत सत्कुलम् ॥ ३४ ॥ दूरादेवाभिगमनं स्पष्टार्थहृदयानुगा ॥ वाक्सत्कृत्य प्रदानं च त्रिविधो मित्रसंग्रहः ॥ ३५ ॥ धर्मकामार्थसंयोगो मित्रात्तु त्रिविधं फलम् ॥ औरसं तत्र सन्नद्धं तथा वंशक्रमागतम् ॥ ॥ ३६ ॥ रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ मित्रे गुणाः सत्यताद्याः समानसुखदुःखता ॥ ३७ ॥ वक्ष्येऽनुजीविनां वृत्तं सेवी सेवेत भूपतिम् ॥ दक्षता भद्रता दाढ्यं क्षान्तिः क्लेशसहिष्णुता ॥ ३८ ॥ सन्तोषः शीलमुत्साहो मण्डयत्यनुजीविनम् ॥ यथाकालमुपासीत राजानं सेवको नयात् ॥ ३९ ॥ परस्थानगमं कौर्य्यमौद्धत्यं मत्सरं त्यजेत् ॥ विगृह्य कथनं भृत्यो न कुर्य्याज्ज्यायसा सह ॥ ॥ ४० ॥ गुह्यं मर्म च मन्त्रं च न च भर्त्तुः प्रकाशयेत् ॥ रक्ताद्वार्त्तिं समीहेत विरक्तं सन्त्यजेन्नृपम् ॥ ४१ ॥ अकार्य्ये प्रतिषेधश्च कार्य्ये चापि प्रवर्त्तनम् ॥ संक्षेपादिति सद्वृत्तं बन्धुमित्रानुजीविनाम् ॥ ४२ ॥ आजीव्यः सर्वसत्त्वानां राजा पर्जन्यवद्भवेत् ॥ आयद्वारेषु चास्यर्थं धनं चाददतीति च ॥ ४३ ॥ कुर्य्याद्युयोगसम्पन्नानध्यक्षान्सर्वकर्मसु ॥ कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ॥ ४४ ॥ खन्याकरबलादानं शून्यानां च निवेशनम् ॥ अष्टवर्गमिमं राजा साधुवृत्तोऽनुपालयेत् ॥ ४५ ॥ आमुक्तिकेभ्यश्चौरेभ्यः पौरेभ्यो राजवल्लभात् ॥ पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम् ॥४६॥ अवेक्ष्यैतद्भयं काले ह्याददीत करं नृपः ॥अभ्यन्तरं शरीरं स्वं बाह्यं राष्ट्रं च रक्षयेत्॥ ॥ ४७ ॥ दण्ड्यांस्तान्दण्डयेद्राजा स्वं रक्षेच्च विषादितः ॥ स्त्रियः पुत्रांश्च शत्रुभ्यो विश्वसेन्न कदाचन ॥ ४८ ॥ इत्यादिमहापुराणे आग्नेये राजधर्मो नामैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥ अथ पुनः पाद्मुण्यम् ॥ श्रीराम उवाच ॥ मण्डलं चिन्तयेन्मुख्यं राजा द्वादशराजकम् ॥ अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् ॥ १ ॥ तथारिमित्रमित्रं च विजिगीषोः पुरः स्मृता ॥ पार्ष्णिग्राहः स्मृतः

पश्चादाक्रन्दस्तदनन्तरम् ॥ २ ॥ आसारवनयोश्चैवं विजिगीषोश्च मण्डलम् ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः ॥ ३ ॥ अनुग्रहे संहतयोर्निग्रहे व्यस्तयोः प्रभुः ॥ मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः ॥ ४ ॥ अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः ॥ सन्धिं च विग्रहं यानमासनादि वदामि ते ॥ ५ ॥ बलवद्विगृहीतेन सन्धिं कुर्य्याच्छिवाय च ॥ कपाल उपहारश्च सन्तानः सङ्गतस्तथा॥ ॥ ६ ॥ उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ अदृष्टनर आदिष्ट आत्मापि स उपग्रहः ॥ ७ ॥ परिक्रमस्तथा छिन्नस्तथा च पर-दूषणम् ॥ स्कन्धोपनेयः सन्धिश्च सन्धयः षोडशोदिताः ॥ ८ ॥ परस्परोपकारश्च मैत्रः सम्बन्धकस्तथा ॥ उपहारश्च चत्वारस्तेषु मुख्या श्च सन्धयः ॥ ९ ॥ बालो वृद्धो दीर्घरोगस्तथा बन्धुबहिष्कृतः ॥ भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ १० ॥ विरक्तप्रकृति-श्चैव विषयेष्वतिशक्तिमान् ॥ अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ ११ ॥ दैवोपहतकश्चैव दैवनिन्दक एव च ॥ दुर्भिक्षव्यसनो-पेतो बलव्यसनसङ्कुलः ॥ १२ ॥ स्वदेशस्थो बहुरिपुर्मुक्तः कालेन यश्च ह ॥ सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ १३ ॥ एनैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम्॥ परस्परापकारेण पुंसां भवति विग्रहः॥ १४ ॥आत्मनोऽभ्युदयाकांक्षी पीड्यमानः परेण वा॥देशका-लबलोपेतः प्रारभेतेह विग्रहम् ॥१५॥ राज्यस्त्रीस्थानदेशानां ज्ञानस्य च बलस्य च॥ अपहारो मदो मानः पीडा वैपायिकी तथा ॥१६॥ ज्ञानात्मशक्तिधर्माणां विघातो दैवमेव च ॥ मित्रार्थे चापमानं च तथा बन्धुविनाशनम् ॥ १७ ॥ भूतानुग्रहविच्छेदस्तथा मण्डलदूप-णम् ॥ एकार्थाभिनिवेशित्वमिति विग्रहयोनयः ॥ १८ ॥ सापत्न्यं वास्तुजं स्त्रीजं वाग्जातमपराधजम् ॥ वैरं पञ्चविधं प्रोक्तं साधनैः प्रशमं नयेत् ॥ १९ ॥ किञ्चित्फलं निष्फलं वा सन्दिग्धफलमेव च ॥ तदात्वे दोषजननमायत्यां चैव निष्फलम् ॥ २० ॥ आयत्यां च तदात्वे च दोषसञ्जननं तथा॥ अपरिज्ञानवीर्य्येण परेण स्तोभितोऽपि वा॥२१॥परार्थं स्त्रीनिमित्तं च दीर्घकालं द्विजैः सह॥अकालदैव-युक्तेन बलोद्धतसखेन च ॥ २२ ॥ तदात्वे फलसंयुक्तमायत्यां फलवर्जितम् ॥ आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा ॥ २३ ॥ इतीमं षोडशविधं न कुर्य्यादेव विग्रहम् ॥ तदात्वायतिसंशुद्धं कर्म राजा सदाचरेत् ॥ २४ ॥ हृष्टं पुष्टं बलं मत्वा गृह्णीयाद्विपरी-तकम् ॥ मित्रमाक्रन्द आसारो यदा स्युर्दृढभक्तयः ॥ २५ ॥ परस्य विपरीतं च तदा विग्रहमाचरेत् ॥ विगृह्य सन्धाय तथा सम्भूयाथ

प्रसङ्गतः ॥ २६ ॥ उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतम् ॥ परस्परस्य सामर्थ्यविघातादासनं स्मृतम् ॥ २७ ॥ अरेश्च विजिगीषोश्च यानवत्पञ्चधा स्मृतम् ॥ बलिनोर्द्वैधीभूतोर्मध्ये वाचात्मानं समर्पयन् ॥ २८ ॥ द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः ॥ उभयोरपि सम्पाते सेवेत बलवत्तरम् ॥ २९ ॥ यदा द्वावपि नेच्छेतां संश्रयं जानसंविदौ ॥ तदोपसर्पेत्तच्छत्रुमाधिकं वा स्वयं व्रजेत् ॥ ३० ॥ उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः ॥ कुलोद्भतं सत्यमार्य्यमासेवेत बलोत्कटम् ॥ ३१ ॥ तदर्शनोपास्तिकता नित्यं तद्भावभाविता ॥ तत्कारितप्रश्रयिता वृत्तं संश्रयिणः श्रुतम् ॥ ३२ ॥ इत्यादिमहापुराणे आग्नेये पाङ्गुण्यं नाम चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥ अथ पुनः सामादिकम् ॥ राम उवाच ॥ प्रभावोत्साहशक्तिभ्यां मन्त्रशक्तिः प्रशस्यते ॥ प्रभावोत्साहवान्काव्यो जितो देवपुरोधसा ॥ १ ॥ मन्त्रयेतेह कार्य्याणि नानार्थैर्नाऽविपश्चिता ॥ अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम् ॥ २ ॥ अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः ॥ अर्थद्वैधस्य सन्देहच्छेदनं शेषदर्शनम् ॥ ३ ॥ सहायाः साधनोपाया विभागो देशकालयोः ॥ विपत्तेश्च प्रतीकारः पञ्चाङ्गो मन्त्र इष्यते ॥ ४ ॥ मनः प्रसादः श्रद्धा च तथा करणपाटवम् ॥ सहायोत्थानसम्पच्च कर्मणां सिद्धिलक्षणम् ॥ ५ ॥ मदः प्रमादः कामश्च सुप्तप्रलपितानि च ॥ भिन्दन्ति मन्त्रं प्रच्छन्नाः कामिन्यो रमतां तथा ॥ ६ ॥ प्रगल्भः स्मृतिमान्वाग्मी शास्त्रे शास्त्रे च निष्ठितः ॥ अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति ॥ ७ ॥ विसृष्टार्थो मितार्थश्च तथा शासनहारकः ॥ सामर्थ्यात्पादतो हीनो दूतस्तु त्रिविधः स्मृतः ॥ ८ ॥ नाविज्ञातं पुरं शत्रोः प्रविशेच्च न संसदम् ॥ कालमीक्षेत कार्य्यार्थमनुज्ञातश्च निष्पतेत् ॥ ९ ॥ छिद्रं च शत्रोर्जानीयात्कोशामित्रबलानि च ॥ रागापरागौ जानीयाद्दृष्टिगात्रविचेष्टितैः ॥ १० ॥ कुर्य्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ॥ तपस्विव्यञ्जनोपेतैः सुचरैः सह संवसेत् ॥ ॥ ११ ॥ चरः प्रकाशो दूतः स्यादप्रकाशश्चरो द्विधा ॥ वणिक् कृषीवलो लिङ्गी भिक्षुकाद्यात्मकाश्चराः ॥ १२ ॥ यायादरिं व्यसनिनं निष्फले दूतचेष्टिते ॥ प्रकृतिव्यसनं यत्स्यात्तत्समीक्ष्य समुत्पतेत् ॥ १३ ॥ अनयाद्व्यस्यति श्रेयस्तस्मात्तद्व्यसनं स्मृतम् ॥ हुताशनो जलं व्याधिर्दुर्भिक्षं नरकं तथा ॥ १४ ॥ इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥ दैवं पुरुषकारेण शान्त्या च प्रशमं नयेत् ॥ १५ ॥ उत्थापितेन नीत्या च मानुषं व्यसनं हरेत् ॥ मन्त्रो मन्त्रफलावाप्तिः कार्य्यानुष्ठानमायतिः ॥ १६ ॥ आयव्ययौ दण्डनीतिरमित्रप्रतिषे-

धनम् ॥ व्यसनस्य प्रतीकारो राज्यराजाभिरक्षणम् ॥ १७ ॥ इत्यमात्य[illegible] ॥ [illegible]
वाहनं प्रजया भवेत् ॥ १८ ॥ तथान्ये द्रव्यनिचया हन्ति सव्यसना प्रजा ॥ प्रजानामापदिस्थानां रक्षणं कोशदण्डयोः ॥ १९ ॥ पौराद्याश्चोपकुर्वन्ति संश्रयादिह दुर्दिनम् ॥ तूष्णीं युद्धं जनत्राणं मित्रामित्रपरिग्रहः ॥ २० ॥ सामन्तादिकृते दोषे नश्येत्तद्व्यसनाच्च तत् ॥ भृत्यानां भरणं दानं प्रजामित्रपरिग्रहः ॥ २१ ॥ धर्मकामादिभेदश्च दुर्गसंस्कारभूषणम् ॥ कोशात्तद्व्यसनाद्धन्ति कोशमूलो हि भूपतिः ॥ २२ ॥ मित्रामित्रावनीहेमसाधनं रिपुमर्दनम् ॥ दूरकार्य्याशुकारित्वं दण्डात्तद्व्यसनाद्धरेत् ॥ २३ ॥ संस्तम्भयति मित्राणि ह्यमित्रं नाशयत्यपि ॥ धनाद्यैरुपकारित्वं मित्रात्तद्व्यसनाद्धरेत् ॥ २४ ॥ राजा सव्यसनी हन्याद्राजकार्य्याणि यानि च ॥ वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च ॥ २५ ॥ पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः ॥ आलस्यं स्तब्धता दर्पः प्रमादो द्वेधकारिता ॥ २६ ॥ इति पूर्वोपदिष्टं च सचिवव्यसनं स्मृतम् ॥ अनावृष्टिश्च पीडादी राष्ट्रव्यसनमुच्यते ॥ २७ ॥ विशीर्णयन्त्रप्राकारपरिखात्वमशस्त्रता ॥ क्षीणया सेनया नद्धं दुर्गव्यसनमुच्यते ॥ २८ ॥ व्ययीकृतः परिक्षिप्तोऽप्रजितोऽसाञ्चितस्तथा ॥ दूषितो दूरसंस्थश्च कोशव्यसनमुच्यते ॥ २९ ॥ उपरुद्धं परिक्षिप्तममानितविमानितम् ॥ अभूतं व्याधितं श्रान्तं दूरायातं नवागतम् ॥ ३० ॥ परिक्षीणं प्रतिहतं प्रहताग्रतरं तथा ॥ आशानिर्वेदभूयिष्ठमनृतप्राप्तमेव च ॥ ३१ ॥ कलत्रगर्भं निक्षिप्तमन्तःशल्यं तथैव च ॥ विच्छिन्नविविधासारं शून्यमूलं तथैव च ॥ ३२ ॥ अस्याम्यसंहतं वापि भिन्नकूटं तथैव च ॥ दुष्पार्ष्णिग्राहमर्थं च बलव्यसनमुच्यते ॥ ३३ ॥ दैवोपपीडितं मित्रं ग्रस्तं शत्रुबलेन च ॥ कामक्रोधादिसंयुक्तमुत्साहादरिभिर्भवेत् ॥ ३४ ॥ अर्थस्य दूषणं क्रोधात्पारुष्यं वाक्यदण्डयोः ॥ कामजं मृगया द्यूतं व्यसनं पानकं स्त्रियः ॥ ३५ ॥ वाक्पारुष्यं परं लोके उद्वेजनमनर्थकृम् ॥ असिद्धसाधनं दण्डस्तं युक्त्यापनयेन्नृपः ॥ ॥ ३६ ॥ उद्वेजयति भूतानि दण्डपारुष्यवान्नृपः ॥ भूतान्युद्वेज्यमानानि द्विषतां यान्ति संश्रयम् ॥ ३७ ॥ विवृद्धाः शत्रवश्चैव विनाशाय भवन्ति ते ॥ दूष्यस्य दूषणार्थं च परित्यागो महीयसः ॥ ३८ ॥ अ[illegible]र्थदूषणमुच्यते ॥ पानात्कार्य्यादितोऽज्ञानं मृगयातोऽरितः क्षयः ॥ ३९ ॥ जितश्रमार्थी मृगयां विचरेद्रक्षिते वने ॥ धर्मार्थप्राणनाशादि द्यूते स्यात्कलहादिकम् ॥ ४० ॥ कालातिपातो

धर्मार्थपीडा स्त्रीव्यसनाद्भवेत् ॥ पानदोषात्प्राणनाशः कार्य्याकार्य्यावनिश्चयः ॥ ४१ ॥ स्कन्धावारनिवेशज्ञो निमित्तज्ञो रिपुं जयेत् ॥ स्कन्धावारस्य मध्ये तु सकोशं नृपतेर्गृहम् ॥ ४२ ॥ मौलीभूतं श्रेणिसुहृद्विषदाटविकं बलम् ॥ राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत् ॥ ४३ ॥ सैन्यैकदेशः सन्नद्धः सेनापतिपुरःसरः ॥ परिभ्रमेच्चत्वरांश्च मण्डलेन बहिर्निशि ॥ ४४ ॥ वार्ताः स्वका विजानीयाद्दूरसीमान्तचारिणः ॥ निर्गच्छेत्प्रविशेच्चैव सर्व एवोपलक्षितः ॥४५॥ साम दानं च भेदश्च दण्डोपेक्षेन्द्रजालकम् ॥ मायोपायाः सप्त परे निक्षिपेत्साधनाय तान् ॥४६॥ चतुर्विधं स्मृतं साम उपकारानुकीर्त्तनात् ॥ मिथः सम्बन्धकथनं मृदुपूर्वं च भाषणम् ॥४७॥ आयाते दर्शनं वाचा तवाहमिति चार्पणम् ॥ यः सम्प्राप्तधनोत्सर्ग उत्तमाधममध्यमः ॥४८॥ प्रतिदानं तदा तस्य गृहीतस्यानुमोदनम् ॥ द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्त्तनम् ॥ ४९ ॥ देयश्च प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम् ॥ स्नेहरागापनयनसंहर्षोत्पादनं तथा ॥ ५० ॥ मिथो भेदश्च भेदज्ञैर्भेदश्च त्रिविधः स्मृतः ॥ वधोऽर्थहरणं चैव परिक्लेशस्त्रिधा दमः ॥ ५१ ॥ प्रकाशश्चाप्रकाशश्च लोकद्विष्टान्प्रकाशतः ॥ उद्विजेत हतैर्लोकस्तेषु पिण्डः प्रशस्यते ॥ ५२ ॥ विशेषेणोपनिषद्योगैर्हन्याच्छस्त्रादिना द्विषः ॥ जातिमात्रं द्विजं नैव हन्यात्सामोत्तरं वशे ॥ ५३ ॥ प्रालिम्पान्निव चेतांसि दृष्ट्वा साधु पिबन्निव ॥ ग्रसन्निवामृतं साम प्रयुञ्जीत प्रियं वचः ॥ ५४ ॥ मिथ्याभिशस्तः श्रीकाम आहूयाप्रतिमानितः ॥ राजद्वेषी चातिकर आत्मसम्भावितस्तथा ॥५५॥ विच्छिन्नधर्मकामार्थः क्रुद्धो मानी विमानितः ॥ अकारणात्परित्यक्तः कृतवैरोऽपि सान्त्वितः ॥ ५६ ॥ हृतद्रव्यकलत्रश्च पूजार्होऽप्रतिपूजितः ॥ एतांस्तु भेदयेच्छत्रौ स्थितान्नित्यान्सुशङ्कितान् ॥ ५७ ॥ आगतान्पूजयेत् कामैर्निजांश्च प्रशमं नयेत् ॥ सामदृष्टानुसन्धानमत्युग्रभयदर्शनम् ॥ ५८ ॥ प्रधानदानमानं च भेदोपायाः प्रकीर्त्तिताः ॥ मित्रं हृतं काष्ठमिव घुणजग्धं विशीर्य्यते ॥ ५९ ॥ त्रिशक्तिर्देशकालज्ञो दण्डेनास्तं नयेदरीन् ॥ मैत्री प्रधानं कल्याणबुद्धिं सान्त्वेन साधयेत् ॥ ६० ॥ लुब्धं क्षीणं च दानेन मित्रानन्योऽन्यशङ्कया ॥ दण्डस्य दर्शनाद्दुष्टान्पुत्रभ्रातादि सामतः ॥ ६१ ॥ दानभेदैश्चमूमुख्यान्योधाञ्जनपदादिकान् ॥ सामन्ताटविकान्भेददण्डाभ्यामपराद्धकान् ॥ ६२ ॥ देवताप्रतिमानां तु पूजयान्तर्गतैर्नरैः ॥ पुमान्स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शनः ॥ ६३ ॥ वेतालोल्कापिशाचानां शिवानां च स्वरूपिकी ॥ कामतो रूपधारित्वं शस्त्राभ्यश्मास्वु-

वर्षणम् ॥ ६४ ॥ तमोऽनिलोऽनलो मेघ इति माया ह्यमानुषी ॥ जघान कीचकं भीम आत्मनः स्त्रीस्वरूपताम् ॥ ६५ ॥ अन्याय व्यसने युद्धे प्रवृत्तस्यानिवारणम् ॥ उपेक्षेयं स्मृता भ्रातोपेक्षितश्च हिडिम्बया ॥ ६६ ॥ मेघान्धकारवृष्ट्याग्निपर्वताद्भुतदर्शनम् ॥ दूरस्थानं च सैन्यानां दर्शनं ध्वजशालिनाम् ॥ ६७ ॥ छिन्नपाटितभिन्नानां संमृतानां च दर्शनम् ॥ इतीन्द्रजालं द्विषतांभीत्यर्थमुपकल्पयेत् ॥ ६८ ॥ इत्यादिमहापुराणे आग्नेये सामादिकं नामैकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥ अथ पुनः राजनीतिः ॥ श्रीराम उवाच ॥ षड्विधं तु बलं व्यूह्य देवान्प्राच्यं रिपुं व्रजेत् ॥ मौलभूतं श्रेणिसुहृद्द्विषदाटविकं बलम् ॥ १ ॥ पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं तथा ॥ षडङ्गं मन्त्रकोशाभ्यां पदात्यश्वरथद्विपैः ॥ २ ॥ नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् ॥ सेनापतिस्तत्र तत्र गच्छेद्व्यूहीकृतैर्बलैः ॥ ॥ ३ ॥ नायकः पुरतो यायात्प्रवीरपुरुषावृतः ॥ मध्ये कलत्रं स्वामी च कोशः फल्गु च यद्बलम् ॥ ४ ॥ पार्श्वयोरुभयोरश्वा वाजिनां पार्श्वयो रथाः ॥ रथानां पार्श्वयोर्नागा नागानां चाटवीबलम् ॥ ५ ॥ पश्चान्सेनापतिः सर्वं पुरस्कृत्य कृती स्वयम् ॥ यायात्सन्नद्धसैन्यौघः खिन्नानाश्वासयञ्छनैः ॥ ६ ॥ यायाद्व्यूहेन महता मकरेण पुरोभये ॥ श्येनेनोद्धतपक्षेण सूच्या वा वीरवक्त्रया ॥ ७ ॥ पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसञ्ज्ञितम् ॥ सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत् ॥ ८ ॥ कन्दरे शैलगहने निम्नगावनसङ्कटे ॥ दीर्घाध्वनि परिश्रांतं क्षुत्पिपासार्दितक्लमम् ॥ ९ ॥ व्याधिदुर्भिक्षमारकपीडितं दस्युविद्रुतम् ॥ पङ्कपांसुजलस्कन्धं व्यस्तं पुञ्जीकृतं पथि ॥ १० ॥ प्रसुप्तं भोजनव्यग्रमभूमिष्ठमसुस्थितम् ॥ चौराग्निभयंवित्रस्तं वृष्टिवातसमाहतम् ॥ ११ ॥ इत्यादौ स्वचमूं रक्षेत्परसैन्यं च घातयेत् ॥ विशिष्टो देशकालाभ्यां भिन्नविप्रकृतिर्बली ॥ १२ ॥ कुर्य्यात्प्रकाशयुद्धं हि कूटयुद्धं विपर्यये ॥ तेष्ववस्कन्दकालेषु परं हन्यात्समाकुलम् ॥ १३ ॥ अभूमिष्ठं स्वभूमिष्ठः स्वभूमौ चोपजानयः ॥ प्रकृतिप्रग्रहाकृष्टं पार्श्वेवनचरादिभिः ॥ १४ ॥ हन्यात्प्रवीरपुरुषैर्भङ्गदानापकर्षणैः ॥ घुरस्नादर्शनं दत्त्वा तल्लक्षकृतनिश्चयान् ॥ १५ ॥ हन्यात्पश्चात्प्रवीरेण बलेनोपेत्य वेगिना ॥ पश्चाद्वा सङ्कुलीकृत्य हन्याच्छूरेण पूर्वतः ॥ १६ ॥ आभ्यां पार्श्वाभिघातौ तु व्याख्यातौ कूटयोधने ॥ पुरस्ताद्विषमे देशे पश्चाद्धन्यात्तु वेगवान् ॥ १७ ॥ पुरः पश्चात्तु विषमे ह्येवमेव तु पार्श्वयोः ॥ प्रथमं योधयित्वा तु दूष्यामित्राटवीबलैः ॥ १८ ॥ श्रान्तं

मन्दं निराक्रन्दं हन्यादश्रान्तवाहनम् ॥ दूष्यामित्रबलैर्वापि भङ्गं दत्त्वा प्रयत्नवान् ॥ १९॥ जितमित्येव विश्वस्तं हन्यान्मन्त्रव्यपाश्रयः ॥ स्कन्धावारपुरग्रामसस्यस्वामिप्रजादिषु ॥ २० ॥ विश्रम्भन्तं परानीकमप्रमत्तो विनाशयेत् ॥ अथ वा गोग्रहाकृष्टं तल्लक्ष्यं मार्गबन्धनात् ॥ २१ ॥ अवस्कन्दभयाद्रात्रिप्रजागरकृतश्रमम् ॥ दिवासुप्तं समाहन्याश्निद्राव्याकुलसैनिकम् ॥ २२ ॥ निशि विश्रब्धसंसुप्तं नागैर्वा खड्गपाणिभिः ॥ प्रयाणे पूर्वयायित्वं वनदुर्गप्रवेशनम् ॥ २३ ॥ अभिन्नानामनीकानां भेदनं भिन्नसङ्ग्रहः ॥ विभीषिकाद्वारघातं कोशरक्षेभकर्म च ॥ २४ ॥ अभिन्नभेदनं मित्रसन्धानं रथकर्म च ॥ वनदिङ्मार्गविचये वीवधासारलक्षणम् ॥ २५ ॥ अनुयानापसरणे शीघ्रकार्य्योपपादनम् ॥ दीर्घानुसरणं घातः कोटीनां जघनस्य च ॥ २६ ॥ अश्वकर्माथ पत्तेश्च सर्वदा शस्त्रधारणम् ॥ शिबिरस्य च मार्गादेः शोधनं वास्तिकर्म च ॥ २७ ॥ संस्थूलस्थाणुवल्मीकवृक्षगुल्मापकण्टकम् ॥ सापसारा पदातीनां भूर्नातिविषमा मता ॥ २८ ॥ स्वल्पवृक्षोपला क्षिप्रलङ्घनीयनगा स्थिरा ॥ निःशर्करा विपङ्का च सापसारा च वाजिभूः ॥ २९ ॥ निःस्थाणुवृक्षके दारा रथभूमिरकर्दमा ॥ मर्दनीयतरुच्छेद्यव्रततीपङ्क्तिवर्जिता ॥ ३० ॥ निर्झरागम्यशैला च विषमा गजभोदिनी ॥ उरस्यादीनि भिन्नानि प्रतिगृह्णन्बलानि हि ॥ ३१ ॥ प्रतिग्रह इति ख्यातो राजकार्य्यान्तरक्षमः ॥ तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते ॥ ३२ ॥ जयार्थी न च युध्येत मतिमानप्रतिग्रहः ॥ यत्र राजा तत्र कोशः कोशाधीना हि राजता ॥ ३३ ॥ योधेभ्यस्तु ततो दद्यान्किञ्चिद्दातुं न युज्यते ॥ द्रव्यलक्षं राजघाते तदर्द्धं तत्सुतार्दने ॥ ३४ ॥ सेनापतिवधे तद्वद्दद्याद्धस्त्यादिमर्दने ॥ अथ वा खलु युध्येरन्पत्त्यश्वरथदन्तिनः ॥ ३५ ॥ यथा भवेदसम्बाधो व्यायामाविनिवर्त्तने ॥ असङ्कटेन युध्येरन्सङ्कटः सङ्कुलावहः ॥३६॥ महासङ्कुलयुद्धेषु संश्रयेरन्मनङ्गजम् ॥ अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः ॥ ३७ ॥ इति कल्प्यास्त्रयश्चाश्वा विधेयाः कुञ्जरस्य तु ॥ पादगोपा भवेयुश्च पुरुषा दश पञ्च च ॥ ३८ ॥ विधानमिति नागस्य विहितस्यन्दनस्य च ॥ अनीकामीति विज्ञेयामिति कल्प्या नव द्विपाः ॥ ३९ ॥ तथानीकस्य रन्ध्रं तु पञ्चधा च प्रचक्षते ॥ इत्यनीकविभागेन स्थापयेद्व्यूहसम्पदः ॥ ४० ॥ उरस्यकक्षपक्षांस्तु कल्प्यानेतान्प्रचक्षते ॥ उरःकक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः ॥ ४१॥ कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह उच्यते ॥ उरस्यकक्षपक्षास्तु व्यूहोऽयं सप्रतिग्रहः ॥ ४२ ॥

गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्जितः ॥ तिष्ठेयुः सेनापतयः प्रवीरैः पुरुषैर्वृताः ॥ ४३ ॥ अभेदेन च युध्येरन्नश्नेयुश्च परस्परम् ॥ मध्यव्यूहे फल्गु सैन्यं युद्धवस्तु जघन्यतः ॥ ४४ ॥ युद्धं हि नायकप्राणं हन्यते तदनायकम् ॥ उरसि स्थापयेन्नागान्प्रचण्डान्कक्षयो रथान् ॥ ४५ ॥ हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्त्तितः ॥ मध्यदेशे हयानीकं रथानीकं च कक्षयोः ॥ ४६ ॥ पक्षयोश्च गजानीकं व्यूहोऽन्तर्भेद्ययं स्मृतः ॥ रथस्थाने हयान्दद्यात्पदातींश्च हयाश्रये ॥ ४७ ॥ रथाभावे तु द्विरदान्व्यूहे सर्वत्र दापयेत् ॥ यदि स्याद्दण्ड-बाहुल्यमाबाधः सम्प्रकीर्त्तितः ॥ ४८ ॥ मण्डलासंहतो भोगो दण्डस्ते बहुधा शृणु ॥ तिर्य्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्यावृत्तिरेव च ॥४९॥ मण्डलः सर्वतोवृत्तिपृथग्वृत्तिरसंहतः ॥ प्रदरोद्दढकोऽसह्यः चापो वै कुक्षिरेव च ॥५०॥ प्रनिष्टः सुप्रनिष्टश्च श्येनो विजयसञ्जयौ॥ विशालो विजयः सूची स्थूणाकर्णचमूमुखौ ॥ ५१ ॥ सर्पाख्यो वलयश्चैव दण्डभेदाश्च दुर्जयाः ॥ अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैकपक्षतः ॥ ५२ ॥ अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्य्यये ॥ पक्षोरस्यैरतिक्रान्तः प्रनिष्ठोऽन्यो विपर्य्ययः ॥ ५३ ॥ स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्ध्वगः ॥ द्विगुणोऽन्तस्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः ॥ ५४ ॥ द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात् ॥ गोमूत्रिकाद्विसञ्चारी शकटो मकरस्तथा ॥ ५५ ॥ भोगभेदाः समाख्यातास्तथा पारिप्लवङ्गकः ॥ दण्डपक्षौ युगोरस्य शकटस्याद्विपर्य्यये ॥ ५६ ॥ मकरो व्यतिकीर्णश्च शेषः कुञ्जरराजिभिः ॥ मण्डलव्यूहभेदौ तु सर्वतोभद्रदुर्जयौ ॥ ५७ ॥ अष्टानीको द्वितीयस्तु प्रथमः सर्वतोमुखः ॥ अर्द्धचन्द्रक ऊर्द्धाङ्गो वज्रभेदास्तु संहतेः ॥ ॥ ५८ ॥ तथा कर्कटशृङ्गी च काकपादी च गोधिका ॥ त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः ॥ ५९ ॥ दण्डस्य स्युः सप्तदश व्यूहा द्वौ मण्डलस्य च ॥ असङ्घातस्य षट् पञ्च भोगस्यैव तु सङ्गरे ॥ ६० ॥ पक्षादीनामथैकेन हत्वा शेषैः परिक्षिपेत् ॥ उरसा वा समाहत्य कोटिभ्यां परिवेष्टयेत् ॥ ६१ ॥ परे कोटी समाक्रम्य पक्षाभ्यामभिनिग्रहात् ॥ कोटिभ्यां जघनं हन्यादुरसा च प्रपीडयेत् ॥ ॥ ६२ ॥ यतः फल्गु यतो भिन्नं यतश्चान्यैरधिष्ठितम् ॥ ततश्चारिबलं हन्यादात्मनश्चोपबृंहयेत् ॥ ६३ ॥ सारं द्विगुणसारेण फल्गु-सारेण पीडयेत् ॥ संहतं च गजानीकं प्रचण्डैर्दारयेद्बलम् ॥ ६४ ॥ स्यात्कक्षपक्षोरस्यैश्च वर्त्तमानस्तु दण्डकः ॥ तत्र प्रयोगो दण्डस्य

स्थानं तुर्य्येण दर्शयेत् ॥ ६५ ॥ स्याद्दण्डसमवृक्षाभ्यामतिक्रान्तः प्रदारकः ॥ भवेत्स पक्षकक्षाभ्यामतिक्रान्तो दृढः स्मृतः ॥ ६६ ॥ कक्षाभ्यां च प्रतिक्रान्तव्यूहोऽसह्यः स्मृतो यथा ॥ कक्षपक्षावधः स्थाप्योरन्यैः क्रान्तश्च खातकः ॥ ६७ ॥ द्वौ दण्डौ वलयः प्रोक्तो व्यूहो रिपुविदारणः ॥ दुर्जयश्चतुर्वलयः शत्रोर्वलविमर्दनः ॥६८॥ कक्षपक्षोरन्यैर्भागो विषयं परिवर्त्तयन् ॥ सर्पचारी गोमूत्रिका शकटः शकटाकृतिः ॥ ६९ ॥ विपर्य्ययोऽमरः प्रोक्तः सर्वशत्रुविमर्दकः ॥ स्यात्कक्षपक्षोरन्यामामेकीभावस्तु मण्डलः ॥ ७० ॥ चक्रपद्मादयो भेदा मण्डलस्य प्रभेदकाः ॥ एवं च सर्वतोभद्रो वज्राक्षवरकाकवत् ॥ ७१ ॥ अर्द्धचन्द्रश्च शृङ्गाटो ह्यचलो नामरूपतः ॥ व्यूहा यथासुखं कार्य्याः शत्रूणां वलधारणाः ॥ ७२ ॥ अग्निरुवाच ॥ रामस्तु रावणं हत्वा ह्ययोध्यां प्राप्तवान्द्विज ॥ रामोक्तनीत्येन्द्रजितं हतवांल्लक्ष्मणः पुरा ॥ ७३ ॥ इत्यादिमहापुराणे आग्नेये रामोक्तराजनीतिर्नाम द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥ अथ पुरुषलक्षणम् ॥ अग्निरुवाच ॥ रामायोक्ता मया नीतिः स्त्रीणां राजन्नृणां वदे ॥ लक्षणं यत्समुद्रेण गर्गायोक्तं यथा पुरा ॥ १ ॥ समुद्र उवाच ॥ पुंसां च लक्षणं वक्ष्ये स्त्रीणां चैव शुभाशुभम् ॥ एकाधिको द्विशुक्लश्च त्रिगम्भीरस्तथैव च ॥ २ ॥ त्रित्रिकास्त्रिप्रलम्बश्च त्रिभिर्व्याप्नोति यस्तथा ॥ त्रिवलीमांस्त्रिविनतस्त्रिकालज्ञश्च सुव्रत ॥ ३ ॥ पुरुषः स्यात्सुलक्षण्यो विपुलश्च तथा त्रिषु ॥ चतुर्लेखस्तथा यश्च तथैव च चतुःसमः ॥ ४ ॥ चतुष्किष्कुश्चतुर्दंष्ट्रः शुक्लकृष्णस्तथैव च ॥ चतुर्गन्धश्चतुर्हस्वः सूक्ष्मदीर्घश्च पञ्चसु ॥ ५ ॥ षडुन्नतोऽष्टवंशश्च सप्तस्नेहनवामलः ॥ दशपद्मो दशव्यूहो न्यग्रोधपरिमण्डलः ॥ ६ ॥ चतुर्दशसमद्वन्द्वः षोडशाक्षश्च शस्यते ॥ धर्मार्थकामसंयुक्तो धर्मो ह्येकाधिको मतः ॥ ७ ॥ तारकाभ्यां विना नेत्रे शुक्लदन्ती द्विशुक्लकः ॥ गम्भीरस्त्रिश्रवो नाभिः सत्त्वं चैकं त्रिकं स्मृतम् ॥ ८ ॥ अनसूया दया क्षान्तिर्मङ्गलाचारयुक्तता ॥ शौचं स्पृहा त्वकार्पण्यमनायासश्च शूरता ॥ ९ ॥ त्रित्रिकास्त्रिप्रलम्बः स्याद्दूषणे भुजयोर्नरः ॥ दिग्देशजातिवर्गाश्च तेजसा यशसा श्रिया ॥ १० ॥ व्याप्नोति यस्त्रिकव्यापी त्रिवलीमान्नरस्त्वसौ ॥ उदरे वलयस्तिस्रो नरं त्रिविनतं शृणु ॥ ११ ॥ देवतानां द्विजानां च गुरूणां प्रणतस्तु यः ॥ धर्मार्थकामकालज्ञस्त्रिकालज्ञोऽभिधीयते ॥ १२ ॥ उरो ललाटं वक्त्रं च त्रिविस्तीर्णो विलेखवान् ॥ द्वौ पाणी द्वौ तथा पादौ ध्वजच्छत्रादिभिर्युतौ ॥ १३ ॥ अङ्गुल्यो हृदयं पृष्ठं कटिः शस्तं चतुःस-

मम् ॥ षण्णवत्यङ्गुलोत्सेधश्चतुष्किष्कुप्रमाणतः ॥१४॥ दंष्ट्राश्चतस्रश्चन्द्राभाश्चतुष्कृष्णं वदामि ते ॥ नेत्रतारौ भ्रुवौ श्मश्रुः कृष्णाः केशास्तथैव च ॥१५॥ नासायां वदने स्वेदे कक्षयोर्विडगन्धकः ॥ ह्रस्वं लिङ्गं तथा ग्रीवा जङ्घे स्याद्वेदहस्वकम् ॥ १६ ॥ सूक्ष्माण्यङ्गुलिपर्वाणि नखकेशद्विजत्वचः ॥ हनू नेत्रे ललाटे च नासा दीर्घा स्तनान्तरम् ॥ १७ ॥ वक्षः कक्षौ नखा नासोन्नतं वक्रं कुकाटिका ॥ स्निग्धास्त्वक्केशदन्ताश्च लोम दृष्टिर्नखाश्च वाक्॥१८॥जान्वोरूर्वोश्च पृष्टस्थवंशौ द्वौ करनासयोः॥नेत्रे नासापुटौ कर्णौ मेढ्रं पायुमुखेऽमलम् ॥ १९ ॥ जिह्वोष्ठे तालुनेत्रे तु हस्तपादौ नखास्तथा ॥ शिश्नाग्रवक्रं शस्यन्ते पद्माभा दश देहिनाम् ॥ २० ॥ पाणिपादं मुखं ग्रीवा श्रवणे हृदयं शिरः ॥ ललाटमुदरं पृष्ठं बृहन्तः पूजिता दश ॥ २१ ॥ प्रसारितभुजस्येह मध्यमाग्रद्वयान्तरम् ॥ उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥ २२ ॥ पादौ गुल्फौ स्फिचौ पार्श्वौ वङ्क्षणौ वृषणौ कुचौ॥कर्णोष्ठे सक्थिनी जङ्घे हस्तौ बाहू तथाक्षिणी ॥ २३ ॥ चतुर्दशसमद्वन्द्व एतत्सामान्यतो नरः ॥ विद्याश्चतुर्दश द्व्यक्षैः पश्येद्यः षोडशाक्षकः ॥ २४ ॥ रूक्षं शिरततं गात्रमशुभं मांसवर्जितम् ॥ दुर्गन्धिविपरीतं यच्छस्तं दृष्ट्वा प्रसन्नया ॥ २५ ॥ धन्यस्य मधुरा वाणी गतिर्मत्तेभसन्निभा ॥ एककूपभवं रोम भये रक्षा सकृत्सकृत् ॥ ॥ २६ ॥ इत्यादिमहापुराणे आग्नेये पुरुषलक्षणं नाम त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥२४३॥ अथ स्त्रीलक्षणम्॥ समुद्र उवाच॥ शस्ता स्त्री चारुसर्वाङ्गी मत्तमातङ्गगामिनी ॥ गुरूरुजघना या च मत्तपारावनेक्षणा ॥१॥ सुनीलकेशी तन्वङ्गी विलोमाङ्गी मनोहरा ॥ समभूमिस्पृशौ पादौ संहतौ च तथा स्तनौ ॥ २ ॥ नाभिः प्रदक्षिणावर्त्ता गुह्यमश्वत्थपत्रवत् ॥ गुल्फौ निगूढौ मध्येन नाभिरुत्तुङ्गपार्श्विका ॥ ३॥ जठरं न प्रलम्बं च रोमरूक्षा न शोभना ॥ नर्क्षवृक्षनदीनाम्नी न सदा कलहप्रिया ॥४॥ न लोलुपा न दुर्भोगा शुभा देवादिपूजिता ॥ गण्डैर्मधूकपुष्पाभैर्न शिराला न लोमशा ॥ ५॥ न संहतभ्रुकुटिला पतिप्राणा पतिप्रिया ॥ अलक्षणापि लक्षण्या यत्राकारस्ततो गुणाः ॥ भुवं कनिष्ठिका यस्या नं स्पृशेन्मृत्युरेव सा ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये स्त्रीलक्षणं नाम चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ अथ चामरादिलक्षणम् ॥ अग्निरुवाच ॥ चामरो रुक्मदण्डोऽग्र्यः छत्रं राज्ञः प्रशस्यते ॥ हंसपक्षैर्विरचितं मयूरस्य शुकस्य च ॥ १ ॥ पक्षैर्वाथ बलाकाया न कार्यं मिश्रपक्षकैः ॥ चतुरस्रं ब्राह्मणस्य वृत्तं राज्ञश्च शुक्लकम् ॥ २ ॥ त्रिचतुःपञ्च-

षट्सप्त ह्यष्ट पर्वाणि दण्डके ॥ भद्रासनं क्षीरिवृक्षैः पञ्चाशदङ्गुलोच्छ्रयैः ॥ ३ ॥ विस्तारेण त्रिहस्तं स्यात्सुवर्णाद्यैश्च चित्रितम् ॥ धनुर्द्रव्यत्रयं लोहं शृङ्गं दारु द्विजोत्तम ॥ ४ ॥ ज्याद्रव्यत्रितयं चैव वंशभङ्गत्वचस्तथा ॥ दारुचापप्रमाणं तु श्रेष्ठं हस्तचतुष्टयम् ॥ ५ ॥ तदेव समहीनं तु प्रोक्तं मध्यकनीयसि ॥ मुष्टिग्राहनिमित्तानि मध्ये द्रव्याणि कारयेत् ॥ ६ ॥ स्वल्पकोटिस्त्वचा शृङ्गं शार्ङ्गलौहमये द्विज ॥ कामिनीभ्रुलताकारा कोटिः कार्य्या सुसंयता ॥ ७ ॥ पृथग्वा विप्रमिश्रं वा लोहं शार्ङ्गं तु कारयेत् ॥ शार्ङ्गं समुचितं कार्य्यं रुक्मबिन्दुविभूषितम् ॥८॥ कुटिलं स्फुटितं चापं सच्छिद्रं च न शस्यते ॥ सुवर्णं रजतं ताम्रं कृष्णायो धनुषि स्मृतम् ॥९ ॥ माहिषं शारभं शार्ङ्गं रोहिषं वा धनुःशुभम् ॥ चदनं वेतसं सालं धावलं ककुभं तरुः ॥ १० ॥ सर्वश्रेष्ठं धनुर्वंशैर्गृहीतैः शरदि श्रितैः ॥ पूजयेत्तु धनुःखड्गमन्त्रैस्त्रैलोक्यमोहनैः ॥ ११ ॥ अयसश्चाथ वंशस्य शरस्याप्यशरस्य च ॥ ऋजवो हेमवर्णाभाः स्नायुश्लिष्टाः सुपत्रकाः ॥ १२ ॥ रुक्मपुङ्खाः सुपुङ्खास्ते तैलधौताः सुवर्णकाः ॥ यात्रायामभिषेकादौ यजेद्बाणधनुर्मुखान् ॥ १३ ॥ सपताकास्त्रसंग्राहसांवत्सरकरान्नृपः ॥ ब्रह्मा वै मेरुशिखरे स्वर्गगङ्गातटेऽयजेत् ॥ १४ ॥ लोहदैत्यं स दद्दशे विघ्नं यज्ञे तु चिन्तयन् ॥ तस्य चिन्तयतो वह्नेः पुरुषोऽभूद्बलिर्महान् ॥ १५ ॥ ववन्देऽजं च तं देवा अभ्यनन्दन्त हर्षिताः ॥ तस्मात्स नन्दकः खड्गो देवोक्तो हरिरग्रहीत् ॥ १६ ॥ तं जग्राह शनैर्देवो विकोशः सोऽभ्यपद्यत ॥ खड्गो नीलो रत्नमुष्टिस्ततोऽभूच्छतबाहुकः ॥ १७ ॥ दैत्यः स गदया देवान्द्रावयामास वै रणे ॥ विष्णुना खड्गच्छिन्नानि दैत्यगात्राणि भूतले ॥ १८ ॥ पतितानि तु संस्पर्शान्नन्दकस्य च तानि हि ॥ लोहभूतानि सर्वाणि हत्वा तस्मै हरिर्वरम् ॥ १९ ॥ ददौ पवित्रमङ्गं ते ह्यायुधाय भवेद्भुवि ॥ हरिप्रसादाद्ब्रह्मा पि विना विघ्नं हरिं प्रभुम् ॥ २० ॥ पूजयामास यज्ञेन वक्ष्येऽथो खड्गलक्षणम् ॥ खटीखट्टरजाता ये दर्शनीयास्तु ते स्मृताः ॥२१॥ कायच्छिदस्त्वार्षिकाः स्युर्दृढाः सूपारकोद्भवाः ॥ तीक्ष्णाश्छेदसहा वङ्गास्तीक्ष्णाः स्युश्चाङ्गदेशजाः ॥ २२ ॥ शतार्द्धमङ्गुलानां च श्रेष्ठं खड्गं प्रकीर्त्तितम् ॥ तदर्द्धं मध्यमं ज्ञेयं ततो हीनं न धारयेत् ॥ २३ ॥ दीर्घं सुमधुरं स्निग्धं यस्य खड्गस्य सत्तम ॥ किङ्किणीसदृशं तस्य धारणं श्रेष्ठमुच्यते ॥ २४ ॥ खड्गः पद्मपलाशाभो मण्डला ग्रश्च शस्यते ॥ करवीरदलाग्राभो घृतगन्धो वियत्प्रभः ॥ २५॥ समाङ्गुलस्थाः शस्यन्ते व्रणाः खड्गेषु लिङ्गवत् ॥ कालोलूक-

स्वर्णाभा विषमास्ते न शोभनाः ॥२६॥ खड्गे न पश्येद्वदनमुच्छिष्टो न स्पृशेदसिम् ॥ मूल्यं जातिं न कथयेन्नाशी कुर्य्यान्न शीर्षके ॥२७॥
इत्यादिमहापुराणे आग्नेये आयुधलक्षणादिकं नाम पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥ अथ रत्नपरीक्षा ॥ अग्निरुवाच ॥
रत्नानां लक्षणं वक्ष्ये रत्नं धार्य्यामिदं नृपैः ॥ वज्रं मरकतं रत्नं पद्मरागं च मौक्तिकम् ॥१॥ इन्द्रनीलं महानीलं वैदूर्य्यं गन्धशस्यकम् ॥ चंद्रकान्तं सूर्य्यकान्तं स्फटिकं पुलकं तथा ॥२॥ कर्केतनं पुष्परागं तथा ज्योतीरसं द्विज ॥ स्फाटिकं राजपट्टं च तथा राजमयं शुभम् ॥३॥
सौगन्धिकं तथा गर्भं शंखब्रह्ममयं तथा ॥ गोमेदं रुधिराक्षं च तथा भल्लातकं द्विज ॥ ४ ॥ धूलीं मरकतं चैव तुत्थकं सीसमेव च ॥ पीलुं प्रवालकं चैव गिरिवज्रं द्विजोत्तम ॥ ५ ॥ भुजङ्गममणिं चैव तथा वज्रमणिं शुभम् ॥ टिट्टिभं च तथा पिण्डं भ्रामरं च तथोत्पलम् ॥ ६ ॥
सुवर्णप्रतिबद्धानि रत्नानि श्रीजयादिके ॥ अन्तःप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च ॥ ७ ॥ सुधार्य्या नैव धार्य्यास्तु निष्प्रभा मलिनास्तथा ॥ खण्डाः सशर्करा ये च प्रशस्तं वज्रधारणम् ॥८॥ अभ्यन्तरातिं यद्वज्रमभेद्यं विमलं च यत् ॥ षट्कोणं शक्रचापाभं लघु चार्कनिभं शुभम् ॥ ९ ॥ शुकपक्षनिभास्निग्धः कान्तिमान्विमलस्तथा ॥ स्वर्णचूर्णनिभैः सूक्ष्मैर्मरकतश्च बिन्दुभिः ॥ १० ॥ स्फटिकः पद्मरागाः स्यू रागवन्तोऽतिनिर्मलाः ॥ जातरङ्गा भवन्तीह कुरुविन्दसमुद्भवाः ॥ ११ ॥ सौगन्धिकोत्थाः कापाया मुक्ताफलास्तु शुक्तिजाः ॥ विमलास्तेभ्य उत्कृष्टा ये च शंखोद्भवा मुने ॥ १२ ॥ नागदन्तभवाश्चाग्र्याः कुम्भसूकरमत्स्यजाः ॥ वेणुनागभवाः श्रेष्ठा मौक्तिकं मेघजं वरम् ॥ १३ ॥ वृत्तत्वं शुक्लता स्वाच्छ्यं महत्त्वं मौक्तिके गुणाः ॥ इन्द्रनीलं शुभं क्षीरे राजते भ्राजतेऽधिकम् ॥ १४ ॥ रञ्जयेत्स्वप्रभावेण तममूल्यं विनिर्दिशेत् ॥ नीलरक्तं तु वैदूर्य्यं श्रेष्ठं हारादिकं भजेत् ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये रत्नपरीक्षा नाम षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥ अथ वास्तुलक्षणम् ॥ अग्निरुवाच ॥ वास्तुलक्ष्म प्रवक्ष्यामि विप्रादीनां च भूरिह ॥ श्वेता रक्ता तथा पीता कृष्णा चैव यथाक्रमम् ॥ १ ॥ घृतरक्तान्नमद्यानां गन्धाढ्या वसतश्च भूः ॥ मधुरा च कषाया च अम्लाद्युपरसा क्रमात् ॥ २ ॥ कुशैः शरैस्तथा काशैर्दूर्वाभिर्या च संश्रिता ॥ प्राच्यं विप्रांश्च निःशल्यां स्नातपूर्वं तु कल्पयेत् ॥ ३ ॥
चतुष्पष्टिपदं कृत्वा मध्ये ब्रह्मा चतुष्पदः ॥ प्राक्तेषां वै गृहस्वामी कथितस्तु तथार्य्यमा ॥ ४ ॥ दक्षिणेन विवस्वांश्च मित्रः

पश्चिमतस्तथा ॥ उदङ्महीधरश्चैव आपवत्सौ च वह्निगे ॥ ५ ॥ सावित्रश्चैव सविता जयेन्द्रो नैर्ऋतेऽम्बुधौ ॥ रुद्रव्याधी च वायव्ये पूर्वादौ कोणगाद्बहिः ॥ ६ ॥ महेन्द्रश्च रविः सत्यो भृशः पूर्वेऽथ दक्षिणे ॥ गृहक्षतोऽर्य्यमधृती गन्धर्वाश्चाथ वारुणे ॥ ७ ॥ पुष्पदन्तोऽसुराश्चैव वरुणो यक्ष एव च ॥ सौम्ये भल्लाटसोमौ चाप्यदितिर्धनदस्तथा ॥ ८ ॥ नागः करग्रहश्चैश्यां ह्यष्टौ दिशि दिशि स्मृताः ॥ आद्यन्तौ तु तयोर्देवौ प्रोक्तावत्र गृहेश्वरौ ॥ ९ ॥ पर्ज्यन्यः प्रथमो देवो द्वितीयश्च करग्रहः ॥ महेन्द्ररविसत्याश्च भृशोऽथ गगनं तथा ॥ ॥ १० ॥ पवनः पूर्वतश्चैव अन्तरिक्षधनेश्वरौ ॥ आग्नेये चाथ नैर्ऋत्ये मृगसुग्रीवकौ सुरौ ॥ ११ ॥ रोगो मुख्यश्च वायव्ये दक्षिणे पुष्पवित्तदौ ॥ गृहक्षतो यमभृशौ गन्धर्वौ नागपैतृकः ॥ १२ ॥ आप्ये दौवारिकसुग्रीवौ पुष्पदन्तोऽसुरो जलम् ॥ यक्ष्मा रोगश्च शोषश्च ह्युत्तरे नागराजकः ॥ १३ ॥ मुख्यो भाल्लाटशशिनौ ह्यदितिश्च कुबेरकः ॥ नागो हुताशः श्रेष्ठो वै शक्रसूर्य्यौ च पूर्वतः ॥ १४ ॥ दक्षे गृहक्षतः पुष्प आप्ये सुग्रीव उत्तमः ॥ पुष्पदन्तो ह्युदग्द्वारि भल्लाटः पुष्पदन्तकः ॥ १५ ॥ शिलेष्टकादिविन्यासं मन्त्रैः प्राच्यं सुरांश्चरेत् ॥ नन्दे नन्दय वासिष्ठे वसुभिः प्रजया सह ॥ १६ ॥ जये भार्गवदायादे प्रजानां जयमावह ॥ पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् ॥ १७॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ॥ सर्वबीजसमायुक्ते सर्वरत्नौषधैर्वृते ॥ १८ ॥ रुचिरे नन्दने नन्दे वासिष्ठे रम्यतामिह ॥ प्रजापतिसुते देवि चतुरस्रे महीमये ॥ १९ ॥ सुभगे सुव्रते भद्रे गृहे काश्यपि रम्यताम् ॥ पूजिते परमाचार्य्यैर्गन्धमाल्यैरलंकृते ॥ २० ॥ भव भूतिकरे देवि गृहे भार्गवि रम्यताम् ॥ अव्यङ्गचे चाक्षते पूर्णे मुनेरङ्गिरसः सुते ॥२१ ॥ इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् ॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥ २२ ॥ मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ॥ गृहप्रवेशेऽपि तथा शिलान्यासं समाचरेत् ॥ ॥ २३ ॥ उत्तरेण शुभः प्लक्षो वटः प्राक्स्याद्गृहादितः ॥ उदुम्बरश्च याम्येन पश्चिमेऽश्वत्थ उत्तमः ॥ २४ ॥ वामभागे तथोद्यानं कुर्य्याद्वासं गृहे शुभम् ॥ सायं प्रातस्तु घर्मार्तो शीतकाले दिनान्तरे ॥ २५ ॥ वर्षारात्रे भुवः शोषे सेक्तव्या रोपितद्रुमाः ॥ विडङ्गघृतसंयुक्तान्सेचयेच्छीतवारिणा ॥ २६ ॥ फलनाशे कुलित्थैश्च माषैर्मुद्गैस्तिलैर्यवैः ॥ घृतशीतपयःसेकः फलपुष्पाय सर्वदा ॥ २७ ॥ मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ॥ आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ॥ २८ ॥ गोमांसमुदकं चेति सप्तरात्रं निधापयेत् ॥

उत्सेकं सर्ववृक्षाणां फलपुष्पादिवृद्धिदम् ॥ २९ ॥ मत्स्योदकेन शीतेन ह्याम्राणां सेक इष्यते ॥ प्रशस्तं चाप्यशोकानां कामिनीपाद-
ताडनम् ॥ ३० ॥ खर्जूरनारिकेलादेर्लवणाद्विर्विवर्द्धनम् ॥ विडङ्गमत्स्यमांसाद्विः सर्वेषां दोहदं शुभम् ॥ ३१ ॥ इत्यादिमहापुराणे
आग्नेये वास्त्वादिलक्षणं नाम सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ अथ पुष्पादिपूजाफलम् ॥ अग्निरुवाच ॥ पुष्पैस्तु
पूजनाद्विष्णुः सर्वकार्य्येषु सिद्धिदः ॥ मालती मल्लिका यूथी पाटला करवीरकम् ॥ १ ॥ यावन्तिरतिमुक्तश्च कर्णिकारः कुरण्टकः ॥
कुब्जकस्तगरो नीपो बाणो बर्बरमल्लिका ॥ २ ॥ अशोकस्तिलकः कुन्दः पूजायै स्यात्तमालजम् ॥ बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य
तु ॥ ३ ॥ तुलसीकालतुलसीपत्रं वासकमर्च्चने ॥ केतकीपत्रपुष्पं च पद्मं रक्तोत्पलादिकम् ॥ ४ ॥ नार्कं नोन्मत्तकं काश्ची पूजने
गिरिमल्लिका ॥ कोटजं शाल्मलीपुष्पं कण्टकारीभवं न हि ॥ ५ ॥ घृतप्रस्थेन विष्णोश्च स्नानं गोकोटिसत्फलम् ॥ आढकेन तु राजा स्याद्
घृतक्षीरेर्दिवं व्रजेत् ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये पुष्पादिपूजाफलं नामाष्टचत्वारिंशदधिकाद्विशततमोऽध्यायः ॥ २४८ ॥
अथ धनुर्वेदः ॥ अग्निरुवाच ॥ चतुष्पादं धनुर्वेदं वदे पञ्चविधं द्विज ॥ रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्त्तितम् ॥ १ ॥ यन्त्रमुक्तं पाणि-
मुक्तं मुक्तसन्धारितं तथा ॥ अमुक्तं बाहुयुद्धं च पञ्चधा तत्प्रकीर्तितम् ॥ २ ॥ तत्र शस्त्रास्त्रसम्पत्त्या द्विविधं परिकीर्तितम् ॥ ऋजुमाय -
विभेदेन भूयो द्विविधमुच्यते ॥ ३ ॥ क्षेपणी चापयन्त्राद्यैर्यन्त्रमुक्तं प्रकीर्त्तितम् ॥ शिलातोमरयन्त्राद्यं पाणिमुक्तं प्रकीर्त्तितम् ॥ ४ ॥
मुक्तसन्धारितं ज्ञेयं प्रासाद्यमपि यद्भवेत् ॥ खड्गादिकममुक्तं च नियुद्धं विगतायुधम् ॥५॥ कुर्य्याद्योग्यानि पात्राणि योद्धुमिच्छुर्जितश्रमः ॥
धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च ॥ ६ ॥ तानि खड्गजघन्यानि बाहुप्रत्यवराणि च ॥ धनुर्वेदे गुरुर्विप्रः प्रोक्तो वर्णद्वयस्य
च ॥ ७ ॥ युद्धाधिकारः शूद्रस्य स्वयं व्यापदि शिक्षया ॥ देशस्थैः सङ्करे राज्ञः कार्य्या युद्धसहायता ॥ ८ ॥ अङ्गुष्ठगुल्फपाण्यंघ्र्यः
श्लिष्टाः स्युः सहिता यदि ॥ दृष्टं समपदं स्थानमेतल्लक्षणतस्तथा ॥ ९ ॥ बाह्याङ्गुलिस्थितौ पादौ स्तब्धजानुबलावुभौ ॥ त्रिवित-
स्त्यन्तरास्थानमेतद्वैशास्त्रमुच्यते ॥ १० ॥ हंसपंक्त्याकृतिसमे दृश्येते यत्र जानुनी ॥ चतुर्वितास्तिविच्छिन्ने तदेतन्मण्डलं स्मृतम् ॥
॥ ११ ॥ इलाकृतिमयं यच्च स्तब्धजानूरुदक्षिणम् ॥ वितस्त्यः पञ्च विस्तारे तदालीढं प्रकीर्त्तितम् ॥ १२ ॥ एतदेव विपर्य्यस्तं प्रत्या-

पश्चिमतस्तथा ॥ उदङ्महीधरश्चैव आपवत्सौ च वह्निगे ॥ ५ ॥ सावित्रश्चैव सविता जयेन्द्रो नैर्ऋतेऽम्बुधौ ॥ रुद्रव्याधी च वायव्ये पूर्वादौ कोणगाद्बहिः ॥ ६ ॥ महेन्द्रश्च रविः सत्यो भृशः पूर्वेऽथ दक्षिणे ॥ गृहक्षतोऽर्य्यमधृती गन्धर्वाश्चाथ वारुणे ॥ ७ ॥ पुष्पदन्तोऽसुराश्चैव वरुणो यक्ष एव च ॥ सौम्ये भल्लाटसोमौ चाप्यदितिर्धनदस्तथा ॥ ८ ॥ नागः करग्रहश्चैश्यां ह्यष्टौ दिशि दिशि स्मृताः ॥ आद्यन्तौ तु तयोर्देवौ प्रोक्तावत्र गृहेश्वरौ ॥ ९ ॥ पर्ज्जन्यः प्रथमो देवो द्वितीयश्च करग्रहः ॥ महेन्द्ररविसत्याश्च भृशोऽथ गगनं तथा ॥ ॥ १० ॥ पवनः पूर्वतश्चैव अन्तरिक्षधनेश्वरौ ॥ आग्नेये चाथ नैर्ऋत्ये मृगसुग्रीवकौ सुरौ ॥ ११ ॥ रोगो मुख्यश्च वायव्ये दक्षिणे पुष्पवित्तदौ ॥ गृहक्षतो यमभृशौ गन्धर्वौ नागपैतृकः ॥ १२ ॥ आप्ये दौवारिकसुग्रीवौ पुष्पदन्तोऽसुरो जलम् ॥ यक्ष्मा रोगश्च शोषश्च ह्युत्तरे नागराजकः ॥ १३ ॥ मुख्यो भाल्लाटशशिनौ ह्यदितिश्च कुबेरकः ॥ नागो हुताशः श्रेष्ठो वै शक्रसूर्य्यौ च पूर्वतः ॥ १४ ॥ दक्षे गृहक्षतः पुष्प आप्ये सुग्रीव उत्तमः ॥ पुष्पदन्तो ह्युदग्द्वारि भल्लाटः पुष्पदन्तकः ॥ १५ ॥ शिलेष्टकादिविन्यासं मन्त्रैः प्राच्यं सुरांश्चरेत् ॥ नन्दे नन्दय वासिष्ठे वसुभिः प्रजया सह ॥ १६ ॥ जये भार्गवदायादे प्रजानां जयमावह ॥ पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् ॥ १७॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ॥ सर्वबीजसमायुक्ते सर्वरत्नौषधैर्वृते ॥ १८ ॥ रुचिरे नन्दने नन्दे वासिष्ठे रम्यतामिह ॥ प्रजापतिसुते देवि चतुरस्रे महीमये ॥ १९ ॥ सुभगे सुव्रते भद्रे गृहे काश्यपि रम्यताम् ॥ पूजिते परमाचार्य्यैर्गन्धमाल्यैरलंकृते ॥ २० ॥ भव भूतिकरे देवि गृहे भार्गवि रम्यताम् ॥ अव्यङ्गचे चाक्षते पूर्णे मुनेराङ्गिरसः सुते ॥२१ ॥ इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् ॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥ २२ ॥ मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ॥ गृहप्रवेशेऽपि तथा शिलान्यासं समाचरेत् ॥ ॥ २३ ॥ उत्तरेण शुभः पुष्पो वटः प्राक्स्याद्गृहादितः ॥ उदुम्बरश्च याम्येन पश्चिमेऽश्वत्थ उत्तमः ॥ २४ ॥ वामभागे तथोद्यानं कुर्य्याद्वासं गृहे शुभम् ॥ सायं प्रातस्तु घर्मान्तौ शीतकाले दिनान्तरे ॥ २५ ॥ वर्षारात्रे भुवः शोषे सेक्तव्या रोपितद्रुमाः ॥ विडङ्गघृतसंयुक्तान्सेचयेच्छीतवारिणा ॥ २६ ॥ फलनाशे कुलित्थैश्च माषैर्मुद्गैस्तिलैर्यवैः ॥ घृतशीतपयःसेकः फलपुष्पाय सर्वदा ॥ २७ ॥ मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ॥ आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ॥ २८ ॥ गोमांसमुदकं चेति सप्तरात्रं निधापयेत् ॥

उत्सेकं सर्ववृक्षाणां फलपुष्पादिवृद्धिदम् ॥ २९ ॥ मत्स्योदकेन शीतेन स्नाग्राणां सेक इष्यते ॥ प्रशस्तं चाप्यशोकानां कामिनीपाद-
ताडनम् ॥ ३० ॥ खर्जूरनारिकेलादेर्लवणाद्विर्विवर्द्धनम् ॥ विडङ्गमत्स्यमांसाद्रिः सर्वेषां दोहदं शुभम् ॥ ३१ ॥ इत्यादिमहापुराणे
आग्नेये वास्त्वादिलक्षणं नाम सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ अथ पुष्पादिपूजाफलम् ॥ अग्निरुवाच ॥ पुष्पैस्तु
पूजनाद्विष्णुः सर्वकाय्येंषु सिद्धिदः ॥ मालती मल्लिका यूथी पाटला करवीरकम् ॥ १ ॥ यावन्तिरतिमुक्तश्च कर्णिकारः कुरण्टकः ॥
कुब्जकस्तगरो नीपो बाणो बर्बरमल्लिका ॥ २ ॥ अशोकस्तिलकः कुन्दः पूजायै स्यात्तमालजम् ॥ बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य
तु ॥ ३ ॥ तुलसीकालतुलसीपत्रं वासकमर्च्चने ॥ केतकीपत्रपुष्पं च पद्मं रक्तोत्पलादिकम् ॥ ४ ॥ नार्क्कं नोन्मत्तकं काश्ची पूजने
गिरिमल्लिका ॥ कौटजं शाल्मलीपुष्पं कण्टकारीभवं न हि ॥ ५ ॥ घृतप्रस्थेन विष्णोश्च स्नानं गोकोटिसत्फलम् ॥ आढकेन तु राजा स्याद्
घृतक्षीरैर्दिवं व्रजेत् ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये पुष्पादिपूजाफलं नामाष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥
अथ धनुर्वेदः ॥ अग्निरुवाच ॥ चतुष्पादं धनुर्वेदं वदे पञ्चविधं द्विज ॥ रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्त्तितम् ॥ १॥ यन्त्रमुक्तं पाणि-
मुक्तं मुक्तसन्धारितं तथा ॥ अमुक्तं बाहुयुद्धं च पञ्चधा तत्प्रकीर्तितम् ॥ २ ॥ तत्र शस्त्रास्त्रसम्पत्त्या द्विविधं परिकीर्तितम् ॥ ऋजुमाय -
विभेदेन भूयो द्विविधमुच्यते ॥ ३ ॥ क्षेपणी चापयन्त्राद्यैर्यन्त्रमुक्तं प्रकीर्त्तितम् ॥ शिलातोमरयन्त्राद्यं पाणिमुक्तं प्रकीर्त्तितम् ॥ ४ ॥
मुक्तसन्धारितं ज्ञेयं प्रासाद्यमपि यद्भवेत् ॥ खड्गादिकममुक्तं च नियुद्धं विगतायुधम् ॥५॥ कुर्य्याद्योग्यानि पात्राणि योद्धुमिच्छुर्जितश्रमः॥
धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च ॥ ६ ॥ तानि खड्गजघन्यानि बाहुप्रत्यवराणि च ॥ धनुर्वेदे गुरुर्विप्रः प्रोक्तो वर्णद्वयस्य
च ॥ ७ ॥ युद्धाधिकारः शूद्रस्य स्वयं व्यापादि शिक्षया ॥ देशस्थैः सङ्करे राज्ञः कार्य्या युद्धसहायता ॥ ८ ॥ अङ्गुष्ठगुल्फपाण्यंघ्र्यः
श्लिष्टाः स्युः सहिता यदि ॥ दृष्टं समपदं स्थानमेतल्लक्षणतस्तथा ॥ ९ ॥ बाह्याङ्गुलिस्थितौ पादौ स्तब्धजानुबलावुभौ ॥ त्रिवित-
स्त्यन्तरास्थानमेतद्वैशाखमुच्यते ॥ १० ॥ हसपंक्त्याकृतिसमे दृश्येते यत्र जानुनी ॥ चतुर्वितास्तिविच्छिन्ने तदेतन्मण्डलं स्मृतम् ॥
॥ ११ ॥ वक्राकृतिसमं यत्र स्तब्धजानुकटीश्रिया ॥ वितस्त्योः पञ्च विस्तारे वक्रकीर्त्तं प्रकीर्त्तितम् ॥ १२ ॥ प्रवदेत् विपर्य्यस्तं पूर्वा-

लीढमिति स्मृतम् ॥ तिर्य्यग्भूतो भवेद्वामो दक्षिणोऽपि भवेदृजुः ॥ १३ ॥ गुल्फौ पार्ष्णिग्रहौ चैव स्थितौ पञ्चाङ्गुलान्तरौ ॥ स्थानं ज्ञातं भवेदेतद्वादशाङ्गुलमायतम् ॥ १४ ॥ ऋजुजानुर्भवेद्वामी दक्षिणः सुप्रसारितः ॥ अथ वा दक्षिणं जानु कुञ्चं भवति निश्चलम् ॥ ॥ १५ ॥ दण्डायतो भवेदेष चरणः सह जानुना ॥ एवं विकटमुद्दिष्टं द्विहस्तान्तरमायतम् ॥ १६ ॥ जानुनी द्विगुणे स्यातामुत्तानौ चरणावुभौ ॥ अनेन विधियोगेन सम्पुटं परिकीर्तितम् ॥ १७ ॥ किञ्चिद्विवर्त्तितौ पादौ. समदण्डायतौ स्थिरौ ॥ दृष्टमेव यथान्याय्यं षोडशाङ्गुलमायतम् ॥ १८ ॥ स्वस्तिकेनात्र कुर्वीत प्रणामं प्रथमं द्विज ॥ कार्मुकं गृह्य वामेन बाणं दक्षिणकेन तु ॥ १९ ॥ वैशाखे यदि वा जाते स्थितौ वाप्यथ वायतौ ॥ गुणान्तं तु ततः कृत्वा कार्मुके प्रियकार्मुकः ॥ २० ॥ अधःकोटिं तु धनुषः फलदेशं तु पत्रिणः ॥ धरण्यां स्थापयित्वा तु तोलयित्वा तथैव च ॥ २१ ॥ भुजाभ्यामत्र कुञ्जाभ्यां प्रकोष्ठाभ्यां शुभव्रत ॥ तस्य बाणं धनुः श्रेष्ठं पुङ्खदेशे च पत्रिणः ॥ २२ ॥ विन्यासो धनुषश्चैव द्वादशाङ्गुलमन्तरम् ॥ ज्यया विशिष्टः कर्त्तव्यो नातिहीनो न चाधिकः ॥ २३ ॥ निवेश्य कार्मुकं नाभ्यां नितम्बे शरसङ्करम् ॥ उत्क्षिपेदुत्थितं हस्तमन्तरेणाक्षिकर्णयोः ॥ २४ ॥ पूर्वेण मुष्टिना ग्राह्यः स्तनाग्रे दक्षिणे शरः ॥ हरणं तु ततः कृत्वा शीघ्रं पूर्वं प्रसारयेत् ॥ २५ ॥ नाभ्यन्तरा नैव बाह्या नोर्ध्वका नाधरा तथा ॥ न च कुञ्जा न चोत्तानाना चला नातिवेष्टिता ॥ २६ ॥ समा स्थैर्य्यगुणोपेता पूर्वदण्डामिव स्थिता ॥ छादयित्वा ततो लक्ष्यं पूर्वेणानेन मुष्टिना ॥ २७ ॥ उरसा तूत्थितो यन्ता त्रिकोणविनतस्थितः ॥ न्यस्तांसो निश्चलग्रीवो मयूराञ्चितमस्तकः ॥ २८ ॥ ललाट-नासावक्रांसकूर्परेषु समं भवेत् ॥ अन्तरं त्र्यङ्गुलं ज्ञेयं चिबुकस्यांसकस्य च ॥ २९ ॥ प्रथमं त्र्यङ्गुलं ज्ञेयं द्वितीये द्व्यङ्गुलं स्मृतम् ॥ तृतीयेऽङ्गुलमुद्दिष्टमायतं चिबुकांसयोः ॥ ३० ॥ गृहीत्वा सायकं पुङ्खात्तर्जन्याङ्गुष्ठकेन तु ॥ अनामया पुनर्गृह्य तथा मध्यमयापि च ॥ ३१ ॥ तावदाकर्षयेद्वेगाद्यावद्बाणः सुपूरितः ॥ एवंविधमुपक्रम्य मोक्तव्यं विधिवत्खगम् ॥ ३२ ॥ दृष्टिमुष्टिहतं लक्ष्यं भिन्द्याद्बाणेन सुव्रत ॥ मुक्त्वा तु पश्चिमं हस्तं क्षिपेद्वेगेन पृष्ठतः ॥ ३३ ॥ एतदुच्छेदमिच्छन्ति ज्ञातव्यं हि त्वया द्विज ॥ कूर्परं तदधः कार्य्यमाकृष्य तु धनुष्मता ॥ ३४ ॥ ऊर्ध्वं विमुक्तके कार्य्ये (र्यं) लक्ष्यश्लिष्टं तु मध्यमम् ॥ श्रेष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारदैः ॥ ३५ ॥

ज्येष्ठस्तु सायको ज्ञेयो भवेद्वादश मुष्टयः॥ एकादश तथा मध्यः कनीयान्दश मुष्टयः ॥ ३६ ॥ चतुर्हस्तं धनुः श्रेष्ठं त्रयः सार्धं तु मध्यमम् ॥ कनीयस्तु त्रयः प्रोक्तं नित्यमेव पदातिनः ॥ अश्वे रथे गजे श्रेष्ठं तदेवं परिकीर्त्तितम् ॥ ३७ ॥ इत्यादिमहापुराणे आग्नेये धनुर्वेदो नामैकोनपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥ पुनः धनुर्वेदः ॥ अग्निरुवाच ॥ पूर्णायतं द्विजः कृत्वा ततो मांसैर्गदायुधान् ॥ सुनिर्धौतं धनुः कृत्वा यज्ञभूमौ निधापयेत् ॥ १ ॥ ततो बाणं समागृह्य दंशितः सुसमाहितः ॥ तूणमासाद्य बध्नीयाद्दृढां कक्षां च दक्षिणाम् ॥ २ ॥ विलक्ष्यमापि तद्बाणं तत्र चैव सुसंस्थितम् ॥ ततः समुद्धरेद्बाणं तूणाद्दक्षिणपाणिना ॥ ३ ॥ तेनैव सहितं मध्ये शरं संगृह्य धारयेत् ॥ वामहस्तेन वै कक्षां धनुस्तस्मात्समुद्धरेत् ॥ ४ ॥ अविषण्णमतिर्भूत्वा गुणे पुंखं निवेशयेत् ॥ सम्पीड्य सिंहकर्णेन पुंखेनापि समे दृढम् ॥ ५ ॥ वामकर्णोपविष्टं च फलं वामस्य धारयेत् ॥ वर्णान्मध्यमया तत्र वामाङ्गुल्या च धारयेत् ॥ ६ ॥ मनो लक्ष्यगतं कृत्वा मुष्टिना च विधानवित् ॥ दक्षिणे गात्रभागे तु कृत्वा वर्णं विमोक्षयेत् ॥ ७ ॥ ललाटपुटसंस्थानं दण्डं लक्ष्यं निवेशयेत् ॥ आकृष्य ताडयेत्तत्र चन्द्रकं षोडशाङ्गुलम् ॥८॥ मुक्त्वा बाणं ततः पश्चादुल्काशिक्षस्तदा तया ॥ निगृह्णीयान्मध्यमया ततोऽङ्गुल्या पुनः पुनः ॥ ९ ॥ अक्षिलक्ष्यं क्षिपेत्तूणाच्चतुरस्रं च दक्षिणम् ॥ चतुरस्रगतं वेद्यमभ्यसेच्चादितः स्थितः ॥ १० ॥ तस्मादनन्तरं तीक्ष्णं परावृत्तं गतं च यत् ॥ निम्नमुन्नतवेधं च ह्यभ्यसेत्क्षिप्रकं ततः ॥ ११ ॥ वेध्यस्थानेष्वथैतेषु सत्त्वस्य पुटकाद्धनुः ॥ हस्तावापशतैश्चित्रैस्तर्जयेदुस्तरैरपि ॥ १२ ॥ तस्मिन्वेध्यगते विप्र द्वे वेध्ये दृढसंज्ञके ॥ द्वे वेध्ये दुष्करे वेध्ये द्वे तथा चित्रदुष्करे ॥ ॥ १३ ॥ न तु निम्नं च तीक्ष्णं च दृढवेध्ये प्रकीर्त्तिते ॥ निम्नं दुष्करमुद्दिष्टं वेध्यमूर्ध्वगतं च यत् ॥ १४ ॥ मस्तकायनमध्ये तु चित्रदुष्करसञ्ज्ञके ॥ एवं वेध्यगणं कृत्वा दक्षिणेनेतरेण च ॥ १५ ॥ आरोहेत्प्रथमं वीरो जितलक्षस्ततो नरः ॥ एष एव विधिः प्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः ॥ १६ ॥ अधिकं भ्रमणं तस्य तस्माद्वेध्यात्प्रकीर्त्तितम् ॥ लक्ष्यं संयोजयेत्तत्र पत्रिपत्रगतं दृढम् ॥ १७ ॥ भ्रान्तं प्रचलितं चैव स्थिरं यच्च भवेदिति ॥ समन्तात्ताडयेद्भिन्द्याच्छेदयेद्व्यथयेदपि ॥ १८ ॥ कर्मयोगविधानज्ञो ज्ञात्वैवं विधिमाचरेत् ॥ मनसा चक्षुषा दृष्ट्या योगशिक्षुर्यमं नयेत् ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये धनुर्वेदो नाम पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

पुनः धनुर्वेदः ॥ अग्निरुवाच ॥ जितहस्तो जितमातिर्जितदृग्लक्ष्यसाधकः ॥ नियतां सिद्धिमासाद्य ततो वाहनमारुहेत् ॥१॥ दशहस्तो भवेत्पाशो वृत्तः करमुखस्तथा ॥ गुणकार्पासमुञ्जानां भङ्गस्नाय्वर्कवर्मिणाम् ॥२॥ अन्येषां सुदृढानां च सुकृतं परिवेष्टितम् ॥ तथा त्रिंशत्समं पाशं बुधः कुर्य्यात्सुवर्त्तितम् ॥३॥ कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै तदा ॥ वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ॥ ४ ॥ कुंडलस्याकृतिं कृत्वा भ्राम्येकं मस्तकोपरि ॥ क्षिपेत्तृणमये तूर्णं पुरुषे चर्मवेष्टिते ॥ ५ ॥ वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च ॥ समयोगविधिं कृत्वा प्रयुञ्जीत सुशिक्षितम् ॥ ६ ॥ विजित्य तु यथान्यायं ततो बन्धं समाचरेत् ॥ कट्यां बद्धा ततः खड्गं वामपार्श्वावलम्बितम् ॥ ॥ ७ ॥ दृढं विगृह्य वामेन निष्कर्षेद्दक्षिणेन तु ॥ षडङ्गुलपरीणाहं सप्तहस्तसमुच्छ्रितम् ॥ ८ ॥ अयोमय्यः शलाकाश्च वर्माणि विविधानि च ॥ अर्द्धहस्ते समे चैव तिर्य्यगूर्ध्वगतं तथा ॥ ९ ॥ योजयेद्विधिना येन तथात्वं गदतः शृणु ॥ तूणचर्मावनद्धाङ्गं स्थापयित्वा नवं दृढम् ॥ १० ॥ करेणादाय लगुडं दक्षिणाङ्गुलकं नवम् ॥ उद्यम्य घातयेद्यस्य नाशस्तेन शिशोर्दृढम् ॥ ११ ॥ उभाभ्यामथ हस्ताभ्यां कुर्य्यात्तस्य निपातनम् ॥ अङ्केशेन ततः कुर्वन्वधे सिद्धिः प्रकीर्त्तिता ॥ वाहानां श्रमकरणं प्रचारार्थं पुरा तव ॥ १२ ॥ इत्यादिमहापुराणे आग्नेये धनुर्वेदो नामैकपञ्चाशदधिकद्विशततमोऽध्यायः ॥२५१॥ पुनः धनुर्वेदः ॥ अग्निरुवाच ॥ भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम् ॥ सम्पातं समुदीर्णं च श्येनपातमथाकुलम् ॥ १ ॥ उद्धूतमवधूतं च सव्यं दक्षिणमेव च ॥ अनालक्षितविस्फोटौ करालेन्द्रमहासखौ ॥ २ ॥ विकरालनिपातौ च विभीषणभयानकौ ॥ समग्रार्द्धतृतीयांशपादपादार्द्धवारिजाः ॥ ३ ॥ प्रत्यालीढमथालीढं वराहं लुलितं तथा ॥ इति द्वात्रिंशतो ज्ञेयौ खड्गचर्मविधी रणे ॥ ४ ॥ परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितम् ॥ ऊर्ध्वं क्षिप्तमधः क्षिप्तं सन्धारितविधारितम् ॥५॥ श्येनपातं गज (जा) पातं ग्राहग्राह्यं तथैव च ॥ एवमेकादशविधा ज्ञेयाः पाशविधारणाः ॥ ६ ॥ ऋज्वायतं विशालं च तिर्य्यग्भ्रामितमेव च ॥ पञ्चकर्म विनिर्दिष्टं व्यस्ते पाशे महात्मभिः ॥ ७ ॥ छेदनं भेदनं पातो भ्रमणं शयनं तथा ॥ विकर्त्तनं कर्त्तनं च चक्रकर्मेदमेव च ॥ ८ ॥ आस्फोटः क्ष्वेडनं भेदस्त्रासान्दोलितकौ तथा ॥ शूलकर्माणि जानीहि षष्ठमाघातसंज्ञितम् ॥ ९ ॥ दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम ॥ ऋजुपक्षेषुणा प्राप्तं तोमरस्य प्रकीर्त्ति- ॥१६५॥

तम् ॥ १० ॥ अहतं विप्र गोमूत्रप्रभूतं कमलासनम् ॥ ततोर्ध्वगात्रं नमितं वामदक्षिणमेव च ॥ ११ ॥ आवृत्तं च परावृत्तं पादोद्भूतमवप्लुतम् ॥ हंसमर्द्दं विमर्द्दं च गदाकर्म प्रकीर्त्तितम् ॥ १२ ॥ करालमवघातं च देशोपप्लुतमेव च ॥ क्षिप्तहस्तं स्थितं शून्यं परशोस्तु विनिर्दिशेत् ॥ १३ ॥ ताडनं छेदनं विप्र तथा चूर्णनमेव च ॥ मुद्गरस्य तु कर्माणि तथा प्लवनघातनम् ॥ १४ ॥ संश्रान्तमथ विश्रान्तं गोविसर्गं सुदुर्द्धरम् ॥ भिन्दिपालस्य कर्माणि लगुडस्य च तान्यपि ॥ १५ ॥ अन्त्यं मध्यं परावृत्तं निदेशान्तं द्विजोत्तम ॥ वज्रस्येतानि कर्माणि पट्टिशस्य च तान्यपि ॥ १६ ॥ हरणं छेदनं घातो भेदनं प्रक्षणं तथा ॥ कृपाणकर्म निर्दिष्टं पातनं स्फोटनं तथा ॥ १७ ॥ त्रासनं रक्षणं घातो बलोद्धरणमायतम् ॥ क्षेपणीकर्म निर्दिष्टं यन्त्रकर्मैतदेव तु ॥ १८ ॥ सन्त्यागमवदंशश्च वराहोद्भूतकं तथा ॥ हस्तावहस्तमालीनमेकहस्तावहस्तके ॥ १९ ॥ द्विहस्तबाहुपाशे च कटिरोचितकोद्भते ॥ उरोललाटघाते च भुजाविधमनं तथा ॥ २० ॥ करोद्भूतं विमानं च पादाहतिविपादिकम् ॥ गात्रसंश्लेषणं शांत तथा गात्रविपर्य्ययः ॥ २१ ॥ ऊर्ध्वप्रहारं घातं च गोमूत्रं सव्यदक्षिणे ॥ पारकं तारकं दण्डं कबरीबन्धमाकुलम् ॥ २२ ॥ तिर्य्यग्बन्धमपामार्गं भीमवेगं सुदर्शनम् ॥ सिंहाक्रान्तं गजाक्रान्तं गर्दभाक्रान्तमेव च ॥ २३ ॥ गदाकर्माणि जानीयान्नियुद्धस्याथ कर्म च ॥ आकर्षणं विकर्षं च बाहूनां मूलमेव च ॥ २४ ॥ ग्रीवाविपरिवर्त्तं च पृष्ठभङ्गं सुदारुणम् ॥ पर्य्यासनविपर्य्यासौ पशुमारमजाविकम् ॥ २५ ॥ पादप्रहारमास्फोटं कटिरोचितकं तथा ॥ गात्राश्लेषं स्कन्धगतं महीव्याजनमेव च ॥ २६ ॥ उरोललाटघातं च विस्पष्टकरणं तथा ॥ उद्भूतमवधूतं च तिर्य्यङ्मार्गगतं तथा ॥ २७ ॥ गजस्कन्धमवक्षेपमपराङ्मुखमेव च ॥ देवमार्गमधोमार्गममार्गगमनाकुलम् ॥ २८ ॥ यष्टिघातमवक्षेपो वसुधादारणं तथा ॥ जानुबन्धं भुजाबन्धं गात्रबन्धं सुदारुणम् ॥ २९ ॥ विपृष्ठं सोदकं शुभ्रं भुजावेष्टितमेव च ॥ सन्नद्धैः संयुगे भाव्यं सशस्त्रैस्तैर्गजादिभिः ॥ ३० ॥ वराङ्कुशधरौ चोभौ ह्येको ग्रीवामतोऽपरः ॥ स्कन्धगौ द्वौ च धानुष्कौ द्वौ च खड्गधरौ गजे ॥ ३१ ॥ रथे रणे गजे चैव तुरङ्गाणां त्रयं भवेत् ॥ धानुष्काणां त्रयं प्रोक्तं रक्षार्थं तुरगस्य च ॥ ३२ ॥ धन्विनो रक्षणार्थाय चर्मिणं तु नियोजयेत् ॥ स्वमन्त्रैः शस्त्रमभ्यर्च्य शास्त्रं त्रैलोक्यमोहनम् ॥ यो युद्धे याति स जयेदरीन्सम्पालयेद्ध्रुवम् ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेये द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥ अथ व्यवहारनिरूपणम् ॥ अग्निरुवाच ॥ व्यवहारं प्रवक्ष्यामि नयानयविवे-

कदम् ॥ चतुष्पाच्च चतुस्थानश्चतुःसाधन उच्यते ॥ १ ॥ चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्यते ॥ अष्टाङ्गोऽष्टादशपदः शतशास्त्रस्तथैव च ॥ २ ॥ त्रियोनिर्द्वयभियोगश्च द्विद्वारो द्विगतिस्तथा ॥ धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ॥ ३ ॥ चतुष्पाद्व्यवहाराणामुत्तरः पूर्वसाधकः ॥ तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ॥ ४ ॥ चरित्रं संग्रहे पुंसां राजाज्ञानां तु शासनम् ॥ सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते ॥ ५ ॥ चतुर्णामाश्रमाणां च रक्षणात्स चतुर्हितः ॥ कर्त्तारं साक्षिणश्चैव सभ्यान्राजानमेव च ॥ ६ ॥ व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः ॥ धर्मस्यार्थस्य यशसो लोकपङ्क्तेस्तथैव च ॥ ७ ॥ चतुर्णां करणादेष चतुष्कारी प्रकीर्त्तितः ॥ राजा सपुरुषः सभ्याः शास्त्रं गणकलेखकौ ॥ ८ ॥ हिरण्यमग्निरुदकमष्टाङ्गः समुदाहृतः ॥ कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात्प्रवर्त्तते ॥ ९ ॥ त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत् ॥ द्व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ॥ १० ॥ शंका सद्भिस्तु संसर्गात्तत्त्वं षोढादिदर्शनात् ॥ पक्षद्वयाभिसम्बन्धाद्द्विद्वारः समुदाहृतः ॥ ११ ॥ पूर्ववादस्तयोः पक्षः प्रतिपक्षस्तदनन्तरः ॥ भूतच्छलानुसारित्वाद्विगतिः समुदाहृता ॥ १२ ॥ ऋणं देयमदेयं च येन यत्र यथा च यत् ॥ दानग्रहणधर्मश्च ऋणादानमिति स्मृतम् ॥ १३ ॥ स्वद्रव्यं यत्र विश्रम्भान्निक्षिप्त्याविशंकितः ॥ निक्षेपं नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥ १४ ॥ वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते ॥ तत्सम्भूयसमुत्थानं व्यवहारपदं विदुः ॥ १५ ॥ दत्त्वा द्रव्यं च सम्यग् यः पुनरादातुमिच्छति ॥ दात्ताप्रदानिकं नाम तद्विवादपदं स्मृतम् ॥ १६ ॥ अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते ॥ अशुश्रूषामुपेत्यैतद्विवादपदमुच्यते ॥ १७ ॥ भृत्यानां वेतनस्योक्ता दानादानविधिक्रिया ॥ वेतनस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ १८ ॥ निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा ॥ विक्रीयते परोक्षं यत्स ज्ञेयोऽस्वामिविक्रयः ॥ १९ ॥ विक्रीय पण्यं मूल्येन क्रेत्रे यच्च न दीयते ॥ विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥ २० ॥ क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी ॥ २१ ॥ पाषण्डनैगमादीनां स्थितिः समय उच्यते ॥ समयस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ २२ ॥ सेतुकेदारमर्य्यादाविकृष्टाकृष्टनिश्चयः ॥ क्षेत्राधिकारे यत्र स्युर्विवादः क्षेत्रजस्तु सः ॥ २३ ॥ वैवाहिको विधिः स्त्रीणां यत्र पुंसां च कीर्त्यते ॥ स्त्रीपुंसयोगसंज्ञं तु तद्विवादपदं स्मृतम् ॥ २४ ॥ विभागोऽर्थस्य पैत्र्यस्य पुत्रैर्यस्तु प्रकल्प्यते ॥ दायभाग इति प्रोक्तं तद्विवादपदं

वुधैः ॥२५॥ सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः ॥ तत्साहसामिति प्रोक्तं विवादपदमुच्यते ॥ २६ ॥ देशजातिकुलादीनामाक्रोशाव्यङ्गसंयुतम् ॥ यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥ २७ ॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ॥ अस्त्रादिभिश्चोपघातैर्दण्डपारुष्यमुच्यत ॥ २८ ॥ अक्षवज्रशलाकाद्यैर्देवनं द्यूतमुच्यते ॥ पशुक्रीडा वयोभिश्च प्राणिद्यूतं समादिशेत् ॥ २९ ॥ प्रकीर्णकः पुनर्ज्ञेयो व्यवहारो निराश्रयः ॥ राज्ञामाज्ञाप्रतीघातस्तत्कर्माकरणं तथा ॥ ३० ॥ व्यवहारोऽष्टादशपदस्तेषां भेदोऽथ वै शतम् ॥ क्रियाभेदान्मनुष्याणां शत्रशास्त्रो निगद्यते ॥ ३१ ॥ व्यवहारान्नृपः पश्येज्ज्ञानिविप्रैरकोपनः ॥ शत्रुमित्रसमाः सभ्या अलोभा श्रुतिवेदिनः ॥ ३२ ॥ अपश्यंस्तान्कार्यवशात्सभ्यैर्विप्रं नियोजयेत् ॥ रागाल्लोभाद्भयाद्वापि स्मृत्यपेताादिकारिणः ॥३३॥ सभ्याः पृथक् पृथग्दण्डचा विवादाद्द्विगुणो दमः ॥ स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ॥ ३४ ॥ आवेदयति यद्राज्ञे व्यवहारपदं हि तत् ॥ प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ॥ ३५ ॥ समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥ श्रुतार्थस्योत्तरं लेख्यं पूर्ववेदकसन्निधौ ॥ ३६ ॥ ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ॥ ३७ ॥ चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥ अभियोगमनिस्तार्य्य नैनं प्रत्यभियोजयेत् ॥ ३८ ॥ अभियुक्तं च नान्येन त्यक्तं विप्रकृतिं नयेत् ॥ कुर्य्यात्प्रत्यभियोगं तु कलहे साहसेषु च ॥ ३९ ॥ उभयोः प्रतिभूर्ग्राह्यः समर्थः काम्यनिर्णये ॥ निह्नवे भावितो दद्याद्धनं राज्ञे तु तत्समम् ॥ ४० ॥ मिथ्याभियोगाद्द्विगुणमभियोगाद्धनं हरेत् ॥ साहसस्तेयपारुष्येष्वाभिशापात्यये स्त्रियाः ॥ ४१ ॥ विचारयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥ देशाद्देशान्तरं याति सृक्किणी परिलेढि च ॥ ४२ ॥ ललाटं स्विद्यते चास्य मुखवैवर्ण्यमेव च ॥ स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ॥ ४३ ॥ अभियोगेऽथ वा साक्ष्ये वाग्दुष्टः परिकीर्तितः ॥ सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत् ॥ ४४ ॥ न चाहतो वदेत्किञ्चिद्धनी दण्ड्यश्च स स्मृतः ॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ॥ ४५ ॥ पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥ सगणश्चेद्विवादः स्यात्तत्र हीनस्तु दापयेत् ॥ ४६ ॥ दत्तं पणं वसुं चैव धानिनो धनमेव च ॥ छलं निरस्य दूतेन व्यवहारान्नयेन्नृपः ॥ ४७ ॥ भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ निह्नुते निखिलानेकमेकदेशविभावितम् ॥ ४८ ॥ दाप्यैः

सर्वान्नृपेणार्थान्न ग्राह्यस्त्वनिवेदितः ॥ स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ॥ ४९ ॥ अर्थशास्त्राद्धि बलवद्धर्मशास्त्रमिति स्थितिः ॥ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ॥ ५० ॥ एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ॥ ५१ ॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥ पश्यतो.ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ॥ ५२ ॥ परेण भुज्यमाना या धनस्य दशवार्षिकी ॥ आधिसीमोपनिःक्षेपजडबालधनैर्विना ॥५३॥ तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥ आध्यादीनां विहर्त्तारं धनिने दापयेद्धनम् ॥ ५४ ॥ दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा ॥ आगमोऽप्यधिको भुक्तिं विना पूर्वक्रमागताम् ॥ ५५ ॥ आगमोऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो ॥ आगमेन विशुद्धेन भोगो याति प्रमाणताम् ॥ ५६ ॥ अविशुद्धागमो भोगः प्रामाण्यं नाधिगच्छति ॥ आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ॥ ५७ ॥ न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥ योऽभियुक्तः परेतः स्यात्तस्य रिक्थात्तमुद्धरेत् ॥ ५८ ॥ न तत्र कारणं भुक्तिरागमेन विना कृता ॥ बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्त्तयेत् ॥ ५९ ॥ स्त्रीनक्तमन्तरागारबहिः शौण्डकृतस्तथा ॥ मत्तोन्मत्तार्त्तव्यसनिबालभीतप्रयोजितः ॥ ६० ॥ असम्बद्धकृतश्चैव व्यवहारो न सिध्यति ॥ प्रनष्टाधिशतं देयं नृपेण धनिने धनम् ॥ ६१ ॥ विभावयेन्न चेल्लिङ्गैस्तत्समं दातुमर्हति ॥ देयं चौरहृतं द्रव्यं राज्ञा जनपदाय तु ॥ ६२ ॥ अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ॥ वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥ ६३ ॥ सप्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ॥ वस्त्रधान्याहिरण्यानां चतुस्त्रिद्विगुणा तथा ॥ ६४ ॥ ग्रामान्तरात्तु दशकं सामुद्रादपि विंशतिम् ॥ दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥ ६५ ॥ प्रपन्नं साधयन्नर्थं न वाच्यो नृपतिर्भवेत् ॥ साध्यमानो नृपं गच्छेद्दण्ड्यो दाप्यश्च तद्धनम् ॥ ६६ ॥ इत्यादिमहापुराणे आग्नेये व्यवहारनिरूपणं नाम त्रिपञ्चाशदधिकद्विशततमोऽध्यायः॥२५३॥ पुनर्व्यवहारनिरूपणम् ॥ अग्निरुवाच ॥ गृहीतार्थः क्रमाद्दाप्यो धनिनामधमर्णिकः॥ दत्त्वा तु ब्राह्मणायादौ नृपतेस्तदनन्तरम् ॥१॥ राज्ञाधमर्णिको दाप्यः साधितादृशकं स्मृतम् ॥ पञ्चकं तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥२॥ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ॥ ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ॥३॥ दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् ॥ मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परम् ॥४॥ ऋत्यमाह ऋणं दाप्यो योषिद्बहस्तयेन च ॥ पुत्रोऽनन्याश्रित-

द्रव्यः पुत्रहीनस्य ऋक्थिनः॥५॥अविभक्तैः कुटुम्बार्थे यद्दत्तं तु कृतं भवेत् ॥ दद्युस्तदृक्थिनेः प्रेते प्रोषिते वा कुटुम्बिनि ॥६॥ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता ॥ दद्याद्दते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥ ७॥ गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ॥ ऋणं दद्यात्पतिस्त्वासां यस्माद्वृत्तिस्तदाश्रया ॥८॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम् ॥ स्वयं कृतं वा यद्दत्तं नान्यत्स्त्री दातुमर्हति॥९॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽथ वा ॥ पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभाषितम् ॥ १० ॥ सुराकामद्यूतकृतं दण्डशुल्कावशेषकम् ॥ वृथा दानं तथैवेह पुत्रो दद्यान्न पैतृकम् ॥ ११ ॥ भर्तृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ॥ प्रातिभाव्यमृणं प्राह्यमविभक्तेन च स्मृतम् ॥ १२ ॥ दर्शने प्रत्यये दाने प्रतिभाव्यं विधीयते ॥ आधौ तु वितथे दाप्या वितथस्य सुता अपि ॥ १३ ॥ दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा ॥ न तत्पुत्रा धनं दद्युर्दद्युर्दानाय ये स्थिताः ॥ १४ ॥ बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम् ॥ एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ १५ ॥ प्रतिभूर्दापितो यत्र प्रकाशं धनिने धनम् ॥ द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥१६॥स्व (स) न्ततिस्त्रीपशव्यं धान्यं द्विगुणमेव च ॥ वस्त्रं चतुर्गुणं प्रोक्तं रथश्चाष्टगुणस्तथा ॥१७॥ आधिः प्रणश्येद्विगुणे धने यदि न मोक्ष्यते॥काले कालकृतं नश्येत्फलभोग्यो न नश्यति ॥१८॥ गोप्याधिभोग्यो नावृद्धिः सोपकारेऽथ भाविते ॥ नष्टे देयो विनष्टश्च दैवराजकृताद्ऋते ॥ १९ ॥ आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम् ॥ यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥ २० ॥ चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् ॥ सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ २१ ॥ उपस्थितस्य मोक्तव्य आधिर्दण्डोऽ (स्तेनो) न्यथा भवेत् ॥ प्रयोजके सति धनं कुलेऽन्यस्याधि माप्नुयात् ॥ २२ ॥ तत्कालकृतमूल्यो वा तत्र निष्टेदवृद्धिकः ॥ विना धारणकाद्वापि विक्रीणीते समाक्षिकम् ॥ २३ ॥ यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ॥ मोच्यश्चाधिस्तदुत्पाद्य प्रविष्टे द्विगुणे धने ॥ २४ ॥ वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्पयेत् ॥ द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ २५ ॥ न दाप्योऽपहृतं तत्तु राजदैवकतस्करैः ॥ प्रेषश्चेन्मार्गिते दत्ते दाप्यो दण्डश्च तत्समम् ॥ २६ ॥ आजीवन्स्वेच्छया दण्ड्यो दाप्यस्तच्चापि सोदयम् ॥ याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ॥२७॥ इत्यादिमहापुराणे आग्नेये व्यवहारो नाम चतुष्पञ्चाशदधिकद्विशततमोऽध्यायः॥ २५४ ॥

पुनर्व्यवहारे दिव्यप्रमाणम् ॥ अग्निस्नाचं ॥ तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ॥ धर्मप्रधानाः ऋजवः पुत्रवन्तो धनान्विताः ॥ १ ॥ पञ्चयज्ञक्रियायुक्ताः साक्षिणः पञ्च वा त्रयः ॥ यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ २ ॥ स्त्रीवृद्धबालाकितवमत्तोन्मत्ताभिशस्तकाः ॥ रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥ ३ ॥ पतितापात्रसम्बन्धिसहायरिपुतस्कराः ॥ असाक्षिणः सर्वसाक्षी चौर्य्यपारुष्यसाहसे ॥ ४ ॥ उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित् ॥ अब्रुवन्हि नरः साक्ष्यमृणं स दशबन्धकम् ॥ ५ ॥ राज्ञा सर्वं प्रदाप्यः स्यात्पट्चत्वारिंशकेऽहनि ॥ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः ॥ ६ ॥ स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥ साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ॥ ७ ॥ ये पातककृतां लोका महापातकिनां तथा ॥ अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम् ॥ ८ ॥ तान्सर्वान्समवाप्नोति यः साक्ष्यमनृतं वदेत् ॥ सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् ॥ ९ ॥ तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ द्वैधे बहूनां वचनं समेषु गुणिनां तथा ॥ १० ॥ गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ॥ यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ॥ ११ ॥ अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥ उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः ॥ १२ ॥ द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥ पृथक् पृथग्दण्डनीयाः कूटकृत्साक्षिणस्तथा ॥ १३ ॥ विवादाद्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥ यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ॥ १४ ॥ स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत् ॥ १५ ॥ यः कश्चिदर्थोऽभिमतः स्वरुच्या तु परस्परम् ॥ लेख्यं तु साक्षिमत्कार्य्यं तस्मिन्धनिकपूर्वकम् ॥ १६ ॥ समाप्तासतदर्द्धाहर्नामजातिस्वगोत्रजैः ॥ सब्रह्मचारिकात्मीयापितृनामादिचिह्नितम् ॥ १७ ॥ समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् ॥ मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥ १८ ॥ साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ॥ अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥ १९ ॥ अलिपिज्ञ ऋणी यः स्याल्लेखयेत्स्वमतं तु सः ॥ साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः ॥ २० ॥ उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना ॥ लिखितं ह्यमुकेनेति लेखकाऽर्थास्ततो लिखेत् ॥ २१ ॥ विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं च यत् ॥ तत्प्रमाणं स्मृतं सर्वं बलोपाधिकृताहते ॥ २२ ॥

ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु ॥ आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ॥ २३ ॥ देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ॥
भिन्ने छिन्ने तथा दग्धे लेख्यमन्यत्तु कारयेत् ॥ २४ ॥ सन्दिग्धार्थविशुद्ध्यर्थं स्वहस्तलिखितं तु यत् ॥ युक्तिप्राप्तिक्रियाचिह्नसम्बन्धा-
गमहेतुभिः ॥ २५ ॥ लेख्यस्य पृष्ठेऽभिलिखेत्प्रविष्टमधमार्णिनः ॥ धनी चोपगतं दद्यात्स्वहस्तपरिचिह्नितम् ॥ २६ ॥ दत्त्वर्णं पाटये-
ल्लेख्यं शुद्ध्यै चान्यत्तु कारयेत् ॥ साक्षिमच्च भवेद्यस्तु तद्दातव्यं ससाक्षिकम् ॥ २७ ॥ तुलाग्न्यापो विषं कोपो दिव्यानीह विशुद्ध्ये ॥
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ २८ ॥ रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥ विनापि शीर्षकात्कुर्य्यान्नृपद्रोहेऽथ
पातके ॥ २९ ॥ नाऽऽसहस्राद्धरेत्फालं न तुलां न विषं तथा ॥ नृपार्थेष्वभियोगेषु वहेयुः शुचयः सदा ॥ ३० ॥ सहस्रार्थे तुलादीनि
कोशमल्पेऽपि दापयेत् ॥ शतार्द्धं दापयेच्छुद्धमशुद्धो दण्डभाग्भवेत् ॥ ३१ ॥ सचैलस्नातमाहूय सूर्य्योदय उपोषितम् ॥ कारये-
त्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ३२ ॥ तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ॥ अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा
॥ ३३ ॥ तुलाधारणविद्धद्भिरभियुक्तस्तुलाश्रितः ॥ प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥ ३४ ॥ आदित्यचन्द्रावनिलोऽ-
नलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ ३५ ॥ त्वं तुले सत्यधामासि
पुरा देवैर्विनिर्मिता ॥ सत्यं वदस्व कल्याणि संशयान्मां विमोचय ॥ ३६ ॥ यद्यस्मि पापकृन्मानस्ततो मां त्वमधो नय ॥ शुद्धश्चे-
द्ऊर्ध्वमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥ ३७ ॥ कृत्वा विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत् ॥ सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत्
॥ ३८ ॥ त्वमेव सर्वभूतानामन्तश्चरसि पावक ॥ साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यङ्करे मम ॥ ३९ ॥ तस्येत्युक्तवतो लोहं पञ्चाश-
त्पलिकं समम् ॥ अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥ ४० ॥ स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् ॥ षोडशाङ्गुलकं
ज्ञेयं मण्डलं तावदन्तरम् ॥ ४१ ॥ मुक्त्वाग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् ॥ अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् ॥ ४२ ॥
पवित्राणां पवित्रं त्वं शोध्यं शोधय पावक ॥ सत्येन माभिरक्षस्व वरुणेत्यभिशस्तकम् ॥ ४३ ॥ नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं
विशेत् ॥ समकालमिषुं मुक्तमानीयाद्यो जवी नरः ॥ ४४ ॥ यदि तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् ॥ त्वं विष ब्रह्मणः पुत्र

सत्यधर्मे व्यवस्थितः ॥ ४५ ॥ त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् ॥ एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ॥ ४६ ॥
यस्य वेगैर्विना जीर्णं शुद्धिं तस्य विनिर्दिशेत् ॥ देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् ॥ ४७ ॥ संश्राव्यं पाययेत्तस्मान्नलात्तु प्रसृ-
तित्रयम् ॥ आचतुर्दशकादह्नो यस्य नो राजदैविकम् ॥ ४८ ॥ व्यसनं जायते घोरं स शुद्धः स्यादसंशयम् ॥ सत्यवाहनशस्त्राणि
गोबीजकनकानि च ॥ ४९ ॥ देवतागुरुपादाश्च इष्टापूर्त्तकृतानि च ॥ इत्येते सुकराः प्रोक्ताः शपथाः स्वल्पसंशये ॥ ५० ॥ इत्यादि-
महापुराणे आग्नेये व्यवहारे दिव्यानि नाम पञ्चपञ्चाश दधिकद्विशततमोऽध्यायः ॥ २५५ ॥ अथ दायविभागः ॥ अग्निरुवाच ॥ विभागं
चोत्पिता कुर्य्यादिच्छया विभजेत्सुतान् ॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा रयुः समांशिनः ॥ १ ॥ यदि दद्यात्समानंशान्कार्य्याः पत्न्यः
समांशिकाः ॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ २ ॥ उक्तरयानीहमानस्य किञ्चिद्दत्त्वा पृथक्क्रिया ॥ न्यूनाधिक विभ-
क्तानां धर्म्यश्च पितृणा कृतः ॥ ३ ॥ विभजेयुः सुताः पित्रोरूर्ध्वमृवथमृणं समम् ॥ मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥ ४ ॥
पितृद्रव्याविनाशेन यदन्यत्स्वयमर्जयेत् ॥ मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ ५ ॥ सामान्यार्थसमुत्थाने विभागस्तु समः
स्मृतः ॥ अनेकपितृकाणां तु पितृतो भागकल्पना ॥ ६ ॥ भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ॥ तत्र रयात्सदृशं स्वाम्यं पितुः
पुत्रस्य चोभयोः ॥ ७ ॥ विभक्तेषु सुतो जातः सवर्णायां विभागभाक् ॥ दद्याद्वा तद्विभागः स्यादायव्ययविशोधितात्
॥ ८ ॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेच्च यः ॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ ९ ॥ पितृभ्यां यस्य
यदत्तं तत्तस्यैव धनं भवेत् ॥ पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् ॥ १० ॥ असंस्कृतास्तु संस्कार्य्या भ्रातृभिः
पूर्वसंस्कृतैः ॥ भगिन्यश्च निजादंशादत्त्वांशं तु तुरीयकम् ॥ ११ ॥ चतुस्त्रिद्वेकभागाः रयुर्वर्णशो ब्राह्मणात्मजाः ॥ क्षत्रजा-
स्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥ १२ ॥ अन्योऽन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते ॥ तत्पुनस्ते समैरंशैर्विभजेरन्निति
स्थितिः ॥ १३ ॥ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ॥ उभयोरप्यसावूर्ध्वं पिण्डदाता च धर्मतः ॥ १४ ॥ औरसो धर्मपत्नी-
जस्तत्समः पुत्रिकासुतः ॥ क्षेत्रजः क्षेत्रजातस्तु समोत्रेणेतरेण वा ॥ १५ ॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ॥ कानीनः

कन्याकाजातो मातामहसुतो मतः ॥ १६ ॥ क्षतायाम क्षतायां वा जातः पौनर्भवः सुतः ॥ दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥ १७ ॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः ॥ दत्तात्मा तु स्वयं दत्तो गर्भे वित्तः सहोढजः ॥ १८ ॥ उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः ॥ पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥ १९ ॥ सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥ जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ॥ २० ॥ मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिकम् ॥ अभ्रातृको हरेत्सर्वं दुहितॄणां सुताऋते ॥ ॥ २१ ॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ तत्सुतो गोत्रजा बन्धुः शिष्यः सब्रह्मचारिणः ॥ २२ ॥ एषामभावे पूर्वेषां धनभांगुत्तरोत्तरः ॥ स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ २३ ॥ वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः ॥ क्रमेणाचार्य्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥ २४ ॥ संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ॥ दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च ॥ २५ ॥ अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यधनं हरेत् ॥ असंसृष्ट्यपि चादद्यात्सोदर्य्यो नान्यमातृजः ॥ २६ ॥ पतितस्तत्सुतः क्लीबः पङ्गुरुन्मत्तको जडः ॥ अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्यास्तु निरंशकाः ॥ २७ ॥ औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः ॥ सुताश्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात्कृताः ॥ २८ ॥ अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः ॥ निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥ २९ ॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् ॥ आधिवेदनिकं चैव स्त्रीधनं परिकीर्तितम् ॥ ३० ॥ बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ॥ अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः ॥ ३१ ॥ अप्रजस्त्रीधनं भर्त्तुर्ब्राह्म्यादिषु चतुर्ष्वपि ॥ दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत् ॥ ३२ ॥ दत्त्वा कन्यां हरन्दण्ड्यो व्ययं दद्याच्च सोदयम् ॥ मृतायां दत्तमादद्यात्प्रारिशोध्योभयव्ययम् ॥ ३३ ॥ दुर्भिक्षे धर्मकार्य्ये च व्याधौ संप्रतिरोधके ॥ गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति ॥ ३४ ॥ आधिवेद्यस्त्रियै दद्यादाधिवेदनिकं समम् ॥ न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्तितम् ॥ ३५ ॥ विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ॥ विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये दायविभागो नाम षट्पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥ अथ सीमाविवादादिनिर्णयः ॥ अग्निरुवाच ॥ सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरा गणाः ॥ गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः ॥ १ ॥ नयेयुरेते सीमानं स्थलाङ्गारतु-

पद्मुमैः ॥ सेतुवल्मीकानिम्नास्थिचैत्याद्यैरुपलक्षिताम् ॥ २ ॥ सामन्ता वा समं ग्रामाश्चत्वारोऽष्टौ दशापि वा ॥ रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥ ३ ॥ अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥ अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तकः ॥ ४ ॥ आरामायतनग्रामनिपानोद्यानवेश्मसु ॥ एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहेषु च ॥५॥ मर्य्यादायाः प्रभेदेषु क्षेत्रस्य हरणे तथा ॥ निर्मर्य्यादाश्च दण्ड्याः स्युरधमोत्तममध्यमाः ॥ ६ ॥ न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ॥ परभूमिं हरन्कूपः स्वल्पक्षेत्रो बहूदकः ॥ ७ ॥ स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रकल्पयेत् ॥ उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ॥८॥ फलाहृतमपि क्षेत्रं यो न कुर्य्यान्न कारयेत् ॥ स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ ९ ॥ 'मासानष्टौ तु महिषी सस्यघातस्य कारिणी ॥ दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम् ॥ १० ॥ भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः ॥ सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् ॥ ११ ॥ यावत्सस्यं विनष्टं तु तावत्क्षेत्री फलं लभेत् ॥ पालस्ताड्योऽथ गोस्वामी पूर्वोक्तं दण्डमर्हति ॥ १२ ॥ पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते ॥ अकामतः कामचारे चोरवद्दण्डमर्हति ॥ १३ ॥ महोक्षोत्सृष्टपशवः सूतिकागन्तुका च गौः ॥ पालो येषां तु ते मोच्या देवराजपरिप्लुताः ॥ १४ ॥ यथार्पि-तान्पशून्गोपः सायं प्रत्यर्पयेत्तथा ॥ प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥ १५ ॥ पालदोषविनाशे तु पाले दण्डो विधीयते ॥ अद्धर्त्र-योदशपणः स्वामिनो द्रव्यमेव च ॥ १६ ॥ ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा ॥ द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरेत् ॥ १७॥ धनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत् ॥ द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतम् ॥१८॥ स्वं लभेतान्यविक्रीते क्रेतुर्दोषोऽप्रकाशिते॥ हीनाद्ग्रहो हीनमूल्ये वेलाहीने च तस्करः ॥ १९ ॥ नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरम् ॥ देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत् ॥ ॥ २० ॥ विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ॥ क्रेता मूल्यं समाप्नोति तस्माद्यस्तत्र विक्रयी ॥ २१ ॥ आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ॥ पञ्चबन्धो दमस्तस्य राज्ञे तेनान्यभावितं ॥ २२ ॥ हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् ॥ आनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥ २३ ॥ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ॥ अर्वाक्संवत्सरात्स्वामी लभते परतो नृपः ॥ २४ ॥ पणानेकशफे दद्याच्चतुरः पञ्च मानुषे ॥ महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ॥ २५ ॥ स्वकुटुम्बाविरोधेन देयं दारसुताहते ॥ नान्वये

सति सर्वस्वं देयं यच्चान्यसंश्रुतम् ॥ २६ ॥ प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः ॥ देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः ॥
॥ २७ ॥ दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् ॥ बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥ २८ ॥ अग्नौ सुवर्णमक्षीणं द्विपलं रजते
शते ॥ अष्टौ त्रपुणि सीसे च ताम्रे पञ्चदशायसि ॥ २९ ॥ शते दशपलावृद्धिरौर्णे कर्पासिके तथा ॥ मध्ये पञ्चपला ज्ञेया सूक्ष्मे तु
त्रिपला मता ॥ ३० ॥ कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः ॥ न क्षयो न च वृद्धिस्तु कौशेये वल्कलेषु च ॥ ३१ ॥ देशं कालं
च भोगं च ज्ञात्वा नष्टे बलाबलम् ॥ द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम् ॥ ३२ ॥ बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ॥
स्वामिप्राणप्रदो भक्त्यागात्तन्निष्क्रयादपि ॥ ३३ ॥ प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकम् ॥ वर्णानामानुलोम्येन दास्यं न प्रति-
लोमतः ॥ ३४ ॥ कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे ॥ अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥ ३५ ॥ राजा कृत्वा पुरे स्थानं
ब्राह्मणान्यस्य तत्र तु ॥ त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः पाल्यतामिति ॥ ३६ ॥ निजधर्माविरोधेन यस्तु सामयिको भवेत् ॥ सोऽपि
यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥ ३७ ॥ गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः ॥ सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ ३८ ॥
कर्त्तव्यं वचनं सर्वैः समूहहितवादिभिः ॥ यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम् ॥ ३९ ॥ समूहकार्य्यप्रहितो यल्लभेत्तत्तदर्पयेत् ॥
एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयम् ॥ ४० ॥ वेदज्ञाः शुचयोऽलुब्धा भवेयुः कार्य्यचिन्तकाः ॥ कर्त्तव्यं वचनं तेषां समूहहित-
वादिनाम् ॥ ४१ ॥ श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः ॥ भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत् ॥ ४२ ॥ गृहीतवेतनः कर्म
त्यजन्द्विगुणमावहेत् ॥ अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥ ४३ ॥ दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः ॥ अनिश्चित्य भृतिं
यस्तु कारयेत्स महीक्षिता ॥ ४४ ॥ देशं कालं च योऽनीयात्कर्म कुर्य्याच्च योऽन्यथा ॥ तत्र तु स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके ॥
॥ ४५ ॥ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम् ॥ उभयोरप्यसाध्यं चेत्साध्ये कुर्य्याद्यथाश्रुतम् ॥ ४६ ॥ अराजदैविकं नष्टं भाण्डं
दाप्यस्तु वाहकः ॥ प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥ ४७ ॥ प्रक्रान्ते सप्तमं भागं चतुर्थं पथि सन्त्यजन् ॥ भृतिमर्द्धपथे सर्वां
प्रदाप्यस्त्यागकोऽपि च ॥ ४८ ॥ ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ॥ गृह्णीयाद्धर्त्तकितवादितरद्दशकं शतम् ॥ ४९ ॥

सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ॥ जितमुद्राहयेज्जैत्रे दद्यात्सत्यं वचः क्षमी ॥ ५० ॥ प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमण्डले ॥ जितं ससभिके स्थाने दापयेदन्यथा न तु ॥ ५१ ॥ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि ॥ राज्ञा सचिह्ना निर्वास्याः कूटाक्षोपधिदेविनः ॥ ५२ ॥ द्यूतमेकमुखं कार्य्यं तस्करज्ञानकारणात् ॥ एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये ॥ ५३ ॥ इत्यादिमहापुराणे आग्नेये सीमाविवादद्यूतादिनिर्णयो नाम सप्तपञ्चाशदधिकाद्विशततमोऽध्यायः ॥ २५७ ॥ अथ वाक्पारुष्यादिप्रकरणम् ॥ अग्निरुवाच ॥ सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् ॥ क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश ॥ १ ॥ अभिगन्तास्मि भगिनीं मातरं वा तवेति च ॥ शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ॥ २ ॥ अर्द्धोऽधमेषु द्विगुणः परस्त्रीपूत्तमेषु च ॥ दण्डप्रणयनं कार्य्यं वर्णजात्युत्तराधरैः ॥ ३ ॥ प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः ॥ वर्णानामानुलोम्येन तस्मादेवार्द्धहानितः ॥ ४ ॥ बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ॥ शक्तस्ततोऽर्द्धिकः पादनासाकर्णकरादिषु ॥ ५ ॥ अशक्तस्तु वदन्नेवं दण्डनीयः पणान्दश ॥ तथा शक्तः प्रतिभुवं दद्यात्क्षेमाय तस्य तु ॥ ६ ॥ पतनीयकृते क्षेपे दण्डो मध्यमसाहसः ॥ उपपातकयुक्ते तु दाप्यः प्रथमसाहसम् ॥ ७ ॥ त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ॥ मध्यमो ज्ञातिपूगानां प्रथमो ग्रामदेशयोः ॥ ८ ॥ असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च ॥ द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृताद्भयात् ॥ ९ ॥ भस्मपङ्करजःस्पर्शे दण्डो दशपणः स्मृतः ॥ अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः ॥ १० ॥ समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च ॥ हीनेष्वर्द्धं दमो मोहमदादिभिरदण्डनम् ॥ ११ ॥ विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य तु ॥ उद्घूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्द्धिकः ॥ १२ ॥ उद्घूर्णे हस्तपादे तु दशविंशतिकौ दमौ ॥ परस्परं तु सर्वेषां शास्त्रे मध्यमसाहसः ॥ १३ ॥ पादकेशांशुककरोल्लुञ्चनेषु पणान्दश ॥ पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः ॥ १४ ॥ शोणितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः ॥ द्वात्रिंशतं पणान्दाप्यो द्विगुणं दर्शनेऽसृजः ॥ १५ ॥ करपाददतो भङ्गे छेदने कर्णनासयोः ॥ मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥ १६ ॥ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने ॥ कन्धराबाहुसक्थ्नां च भङ्गे मध्यमसाहसः ॥ १७ ॥ एकं घ्नतां बहूनां च यथोक्ताद्विगुणो दमः ॥ कलहापहृतं देयं दण्डस्तु द्विगुणः स्मृतः ॥ १८ ॥ दुःखमुत्पादयेद्यस्तु सस्मुत्थानजं व्ययम् ॥ दाप्यो

दण्डं च यो यस्मिन्कलहे समुदाहृतः ॥ १९ ॥ तारिकः स्थलजं शुल्कं गृह्णन्दद्यः पणान्दश ॥ ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ॥ २० ॥ अभिघाते तथा भेदे छेदे कुड्यावपातने ॥ पणान्दाप्यः पञ्चदशाविंशातिं तत्त्रयं तथा ॥ २१ ॥ दुःखोत्पादिगृहे द्रव्यं क्षिपन्प्राणहरं तथा ॥ षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमम् ॥ २२ ॥ दुःखे च शोणितोत्पादे शास्त्राङ्गच्छेदने तथा ॥ दण्डः क्षुद्रपशूनां स्याद्विपणप्रभृतिः क्रमात् ॥ २३ ॥ लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च ॥ महापशूनामेतेषु स्थानेषु द्विगुणा दमाः ॥ २४ ॥ प्ररोहिशाखिनां शास्त्रास्कन्धसर्वविदारणे ॥ उपजीव्यद्रुमाणां तु विंशतेर्द्विगुणो दमः ॥ २५ ॥ यः साहसं कारयति स दाप्यो द्विगुणं दमम् ॥ यस्त्वेवमुक्त्वाहं दाता कारयेत्स चतुर्गुणम् ॥ २६ ॥ आर्य्याकोशानिक्रमकृद्भ्रातृजायाप्रहारदः ॥ संदिष्टस्याप्रदाता च समुद्गृहभेदकः ॥ २७ ॥ सामन्तकुलिकादीनामपकारस्य कारकः ॥ पञ्चाशत्पाणिको दण्ड एषामिति विनिश्चयः ॥ २८ ॥ स्वच्छन्दविधवागामी विकुष्टे नाभिधावकः ॥ अकारणे च विक्रोष्टा चाण्डालश्चोत्तमान्स्पृशन् ॥ २९ ॥ शूद्रः प्रव्रजितानां च दैवे पैत्र्ये च भोजकः ॥ अयुक्ते शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥ ३० ॥ वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ॥ साधारणस्यापलापी दासीगर्भविनाशकृत् ॥ ३१ ॥ पितापुत्रस्वसृभ्रातृदम्पत्याचार्य्यशिष्यकाः ॥ एषामपतितान्योऽन्यत्यागी च शतदण्डभाक् ॥ ३२ ॥ वसानस्त्रीन्पणान्दण्ड्यो नेजकस्तु परांशुकम् ॥ विक्रयावक्रयाधानयाचितेषु पणान्दश ॥ ३३ ॥ तुलाशासनमानानां कूटकृन्नाणकस्य च ॥ एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥ ३४ ॥ अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ॥ स नाणकपरीक्षी तु दाप्यः प्रथमसाहसम् ॥ ३५ ॥ भिषङ्मिथ्याचरन्दाप्यस्तिर्य्यक्षु प्रथमं दमम् ॥ मानुषे मध्यमं राजमानुषेषूत्तमं तथा ॥ ३६ ॥ अबध्यं यश्च बध्नाति बध्यं यश्च प्रमुञ्चति ॥ अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥ ३७ ॥ मानेन तुलया वापि योंशमष्टमकं हरेत् ॥ द्वाविंशतिपणान् दाप्यो वृद्धौ हानौ च कल्पितम् ॥ ३८ ॥ भैषजस्नेहलवणगन्धधान्यगुडादिषु ॥ पण्येषु प्रक्षिपन्हीनं पणान्दाप्यस्तु षोडश ॥ ३९ ॥ सम्भूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम् ॥ अर्घ (र्घ) स्य हासं वृद्धिं वा सहस्रो दण्ड उच्यते ॥ ४० ॥ राजनि स्थाप्यते योऽर्थः प्रत्यहं तेन विक्रयः ॥ क्रयो वा निस्तरस्तस्माद्वणिजां लाभकृत्स्मृतः ॥ ४१ ॥ स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम् ॥ दशकं पारदेश्ये तु

यः सद्यः क्रयविक्रयी ॥ ४२ ॥ पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ॥ अर्थोऽनुग्रहकृत्कार्य्यः क्रेतुर्विक्रेतुरेव च ॥ ४३ ॥ गृही-
तमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ॥ सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥ ४४ ॥ विक्रीतमपि विक्रेयं पूर्वं क्रेतुर्न्यगृह्णति ॥
हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥४५॥ राजदैवोपघातेन पण्ये दोषमुपागते ॥ हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥ ४६ ॥
अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि ॥ विक्रीणीते दमस्तत्र तन्मूल्याद्विगुणो भवेत् ॥ ४७ ॥ क्षयं वृद्धिं च वाणिजां पण्यानामवि-
जानता ॥ क्रीत्वा नानुशयः कार्य्यः कुर्वन्षड्भागदण्डभाक् ॥ ४८ ॥ समवेतेन वणिजां लाभार्थं कर्म कुर्वताम् ॥ लाभालाभौ यथा
द्रव्यं यथा वा संविदा कृतौ ॥ ४९ ॥ प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ॥ स तदद्याद्विभुवाच्च रक्षितादंशमांशभाक् ॥ ५० ॥
अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ॥ व्याप्तिद्रं राजयोग्यं च विक्रीतं राजगामि तत् ॥ ५१ ॥ मिथ्या वदन्परीमाणं शुल्कस्थाना-
दपक्रमन् ॥ दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ ५२ ॥ देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ॥ ज्ञातयो वा हरेयुस्तदागतास्तैर्विना
नृपः ॥ ५३ ॥ जिह्मं त्यजेयुर्निर्लोभमशक्तोऽन्येन कारयेत् ॥ अनेन विधिराख्यात ऋत्विक्कर्षककर्मिणाम् ॥ ५४ ॥ ग्राहकैर्गृ-
ह्यते चौरो लोप्त्रेणाथ पदेन वा ॥ पूर्वकर्मापराधी वा तथैवाशुद्धवासकः ॥ ५५ ॥ अन्येऽपि शङ्क्या ग्राह्या जातिनामादिनिह्नवैः ॥
द्यूतस्त्रीपानशक्ताश्च शुष्कभिन्नमुखस्वराः ॥ ५६ ॥ परद्रव्यगृहाणां च पृच्छकाः गूढचारिणः ॥ निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः ॥
॥ ५७ ॥ गृहीतः शङ्क्या चौर्य्ये नात्मानं चेद्विशोधयेत् ॥ दापयित्वा हृतं द्रव्यं चौरदण्डेन दण्डयेत् ॥ ५८ ॥ चौरं प्रदाप्यापहृतं
घातयेद्विविधैर्वधैः ॥ सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥ ५९ ॥ घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते ॥ स्वसीम्नि दद्याद्ग्रा-
मस्तु पदं वा यत्र गच्छति ॥ ६० ॥ पञ्चग्रामी बहिः क्रोशादशग्राम्यथ वा पुनः ॥ वन्दिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः ॥
॥ ६१ ॥ प्रसह्य घातिनश्चैव शूलमारोपयेन्नरान् ॥ उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ ॥ ६२ ॥ कार्य्यौ द्वितीयापराधे करपादै-
कहीनकौ ॥ भक्तावदंशाग्न्युदकमन्त्रोपकरणव्ययान् ॥ ६३ ॥ दत्त्वा चौरस्य हन्तुर्वा जानतो दम उत्तमः ॥ शस्त्रावपाते गर्भस्य पातने
चोत्तमो दमः ॥ ६४ ॥ उत्तमो वाऽधमो वापि पुरुषस्त्रीप्रमापणे ॥ शिलां बद्ध्वा क्षिपेदप्सु नरघ्नीं विशदां स्त्रियम् ॥ ६५ ॥ विषाग्निदां

निजगुरुनिजापत्यप्रमापणीम् ॥ विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत् ॥ ६६ ॥ क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः ॥ राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥ ६७ ॥ पुमान्संग्रहणे ग्राह्यः केशाकेशिपरस्त्रियाः ॥ स्वजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः ॥ ॥ ६८ ॥ प्रातिलोम्ये वधः पुंसां नार्य्याः कर्णावकर्त्तनम् ॥ नीवीस्तनप्रावरणनाभिकेशावमर्दनम् ॥ ६९ ॥ अदेशकालसम्भाषं सहावस्थानमेव च ॥ स्त्रीनिषेधेशतं दद्याद्विशतं तु दमं पुमान् ॥ ७० ॥ प्रतिषेधे तयोर्दण्डो यथा संग्रहणे तथा ॥ पशून्गच्छंश्छतं दाप्यो हीनां स्त्रीं गाश्च मध्यमम् ॥ ७१ ॥ अवरुद्धासु दासीषु भुजिष्यासु तथैव च ॥ गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकं दमम् ॥ ७२ ॥ प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः ॥ कुबन्धेनाङ्क्य गमयेदन्त्याप्रव्रजितागमे ॥ ७३ ॥ न्यूनं वाप्यधिकं वापि लिखेद्यो राजशासनम् ॥ पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः ॥ ७४ ॥ अभक्षैर्दूषयन्विप्रं दण्ड उत्तमसाहसम् ॥ कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी ॥ ७५ ॥ अङ्गहीनश्च कर्त्तव्यो दाप्यश्चोत्तमसाहसम् ॥ शक्तो ह्यमोक्षयन्स्वामी दंष्ट्रिणः शृङ्गिणस्तथा ॥ ७६ ॥ प्रथमं साहसं दद्याद्विकुष्टे द्विगुणं तथा ॥ अचौ (जा)रं चौरेऽभिवदन्दाप्यः पञ्चशतं दमम् ॥ ७७ ॥ राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकं तथा ॥ मृताङ्गलग्नविक्रेतुर्गुरोस्तांडयितुस्तथा ॥ ७८ ॥ तन्मन्त्रस्य च भेत्तारं छित्त्वा जिह्वां प्रवासयेत् ॥ राजयानासनारोढुर्दण्डो मध्यमसाहसः ॥ ७९ ॥ द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ॥ विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः ॥ ८० ॥ यो मन्येताजितोऽस्मीति न्यायेनाभिपराजितः ॥ तमायान्तं पुनर्जित्वा दण्डयेद्विगुणं दमम् ॥ ८१ ॥ राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम् ॥ निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥ ८२ ॥ धर्मश्चार्थश्च कीर्त्तिश्च लोकपङ्क्तिरुपग्रहः ॥ प्रजाभ्यो बहुमानं च स्वर्गस्थानं च शाश्वतम् ॥ पश्यतो व्यवहारांश्च गुणाः स्युः सप्त भूपतेः ॥ ८३ ॥ इत्यादिमहापुराणे आग्नेये वाक्पारुष्यादिप्रकरणं नामाष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥ अथ ऋग्विधानम् ॥ अग्निरुवाच ॥ ऋग्यजुःसामाथर्वविधानं पुष्करोदितम् ॥ भुक्तिमुक्तिकरं जप्याद्धोमाद्रामाय तद्विदे ॥ १ ॥ पुष्कर उवाच ॥ प्रतिवेदं तु कर्माणि कार्य्याणि प्रविदामि ते ॥ प्रथमं ऋग्विधानं वै शृणु त्वं भुक्तिमुक्तिदम् ॥ २ ॥ अन्तर्जले तथा होमे जपतो मनसेप्सितम् ॥ कामं करोति गायत्री प्राणायामाद्विशे-

पतः ॥ ३ ॥ गायत्र्या दशसाहस्रो जपो नक्ताशिनो द्विज ॥ बहुस्नातस्य तत्रैव सर्वकल्मषनाशनः ॥४॥ दशायुतानि जप्त्वाऽथ हाविष्याशी स मुक्तिभाक् ॥ प्रणवो हि परं ब्रह्म तज्जपः सर्वपापहा ॥ ५ ॥ ओङ्कारं शतजप्तं तु नाभिमात्रोदके स्थितः ॥ जलं पिबेत्स सर्वैस्तु पापैर्वै विप्रमुच्यते ॥ ६ ॥ मात्रात्रयं त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः ॥ महाव्याहृतयः सप्त लोका होमोऽखिलावहा ॥ ७ ॥ गायत्री परमा जप्या महाव्याहृतयस्तथा ॥ अन्तर्जले तथा राम प्रोक्तश्चैवाघमर्षणः ॥ ८ ॥ अग्निमीळे पुरोहितं सूक्तोऽयं वह्निदैवतः ॥ शिरसा धारयन्वह्निं यो जपेत्परिवत्सरम् ॥ ९ ॥ होमं त्रिषवणं भैक्ष्यमनग्निश्चलनं चरेत् ॥ अतः परमृचः सप्त वाय्वाद्या याः प्रकीर्त्तिताः ॥ १० ॥ ता जपन्प्रयतो नित्यमिष्टान्कामान्समश्नुते ॥ मेधाकामो जपेन्नित्यं सदसस्पमिति ऋचम् ॥ ११ ॥ अन्वयो यन्निमाः प्रोक्ताः नवर्चो मृत्युनाशनाः ॥ शुनःशेफमृषिं बद्धः सन्निरुद्धोऽथ वा जपेत् ॥ १२ ॥ मुच्यते सर्वपापेभ्यो गदी वाप्यगदो भवेत् ॥ य इच्छेच्छाश्वतं कामं मित्रं प्राज्ञं पुरन्दरम् ॥ १३ ॥ ऋग्भिः षोडशभिः कुर्य्यादिन्द्रस्येति दिने दिने ॥ हिरण्यस्तूपमित्येतज्जपञ्छत्रून्प्रबाधते ॥ १४ ॥ क्षेमी भवति चाध्वानो ये ते पन्था जपन्नरः ॥ रौद्रीभिः षड्भिरीशानं स्तुयाद्यो वै दिने दिने ॥ १५ ॥ चरुं वा कल्पयेद्रौद्रं तस्य शान्तिः परा भवेत् ॥ उदित्युद्यन्तमादित्यमुपतिष्ठन्दिने दिने ॥ १६ ॥ क्षिपेज्जलाञ्जलीन्सप्त मनोदुःखविनाशनम् ॥ द्विषन्तमित्यर्धर्चं यद्विप्रान्तं जपन्स्मरेत् ॥ १७ ॥ आगस्कृत्सप्तरात्रेण विद्वेषमधिगच्छति ॥ आरोग्यकामी रोगी वा प्रस्कन्नस्योत्तमं जपेत् ॥ १८ ॥ उत्तमस्तस्य चार्धर्चो जपेद्वै विविधासने ॥ उदुत्यायुरक्षय्यं तेजो मध्यन्दिने जपेत् ॥ १९ ॥ अस्तं प्रति गते सूर्ये द्विषन्तं प्रति बाधते ॥ न वयश्चेति सूक्तानि जपञ्छत्रून्नियच्छति ॥ २० ॥ एकादश सुपर्णस्य सर्वकामान्विनिर्दिशेत् ॥ आध्यात्मिकीः क इत्येता जपन्मोक्षमवाप्नुयात् ॥ २१ ॥ आनो भद्रा इत्यनेन दीर्घमायुरवाप्नुयात् ॥ त्वं सोमेति च सूक्तेन नवं पश्येन्निशाकरम् ॥ २२ ॥ उपतिष्ठेत्समित्पाणिर्वासांस्यामोत्यसंशयम् ॥ आयुरीप्सन्निमामिति कौत्सं सूक्तं सदा जपेत् ॥ २३ ॥ अपनः शोशुचदिति स्तुत्वा मध्ये दिवाकरम् ॥ यथा मुञ्चति चेषीका तथा पापं प्रमुञ्चति ॥ २४ ॥ जातवेदस इत्येतज्जपेत्स्वस्त्ययनं पथि ॥ भयैर्विमुच्यते सर्वैः स्वास्तिमानाप्नुयाद्गृहान् ॥ २५ ॥ व्युष्टायां च तथा रात्र्यामेतद्दुःस्वप्ननाशनम् ॥ प्रमन्दिनोति सूयन्त्या जपेद्गर्भविमोचनम् ॥ २६ ॥ जपन्निन्द्र-

मिति स्नातो वैश्वदेवं तु सप्तकम् ॥ मुञ्चत्याज्यं तथा जुह्वत्सकलं किल्बिषं नरः ॥ २७ ॥ इमामिति जपञ्छश्वत्कामानाप्नोत्यभीप्सितान् ॥ मा नस्तोकं इति द्राभ्यां त्रिरात्रोपोषितः शुचिः ॥२८ ॥ औदुम्बरीश्च जुहुयात्समिधश्चाज्यसंस्कृताः ॥ छित्त्वा सर्वान्मृत्युपाशान् जीवेद्रोगविवर्जितः ॥ २९ ॥ ऊर्ध्वबाहुरनेनैव स्तुत्वा शम्भुं तथैव च ॥ मानस्तोकेति च ऋचा शिखाबन्धे कृते नरः ॥ ३० ॥ अधृष्यः सर्वभूतानां जायते संशयं विना ॥ चित्रमित्युपतिष्ठेत त्रिसन्ध्यं भास्करं तथा ॥ ३१ ॥ समित्पाणिर्नरो नित्यमीप्सितं धनमाप्नुयात् ॥ अथ स्वप्नेति च जपन्प्रातर्मध्यन्दिने दिने ॥ ३२ ॥ दुःस्वप्नं चार्दते कृत्स्नं भोजनं चाप्नुयाच्छुभम् ॥ उभे पुमानिति तथा रक्षोघ्नः परिकीर्त्तितः ॥ ३३ ॥ उभे वासा इति ऋचो जपन्कामानवाप्नुयात् ॥ न सा गन्निति च जपन्मुच्यते चाततायिनः ॥ ३४ ॥ कया शुभेति च जपञ्जातिश्रैष्ठ्यमवाप्नुयात् ॥ इमं नृसोमामित्येतत्सर्वान्कामानवाप्नुयात् ॥३५॥ पितरित्युपतिष्ठेत नित्यमर्थमुपस्थितम् ॥ अग्ने नयेति सूक्तेन घृतहोमश्च मार्गगः ॥ ३६ ॥ वीरान्नयमवाप्नोति सुश्लोकं यो जपेत्सदा ॥ कङ्कतो नेति सूक्तेन विषान्सर्वान्व्यपोहति ॥ ३७ ॥ यो जात इति सूक्तेन सर्वान्कामानवाप्नुयात् ॥ गणानामिति सूक्तेन स्निग्धमाप्नोत्यनुत्तमम् ॥ ३८ ॥ यो मे राजन्निति मां तु दुःस्वप्नशमनीमृचम् ॥ अध्वानं प्रस्थितो यस्तु पश्येच्छवं समुत्थितम् ॥ ३९ ॥ अप्रशस्तं प्रशस्तं वा कुविदङ्ग इमं जपेत् ॥ द्वात्रिंशकं जपन्सूक्तमाध्यात्मिकमनुत्तमम् ॥ ४० ॥ पर्वसु प्रयतो नित्यमिष्टान्कामान्समश्नुते ॥ कृणुष्वेति जपन्सूक्तं जुह्वदाज्यं समाहितः ॥ ४१ ॥ अरातीनां हरेत्प्राणान्रक्षांस्यपि विनाशयेत् ॥ उपतिष्ठेत्स्वयं वह्निं परिदृचा दिने दिने ॥ ४२ ॥ तं रक्षतिं स्वयं वह्निर्विश्वतो विश्वतोमुखः ॥ हंसः शुचिषदित्येतच्छुचिरीक्षेदिवाकरम् ॥ ४३ ॥ कृषिं प्रपद्यमानस्तु स्थालीपाकं यथाविधि ॥ जुहुयात्क्षेत्रमध्ये तु स्वनी स्वाहास्तु पञ्चभिः ॥ ४४ ॥ इन्द्राय च मरुद्भ्यस्तु पर्जन्याय भगाय च ॥ यथालिङ्गं तु विहरेल्लाङ्गलं तु कृषीवलः ॥ ४५ ॥ युक्तो धान्याय सीतायै सुनासीरमथोत्तरम् ॥ गन्धमाल्यैर्नमस्कारैर्यजेदेताश्च देवताः ॥ ४६ ॥ प्रवापने प्रलवने खलसीतापहारयोः ॥ अमोघं कर्म भवति वर्द्धते सर्वदा कृषिः ॥ ४७ ॥ समुद्रादिति सूक्तेन कामानाप्नोति पावकात् ॥ विश्वानर इति द्राभ्यां च ऋग्भ्यां वह्निमर्हति ॥ ४८ ॥ स तरत्यापदः सर्वा यशः प्राप्नोति चाक्षयम् ॥ विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमम् ॥ ४९ ॥

अग्ने त्वमिति च स्तुत्वा धनमाप्नोति वाञ्छितम् ॥ प्रजाकामो जपेन्नित्यं वरुणं देवतत्रयम् ॥ ५० ॥ स्वस्त्या त्रयं जपेत्प्रातः सदा स्वस्त्ययनं महत् ॥ स्वस्ति पन्था इति प्रोच्य स्वस्तिमान्व्रजतेऽध्वनि ॥ ५१ ॥ विजिगीषुर्व (ष्व) नस्पते शत्रूणां व्याधितं भवेत् ॥ स्त्रिया गर्भप्रमूढाया गर्भमोक्षणमुत्तमम् ॥ ५२ ॥ अच्छावदेति सूक्तं च वृष्टिकामः प्रयोजयेत् ॥ निराहारः क्लिन्नवासा न चिरेण प्रवर्षति ॥ ५३ ॥ मनसः काम इत्येतां पशुकामो नरो जपेत् ॥ कर्दमेन इति स्नायात्प्रजाकामः शुचिव्रतः ॥ ५४ ॥ अश्वपूर्वामिति स्नायाद्राज्यकामस्तु मानवः ॥ रोहिते चर्मणि स्नायाद्ब्राह्मणस्तु यथाविधि ॥ ५५ ॥ राजा चर्मणि वैयाघ्रे छागे वैश्यस्तथैव च ॥ दशसाहस्रिको होमः प्रत्येकं परिकीर्त्तितः ॥ ५६ ॥ आगार इति सूक्तेन गोष्ठे गां लोकमातरम् ॥ उपतिष्ठेद्व्रजेचैव यदिच्छेत्ताः सदाक्षयाः ॥ ५७ ॥ उपैति तिसृभी राज्ञो दुन्दुभिमभिमन्त्रयेत् ॥ तेजो बलं च प्राप्नोति शत्रुं चैव नियच्छति ॥ ५८ ॥ तृणपाणिर्जपेत्सूक्तं रक्षोघ्नं दस्युभिर्वृतः ॥ ये के च ज्मेत्यृचं जप्त्वा दीर्घमायुरवाप्नुयात् ॥ ५९ ॥ जीमूतसूक्तेन तथा सेनाङ्गान्यभिमन्त्रयेत् ॥ यथा लिङ्गं ततो राजा विनिहन्ति रणे रिपून् ॥ ६० ॥ आग्नेयेति त्रिभिः सूक्तैर्धनमाप्नोति चाक्षयम् ॥ अमीवहेति सूक्तेन भूतानि स्थापयेन्निशि ॥ ६१ ॥ सम्बाधे विषमे दुर्गे बन्धो वा निर्गतः क्वचित् ॥ पलायन्वा गृहीतो वा सूक्तमेतत्तथा जपेत् ॥ ६२ ॥ त्रिरात्रं नियतोपोष्य श्रपयेत्पायसं चरुम् ॥ तेनाहुतिशतं पूर्णं जुहुयात्र्यम्बकेत्यृचा ॥ ६३ ॥ समुद्दिश्य महादेवं जीवेदब्दशतं सुखम् ॥ तच्चक्षुरित्यृचा स्नात उपतिष्ठेद्दिवाकरम् ॥ ६४ ॥ उद्यन्तं मध्यगं चैव दीर्घमायुर्जिगीषुः ॥ इन्द्रा सोमेति सूक्तं तु कथितं शत्रुनाशनम् ॥ ६५ ॥ यस्य लुप्तं व्रतं मोहाद्वात्यैर्वा संसृजेत्सह ॥ उपोष्याज्यं स जुहुयात्त्वमग्ने व्रतपा इति ॥ ६६ ॥ आदित्येत्यृक् च सम्राजं जप्त्वा वादे जयी भवेत् ॥ महीति च चतुष्केण मुच्यते महतो भयात् ॥ ६७ ॥ ऋचं जप्त्वा यदि ह्येतत्सर्वकामानवाप्नुयात् ॥ द्वाचत्वारिंशतं चैन्द्रं जप्त्वा नाशयते रिपून् ॥ ६८ ॥ वाचं महीति जप्त्वा च प्राप्नोत्यारोग्यमेव च ॥ शन्नो भवेति द्वाभ्यां तु भुक्त्वान्नं प्रयतः शुचिः ॥ ६९ ॥ हृदयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते ॥ उत्तमेदामिति स्नातो हुत्वा शत्रुं प्रमापयेत् ॥ ७० ॥ शन्नोग्न इति सूक्तेन हुतेनान्नमवाप्नुयात् ॥ कन्या वारर्षिसूक्तेन दिग्दोषाद्विप्रमुच्यते ॥ ७१ ॥ यदन्त्य कव्ये (व्यकव्ये) त्युदिते जप्तेऽवश्यं जगद्भवेत् ॥ यद्वागिति च जप्तेन वाणी भवति संस्कृता ॥ ७२ ॥

वाचो विदमिति त्वेतां जपन्वाचं समश्नुते ॥ पवित्राणां पवित्रं तु पावमान्यो ह्यृचो मताः ॥७३॥ वैखानसा ऋचस्त्रिंशत्पवित्राः परमा मताः ॥
ऋचो द्विषष्टिः प्रोक्ताश्च परस्यैत्यृषिसत्तम ॥ ७४ ॥ सर्वकल्मषनाशाय पावनाय शिवाय च ॥ स्वादिष्टयेति सूक्तानां सप्तषष्टिरुदाहृता ॥
॥ ७५ ॥ दशोत्तराण्यृचां चैताः पावमान्यः शतानि षट् ॥ एतज्जपंश्च जुह्वंश्च घोरं मृत्युभयं जयेत् ॥ ७६ ॥ आपोहिष्ठेति वारिस्थो
जपेत्पापभयार्दने ॥ प्रदेवन्नेति नियतो जपेच्च मरुधन्वसु ॥७७॥ प्राणान्तिके भये प्राप्ते क्षिप्रमायुस्तु विन्दति ॥ प्रावेपाभित्यृचमेकां जपेच्च
मनसा निशि ॥७८॥ व्युष्टायामुदिते सूर्य्ये द्यूते जयमवाप्नुयात् ॥ मा प्रगामेति मूढश्च पन्थानं पथि विन्दति ॥७९॥ क्षीणायुरिति मन्येत
यं कश्चित्सुहृदं प्रियम् ॥ यत्तेयमिति तु स्नातस्तस्य मूर्द्धानमालभेत् ॥८०॥ सहस्रकृत्वः पञ्चाहं तेनायुर्विन्दते महत् ॥ इदं मेध्येति जुहु-
यादृतं प्राज्ञः सहस्रशः ॥८१॥ पशुकामो गवां गोष्ठे अर्थकामश्चतुष्पथे ॥ वयः सुपर्ण इत्येतां जपन्वै विन्दते श्रियम् ॥ ८२ ॥ हविष्य-
न्तीयमभ्यस्य सर्वपापैः प्रमुच्यते ॥ तस्य रोगा विनश्यन्ति कायाग्निर्वर्द्धते तथा ॥ ८३ ॥ या ओषधयः स्वस्त्ययनं सर्वव्याधि-
विनाशनम् ॥ बृहस्पते अतीत्येतद्दृष्टिकामः प्रयोजयेत् ॥ ८४ ॥ सर्वत्रेति परा शान्तिर्ज्ञेया प्रतिरथस्तथा ॥ सूत संकाश्यपं नित्यं प्रजा-
कामस्य कीर्त्तितम् ॥ ८५ ॥ अहं रुद्रेति इत्येतद्वाग्मी भवति मानवः ॥ न योनौ जायते विद्वाञ्जपन्नातीति रात्रिषु ॥ ८६ ॥ रात्रिसूक्तं
जपन्रात्रौ रात्रिं क्षेमी नयेन्नरः ॥ कल्पयन्तीति च जपन्नित्यं कृत्वारिनाशनम् ॥ ८७ ॥ आयुष्यं चैव वर्चस्यं सूक्तं दाक्षायणं महत् ॥
उत देवा इति जपेदामयघ्नं धृतव्रतः ॥ ८८ ॥ अयमग्ने जनीत्येतज्जपेदग्निभये सति ॥ अरण्यानीत्यरण्येषु जपेत्तद्भयनाशनम् ॥ ८९ ॥
ब्राह्मीमासाद्य सूक्ते द्वे ऋचं ब्राह्मीं शतावरीम् ॥ पृथगाद्भिर्घृतैर्वाथ मेधां लक्ष्मीं च विन्दति ॥ ९० ॥ मास इत्यसपत्नघ्नं संग्रामं विजि-
गीषतः ॥ ब्रह्मणोऽग्निः संविदानं गर्भमृत्युनिवारणम् ॥ ९१ ॥ अपेहीति जपेत्सूक्तं शुचिर्दुःस्वप्ननाशनम् ॥ येनेदमिति वै ज्ञत्वा समाधिं
विन्दते परम् ॥ ९२ ॥ मयो भूर्वात इत्येतद्भवां स्वस्त्ययनं परम् ॥ शाम्बरीमिन्द्रजालं वा मायामेतेन वारयेत् ॥ ९३ ॥ महीत्रीणाम-
वरोस्त्विति पथि स्वस्त्ययनं जपेत् ॥ अग्नये विद्विषन्नेवं जपेच्च रिपुनाशनम् ॥९४॥ वास्तोष्पतेन मन्त्रेण यजेत गृहदेवताः ॥ जपस्येष
विधिः प्रोक्तो हुते ह्येष विशेषतः ॥ ९५ ॥ होमान्ते दक्षिणा देया पापशान्तिर्हुतेन तु ॥ हुतं शाम्यति चान्नेन अन्नहेमप्रदानतः ॥ ९६ ॥

विप्राशिषस्त्वमोघाः स्युर्बर्हिः स्नानं तु सर्वतः ॥ सिद्धार्थका यवा धान्यं पयो दधि घृतं तथा ॥ ९७ ॥ क्षीरवृक्षास्तथेध्मं तु होमाश्चैते सर्वकामदाः ॥ समिधः कण्टकिन्यश्च राजिका रुधिरं विषम् ॥ ९८ ॥ अभिचारे तथा शैलमशनं सक्तवः पयः ॥ दधि भैक्ष्यं फलं मूलमृग्विधानमुदाहृतम् ॥९९॥ इत्यादिमहापुराणे आग्नेये ऋग्विधानं नामैकोनषष्ट्यधिकद्विशततमोऽध्यायः ॥ २५९ ॥ अथ यजुर्विधानम् ॥ पुष्कर उवाच ॥ यजुर्विधानं वक्ष्यामि भुक्तिमुक्तिप्रदं शृणु ॥ ओंकारपूर्विका राम महाव्याहृतयो मताः ॥ १ ॥ सर्वकल्मषनाशिन्यः सर्वकामप्रदास्तथा ॥ आज्याहुतिसहस्रेण देवानाराधयेद्बुधः ॥ २ ॥ मनसः कांक्षितं राम मनसेप्सितकामदम् ॥ शान्तिकामो यवैः कुर्य्यात्तिलैः पापापनुत्तये ॥ ३ ॥ धान्यैः सिद्धार्थकैश्चैव सर्वकामकरैरतथा ॥ औदुम्बरीभिरिध्माभिः पशुकामस्य शस्यते ॥४॥ दध्ना चैवान्नकामस्य पयसा शान्तिमिच्छतः ॥ अपमार्गसमिद्भिरतु कामयन्कनकं बहु ॥ ५ ॥ कन्याकामो घृताक्तानि युग्मशो ग्रथितानि तु ॥ जातीपुष्पाणि जुहुयाद्ग्रामार्थी तिलतण्डुलान् ॥ ६ ॥ वश्यकर्माणि शास्त्रोटवासापामार्गमेव च ॥ विषासृङ्मिश्रसमिधो व्याधिघातस्य भार्गव ॥ ७ ॥ क्रुद्धस्तु जुहुयात्सम्यक्शत्रूणां वधकाम्यया ॥ सर्षपैर्बर्हिमयीं कृत्वा राज्ञः प्रतिकृतिं द्विजः ॥ ८ ॥ सहस्रशस्तु जुहुयाद्राजा वशगतो भवेत् ॥ वस्त्रकामस्य पुष्पाणि दूर्वा व्याधिविनाशिनी ॥ ९ ॥ ब्रह्मवर्चसकामस्य वासोग्रं च विधीयते ॥ प्रत्यङ्गिरेषु जुहुयात्तुषकण्टकभस्मभिः ॥ १० ॥ विद्वेषणे च पक्ष्माणि काककौशिकयोस्तथा ॥ कापिलं च घृतं हुत्वा तथा चन्द्रग्रहे द्विजः ॥ ११ ॥ वचाचूर्णेन सम्पातात्समानीय च तां वचाम् ॥ सहस्रमन्त्रितां भुक्त्वा मेधावी जायते नरः ॥ १२ ॥ एकादशाङ्गुलं शङ्कुं लोहं खादिरमेव च ॥ द्विषतो वधोऽसीति जपन्निखनेद्रिपुवेश्मनि ॥ १३ ॥ उच्चाटनमिदं कर्म शत्रूणां कथितं तव ॥ चक्षुष्या इति जप्त्वा च विनष्टं चक्षुराप्नुयात् ॥ १४ ॥ उपयुञ्जत इत्येतदनुवाकं तथान्नदम् ॥ तनूनपात्रे सादिति दूर्वा हुत्वार्त्तिवर्जितः ॥ १५ ॥ भेषजमसीति दध्याज्येहोमः पशूपसर्गनुत् ॥ त्रियम्बकं यजामहे होमः सौभाग्यवर्द्धनः ॥ १६ ॥ कन्यानाम गृहीत्वा तु कन्यालाभकरः परः ॥ भयेषु तु जपन्नित्यं भयेभ्यो विप्रमुच्यते ॥ १७ ॥ धुस्तु (तू) रपुष्पं सघृतं हुत्वा स्यात्सर्वकामभाक् ॥ हुत्वा तु गुग्गुलं राम स्वप्ने पश्यति

शङ्करम् ॥ १८ ॥ युञ्जते मनोऽनुवाकं जप्त्वा दीर्घायुरामुयात् ॥ विष्णोरराटमित्येतत्सर्वबाधाविनाशनम् ॥ १९ ॥ रक्षोघ्नं च यशस्यं च तथैव विजयप्रदम् ॥ अयं नो अग्निरित्येतत्संग्रामे विजयप्रदम् ॥ २० ॥ इदमापः प्रवहत स्नाने पापापनोदनम् ॥ विश्वकर्मन्नु हविषा सूचीं लोहीं दशाङ्गुलाम् ॥ २१ ॥ कन्याया निखनेद्द्वारि साऽप्यस्मै न प्रदीयते ॥ देव सवितरेतेन हुतेनैतेन चान्नवान् ॥ २२ ॥ अग्नो स्वाहेति जुहुयाद्बलकामो द्विजोत्तमः ॥ तिलैर्यवैश्च धर्मज्ञ तथापामार्गतण्डुलैः ॥ २३ ॥ सहस्रमन्त्रितां कृत्वा तथा गोरोचनां द्विज ॥ तिलकं च तथा कृत्वा जनस्य प्रियतामियात् ॥ २४ ॥ रुद्राणां च तथा जप्यं सर्वाघविनिषूदनम् ॥ सर्वकर्मकरो होमस्तथा सर्वत्र शान्तिदः ॥ २५ ॥ अजाविकानामश्वानां कुञ्जराणां तथा गवाम् ॥ मनुष्याणां नरेन्द्राणां बालानां योषितामपि ॥ २६ ॥ग्रामाणां नगराणां च देशानामपि भार्गव ॥ उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च ॥ २७ ॥ मरके समनुप्राते रिपुजे च तथा भये ॥ रुद्रहोमः परा शान्तिः पायसेन घृतेन च ॥ २८ ॥ कूष्माण्डघृतहोमेन सर्वान्पापान्व्यपोहति ॥ सकृद्यावकभैक्षाशी नक्तं मनुजसत्तम ॥ २९ ॥ बहिः स्नानरतो मासान्मुच्यते ब्रह्महत्यया ॥ मधुवातेति मन्त्रेण होमादितोऽखिलं लभेत् ॥ ३० ॥ दधिक्राव्णोति हुत्वा तु पुत्रान्प्राप्नोत्यसंशयम् ॥ तथा घृतवतीत्येतदायुष्यं स्याद्घृतेन तु ॥ ३१ ॥ स्वस्तिन इन्द्र इत्येतत्सर्वबाधाविनाशनम् ॥ इह गावः प्रजायध्वमिति पुष्टिविवर्धनम् ॥ ३२ ॥ घृताहुतिसहस्रेण तथाऽलक्ष्मीविनाशनम् ॥ स्रुवेण देवस्य त्वेति हुत्वापामार्गतण्डुलम् ॥ ३३ ॥ मुच्यते विकृताच्छीघ्रमभिचारान्न संशयः ॥रुद्र पातु (द्रंयत्ते) पलाशस्य समिद्भिः कनकं लभेत् ॥ ३४ ॥ शिवो भवेत्यग्न्युत्पाते व्रीहिभिर्जुहुयान्नरः ॥ याः सेना इति चैतच्च तस्करेभ्यो भयापहम् ॥ ३५ ॥ यो अस्मभ्यमयातीयाद्धुत्वा कृष्णतिलान्नरः ॥ सहस्रशोऽभिचाराच्च मुच्यते विकृताद्विज ॥ ३६ ॥ अन्नेनान्नपतेत्येवं हुत्वा चान्नमवाप्नुयात् ॥ हँसः शुचिषदित्येतज्जतं तोयेऽघनाशनम् ॥ ३७ ॥ चत्वारि शृङ्गे त्वेतत्तु सर्वपापहरं जले ॥ देवा यज्ञेति जप्त्वा तु ब्रह्मलोके महीयते ॥ ३८ ॥वसन्तेति च हुत्वाज्यमादित्याद्धरमाप्नुयात् ॥ सुपर्णोसीति चेतस्य कर्मव्याहृतिवद्भवेत् ॥ ३९ ॥ नमः स्वाहेति त्रिर्जप्त्वा बन्धनान्नोक्षमाप्नुयात् ॥ अन्तर्जले त्रिरावर्त्य द्रुपदा सर्वपापमुक्त ॥ ४० ॥ इह गावः प्रजायध्वं मन्त्रोऽयं बुद्धिवर्द्धनः ॥ हुतं तु सर्पिषा दध्ना पयसा पायसेन वा ॥ ४१ ॥ शतं य इति चैतेन हुत्वा

पर्णफलानि च ॥ आरोग्यं श्रियमाप्नोति जीवितं च चिरं तथा ॥ ४२ ॥ ओषधीः प्रतिमोदध्वं वपने लवनेऽर्थकृत् ॥ अश्वावती पायसेन होमाच्छान्तिमवाप्नुयात् ॥ ४३ ॥ तस्मा इति च मन्त्रेण बन्धनस्थो विमुच्यते ॥ युवा सुवासा इत्येव वासांस्याप्नोति चोत्तमम् ॥४४॥ मुञ्चन्तु मा शपथ्यानि (दि) सर्वान्तकविनाशनम् ॥ मा मा हिꣳसीस्तिलाज्येन हुतं रिपुविनाशनम् ॥ ४५ ॥ नमोऽस्तु सर्वसर्पेभ्यो घृतेन पायसेन तु ॥ कृणुध्वं गज इत्येतदभिचारविनाशनम् ॥ ४६ ॥ दूर्वाकाण्डायुतं हुत्वा काण्डात्काण्डोति मानवः ॥ ग्रामे जनपदे वापि मस्कं तु शमं नयेत् ॥ ४७ ॥ रोगार्त्तो मुच्यते रोगात्तथा दुःखात्तु दुःखितः ॥ औदुम्बरश्च समिधो मधुमान्नो वनस्पतिः ॥ ४८ ॥ हुत्वा सहस्रशो राम धनमाप्नोति मानवः ॥ सौभाग्यं महदाप्नोति व्यवहारे तथा जयम् ॥४९॥ अपां गर्भमिति हुत्वा देवं वर्षापयेद्ध्रुवम् ॥ अपः पिबेति च तथा हुत्वा दधि घृतं मधु ॥ ५० ॥ प्रवर्त्तयाति धर्मज्ञ महावृष्टिमनन्तरम् ॥ नमस्ते रुद्र इत्येतत्सर्वोपद्रवनाशनम् ॥ ॥ ५१ ॥ सर्वशान्तिकरं प्रोक्तं महापातकनाशनम् ॥ अध्यवोचदित्यनेन रक्षणं व्याधितस्य तु ॥ ५२ ॥ रक्षोघ्नं च यशस्यं च चिरायुः पुष्टिवर्द्धनम् ॥ सिद्धार्थकानां क्षेपेण पथि चैनञ्जपन्सुखी ॥ ५३ ॥ असौ यस्ताम्र इत्येतत्पठन्नित्यं दिवाकरम् ॥ उपतिष्ठेत धर्मज्ञ सायं प्रातरतन्द्रितः ॥ ५४ ॥ अन्नमक्षयमाप्नोति दीर्घमायुश्च विन्दति ॥ प्रमुञ्च धन्वान्नित्येतत्पञ्चभिरायुधमन्त्रणम् ॥ ५५ ॥ रिपूणां भयदं युद्धे नात्र कार्य्या विचारणा ॥ मानो महान्त इत्येवं बालानां शान्तिकारकम् ॥ ५६ ॥ नमो हिरण्यबाहवे इत्यनुवाकसप्तकम् ॥ राजिकां कटुतैलाक्तां जुहुयाच्छत्रुनाशिनीम् ॥ ५७ ॥ नमो वः किरिकेभ्यश्च पद्मलक्षैर्हुतैर्नरः ॥ राज्यलक्ष्मीमवाप्नोति तथा बिल्वैः सुवर्णकम् ॥ ॥ ५८ ॥ इमा रुद्रायेति तिलैर्होमाच्च धनमाप्यते ॥ दूर्वाहोमेन चान्येन सर्वव्याधिविवर्जितः ॥ ५९ ॥ आशुः शिशान इत्येतदायुधानां च रक्षणे ॥ संग्रामे कथितं राम सर्वशत्रुनिबर्हणम् ॥ ६० ॥ राजसामेति जुहुयात्सहस्रं पञ्चभिर्द्विज ॥ आज्याहुतीनां धर्मज्ञ चक्षूरोगाद्विमुच्यते ॥ ६१ ॥ शन्नो वनस्पते गेहे होमः स्याद्वास्तुदोषनुत् ॥ अग्न आयूंषि हुत्वाज्यं द्वेषं नाप्नोति केनाचित् ॥ ६२ ॥ अपां फेनेति लाजाभिर्हुत्वा जयमवाप्नुयात् ॥ भद्रा इतीन्द्रियैर्हीनो जपन्स्यात्सकलेन्द्रियः ॥ ६३ ॥ अग्निश्च पृथिवी चेति वशीकरण- सूक्तमम् ॥ अध्वनेति जपन्मन्त्रं व्यवहारे जयी भवेत् ॥ ६४ ॥ ब्रह्म राजन्यमिति च कर्मारम्भे तु सिद्धिकृत् ॥ संवत्सरोऽसीति घृते- ॥१७६॥

लक्षहोमादरोमवान् ॥ ६५ ॥ केतुं कृण्वन्नित्येतत्संग्रामे जयवर्द्धनम् ॥ इन्द्रोऽग्निर्धर्म इत्येतद्रणे धर्मनिबन्धनम् ॥ ६६ ॥ धन्वा नागोति मन्त्रश्च धनुर्ग्राहणिकः परः ॥ युञ्जीतेति तथा मन्त्रो विज्ञेयो ह्यभिमन्त्रणे ॥ ६७ ॥ मन्त्रश्चाहिरथेत्येतच्छराणां मन्त्रणे भवेत् ॥ वह्नीनां पितरित्येतत्तूणमन्त्रः प्रकीर्त्तितः ॥६८॥ युञ्जन्तीति तथाश्वानां योजने मन्त्र उच्यते ॥ आशुः शिशान इत्येतद्यात्रारम्भणमुच्यते ॥ ६९ ॥ विष्णोः कर्मोति मन्त्रश्च रथारोहणिकः परः ॥ आजङ्घेतीति चाश्वानां ताडनीयमुदाहृतम् ॥ ७० ॥ याः सेना अभित्वरीति परसैन्यमुखे जपेत् ॥ दुन्दुभ्य इति चाप्येतद्दुन्दुभीताडनं भवेत् ॥ ७१ ॥ एतैः पूर्वहुतैर्मन्त्रैः कृत्ववं विजयी भवेत् ॥ यमेन दत्तमित्यस्य कोटिहोमाद्विचक्षणः ॥ ७२ ॥ रथमुत्पादयेच्छीघ्रं संग्रामे विजयप्रदम् ॥ आ कृष्णोति तथैतस्य कर्म व्याहृतिवद्भवेत् ॥ ७३ ॥ शिव-संकल्पजापेन समाधिं मनसो लभेत् ॥ पञ्चनद्यः पञ्चलक्षं हुत्वा लक्ष्मीमवाप्नुयात् ॥ ७४ ॥ यदाबध्नं दाक्षायणां मन्त्रेणानेन मन्त्रितम् ॥ सहस्रकृत्वः कनकं धारयेद्विपुवारणम् ॥ ७५ ॥ इमं जीवेभ्य इति च शिलां लोष्टं चतुर्दिशम् ॥ क्षिपेद्गृहे तदा तस्य न स्याच्चौरभयं निशि ॥ ७६ ॥ परि मे गामनेनेति वशीकरणमुत्तमम् ॥ हन्तुमभ्यागतस्तत्र वशी भवति मानवः ॥ ७७ ॥ भक्ष्यताम्बूलपुष्पाद्यं मन्त्रितं तु प्रयच्छति ॥ यस्य धर्मज्ञ वशगः सोऽस्य शीघ्रं भविष्यति ॥ ७८ ॥ शन्नो मित्र इतीत्येतत्सदा सर्वत्र शान्तिदम् ॥ गणानां त्वा गणपतिं कृत्वा होमं चतुष्पथे ॥ ७९ ॥ वशीकुर्य्याज्जगत्सर्वं सर्वधान्यैरसंशयम् ॥ हिरण्यवर्णाः शुचयो मन्त्रोऽयमभिषेचने ॥ ॥ ८० ॥ शन्नो देवीरभिष्टये तथा शान्तिकरः परः ॥ एकचक्रेति मन्त्रेण हुतेनाज्येन भागशः ॥ ८१ ॥ ग्रहेभ्यः शान्तिमाप्नोति प्रसादं न च संशयः ॥ गावो भग इति द्वाभ्यां हुत्वाज्यं गा अवाप्नुयात् ॥ ८२ ॥ प्रवादांषः सोपदिति ग्रहयज्ञे विधीयते ॥ देवेभ्यो वनस्पत इति द्रुमयज्ञे विधीयते ॥ ८३ ॥ गायत्री वैष्णवी ज्ञेया तद्विष्णोः परमं पदम् ॥ सर्वपापप्रशमनं सर्वकामकरं तथा ॥ ८४ ॥ इत्यादिमहा-पुराणे आग्नेये यजुर्विधानं नाम षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६० ॥ अथ सामविधानम् ॥ पुष्कर उवाच ॥ यजुर्विधानं कथितं वक्ष्ये साम्नां विधानकम् ॥ संहितां वैष्णवीं जप्त्वा हुत्वा स्यात्सर्वकामभाक् ॥ १ ॥ संहितां छान्दसीं साधु जप्त्वा प्रणौति शङ्करम् ॥ स्कान्दीं पैत्र्यां संहितां च जप्त्वा स्यात्तु प्रसादवान् ॥ २ ॥ यत इन्द्रं भजामहे हिंसादोषविनाशनम् ॥ अवकीर्णी मुच्यते च आग्नेस्त्वि-

ग्मोति वै जपन् ॥३॥ सर्वपापहरं ज्ञेयं परितोयं (षं) च तासु च ॥ अविक्रेयं च विक्रीय जपेद्घृतवतीति च ॥४॥ अद्यानो देव सवितर्ज्ञेयं दुःस्वप्ननाशनम् ॥ अबोध्याग्निरिति मन्त्रेण घृतं राम यथाविधि ॥ ५ ॥ अभ्युक्ष्य घृतशेषेण मेखलाबन्ध इष्यते ॥ स्त्रीणां यासां तु गर्भाणि पतन्ति भृगुसत्तम ॥ ६ ॥ मार्जि जातस्य बालस्य बध्नीयात्तदनन्तरम् ॥ सोमं राजानमेतेन व्याधिभिर्विप्रमुच्यते ॥ ७ ॥ सर्पसाम प्रयुञानो नाप्नुयात्सर्पजं भयम् ॥ माधत्वा वाद्यतेत्येतद्धुत्वा विषः सहस्रशः ॥ ८ ॥ शतावरिमणिं बद्धा नाप्नुयाच्छस्त्रतो भयम् ॥ दीर्घतमसोऽर्क-इति हुत्वान्नं प्राप्नुयाद्बहु ॥ ९ ॥ सममध्यायन्तीति जपन्न म्रियेत पिपासया ॥ त्वामिमा ओषधी ह्येतज्जप्त्वा व्याधिं न चाप्नुयात् ॥ १० ॥ पाथि देवव्रतं जप्त्वा भयेभ्यो विप्रमुच्यते ॥ यदिन्द्रो मुनये त्वेति हुतं सौभाग्यवर्द्धनम् ॥ ११ ॥ भगो न चित्र इत्येवं नेत्रयोरञ्जनं हितम् ॥ सौभाग्यवर्द्धनं राम नात्र कार्य्या विचारणा ॥ १२ ॥ जपेदिन्द्रेति वर्गं च तथा सौभाग्यवर्द्धनम् ॥ परिप्रिया हि वः कारिः काम्यां संस्रावयेत्स्त्रियम् ॥ १३ ॥ सा तं कामयते राम नात्र कार्य्या विचारणा ॥ रथन्तरं वामदेव्यं ब्रह्मवर्चसवर्द्धनम् ॥ १४ ॥ प्राशयेद्बालकं नित्यं वचाचूर्णं घृतप्लुतम् ॥ इन्द्राग्निद्वायिनं जप्त्वा भवेच्छ्रुतिधरस्त्वसौ ॥ १५ ॥ हुत्वा रथन्तरं जप्त्वा पुत्रमाप्नोत्यसंशयम् ॥ मायि श्रीरिति मन्त्रोऽयं जप्तव्यः श्रीविवर्द्धनः ॥ १६ ॥ वैरूप्यस्याष्टकं नित्यं प्रयुञ्जानः श्रियं लभेत् ॥ सप्ताष्टकं प्रयुञ्जानः सर्वान्कामानवाप्नुयात् ॥ १७ ॥ गव्येषुणेति यो नित्यं सायं प्रातरतन्द्रितः ॥ उपस्थानं गवां कुर्य्यात्तस्य स्युस्ताः सदा गृहे ॥ १८ ॥ घृताक्तं तु यवद्रोणं वात आवातु भेषजम् ॥ अनेन हुत्वा विधिवत्सर्वा मायां व्यपोहति ॥ १९ ॥ प्रदेवोदासेन तिलान्हुत्वा कार्मणकृन्तनम् ॥ अभि त्वा पूर्वपीतये वषट्कारसमन्वितम् ॥ २० ॥ वासकेध्मसहस्रं तु हुतं युद्धे जयप्रदम् ॥ हस्त्यश्वपुरुषान्कुर्य्याद्बधः पिष्टमयाञ्छुभान् ॥ २१ ॥ परकीयानथोदिश्य प्रधानपुरुषांस्तथा ॥ सुस्विन्नान्पिष्टकवरान्क्षुरेणोत्कृत्य भागशः ॥ २२ ॥ अभि त्वा शूर णो नमो मन्त्रेणानेन मन्त्रवित् ॥ कृत्वा सर्षपतैलाक्तान्क्रोधेन जुहुयात्ततः ॥ २३ ॥ एतत्कृत्वा बुधः कर्म संग्रामे जयमाप्नुयात् ॥ गारुडं वामदेव्यं च रथन्तरबृहद्रथौ ॥ सर्वपापप्रशमनाः कथिताः संशयं विना ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये सामविधानं नामैकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥ अथाथर्वविधानम् ॥ पुष्कर उवाच ॥ साम्नां विधानं कथितं वक्ष्ये चाथर्वणामथ ॥ शान्ता

(ता) तीयं गणं हुत्वा शान्तिमाप्नोति मानवः ॥ १ ॥ भैषज्यं च गणं हुत्वा सर्वान्रोगान्व्यपोहति ॥ त्रिसप्तीयं गणं हुत्वा सर्पपापैः प्रमुच्यते ॥ २ ॥ क्वचिन्नाप्नोति च भयं हुत्वा चैवाभयं गणम् ॥ न क्वचिज्जायते राम गणं हुत्वाऽपराजितम् ॥ ३ ॥ आयुष्यं च गणं हुत्वा अपमृत्युं व्यपोहति ॥ स्वस्तिमाप्नोति सर्वत्र हुत्वा स्वस्त्ययनं गणम् ॥ ४ ॥ श्रेयसा योगमाप्नोति शर्मवर्मगणं तथा ॥ वास्तोष्पत्यगणं हुत्वा वास्तुदोषान्व्यपोहति ॥५॥ तथा रौद्रगणं हुत्वा सर्वान्दोषान्व्यपोहति । एतैर्दशगुणैर्होमो ह्यष्टादशसु शान्तिषु ॥६॥ वैष्णवी शान्तिरैन्द्री च ब्राह्मी रौद्री तथैव च ॥ वायव्या वारुणी चैव कौबेरी भार्गवी तथा ॥ ७॥ प्राजापत्या तथा त्वाष्ट्री कौमारी वह्निदेवता ॥ मारुद्गणा च गान्धारी शान्तिर्नैर्ऋतकी तथा ॥ ८ ॥ शान्तिराङ्गिरसी याम्या पार्थिवी सर्वकामदा ॥ यस्त्वां मृत्युरिति ह्येतज्जप्तं मृत्युविनाशनम् ॥९॥ सुपर्णस्त्वेति हुत्वा च भुजगैर्नैव बाध्यते ॥ इन्द्रेण दत्तमित्येतत्सर्वकामकरं भवेत् ॥१०॥ इन्द्रेण दत्तमित्येतत्सर्वबाधाविनाशनम् ॥ इमा देवीति मन्त्रश्च सर्वशान्तिकरः परः ॥ ११ ॥ देवा मरुत इत्येतत्सर्वकामकरं भवेत् ॥ यमस्य लोकादित्येतद्दुःस्वप्नशमनं परम् ॥ १२ ॥ इन्द्रश्च (द्रंच) पञ्चवणिजेति (जः) पण्यलाभकरं परम् ॥ कामो मे वाजीति हुतं स्त्रीणां सौभाग्यवर्द्धनम् ॥ १३ ॥ तुभ्यमेव जवीमन्नित्ययुतं तु हुतं भवेत् ॥ अग्ने गोभिर्न इत्येतन्मेधावृद्धिकरं परम् ॥ १४ ॥ ध्रुवं ध्रुवेणेति हुतं स्थानलाभकरं भवेत् ॥ अलक्ष्मजीवोति शुना क्षुधिलाभकरं भवेत् ॥ १५ ॥ अहं ते भग्न इत्येतद्भवेत्सौभाग्यवर्द्धनम् ॥ ये मे पाशास्तथाप्येतद्बन्धनान्मोक्षकारणम् ॥ १६ ॥ शपत्वहन्निति रिपून्नाशयेद्धोमजाप्यतः ॥ त्वमुत्तममितीत्येतद्यशोबुद्धिविवर्द्धनम् ॥ १७ ॥ यथा मृगमतीत्येतत्स्त्रीणां सौभाग्यवर्द्धनम् ॥ येन चेह दिशं चैव गर्भलाभकरं भवेत् ॥ १८ ॥ अयं ते योनिरित्येतत्पुत्रलाभकरं भवेत् ॥ शिवः शिवाभिरित्येतद्भवेत्सौभाग्यवर्द्धनम् ॥ १९ ॥ बृहस्पतिर्नः परिपातु पथि स्वस्त्ययनं भवेत् ॥ मुञ्चामि त्वेति कथितमपमृत्युनिवारणम् ॥ २० ॥ अथर्वशिरसोऽध्येता सर्वपापैः प्रमुच्यते ॥ प्राधान्येन तु मन्त्राणां किञ्चित्कर्म तवोरितम् ॥ २१ ॥ वृक्षाणां याज्ञियानां तु समिधः प्रथमं हविः ॥ आज्यं च व्रीहयश्चैव तथा वै गौरसर्षपाः ॥ २२ ॥ अक्षतानि तिलाश्चैव दधिक्षीरे च भार्गव ॥ दुर्भास्तथैव दूर्वाश्च बिल्वानि कमलानि च ॥ २३ ॥ शान्तिपुष्टिकराण्याहुर्द्रव्याण्येतानि

सर्वशः ॥ तैलं कणानि घर्मेऽज्ञ राजिका रुधिरं विषम् ॥२४॥ समिधः कण्टकोपेता अभिचारेषु योजयेत् ॥ आर्षे वे देवतं छन्दो विनियोगज्ञ आचरेत्॥२५॥ इत्यादिमहापुराणे आग्नेये अथर्वविधानं नाम द्विषष्ट्यधिकद्विशततमोऽध्यायः ॥२६२॥ अथोत्पातशान्तिः ॥ पुष्कर उवाच ॥ श्रीसूक्तं प्रतिवेदं च ज्ञेयं लक्ष्मीविवर्द्धनम् ॥ हिरण्यवर्णा हरिणीमृचः पञ्चदश श्रियः॥१॥रथेष्वक्षेषु वाजेति चतस्रो यजुषि श्रियः॥ स्रावन्तीयं तथा साम श्रीसूक्तं सामवेदकं ॥ २ ॥ श्रियं धातर्मयि धेहि प्रोक्तमाथर्वणे तथा ॥ श्रीसूक्तं यो जपेद्भक्त्या हुत्वा श्रीस्तस्य वै भवेत्॥३॥ पद्मानि चाथ बिल्वानि हुत्वाज्यं वा तिलाञ्श्रियः ॥ एकं तु पौरुषं सूक्तं प्रतिवेदं तु सर्वदम् ॥४॥सूक्तेन दद्यान्निष्पापो ह्येकैकया जलाञ्जलिम् ॥ स्नात एकैकया पुष्पं विष्णोर्दत्त्वाघहा भवेत् ॥५॥ स्नात एकैकया दत्त्वा फलं स्यात्सर्वकामभाक् ॥ महापापोपपापान्तो भवेज्जप्त्वा तु पौरुषम् ॥ ६ ॥ कृच्छ्रैर्विशुद्धो जप्त्वा च हुत्वा स्नात्वाथ सर्वभाक् ॥ अष्टादशभ्यः शान्तिभ्यस्तिस्रोऽन्याः शान्तयो वराः ॥ ७ ॥ अमृता चाभया सौम्या सर्वोत्पातविमर्दनाः ॥ अमृता सर्वदैवत्या ह्यभया ब्रह्मदेवता ॥ ८॥ सौम्या च सर्वदैवत्या एका स्यात्सर्वकामदा ॥ अभयाया मणिः कार्य्यो वरुणस्य भृगूत्तम ॥ ९ ॥ शतकाण्डोऽमृतायाश्च सौम्यायाः शंखजो मणिः ॥ तद्दैवत्यास्तथा मन्त्राः सिद्धो स्यान्मणिबन्धनम् ॥ १० ॥ दिव्यान्तरिक्षभौमादिसमुत्पातार्दना इमाः ॥ दिव्यान्तरिक्षभौमं तु अद्भुतं त्रिविधं शृणु ॥ ११ ॥ अदृष्टवैकृतं दिव्यमान्तरिक्षं निबोध मे ॥ उल्कापातश्च दिग्दाहः परिवेषस्तथैव च ॥ १२ ॥ गन्धर्वनगरं चैव वृष्टिश्च विकृता च या ॥ चरास्थिसम्भवं भूमौ भूकम्पमपि भूमिजम् ॥ १३ ॥ सप्ताहाभ्यन्तरं वृष्टावद्भुतं निष्फलं भवेत् ॥ शान्तिं विना त्रिभिर्वर्षैरद्भुतं भयकृद्भवेत् ॥ १४ ॥ देवतार्च्चाः प्रनृत्यन्ति वेपन्ते प्रज्वलन्ति च ॥ आरटन्ति च रोदन्ति प्रस्विद्यन्ते हसन्ति च ॥ १५ ॥ अर्च्चाविकारोपशमोऽभ्यर्च्य हुत्वा प्रजापतेः ॥ अनग्निर्दीप्यते यत्र राष्ट्रे च भृशनिःस्वनम् ॥ १६ ॥ न दीप्यते चेन्धनवांस्तद्राष्ट्रं पीड्यते नृपैः ॥ अग्निवैकृत्यशमनमग्निमन्त्रैश्च भार्गव ॥ १७ ॥ अकाले फलिता वृक्षाः क्षीरं रक्तं स्रवन्ति च ॥ वृक्षोत्पातप्रशमनं शिवं पूज्य च कारयेत् ॥ १८ ॥ अतिवृष्टिरनावृष्टिर्दुर्भिक्षायोभयं मतम् ॥ अनृतौ त्रिदिनारब्धवृष्टिर्ज्ञेया भयाय हि ॥१९॥ वृष्टिवैकृत्यनाशः स्यात्पर्जन्येन्द्रार्कपूजनात् ॥ नगरादपसर्पन्ते समीपमुपयान्ति च ॥ २० ॥ नद्यो ह्रदप्रस्रवणा विरसाश्च भवन्ति च ॥ सलिलाशयवैकृत्ये जप्तव्यो वारुणो ॥१७९॥

मनुः ॥ २१ ॥ अकालप्रसवा नार्य्याः कालतो वा प्रजास्तथा ॥ विकृतप्रसवाश्चैव युग्मप्रसवनादिकम् ॥ २२ ॥ स्नाता प्रसववैकृत्ये स्त्रीविप्रादिं प्रपूजयेत् ॥ वडवा हस्तिनी गोर्वा यदि युग्मं प्रसूयते ॥ २३ ॥ विजात्यं विकृतं वापि षड्भिर्मासैर्म्रियेत वै ॥ विकृतं वा प्रसूयन्ते परचक्रभयं भवेत् ॥ २४ ॥ होमः प्रसूतिवैकृत्ये जपो विप्रादिपूजनम् ॥ यानि यानान्ययुक्तानि युक्तानि न वहन्ति च ॥ २५ ॥ आकाशे तूर्यनादाश्च महद्भयमुपस्थितम् ॥ प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ॥ २६ ॥ अरण्यं यान्ति वा ग्राम्या जलं यान्ति स्थलोद्भवाः ॥ स्थलं वा जलजा यान्ति राजद्वारादिके शिवाः ॥ २७ ॥ प्रदोषे कुक्कुटो वासे शिवा चार्कोदये भवेत् ॥ गृहं कपोतः प्रविशेत्क्रव्याद्वा मूर्ध्नि लीयते ॥ २८ ॥ मधुरां माक्षिकां कुर्यात्काको मैथुनगो दृशि ॥ प्रासादतोरणोद्यानद्वारप्राकारवेश्मनाम् ॥ २९ ॥ अनिमित्तं तु पतनं दृढानां राजमृत्यवे ॥ रजसावाथ धूमेन दिशो यत्र समाकुलाः ॥ ३० ॥ केतूदयोपरागौ च छिद्रता शशिसूर्ययोः ॥ प्रदर्शविकृतिर्यत्र तत्रापि भयमादिशेत् ॥ ३१ ॥ अग्निर्यत्र न दीप्येत स्रवन्ते चोदकुम्भकाः ॥ मृतिर्भयं शून्यतादिरुत्पातानां फलं भवेत् ॥ द्विजदेवादिपूजाभ्यः शान्तिर्जप्यैस्तु होमतः ॥ ३२ ॥ इत्यादिमहापुराणे आग्नेये उत्पातशान्तिर्नाम त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६३ ॥ पुनरुत्पातशान्तयः ॥ पुष्कर उवाच ॥ देवपूजादिकं कर्म वक्ष्ये चोत्पातमर्दनम् ॥ आपोहिष्ठेति तिसृभिः स्नातोऽर्घ्यं विष्णवेऽर्पयेत् ॥ १ ॥ हिरण्यवर्णा इति च पाद्यं च तिसृभिर्द्विज ॥ शन्न आपो ह्याचमनमिदमापोऽभिषेचनम् ॥ २ ॥ रथे अक्षे च तिसृभिर्गन्धं युवेति वस्त्रकम् ॥ पुष्पं पुष्पवतीत्येवं धूपं धूपोऽसि चाप्यथ ॥ ३ ॥ तेजोऽसि शुक्रं दीपे स्यान्मधुपर्कं दधीनि च ॥ हिरण्यगर्भ इत्यष्टावृचः प्रोक्ता निवेदने ॥ ४ ॥ अन्नस्य मनुजश्रेष्ठ पानस्य च सुगन्धिनः ॥ चामरव्यजनोपानच्छत्रं यानासने तथा ॥ ५ ॥ यत्किञ्चिदेवमादि स्यात्सावित्रेण निवेदयेत् ॥ पौरुषं तु जपेत्सूक्तं तदेव जुहुयात्तथा ॥ ६ ॥ अर्च्चाभावे तथा वेद्यां जले पूर्णघटे तथा ॥ नदीतीरेऽथ कमले शान्तिः स्याद्विष्णुपूजनात् ॥ ७ ॥ ततो होमः प्रकर्त्तव्यो दीप्यमाने विभावसौ ॥ परिसंमृज्य पर्य्युक्ष्य परिस्तीर्य्य परिस्तरैः ॥ ८ ॥ सर्वान्नाग्रं समुद्धृत्य जुहुयात्प्रयतस्ततः ॥ वासुदेवाय देवाय प्रभवे चाव्ययाय च ॥ ९ ॥ अग्नये चैव सोमाय मित्राय वरुणाय च ॥ इन्द्राय च महाभाग इन्द्राग्निभ्यां

तथैव च ॥ १० ॥ विश्वेभ्यश्चैव देवेभ्यः प्रजानां पतये नमः ॥ अनुमत्यै तथा राका धन्वन्तरय एव च ॥ ११ ॥ वास्तोष्पत्यै ततो देव्यै ततः स्विष्टिकृतेऽग्नये ॥ सचतुर्थ्यन्तनाम्ना तु हुत्वैतेभ्यो बलिं हरेत् ॥ १२ ॥ तत्रोपतत्समाभेतः पूर्वेणाग्नेमतः परम् ॥ अश्वनामपि धर्मज्ञ ऊर्णानामानि चाप्यथ ॥ १३ ॥ निरुन्धी धूम्रिणीका च अस्वपन्ती तथैव च ॥ मेघवती च नामानि सर्वेषामेव भार्गव ॥ ॥ १४ ॥ आग्नेयाद्याः क्रमेणाथ ततः शक्तिषु निःक्षिपेत् ॥ नान्दिन्यै च सुभाग्यै च सुमङ्गल्यै च भार्गव ॥ १५ ॥ भद्रकाल्यै ततो दत्त्वा स्थूणायां च तथा श्रिये ॥ हिरण्यकेश्यै च तथा वनस्पतय एव च ॥ १६ ॥ धर्माधर्ममयौ द्वारे गृहमध्ये ध्रुवाय च ॥ मृत्यवे च बहिर्दद्याद्वरुणायोदकाशये ॥ १७ ॥ भूतेभ्यश्च बहिर्दद्याच्छरणे धनदाय च ॥ इन्द्रायेन्द्रपुरुषेभ्यो दद्यात्पूर्वेण मानवः ॥ १८ ॥ यमाय तत्पुरुषेभ्यो दद्याद्दक्षिणतस्तथा ॥ वरुणाय तत्पुरुषेभ्यो दद्यात्पश्चिमे तथा ॥ १९ ॥ सोमाय सोमपुरुषेभ्यो उदग्दद्यादनन्तरम् ॥ ब्रह्मणे ब्रह्मपुरुषेभ्यो मध्ये दद्यात्तथैव च ॥ २० ॥ आकाशे च तथा चोर्ध्वं स्थण्डिलाय क्षितौ तथा ॥ दिवा दिवाचरेभ्यश्च रात्रौ रात्रिचरेषु च ॥ २१ ॥ बलिं बहिस्तथा दद्यात्सायं प्रातस्तु प्रत्यहम् ॥ पिण्डनिर्वपणं कुर्य्यात्प्रातः सायं न कारयेत् ॥ २२ ॥ पित्रे तु प्रथमं दद्यात्तत्पित्रे तदनन्तरम् ॥ प्रपितामहाय तन्मात्रे पितृमात्रे ततोऽर्पयेत् ॥ २३ ॥ तन्मात्रे दक्षिणाग्रेषु कुशेष्वेवं यजेत्पितॄन् ॥ इन्द्रवारुणवायव्या याम्या वा नैर्ऋताश्च ये ॥ २४ ॥ ते काकाः प्रतिगृह्णन्तु इमं पिण्डं मयोद्धृतम् ॥ काकपिण्डं तु मन्त्रेण शुनः पिण्डं प्रदापयेत् ॥२५॥ विवस्वतः कुले जातौ द्वौ श्यावौ (म) शबलौ शुनौ ॥ तेषां पिण्डं प्रदास्यामि पथि रक्षन्तु मे सदा ॥२६॥ सौमभेय्यः सर्वहिता पवित्राः पापनाशनाः ॥ प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः॥२७॥ गोग्रासं च स्वस्त्ययनं कृत्वा भिक्षां प्रदापयेत् ॥ अतिथीन्दीनान्पूजयित्वा गृही भुञ्जीत च स्वयम् ॥ ओं भूः स्वाहा ओं भुवः स्वाहा ओं स्वः स्वाहा ओं भूर्भुवः स्वः स्वाहा ॥ ओं देवकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ओं पितृकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ओं आत्मकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ओं मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ओं एनस एनसोऽवयजनमसि स्वाहा ॥ यच्चाहमेनो विद्वांश्चकार ॥ यच्चाविद्वांस्तस्य सर्वस्यैनसोऽवयजनमसि स्वाहा ॥ अग्नये स्विष्टिकृते स्वाहा ॥ ओं प्रजापतये स्वाहा ॥ विष्णुपूजावैश्वदेवबलिस्ते कीर्त्तिता मया ॥ २८ ॥ इत्यादि-

महापुराणे आग्नेये उत्पातशान्तिर्नाम चतुःषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६४ ॥ अथ दिक्पालादिस्नानम् ॥ अग्निरुवाच ॥ सर्वार्थसाधनं स्नानं वक्ष्ये शान्तिकरं शृणु ॥ स्नापयेच्च सरित्तीरे ग्रहान्विष्णुं विचक्षणः ॥ १ ॥ देवालये ज्वरार्त्त्यादौ विनायकग्रहार्दिते ॥ विद्यार्थिनो ह्रदे गेहे जयकामस्य तीर्थके ॥ २ ॥ पद्मिन्यां स्नापयेन्नारीं गर्भो यस्याः स्रवेत्तथा ॥ अशोकसन्निधौ स्नायाज्जातो यस्या विनश्यति ॥ ३ ॥ पुष्पार्थिनां च पुष्पाढ्ये पुत्रार्थिनां च सागरे ॥ गृहसौभाग्यकामानां सर्वेषां विष्णुसंनिधौ ॥ ४ ॥ वैष्णवे रेवतीपुष्ये सर्वेषां स्नानमुत्तमम् ॥ स्नानकामस्य सप्ताहं पूर्वमुत्सादनं स्मृतम् ॥ ५ ॥ पुनर्नवां रोचनां च शताङ्गं गुरुणीत्वचम् ॥ मधूकं रजनी द्वे च तगरं नागकेशरम् ॥ ६ ॥ अम्बरीं चैव माञ्जिष्ठां मांसीयासककर्दमैः ॥ प्रियङ्गु सर्षपं कुष्ठं बलां ब्राह्मीं च कुङ्कुमम् ॥ ७ ॥ पञ्चगव्यं सक्षमिश्रं उद्वर्त्य स्नानमाचरेत् ॥ मण्डले कार्णिकायां च विष्णुं ब्रह्माणमर्चयेत् ॥ ८ ॥ दक्षे वामे हरं पूर्वे पत्रे पूर्वादिके क्रमात् ॥ लिखेदिन्द्रादिकान्देवान्सायुधान्सहवान्धवान् ॥ ९ ॥ स्नानमण्डलकान्दिक्षु कुर्य्याच्चैव विदिक्षु च ॥ विष्णुब्रह्मेशशक्रादींस्तदस्त्राण्यर्च्य होमयेत् ॥ १० ॥ एकैकस्य त्वष्टशतं समिधस्तु तिलान्वृतम् ॥ भद्रः सुभद्रः सिद्धार्थः कलशाः पुष्टिवर्द्धनाः ॥ ११ ॥ अमोघश्चित्रभानुश्च पर्जन्योऽथ सुदर्शनः ॥ स्थापयेत्तु घटानेतान्साश्विरुद्रमरुद्गणान् ॥ १२ ॥ विश्वेदेवास्तथा दैत्या वसवो मुनयस्तथा ॥ आवेशयन्तु सुप्रीतास्तथान्या अपि देवताः ॥ १३ ॥ ओषधीर्निक्षिपेत्कुम्भे जयन्तीं विजयां जयाम् ॥ शतावरीं शतपुष्पां विष्णुक्रान्तापराजिताम् ॥ १४ ॥ ज्योतिष्मतीमतिबलां चन्दनोशीरकेसरम् ॥ कस्तूरिकां च कर्पूरं वालकं पत्रकं त्वचम् ॥ १५ ॥ जातीफलं लवङ्गं च मृत्तिकां पञ्चगव्यकम् ॥ भद्रपीठे स्थितं साध्यं स्नापयेयुर्द्विजा बलात् ॥ १६ ॥ राजाभिषेकमन्त्रोक्तदेवानां होमकाः पृथक् ॥ पूर्णाहुतिं ततो दत्त्वा गुरवे दक्षिणां ददेत् ॥ १७ ॥ इन्द्रोऽभिषिक्तो गुरुणा पुरा दैत्यान्जघान ह ॥ दिक्पालस्नानं कथितं संग्रामादौ जयादिकम् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये दिक्पालादिस्नानं नाम पञ्चषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥ अथ विनायकस्नानम् ॥ पुष्कर उवाच ॥ विनायकोपसृष्टानां स्नानं सर्वकरं वदे ॥ विनायकः कर्मविघ्नसिद्ध्यर्थं

विनियोजितः ॥ १ ॥ गणानामाधिपत्ये च केशवशापितामहैः ॥ स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ॥ २ ॥ विनायकोपसृष्टस्तु कव्यादानाधिरोहति ॥ व्रजमानस्तथात्मानं मन्यतेऽनुगतं परैः ॥ ३ ॥ विमना विफलारम्भः संसीदत्यनिमित्ततः ॥ कन्या वरं न चाप्नोति न चापत्यं वराङ्गना ॥ ४ ॥ आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं लभेत् ॥ धनी न लाभमाप्नोति न कृषिं च कृषीवलः ॥ ५ ॥ राजा राज्यं न चाप्नोति स्नापनं तस्य कारयेत् ॥ हस्तपुष्याश्वयुक्सौम्ये वैष्णवे भद्रपीठके ॥ ६ ॥ गौरसर्षपकल्केन साज्यनोत्सादितस्य च ॥ सर्वौषधैः सर्वगन्धैः प्रलिप्तशिरसस्तथा ॥ ७ ॥ चतुर्भिः कलशैः स्नानं तेषु सर्वौषधीः क्षिपेत् ॥ अश्वस्थानाद्व्रजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ॥ ८ ॥ मृत्तिकां रोचनां गन्धं गुग्गुलुं तेषु निक्षिपेत् ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ॥ ९ ॥ तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥ भगं ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः ॥ १० ॥ भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ॥ ११ ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा ॥ दर्भपिञ्जलिमादाय वामहस्ते ततो गुरुः ॥ १२ ॥ स्नातस्य सर्षपं तैलं स्रुवेणोदुम्बरेण च ॥ जुहुयान्मूर्द्धनि कुशान्सव्येन परिगृह्य च ॥ १३ ॥ मितश्च सम्मितश्चैव तथा शालककण्टकौ ॥ कूष्माण्डो राजपुत्रश्च एतैः स्वाहासमन्वितैः ॥ १४ ॥ नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ॥ १५ ॥ कृताकृतांस्तण्डुलांश्च पललौदनमेव च ॥ मत्स्यान्पङ्क्तांस्तथैवामान्पुष्पं चित्रं सुरां त्रिधा ॥ १६ ॥ मूलकं पूरिकां पूपांस्तथैवैण्डविकान्रजः ॥ दध्यन्नं पायसं पिष्टं मोदकं गुडमर्पयेत् ॥ १७ ॥ विनायकस्य जननीमुपातिष्ठेत्ततोऽम्बिकाम् ॥ दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् ॥ १८ ॥ रूपं देहि यशो देहि सौभाग्यं सुभगे मम ॥ पुत्रं देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ १९ ॥ भोजयेद्ब्राह्मणांदद्याद्वस्त्रयुग्मं गुरोरपि ॥ विनायकं ग्रहान्प्रार्च्य श्रियं कर्मफलं लभेत् ॥ २० ॥ इत्यादिमहापुराणे आग्नेये विनायकस्नानं नाम षट्षष्ट्यधिकाद्विशततमोऽध्यायः ॥ २६६ ॥ अथ माहेश्वरस्नानलक्षकोटिहोमादयः ॥ पुष्कर उवाच ॥ स्नानं माहेश्वरं वक्ष्ये राजादेर्जयवर्द्धनम् ॥ दानवेन्द्राय बलये यज्जगादोशनाः पुरा ॥ १ ॥ भास्करेऽनुदिते पीठे प्रातः संस्नापयेद्वटैः ॥ ओं नमो भगवते रुद्राय च बलाय च पाण्डरोचितभस्मानुलिप्तगात्राय । तद्यथा जय जय सर्वान् शत्रून्

मूकस्य कलहविग्रहविवादेषु भञ्जय ॥ ओं मथ मथ सर्वपथिकान् योऽसौ युगान्तकाले दिधक्षति इमां पूजां रौद्रमूर्तिः सहस्रांशुः शुक्रः स ते रक्षतु जीवितम् ॥ संवर्त्तकाग्नितुल्यश्च त्रिपुरान्तकरः शिवः ॥ सर्वदेवमयः सोऽपि तव रक्षतु जीवितम् ॥ लिखि लिखि खिलि स्वाहा॥ एवं स्नातस्तु मन्त्रेण जुहुयात्तिलतण्डुलम् ॥ २ ॥ पञ्चामृतैस्तु संस्नाप्य पूजयेच्छूलपाणिनम् ॥ स्नानान्यन्यानि वक्ष्यामि सर्वदा विजयाय ते ॥ ३ ॥ स्नानं घृतेन कथितमायुष्यवर्द्धनं परम् ॥ गोमयेन च लक्ष्मीः स्याद्गोमूत्रेणाघमर्दनम् ॥ ४ ॥ क्षीरेण बलबुद्धिः स्याद्दध्ना लक्ष्मीविवर्द्धनम् ॥ कुशोदकेन पापान्तः पञ्चगव्येन सर्वभाक् ॥ ५ ॥ शतमूलेन सर्वातिर्गोशृङ्गोदकतोऽघजित् ॥ पलाशबिल्वकमलकुशस्नानं तुसर्व्वदम् ॥ ६ ॥ वचा हरिद्रे द्वे मुस्तं स्नानं रक्षोहणं परम् ॥ आयुष्यं च यशस्यं च धर्म्ममेधाविवर्द्धनम् ॥ ७ ॥ हैमाद्भिश्चैव माङ्गल्यं रूप्यताम्रोदकैस्तथा ॥ रत्नोदकैस्तु विजयः सौभाग्यं सर्वगन्धकैः ॥ ८ ॥ फलाद्भिश्च तथारोग्यं धात्र्याद्भिः परमां श्रियम् ॥ तिलासिद्धार्थकैर्लक्ष्मीः सौभाग्यं च प्रियङ्गुणा ॥ ९ ॥ पद्मोत्पलकदम्बैश्च श्रीर्बलं बलाद्रुमोदकैः ॥ विष्णुपादोदकस्नानं सर्वस्नानेभ्य उत्तमम् ॥ १० ॥ एकाकी एककामायेत्येकोर्कं विधिवच्चरेत् ॥ अक्रन्दयाति सूक्तेन प्रबध्नीयान्मणिं करे ॥ ११ ॥ कुष्ठपाठा वचाशुण्ठीशङ्खलोहादिको मणिः ॥ सर्वेषामेव कामानामीश्वरो भगवान्हरिः ॥१२॥ तस्य संपूजनादेव सर्वान्कामान्समश्नुते॥ स्नापयित्वा घृतक्षीरैः पूजयित्वा च पित्तहा ॥१३॥ पञ्चमुद्गबलिं दत्त्वा अतिसारात्प्रमुच्यते ॥ पञ्चगव्येन संस्नाप्य वातव्याधिं विनाशयेत् ॥१४॥ द्विस्नेहस्नपनाच्छ्लेष्मरोगहा चातिपूजया ॥ घृतं तैलं तथा क्षौद्रं स्नानं तु त्रिरसं परम् ॥१५॥ स्नानं घृताम्बु द्विस्नेहं समलं घृततैलकम् ॥ क्षौद्रमिक्षुरसं क्षीरं स्नानं त्रिमधुरं स्मृतम् ॥१६॥ घृतमिक्षुरसं तैलं क्षौद्रं च त्रिरसं श्रिये ॥ अनुलेपस्त्रिशुक्लस्तु कर्पूरोशीरचन्दनैः ॥१७॥ चन्दनागरुकर्पूरमृगदर्पैः सकुङ्कुमैः ॥ पञ्चानुलेपनं विष्णोः सर्वकामफलप्रदम् ॥१८॥ त्रिसुगन्धं च कर्पूरं तथा चदनकुङ्कुमैः ॥ मृगदर्पसकर्पूरं मलयं सर्वकामदम् ॥ १९ ॥ जातीफलं सकर्पूरं चन्दनं च त्रिशीतकम् ॥ पीतानि शुक्लवर्णानि तथा शुक्लानि भार्गव ॥ २० ॥ कृष्णानि चैव रक्तानि पञ्चवर्णानि निर्दिशेत् ॥ उत्पलं पद्मजाती च त्रिशीतं हरिपूजने ॥ २१ ॥ कुङ्कुमं रक्तपद्मानि त्रिरक्तं रक्तमुत्पलम् ॥ धूपदीपादिभिः प्रार्च्य विष्णुं शान्तिर्भवेन्नृणाम् ॥ २२ ॥ चतुरस्रकरे कुण्डे ब्राह्मणाश्चाष्ट षोडश ॥ लक्षहोमं कोटिहोमं तिलाज्ययवधान्यकैः ॥

ग्रहानभ्यर्च्य गायत्र्या सर्वशान्तिः क्रमाद्भवेत् ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये माहेश्वरस्नानलक्षकोटिहोमादिकं नाम सप्तषष्ट्यधिक-
द्विशततमोऽध्यायः ॥ २६७ ॥ अथ नीराजनाविधिः ॥ पुष्कर उवाच ॥ कर्म सांवत्सरं राज्ञां जन्मर्क्षं पूजयेच्च तम् ॥ मासि मासि च
संक्रान्तौ सूर्य्यसोमादिदेवताः ॥ १ ॥ अगस्त्यस्योदयेऽगस्त्यं चातुर्मास्यं हरिं यजेत् ॥ शयनोत्थापने पञ्चदिनं कुर्य्यात्समुत्सवम् ॥ २ ॥
प्रोष्ठपादे सिते पक्षे प्रतिपत्प्रभृति क्रमात् ॥ शिबिरात्पूर्वदिग्भागे शक्रार्थं भवनं चरेत् ॥ ३ ॥ तत्र शक्रध्वजं स्थाप्य शचीं शक्रं च
पूजयेत् ॥ अष्टम्यां वाद्यघोषेण तां तु यष्टिं प्रवेशयेत् ॥ ४ ॥ एकादश्यां सोपवासो द्वादश्यां केतुमुत्थितम् ॥ यजेद्वस्त्रादिसंवीतं
घटस्थं सुरपं शचीम् ॥ ५ ॥ वर्द्धस्वेन्द्र जितामित्र वृत्रहन्पाकशासन ॥ देव देव महाभाग त्वं हि भूमिष्ठतां गतः ॥ ६ ॥ त्वं प्रभुः शाश्व-
तश्चैव सर्वभूताहिते रतः ॥ अनन्ततेजा वैराजो यशोजयविवर्द्धनः ॥ ७ ॥ तेजस्ते वर्द्धयन्त्वेते देवाः शक्रः सुवृष्टिकृत् ॥ ब्रह्मविष्णुमहेशाश्च
कार्त्तिकेयो विनायकः ॥ ८ ॥ आदित्या वसवो रुद्राः साध्याश्च भृगवो दिशः ॥ मरुद्गणा लोकपाला ग्रहा यक्षादिनिम्नगाः ॥ ९ ॥ समुद्राः
श्रीर्मही गौरी चण्डिका च सरस्वती ॥ प्रवर्त्तयन्तु ते तेजो जय शक्र शचीपते ॥ १० ॥ तव चापि जयान्नित्यं मम सम्पद्यतां शुभम् ॥
प्रसीद राज्ञां विप्राणां प्रजानामपि सर्वशः ॥ ११ ॥ भवत्प्रसादात्पृथिवी नित्यं सस्यवती भवेत् ॥ शिवं भवतु निर्विघ्नं शाम्यन्तामीतयो
भृशम् ॥ १२ ॥ मन्त्रेणेन्द्रं समभ्यर्च्य जितभूः स्वर्गमाप्नुयात् ॥ भद्रकालीं पटे लिख्य पूजयेदाश्विने जये ॥ १३ ॥ शुक्लपक्षे तथाष्टम्या-
मायुधं कार्मुकं ध्वजम् ॥ छत्रं च राजलिङ्गानि शस्त्राद्यं कुसुमादिभिः ॥ १४ ॥ जाग्रन्निशि बलिं दद्याद्वितीयेऽह्नि पुनर्यजेत् ॥ भद्रकालि
महाकालि दुर्गे दुर्गार्त्तिहारिणि ॥ १५ ॥ त्रैलोक्यविजये चण्डि मम शान्तौ जये भव ॥ नीराजनाविधिं वक्ष्ये ह्यैशान्यां मान्दिरं चरेत्
॥ १६ ॥ तोरणत्रितयं तत्र गृहे देवान्यजेत्सदा ॥ चित्रां त्यक्त्वा यदा स्वातिं सविता प्रतिपद्यते ॥ १७ ॥ ततः प्रभृति कर्त्तव्यं याव-
त्स्वातौ रविः स्थितः ॥ ब्रह्मा विष्णुश्च शम्भुश्च शक्रश्चैवानलानिलौ ॥ १८ ॥ विनायकः कुमारश्च वरुणो धनदो यमः ॥ विश्वेदेवा
वैश्रवसो गजाश्चाष्टौ च तान्यजेत् ॥ १९ ॥ कुमुदैरावणौ पद्मः पुष्पदन्तश्च वामनः ॥ सुप्रतीकोऽञ्जनो नीलः पूजा
कार्य्या गृहादिके ॥ २० ॥ पुरोधा जुहुयादाज्यं समित्सिद्धार्थकं तिलाः ॥ कुम्भा अष्टौ पूजिताश्च तैः स्नाप्याश्चगजोत्तमाः ॥ २१ ॥

अश्वाः स्नाप्या ददेत्पिण्डांस्ततो हि प्रथमं गजान् ॥ निष्क्रामयेत्तोरणेस्तु गोपुरादि न लङ्घयेत् ॥ २२ ॥ विक्रमेयुस्ततः सर्वे राजलिङ्गं गृहे यजेत् ॥ वारुणे वरुणं प्राच्यं रात्रौ भूतबलिं ददेत् ॥ २३ ॥ विशास्वायां गते सूर्य्ये आश्रमे निवसन्नृपः ॥ अलङ्कुर्य्याद्दिने तस्मिन्वाहनं तु विशेषतः ॥ २४ ॥ पूजिता राजलिङ्गश्च कर्त्तव्यो नरहस्तगः ॥ हस्तिनं तुरगं छत्रं खड्गं चापं च दुन्दुभिम् ॥ २५ ॥ ध्वजं पताकां धर्मज्ञ कालज्ञस्त्वाभिमन्त्रयेत् ॥ अभिमन्त्र्य ततः सर्वान्कुर्य्यात्कुञ्जरधूर्गतान् ॥ २६ ॥ कुञ्जरोपरिगौ स्यातां सांवत्सर-पुरोहितौ ॥ मन्त्रितांश्च समारुह्य तोरणेन विनिर्गमेत् ॥ २७ ॥ निष्क्रम्य नागमारुह्य तोरणेनाथ निर्गमेत् ॥ बलिं विभज्य विधिवद्राजा कुञ्जरधूर्गतः ॥ २८ ॥ उल्मूकानां तु निचयमादीपितंदिगन्तरम् ॥ राजा प्रदक्षिणं कुर्य्यात्त्रीन्वारान्सुसमाहितः ॥ २९ ॥ चतुरङ्गबलो-पेतः सर्वसैन्येन नादयन् ॥ एवं कृत्वा गृहं गच्छेद्विसर्जितजलाञ्जलिः ॥ शान्तिर्नीराजनाख्येयं वृद्धये रिपुमर्दिनी ॥ ३० ॥ इत्यादिमहा-पुराणे आग्नेये नीराजनाविधिर्नामाष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥ अथ छत्रादिमन्त्रादयः ॥ पुष्कर उवाच ॥ छत्रादिमन्त्रान्वक्ष्यामि यैस्तत्पूज्य जयादिकम् ॥ ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ १ ॥ सूर्य्यस्य च प्रभावेण वर्द्धस्व त्वं महामते ॥ पाण्डराभप्रतीकाश हिमकुन्देन्दुसुप्रभ ॥ २ ॥ यथाम्बुदश्छादयते शिवायैनां वसुन्धराम् ॥ तथाच्छादय राजानं विजया-रोग्यवृद्धये ॥ ३ ॥ गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ॥ ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ ४ ॥ प्रभावाच्च हुताशस्य वर्द्धस्व त्वं तुरङ्गम ॥ तेजसा चैव सूर्य्यस्य मुनीनां तपसा तथा ॥ ५ ॥ रुद्रस्य ब्रह्मचर्य्येण पवनस्य बलेन च ॥ स्मर त्वं राजपुत्रोऽसि कौस्तुभं तु मणिं स्मर ॥ ६ ॥ यां गतिं ब्रह्महा गच्छेत्पितृहा मातृहा तथा ॥ भूम्यर्थेऽनृतवादी च क्षत्रियश्च पराङ्मुखः ॥ ७ ॥ व्रजे-स्त्वं तां गतिं क्षिप्रं मा तत्पापं भवेत्तव ॥ विकृतिं मापगच्छेस्त्वं युद्धेऽश्वानि तुरङ्गम ॥ ८ ॥ रिपून्विनिघ्नन्समरे सह भर्त्रा सुखी भव ॥ शक्रकेतो महावीर्य्य सुवर्णस्त्वामुपाश्रितः ॥ ९ ॥ पतत्रिराड्विनतेयस्तथा नारायणध्वजः ॥ काश्यपेयोऽमृताहर्त्ता नागारिर्विष्णुवाहनः ॥ ॥ १० ॥ अप्रमेयो दुराधर्षो रणे देवारिसूदनः ॥ महाबलो महावेगो महाकायोऽमृताशनः ॥ ११ ॥ गरुत्मान्मारुतगतिस्त्वयि सन्निहितः स्थितः ॥ विष्णुना देवदेवेन शक्रार्थं स्थापितो ह्यसि ॥ १२ ॥ जयाय भव मे नित्यं वृद्धयेऽथ बलस्य च ॥ साश्ववर्मायुधान्योधान-

क्षास्माकं रिपून्दह ॥ १३ ॥ कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ॥ सुप्रतीकोऽञ्जनो नीलो ह्येतेऽष्टौ देवयोनयः ॥१४॥ तेषां पुत्राश्च पौत्राश्च बलान्यष्टौ समाश्रिताः ॥ भद्रो मन्दो मृगश्चैव गजः संकीर्ण एव च ॥ १५॥ वने वने प्रसूतास्ते स्मर योनिं महागजाः ॥ पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ॥ १६ ॥ भर्त्तारं रक्ष नागेन्द्र समयः परिपाल्यताम् ॥ ऐरावताधिरूढस्तु वज्रहस्तः शतक्रतुः ॥ ॥ १७ ॥ पृष्ठतोऽनुगतस्त्वेष रक्षतु त्वां स देवराट् ॥ अवाप्नुहि जयं युद्धे सुस्थश्चैव सदा व्रज ॥ १८ ॥ अवाप्नुहि बलं चैव चैरावत- समं युधि ॥ श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्य्याज्जवोऽनिलात् ॥ १९॥ स्थैर्य्यं गिरेर्जयं रुद्राद्यशो देवात्पुरन्दरात् ॥ युद्धे रक्षन्तु नागा- स्त्वां दिशश्च सह दैवतैः ॥ २० ॥ अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतो दिशः ॥ मनवो वसवो रुद्रा वायुः सोमो महर्षयः ॥ २१ ॥ नागकिन्नरगन्धर्वयक्षभूतगणा ग्रहाः ॥ प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह ॥ २२ ॥ शक्रः सेनापतिः स्कन्दो वरुणश्चाश्रितस्त्वयि ॥ प्रदहन्तु रिपून्सर्वान्राजा विजयमृच्छतु ॥ २३ ॥ यानि प्रयुक्तान्यरिभिर्भूषणानि समन्ततः ॥ पतन्तु तव शत्रूणां हतानि तव तेजसा ॥ ॥ २४ ॥ कालनेमिवधे यद्वद्युद्धे त्रिपुरघातने ॥ हिरण्यकशिपोर्युद्धे वधे सर्वासुरेषु च ॥ २५ ॥ शोभितासि तथैवाद्य शोभस्व समयं स्मर ॥ नीलश्वेतामिमां दृष्ट्वा नश्यन्त्वाशु नृपारयः ॥ २६ ॥ व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ॥ पूतना रेवती लेखा कालरात्रीति पठ्यते ॥ २७ ॥ दहन्त्वाशु रिपून्सर्वान्पताके त्वामुपाश्रिताः ॥ सर्वमेधे महायज्ञे देवदेवेन शूलिना ॥ २८ ॥ शर्वेण जगतश्चैव सारेण त्वं विनिर्मितः ॥ नन्दकस्यापरां मूर्त्तिं स्मर शत्रुनिबर्हण ॥ २९ ॥ नीलोत्पलदलश्यामं कृष्ण दुःस्वप्ननाशन ॥ असि- र्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ ३० ॥ श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च ॥ इत्यष्टौ तव नामानि पुरोक्तानि स्वयम्भुवा ॥ ॥ ३१ ॥ नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥ हिरण्यं च शरीरं ते दैवतं ते जनार्दनः ॥ ३२ ॥ राजानं रक्ष निस्त्रिंश सबलं सपुरं तथा ॥ पिता पितामहो देवः स त्वं पालय सर्वदा ॥ ३३ ॥ शर्मप्रदस्त्वं समरे वर्मन्सैन्ये यशोऽद्य मे ॥ रक्ष मां रक्षणीयोऽहं तवानघ नमो- ऽस्तु ते ॥ ३४ ॥ दुन्दुभे त्वं सपत्नानां घोषाद्धृदयकम्पनः ॥ भव भूमिपसैन्यानां यथा विजयवर्द्धनः ॥ ३५ ॥ यथा जीमूतघोषेण हृष्यन्ति वरवारणाः ॥ तथास्तु तव शब्देन हर्षोऽस्माकं मुदाऽऽवह ॥ ३६ ॥ यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ॥ तथा तु तव

शब्देन त्रस्यन्त्वस्माद्विषो रणे ॥ ३७ ॥ मन्त्रैः सदार्चनीयास्ते योजनीया जयादिषु ॥ घृतकम्बलः (ड) विष्ण्वादेस्त्वभिषेकं च वत्सरे ॥ राज्ञोभिषेकः कर्तव्यो दैवज्ञेन पुरोधसा ॥ ३८ ॥ इत्यादिमहापुराणे आग्नेये छत्रादिमन्त्रादिकं नामैकोनसप्तत्यधिकद्विशततमोऽध्यायः ॥ २६९ ॥

॥ अथ विष्णुपञ्जरम् ॥ पुष्कर उवाच ॥ त्रिपुरं जघ्नुषः पूर्वं ब्रह्मणा विष्णुपञ्जरम् ॥ शङ्करस्य द्विजश्रेष्ठ रक्षणाय निरूपितम् ॥ १ ॥ वागीशेन च शक्रस्य बलं हन्तुं प्रयासतः ॥ तस्य स्वरूपं वक्ष्यामि तत्त्वं शृणु जयादितम् ॥ २ ॥ विष्णुः प्राच्यां स्थितश्चक्री हरिर्दक्षिणतो गदी ॥ प्रतीच्यां शार्ङ्गधृग्विष्णुर्जिष्णुः खड्गी ममोत्तरे ॥ ३ ॥ हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः ॥ क्रोडरूपी हरिर्भूमौ नरसिंहोऽम्बरे मम ॥ ४ ॥ क्षुरान्तममलं चक्रं भ्रमत्येतत्सुदर्शनम् ॥ अस्यांशुमाला दुष्प्रेक्ष्या हन्तुं प्रेतनिशाचरान् ॥ ५ ॥ गदा चेयं सहस्रार्चिः प्रदीप्तपावकोज्ज्वला ॥ रक्षोभूतपिशाचानां डाकिनीनां च नाशिनी ॥ ६ ॥ शार्ङ्गविस्फूर्जितं चैव वासुदेवस्य मद्रिपून् ॥ तिर्य्यङ्मनुष्यकूष्माण्डप्रेतादीन्हन्त्वशेषतः ॥ ७ ॥ खड्गधाराज्वलज्ज्योत्स्नानिर्धूता ये समाहिताः ॥ ते यान्तु शाम्यतां सद्यो गरुडेनेव पन्नगाः ॥ ८ ॥ ये कूष्माण्डास्तथा यक्षा ये दैत्या ये निशाचराः ॥ प्रेता विनायकाः क्रूरा मनुष्या जम्भगाः खगाः ॥ ९ ॥ सिंहादयश्च पशवो दन्दशूकाश्च पन्नगाः ॥ सर्वे भवन्तु ते सौम्याः कृष्णशङ्खरवाहताः ॥ १० ॥ चित्तवृतिहरा ये मे ये जनाः स्मृतिहारकाः ॥ बलौजसां च हर्त्तारश्छायाविभ्रंशकाश्च ये ॥ ११ ॥ ये चोपभोगहर्त्तारो ये च लक्षणनाशकाः ॥ कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः ॥ १२ ॥ बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमेन्द्रियकं तथा ॥ ममास्तु देवदेवस्य वासुदेवस्य कीर्त्तनात् ॥ १३ ॥ पृष्ठे पुरस्तान्मम दक्षिणोत्तरे विकोणतश्चास्तु जनार्दनो हरिः ॥ तमीड्यमीशानमनन्तमच्युतं जनार्दनं प्रणिपतितो न सीदति ॥ १४ ॥ यथा परं ब्रह्म हरिस्तथा परो जगत्सरूपश्च स एव केशवः ॥ सत्येन तेनाच्युतनामकीर्त्तनात्प्रणाशयेत्तु त्रिविधं ममाशुभम् ॥ १५ ॥ इत्यादिमहापुराणे आग्नेये विष्णुपंजरं नाम सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥ अथ वेदशास्त्रादिकीर्त्तनम् ॥ पुष्कर उवाच ॥ सर्वानुग्राहका मन्त्राश्चतुर्वर्गप्रसाधकाः ॥ ऋगथर्व तथा साम यजुःसंख्या तु लक्षकम् ॥ १ ॥ भेदः सांख्यायनश्चैक आश्वलायनो द्वितीयकः ॥ शतानि दश मन्त्राणां ब्राह्मणा द्विसहस्रकम्

(२११०) ॥ २ ॥ ऋग्वेदो हि प्रमाणेन स्मृतो द्वैपायनादिभिः ॥ एकोनद्विसहस्रं तु मन्त्राणां यजुषस्तथा (१९९९) ॥ ३ ॥ शतानि दश विप्राणां षडशीतिश्च शाखिकाः ॥ काण्वी माध्यन्दिनी संज्ञा कठी माध्यकठी तथा ॥ ४ ॥ मैत्रायणी च संज्ञा च तैत्तिरीयाभिधानिका ॥ वैशम्पायनिकेत्याद्या शाखा यजुषि संस्थिताः ॥ ५ ॥ साम्नः कौथुमसंज्ञैका द्वितीयाथर्वणायनी ॥ मानान्यपि च चत्वारि वेद आरण्यकं तथा ॥ ६ ॥ उक्था ऊह चतुर्थं च मन्त्रा नवसहस्रकाः ॥ सचतुःशतकाश्चैव ब्रह्मसङ्ख्यकाः स्मृताः ॥ ७ ॥ पञ्चविंशतिरेवात्र साममानं (९४२५) प्रकीर्त्तितम् ॥ सुमन्तुर्जाजालिश्चैव श्लोकाय निरथर्वके ॥ ८ ॥ शौनकः पिप्पलादश्च मुञ्जकेशादयोऽपरे ॥ मन्त्राणामयुतं षष्टिशतं-(१६००) चोपनिषच्छतम् ॥ ९ ॥ व्यासरूपी स भगवाञ्छाखाभेदाद्यकारयत् ॥ शाखाभेदादयो विष्णुरीतिहासः पुराणकम् ॥ १० ॥ प्राप्य व्यासात्पुराणादि सूतो वै लोमहर्षणः ॥ सुमतिश्चाग्निवर्चाश्च मित्रयुः शिंशपायनः ॥ ॥ ११ ॥ कृतव्रतोऽथ सावर्णिः षट्शिष्यास्तस्य चाभवन् ॥ शांशपायनादयश्चक्रुः पुराणानां तु संहिताः ॥ १२ ॥ ब्रह्मादीनि पुराणानि हरिविद्या दशाष्ट च ॥ महापुराणे ह्याग्नेये विद्यारूपो हरिः स्थितः ॥ १३ ॥ सप्रपञ्चो निष्प्रपञ्चो मूर्त्तामूर्त्तस्वरूपधृक् ॥ तं ज्ञात्वाभ्यर्च्य संस्तूय भुक्तिमुक्तिमवाप्नुयात् ॥ १४ ॥ विष्णुर्जिष्णुर्भविष्णुश्च अग्निसूर्य्यादिरूपवान् ॥ अग्निरुपेण देवादेर्मुखं विष्णुः ॥ परा गतिः ॥ १५ ॥ वेदेषु सपुराणेषु यज्ञमूर्त्तिश्च गीयते ॥ आग्नेयाख्यं पुराणं तु रूपं विष्णोर्महत्तरम् ॥ १६ ॥ आग्नेयाख्यपुराणस्य कर्त्ता श्रोता जनार्दनः ॥ तस्मात्पुराणमाग्नेयं सर्ववेदमयं महत् ॥ १७ ॥ सर्वविद्यामयं पुण्यं सर्वज्ञानमयं वरम् ॥ सर्वात्महरिरूपं हि पठतां शृण्वतां नृणाम् ॥ १८ ॥ विद्यार्थिनां च विद्यादमर्थिनां श्रीधनप्रदम् ॥ राज्यार्थिनां राज्यदं च धर्मदं धर्मकामिनाम् ॥ १९ ॥ स्वर्गार्थिनां स्वर्गदं च पुत्रदं पुत्रकामिनाम् ॥ गवादिकामिनां गोदं ग्रामदं ग्रामकामिनाम् ॥ २० ॥ कामार्थिनां कामदं च सर्वसौभाग्यसम्प्रदम् ॥ गुणकीर्त्तिप्रदं नृणां जयदं जयकामिनाम् ॥ २१ ॥ सर्वेप्सूनां सर्वदं तु मुक्तिदं मुक्तिकामिनाम् ॥ पापघ्नं पापकर्तृणामाग्नेयं हि पुराणकम् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये वेदशास्त्रादिकीर्तनं नामैकसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७१ ॥ अथ दानादिमाहात्म्यम् ॥ पुष्कर उवाच ॥ ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये ॥ लक्षार्द्धार्द्धं तु तद्ब्राह्मं लिखित्वा सम्प्रदापयेत् ॥ १ ॥

वैशाख्यां पौर्णमास्यां च स्वर्गार्थी जलधेनुमत् ॥ पाद्मं द्वादशसाहस्रं ज्येष्ठे दद्याच्च धेनुमत् ॥२॥ वराहकल्पवृत्तान्तमाधिकृत्य पराशरः ॥
त्रयोविंशतिसाहस्रं वैष्णवं प्राह चार्पयेत् ॥३॥ जलधेनुमदाषाढ्यां विष्णोः पदमवाप्नुयात् ॥ चतुर्दशसहस्राणि वायवीयं हरिप्रियम् ॥ ४ ॥
श्वेतकल्पप्रसङ्गेन धर्मान्वायुरिहात्रवीत् ॥ दद्यालिखित्वा ताद्रिप्रे श्रावण्यां गुडधेनुमत्॥५॥यत्राधि कृत्य गायत्रीं कीर्त्यते धर्मविस्तरः ॥
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥६॥ सारस्वतस्य कल्पस्य प्रोष्ठपद्यां तु तद्ददेत् ॥ अष्टादशसहस्राणि हेमसिंहसमन्वितम् ॥७॥ यत्राऽह
नारदो धर्मान्बृहत्कल्पाश्रितानिह ॥ पञ्चविंशसहस्राणि नारदीयं तदुच्यते ॥ ८ ॥ सधेनुं चाश्विने दद्यात्सिद्धिमात्यन्तिकीं लभेत् ॥
यत्राधिकृत्य शत्रूणां धर्माधर्मविचारणा॥९॥कार्तिक्यां नवसाहस्रं मार्कण्डेयमथार्पयेत्॥अग्निना यद्वसिष्ठाय प्रोक्तं चाग्नेयमेव तत् ॥ १० ॥
लिखित्वा पुस्तकं दद्यान्मार्गशीर्ष्यां स सर्वदः ॥ द्वादशैव सहस्राणि सर्वविद्याववोधनम् ॥ ११ ॥ चतुर्दसहशस्राणि भविष्यं सूर्य्य-
सम्भवम् ॥ भवस्तु मनवे प्राह दद्यात्पौष्यां गुडादिमत् ॥ १२ ॥ सावर्णिना नारदाय ब्रह्मवैवर्त्तमीरितम् ॥ रथन्तरस्य वृत्तान्तमष्टा-
दशसहस्रकम् ॥ १३ ॥ माघ्यां दद्याद्वराहस्य चरितं ब्रह्मलोकभाक् ॥ यत्राग्निलिङ्गमध्यस्थो धर्मान्प्राह महेश्वरः ॥ १४ ॥ आग्ने-
यकल्पे तल्लिङ्गमेकादशसहस्रकम् ॥ तद्दत्त्वा शिवमाप्नोति फाल्गुन्यां तिलधेनुमत् ॥ १५ ॥ चतुर्दशसहस्राणि वाराहं विष्णुनेरितम् ॥
भूमो वराहचरितं मानवस्य प्रवृत्तितः ॥ १६ ॥ महेमगरुडं चैत्र्यां पदमाप्नोति वैष्णवम् ॥ चतुरशीतिसाहस्रं स्कान्दं स्कन्देरितं महत्
॥१७॥ अधिकृत्य सधर्मीश्च कल्पे तत्पुरुषेऽर्पयेत् ॥ वामनं दशसाहस्रं धौमकल्पे हरेः कथाम् ॥१८॥ दद्याच्छरदि विषुवे धर्मार्थादिनि-
बोधनम् ॥ कूर्मं चाष्टसहस्रं च कूर्मोक्तं च रसातले ॥१९॥ इन्द्रद्युम्नप्रसङ्गेन दद्यात्तद्धेमकूर्मवत् ॥ त्रयोदशसहस्राणि मात्स्यं कल्पादितोऽ-
ब्रवीत् ॥ २० ॥ मत्स्यो हि मनवे दद्याद्विषुवे हेममत्स्यवत् ॥ गारुडं चाष्टसाहस्रं विष्णूक्तं तार्क्ष्यकल्पके ॥ २१ ॥ विश्वाण्डाद्गरुडोपत्तिं
तद्दद्याद्धेमहंसवत् ॥ ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीच्च यत् ॥ २२ ॥ नव द्वादशसाहस्रं ब्रह्माण्डं तद्विनेऽर्पयेत् ॥ भारते पर्वस-
मासो वस्त्रगन्धस्रगादिभिः ॥ २३ ॥ वाचकं पूजयेदादौ भोजयेत्पायसैर्द्विजान् ॥ गोभूग्रामसुवर्णादि दद्यात्पर्वणि पर्वणि ॥ २४ ॥ समाप्ते
भारते विप्रं संहितापुस्तकं यजेत् ॥ शुभे देशे निवेश्याथ क्षौमवस्त्रादिनावृतान् ॥ २५ ॥ नरनारायणौ पूज्यौ पुस्तकं कुसुमादिभिः ॥

गोन्नब्रभूहेम दत्त्वाथ भोजयित्वा क्षमापयेत् ॥ २६ ॥ महादानानि देयानि रत्नानि विविधानि च ॥ माषकौ द्वौ त्रयश्चैव मासे मासे प्रदापयेत् ॥ २७ ॥ अयनादौ श्रावकस्य दानमादौ विधीयते ॥ श्रोतृभिः सकलैः कार्य्य श्रावके पूजनं द्विज ॥ २८ ॥ इतिहासपुराणानां पुस्तकानि प्रयच्छति ॥ पूजयित्वापुरारोग्यं स्वर्गमोक्षमवाप्नुयात् ॥ २९ ॥ इत्यादिमहापुराणे आग्नेये दानादिमाहात्म्यं नाम द्विसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७२ ॥ अथ सूर्य्यवंशकीर्त्तनम् ॥ अग्निरुवाच ॥ सूर्य्यवंशं सोमवंशं राज्ञां वंशं वदामि ते ॥ हरेर्ब्रह्मा पद्मगोऽभून्मरीचिर्ब्रह्मणः सुतः ॥ १ ॥ मरीचेः कश्यपस्तस्माद्विवस्वांस्तस्य पत्न्यपि ॥ संज्ञा राज्ञी प्रभा तिस्रो राज्ञी रैवतपुत्रिका ॥ ॥ २ ॥ रेवन्तं सुषुवे पुत्रं प्रभातं च प्रभा रवेः ॥ त्वाष्ट्री संज्ञा मनुं पुत्रं यमलौ यमुनां यमम् ॥ ३ ॥ छाया संज्ञा च सावर्णिं मनुं वैवस्वतं सुतम् ॥ शनिं च तपतीं विष्टिं संज्ञायां चाश्विनौ पुनः ॥ ४ ॥ मनोर्वैवस्वतस्यासन्पुत्रा वै न च तत्समाः ॥ इक्ष्वाकुश्चैव नाभागो धृष्टः शर्य्यातिरेव च ॥ ५ ॥ नरिष्यन्तस्तथा प्रांशुर्नाभागाद्यष्ट सत्तमाः ॥ करुषश्च पृषध्रश्च अयोध्यायां महाबलाः ॥ ६ ॥ कन्येला च मनोरासीद्बुधात्तस्यां पुरूरवाः ॥ पुरूरवसमुत्पाद्य सेला सुद्युम्नतां गता ॥ ७ ॥ सुद्युम्नादुत्कलगयौ विनताश्चेत्रयो नृपाः ॥ उत्कलस्योत्कलं राष्ट्रं विनताश्वस्य पश्चिमा ॥ ८ ॥ दिक्सर्वा राजवर्य्यस्य गयस्य तु गया पुरी ॥ वसिष्ठवाक्यात्सुद्युम्नः प्रतिष्ठानमवाप ह ॥ ९ ॥ तत्पुरूरवसे प्रादात्सुद्युम्नो राज्यमाप्य तु ॥ नरिष्यतः शकाः पुत्रा नाभागस्य च वैष्णवः ॥ १० ॥ अम्बरीषः प्रजापालो धार्ष्टकं धृष्टतः कुलम् ॥ सुकन्यानर्त्तौ शर्य्यातेर्वैरोध्यनर्त्ततो नृपः ॥ ११ ॥ आनर्त्तविषयश्चासीत्पुरी चासीत्कुशस्थली ॥ रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्मिकः ॥ १२ ॥ ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीम् ॥ स कन्यासहितः श्रुत्वा गान्धर्वं ब्रह्मणोऽन्तिके ॥ १३ ॥ मुहूर्त्तभूतं देवस्य मर्त्ये बहुयुगं गतम् ॥ आजगाम जयेनाथ स्वां पुरीं यादवैर्वृताम् ॥ १४ ॥ कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम् ॥ भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः ॥ १५ ॥ रेवतीं बलदेवाय ददौ ज्ञात्वा ह्यनिन्दिताम् ॥ तपः सुमेरुशिखरे तप्त्वा विष्ण्वालयं गतः ॥ १६ ॥ नाभागस्य च पुत्रौ द्वौ वैश्यौ ब्राह्मणतां गतौ ॥ करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्मदाः ॥ १७ ॥ शूद्रत्वं च पृषध्रोऽगाद्धिंसयित्वा गुरोश्च गाम् ॥ मनुपुत्रादथेक्ष्वाकोर्विकुक्षिर्देवराडभूत् ॥ १८ ॥ विकुक्षेस्तु ककुत्स्थोऽभूत्तस्य पुत्रः सुयो-

धनः ॥ तस्य पुत्रः पृथुर्नाम विश्वगाश्वः पृथोः सुतः ॥ १९ ॥ आयुस्तस्य च पुत्रोऽभूद्युवनाश्वस्तथा सुतः ॥ युवनाश्वाच्च श्रावन्तः पूर्वे श्रावान्तिका पुरी ॥ २० ॥ श्रावन्ताद्बृहदश्वोऽभूत्कुवलाश्वस्ततो नृपः ॥ धुन्धुमारत्वमगमद्धुन्धोर्नाम्ना च वै पुरा ॥ २१ ॥ धुन्धुमाराख्यो भूपा दृढाश्वो दण्ड एव च ॥ कापिलोऽथ दृढाश्वात्तु हर्य्यश्वश्च प्रमोदकः ॥ २२ ॥ हर्य्यश्वाच्च निकुम्भोऽभूत्संहताश्वो निकुम्भतः ॥ अकृशाश्वो रणाश्वश्च संहताश्वसुतावुभौ ॥ २३ ॥ युवनाश्वो रणाश्वस्य मान्धाता युवनाश्वतः ॥ मान्धातुः पुरुकुत्सोऽभून्मुचुकुन्दो द्वितीयकः ॥२४ ॥ पुरुकुत्साच्त्रसदस्युः सम्भूतो नर्मदाभवः ॥ सम्भूतस्य सुधन्वाऽभूत्त्रिधन्वाथ सुधन्वनः ॥२५ ॥ त्रिधन्वनस्तु तरुणस्तस्य सत्यव्रतः सुतः ॥ सत्यव्रतात्सत्यरथो हरिश्चन्द्रश्च तत्सुतः ॥ २६ ॥ हरिश्चन्द्राद्रोहिताश्वो रोहिताश्वाद्वृकोऽभवत् ॥ वृकाद्बाहुश्च बाहोश्च सगरस्तस्य च प्रिया ॥ २७ ॥ प्रभा षष्टिसहस्राणां सुतानां जननी ह्यभूत् ॥ तुष्टादौर्वान्नृपादेकं भानुमत्यसमञ्जसम् ॥ २८ ॥ खनन्तः पृथिवीं दग्धा विष्णुना बहुसागराः ॥ असमञ्जसोंशुमांश्च दिलिपोंशुमतोऽभवत् ॥ २९ ॥ भगीरथो दिलीपात्तु येन गङ्गावतारिता ॥ भगीरथात्तु नाभागो नाभागादम्बरीषकः ॥ ३० ॥ सिन्धुद्वीपोऽम्बरीषात्तु श्रुतायुस्तत्सुतः स्मृतः ॥ श्रुतायोर्ऋतपर्णोऽभूतस्य कल्मापपादकः ॥ ३१ ॥ कल्मापाङ्घ्रेः सर्वकर्मा ह्यनरण्यस्ततोऽभवत् ॥ अनरण्यात्तु निघ्नोऽथ ह्यनामित्रस्ततो रघुः ॥ ३२ ॥ रघोरभूद्दिलीपस्तु दिलीपाच्चाप्यजो नृपः ॥ दीर्घबाहुरजात्कालस्त्वजापालस्ततोऽभवत् ॥ ३३ ॥ तथा दशरथो जातस्तस्य पुत्रचतुष्टयम् ॥ नारायणात्मकाः सर्वे रामस्तस्याग्रजोऽभवत् ॥ ३४ ॥ रावणान्तकरो राजा ह्ययोध्यायां रघूत्तमः ॥ वाल्मीकिर्यस्य चरितं चक्रे तन्नारदश्रवात् ॥ ३५ ॥ रामपुत्रौ कुशलवौ सीतायां कुलवर्धनौ ॥ अतिथिश्च कुशान्नज्ञे निषधस्तस्य चात्मजः ॥ ३६ ॥ निषधात्तु नलो जज्ञे नभोऽजायत वै नलात् ॥ नभसः पुण्डरीकोऽभूत्सुधन्वा च ततोऽभवत् ॥ ३७ ॥ सुधन्वनो देवानीको ह्यहीनाश्वश्च तत्सुतः ॥ अहीनाश्वात्सहस्राश्वश्चन्द्रालोकस्ततोऽभवत् ॥ ३८ ॥ चन्द्रावलोकतस्तारापीडोऽस्माच्चन्द्रपर्वतः ॥ चन्द्रगिरेर्भानुरथः श्रुतायुस्तस्य चात्मजः ॥ इक्ष्वाकुवंशप्रभवाः सूर्य्यवंशधराः स्मृताः ॥३९॥ इत्यादिमहापुराणे आग्नेये सूर्य्यवंशकीर्तनं नाम त्रिसप्तत्यधिकद्विशततमोऽध्यायः ॥२७३॥ अथ सोमवंशानुकीर्तनम् ॥ अग्निरु-

वाच ॥ सोमवंशं प्रवक्ष्यामि पठितं पापनाशनम् ॥ विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरात्रितः ॥१॥ सोमश्चक्रे राजसूयं त्रैलोक्यं दक्षिणां ददौ ॥ समाप्तेऽवभृथे सोमं तद्रूपालोकनेच्छवः ॥२॥ कामबाणाभितप्ताङ्ग्यो नरदेव्यः सिषेविरे ॥ लक्ष्मीर्नारायणं त्यक्त्वा सिनीवाली च कर्दमम् ॥३॥ द्युतिर्विभावसुं त्यक्त्वा पुष्टिर्धातारमव्ययम् ॥ प्रभा प्रभाकरं त्यक्त्वा हविष्मन्तं कुहूः स्वयम् ॥ ४॥ कीर्तिर्जयन्तं भर्त्तारं वसुर्मारीचकश्यपम् ॥ धृतिस्त्यक्त्वा पतिं नन्दीं सोममेवाभजत्तदा ॥५॥ स्वकीया इव सोमोऽपि कामयामास तास्तदा ॥ एवं कृतापचारस्य तासां भर्तृगणैस्तदा ॥६॥ न शशाकापचाराय शापैः शस्त्रादिभिः पुनः ॥ सप्तलोकैकनाथत्वमवाप्तस्तपसा द्युत ॥ ७॥ विवभ्राम मतिस्तस्य विनयादनयाऽऽहृता ॥ बृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम् ॥ ८ ॥ जहार तरसा सोमो ह्यवमान्याङ्गिरःसुतम्॥ ततस्तद्युद्धमभवत्प्रख्यातं तारकामयम् ॥ ९ ॥ देवानां दानवानां च लोकक्षयकरं महत् ॥ ब्रह्मा निवार्य्यौशनसं तारामङ्गिरसे ददौ ॥१० ॥ तामन्तःप्रसवां दृष्ट्वा गर्भं त्यजाब्रवीद्गुरुः ॥ गर्भस्त्यक्तः प्रदीप्तोऽथ प्राहाहं सोमसम्भवः ॥ ११ ॥ एवं सोमाद्बुधः पुत्रः पुत्रस्तस्य पुरूरवाः ॥ स्वर्गं त्यक्त्वोर्वशी सा तं वरयामास चाप्सराः ॥१२॥ तया सहाचरद्राजा दशवर्षाणि पञ्च च ॥ पञ्च षट् सप्त चाष्टौ च दश चाष्टौ महामुने ॥१३॥ एकोऽग्निरभवत्पूर्वं तेन त्रेता प्रवर्त्तिता ॥ पुरूरवा योगशीलो गान्धर्वं लोकमीयिवान् ॥१४॥ आयुर्दृढायुरश्वायुर्घनायुर्धृतिमान्वसुः ॥ दिविजातः शतायुश्च सुषुवे चोर्वशी नृपान् ॥ १५ ॥ आयुषो नहुषः पुत्रो वृद्धशर्मा रजिस्तथा ॥ दम्भो विपाप्मा पञ्चाग्न्यं रजेः पुत्रशतं ह्यभूत् ॥ १६ ॥ राजेया इति विख्याता विष्णुदत्तवरो रजिः ॥ देवासुरे रणे दैत्यानवधीत्सुरयाचितः ॥ १७ ॥ गतायेन्द्राय पुत्रत्वं गत्वा राज्यं दिवं गतः ॥ रजेः पुत्रैर्हृतं राज्यं शक्रस्याथ सुदुर्मनाः ॥ १८ ॥ ग्रहशान्त्यादिविधिना गुरुरिन्द्राय तद्ददौ ॥ मोहयित्वा राजिसुतानासंस्ते निजधर्मगाः ॥ १९ ॥ नहुषस्य सुताः सप्त यतिर्य्ययातिरुत्तमः ॥ उद्भवः पञ्चकश्चैव शर्य्यातिमेघपालकौ ॥ २० ॥ यतिः कुमारभावेऽपि विष्णुं ध्यात्वा हरिं गतः ॥ देवयानी शुक्रकन्या ययातेः पत्न्यऽभूत्तदा ॥ २१ ॥ वृषपर्वजा शर्मिष्ठा ययातेः पञ्च तत्सुताः ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ २२ ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ यदुः पुरुश्चाभवतां तेषां वंशविवर्धनौ ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये सोमवंशवर्णनं नाम चतुःसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७४ ॥ अथ यदुवंश-

वर्णनम् ॥ अग्निरुवाच ॥ यदोरासन्पञ्चपुत्रा ज्येष्ठस्तेषु सहस्रजित् ॥ नीलाञ्जिको रघुः क्रोष्टुः शतजिच्च सहस्रजित् ॥ १ ॥ शतजिद्धै-
हयो रेणुहयो हय इति त्रयः ॥ धर्मनेत्रो हैहयस्य धर्मनेत्रस्य संहनः ॥२॥ महिमा सहनस्यासीन्महिष्मो भद्रसेनकः ॥ भद्रसेनाद्दुर्गमोऽभूद्दुर्ग-
मात्कनकोऽभवत् ॥ ३ ॥ कनकात्कृतवीर्य्यस्तु कृताग्निः करवीरकः ॥ कृतौजाश्च चतुर्थोऽभूत्कृतवीर्य्यात्तु सोऽर्जुनः ॥ ४ ॥ दत्तो-
र्जुनाय तपते सप्तद्वीपमहीशताम् ॥ ददौ बाहुसहस्रं च ह्यजेयत्वं रणेऽरिणा ॥ ५ ॥ अधर्मे वर्तमानस्य विष्णुहस्तान्मृतिर्ध्रुवा ॥ दश-
यज्ञसहस्राणि सोऽर्जुनः कृतवान्नृपः ॥ ६ ॥ अनष्टद्रव्यता राष्ट्रे तस्य संस्मरणादभूत् ॥ न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति वै नृपाः ॥
॥ ७ ॥ यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ॥ कार्त्तवीर्य्यस्य च शतं पुत्राणां पञ्च वै पराः ॥ ८ ॥ सूरसेनश्च सूरश्च धृष्टोक्तः कृष्ण
एव च ॥ जयध्वजश्च नाम्नासीदावन्त्यो नृपतिर्महान् ॥ ९ ॥ जयध्वजात्तालजङ्घस्तालजङ्घात्ततः सुताः ॥ हैहयानां कुलाः पञ्च भोजा-
श्चावन्तयस्तथा ॥ १० ॥ वीतिहोत्राः स्वयं जाताः शौण्डिकेयास्तथैव च ॥ वीतिहोत्रादनन्तोऽभूदनन्ताद्दुर्जयो नृपः ॥ ११ ॥क्रोष्टो-
र्वंशं प्रवक्ष्यामि यत्र जातो हरिः स्वयम् ॥ क्रोष्टोस्तु वृजिनीवांश्च स्वाहाऽभूद्वृजिनीवतः ॥ १२ ॥ स्वाहापुत्रो रुषद्गुश्च तस्य चित्ररथः
सुतः ॥ शंशाबिन्दुश्चित्ररथाच्चक्रवर्ती हरौ रतः ॥ १३ ॥ शशाबिन्दोश्च पुत्राणां शतानामभवच्छतम् ॥ धीमतां चारुरूपाणां भूरिद्रविण-
तेजसाम् ॥ १४ ॥ पृथुश्रवाः प्रधानोऽभूत्तस्य पुत्रः सुयज्ञकः ॥ सुयज्ञस्योशनाः पुत्रस्तितिक्षुरुशनःसुतः ॥ १५ ॥ तितिक्षोस्तु मरु-
त्तोऽभूत्तस्मात्कम्बलबर्हिषः ॥ पञ्चाशद्रुक्मकवचाद्रुक्मेषुः पृथुरुक्मकः ॥ १६ ॥ हरिर्ज्यामघः पापघ्नो ज्यामघः स्त्रीजितोऽभवत् ॥
सेव्यायां ज्यामघादासीद्विदर्भस्तस्य कौशिकः ॥ १७ ॥ लोमपादः क्रथः श्रेष्ठात्कृतिः स्याल्लोमपादतः ॥ कौशिकस्य चिदिः पुत्रस्त-
स्माच्चैद्या नृपाः स्मृताः ॥ १८ ॥ क्रथाद्विदर्भपुत्राश्च कुन्तिः कुन्तेस्तु धृष्टकः ॥ धृष्टस्य निधृतिस्तस्य उदर्काख्यो विदूरथः ॥ १९ ॥
दशार्हपुत्रो व्योमस्तु व्योमाज्जीमूत उच्यते ॥ जीमूतपुत्रो विकलस्तस्य भीमरथः सुतः ॥ २० ॥ भीमरथान्नवरथस्ततो दृढरथोऽभवत् ॥
शकुन्तिश्च दृढरथाच्छकुन्तेश्च करम्भकः ॥ २१ ॥ करम्भादेवलातोऽभूद्देवक्षेत्रश्च तत्सुतः ॥ देवक्षेत्रान्मधुर्नाम मधोर्द्देवरसोऽभवत्
॥२२॥ द्देवरसात्पुरुहूतोऽभूज्जन्तुरासीत्तु तत्सुतः ॥ शुणी तु यादवो राजा जन्तुपुत्रस्तु सात्वतः ॥२३ ॥ सात्वताद्भजमानस्तु वृष्णिरन्धक

एव च ॥ देवावृधश्च चत्वारस्तेषां वंशास्तु विश्रुताः ॥ २४ ॥ भजमानस्य वाह्योऽभूद्दृष्टिः कृमिर्निमिस्तथा ॥ देवावृधाद्बभ्रुरासीत्तस्य श्लोकोऽत्र गीयते ॥२५॥ यथैव शृणुमो दूराद्दूरात्तद्वत्समन्तिकात् ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ २६॥ चत्वारश्च सुता बभ्रोर्वासुदेवपरा नृपाः ॥ कुहुरो भजमानस्तु शिनिः कम्बलबर्हिषः ॥२७॥ कुहुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयो धृतिः ॥ धृतेः कपोतरोमाभूत्तस्य पुत्रस्तु तित्तिरिः ॥ २८ ॥ तित्तिरेस्तु नरः पुत्रस्तस्य चन्दनदुन्दुभिः ॥ पुनर्वसुस्तस्य पुत्र आहुकश्चाहुकीसुतः ॥ २९ ॥ आहुकाद्देवका जज्ञे उग्रसेनस्ततोऽभवत् ॥ देववानुपदेवश्च देवकस्य सुताः स्मृताः ॥ ३० ॥ तेषां स्वसारः सप्तासन्वसुदेवाय ता ददौ ॥ देवकी श्रुतदेवी च मित्रदेवी यशोधरा ॥ ३१ ॥ श्रीदेवी सत्यदेवी च सुरापी चेति सप्तमी ॥ नवोग्रसेनस्य सुताः कंसस्तासां च पूर्वजः ॥३२॥न्यग्रोधश्च सुनामा च कङ्कः शङ्कुश्च भूमिपः ॥ सुतनू राष्ट्रपालश्च युद्धमुष्टिः सुमुष्टिकः ॥ ३३ ॥ भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः ॥ राजाधिदेवः शूरश्च विदूरथसुतोऽभवत् ॥ ३४॥ राजाधिदेवपुत्रौ द्वौ शोणाश्वः श्वेतवाहनः ॥ शोणाश्वस्य सुताः पञ्च शमी शत्राजिदादयः॥ ३५॥शमीपुत्रः प्रतिक्षेत्रः प्रतिक्षेत्रस्य भोजकः ॥ भोजस्यं हृदिकः पुत्रो हृदिकस्य दशात्मजाः॥ ३६॥कृतवर्मा शतधन्वा देवार्हो भीषणादयः ॥ देवार्हात्कम्बलबर्हिरसमौजास्ततोऽभवत् ॥ ३७ ॥ सुदंष्ट्रश्च सुवासश्च धृष्टोऽभूदसमौजसः ॥ गान्धारी चैव माद्री च धृष्टभार्य्ये बभूवतुः ॥ ३८ ॥ सुमित्रोऽभूच्च गांधार्य्यां माद्री जज्ञे युधाजितम् ॥ अनमित्रः शिनिर्धृष्टात्ततो वै देवमीढुषः ॥ ३९ ॥ अनमित्रसुतो निघ्नो निघ्नस्यापि प्रसेनकः ॥ सत्राजितः प्रसेनोऽथ मणिं सूर्य्यात्स्यमन्तकम् ॥ ४० ॥ प्राप्यारण्ये चरन्तं तु सिंहो हत्वाग्रहीन्मणिम् ॥ हतो जाम्बवता सिंहो जाम्बवान्हरिणा जितः॥ ४१ ॥ तस्मान्मणिं जाम्बवतीं प्राप्यागाद्द्वारकां पुरीम् ॥ सत्राजिताय प्रददौ शतधन्वा जघान तम् ॥ ४२ ॥ हत्वा शतधनुं कृष्णो मणिमादाय कीर्तिभाक् ॥ बलयादवमुख्याग्रे ह्यक्रूरे मणिमार्पयत् ॥ ४३ ॥ मिथ्याभिशस्तिं कृष्णस्य त्यक्त्वा स्वर्गी च सम्पठन् ॥ सत्राजितो भङ्गकारः सत्यभामा हरेः प्रिया ॥ ४४ ॥ अनमित्राच्छिनिर्जज्ञे सत्यकस्तु शिनेः सुतः ॥ सत्यकात्सात्यकिर्जज्ञे युयुधानाद्धनिर्ह्यभूत् ॥ ४५॥ धुनेर्युगन्धरः पुत्रः स्वाह्योऽभूत्सायुधाजितः ॥ ऋषभक्षेत्रको तस्य ऋषभाच्च श्वफल्ककः ॥ ४६ ॥ श्वफल्कपुत्रो ह्यक्रूरश्चाक्रूराच्च सुधन्वकः ॥ शूराच्तु वसुदेवाद्याः पृथा

पाण्डोः प्रियाऽभवत् ॥ ४७ ॥ धर्माद्युधिष्ठिरः पाण्डोर्वायोः कुन्त्यां वृकोदरः ॥ इन्द्राद्धनञ्जयो माद्र्यां नकुलः सहदेवकः ॥ ४८ ॥ वसुदेवाच्च रोहिण्यां रामः सारणदुर्दमौ ॥ वसुदेवाच्च देवक्यामादौ जातः सुसेनकः ॥ ४९ ॥ कीर्त्तिमान्भद्रसेनश्च जारुख्यो विष्णुदासकः ॥ भद्रदेहः कंस एतान्षड्गर्भान्निजघान ह ॥ ५० ॥ ततो बलस्ततः कृष्णः सुभद्रा भद्रभाषिणी ॥ चारुदेष्णश्च साम्बाद्याः कृष्णाज्जाम्बवतीसुताः ॥ ५१ ॥ इत्यादिमहापुराणे आग्नेये यदुवंशवर्णनं नाम पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७५ ॥ अथ द्वादशसंग्रामाः ॥ अग्निरुवाच ॥ कश्यपो वसुदेवोऽभूद्देवकी चादितिर्वरा ॥ देवक्यां वसुदेवात्तु कृष्णोऽभूत्तपसान्वितः ॥ १ ॥ धर्मसंरक्षणार्थाय ह्यधर्महरणाय च ॥ सुरादेः पालनार्थं च दैत्यादेर्मथनाय च ॥ २ ॥ रुक्मिणी सत्यभामा च सत्या नाग्नजिती प्रिया ॥ सत्यभामा हरेः सेव्या गान्धारी लक्ष्मणा तथा ॥ ३ ॥ मित्रविन्दा च कालिन्दी देवी जाम्बवती तथा ॥ सुशीला च तथा माद्री कौसल्या विजया जया ॥ ४ ॥ एवमादीनि देवीनां सहस्राणि तु षोडश ॥ प्रद्युम्नाद्याश्च रुक्मिण्यां भीमाद्याः सत्यभामया ॥ ५ ॥ जाम्बवत्यां च साम्बाद्याः कृष्णस्यासंस्तथापरे ॥ शतं शतसहस्राणां पुत्राणां तस्य धीमतः ॥ ६ ॥ अशीतिश्च सहस्राणि यादवाः कृष्णरक्षिताः ॥ प्रद्युम्नस्य तु वैदर्भ्यामनिरुद्धो रणप्रियः ॥ ७ ॥ अनिरुद्धस्य वज्राद्या यादवाः सुमहाबलाः ॥ तिस्रः कोट्यो यादवानां षष्टिर्लक्षाणि दानवाः ॥ ८ ॥ मनुष्ये बाधका ये तु तन्नाशाय बभूव सः ॥ कर्त्तुं कर्मव्यवस्थानं मनुष्यो जायते हरिः ॥ ९ ॥ देवासुराणां संग्रामा दायार्थं द्वादशाभवन् ॥ प्रथमो नारसिंहस्तु द्वितीयो वामनो रणः ॥ १० ॥ संग्रामस्त्वथ वाराहश्चतुर्थोऽमृतमन्थनः ॥ तारकामयसंग्रामः षष्ठो ह्याजीवको रणः ॥ ११ ॥ त्रैपुरश्चान्धकवधो नवमो वृतघातकः ॥ जितो हालाहलश्चाथ घोरः कोलाहलो रणः ॥ १२ ॥ हिरण्यकशिपोश्चोरो विदार्य्य च नखैः पुरा ॥ नारसिंहो देवपालः प्रह्लादं कृतवान्नृपम् ॥ १३ ॥ देवासुरे वामनश्च च्छालित्वा बलिमूर्जितम् ॥ महेन्द्राय ददौ राज्यं काश्यपोऽदितिसम्भवः ॥ १४ ॥ वराहस्तु हिरण्याक्षं हत्त्वा देवानपालयत् ॥ उज्जहार भुवं मग्नां देवदेवैरभिष्टुतः ॥ १५ ॥ मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ सुरासुरैश्च मथितं देवेभ्यश्चामृतं ददौ ॥ १६ ॥ तारकामयसंग्रामे तदा देवाश्च पालिताः ॥ निवार्य्येन्द्रं गुरून्देवान्दानवान् सोमवंशकृत् ॥ १७ ॥ विश्वामित्रवसिष्ठात्रिकक्षश्च रणे सुरान् ॥ अपालयन्ते निर्वार्य्य रागद्वेषाददानवान् ॥ १८ ॥ पृथ्वीरथे बलय-

न्तुरीशस्य शरणो हरिः ॥ ददाह त्रिपुरं देवपालको दैत्यमर्दनः ॥ १९ ॥ गौरीं जिहीर्षुणा रुद्रमन्धकेनार्दितं हरिः ॥ अनुरक्तश्च रेवत्यां चक्रे चान्धासुरार्दनम् ॥ २० ॥ अपां फेनमयो भूत्वा देवासुररणे हरन् ॥ वृत्रं देवहरं विष्णुर्देवधर्मानपालयत् ॥ २१ ॥ शाल्वादीन्दान- वाञ्जित्वा हरिः परशुरामकः ॥ अपालयत्सुरादींश्च दुष्टक्षत्रं निहत्य च ॥ २२ ॥ हालाहलं विषं दैत्यं निराकृत्य महेश्वरात् ॥ भयं निर्णा- शयामास देवानां मधुसूदनः ॥ २३ ॥ देवासुरे रणे यश्च दैत्यः कोलाहलो जितः ॥ पालिताश्च सुराः सर्वे विष्णुना धर्मपालनात् ॥२४ ॥ राजान्नो राजपुत्राश्च मुनयो देवता हरिः ॥ यदुक्तं यच्च नैवोक्तमवतारा हरेरिमे ॥ २५ ॥ इत्यादिमहापुराणे आग्नेये द्वादशसंग्रामा नाम षट्- सप्तत्यधिकद्विशततमोऽध्यायः ॥२७६ ॥ अथ राजवंशवर्णनम् ॥ अग्निरुवाच ॥ तुर्वसोश्च सुतो वर्गो गोभानुस्तस्य चात्मजः ॥ गोभानो- रासीत्त्रैशानिस्त्रैशानेस्तु करन्धमः ॥१॥ करन्धमान्मरुत्तोऽभूदुष्यन्तस्तस्य चात्मजः ॥ दुष्यन्तस्य वरूथोऽभूद्गाण्डीरस्तु वरूथतः ॥२ ॥ गाण्डीराच्चैव गान्धारः पञ्च जानपदास्ततः ॥ गान्धाराः केरलाश्चोलाः पाण्ड्या कोला महाबलाः ॥३॥ द्रुह्यस्तु बभ्रुसेतुश्च बभ्रुसेतोः पुरो- वसुः ॥ ततो गान्धारा गान्धारैर्धर्मो धर्माद्घृतोऽभवत् ॥४॥ घृतात्तु विदुषस्तस्मात्प्रचेतास्तस्य वै शतम् ॥ आनद्रश्च सभानरश्चाक्षुषः पर- मेषुकः॥५॥ सभानरात्कालानलः कालानलजः सृञ्जयः॥ पुरञ्जयः सृञ्जयस्य तत्पुत्रो जनमेजयः ॥६॥ तत्पुत्रस्तु महाशालस्तत्पुत्रोऽभून्म- हामनाः॥तस्मादुशीनरो ब्रह्मन्नृगायां तु नृगस्ततः॥७॥ नरायां तु नरश्चासीत्कृमिस्तु कृमितः सुतः॥ दशायां सुव्रतो जज्ञे दृषद्रत्यां शिबि- रतथा ॥८॥ शिबेःपुत्रास्तु चत्वारः पृथुदर्भश्च वीरकः ॥ कैकेयो भद्रकस्तेषां नाम्ना जनपदाः शुभाः ॥९॥ तितिक्षुरुशीनरजस्तितिक्षोश्च रुषद्रथः ॥ रुषद्रथादभूत्पैलः पैलाच्च सुतपाः सुतः ॥१०॥ महायोगी बलिस्तस्मादङ्गवङ्गश्च मुख्यकः ॥ पुण्ड्रः कालिङ्गो बालेयो बलि- र्योगी बलान्वितः॥११॥ अङ्गादधिवाहनोऽभूत्तस्माद्दिविरथो नृपः ॥ दिविरथाद्धर्मरथस्तस्य चित्ररथः सुतः ॥ १२ ॥ चित्ररथात्सत्यरथो लोमपादश्च तत्सुतः ॥ लोमपादाच्चतुरङ्गः पृथुलाक्षश्च तत्सुतः ॥१३॥ पृथुलाक्षाच्च चम्पोऽभूच्चम्पाद्धर्य्यङ्गकोऽभवत्॥हर्य्यङ्गाच्च भद्ररथो बृहत्कर्म्मा च तत्सुतः ॥१४॥ तस्मादभूद्बृहद्भानुर्बृहद्भानोर्बृहान्मवान् ॥ तस्माज्जयद्रथो ह्यासीज्जयद्रथदृढ्रथाः ॥ १५॥ बृहद्रथाद्विश्वजिच्च कर्णो विश्वजितोऽभवत् ॥ कर्णस्य वृषसेनस्तु पृथुसेनस्तदात्मजः ॥ एतेऽङ्गवंशजा भूपाः पुरोवंशं निबोध मे ॥ १६ ॥ इत्यादिमहापु-

राणे आग्नेये राजवंशवर्णनं नाम सप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७ ॥ अथ पुरुवंशवर्णनम् ॥ अग्निरुवाच ॥ पुरोर्जनमेजयोऽभूत्प्राचीवान्नाम तत्सुतः ॥ प्राचीवतो मनस्युस्तु तस्माद्दीतमयो नृपः ॥ १ ॥ शुन्धुवर्तिमयाच्चाभूच्छुन्धोर्बहुविधः सुतः ॥ बहुविधाच्च संयाती रहोवादी च तत्सुतः ॥ २ ॥ तस्य पुत्रोऽथ भद्राश्वो भद्राश्वस्य दशात्मजाः ॥ ऋक्षेयुश्च कृषेयुश्च सन्नतेयुस्तथात्मजः ॥ ३ ॥ घृतेयुश्च चितेयुश्च स्थण्डिलेयुश्च सत्तमः ॥ धर्मेयुः सन्नतेयुश्च कृतेयुर्मतिनारकः ॥ ४॥ तंसुरोधः प्रतिरथः पुरस्तो मातिमारजाः ॥ आसीत्प्रतिरथात्कण्वः कण्वान्मेधातिथिस्त्वभूत् ॥. ५ ॥ तंसुरोधाच्च चत्वारो दुष्यन्तोऽथ प्रवीरकः ॥ सुमन्तश्चानयो वीरो दुष्यन्ताद्भरतोऽभवत् ॥ ६ ॥ शकुन्तलायां तु बली यस्य नाम्ना तु भारताः ॥ सुतेषु मातृकोपेन नष्टेषु भरतस्य च ॥ ७ ॥ ततो मरुद्भिरानीय पुत्रः स तु बृहस्पतेः ॥ संक्रामितो भरद्वाजः क्रतुभिर्वितथोऽभवत् ॥ ८ ॥ स चापि वितथः पुत्राञ्जनयामास पञ्च वै ॥ सुहोत्रं च सुहोतारं गयं गर्भं तथैव च ॥९॥ कपिलश्च महात्मानं सुकेतुं च सुतद्वयम् ॥ कौशिकं च गृत्सपातिं तथा गृत्सपतेः सुताः ॥१०॥ ब्राह्मणाः क्षत्रिया वैश्याः काशे (शा) दीर्घतमाः सुताः ॥ ततो धन्वन्तरिश्चासीत्तत्सुतोऽभूच्च केतुमान् ॥११॥ केतुमतो हेमरथो दिवोदास इति श्रुतः ॥ प्रतर्दनो दिवोदासाद्भर्गवत्सौ प्रतर्दनात् ॥ १२ ॥ वत्सादनर्क आसीच्च ह्यनर्कात्क्षेमकोऽभवत् ॥ क्षेमकाद्धर्षकेतुश्च वर्षकेतोर्विभुः स्मृतः ॥ १३ ॥ विभोरानर्त्तः पुत्रोऽभूद्विभोश्च सुकुमारकः ॥ सुकुमारात्सत्यकेतुर्वत्सभूमिस्तु वत्सकात् ॥ १४ ॥ सुहोत्रस्य बृहत्पुत्रो बृहतस्तनयास्त्रयाः ॥ अजमीढो द्विमीढश्च पुरुमीढश्च वीर्य्यवान् ॥ १५ ॥ अजमीढस्य कैशिन्यां जज्ञे जह्नुः प्रतापवान् ॥ जह्नोरभूदजकाश्वो बलाकाश्वस्तदात्मजः ॥१६ ॥ बलाकाश्वस्य कुशिकः कुशिकाद्गाधिरिन्द्रकः ॥ गाधेः सत्यवती कन्या विश्वामित्रः सुतोत्तमः ॥ १७ ॥ देवरातः कृतिमुखा विश्वामित्रस्य ते सुताः ॥ शुनःशेपोऽष्टकाश्चान्यो ह्यजमीढात्सुतोऽभवत् ॥ १८ ॥ नीलिन्यां शान्तिरपरः पुरुजातिः सुशान्तितः ॥ पुरुजातेस्तु बाह्याश्वो बाह्याश्वात्पञ्च पार्थिवाः ॥ १९ ॥ मुकुलः सृञ्जयश्चैव राजा बृहदिषुस्तथा ॥ यवीनरश्च कृमिलः पाञ्चाला इति विश्रुताः ॥ २० ॥ मुकुलस्य तु मौकुल्याः क्षेत्रोपेता द्विजातयः ॥ चक्षाश्वो मुकुलाज्जज्ञे चक्षाश्वान्मिथुनं ह्यभूत् ॥ २१ ॥ दिवोदासो ह्यहल्या च त्वहल्यायां शरद्वतात् ॥ शतानन्दः शतानन्दात्सत्यधृङ्मिथुनं ततः ॥ २२ ॥

कृपः कृपी दिवोदासान्मैत्रेयः सोमपस्ततः ॥ सृंजयात्पञ्चधनुषः सोमदत्तश्च तत्सुतः ॥ २३ ॥ सहदेवः सोमदत्तात्सहदेवात्तु सोमकः ॥
आसीच्च सोमकाज्जन्तुर्जन्तोश्च पृषतः सुतः ॥ २४ ॥ पृषताद्रुपदस्तस्माद्धृष्टद्युम्नोऽथ तत्सुतः ॥ धृष्टकेतुश्च धूमिन्यामृक्षोऽभूदजमी-
ढतः ॥ २५ ॥ ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्ततः ॥ यः प्रयागादपाक्रम्य कुरुक्षेत्रं चकार ह ॥ २६ ॥ कुरोः सुधन्वा सुधनुः परीक्षि-
च्चारिमेजयः ॥ सुधन्वनः सुहोत्रोऽभूत्सुहोत्राच्च्यवनो ह्यभूत् ॥ २७ ॥ वशिष्ठपरिचाराभ्यां सप्तासन्गिरिकासुताः ॥ बृहद्रथः कुशो वीरो
यदुः प्रत्यग्रहो बलः ॥ २८ ॥ मत्स्यकाली कुशाग्रोऽतो ह्यासीद्राज्ञो बृहद्रथात् ॥ कुशाग्रादृषभो जज्ञे तस्य सत्यहितः सुतः ॥ २९ ॥
सुधन्वा तत्सुतश्चोर्जे ऊर्जादासीच्च सम्भवः ॥ सम्भवाच्च जरासन्धः सहदेवश्च तत्सुतः ॥ ३० ॥ सहदेवादुदापिश्चाप्युदापेः श्रुतकर्मकः ॥
परीक्षितस्य दायादो धार्मिको जनमेजयः ॥ ३१ ॥ जनमेजयात्त्रसदस्युर्जह्नोस्तु सुरथः सुतः ॥श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः ॥
॥ ३२ ॥ जनमेजयस्य पुत्रौ तु सुरथो महिमांस्तथा ॥ सुरथाद्विदूरथोऽभूदृक्ष आर्सीद्विदूरथात् ॥ ३३ ॥ ऋक्षस्य तु द्वितीयस्य भीम-
सेनोऽभवत्सुतः ॥ प्रतीपो भीमसेनात्तु प्रतीपस्य तु शन्तनुः ॥ ३४ ॥ देवापिर्बाह्लिकश्चैव सोमदत्तस्तु शन्तनोः ॥ बाह्लिकात्सोमदत्तोऽ-
भूद्भूरिर्भूरिश्रवाः शलः ॥३५॥ गङ्गायां शन्तनोर्भीष्मः काल्यायां विचित्रवीर्य्यकः॥ कृष्णद्वैपायनश्चैव क्षेत्रे वै चित्रवीर्य्यके ॥३६॥ धृत-
राष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥ पाण्डोर्युधिष्ठिरः कुन्त्यां भीमश्चैवार्जुनस्त्रयः॥३७॥ नकुलः सहदेवश्च पाण्डोर्माद्र्यां च दैवतः ॥
अर्जुनस्य च सौभद्रः परीक्षिदभिमन्युतः ॥ ३८ ॥ द्रौपदी पाण्डवानां च प्रिया तस्यां युधिष्ठिरात् ॥ प्रतिविन्ध्यो भीमसेनाच्छ्रुतकी-
र्त्तिर्धनञ्जयात् ॥ ३९ ॥ सहदेवाच्छ्रुतकर्मा शतानिकस्तु नाकुलिः ॥ भीमसेनाद्विडम्बायामन्य आसीद्घटोत्कचः ॥ ४० ॥ एते भूता
भविष्याश्च नृपाः संख्या न विद्यते ॥ गताः कालेन कालो हि हरिस्तं पूजयेद्विज ॥ होममग्नौ समुद्दिश्य कुरु सर्वप्रदं यतः ॥ ४१ ॥
इत्यादिमहापुराणे आग्नेये पुरुवंशवर्णनं नामाष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥ अथ सिद्धौषधानि ॥ अग्निरुवाच ॥ आयुर्वेदं
प्रवक्ष्यामि सुश्रुताय यमब्रवीत् ॥ देवो धन्वन्तरिः सारं मृतसञ्जीवनीकरम् ॥ १ ॥ सुश्रुत उवाच ॥ आयुर्वेदं मम ब्रूहि नराश्वेभरुगर्द-
नम् ॥ सिद्धयोगात्सिद्धमन्त्रान्मृतसञ्जीवनीकरान् ॥ २ ॥ धन्वन्तरिरुवाच ॥ रक्षन्बलं हि ज्वरितं लंघितं भोजयेद्भिषक् ॥ सविश्वं

लाजमण्डं तु तृड्ज्वरान्तं शृतं जलम् ॥ ३ ॥ मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ॥ षडहे च व्यतिक्रान्ते तिक्तकं पाययेद्ध्रुवम् ॥ ॥ ४ ॥ स्नेहयेत्त्यक्तदोषं तु ततस्तं च विरेचयेत् ॥ जीर्णाः षष्टिकनीवारा रक्तशालिप्रमोदकाः ॥ ५ ॥ तद्विधास्ते ज्वरेष्विष्टा यवानां विकृतिस्तथा ॥ मुद्गा मसूराश्चणकाः कुलत्थाश्च सकुष्ठकाः ॥ ६ ॥ आढक्यो नारकाद्याश्च कर्कोटककटोल्वकम् ॥ पटोलं सफलं निम्बं पर्पटं दाडिमं ज्वरे ॥ ७ ॥ अधोगे वमनं शस्तमूर्ध्वगे च विरेचनम् ॥ रक्तपित्ते तथा पानं षडङ्गं शुण्ठिवर्जितम् ॥८॥ सक्तुगोधूमलाजाश्च यवशालिमसूरकाः ॥ मकुष्टचणका मुद्गा भक्ष्या गोधूमका हिताः ॥ ९ ॥ साधिता घृतदुग्धाभ्यां क्षौद्रं वृषरसो मधु ॥ अतीसारे पुराणानां शालीनां भक्षणं हितम् ॥ १० ॥ अनभिष्यन्दि यच्चान्नं लोध्रवल्कलसंयुतम् ॥ मारुतं वर्जयेद्यत्नः काय्यों गुल्मेषु सर्वथा ॥ ११॥ वाट्यं क्षीरेण चाश्नीयाद्वाम्तूकं घृतसाधितम् ॥ गोधूमशालयस्तिक्ता हिता जठरिणामथ ॥ १२ ॥ गोधूमशालयो मुद्गा ब्रह्मर्क्षखदिरोऽभया ॥ पञ्चकोलं जाङ्गलाश्च निम्बधात्र्यः पटोलकाः ॥ १३ ॥ मातुलुङ्गरसा जातिशुष्कमूलकसैन्धवाः ॥ कुष्ठिनां च तथा शस्तं पानार्थं खदिरोदकम् ॥ १४ ॥ मसूरमुद्गौ पेयार्थे भोज्या जीर्णाश्च शालयः ॥ निम्बपर्पटकैः शाकैर्जाङ्गलानां तथा रसः ॥ १५ ॥ विडङ्गं मरिचं मुस्तं कुष्ठं लोध्रं सुवर्चिका ॥ मनःशिलावचालेपः कुष्ठघ्नो मूत्रपेषितः ॥ १६ ॥ अपूपकुष्ठकुल्माषयवाद्या मेहिनां हिताः ॥ यवान्नविकृतिर्मुद्गा कुलत्था जीर्णशालयः ॥ १७ ॥ तिक्तरूक्षाणि शाकानि तिक्तानि हरितानि च ॥ तैलानि तिलशिग्रुकविभीतकेङ्गुदानि च ॥१८॥ मुद्गाः सयवगोधूमा धान्यं वर्षस्थितं च यत् ॥ जाङ्गलस्य रसः शस्तो भोजने राजयक्ष्मिणाम् ॥१९॥ कुलत्थमुद्गकोलाद्यैः शुष्कमूलकजाङ्गले ॥ पूर्ववा विष्किरैः सिद्धैर्दधिदाडिमसाधितैः ॥२०॥ मातुलुङ्गरसक्षौद्रद्राक्षाव्योषादिसंस्कृतैः ॥ यवगोधूमशाल्यन्नैर्भोजयेद्धासकासिनम् ॥ २१ ॥ दशमूलबलारास्नाकुलत्थैरुपसाधिताः ॥ पेयाः पूपरसाः काथाः श्वासहिक्कानिवारणाः ॥२२॥ शुष्कमूलककोलत्थमूलजाङ्गलजैरसैः ॥ यवगोधूमशाल्यन्नं जीर्णं सेक्षीरमाचरेत् ॥ २३ ॥ शोथवान्सगुडां पथ्यां खादेद्वा गुडनागरम् ॥ तक्रं च चित्रकं चोभौ ग्रहणीरोगनाशनौ ॥ २४ ॥ पुराणयवगोधूमशालयो जाङ्गलो रसः ॥ मुद्गामलकखर्जूरमृद्वीकाबदराणि च ॥ २५ ॥ मधु सर्पिः पयः शक्रं निम्बपर्पटको वृषम् ॥ तक्रारिष्टाश्च शस्यन्ते सततं वातरोगिणाम् ॥ २६ ॥ हृद्रोगिणो विरेच्यास्तु पिप्पल्यो

हिक्किनां हिताः ॥ तक्रारनालसर्पीषि युक्तानि शिशिराम्भसा ॥ २७ ॥ मुक्ताः सौवर्चलाजादि मद्यं शस्तं मदात्यये ॥ सक्षौद्रपयसा लाक्षां पिबेच्च क्षतवान्नरः ॥ २८ ॥ क्षयं मांसरसाहारो वह्निसंरक्षणाज्जयेत् ॥ शालयो भोजने रक्ता नीवारकलमादयः ॥ २९ ॥ यवान्न-विकृतिर्मांसं शाकं सौवर्चलं शटी ॥ पथ्या तथैवार्शसां यन्मण्डं तक्रं च वारिणा ॥ ३० ॥ मुस्ताभ्यासस्तथा लेपश्चित्रकेण हरिद्रया ॥ यवान्नविकृतिः शालिर्वास्तूकं ससुवर्चलम् ॥ ३१ ॥ त्रपुषैर्वारुगोधूमाः क्षीरेक्षुघृतसंयुताः ॥ मूत्रकृच्छ्रे च शस्ताः स्युः पाने मण्ड-सुरादयः ॥ ३२ ॥ लाजा सक्तुस्तथा क्षौद्रं शून्यं मांसं परूषकम् ॥ वार्त्ताकुलावाशिखिन*श्छर्दिघ्नाः पानकानि च ॥ ३३ ॥ शाल्यन्नं तोयपयसी केवलोष्णे शृतेऽपि वा ॥ तृष्णाघ्ने मुस्तगुडयोर्गुटिका वा मुखे धृता ॥ ३४ ॥ यवान्नविकृतिः पूपं शुष्कमूलकजं तथा ॥ शाकं पटोलवेत्राग्रमूरुस्तम्भविनाशनम् ॥ ३५ ॥ मुद्गाढकमसूराणां सतिलैर्जाङ्गलै रसैः ॥ ससैन्धवघृतद्राक्षाशु-ष्यामलककोलजैः ॥ ३६ ॥ यूषैः पुराणगोधूमयवशाल्यन्नमभ्यसेत् ॥ विसर्पी ससिताक्षाद्रमृद्वीकादाडिमोदकम् ॥ ३७ ॥ रक्तयष्टिकगोधूमयवमुद्गादिकं लघु ॥ काकमारी च वेत्राग्रं वास्तुकं च सुवर्चला ॥ ३८ ॥ वातशोणितनाशाय तोयं शस्तं सितं मधु ॥ नासारोगेषु च हितं घृतं दूर्वाप्रसाधितम् ॥ ३९ ॥ भृङ्गराजरसे सिद्धं तैलं धात्रीरसेऽपि वा ॥ नस्यं सर्वामयेष्विष्टं मूर्ध्वजं तूद्भवेषु च ॥ ४० ॥ शीततोयान्नपानं च तिलानां विप्र भक्षणम् ॥ द्विजदार्ढ्यकरं प्रोक्तं तथा तुष्टिकरं परम् ॥ ४१ ॥ गण्डूषं तिलतैलेन द्विजदा-र्ढ्यकरं परम् ॥ विडङ्गचूर्णं गोमूत्रं सर्वत्र कृमिनाशने ॥ ४२ ॥ धात्रीफलान्यथाज्यं च शिरोलेपनमुत्तमम् ॥ शिरोरोगविनाशाय स्निग्धमुष्णं च भोजनम् ॥ ४३ ॥ तैलं वा बस्तमूत्रं च कर्णपूरणमुत्तमम् ॥ कर्णशूलविनाशाय सर्वशुक्तानि वा द्विज ॥ ४४ ॥ गिरिमृ-च्चन्दनं लाक्षां मालतीं कलिकां तथा ॥ संयोज्य या कृता वर्त्तिः क्षतशुक्रहरी तु सा ॥ ४५ ॥ व्योषं त्रिफलया युक्तं तुच्छकं च तथा जलम् ॥ सर्वाक्षिरोगशमनं तथैव च रसाञ्जनम् ॥ ४६ ॥ आज्यभृष्टं शिलापिष्टं लोध्रकाञ्जिकसैन्धवैः ॥ आश्योतनविनाशाय सर्वने-त्रामये हितम् ॥ ४७ ॥ गिरिमृच्चन्दनैर्लेपो बाहिनेत्रस्य शस्यते ॥ नेत्रामयविघातार्थं त्रिफलां शीलयेत्सदा ॥ ४८ ॥ रात्रौ तु मधु-सर्पिर्भ्यां दीर्घमायुर्जिजीविषुः ॥ शतावरीरसे सिद्धो वृष्यो क्षीरघृतो स्मृतो ॥ ४९ ॥ कलम्बिकानि माषाश्च वृष्यो क्षीरघृतो तथा ॥

आयुष्या त्रिफला ज्ञेया पूर्ववन्मधुकान्विता ॥ ५० ॥ मधुकादिरसोपेता वलीपलितनाशिनी ॥ वचा सिद्धघृतं विप्र भूतदोषविनाशनम् ॥ ५१ ॥ कव्यं बुद्धिप्रदं चैव तथा सर्वार्थसाधनम् ॥ बलाकल्ककषायेण सिद्धमभ्यञ्जने हितम् ॥ ५२ ॥ रास्नासहचरैर्वापि तैलं वातविकारिणाम् ॥ अनभिष्यन्दि यच्चान्नं तद्व्रणेषु प्रशस्यते ॥ ५३ ॥ सक्तुपिण्डी तथैवाम्ला पाचनाय प्रशस्यते ॥ पक्वस्य च तथा भेदे निम्बचूर्णं च रोपणे ॥ ५४ ॥ तथा सूच्युपचारश्च बलिकर्म विशेषतः ॥ सूतिका च तथा रक्षा प्राणिनां तु सदा हिता ॥ ५५ ॥ भक्षणं निम्बपत्राणां सर्पदष्टस्य भेषजम् ॥ तालनिम्बदलं केश्यं जीर्णं तैलं यवा घृतम् ॥ ५६ ॥ धूपो वृश्चिकदष्टस्य शिखिपत्रघृतेन वा ॥ अर्कक्षीरेण संपिष्टं लोपो बीजं पलाशजम् ॥ ५७ ॥ वृश्चिकार्त्तस्य कृष्णा वा शिवा च फलसंयुता ॥ अर्कक्षीरं तिलं तैलं पललं च गुडं समम् ॥ ५८ ॥ पानाज्जयति दुर्वारं श्ववविषं शीघ्रमेव तु ॥ पीत्वा मूलं त्रिवृत्तुल्यं तण्डुलीयस्य सर्पिषा ॥ ५९ ॥ सर्पकीटविषाण्याशु जयत्यतिबलान्यपि ॥ चन्दनं पद्मकं कुष्ठं लताम्बूशीरपाटला ॥ ६० ॥ निर्गुण्डी शारिवा सेलुर्लूताविषहरो गदः ॥ शिरोविरेचनं शस्तं गुडनागरकं द्विज ॥ ६१ ॥ स्नेहपाने तथा बस्तौ तैलं घृतमनुत्तमम् ॥ स्वेदनीयः परो वह्निः शीताम्भः स्तम्भनं परम् ॥ ६२ ॥ त्रिवृद्धि रेचने श्रेष्ठा वमने मदनं तथा ॥ बस्तिर्विरेको वमनं तैलं सर्पिस्तथा मधु ॥ वातपित्तबलासानां क्रमेण परमौषधम् ॥ ६३ ॥ इत्यादिमहापुराणे आग्नेये सिद्धौषधादिकथनं नामैकोनाशीत्यधिकद्विशततमोऽध्यायः ॥२७९॥ अथ सर्वरोगहराण्यौषधानि ॥ धन्वन्तरिरुवाच ॥ शारीरमानसागन्तुसहजा व्याधयो मताः ॥ शारीरा ज्वरकुष्ठाद्याः क्रोधाद्या मानसी मताः ॥ १ ॥ आगन्तवो विघातोत्थाः सहजाः क्षुज्जरादयः ॥ शारीरागन्तुनाशाय सूर्य्यवारे घृतं गुडम् ॥ २ ॥ लवणं सहिरण्यं च विप्रायार्च्यं समर्पयेत् ॥ चन्द्रे चाभ्यङ्गदो विप्रे सर्वरोगैः प्रमुच्यते ॥ ३ ॥ तैलं शनैश्चरे दद्यादाश्विने गोरसान्नदः ॥ घृतेन पयसा लिङ्गं संस्नाप्य म्याद्गुगुज्झितः ॥ ४ ॥ गायत्र्या जुहुयाद्वह्नौ दूर्वां त्रिमधुरप्लुताम् ॥ यस्मिन्भे व्याधिमाप्नोति तस्मिन्स्नानं बलिः शुभे ॥ ५ ॥ मानसानां रुजादीनां विष्णोः स्तोत्रं हरं भवेत् ॥ वातपित्तकफा दोषा धातवश्च तथा शृणु ॥ ६ ॥ भुक्तं पक्वाशयादन्नं द्विधा याति च सुश्रुत ॥ अंशेनैकेन किट्टत्वं रसतां चापरेण च ॥ ॥ ७ ॥ किट्टभागो मलस्तत्र विण्मूत्रस्वेददूषिकाः ॥ नासामलं कर्णमलं तथा देहमलं च यत् ॥ ८ ॥ रसभागाद्रसस्तत्र समाच्छोणितता

व्रजेत् ॥ मांसं रक्तात्ततो मेदो मेदसोऽस्थ्नश्च सम्भवः ॥९॥ अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भस्तथौजसः ॥ देशमात्तिं बलं शक्तिं कालं प्रकृतिमेव च ॥१०॥ ज्ञात्वा चिकित्सितं कुर्य्याद्भेषजस्य तथा बलम् ॥ तिथिं रिक्तां त्यजेद्भौमं मन्दभं दारुणोग्रकम् ॥११॥ हरिगोद्विजचन्द्रार्कसुरादीन्प्रतिपूज्य च ॥ शृणु मन्त्रमिमं विद्वन्भेषजारम्भमाचरेत् ॥१२॥ ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कोऽनिलानलाः ॥ ऋषयश्चौषधिग्रामा भूतसंघाश्च पान्तु ते ॥१३॥ रसायनामिवर्षीणां देवानाममृतं यथा ॥ सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥१४॥ वातश्लेष्मातको देशो बहुवृक्षो बहूदकः ॥ अनूप इति विख्यातो जाङ्गलस्तद्विवर्जितः ॥ १५ ॥ किञ्चिद्वृक्षोदको देशस्तथा साधारणः स्मृतः ॥ जाङ्गलः पित्तबहुलो मध्यः साधारणः स्मृतः ॥ १६ ॥ रूक्षः शीतश्चलो वायुः पित्तमुष्णं कटुत्रयम् ॥ स्थिराम्लस्निग्धमधुरं बलाशं च प्रचक्षते ॥ १७ ॥ वृद्धिः समानैरेषां विपरीतैर्विपर्य्ययः ॥ रसाः स्वाद्वम्ललवणाः श्लेष्मला वायुनाशनाः ॥ १८ ॥ ॥ कटुतिक्तकषायाश्च वातलाः श्लेष्मनाशनाः ॥ कट्वम्ललवणा ज्ञेयास्तथा पित्तविवर्धनाः ॥ १९ ॥ तिक्तस्वादुकषायाश्च तथा पित्तविनाशनाः ॥ रसस्यैष गुणो नास्ति विपाकस्यैष इष्यते ॥ २० ॥ वीर्य्योष्णाः कफवातघ्नाः शीताः पित्तविनाशनाः ॥ प्रभावतस्तथा कर्म ते कुर्वन्ति च सुश्रुत ॥ २१ ॥ शिशिरे च वसन्ते च निदाघे च तथा क्रमात् ॥ चयप्रकोपप्रशमाः कफस्य तु प्रकीर्त्तिताः ॥ २२ ॥ निदाघवर्षारात्रौ च तथा शरदि सुश्रुत ॥ चयप्रकोपप्रशमाः पवनस्य प्रकीर्त्तिताः ॥ २३ ॥ मेघकाले च शरदि हेमन्ते च यथाक्रमात् ॥ चयप्रकोपप्रशमास्तथा पित्तस्य कीर्त्तिताः ॥ २४ ॥ वर्षादयो विसर्गास्तु हेमन्ताद्यास्तथा त्रयः ॥ शिशिराद्यास्तथाऽऽदाने ग्रीष्मान्ता ऋतवस्त्रयः ॥ २५ ॥ सौम्यो विसर्गस्त्वादानमाग्नेयं परिकीर्त्तितम् ॥ वर्षादींस्त्रीनृतून्सोमश्चरन्पर्य्यायशो रसान् ॥ २६ ॥ जनयत्यम्ललवणमधुरांस्त्रीन्यथाक्रमम् ॥ शिशिरादीनृतूनर्कश्चरन्पर्य्यायशो रसान् ॥ २७ ॥ विवर्धयेत्तथा तिक्तकषायकटुकान्क्रमात् ॥ यथा रजन्यो वर्धन्ते बलमेकं हि वर्धते ॥ २८ ॥ क्रमशोऽथ मनुष्याणां हीयमानासु हीयते ॥ रात्रिभुक्तादिनानां च वयसश्च तथैव च ॥ २९ ॥ आदिमध्यावसानेषु कफपित्तसमीरणाः ॥ प्रकोपं यान्ति कोपादौ काले तेषां चयः स्मृतः ॥ ३० ॥ प्रकोपोत्तरके काले शमस्तेषां प्रकीर्त्तितः ॥ अतिभोजनतो विप्र तथा चाभोजनेन च ॥ ३१ ॥ रोगा हि सर्वे जायन्ते वेगोदीरणधारणैः ॥

अन्नेन कुक्षेर्द्वावंशावेकं पानेन पूरयेत् ॥ ३२ ॥ आश्रयं पवनादीनां तथैकमवशेषयेत् ॥ व्याधेर्निदानस्य तथा विपरीतमथौषधम् ॥
॥ ३३ ॥ कर्त्तव्यमेतदेवात्र मया सारं प्रकीर्त्तितम् ॥ नाभेरूर्ध्वमधश्चैव गुदश्रोण्योस्तथैव च ॥ ३४ ॥ बलाशपित्तवातानां देहे
स्थानं प्रकीर्त्तितम् ॥ तथापि सर्वगाश्चेते देहे वायुर्विशेषतः ॥ ३५ ॥ देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतम् ॥ कृशोऽल्पकेश-
श्चपलो बहुवाग्विषमानलः ॥ ३६ ॥ व्योमगश्च तथा स्वप्ने वातप्रकृतिरुच्यते ॥ अकालपालितः क्रोधी प्रस्वेदी मधुरप्रियः ॥ ३७ ॥
स्वप्ने च दीप्तिमत्प्रेक्षी पित्तप्रकृतिरुच्यते ॥ दृढाङ्गः स्थिरचित्तश्च सुप्रभः स्निग्धमूर्द्धजः ॥ ३८ ॥ ॥ शुद्धाम्बुदर्शी स्वप्ने च कफप्र-
कृतिको वरः ॥ तामसा राजसाश्चैव सात्त्विकाश्च तथा स्मृताः ॥ ३९ ॥ मनुष्या मुनिशार्दूल वातपित्तकफात्मकाः ॥ रक्तपित्तं व्यवा-
याच्च गुरुकर्मप्रवर्त्तनैः ॥ ४० ॥ कदन्नभोजनाद्वायुर्देहे शोकाच्च कुप्यति ॥ विदाहिनां तथोल्कानामुष्णान्नाध्वनिषेविणाम् ॥ ४१ ॥
पित्तं प्रकोपमायाति भयेन च तथा द्विज ॥ अत्यम्बुपानगुर्वन्नभोजिनां भुक्तशायिनाम् ॥ ४२ ॥ श्लेष्मा प्रकोपमायाति तथा ये
चालसा जनाः ॥ वाताद्युत्थानि रोगाणि ज्ञात्वा शाम्यानि लक्षणैः ॥ ४३ ॥ आस्थिभङ्गः कषायत्वमास्ये शुष्कास्यता तथा ॥ जृम्भणं
लोमहर्षश्च वातिकव्याधिलक्षणम् ॥ ४४ ॥ नखनेत्रशिराणां तु पीतत्वं कटुता मुखे ॥ तृष्णा दाहोष्णता चैव पित्तव्याधिनिदर्शनम्
॥ ४५ ॥ आलस्यं च प्रसेकश्च गुरुता मधुरास्यता ॥ उष्णाभिलाषिता चेति श्लैष्मिकव्याधिलक्षणम् ॥ ४६ ॥ स्निग्धोष्णमन्नमभ्यङ्ग-
स्तैलपानादि वातनुत् ॥ आज्यं क्षीरं सिताद्यं च चन्द्ररश्म्यादि पित्तनुत् ॥ ४७ ॥ सक्षौद्रं त्रिफलातैलं व्यायामादि कफापहम् ॥
सर्वरोगप्रशान्त्यै स्याद्विष्णोर्ध्यानं च पूजनम् ॥ ४८ ॥ इत्यादिमहापुराणे आग्नेये सर्वरोगहरौषधादिकथनं नामाशीत्यधिकद्विशततमोऽ
ध्यायः ॥ २८० ॥ अथ रसादिलक्षणम् ॥ धन्वन्तरिरुवाच ॥ रसादिलक्षणं वक्ष्ये भेषजानां गुणं शृणु ॥ रसवीर्य्यविपाकज्ञो नृपा-
दिचिकित्सयेन्नरः ॥ १ ॥ रसाः स्वाद्वम्ललवणाः सोमजाः परिकीर्त्तिताः ॥ कटुतिक्तकषायाणि तथाग्नेया महाभुज ॥ २ ॥ त्रिधा विपाको
द्रव्यस्य कट्वम्ललवणात्मकः ॥ द्विधा वीर्य्यं समुद्दिष्टमुष्णं शीतं तथैव च ॥ ३ ॥ अनिर्देश्यप्रभावश्च ओषधीनां द्विजोत्तम ॥ मधु-
रश्च कषायश्च तिक्तश्चैव तथा रसः ॥ ४ ॥ शीतवीर्य्याः समुद्दिष्टाः शेषास्तूष्णाः प्रकीर्त्तिताः ॥ गुडूची तत्र तिक्तापि भवत्युष्णाति-

वीर्य्यतः ॥ ५ ॥ उष्णा कषायापि तथा पथ्या भवति मानद ॥ मधुरोऽपि तथा मांस उष्ण एव प्रकीर्त्तितः ॥ ६ ॥ लवणो मधुरश्चैव विपाकमधुरौ स्मृतौ ॥ आम्लोष्णश्च तथा प्रोक्तः शेषाः कटुविपाकिनः ॥ ७ ॥ वीर्य्यपाके विपर्य्यस्तप्रभावात्तत्र निश्चयः ॥ मधुरोऽपि कटुः पाके यच्च क्षौद्रं प्रकीर्त्तितम् ॥ ८ ॥ क्वाथयेत्षोडशगुणं पिबेद्द्रव्याच्चतुर्गुणम् ॥ कल्पनैषा कषायस्य यत्र. नोक्तो विधिर्भवेत् ॥ ९ ॥ कषायं तु भवेत्तोयं स्नेहपाके चतुर्गुणम् ॥ द्रव्यतुल्यं समुद्धृत्य द्रव्ये स्नेहं क्षिपेद्बुधः ॥ १० ॥ तावत्प्रमाणं द्रव्यस्य स्नेहपादं ततः क्षिपेत् ॥ तोयवर्जं तु यद्द्रव्यं स्नेहद्रव्यं तथा भवेत् ॥ ११ ॥ संवर्त्तितौषधः पाकः स्नेहानां परिकीर्त्तिताः ॥ तत्तुल्यता तु लेह्यस्य तथा भवति सुश्रुत ॥ १२ ॥ स्वच्छमल्पौषधं क्वाथं कषायं चोक्तवद्भवेत् ॥ अक्षं चूर्णस्य निर्दिष्टं कषायस्य चतुष्पलम् ॥ ॥ १३ ॥ मध्यमैषा स्मृता मात्रा नास्ति मात्राविकल्पना ॥ वयः कालं बलं वह्निं देशं द्रव्यं रुजं तथा ॥ १४ ॥ समवेक्ष्य महाभाग मात्रायाः कल्पना भवेत् ॥ सौम्यास्तत्र रसाः प्रायो विज्ञेया धातुवर्धनाः ॥ १५ ॥ मधुरास्तु विशेषेण विज्ञेया धातुवर्धनाः ॥ दोषाणां चैव धातूनां द्रव्यं समगुणं तु यत् ॥ १६ ॥ तदेव वृद्धये ज्ञेयं विपरीतं क्षयावहम् ॥ उपक्रमत्रयं प्रोक्तं देहेऽस्मिन्मनुजोत्तम ॥ १७ ॥ आहारो मैथुनं निद्रा तेषु यत्नः सदा भवेत् ॥ असेवनात्सेवनाच्च अत्यन्तं नाशमाप्नुयात् ॥ १८ ॥ क्षयस्य बृंहणं कार्य्यं स्थूलदेहस्य कर्षणम् ॥ रक्षणं मध्यकायस्य देहभेदास्त्रयो मताः ॥ १९ ॥ उपक्रमद्वयं प्रोक्तं तर्पणं वाप्यतर्पणम् ॥ हिताशी च मिताशी च जीर्णाशी च तथा भवेत् ॥ २० ॥ ओषधीनां पञ्चविधा तथा भवति कल्पना ॥ रसः कल्कः श्रृतः शीतः फाण्टश्च मनुजोत्तम ॥ २१ ॥ रसश्च पि को ज्ञेयः कल्क आलोडिताद्भवेत् ॥ क्वथितश्च श्रृतो ज्ञेयः शीतः पर्य्युषितो निशाम् ॥ २२ ॥ सद्योऽभिश्रृतपूतं यत्तत्फाण्टमभिधीयते ॥ कणानां शतं चैव षष्टिं चैवाधिका स्मृता ॥ २३ ॥ यो वेत्ति स ह्यजेयः स्यात्सम्यग्वैद्यो बाहुशौण्डिकः ॥ आहारशुद्धिरग्न्यर्थमग्निर्मूलं बलं नृणाम् ॥ २४ ॥ ससिन्धुत्रिफलां चाद्यात्सुद्युराज्याभिवर्णदाम् ॥ जाङ्गलं च रसं सिन्धुयुक्तं दधि पयः कणाम् ॥ २५ ॥ रसाधिकं समं कुर्य्यान्नरो वाताधिकोऽपि वा ॥ निदाघे मर्दनं प्रोक्तं शिशिरे च समं बहु ॥ २६ ॥ वसन्ते मध्यमं ज्ञेयं निदाघे मर्दनोत्क्वणम् ॥ त्वचं तु प्रथमं मद्यं मज्जां च तदनन्तरम् ॥२७॥ स्नायुरुधिरदेहेषु अस्थि चातीव मांसलम् ॥ स्कन्धौ बाहू तथैवेह तथा

जङ्घे सजानुनी ॥ २८ ॥ अरित्रन्मर्दयेत्प्राज्ञो जत्रु वक्षश्च पूर्ववत् ॥ अङ्गसन्धिषु सर्वेषु निष्पीडञ्च बहुलं तथा ॥ २९ ॥ प्रसारयेदङ्गसन्धीन्न च क्षेपेण चाक्रमात् ॥ नाजीर्णे तु श्रमं कुर्य्यान्न भुक्त्वा पीतवान्नरः ॥ ३० ॥ दिनस्य तु चतुर्भाग ऊर्ध्वं तु प्रहरार्द्धके ॥ व्यायामं नैव कर्तव्यं स्नानाच्छीताम्बुना सकृत् ॥ ३१ ॥ वार्य्युष्णं च श्रमं जह्याद्यदा श्वासं न धारयेत् ॥ व्यायामश्च कफं हन्याद्घातं हन्याच्च मर्दनम् ॥ ३२ ॥ स्नानं पित्ताधिकं हन्यात्तस्यान्ते चातपाः प्रियाः ॥ आतपक्लेशकर्मादौ क्षेमव्यायामिनो नराः ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेये रसादिलक्षणं नामैकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥ अथ वृक्षायुर्वेदः ॥ धन्वन्तरिरुवाच ॥ वृक्षायुर्वेदमाख्यास्ये पुष्पश्चोत्तरतः शुभः ॥ प्राग्वटो याम्यतस्त्वाम्र आप्येऽश्वत्थः क्रमेण तु ॥ १ ॥ दक्षिणां दिशमुत्पन्नाः समीपे कण्टकद्रुमाः ॥ उद्यानं गृहवासे स्यात्तिलान्वाप्यथ पुष्पितान् ॥ २ ॥ गृह्णीयाद्रोपयेद्वृक्षान्द्विजं चन्द्रं प्रपूज्य च ॥ ध्रुवाणि पञ्च वाय्यं हस्तं प्राजेशवैष्णवम् ॥ ३ ॥ नक्षत्राणि तथा मूलं शस्यन्ते द्रुमरोपणे ॥ प्रवेशयेन्नदीवाहान्पुष्करिण्यां तु कारयेत् ॥ ४ ॥ हस्तो मघा तथा मैत्रमाद्यं पुष्पं सवासवम् ॥ जलाशयसमारम्भे वारुणं चोत्तरात्रयम् ॥ ५ ॥ संपूज्य वरुणं विष्णुं पर्जन्यं तत्समाचरेत् ॥ अरिष्टाशोकपुन्नागशिरीषाः साप्रियङ्गवः ॥ ६ ॥ अशोकः कदली जम्बूस्तथा बकुलदाडिमाः ॥ सायं प्रातस्तु घर्मर्त्तौ शीतकाले दिनान्तरे ॥ ७ ॥ वर्षारात्रौ भुवः शोषे सेक्तव्या रोपिता द्रुमाः ॥ उत्तमा विंशतिर्हस्ता मध्यमाः षोडशान्तराः ॥ ८ ॥ स्थानात्स्थानान्तरं कार्य्यं वृक्षाणां द्वादशावरम् ॥ विफलाः स्युर्घना वृक्षाः शस्त्रेणादौ हि शोधनम् ॥ ९ ॥ विडङ्गघृतपङ्क्त्याक्तान्सेचयेच्छीतवारिणा ॥ फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः ॥ १० ॥ घृतशीतपयःसेकः फलपुष्पाय सर्वदा ॥ आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ॥ ११ ॥ गोमांसमुदकं चैव सप्तरात्रं निधापयेत् ॥ उत्सेकः सर्ववृक्षाणां फलपुष्पादिवृद्धिदः ॥ १२ ॥ मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ॥ विडङ्गतण्डुलोपेतं मात्स्यं मांसं हि दोहदम् ॥ सर्वेषामविशेषेण वृक्षाणां रोगमर्दनम् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये वृक्षायुर्वेदकथनं नाम द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ ॥ २८२ ॥ अथ नानारोगहराण्यौषधानि ॥ धन्वन्तरिरुवाच ॥ सिंही शटी निशायुग्मं वत्सकं क्वाथसेवनम् ॥ शिशोः सर्वातिसारेषु स्तन्यदोषेषु शस्यते ॥ १ ॥ शृङ्गी सकृष्णातिविषां चूर्णितां मधुना लिहेत् ॥ एका चातिविषा कासच्छर्दिज्वरहरी शिशोः ॥ २ ॥

बालेः सेव्या वचा साज्या सदुग्धा वाथ तैलयुक् ॥ यष्टिकां शंखपुष्पीं वा बालः क्षीरान्वितां पिबेत् ॥ ३ ॥ वाग्यूपैसम्पद्यु क्तायुर्मेधा श्रीर्वर्धते शिशोः ॥ वचा ह्यग्निशिखावासाशुण्ठीकृष्णानिशागदम् ॥ ४ ॥ सयष्टिसैन्धवं बालः प्रातर्मेधाकरं पिबेत् ॥ देवदारुग्रहाशिग्रु-फलत्रयपयोमुचाम् ॥ ५ ॥ क्काथः सकृष्णा मृद्वीका कल्कः सर्वान्कृमीन्हरेत् ॥ त्रिफलाभृङ्गविश्वानां रसेषु मधुसर्पिषोः ॥ ६ ॥ मेषी-क्षीरे च गोमूत्रे सिक्तं रोगे हितं शिशोः ॥ नासारक्तहरो नस्यादूर्वारस इहोत्तमः ॥ ७ ॥ लशुनार्द्रकशिग्रूणां रसः कर्णस्य पूरणम् ॥ तैलमार्द्रकजाद्यं वा शूलहा चौष्ठरोगनुत् ॥ ८ ॥ जातीपत्रं फलं व्योषं कवलं मूत्रकं निशा ॥ दुग्धक्काथेऽभयाकल्के सिद्धं तैलं द्विजार्त्तिनुत् ॥ ९ ॥ धान्याम्बु नारिकेलं गोमूत्रं क्रमुकविश्वयुत् ॥ क्काथितं कवलं कार्य्यं जिह्वाव्याधिप्रशान्तये ॥ १० ॥ साधितं लाङ्गलीकल्के तैलं निर्गुण्डिकारसैः ॥ गण्डमालागलगण्डौ नाशयेन्नस्यकर्मणा ॥ ११ ॥ पल्लवैरर्कपूतीकसुहीरुग्घातजातिकैः ॥ उद्व-र्त्तयेत्सगोमूत्रैः सर्वत्वग्दोषनाशनैः ॥ १२ ॥ वाकुची सतिला भुक्ता वत्सरात्कुष्ठनाशिनी ॥ पथ्या भल्लातकी तैलगुडपिण्डी तु कुष्ठ-जित् ॥ १३ ॥ यूथिकावह्निरजनी त्रिफलाव्योषचूर्णयुक् ॥ तक्रं गुदाङ्कुरे पेयं भक्ष्या वा सगुडाऽभया ॥ १४ ॥ फलदार्वीविषाणां तु क्काथो धात्रीरसोऽथ वा ॥ पातव्यो रजनीकल्कः क्षौद्राक्षौद्रप्रमेहिणा ॥ १५ ॥ वासागर्भो व्याधिघातक्काथ एरण्डतैलयुक् ॥ वातशोणि-तहृत्पानात्पिप्पली स्यात्प्लीहाहरी ॥ १६ ॥ सेव्या जठरिणा कृष्णा सुक्षीरबहुभाविता ॥ पयो वा रुच्यदन्त्याग्निविडङ्गव्योषकल्क-युक् ॥ १७ ॥ ग्रन्थिकोग्राभया कृष्णा विडङ्गाक्ता घृते स्थिता ॥ मांसं तक्रं ग्रहण्यर्शः पाण्डुगुल्मकृमीन्हरेत् ॥ १८ ॥ फलत्रयामृता वासा तिक्तभूनिम्बजस्तथा ॥ क्काथः समाक्षिको हन्यात्पाण्डुरोगं सकामलम् ॥ १९ ॥ रक्तपित्ती पिबेद्वासासुरसं सासितं मधु ॥ वरी-द्राक्षाबलाशुण्ठीसाधितं वा पयः पृथक् ॥ २० ॥ वरी विदारी पथ्या च बलात्रयं सवासकम् ॥ श्वदंष्ट्रा मधुसर्पिर्भ्यामालिहेत्क्षयरोगवान् ॥ २१ ॥ पथ्याशिग्रुकरञ्जार्कत्वक्सारं मधुसिन्धुमत् ॥ समूत्रं विद्रधिं हन्ति परिपाकाय तन्त्रजित् ॥ २२ ॥ त्रिवृता जीवती दन्ती माञ्जिष्ठा शर्वरीद्वयम् ॥ तार्क्ष्यजं निम्बपत्रं च लेपः शस्तो भगन्दरे ॥ २३ ॥ रूग्घातरजनीलाक्षाचूर्णाजक्षौद्रसंयुता ॥ वासोवर्त्तिर्व्रणे योज्या शोधिनी मतिनाशिनी ॥ २४ ॥ श्यामायष्टिनिशालोध्रपद्मकोत्पलचन्दनैः ॥ समरीचैः शृतं तैलं क्षीरे स्याद्व्रणरोहणम् ॥ २५ ॥

श्रीकार्पासदलेभंस्मफलोपलवणा निशा ॥ तत्पिण्डीस्वेदनं ताम्रे तत्तैलं स्यात्क्षतोषधम् ॥ २६ ॥ कुम्भीसारं पयोयुक्तं वह्निदग्धं व्रणे लिपेत् ॥ तदेव नाशयेत्सेकाच्चारिकेलरजोघृतम् ॥२७॥ विश्वाजमोदासिन्धूत्थचित्रात्वाग्भिः समाभया ॥ तक्रेणोष्णाम्बुना वाथ पीतातीसारनाशिनी ॥२८॥ वत्सकातिविषाविश्वबिल्वमुस्तश्रृतं जलम् ॥ सामे पुराणेऽतीसारे सासृक्छूले च पाययेत् ॥२९॥ अङ्गारदग्धं सुगतं सिन्धुमुष्णाम्बुना पिबेत् ॥ शूलवानथ वा तद्धि सिन्धुहिङ्गुकणाभया ॥ ३० ॥ कटुरोहोत्कणातङ्कलाजचूर्णं मधुप्लुतम् ॥ वस्त्रच्छिद्रगतं वक्त्रे न्यस्तं तृष्णां विनाशयेत् ॥३१॥ पाठादार्वीजातिदलं द्राक्षामूलफलत्रयैः ॥ साधितं समधुक्काथं कवलं मुखपाकहृत् ॥३२॥ कृष्णातिविषातिक्तेन्द्रदारुपाठापयोमुचाम् ॥ क्काथो मूत्रे श्रृतः क्षौद्रो सर्वकण्ठगदापहः ॥ ३३ ॥ पथ्यागोक्षुरदुस्पर्शराजवृक्षशिलाभिदाम् ॥ कषायः समधुः पीतो मूत्रकृच्छ्रं व्यपोहति ॥३४॥ वंशत्वग्वरुणक्काथः शर्कराश्मविघातनः ॥ शाखोटक्काथसक्षौद्रक्षीराशी श्लीपदी भवेत् ॥ ॥३५॥ माषार्कत्वक्पयस्तैलं मधुसिक्तं च सैन्धवम्॥पादरोगं हरेत्सर्पिर्जालकुक्कुटजं तथा॥३६॥ शुण्ठीसौवर्चलोहिङ्गुचूर्णं शुण्ठीरसेघृतम् ॥ रुजं हरेदथ क्काथो विद्धि बद्धाग्निसाधने ॥ ३७ ॥ सौवर्चलाग्निहिंगूनां सदीप्यानां रसैर्युतम् ॥ विडदीप्यकयुक्तं वा तक्रं गुल्मातुरः पिबेत् ॥३८॥ धात्रीपटोलमुद्गानां क्काथः साज्यो विसर्पहा॥ शुण्ठीदारुनवाक्षीरक्काथो मूत्रान्वितोऽपरः ॥३९॥ सव्योषायोरजः क्षारः फलक्काथश्च शोथहृत् ॥ गुडशिशुत्रिवृद्भिश्च सैन्धवानां रजोयुतः ॥ ४० ॥ त्रिवृताफलजः क्काथः सगुडः स्याद्विरेचनः ॥ वचाफलकषायोत्थं पयो वमनकृद्भवेत् ॥ ४१ ॥ त्रिफलायाः पलशतं पृथग्भृङ्गजभावितम् ॥ विडङ्गं लोहचूर्णं च दशभागसमन्वितम् ॥ ४२ ॥ शतावरीगुडूच्यग्निपलानां शत (पञ्च) विंशतिः ॥ मध्वाज्यतिलजैर्लिह्याद्वलीपलितवर्जितः ॥ ४३ ॥ शतमब्दं हि जीवेत सर्वरोगविवर्जितः ॥ त्रिफला सर्वरोगघ्नी समधुः शर्करान्विता ॥ ४४ ॥ सितामधुघृतैर्युक्ता सकृष्णा त्रिफला तथा ॥ पथ्याचित्रकशुण्ठ्यश्च गुडूचीमुशलीरजः ॥४५॥ सगुडं भक्षितं रोगहरं त्रिशतवर्षकृत् ॥ किञ्चिच्चूर्णं जवापुष्पं पिण्डितं विसृजेज्जले ॥ ४६ ॥ तैलं भवेद् घृताकारं किञ्चिच्चूर्णं जलान्वितम् ॥ धूपार्थं दृश्यते चित्रं वृषदंशजरायुना ॥ ४७ ॥ पुनर्माक्षिकधूपेन दृश्यते तद्यथापुरा ॥ कर्पूरजलकाभेकतैलं पाटलिमूलयुक् ॥ ४८ ॥ पिट्ठा लिप्य पदं द्वे च चरेदङ्गारके नरः ॥ तृणोत्थानादिकं व्यूह्य दर्शयन्वे कुतूहलम् ॥ ४९ ॥ विषग्रहरुजध्वंसक्षुद्रनर्म च

कामिकम् ॥ तत्ते षट्कर्मकं प्रोक्तं सिद्धिद्वयसमाश्रयम् ॥ ५० ॥ मन्त्रध्यानौषधिकथामुद्रेज्या यत्र मुष्टयः ॥ चतुर्वर्गफलं प्रोक्तं यः पठेत्स दिवं व्रजेत् ॥ ५१ ॥ इत्यादिमहापुराणे आग्नेये नानारोगहरौषधकथनं नाम त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥ अथ मन्त्ररूपौषधकथनम् ॥ धन्वन्तरिरुवाच ॥ आयुरारोग्यकर्त्तार ओंकाराद्याश्च नाकदाः ॥ ओंकारः परमो मन्त्रस्तं जप्त्वा चामरो भवेत् ॥ १ ॥ गायत्री परमो मन्त्रस्तं जप्त्वा भुक्तिमुक्तिभाक् ॥ ओं नमो नारायणाय मन्त्रः सर्वार्थसाधकः ॥ २ ॥ ओं नमो भगवते वासुदेवाय सर्वदः ॥ ओं ह्रूं नमो विष्णवे मन्त्रोऽयं चौषधं परम् ॥ ३ ॥ अनेन देवा ह्यसुराः साश्रियो निरुजोऽभवन् ॥ भूतानामुपकारश्च तथा धर्मो महौषधम् ॥ ४ ॥ धर्मः सद्धर्मकृद्धर्मी एतैर्धर्मैश्च निर्मलः ॥ श्रीदः श्रीशः श्रीनिवासः श्रीधरः श्रीनिकेतनः ॥ ५ ॥ श्रियः पतिः श्रीपरम एतैः श्रियमवाप्नुयात् ॥ कामी कामप्रदः कामः कमपालस्तथा हरिः ॥ ६ ॥ आनन्दो माधवश्चैव नाम कामाय वै हरेः ॥ रामः परशुरामश्च नृसिंहो विष्णुरेव च ॥ ७ ॥ त्रिविक्रमश्च नामानि जप्तव्यानि जिगीषुभिः ॥ विद्या त्वभ्यस्यतां नित्यं जप्तव्यः पुरुषोत्तमः ॥ ८ ॥ दामोदरो बन्धहरः पुष्कराक्षोऽक्षिरोगनुत् ॥ हृषीकेशो भयहरो जपेदोघकर्मणि ॥ ९ ॥ अच्युतं चामृतं मन्त्रं संग्रामे चापराजितः ॥ जलतारे नारसिंहं पूर्वादौ क्षेमकामवान् ॥ १० ॥ चक्रिणं गदिनं चैव शार्ङ्गिणं खड्गिनं स्मरेत् ॥ नारायणं सर्वकाले नृसिंहोऽखिलभीतिनुत् ॥ ११ ॥ गरुडध्वजश्च विषहृद्वासुदेवं सदा जपेत् ॥ धान्यादिस्थापने स्वप्ने ह्यनन्ताच्युतमीरयेत् ॥ १२ ॥ नारायणं च दुःस्वप्ने दाक्षादौ जलशायिनम् ॥ हयग्रीवं च विद्यार्थी जगत्सूतिं सुतार्तये ॥ बलभद्रं शौर्यकार्ये एकं नामार्थसाधकम् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये मन्त्ररूपौषधकथनं नाम चतुरशीत्यधिकद्विशततमोऽध्यायः ॥ २८४ ॥ अथ मृतसञ्जीवनीकरसिद्धयोगः ॥ धन्वन्तरिरुवाच ॥ सिद्धयोगान्पुनर्वक्ष्ये मृतसञ्जीवनीकरान् ॥ आत्रेयभाषितान्दिव्यान्सर्वव्याधिविमर्दनान् ॥ १ ॥ आत्रेय उवाच ॥ बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिके ज्वरे ॥ पावनं पिप्पलीमूलं गुडूची विश्वजोऽथ वा ॥ २ ॥ आमलक्यभया कृष्णा वह्निः सर्वज्वरान्तकः ॥ बिल्वाग्निमन्थश्योनाककाश्मर्य्यः पाटला स्थिरा ॥ ३ ॥ त्रिकण्टकं पृश्निपर्णी बृहतीकण्टकारिकाः ॥ ज्वरातिपाकपार्श्वार्तिकासघ्नः कुशमूलकम् ॥ ४ ॥ गुडूची पर्पटी मुस्तं किरातं विश्वभेषजम् ॥ वातपित्तज्वरे देयं पञ्चभद्रामिदं स्मृतम् ॥ ५ ॥ त्रिवृद्विशालाकटुकात्रि-

फलाग्रवेः कृतः ॥ संस्कारो भेदनः काश्यः पेयः सर्वज्वरापहः ॥ ६ ॥ देवदारुबलावासात्रिफलाव्योषपञ्चकैः ॥ सविडङ्गैः सितातुल्यं तच्चूर्णं पञ्चकासजित् ॥ ७ ॥ दशमूलीशटीरास्नापिप्पलीबिल्वपौष्करैः ॥ शृङ्गीतामलकीभार्ङ्गीगुडूचीनागवल्लिभिः ॥ ८ ॥ यवागूं विधिना सिद्धां कषायं वा पिबेन्नरः ॥ कासत्प्लीहहृणीपार्श्वहिक्काश्वासप्रशान्तये ॥ ९ ॥ मधुकं मधुना युक्तं पिप्पलीं शर्करान्विताम् ॥ नागरं गुडसंयुक्तं हिक्काघ्नं लवणत्रयम् ॥ १० ॥ कारव्यजाजिमरिचं द्राक्षा वृक्षाम्लदाडिमम् ॥ सौवर्चलं गुडं क्षौद्रं सर्वारोचननाशनम् ॥ ॥ ११ ॥ शृंगवेररसं चैव मधुना सह पाययेत् ॥ अरुचिश्वासकासघ्नं प्रतिश्यायकफान्तकम् ॥ १२ ॥ वटं शृंगीं शिलालोध्रदाडिमं मधुकं मधु ॥ पिबेत्तण्डुलतोयेन छर्दितृष्णानिवारणम् ॥ १३ ॥ गुडूचीवासकं लोध्रं पिप्पलीक्षौद्रसंयुतम् ॥ कफान्वितं जयेद्रक्तं तृष्णाकासज्वरापहम् ॥ १४ ॥ वासकस्य रसस्तद्वत्समधुस्ताम्रजो रसः ॥ शिरीषपुष्पस्वरसभावितं मरिचं हितम् ॥ १५ ॥ सर्वार्तिनुन्महासूरोऽयं पित्तमुक्ततण्डुलीयकम् ॥ निर्गुण्डी शारिवा शेलुरङ्कोलश्च विषापहः ॥ १६ ॥ महौषधामृताक्षुद्रापुष्करग्रंथिकोद्भवम् ॥ पिबेत्कणायुतं क्वाथं मूर्च्छायां च मदेषु च ॥ १७ ॥ हिङ्गुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकम् ॥ चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनम् ॥ ॥ १८ ॥ शङ्खपुष्पीवचाकुष्ठैः सिद्धं ब्राह्मीरसैर्युतम् ॥ पुराणं हन्त्यपस्मारं सोन्मादं मेध्यमुत्तमम् ॥ १९ ॥ पञ्चगव्यं घृतं तद्वत्कुष्ठनुच्चाभयायुतम् ॥ पटोलत्रिफलानिम्बगुडूचीधावनीवृषैः ॥ २० ॥ सकरञ्जैर्घृतं सिद्धं कुष्ठनुद्व्रणकं स्मृतम् ॥ निम्बं पटोलं व्याघ्री च गुडूची वासकं तथा ॥ २१ ॥ कुर्य्याद्दशपलान्भागानेकैकस्य सकुट्टितान् ॥ जलद्रोणे विपक्तव्यं यावत्पादावशेषितम् ॥ २२ ॥ घृतप्रस्थं पचेत्तेन त्रिफलागर्भसंयुतम् ॥ पञ्चतिक्तमिति ख्यातं सर्पिः कुष्ठविनाशनम् ॥ २३ ॥ अशीतिं वातजान्रोगांश्चत्वारिंशच्च पैत्तिकान् ॥ विंशतिं श्लैष्मिकान्कासपीनसाशोंव्रणादिकान् ॥ २४ ॥ हन्त्यन्यान्योगराजोऽयं यथार्कस्तिमिरं खलु ॥ त्रिफलायाः कषायेण भृङ्गराजरसेन च ॥ २५ ॥ व्रणप्रक्षालनं कुर्य्यादुपदंशप्रशान्तये ॥ पटोलदलचूर्णेन दाडिमत्वग्रजोऽथ वा ॥ २६ ॥ गुण्डयेच्च गजेनापि त्रिफलाचूर्णकेन च ॥ त्रिफलायोरजोयष्टिमार्कवोत्पलमारिचैः ॥ ॥ २७ ॥ सक्षौद्रैर्घृतैः पचेत्तैलमभ्यङ्गाच्छर्दिकापहम् ॥ सक्षीरान्मार्कवरसाद्द्विप्रस्थमधुकोत्पटैः ॥ २८ ॥ पचेत्तु तैलकुडवं तन्नस्यं पलि-

तापहम् ॥ निम्बं पटोलं त्रिफला गुडूची खदिरं वृषम् ॥ २९ ॥ भूनिम्बपाठात्रिफलागुडूचीरक्तचन्दनम् ॥ योगद्वयं ज्वरं हन्ति कुष्ठविस्फोटकादिकम् ॥ ३० ॥ पटोलामृतभूनिम्बवासारिष्टकपर्पटैः ॥ खदिरान्तयुतैः क्काथो विस्फोटज्वरशान्तिकृत् ॥ ३१ ॥ दशमूली छिन्नरुहा पथ्या दारु पुनर्नवा ॥ ज्वरविद्रधिशोथेषु शिग्रुविश्वजिता हिताः ॥ ३२ ॥ मधूकं निम्बपत्राणि लेपः स्याद्व्रणशोधनः ॥ त्रिफला खदिरो दार्वी न्यग्रोधादिबलाकुशाः ॥ ३३ ॥ निम्बमूलकपत्राणां कषायाः शोधने हिताः ॥ करञ्जारिष्टनिर्गुण्डीरसो हन्याद्व्रणकृमीन् ॥ ३४ ॥ घातकीचन्दनबलासमङ्गामधुकोत्पलैः ॥ दार्वीमेदोन्वितैर्लेपः ससर्पिर्व्रणरोपणः ॥ ३५ ॥ गुग्गुलुत्रिफलाव्योषसमांशैर्घृतयोगतः ॥ नाडीदुष्टव्रणं शूलं भगन्दरमुखं हरेत् ॥ ३६ ॥ हरितकीं मूत्रासिद्धां सतैलल्वणान्विताम् ॥ प्रातः प्रातश्च सेवेत कफवातामयापहाम् ॥ ३७ ॥ त्रिकटुत्रिफलाक्काथं सक्षारलवणं पिबेत् ॥ कफवातात्मकेष्वेव विरेकः कफवृद्धिनुत् ॥ ३८ ॥ पिप्पलीपिप्पलीमूलवचाचित्रकनागरैः ॥ क्काथितं वा पिबेत्पेयमामवातविनाशनम् ॥ ३९ ॥ रास्नां गुडूचीमेरण्डदेवदारुमहौषधम् ॥ पिबेत्सर्वाङ्गिके वाते सामे सन्ध्यस्थिमज्जगे ॥ ४० ॥ दशमूलकषायं वा पिबेद्वा नागराम्भसा ॥ शुण्ठीगोक्षुरकक्काथः प्रातः प्रातर्निषेवितः ॥ ४१ ॥ सामवातकटीशूलपाचनो रुक्प्रणाशनः ॥ समूलपत्रशाखायाः प्रसारण्याश्च तैलकम् ॥ ४२ ॥ गुडूच्याः सुरसः कल्कः चूर्णं वा क्काथमेव च ॥ प्रभूतकालमासेव्य मुच्यते वातशोणितात् ॥ ४३ ॥ पिप्पली वर्द्धमानं वा सेव्यं पथ्या गुडेन वा ॥ पटोलत्रिफलातीव्रकटुकामृतसाधितम् ॥ ४४ ॥ पक्वं पीत्वा जयत्याशु सदाहं वातशोणितम् ॥ गुग्गुलुं कोष्णशीते तु गुडूचीत्रिफलाम्भसा ॥ ४५ ॥ बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ॥ सहिङ्गुलवणैः पीतं सद्यो वातरुजापहम् ॥ ४६ ॥ कार्षिकं पिप्पलीमूलं पञ्चैव लवणानि च ॥ पिप्पली चित्रकं शुण्ठी त्रिफला त्रिवृता वचा ॥ ४७ ॥ द्वौ क्षारौ शाद्वला दन्ती स्वर्णक्षीरी विषाणिका ॥ कोलप्रमाणां गुटिकां पिबेत्सौवीरकायुताम् ॥ ४८ ॥ शोथावपाके त्रिवृता प्रवृद्धे चोदरादिके ॥ क्षीरं शोथहरं दारु वर्षाभूर्नागरैः शुभम् ॥ ४९ ॥ सेकस्तथार्कवर्षाभूनिम्बक्काथेन शोथजित् ॥ व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि ॥ ५० ॥ साधितं पिबतः सर्पिः पतत्यशौं न संशयः ॥ विष्वक्सेनान्जनिर्गुण्डीसाधितं चापि लवणम् ॥५१॥ विडंगानलसिन्धूत्थक्षाराग्र्यक्षारदारुभिः ॥ तैलं चतुर्गुणं सिद्धं कट्वम्लं जलेऽथ वा ॥५२॥ गण्ड-

मालापहं तैलमभ्यंगाद्वलाण्डनुत् ॥ शटीकुनागवलयकाथः क्षीररसे युतम् ॥५३॥ पयस्यापिप्पलीवासाकल्कं सिद्धं क्षये हितम् ॥ वचा-
विडभयाशुण्ठीहिङ्गुकुष्ठाग्निदीप्यकान् ॥ ५४ ॥ द्वित्रिषट्चतुरेकांशसप्तपञ्चाशिकाः क्रमात् ॥ चूर्णं पीतं हन्ति गुल्ममुदरं शूलकासनुत् ॥
॥ ५५ ॥ पाठानिकुम्भात्रिकटुत्रिफलाग्निषु साधितम् ॥ मूत्रेण चूर्णगुटिका गुल्मप्लीहादिमर्दनी ॥ ५६ ॥ वासानिम्बपटोलानि त्रिफला
वातपित्तनुत् ॥ लिह्यात्क्षौद्रेण विडङ्गचूर्णं कृमिविनाशनम् ॥ ५७ ॥ विडङ्गसैन्धवक्षारमूत्रेणापि हरीतकी ॥ वल्लकीबदरीजम्बूप्रियाला-
र्जुनत्वचः ॥ ५८ ॥ पीताः क्षीरेण मध्वक्ताः पृथक्छोणितवारणाः ॥ बिल्वाम्रधातकी पाठाशुण्ठीमोचरसाः समाः ॥ ५९ ॥ पीता रुन्ध-
न्त्यतीसारं गुडतक्रेण दुर्जयम् ॥ चाङ्गेरीकोलदध्यम्लुनागरक्षारसंयुतम् ॥ ६० ॥ घृतयुक्काथितं पेयं गुदभ्रंशरुजापहम् ॥ विडङ्गाति-
तिविषामुस्तदारुपाठाकलिङ्गकम् ॥ ६१ ॥ मरीचेन समायुक्तं शोथातीसारनाशनम् ॥ शर्करासिन्धुशुण्ठीभिः कृष्णामधुगुडेन वा ॥
॥ ६२ ॥ द्वे द्वे खादेद्धरीतक्यौ जीवेद्वर्षशतं सुखी ॥ त्रिफला पिप्पलीयुक्ता समध्वाज्या तथैव सा ॥ ६३ ॥ चूर्णमामलकं तेन सुरसेन तु
भावितम् ॥ मध्वाज्यशर्करायुक्तं लीढ्वा स्त्रीशः पयः पिबेत् ॥ ६४ ॥ माषपिप्पलिशालीनां यवगोधूमयोस्तथा ॥ चूर्णभागैः समांशैश्च
पचेत्पिप्पलिकां शुभाम् ॥ ६५ ॥ तां भक्षयित्वा च पिबेच्छर्करामधुरं पयः ॥ नवश्चटकवद्गच्छेद्दश वारान्स्त्रियं ध्रुवम् ॥ ६६ ॥ सम-
ङ्गाधातकीपुष्पलोध्रनीलोत्पलानि च ॥ एतत्क्षीरेण दातव्यं स्त्रीणां प्रदरनाशनम् ॥ ६७ ॥ बीजं कोरण्टकं चापि मधुकं श्वेतचन्दनम् ॥
पद्मोत्पलस्य मूलानि मधुकं शर्करं तिलान् ॥ ६८ ॥ द्रवमाणेषु गर्भेषु गर्भस्थापनमुत्तमम् ॥ देवदारु नभः कुष्ठं नलदं विश्वभेषजम् ॥
॥ ६९ ॥ लेपः काञ्जिकसम्पिष्टस्तैलयुक्तः शिरोर्त्तिनुत् ॥ ॥ वस्त्रपूतं क्षिपेत्कोष्णं सिन्धूत्थं कर्णशूलनुत् ॥ ७० ॥ लशुनार्द्रकशिग्रूणां
कदल्या वा रसः पृथक् ॥ बलाशतावरीरास्नामृताः सैरीयकैः पिबेत् ॥ ७१ ॥ त्रिफलासहितं सर्पिस्तिमिरघ्नमनुत्तमम् ॥ त्रिफलाव्यो-
षसिन्धूत्थैर्घृतं सिद्धं पिबेन्नरः ॥ ७२ ॥ चाक्षुष्यं भेदनं हृद्यं दीपनं कफरोगनुत् ॥ नीलोत्पलस्य किञ्जल्कं गोरक्तुद्दससंयुतम् ॥ ७३ ॥
गुटिकाञ्जनमेतत्स्यादिनरात्र्यन्धयोर्हितम् ॥ यष्टीमधुवचाकृष्णाबीजानां कुटजस्य च ॥ ७४ ॥ कल्केनालोड्य निम्बस्य कषायो वम-
नाय सः ॥ स्निग्धस्त्रिव्रयवं तोयं प्रदातव्यं विरेचनम् ॥ ७५ ॥ अन्यथा योजितं कुर्य्यान्मन्दाग्निं गौरवारुचिं ॥ पथ्यासैन्धवकृष्णानां

चूर्णमुष्णाम्बुना पिबेत् ॥ ७६ ॥ विरेकः सर्वरोगघ्नः श्रेष्ठो नाराचसंज्ञकः ॥ सिद्धयोगा मुनिभ्यो ये आत्रेयेण प्रदर्शिताः ॥ सर्वरोगहराः सर्वयोगाढ्याः सुश्रुतेन हि ॥७७॥ इत्यादिमहापुराणे आग्नेये मृतसंजीवनकरसिद्धयोगो नाम पंचाशीत्यधिकद्विशततमोऽध्यायः ॥२८५॥

पुराण
अ॰२८६

अथ मृत्युञ्जयकल्पाः ॥ धन्वन्तरिरुवाच ॥ कल्पान्मृत्युञ्जयान्वक्ष्ये ह्यायुर्दान्रोगमर्दनान् ॥ त्रिशती रोगहा सेव्या मध्वाज्यत्रिफलामृता ॥१॥ पलं पलार्द्धं कर्षं वा त्रिफलां सकलीं (लां) तथा ॥ बिल्वतैलस्य नस्यं च मासं पञ्चशती कविः ॥ २ ॥ रोगापमृत्युबलिजित्तिलं भल्लातकं तथा ॥ पञ्चांगं वाकुचीचूर्णं षण्मासं खदिरोदकैः ॥३॥ क्वाथैः कुष्ठं जयेत्सेव्यं चूर्णं नीलरुरुष्टजम् ॥ क्षीरेण मधुना वापि शतायुः खण्डदुग्धभुक् ॥४॥ मध्वाज्यशुण्ठीं संसेव्य पलं प्रातः स मृत्युजित् ॥ वलीपलितनिर्जीवेन्माण्डकीचूर्णदुग्धपाः ॥५॥ उच्चटा मधुना कर्षं पयःपा मृत्युजिन्नरः ॥ मध्वाज्यैः पयसा वापि निर्गुण्डी रोगमृत्युजित् ॥६॥ पलाशतैलं कर्षैकं षण्मासं मधुना पिबेत् ॥ दुग्धभोजी पञ्चशती सहस्रायुर्भवेन्नरः ॥ ७ ॥ ज्योतिष्मतीपत्ररसं पयसा त्रिफलां पिबेत् ॥ मधुनाज्यं ततस्तद्वच्छतावर्य्या रजः पलम् ॥ ८ ॥ क्षौद्राज्यैः पयसा वापि निर्गुण्डी रोगमृत्युजित् ॥ पञ्चाङ्गं निम्बचूर्णस्य खादिरक्वाथभावितम् ॥ ९ ॥ कर्षं भृङ्गरसेनापि रोगजिच्चामरो भवेत् ॥ रुदन्तिकाज्यमधुभुग्दुग्धभोजी च मृत्युजित् ॥ १० ॥ कर्षचूर्णं हरीतक्या भावितं भृङ्गराड्रसैः ॥ घृतेन मधुनाऽसेव्य त्रिशतायुश्च रोगजित् ॥ ११ ॥ वाराहिका भृङ्गरसं लोहचूर्णं शतावरी ॥ साज्यं कर्षं पञ्चशती कार्त्तचूर्णं शतावरी ॥ १२ ॥ भावितं भृङ्गराजेन मध्वाज्यं त्रिशती भवेत् ॥ आम्रामृता त्रिवृत्तुल्यं गन्धकं च कुमारिका ॥ १३ ॥ रसौर्विमृज्य द्वे गुञ्जे साज्यं पञ्चशताब्दवान् ॥ अश्वगन्धा पलं तैलं साज्यं खण्डं शताब्दवान् ॥ १४ ॥ पलं पुनर्नवाचूर्णं मध्वाज्यपयसा पिबन् ॥ अशाकचूर्णस्य पलं मध्वाज्यं पयसार्त्तिनुत् ॥ १५ ॥ तिलस्य तैलं समधु नस्यात्कृष्णकचः शती ॥ कर्षमक्षं समध्वाज्यं शतायुः पयसा पिबन् ॥ १६ ॥ अभयां सगुडां जग्ध्वा घृतेन मधुरादिभिः ॥ दुग्धान्नभुक्कृष्णकेशोऽरोगी पञ्चशताब्दवान् ॥ १७ ॥ पलं कूष्माण्डिकाचूर्णं मध्वाज्यपयसा पिबन् ॥ मासं दुग्धान्नभोजी च सहस्रायुर्विरोगवान् ॥ १८ ॥ शालूकचूर्णं भृङ्गाज्यं समध्वाज्यं शताब्दकृत् ॥ कटुतुम्बीतैलनस्यं कर्षं शतद्वयाब्दवान् ॥ १९ ॥ त्रिफला पिप्पली शुण्ठी सेविता त्रिशताब्दकृत् ॥ शतावर्य्याः पूर्वयोगः सहस्रायुर्बलातिकृत् ॥ २० ॥ चित्रकेण

॥१२५॥

तथा पूर्वस्तथा शुण्ठीविडङ्गतः ॥ लोहेन भृंगराजेन वलयानिम्बपञ्चकैः ॥ २१ ॥ खदिरेण च निर्गुण्ड्या कण्टकार्य्याथ वासकात् ॥ वर्षाभुवा तद्रसैर्वा भावितो वटिकाकृतः ॥ २२ ॥ चूर्णं घृतैर्वा मधुना गुडाद्यैर्वारिणा तथा ॥ ओं ह्रूं स इति मन्त्रेण मन्त्रितो योगराजकः ॥ २३ ॥ मृतसञ्जीवनीकल्पो रोगमृत्युभयो भवेत् ॥ सुरासुरैश्च मुनिभिः सेविताः कल्पसागराः ॥ गजायुर्वेदं प्रोवाच पालकाप्योऽङ्गराजकम् ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये मृत्युञ्जयकल्पो नाम षडशीत्यधिकद्विशततमोऽध्यायः ॥ २८६ ॥ अथ गजचिकित्सा ॥ पालकाप्य उवाच ॥ गजलक्ष्म चिकित्सां च लोमपाद वदामि ते ॥ दीर्घहस्ता महोच्छ्वासाः प्रशस्तास्ते सहिष्णवः ॥ १ ॥ विंशत्यष्टादश नखाः शीतकालमदाश्च ये ॥ दक्षिणश्चोन्नतो दन्तो बृंहितं जलदोपमम् ॥ २ ॥ कर्णौ च विपुलौ येषां सूक्ष्मबिन्द्वन्वितास्त्वचि ॥ ते धार्य्या न तथा धार्या वामना ये त्वलक्षणाः ॥ ३ ॥ हस्तिन्यः पार्श्वगर्भिण्यो ये च मूढा मतङ्गजाः ॥ वर्णं सत्त्वं बलं रूपं कान्तिः संहननं जवः ॥४॥ सप्तस्थितो गजश्चेद्धसंग्रामेऽरिञ्जयेत्स च ॥ कुञ्जराः परमा शोभा शिबिरस्य बलस्य च ॥५॥ आहतः कुञ्जरैश्चेत्र विजयः पृथिवीक्षिता ॥ पाकलेषु च सर्वेषु कर्त्तव्यमनुवासनम् ॥ ६ ॥ घृततैलाभ्यङ्गयुक्तस्नानं वातविवर्जितम् ॥ स्कन्धेषु च क्रिया कार्य्या तथा पालकवन्नृपैः ॥ ७ ॥ गोमूत्रं पाण्डुरोगेषु रजनीभ्यां घृतं द्विज ॥ आनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते ॥ ॥ ८ ॥ लवणैः पञ्चभिर्मिश्रा प्रतिपानाय वारुणी ॥ विडङ्गत्रिफलाव्योषसैन्धवैः कवलान्कृतान् ॥ ९ ॥ मूर्च्छासु भोजयेन्नागं क्षौद्रं तोयं च पाययेत् ॥ अभ्यङ्गः शिरसः शूले नस्यं चैव प्रशस्यते ॥ १०॥ नागानां स्नेहपुटकैः पादरोगानुपक्रमेत् ॥ पश्चात्कल्ककषायेण शोधनं च विधीयते ॥ ११ ॥ शिखितित्तिरिलावानां पिप्पलीमरिचान्वितैः ॥ रसैः सम्भोजयेन्नागं वेपथुर्यस्य जायते ॥ १२ ॥ बालबिल्वं तथा लोध्रं धातकी सितया सह ॥ अतीसारविनाशाय पिण्डीं भुञ्जीत कुञ्जरः ॥ १३ ॥ नस्यं करग्रहे देयं घृतं लवणसंयुतम् ॥ मागधीनागराजाजीयवागूर्मुस्तसाधिता ॥ १४ ॥ उत्कर्णके तु दातव्या वाराहं च तथा रसम् ॥ दशमूलकुलत्थाम्लकाकमाचीविपाचितम् ॥ ॥ १५ ॥ तैलं शृंखलसंयुक्तं मलग्रहमदापहम् ॥ अष्टभिर्लवणैः पिष्टैः प्रसन्नाः पाययेद् घृतम् ॥ १६ ॥ मूत्रभङ्गेऽथ वा बीजं कथितं ग्राम्यशूकरस्य च ॥ त्वग्दोषेषु पिबेन्निम्बं वृषं वा कथितं द्विपः ॥ १७ ॥ गवां मूत्रं विडंगानि कृमिकोष्ठेषु शस्यते ॥ शृंगवेरकणाद्राक्षाश-

करांभिः श्रृतं पयः ॥ १८ ॥ क्षतक्षयकरं पानं तथा मांसरसः शुभः ॥ मुद्गोदनं व्योषयुतमरुचौ तु प्रशस्यते ॥ १९ ॥ त्रिवृद्व्योषाग्नि-
दन्त्यर्कश्यामाक्षीरेभपिप्पली ॥ एतैर्गुल्महरः स्नेहः कृतश्चैव तथापरः ॥ २० ॥ भेदनद्रावणाभ्यंगस्नेहपानानुवासनैः ॥ सर्वानेव समु-
त्पन्नान्विद्रधीन्समुपाहरेत् ॥ २१ ॥ यष्टिकं मुद्गयूषेण शाल्योदनं तथा पिबेत् ॥ बालबिल्वैस्तथा लेपः कटीरोगेषु शस्यते ॥ २२ ॥
विडंगेन्द्रयवौ हिङ्गु सरलं रजनीद्वयम् ॥ पूर्णाहे दापयेत्पिण्डान्सर्वशूलोपशान्तये ॥ २३ ॥ प्रवाहभोजने तेषां यष्टिकत्रीहिशालयः ॥
मध्यमो यवगोधूमौ शेषा दन्तिनि चाधमाः ॥ २४ ॥ यवश्चैव तथेक्षुर्नागानां बलवर्धनः ॥ नागानां यवसं शुष्कं तथा धातुप्रकोपनम् ॥
॥ २५ ॥ मदक्षीणस्य नागस्य पयःपानं प्रशस्यते ॥ दीपनीयैस्तथा द्रव्यैः श्रृतो मांसरसः शुभः ॥ २६ ॥ वायसः, कुक्कुरश्चोभौ काको-
लूककुलं हरिः ॥ भवेत्क्षौद्रेण संयुक्तः पिण्डो युद्धे महापदि ॥ २७ ॥ कटुमत्स्यविडंगानि क्षारः कोपातकीपयः ॥ हरिद्रा चेति धूपोऽयं
कुञ्जरस्य जयावहः ॥ २८ ॥ पिप्पलीतण्डुलास्तैलं माक्षीकं माक्षिकं तथा ॥ नेत्रयोः परिषेकोयं दीपनीयः प्रशस्यते ॥ २९ ॥
पुरीषं चटकायाश्च तथा पारावतस्य च ॥ क्षीरवृक्षकरीषाश्च प्रसन्नाचेष्टमञ्जनम् ॥ ३० ॥ अनेनाञ्जितनेत्रस्तु करोति कदनं रणे ॥
उत्पलानि च नीलानि मुस्तं तगरमेव च ॥ ३१ ॥ तण्डुलोदकपिष्टानि नेत्रनिर्वापणं परम् ॥ नखवृद्धौ नखच्छेदस्तैलसेकश्च मास्यपि
॥ ३२ ॥ शय्यास्थानं भवेच्चास्य करीषैः पांसुभिस्तथा ॥ शरन्निदाघयोः सेकः सर्पिषा च तथेष्यते ॥ ३३ ॥ इत्यादिमहापुराणे
आग्नेये गजचिकित्सा नाम सप्ताशीत्यधिकद्विशततमोऽध्यायः ॥ २८७ ॥ अथाश्ववाहनसारः ॥ धन्वन्तरिरुवाच ॥
अश्ववाहनसारं च वक्ष्ये चाश्वचिकित्सनम् ॥ वाजिनां संग्रहः कार्यो धर्मकर्मार्थसिद्धये ॥ १ ॥ आश्विनी श्रवणं
हस्तमुत्तराश्रियं तथा ॥ नक्षत्राणि प्रशस्तानि हयानामादिवाहने ॥ २ ॥ हेमन्तः शिशिरश्चैव वसन्तश्चाश्ववाहने ॥ ग्रीष्मे
शरदि वर्षासु निषिद्धं वाहनं हये ॥ ३ ॥ तीव्रेण च परेदण्डेरदेशे न च ताडयेत् ॥ कीलास्थिसंकुले चैव विषमे कण्टकान्विते ॥ ४ ॥
वालुकापङ्कसंछन्ने गर्त्तागर्त्तप्रदूषिते ॥ अचित्तज्ञो विनोपायैर्वाहनं कुरुते तु यः ॥ ५ ॥ स वाह्यते हयेनैव पृष्ठस्थः कटिकां विना ॥ छन्दं
विज्ञाप्येत्कोऽपि सुकृती धीमतां वरः ॥ ६ ॥ अभ्यासादभियोगाच्च विना शास्त्रं स्ववाहकः ॥ स्नातस्य प्राङ्मुखस्याथ देवान्पुषि योज-

येत् ॥ ७ ॥ प्रणवादिनमोऽन्तेन स्वबीजेन यथाक्रमम् ॥ ब्रह्मा चित्ते बले विष्णुर्वैनतेयः पराक्रमे ॥८॥ पार्श्वे रुद्रा गुरुबुद्धौ विश्वेदेवाश्च मर्मसु ॥ हनावर्त्ते हृषीन्द्रकौ कर्णयोरश्विनौ तथा ॥९ ॥ जठरेऽग्निः स्वधा स्वेदे वाग्जिह्वायां जवेऽनिलः ॥ पृष्ठतो नाकपृष्ठस्तु खुराग्रे सर्वपर्वताः ॥१०॥ ताराश्च रोमकूपेषु हृदि चान्द्रमसी कला ॥ तेजस्यग्नी रतिः श्रोण्यां ललाटे च जगत्पतिः ॥ ११॥ ग्रहाश्च दोषिते चैव तथैवारोसि वासुकिः ॥ उपोषितोऽर्चयेत्सादी इयं दक्षश्रुतौ जपेत् ॥१२॥ इय गन्धर्वराजस्त्वं शृणुष्व वचनं मम ॥ गन्धर्वकुलजातस्त्वं मा भूस्त्वं कुलदूषकः ॥१३॥ द्विजानां सत्यवाक्येन सोमस्य गरुडस्य च ॥ रुद्रस्य वरुणस्येव पवनस्य बलेन च ॥१४॥ हुताशनस्य दीप्त्या च स्मर जातिं तुरङ्गमं ॥ स्मर राजेन्द्रपुत्रस्त्वं सत्यवाक्यमनुस्मर ॥१५॥ स्मर त्वं वारुणीं कन्यां स्मरत्वं कौस्तुभं माणिम् ॥ क्षीरोदसागरे चैव मथ्यमाने सुरासुरैः ॥१६॥ तत्र देवकुले जातः स्ववाक्यं परिपालय ॥ कुले जातस्त्वमश्वानां मित्रं मे भव शाश्वतम्॥१७॥ शृणु मित्र त्वमेतच्च सिद्धो मे भव वाहन ॥ विजयं रक्ष मां चैव समरे सिद्धिमावह ॥ १८ ॥ तव पृष्ठं समारुह्य हता दैत्याः सुरैः पुरा ॥ अधुना त्वां समारुह्य जेष्यामि रिपुवाहिनीम् ॥ १९ ॥ कर्णजापं ततः कृत्वा विमुह्य च तथाप्यरीन् ॥ पर्य्यानयेद्धयं सादी वाहयेद्युध्यतो जयः ॥ २० ॥ सजाताः स्वशरीरेण दोषाः प्रायेन वाजिनाम् ॥ हन्यन्तेऽतिप्रयत्नेन गुणाः सादिवरैः पुनः ॥ २१ ॥ सहजा इव दृश्यन्ते गुणाः सादिवरोद्भवाः ॥ नाशयन्ति गुणानन्ये सादिनः सहजानपि ॥२२॥ गुणानेको विजानाति वेत्ति दोषांस्तथाऽपरः ॥ धन्यो धीमान्हयं वेत्ति नोभयं वेत्ति मन्दधीः ॥ २३ ॥ अकर्मज्ञोऽनुपायज्ञो वेगासक्तोऽतिकोपनः ॥ घनदण्डरतिच्छिद्रे य समोऽपि न शस्यते ॥ २४ ॥ उपायज्ञोऽथ चित्तज्ञो विशुद्धो दोषनाशनः ॥ गुणार्जनपरो नित्यं सर्वकर्मविशारदः ॥ २५ ॥ प्रग्रहेण गृहीत्वाऽथ प्राविष्टो वाह भूतलम् ॥ सव्यापसव्यभेदेन वाहनीयः स्वसादिना ॥ २६ ॥ आरुह्य सहसा नैव ताडनीयो हयोत्तमः ॥ ताडनाद्भयमाप्नोति भयान्मोहश्च जायते ॥ २७ ॥ प्रातः सादी प्लुतेनैव वल्गामुद्धत्य चालयेत् ॥ मन्दं मन्दं विना नालं धृतवल्गो दिनान्तरे ॥ २८ ॥ प्रोक्तमाश्वासनं सामभेदोऽश्वेन नियोज्यते ॥ कशादिताडनं दण्डो दानं कालसहिष्णुता ॥ २९ ॥ पूर्वपूर्वविशुद्धौ तु विद्यादुत्तरोत्तरम् ॥ जिह्वातले विनायोगं विद्याद्वाहने हये ॥ ३० ॥ गुणोत्तरशतां वल्गां सूक्ष्मण्या सह गाहयेत् ॥ विस्मार्य्य वाहनं कुर्य्याच्छिथिलानां शनैः शनैः ॥ ३१ ॥

हयजिह्वाङ्गमादीने जिह्वाग्रन्थिं विमोचयेत् ॥ गाढतां मोचयेत्तावद्यावत्स्तोभं न मुञ्चति ॥ ३२ ॥ कुर्य्याच्छतमुरस्त्राणमविलालं च मुञ्चति ॥ ऊर्ध्वाननः स्वभावाद्यस्तस्योरस्त्राणमुच्यते ॥ ३३ ॥ विधाय वाहयेद्दृष्ट्या लीलया सादिसत्तमः ॥ तस्य सव्येन पूर्वेण संयुक्तं सव्यवल्गया ॥ ३४ ॥ यः कुर्य्यात्पश्चिमं पादं गृहीतस्तेन दक्षिणः ॥ क्रमेणानेन यो सेवां कुरुते वामवल्गया ॥ ३५ ॥ पादो तेनापि पादः स्याद्गृहीतो वाम एव हि ॥ अग्रे चेच्चरणे त्यक्ते जायते सदृढासनम् ॥ ३६ ॥ यौ हतौ दुष्करे चैव मोटके नाटकायनम् ॥ सव्यहीनं खलीकारो हनने गुणने तथा ॥ ३७ ॥ स्वभावं हि तुरङ्गस्य मुखव्यावर्त्तनं पुनः ॥ न चैवेत्थं तुरङ्गाणां पादग्रहणहेतवः ॥ ३८ ॥ विश्वस्तं हयमालोक्य गाढमापीड्य चासनम् ॥ रोकयित्वा मुखे पादं ग्राह्यतो लोकनं हितम् ॥ ३९ ॥ गाढमापीड्य रागाभ्यां वल्गामाकृष्य गृह्यते ॥ तद्बन्धनाद्युग्मपादं तद्बद्धलगनमुच्यते ॥ ४० ॥ संयोज्य वल्गया पादान्वल्गामामोक्ष्य वाञ्छितम् ॥ वाह्यपार्ष्णिप्रयोगात्तु यत्र तन्मोटनं मतम् ॥ ४१ ॥ प्रलयाविप्लवे ज्ञात्वा क्रमेणानेन बुद्धिमान् ॥ मोटनेन चतुर्थेन विधिरेष विधीयते ॥ ४२ ॥ नाधतेऽधश्च यः पादं योऽश्वो लघुनि मण्डले ॥ मोटनोद्बन्धनाभ्यां तु ग्राहयेत्पादमीशितम् ॥ ४३ ॥ वंटयित्वासने गाढं मन्दमादाय यो व्रजेत् ॥ ग्राह्यते संग्रहाद्यत्र तत्संग्रहणमुच्यते ॥ ४४ ॥ हत्वा पार्श्वे प्रहारेण स्थानस्थो व्यग्रमानसम् ॥ वल्गमाकृष्य पादेन ग्राह्य कण्टकपायनम् ॥ ४५ ॥ उल्केणा (ना) योऽङ्घ्रिणानेन पार्ष्णिपादांस्तुरङ्गमः ॥ गृहते यत्खलीकृत्य खलीकारः स चेष्यते ॥ ४६ ॥ गतित्रये प्रियः पादमादत्ते नैव वाञ्छितः ॥ हत्वा तु यत्र दण्डेन ग्राह्यते गहनं हि तत् ॥ ४७ ॥ खलीकृत्य चतुष्केण तुरंगो वल्गयान्यया ॥ उच्छास्य ग्राह्यतेऽन्यत्र तत्स्यादुच्छासनं पुनः ॥ ४८ ॥ स्वभावं बहिरस्यन्तं तस्यां दिशि पदायनम् ॥ नियोज्य ग्राह्यतेतत्तु मुखव्यावर्त्तनं मतम् ॥ ४९ ॥ ग्राहयित्वा ततः पादं त्रिविधासु यथाक्रमम् ॥ साधयेत्पंचधारासु क्रमशो मण्डलादिषु ॥ ५० ॥ आजानूर्द्धाननं वाहं शिथिलं वाहयेत्सुधीः ॥ अङ्गेषु लाघवं यावत्तावत्तं वाहयेद्धयम् ॥ ५१ ॥ मृदुः स्कन्धे लघुर्वक्रे शिथिलः सर्वसन्धिषु ॥ यदा स सादिनो वश्यः संगृह्णीयात्तदा हयम् ॥ ५२ ॥ न त्यजेत्पश्चिमं पादं यदा साधुर्भवेत्तदा ॥ तदाकृष्टिर्विधातव्या पाणिभ्यामिह वल्गया ॥ ५३ ॥ तत्र त्रिको यथा तिष्ठेदृद्धिकोऽश्वः समाननः ॥ धरायां पश्चिमौ पादावन्तरिक्षे यदाश्रयौ ॥ ५४ ॥ तदा सन्धारणं

कुर्य्याद्वाढवादं च मुष्टिना ॥ सदैवं समाकृष्टो यस्तुरङ्गो न सिध्यति ॥ ५५ ॥ शरीरं निक्षिपन्तं च साधयेन्मण्डलभ्रमैः ॥ क्षिपेत्स्कन्धं च यो वाहः स च स्थाप्यो हि वल्गया ॥ ५६ ॥ गोमयं लवणं मूत्रं क्वथितं मृत्समन्वितम् ॥ अङ्गलेपो मक्षिकादिदंशश्रमविनाशनः ॥ ५७ ॥ मध्ये भद्रादिजातीनां मण्डो देयो हि सादिना ॥ दंशनं सूक्ष्मकीटस्य निरुत्साहः क्षुधा हयः ॥ ५८ ॥ यथा वश्यस्तथा शिक्षा विनश्यन्त्यतिवाहिताः ॥ अवाहिता न सिध्यन्ति तुङ्गवक्रांश्च वाहयेत् ॥ ५९ ॥ सम्पीडय जानुयुग्मेन स्थिरमुष्टिस्तुरङ्गमम् ॥ गोमूत्रा कुटिला वेणी पद्ममण्डलमालिका ॥ ६० ॥ पञ्चोलूखलिकाः कार्य्या गर्वितास्ते हि कीर्तिताः ॥ संक्षिप्तं चैव विक्षिप्तं कुञ्चितं च यथाचितम् ॥ ६१ ॥ वल्गितावल्गितौ चैव पोढा चेत्यमुदाहृतम् ॥ वीथीधनुःशतं यावदशीतिर्नवतिस्तथा ॥ ६२ ॥ भद्रः प्रसादो वाजी स्यान्मन्दो दण्डैकमानतः ॥ मृगजङ्घे मृगो वाजी सङ्कीर्णस्तत्समन्वयात् ॥६३॥ शर्करामधुलाजादैः सुगन्धोऽश्वः शुचिर्द्विजः ॥ तेजस्वी क्षत्रियश्चाश्वो विनीतो बुद्धिमांश्च यः ॥ ६४ ॥ शूद्रोऽशुचिश्चलो मन्दो विरूपो विमतिः खलः ॥ वल्गया धार्य्यमाणोऽश्वो लालकं यश्च दर्शयेत् ॥ ६५ ॥ धारासु योजनीयोऽसौ प्रग्रहग्रहमोक्षगैः ॥ अश्वादिलक्षणं वक्ष्ये शालिहोत्रो यथाऽब्रवीत् ॥ ६६ ॥ इत्यादिमहापुराणे आग्नेये अश्वबाहनसारवर्णनं नामाऽष्टाशीत्यधिकद्विशततमोऽध्यायः ॥२८८॥ अथाश्वलक्षणाधिकृतकम् ॥ शालिहोत्र उवाच ॥ अश्वानां लक्षणं वक्ष्ये चिकित्सां चैव सुश्रुत ॥ हीनदन्तो विदन्तश्च कसलः कृष्णतालुकः ॥ १ ॥ कृष्णजिह्वश्च यमजोऽजातमुष्कश्च यस्तथा ॥ द्विशफश्चतथा शृङ्गी त्रिवर्णो व्याघ्रवर्णकः ॥ २ ॥ खरवर्णो भस्मवर्णो जातवर्णश्च काकुदी ॥ श्वित्री च काकसादी च खरसारस्तथैव च ॥ ३ ॥ वानराक्षः कृष्णसटः कृष्णगुह्यस्तथैव च ॥ कृष्णप्रोथश्च शूकश्च यश्च तित्तिरिसन्निभः ॥ ४ ॥ विषमः श्वेतपादश्च ध्रुवावर्त्तविवर्जितः ॥ अशुभावर्त्तसंयुक्तो वर्जनीयस्तुरङ्गमः ॥ ५ ॥ रन्ध्रोपरन्ध्रयोर्द्वौ द्वौ द्वौ द्वौ मस्तकवक्षसोः ॥ प्रायेण च ललाटे च कण्ठावर्त्ताः शुभा दश ॥ ६ ॥ सृक्कण्यां च ललाटे च कर्णमूले निगालके ॥ बाहुमूले गले श्रेष्ठा आवर्त्तास्त्वशुभाः परे ॥ ७ ॥ शुकेन्द्रगोपचन्द्राभा ये च वायससन्निभाः ॥ सुवर्णवर्णाः स्निग्धाश्च प्रशस्यास्तु सदैव हि ॥ ८ ॥ दीर्घग्रीवाशिरस्कश्च ह्रस्वकर्णाश्च शोभनाः ॥ राज्ञां तुरङ्गमा यत्र विजयं वर्जयेत्ततः ॥ ९ ॥ पालितस्तु हयो दन्ती शुभदो दुःखदोऽन्यथा ॥

श्रियः पुत्रास्तु गन्धर्वा वाजिनो रत्नमुत्तमम् ॥ १० ॥ अश्वमेधे तु तुरगः पवित्रत्वात्तु हूयते ॥ वृषो निम्बबृहत्यौ च गुडूची च समा-
क्षिका ॥ ११ ॥ सिंहा गन्धकरी पिण्डी स्वेदश्च शिरसस्तथा ॥ हिङ्गुपुष्करमूलं च नागरं साम्लवेतसम् ॥ १२ ॥ पिप्पलीसैन्धवयुतं
शूलघ्नं चोष्णवारिणा ॥ नागरातिविषामुस्ता सानन्ता बिल्वमालिका ॥ १३ ॥ क्वाथमेषां पिबेद्राजौ सर्वातीसारनाशनम् ॥ प्रियङ्गु-
सारिवाभ्यां च युक्तमाजं शृतं पयः ॥ १४ ॥ पर्य्युषितशर्करं पीत्वा श्रमाद्वाजी विमुच्यते ॥ द्रोणिकायां तु दातव्या तैलबस्तिस्तुरङ्गमे
॥ १५ ॥ कोष्ठजा च शिरा वेध्या तेन तस्य सुखं भवेत् ॥ दाडिमं त्रिफला व्योषं गुडं च समभाविकम् ॥ १६ ॥ पिण्डमेतत्प्रदात-
व्यमश्वानां कासनाशनम् ॥ प्रियङ्गुलोध्रमधुभिः पिबेद्वृषरसं हयः ॥ १७ ॥ क्षीरं वा पञ्चकोलाद्यं कासनाद्धि प्रमुच्यते ॥ प्रस्कन्धेषु
च सर्वेषु श्रेय आदौ विशोधनम् ॥ १८ ॥ अभ्यङ्गोद्वर्त्तनस्नेहनस्यवर्त्तिक्रमः स्मृतः ॥ ज्वरितानां तुरङ्गाणां पयसैव क्रियाक्रमः ॥ १९ ॥
लोध्रकरंजयोर्मूलं मातुलुंगाग्निनागराः ॥ कुष्ठहिङ्गुत्वचाराम्लालेपोऽयं शोथनाशनः ॥२०॥मञ्जिष्ठामधुकं द्राक्षाबृहत्यौ रक्तचन्दनम् ॥ त्रपुषी-
बीजमूलानि शृंगाटककशेरुकम् ॥२१ ॥ अजापयः शृतमिदं सुशीतं शर्करान्वितम् ॥ पीत्वा निरशनो वाजी रक्तमेहात्प्रमुच्यते ॥२२॥
मन्याहनुनिगालस्थशिराशोथो गलग्रहः ॥ अभ्यङ्गः कटुतैलेन तत्र तेष्वेव शस्यते ॥ २३ ॥ गलग्रहगदी शोथः प्रायशो गलदेशके ॥
प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः ॥ २४ ॥ कृष्णाहिङ्गुयुतैरेभिः कृत्वा नस्यं न संशयः ॥ निशे ज्योतिष्मती पाठा कृष्णा कुष्ठं
वचा मधु ॥२५॥ जिह्वास्तंभे च लेपोयं गुडमूत्रयुतो हितः ॥ तिलैर्यष्ट्या रजन्या च निम्बपत्रैश्च योजिता ॥२६॥ क्षौद्रेण शोधनी पिण्डी
सर्पिषा व्रणरोपिणी ॥ अभिघातेन स्वभ्रन्ति ये ह्यश्वास्तीव्रवेदनाः॥२७॥ परिषेकक्रिया तेषां तैलेनाशु रुजापहा ॥ दोषकोपाभिघाताभ्यां
पक्वभिन्ने व्रणे क्रमः ॥२८॥ शान्तिर्भवत्यण्डिवृद्धाभ्यां पक्वभिन्नव्रणे क्रमः ॥ अश्वत्थोदुम्बरप्लक्षमधूकवटकल्कनैः ॥२९॥ प्रभूतसलिलः
क्वाथः सुखोष्णो व्रणशोधनः ॥ शताह्वानागरं शास्ता मञ्जिष्ठाकुष्ठसैन्धवैः ॥ ३० ॥ देवदारुवचायुग्मरजनीरक्तचन्दनैः ॥ तैलं सिद्धं कषायेण
गुडूच्याः पयसा सह ॥३१॥ व्रणशुद्धौ बस्तिकर्म्मे च योज्यं सर्वत्र लिंगिते ॥ रक्तस्रावो जलौकाभिर्नेत्रान्ते नेत्रगोगिणः॥३२॥ खदिरोदुम्बरा-
श्वत्थकाथेन च साधनम् ॥ चातविध्वंसनं तैलमिदं कुष्ठहरैः समैः ॥ ३३ ॥ गुडूच्या च कृतः कल्को हितो युक्तावलम्बिने ॥ उत्पाते

च शिले श्राव्ये शुष्कशोफे तथैव च ॥ ३४ ॥ शिप्रकारिणि दोषे च सद्यो विदलमिष्यते ॥ गोशकृन्मञ्जिकाकुष्ठरजनीतिलसर्षपैः ॥ ३५॥
गवां मूत्रेण पिष्टैश्च मर्दनं कण्डुनाशनम् ॥ शीतो मधुयुतः काथो नासिकायां सशर्करः ॥ ३६ ॥ रक्तपित्तहरः पानादश्वकर्णे तथैव च ॥
सप्तमे सप्तमे देयमश्वानां लवणं दिने ॥ ३७ ॥ तथा भुक्तवतां देया प्रतिपाने तु वारुणी ॥ जीवनीयैः समधुरैर्मृद्वीकाशर्करायुतैः ॥ ३८ ॥
सापिप्पलीकैः शरदि प्रतिपानं सपद्मकैः ॥ विडंगपिप्पलीधान्यशताह्वालोध्रसैन्धवैः ॥ ३९ ॥ सचित्रकैस्तुरंगाणां प्रतिपानं हिमागमे ॥
लोध्रं प्रियङ्गुका मुस्ता पिप्पलीविश्वभेषजैः ॥ ४० ॥ सक्षौद्रैः प्रतिपानं स्याद्वसन्ते कफनाशनम् ॥ प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः सम-
दोषघैः ॥ ४१ ॥ निदाघे सगुडा देया मदिरा प्रतिपानके ॥ लोध्रकाष्ठं सलवणं पिप्पल्यो विश्वभेषजम् ॥ ४२ ॥ भवेत्तैलयुतैरेभिः
प्रतिपानं घनागमे ॥ निदाघोद्धतापित्ता ये शरत्सु पुष्टशोणिताः ॥ ४३ ॥ प्रावृड्भिन्नपुरीषाश्च पिबेयुर्वाजिनो घृतम् ॥ पिबेयुर्वाजिन-
स्तैलं कफवाय्वधिकास्तु ये ॥ ४४ ॥ स्नेहव्यापद्भवो येषां कार्य्यं तेषां विरूक्षणम् ॥ त्र्यहं यवागुरूक्षा स्याद्भोजनं तक्रसंयुतम् ॥ ४५ ॥
शरन्निदाघयोः सर्पिस्तैलं शीतवसन्तयोः ॥ वर्षासु शिशिरे चैव वसा तो यमकामिष्यते ॥ ४६ ॥ गुर्वभिष्यन्दिभक्तानि व्यायामः स्नान-
मातपम् ॥ वायुवर्षं च वाहस्य स्नेहपीतस्य वर्जितम् ॥ ४७ ॥ स्नानं पानं सकृत्कुर्यादश्वानां सलिलागमे ॥ अत्यर्थं दुर्दिने काले पान-
मेकं प्रशस्यते ॥ ४८ ॥ युक्तशीतातपे काले द्विःपानं स्नपनं सकृत् ॥ ग्रीष्मे त्रिःस्नानपानं स्याच्चिरं तस्यावगाहनम् ॥ ४९ ॥
निस्तुषाणां प्रदातव्या यवानां च तुराढकी ॥ चणकत्रीहिमोद्गानि कलायं वापि दापयेत् ॥ ५० ॥ अहोरात्रेण चार्द्धस्या यवसस्य तुला
दश ॥ अष्टौ शुष्कस्य दातव्याश्चतस्रोऽथ बुसस्य वा (वपुष्मतः) ॥ ५१ ॥ दूर्वा पित्तं यवः कासं बुसश्च श्लेष्मसञ्चयम् ॥ नाशयत्य-
र्जुनः श्वासं तथा वालो बलाक्षयम् ॥ ५२ ॥ वातिकाः पैत्तिकाश्चैव श्लेष्मजाः सान्निपातिकाः ॥ न रोगाः पीडयिष्यन्ति दूर्वाहारं तुरङ्गमम्
॥ ५३ ॥ द्वौ रज्जुबन्धौ दुष्टानां पक्षयोरुभयोरपि ॥ पश्चाद्धनुश्च कर्त्तव्यो दूरकीलव्यपाश्रयः ॥ ५४ ॥ वासेयुस्त्वास्तृते स्थाने कृतधूपन-
धूमयः ॥ यत्रोपन्यस्तयवसाः सप्रदीपाः सुरक्षिताः ॥ कृकवाकजकपयो धार्य्याश्चाश्वगृहे मृगाः ॥ ५५ ॥ इत्यादिमहापुराणे आग्नेयेऽश्व-
उष्णचिकित्सनं नामैकोननवत्यधिकद्विशततमोऽध्यायः ॥२८९ ॥ अथाश्वशान्तिः ॥ शालिहोत्र उवाच ॥ अश्वशान्तिं प्रवक्ष्यामि वाजि-

रोगविमार्दिनीम् ॥ नित्यां नैमित्तिकीं काम्यां त्रिविधां शृणु सुश्रुत ॥ १ ॥ शुभे दिने श्रीधरं च श्रियमुच्चैःश्रवाश्च तम् ॥ हयराजं सम-
भ्यर्च्य सावित्रेजुहुयाद् घृतम् ॥ २ ॥ द्विजेभ्यो दक्षिणां दद्यादश्ववृद्धिस्तथा भवेत् ॥ आश्वयुक्शुक्लपक्षस्य पञ्चदश्यां च शान्तिकम् ॥
॥ ३ ॥ बहिःकुर्य्याद्विशेषेण नासत्यौ वरुणं यजेत् ॥ समुल्लिख्य ततो देवीं शाखाभिः परिवारयेत् ॥ ४ ॥ घटान्सर्वरसैः पूर्णान्दिक्षु दद्या-
त्सवस्त्रकान् ॥ यवाज्यं जुहुयात्प्राच्यं यजेदश्वांश्च साश्विनान् ॥ ५ ॥ विप्रेभ्यो दक्षिणां दद्यान्नैमित्तिकमतः शृणु ॥ मकरादौ हयानां च
पद्मैर्विष्णुं श्रियं यजेत् ॥ ६ ॥ ब्रह्माणं शङ्करं सोममादित्यं च तथाश्विनौ ॥ रेवन्तमुच्चैःश्रवसं दिक्पालांश्च दलेष्वपि ॥ ७ ॥ प्रत्येकं पूर्ण-
कुम्भैश्च वेद्यां तत्सौम्यताः स्थले ॥ तिलाक्षताज्यसिद्धार्थान्देवतानां शतं शतम् ॥ उपोषितेन कर्त्तव्यं कर्म चाश्वरुजापहम् ॥ ८ ॥
इत्यादिमहापुराणे आग्नेयेऽश्वशांतिकथनं नाम नवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥ अथ गजशान्तिः ॥ शालिहोत्र उवाच ॥ गज-
शान्तिं प्रवक्ष्यामि गजरोगविमर्दिनीम् ॥ विष्णुं श्रियं च पञ्चम्यां नागमैरावतं यजेत् ॥ १ ॥ ब्रह्माणं शङ्करं विष्णुं शक्रं वैश्रवणं यमम् ॥
चन्द्रार्कौ वरुणं वायुमग्निं पृथ्वीं तथा च खम् ॥ २ ॥ शेषं शैलान्कुञ्जरांश्च ये तेऽष्टौ देवयोनयः ॥ विरूपाक्षं महापद्मं भद्रं सुमनसं तथा
॥ ३ ॥ कुमुदैरावणः पद्मः पुष्पदन्तोऽथ वामनः ॥ सुप्रतीकोऽञ्जनो नागा अष्टौ होमोऽथ दक्षिणाम् ॥ ४ ॥ गजाः शान्त्युदकैः सिक्ता
वृद्धो नैमित्तिकं शृणु ॥ गजानां मकरादौ च ऐशान्यां नगराद्बहिः ॥ ५ ॥ स्थण्डिले कमले मध्ये विष्णुं लक्ष्मीं च केसरे ॥ ब्रह्माणं
भास्करं पृथ्वीं यजेत्स्कन्दं ह्यनन्तकम् ॥ ६ ॥ सं शिवं सोममिन्द्रादीन्तदस्त्राणि दले क्रमात् ॥ वज्रं शक्तिं च दण्डं च तोमरं पाशकं गदाम्
॥ ७ ॥ शूलं पद्मं बहिर्वृन्ते चक्रे सूर्य्यं तथाश्विनौ ॥ वसूनष्टौ तथा साध्यान्याम्येऽथ नैर्ऋते दले ॥ ८ ॥ देवानाङ्गिरसश्चान्यान्भृगूंश्च
मरुतोऽनिले ॥ विश्वान्देवांस्तथा दक्षे रुद्रान्रौद्रेऽथ मण्डले ॥ ९ ॥ वृत्तया रेखया तत्र देवान्वै बाह्यतो यजेत् ॥ सूत्रकारानृषीन्वाणीं
पूर्वादौ सरितो गिरिन् ॥ १० ॥ महाभूतानि कोणेषु ऐशान्यादिषु संयजेत् ॥ पद्मं चक्रं गदां शंखं चतुरस्रं तु मण्डलम् ॥ ११ ॥ चतु-
र्द्वारं ततः कुम्भान्यादौ च पताकिकाः ॥ चत्वा (तु) रस्तोरणान्द्वारि नागानैरावतादिकान् ॥ १२ ॥ पूर्वादौ चौषधीभिश्च देवानां
भाजनं पृथक् ॥ पृथक्छताहुतीश्चाज्येर्गजानर्च्य प्रदक्षिणम् ॥ १३ ॥ नागं वह्निं देवतादीन्वाह्यैर्नेयुः स्वकं गृहम् ॥ द्विजेभ्यो दक्षिणां

दद्याद्धास्तिवेद्यादिकांस्तथा ॥ १४॥ कारिणीं तु समारुह्य वदेत्कर्णे तु कालवित् ॥ नागराजेमृते शान्तिं कृत्वा ऽ (न्यास्मि) मुष्मिन्नपेन्मनुम् ॥ १५ ॥ श्रीगजस्त्वं कृतो राज्ञा भवानस्य गजाग्रणीः ॥ गन्धमाल्याग्रभक्तैस्त्वां पूजयिष्यति पार्थिवः ॥ १६ ॥ लोकस्तदाज्ञया पूजां करिष्यति तदा तव ॥ पालनीयस्त्वया राजा युद्धेऽध्वनि तथा गृहे ॥ १७ ॥ तिर्य्यग्भावं समुत्सृज्य दिव्यं भावमनुस्मर ॥ देवासुरे पुरा युद्धे श्रीगजास्त्रिदशैः कृतः ॥ १८ ॥ ऐरावतसुतः श्रीमानारिष्टो नाम वारणः ॥ श्रीगजानां तु तत्तेजः सर्वमेवोपतिष्ठते ॥ ॥ १९ ॥ तत्तेजस्तव नागेंद्र दिव्यभावसमन्वितम् ॥ उपतिष्ठतु भद्रं ते रक्ष राजानमाहवे ॥२०॥ इत्येवमभिषिक्तं तमारोहेत शुभे नृपः ॥ तस्यानुगमनं कुर्य्युः सशस्त्रा नरपुङ्गवाः ॥ २१॥ शालास्वसौ स्थण्डिलेऽब्जे दिक्पालादीन्यजेद्बहिः ॥ केसरेषु बलं नागं भुवं चैव सरस्वतीम् ॥ २२ ॥ मध्ये तु डिण्डिमं प्राच्यं गन्धमाल्यानुलेपनैः ॥ हुत्वा देयस्तु कलशो रसपूर्णो द्विजाय च ॥ २३ ॥ गजाध्यक्षं हास्तिपं च गणितज्ञं च पूजयेत् ॥ गजाध्यक्षाय तं दद्यात् डिण्डिमं सोऽपि वादयेत् ॥ शुभगम्भीरशब्दैः स्याज्जघनस्थोऽभिवादयेत् ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये गजशान्तिकथनं नामैकनवत्यधिकद्विशततमोऽध्यायः॥२९१॥ अथ गवायुर्वेदः ॥ धन्वन्तरिरुवाच ॥ गोविप्रपालनं कार्य्यं राज्ञा गोशान्तिमावदे ॥ गावः पवित्रा माङ्गल्या गोषु लोकाः प्रतिष्ठिताः ॥ १ ॥ शकृन्मूत्रं परं तासामलक्ष्मीनाशनं परम् ॥ गवां कण्डूयनं वारिदानं शृङ्गस्य मर्दनम् ॥२॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च रोचना ॥ षडङ्गं परमं पाने दुःस्वप्नाद्यनिवारणम् ॥३॥ रोचनाविषरक्षोघ्नी ग्रासदः स्वर्गगो गवाम् ॥ यद्गृहे दुःखिता गावः स याति नरकं नरः ॥ ४॥ परगोग्रासदः स्वर्गी गोहितो ब्रह्मलोकभाक् ॥ गोदानात्कीर्त्तनाद्रक्षां कृत्वा चोद्धरते कुलम् ॥ ५ ॥ गवां श्वासात्पवित्रा भूः स्पर्शनात्किल्बिषक्षयः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ ६ ॥ एकरात्रोपवासश्च श्वपाकमपि शोधयेत् ॥ सर्वाशुभविनाशाय पुराचरितमीश्वरैः ॥ ७ ॥ प्रत्येकं च त्र्यहाभ्यस्तं महासान्तपनं स्मृतम् ॥ सर्वकामप्रदं चैतत्सर्वाशुभविमर्दनम् ॥ ८ ॥ कृच्छ्रातिकृच्छ्रं पसया दिवसानेकविंशतिम् ॥ निर्मलाः सर्वकामाप्त्या स्वर्गगाः स्युर्नरोत्तमाः ॥ ९ ॥ त्र्यहमुष्णं पिबेन्मूत्रं त्र्यहमुष्णं घृतं पिबेत् ॥ त्र्यहमुष्णं पयः पीत्वा वायुभक्षः परं त्र्यहम् ॥ १० ॥ तप्तकृच्छ्रव्रतं सर्वपापघ्नं ब्रह्मलोकदम् ॥ शीतेस्तु शीतकृच्छ्रं स्याद्ब्रह्मोक्तं ब्रह्मलोकदम् ॥ ११ ॥ गोमूत्रेणाचरेत्स्नानं वृत्तिं कुर्य्याच्च

गोरसैः ॥ गोभिर्वर्जनेच्च मुक्तासु भुञ्जीताथ च गोव्रती ॥ १२ ॥ मासेनैकेन निष्पापो गोलोकी स्वर्गगो भवेत् ॥ विद्यां च गोमतीं जप्त्वा गोलोकं परमं व्रजेत् ॥ १३ ॥ गीतैर्नृत्यैरप्सरोभिर्विमाने तत्र मोदते ॥ गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः ॥ १४ ॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं परम् ॥ अन्नमेव परं गावो देवानां हविरुत्तमम् ॥ १५ ॥ पावनं सर्वभूतानां क्षरन्ति च वहन्ति च ॥ हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि ॥ १६ ॥ ऋषीणामग्निहोत्रेषु गावो होमेषु योजिताः ॥ सर्वेषामेव भूतानां गावः शरणमुत्तमम् ॥ १७ ॥ गावः पवित्रं परमं गावो माङ्गल्यमुत्तमम् ॥ गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः ॥ १८ ॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ ॥ १९ ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥ एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ॥ २० ॥ देवब्राह्मणगोसाधुसाध्वीभिः सकलं जगत् ॥ धार्य्यते वै सदा तस्मात्सर्वं पूज्यतमा मताः ॥२१॥ पिबन्ति यत्र तत्तीर्थं गङ्गाद्या गाव एव हि ॥ गवां माहात्म्यमुक्तं हि चिकित्सां च तथा शृणु ॥ २२ ॥ शृङ्गमयेषु धेनूनां तैलं दद्यात्ससैन्धवम् ॥ शृङ्गवेरबलामांसीकल्कसिद्धं समाक्षिकम् ॥ २३ ॥ कर्णशूलेषु सर्वेषु माञ्जिष्ठाद्विड्ढसैन्धवैः ॥ सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः ॥ २४ ॥ बिल्वमूलमपामार्गं धातकी च सपाटला ॥ कुटजं दन्तमूलेषु लेपात्तच्छूलनाशनम् ॥ २५ ॥ दन्तशूलहरैर्द्रव्यैर्घृतं राम विपाचितम् ॥ मुखरोगहरं ज्ञेयं जिह्वारोगेषु सैन्धवम् ॥२६॥ शृङ्गवेरं हरिद्रे द्वे त्रिफला च गलग्रहे ॥ हृच्छूले बस्तिशूले च वातरोगे क्षये तथा ॥ २७ ॥ त्रिफला घृतमिश्रा च गवां पाने प्रशस्यते ॥ अतीसारे हरिद्रे द्वे पाठां चैव प्रदापयेत् ॥ २८ ॥ सर्वेषु कोष्ठरोगेषु तथा शाखागदेषु च ॥ शृङ्गवेरं च भार्ङ्गी च कासे श्वासे प्रदापयेत् ॥ २९ ॥ दातव्या भग्नसन्धाने प्रियङ्गुर्लवणान्विता ॥ तैलं वातहरं पित्ते मधुयष्टीविपाचितम् ॥ ३० ॥ कफे व्योषं च समधु सपुष्टकरजोऽन्वजे ॥ तैलाज्यं हरितालं च भग्नक्षते घृतं ददेत् ॥ ॥ ३१ ॥ माषास्तिलाः सगोधूमाः पशुक्षीरं घृतं तथा ॥ एषां पिण्डी सलवणा वत्सानां पुष्टिदा त्वियम् ॥ ३२ ॥ वृक्षप्रदा विषाणां स्याद्व्रहनाशाय धूपकः ॥ देवदारु वचा मांसी गुग्गुलुर्हिङ्गुसर्षपाः ॥३३॥ ग्रहादिगदनाशाय एष धूपो गवां हितः ॥ दृष्ट्वा चैव गवां कार्य्या धूपेनानेन धूपिताः ॥३४॥ अश्वगन्धा तिलैः शुक्लं तेन

गोः क्षीरिणी भवेत् ॥ रसायनं च पिण्याकं मत्तो यो धार्य्यते गृहे ॥ ३५ ॥ गवां पुरीषे पञ्चम्यां नित्यं शान्त्यै श्रियं यजेत् ॥ वासुदेवं च गन्धाद्यैरपरा शान्तिरुच्यते ॥ ३६ ॥ अश्वयुक्शुक्लपक्षस्य पञ्चदश्यां यजेद्धरिम् ॥ हरिरुद्रमजं सूर्य्यं श्रियमाग्निं घृतेन च ॥ ३७ ॥ दधि सम्प्राश्य गाः पूज्य कार्य्यं वह्निप्रदक्षिणम् ॥ वृषाणां योजयेद्युद्धं गीतवाद्यरवैर्बहिः ॥ ३८ ॥ गवां तु लवणं देयं ब्राह्मणानां च दक्षिणाः ॥ नैमित्तिके माकरादौ यजेद्विष्णुं सह श्रिया ॥ ३९ ॥ स्थण्डिलेऽब्जे मध्यगते दिक्षु केसरगान्सुरान् ॥ सुभद्राजो रविः पूज्यो बहुरूपो बलिर्बहिः ॥ ४० ॥ खं विश्वरूपा सिद्धिश्च ऋद्धिः शान्तिश्च रोहिणी ॥ दिग्धेनवो हि पूर्वाद्याः कृसरैश्चन्द्र ईश्वरः ॥ ४१ ॥ दिक्पालाः पद्मपत्रेषु कुम्भेष्वग्नौ च होमयेत् ॥ क्षीरवृक्षस्य समिधः सर्षपाक्षततण्डुलान् ॥ ४२ ॥ शतं शतं सुवर्णं च कांस्यादिकं द्विजे ददेत् ॥ गावः पूज्या विमोक्तव्याः शान्त्यै क्षीरादिसंयुताः ॥ ४३ ॥ अग्निरुवाच ॥ शालिहोत्रः सुश्रुताय हयायुर्वेदमुक्तवान् ॥ पालकाप्योऽङ्गराजाय गजायुर्वेदमब्रवीत् ॥ ४४ ॥ इत्यादिमहापुराणे आग्नेये गवाऽऽयुर्वेदकथनं नाम द्विनवत्यधिकद्विशततमोऽध्यायः ॥ २९२ ॥ अथ मन्त्रपरिभाषा ॥ अग्निरुवाच ॥ मन्त्रविद्यामहं वक्ष्ये भुक्तिमुक्तिप्रदं शृणु ॥ विंशत्यर्णाधिका मन्त्रा मालामन्त्राः स्मृता द्विज ॥ १ ॥ दशाक्षराधिका मन्त्रास्तदर्वाग्बीजसंज्ञिताः ॥ वार्द्धक्ये सिद्धिदा ह्येते मालामन्त्रास्तु यौवने ॥ २ ॥ पञ्चाक्षराधिका मन्त्रा सिद्धिदाः सर्वदा परे ॥ स्त्रीपुंनपुंसकत्वेन त्रिधा स्युर्मन्त्रजातयः ॥ ३ ॥ स्त्रीमन्त्रा वह्निजायान्ता नमोऽन्ताश्च नपुंसकाः ॥ शेषाः पुमांसस्ते शस्ता वश्योच्चाटनकेषु च ॥ ४ ॥ क्षुद्रक्रियामयध्वंसे स्त्रियोऽन्यत्र नपुंसकाः ॥ मन्त्रावाग्नेयसौम्याख्यौ ताराद्यन्तार्द्धयोर्जपेत् ॥ ५ ॥ तारान्त्याग्नेवियत्प्रायो मन्त्र आग्नेय इष्यते ॥ शिष्टः सौम्यः प्रशस्तौ तौ कर्मणोः क्रूरसौम्ययोः ॥ ६ ॥ आग्नेयमन्त्रः सौम्यः स्यात्प्रायशोऽन्ते नमोऽन्वितः ॥ सौम्यमन्त्रस्तथाग्नेयः फट्कारेणान्तगो युतः ॥ ७ ॥ सुप्तः प्रबुद्धमात्रो वा मन्त्रः सिद्धिं न यच्छति ॥ स्वापकालो महाबाहो जागरो दक्षिणावहः ॥ ८ ॥ आग्नेयस्य मनोः सौम्यमन्त्रस्यैतद्विपर्य्ययात् ॥ प्रबोधकालं जानीयादुभयोरुभयोरहः ॥ ९ ॥ दुष्टर्क्षराशिविद्वेषिवर्णादीन्वर्जयेन्मनून् ॥ रायज्यलाभोपायाय प्रारभ्यारिः स्वरः कुरून् ॥ १० ॥ गोपालककुटी प्रायात्पूर्णामित्युदिता लिपिः ॥ नक्षत्रेषु क्रमाद्योज्यो स्वरान्त्यो रेवतीयुजो ॥ ११ ॥ वेला गुरुः स्वराः शोषः कर्मणेवेति भेदिता ॥

लिप्यर्णा वशिषु ज्ञेया षष्ठेशाद्यांश्च योजयेत् ॥ १२ ॥ लिपौ चतुष्पथस्थायामारूढावर्णपदान्तराः ॥ सिद्धाः साध्या द्वितीयस्थाः सुसिद्धा वैरिणः परे ॥ १३ ॥ सिद्धादीन्कल्पयेदेवं सिद्धोत्यन्तगुणैरपि ॥ सिद्धे सिद्धो जपात्साध्यो जपपूजाहुतादिना ॥ १४ ॥ सुसिद्धो ध्यानमात्रेण साधकं नाशयेदरिः ॥ दुष्टार्णप्रचुरो यः स्यान्मन्त्रः सर्वविनिन्दितः ॥ १५ ॥ प्रविश्य विधिवद्दीक्षामभिषेकावसानिकाम् ॥ श्रुत्वा तन्त्रं गुरोर्लब्धं साधयेदीप्सितं मनुम् ॥ १६ ॥ धीरो दक्षः शुचिर्भक्तो जपध्यानादितत्परः ॥ सिद्धस्तपस्वी कुशलस्तन्त्रज्ञः सत्यभाषणः ॥ १७ ॥ निग्रहानुग्रहे शक्तो गुरुरित्याभिधीयते ॥ शान्तो दान्तः षट्श्रीर्णब्रह्मचर्य्यो हविष्यभुक् ॥ १८ ॥ कुर्वन्नाचार्य्य-शुश्रूषां सिद्धोत्साही सशिष्यकः ॥ स तूपदेश्यः पुत्रश्च विनयी वसुदस्तथा ॥ १९ ॥ मन्त्रं दद्यात्सुसिद्धौ तु सहस्रं देशिकं जपेत् ॥ यदृच्छया श्रुतं मन्त्रं छलेनाथ बलेन वा ॥२०॥ पत्रे स्थितं च गाथां च जनयेद्व्यर्थमेव तम् ॥ मन्त्रं यः साधयेदेकं जपहोमार्चनादिभिः ॥ ॥ २१ ॥ क्रियाभिर्भूरिभिस्तस्य सिध्यन्ति स्वल्पसाधनात् ॥ सम्यक्सिद्धैकमन्त्रस्य नासाध्यमिह किञ्चन ॥ २२ ॥ बहुमन्त्रवतः पुंसः का कथा शिव एव सः ॥ दशलक्षजपादेकवर्णो मन्त्रः प्रसिध्यति ॥ २३ ॥ वर्णवृद्ध्या जपह्रासस्तेनान्येषां समूहयेत् ॥ बीजाद्विस्त्रिगुणा-न्मन्त्रान्मालामन्त्रे जपक्रिया ॥२४॥ संख्यानुक्तौ शतं साष्टसहस्रं वा जपादिषु ॥ जपाद्दशांशं सर्वत्र साभिषेकं हुतं विदुः ॥२५॥ द्रव्या-नुक्तौ घृतं होमे जपोऽशक्तस्य सर्वतः ॥ मूलमन्त्राद्दशांशः स्यादंगादीनां जपादिकम् ॥ २६ ॥ जपात्सशक्तिमन्त्रस्य कामदा मन्त्रदे-वताः ॥ साधकस्य भवेत्तृप्ता ध्यानहोमार्चनादिना ॥ २७ ॥ उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपे शतगुणः सहस्रो मानसः स्मृतः ॥ २८ ॥ प्राङ्मुखोऽवाङ्मुखो वापि मन्त्रकर्म समारभेत् ॥ प्रणवाद्याः सर्वमन्त्रा वाग्यतो विहिताशनः ॥ २९ ॥ आसी-नस्तु जपेन्मन्त्रान्देवताचार्य्यतुल्यदृक् ॥ कुटी विविक्ता देशाः स्युर्देवालयनदीह्रदाः ॥ ३० ॥ सिद्धौ यवागूपूपैर्वा पयो भक्ष्यं हविष्यकम् ॥ मन्त्रस्य देवता तावत्तिथिवारेषु वै जपेत् ॥ ३१ ॥ कृष्णाष्टमी चतुर्दश्योर्ग्रहणादौ च साधकः ॥ दक्षो यमोऽनलो धाता शशी रुद्रो गुरुर्दितिः ॥ ३२ ॥ सर्पाः पितरोऽथ भगोऽर्यमा शक्रोतिरश्युतिः ॥ त्वष्टा मरुत इन्द्राग्नी मित्रेन्द्रौ निर्ऋतिर्जलम् ॥ ३३ ॥ विश्वेदेवा हृषीकेशो वायवः सलिलाधिपः ॥ अजैकपादहिर्बुध्न्यः पूषाश्विन्यादिदेवताः ॥ ३४ ॥ अग्निर्देवाबुमानिन्द्रो नासश्चन्द्रो दिवाकरः ॥

मातृदुर्गा दिशामीशः कृष्णो वैवस्वतः शिवः ॥ ३५ ॥ पञ्चदश्याः शशाङ्कस्तु पितरस्तिथिदेवताः ॥ हरो दुर्गा गुरुर्विष्णुर्ब्रह्मा लक्ष्मी-
र्धनेश्वरः ॥ ३६ ॥ एते सूर्य्यादिवारेशा लिपिन्यासोऽथ कथ्यते ॥ केशान्तेषु च वृत्तेषु चक्षुषोः श्रवणद्वये ॥ ३७ ॥ नासागण्डौष्ठदन्तेषु
द्वे द्वे मूर्द्धास्ययोः क्रमात् ॥ वर्णान्पञ्चसु वर्गाणां बाहुचरणसन्धिषु ॥ ३८ ॥ पार्श्वयोः पृष्ठतो नाभौ हृदये च क्रमान्न्यसेत् ॥ यादींश्च
हृदये न्यस्येदेषां स्युः सप्त धातवः ॥ ३९ ॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः ॥ रसाद्यैश्च पयोन्तैश्च लिख्यन्ते च लिपीश्वरैः
॥ ४० ॥ श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्त्तिरमरेश्वरः ॥ अग्नीशो भावभूतिश्च तिथीशः स्थाणुको हरः ॥ ४१ ॥ दण्डीशो भौतिकः
सद्योजातश्चानुग्रहेश्वरः ॥ अक्रूरश्च महासेनः शरण्या देवता अमूः ॥ ४२ ॥ ततः क्रोधीशचण्डौ च पञ्चान्तकशिवोत्तमौ ॥ तथैव
रुद्रकूर्मौ च त्रिणेत्रश्चतुराननः॥ ४३ ॥ अजेशशर्मासोमेशौ तथा लाङ्गलिदारुकौ ॥ अर्द्धनारीश्वरश्चोमा कान्तश्चाषाढिदण्डिनौ ॥ ४४॥
अत्रिर्मीनश्च मेषश्च लोहितश्च शिखी तथा ॥ छगलण्डद्विरण्डौ द्वौ सप्तहाकालवालिनौ ॥ ४५ ॥ भुजङ्गश्च पिनाकी च खड्गीशश्च बकः
पुनः ॥ श्वेतो भृगुर्गुडीशाक्षाः क्षयः संवर्त्तकः स्मृतः ॥ ४६ ॥ रुद्रान्सशक्तीँल्लिख्यादीन्नमोऽन्तान्विन्यसेत्क्रमात् ॥ अंगानि विन्यसेत्सर्वं
मन्त्राः सांगास्तु सिद्धिदाः ॥ ४७ ॥ हृल्लेखाव्योमसंपूर्वाण्येतान्यंगानि विन्यसेत् ॥ हृदादीन्यङ्गमन्त्रान्तेयोंजयेद्धृदयं नमः ॥ ४८ ॥
स्वाहा शिरस्यथ वषट् शिखायां कवचे च हूम् ॥ वौषण्नेत्रेऽस्त्राय फट् स्यात्पञ्चाङ्गं नेत्रवर्जितम् ॥ ४९ ॥ निरङ्गन्यात्मना चाङ्गं न्य-
स्येतं नियुतं जपेत् ॥ क्रमेण देवीं वागीशां यथोक्तांस्तु तिलान्हुनेत् ॥ ५० ॥ लिपिदेवीं साक्षसूत्रकुम्भपुस्तकपद्मधृक् ॥ कवित्वादि
प्रयच्छेत कर्मादौ सिद्धये न्यसेत् ॥ निष्कविर्निर्मलः सर्वं मन्त्राः सिध्यन्ति मातृभिः ॥ ५१ ॥ इत्यादिमहापुराणे आग्नेये मन्त्रपरिभाषा
नाम त्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥ अथ सर्पलक्षणानि ॥ अग्निरुवाच ॥ नागादयोऽथ भावादिंदशस्थानानि कर्म च ॥
सूतकं दष्टचेष्टेति सप्तलक्षणमुच्यते ॥ १ ॥ शेषवासुकितक्षाख्याः कर्कटोऽब्जो महाम्बुजः ॥ शंखपालश्च कुलिक इत्यष्टौ नागवर्य्यकाः
॥ २ ॥ दशाष्टपञ्चत्रिगुणशतमूर्द्धान्वितौ क्रमात् ॥ विप्रो नृपो विशौ शूद्रौ द्वौ द्वौ नामेषु कीर्त्तितौ ॥ ३ ॥ तदन्वयाः पञ्चशतं तेभ्यो
जाता असंख्यकाः ॥ फणिमण्डलिराजीलवातपित्तकफात्मकाः ॥ ४ ॥ व्यन्तरा दोषमिश्रास्ते सर्पा दर्वीकराः स्मृताः ॥ रथाङ्गलांग-

लच्छत्रस्वस्तिकाङ्कुशधारिणः ॥ ५ ॥ गोनसा मन्दगा दीर्घा मण्डलैर्विविधैश्चिताः ॥ राजिलाश्चित्रिताः स्निग्धास्तिर्य्यगूर्ध्वं च वाजिभिः ॥ ॥ ६ ॥ व्यन्तरा मिश्रचिह्नाश्च भूवर्षाग्नेयवायवः ॥ चतुर्विधास्ते षड्विंशभेदा षोडशगोनसाः ॥ ७ ॥ त्रयोदशं च राजीला व्यन्तरा एकविंशतिः ॥ येऽनुक्तकाले जायन्ते सर्पास्ते व्यन्तराः स्मृताः ॥ ८ ॥ आषाढादित्रिमासैः स्याद्गर्भो मासचतुष्टये ॥ अण्डकानां शंते द्वे च चत्वारिंशत्प्रसूयते ॥ ९ ॥ सर्पा ग्रसन्ति सूतौघान्विना स्त्रीपुन्नपुंसकान् ॥ उन्मीलिताक्षि सप्ताहात्कृष्णो मासाद्भवेद्बहिः ॥ १० ॥ द्वादशाहात्सुबोधः स्यादन्ता स्युः सूर्य्यदर्शनात् ॥ द्वात्रिंशद्दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः ॥ ११ ॥ करालो मकरी कालरात्री च यमदूतिका ॥ एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः ॥ १२ ॥ षण्मासान्मुच्यते कृत्तिं जीवेन्पिष्टसमाद्वयम् ॥ नागाः सूर्य्यादिवारेशाः सप्त उक्ता दिवा निशि ॥ १३ ॥ स्वेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु ॥ शङ्खेन वा महाब्जेन सह तस्योदयोऽथवा ॥ १४ ॥ द्वयोर्वा नाडिकामात्रमन्तरं कुलिकोदयः ॥ दुष्टः स कालः सर्वत्र सर्पदंशे विशेषतः ॥ १५ ॥ कृत्तिका भरणी स्वाती मूलं पूर्वत्रयाश्विनी ॥ विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी ॥ १६ ॥ हस्तो मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः ॥ षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्दशी ॥ १७ ॥ सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः ॥ एकद्विबहवो दंशा दृष्टं विद्धं च खण्डितम् ॥ १८ ॥ अदंशमवगुप्तं स्यादंशमेव चतुर्विधम् ॥ त्रयो द्व्येकक्षता दंशा वेदना रुधिरोल्बणा ॥ १९ ॥ नक्तन्त्वेकाङ्घ्रिकूर्माभा दंशाश्च यमचोदिताः ॥ दाही पिपीलिकास्पर्शी कण्ठशोथरुजान्वितः ॥ २० ॥ सतोदो ग्रन्थितो दंशः सविषो न्यस्तनिर्विषः ॥ देवालये शून्यगृहे वल्मीकोद्यानकोटरे ॥ २१ ॥ रथ्यासन्धौ श्मशाने च नद्यां च सिन्धुसंगमे ॥ द्वीपे चतुष्पथे सौधे गृहेऽब्जे पर्वताग्रतः ॥ २२ ॥ बिलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके ॥ शिग्रुश्लेष्मातकाक्षेषु जम्बूदुम्बरवेणुषु ॥ २३ ॥ वटे च जीर्णप्राकारे स्वास्यहृत्कक्षजङ्घणि ॥ नाले शंखे गले मूर्ध्नि चिबुके नाभिपादयोः ॥ २४ ॥ दंशोऽशुभः शुभो दूतः पुष्पहस्तः सुवाक्सुधीः ॥ लिङ्गवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः ॥ २५ ॥ अपद्वारगतःशस्त्री प्रमादी भूगतेक्षणः ॥ विवर्णवासाः पाशादिहस्तो गद्गदवर्णभाक् ॥ २६ ॥ शुष्ककाष्ठाश्रितः खिन्नस्तिलाककरांशुकः ॥ आर्द्रवासाः कृष्णरक्तपुष्पयुक्ताशिरोरुहः ॥ २७ ॥ कुचमर्दी नखच्छेदी गुदस्पृक्पादलेखकः ॥ केशलुञ्ची तृणच्छेदी

दुष्टा दूतास्त्रयेकज्ञः ॥ २८ ॥ इडान्या वा वहेद्वेधा यदि दूतस्य चात्मनः ॥ आभ्यां द्वाभ्यां पुष्टयोस्मान्विद्यात्स्त्रीपुत्रपुंसकान् ॥ २९ ॥ दूतः स्पृशति यद्गात्रं तस्मिन्देशमुदाहरेत् ॥ दूताङ्घ्रिचलनं दुष्टमुत्थितिर्निश्चला शुभा ॥ ३० ॥ जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः ॥ जीवो गतागतैर्दुष्टः शुभो दूतनिवेदने ॥ ३१ ॥ दूतस्य वाक्प्रदुष्टा सा पूर्वामज्ञार्द्धनिन्दिता ॥ विभक्तेस्तस्य वाक्यान्तैर्विषनिर्विषकालता ॥ ३२ ॥ आद्यैः स्वरैश्च काद्यैश्च वर्णैर्भिन्नलिपिर्द्विधा ॥ स्वरजो वसुमान्वर्गी इति ज्ञेया च मातृका ॥ ३३ ॥ वाताग्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम् ॥ नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः ॥ ३४ ॥ दुष्टो दूतस्य वाक्पादो वाताग्नी मध्यमो हरिः ॥ प्रशस्ता वारुणा वर्णा अतिदुष्टा नपुंसकाः ॥ ३५ ॥ प्रस्थाने मङ्गलं वाक्यं गर्जितं मेघहस्तिनोः ॥ प्रदक्षिणं फले वृक्षे वामस्य च रुतं जितम् ॥ ३६ ॥ शुभा गीतादिशब्दाः स्युरीदृशं स्याद्धि सिद्धये ॥ अनर्थगीरथाक्रन्दो दक्षिणे विरुतं क्षुतम् ॥ ३७ ॥ वेश्या क्षुतो नृपाः कन्या गौर्दन्ती मुरजध्वजौ ॥ क्षीराज्यदधिशङ्खाम्बु च्छत्रं भेरी फलं सुराः ॥ ॥ ३८ ॥ तण्डुला हेम रूप्यं च सिद्धयेऽभिमुखा अमी ॥ सकाष्ठः सानलः कारुर्मलिनाम्बरभारभृत् ॥ ३९ ॥ गलस्थटङ्को गोमायुगृध्रोलूककपर्दिकाः ॥ तैलं कपालकार्पासा निषेधे भस्म नष्टये ॥४०॥ विषरोगाश्च सप्त स्युर्धातोर्धात्वन्तरागतेः ॥ विषदंशो ललाटे यात्यतो नेत्रं ततो मुखम् ॥ आस्याच्च वचनीनाड्यो धातून्प्राप्नोति हि क्रमात् ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये सर्पलक्षणं नाम चतुर्नवत्यधिकद्विशततमोऽध्यायः ॥ २९४ ॥ अथ दष्टचिकित्सा ॥ अग्निरुवाच ॥ मन्त्रध्यानौषधैर्दष्टचिकित्सां प्रवदामि ते ॥ ओं नमो भगवते नीलकण्ठायेति ॥ जपनाद्विषहानिः स्यादौषधं जीवरक्षणम् ॥ १ ॥ माज्यं सकृद्रसं पेयं द्विविधं विषमुच्यते ॥ जङ्गमं सर्पमूषादि शृङ्गादि स्थावरं विषम् ॥ २ ॥ शान्तस्वरान्विता ब्रह्मा लोहितं तारकं शिवः ॥ वियतेर्नाममन्त्रोऽयं तार्क्षः शब्दमयः स्मृतः ॥ ३ ॥ ओं ज्वल महामते हृदयाय गरुडविरालशिरसे गरुडशिखायै गरुड विषभञ्जन प्रभेदन प्रभेदन वित्रासय विमर्दय विमर्दय कवचाय अप्रतिहतशासनं वं हूं फट् अस्त्राय उग्ररूपधारक सर्वभयङ्कर भीषय सर्वं दह दह भस्मी कुरु कुरु स्वाहा नेत्राय ॥ सप्तवर्गोन्तयुग्माष्टदिग्दलस्वरकेसरादिवर्णरुद्धं वह्निराभूतकर्णिकं मातृकाम्बुजम् ॥ कृत्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत् ॥ अङ्गुष्ठादीन्

न्यसेद्वर्णान्वियतेर्भेदिताः कलाः ॥ ४ ॥ पीतं वज्रचतुष्कोणं पार्थिवं शक्रदेवतम् ॥ वृत्तार्द्धमाप्य पद्मार्द्धं शुक्लं वरुणदेवतम् ॥ ५ ॥ त्र्यस्रं (सं) स्वस्तिकयुक्तं च तेजसं वह्निदेवतम् ॥ वृत्तं बिन्दुवृतं वायुदेवतं कृष्णमालिनम् ॥ ६ ॥ अङ्गुष्ठाद्यङ्गुलीमध्ये पर्व्वस्तेषु स्ववेश्मसु ॥ सुवर्णनागवाहेन वेष्टितेषु न्यसेत्क्रमात् ॥ ७ ॥ वियतेश्चतुरो वर्णान्सुमण्डलसमत्विषः ॥ अरूपे रवतन्मात्रे चाकाशे शिवदैवते ॥ ८ ॥ कनिष्ठामध्यपर्वस्थे न्यसेत्तस्यांद्यमक्षरम् ॥ नागानामादिवर्णांश्च स्वमण्डलगतान्न्यसेत् ॥ ९ ॥ भूतादिवर्णान्विन्यसेदङ्गुष्ठाद्यन्तपर्वसु ॥ तन्मात्रादिगुणाभ्यर्णानङ्गुलीषु न्यसेद्बुधः ॥ १० ॥ स्पर्शनादेव ताक्षेण हस्ते हन्याद्विषद्वयम् ॥ मण्डलादिषु नान्वर्णान्वियतेः कवयो जितान् ॥ ११ ॥ श्रेष्ठं व्यङ्गुलिभिर्देहनाभिस्थानेषु पर्वसु ॥ आजानुतः सुवर्णाभमानाभेस्तुहिनप्रभम् ॥ १२ ॥ कुङ्कुमारुणमाकण्ठादाकेशान्नात्सितेतरम् ॥ ब्रह्माण्डव्यापिनं तार्क्ष्यं च न्द्राख्यं नागभूषणम् ॥ १३ ॥ नीलोग्रनासमात्मानं महापक्षं स्मरेद्बुधः ॥ एवं तार्क्षात्मनो वाक्यान्मन्त्रः स्यान्मन्त्रिणो विषे ॥ १४ ॥ मुष्टिस्तार्क्षकरस्यान्तःस्थिताङ्गुष्ठविषापहा ॥ तार्क्ष्य हस्तं समुद्यम्य तत्पश्चाङ्गुलिचालनात् ॥ १५ ॥ कुर्य्याद्विषस्य स्तम्भादीस्तदुक्तमदवीक्षया ॥ आकाशादेषभूबीजः पञ्चार्णाधिपतिर्मनुः ॥ १६ ॥ संस्तम्भयेऽतिविषतो भाषया स्तम्भयेद्विषम् ॥ व्यत्यस्तभूषया बीजो मन्त्रोऽयं साधुसाधिनः ॥ १७ ॥ संप्लवप्लावय यमः शब्दाद्यः संहरेद्विषम् ॥ दण्डमुत्थापयेदेष सुजप्ताम्भोऽभिषेकतः ॥ १८ ॥ सुजप्तशंखभेर्य्यादिनिःस्वनश्रवणेन वा ॥ संदेहत्येव संयुक्तो भूतेजोव्यत्ययात्स्थितः ॥ १९ ॥ भूवायुव्यत्ययान्मन्त्रो विष संक्रामयत्यसौ ॥ अन्तःस्थो निजवेश्मस्थो बीजाग्नीन्दुजलात्मभिः ॥ २० ॥ एतत्कर्म नयेन्मन्त्री गरुडाकृतिविग्रहः ॥ तार्क्षवरुणगेहस्थस्तज्जपान्नाशयेद्विषम् ॥ २१ ॥ श्रीजानुदण्डीमुदितं स्वधाश्रीबीजलाञ्छितम् ॥ स्नानपानात्सर्वविषं ज्वररोगापमृत्युजित् ॥ २२ ॥ पक्षि पक्षि महापक्षि महापक्षि वि वि स्वाहा ॥ पक्षि पक्षि महापक्षि महापक्षि क्षि क्षि स्वाहा ॥ द्वावेतौ पक्षिराण्मन्त्रौ विषघ्नावभिमन्त्रणात् ॥ पक्षिराजाय विद्महे पक्षिदेवाय धीमहि तन्नो गरुडः प्रचोदयात् ॥ वह्निस्थो पार्श्वतत्पूर्वौ दन्तश्रीकौ च दण्डिनौ ॥ २३ ॥ सकाली लाङ्गली चेति नीलकण्ठाद्यमीरितम् ॥ वक्षःकण्ठशिखाश्वेतं न्यसेत्स्तम्भे सुसंस्कृतौ ॥ २४ ॥ हर हर हृदयाय नमः कपर्दिने च शिरसि नीलकण्ठाय वै शिखां कालकूटविषभक्षणाय स्वाहा ॥ अथ वर्म च कण्ठे नेत्रं कृत्तिवा-

त्रिनेत्रकम् ॥ पूर्वाद्येराननैर्युक्तं श्वेतपीतारुणासितैः ॥ अभयं वरदं चापं वासुकिं च दधद्भुजैः ॥ यस्योपरीतपार्श्वस्थगौरीरुद्रोऽस्य देवता ॥ २५ ॥ पादजानुगुदानाभिहृत्कण्ठाननमूर्द्धसु ॥ मन्त्रार्णान्यस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥ २६ ॥ तर्जन्यादितदन्तासु सर्वमङ्गुष्ठयोर्न्यसेत् ॥ ध्यात्वेवं संहरेत्क्षिप्रं बद्धया शूलमुद्रया ॥ २७ ॥ कनिष्ठा ज्येष्ठया बद्धा तिस्रोऽन्याः प्रसृतेर्जवाः ॥ विषनाशे वामहस्तमन्यस्मिन्दक्षिणं करम् ॥ २८ ॥ ओं नमो भगवते नीलकण्ठाय चिः अमलकण्ठाय चिः सर्वज्ञकण्ठाय चिः क्षिप ओं स्वाहा ॥ अमलनीकण्ठाय नैकसर्वविषापहाय ॥ नमस्ते रुद्रमन्यव इति संमार्जनाद्विषं विनश्यति न सन्देहः कर्णजाप्यात् उपानहा वा ॥ यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ॥ विषव्याधिविनाशः स्यात्कृत्वा रुद्रविधानकम् ॥ २९ ॥ इत्यादिमहापुराणे आग्नेये दष्टचिकित्सनं नाम पंचनवत्यधिकद्विशततमोऽध्यायः ॥ २९५ ॥ अथ पञ्चाङ्गरुद्रेण दष्टचिकित्सा ॥ अग्निरुवाच ॥ वक्ष्ये रुद्रविधानं तु पञ्चाङ्गं सर्वदं परम् ॥ हृदयं शिवसङ्कल्पः शिरः सूक्तं तु पौरुषम् ॥ १ ॥ शिखाद्यचः सम्भूतसूक्तमाशुः कवचमेव च ॥ शतरुद्रीयमस्त्रं च रुद्रस्याङ्गानि पञ्च हि ॥ २ ॥ पञ्चाङ्गान्यस्य तं ध्यात्वा जपेद्रुद्रांस्ततः क्रमात् ॥ यज्जाग्रत इति सूक्तं पङ्क्तिं मानसं विदुः ॥ ३ ॥ ऋषिः स्याच्छिवसङ्कल्पश्छन्दस्त्रिष्टुबुदाहृतम् ॥ शिवः सहस्रशीर्षेति तस्य नारायणोऽप्यृषिः ॥ ४ ॥ देवता पुरुषोऽनुष्टुप्छन्दो ज्ञेयं च त्रैष्टुभम् अद्भ्यः सम्भूतसूक्तस्थ ऋषिरुत्तरगोनरः ॥ ५ ॥ आद्यानां तिसृणां त्रिष्टुप्छन्दोऽनुष्टुब्द्वयो रपि ॥ छन्दस्त्रैष्टुभमन्त्यायाः पुरुषोऽस्यापि देवता ॥ ६ ॥ आशुरिन्द्रो द्वादशानां छन्दस्त्रिष्टुबुदाहृतम् ॥ ऋषिः प्रोक्तः प्रातिरथः सूक्ते सप्तदशार्चिके ॥ ७ ॥ पृथक्पृथग्देवताः स्युः पुरुषविद्यङ्गदेवता ॥ अवशिष्टदैवतेषु च्छन्दोऽनुष्टुबुदाहृतम् ॥ ८ ॥ असौ यस्ताम्रो भवतीन्द्रः पुरुलिङ्गोक्तदेवता ॥ पाङ्क्तिच्छन्दोऽथ मर्म्माणि त्वपो लिङ्गोक्तदेवताः ॥ ९ ॥ रौद्राध्याये च सर्वस्मिन्नृषिः स्यात्परमेष्ठ्यपि ॥ प्रजापतिर्वा देवानां कुत्सस्य तिसृणां पुनः ॥ १० ॥ मनोद्वयोरुमेका स्याद्रुद्रो रुद्राश्च देवताः ॥ आद्योनुवाकोऽथ पूर्व एकरुद्रोक्त्यदैवतः ॥ ११ ॥ छन्दो गायत्रमाद्याया अनुष्टुप्तिसृणामृचाम् ॥ तिसृणां च तथा पाङ्क्तिरनुष्टुबथ संस्मृतम् ॥ १२ ॥ द्वयोश्च जगतीच्छन्दो रुद्राणामप्यशीतयः ॥ हिरण्यबाहवस्तिस्रो नमो वः किरिकाय च ॥ १३ ॥ पञ्चर्चो रुद्रदेवाः स्युर्मन्त्रे रुद्रानुवाकके ॥ विंशके रुद्रदेवास्ताः प्रथमा बृहती स्मृता ॥ १४ ॥

ऋग्द्वितीया त्रिजगती तृतीयौ त्रिष्टुबेवं च ॥ अनुष्टुभौ यजुस्तिस्र आर्य्यौभिज्ञः सुसिद्धिभाक् ॥ १५ ॥ त्रैलोक्यमोहनेनापि विषव्याध्यारिमर्दनम् ॥ इं श्रीं ह्रीं हूं त्रैलोक्यमोहनाय विष्णवे नमः ॥ अनुष्टुभं नृसिंहेन विषव्याधिविनाशनम् ॥ १६ ॥ ॐ हं इम् उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ १७ ॥ अमयेव तु पञ्चाङ्गोः मन्त्रः सर्वार्थसाधकः ॥ द्वादशाष्टाक्षरो मन्त्रौ विषव्याधिविमर्दनौ ॥ १८ ॥ कुञ्जिका त्रिपुरा गौरी चन्द्रिका विषहारिणी ॥ प्रसादमन्त्रो विषहृदायुरारोग्यवर्धनः ॥ सौरो विनायकस्तद्वद्रुद्रमन्त्राः सदाखिलाः ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये पञ्चांगरुद्रेण दष्टचिकित्सा नाम षण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥ अथ विषहन्मन्त्रौषधम् ॥ अग्निरुवाच ॥ ओं नमो भगवते रुद्राय छिन्द २ विषं ज्वालितपरशुपाणये च ॥ नमो भगवते पक्षिरुद्राय दष्टकं उत्थापय २ दष्टकम् कम्पय २ जल्पय २ ॥ सर्वदष्टमुत्थापय लल २ बन्ध २ मोचय २ वररुद्र गच्छ २ वध २ त्रुट २ वुक २ भीषय २ मुष्टिना संहर विषं ठ ठ ॥ पक्षिरुद्रेण ह विषं नाशमायाति मन्त्रणात् ॥ ओं नमो भगवते रुद्र नाशय विषं स्थावरजङ्गमं कृत्रिमाकृत्रिमविषमुपविषं नाशयं नानाविषं दष्टकविषं नाशय धम २ दम २ वम २ मेघान्धकारधारावर्षनिर्विषीभव संहर २ गच्छ २ आवेशय २ विषोत्थापनरूपं मन्त्रान्ताद्विषधारणम् ओं क्षिप २ स्वाहा ओं हां हीं खीं सः ठं द्रौं ह्रीं ठः ॥ जपादिना साधितस्तु सर्पान्बध्नाति नित्यशः ॥ १ ॥ एकद्वित्रिचतुर्बीजः कृष्णचक्राङ्गपञ्चकः ॥ गोपीजनवल्लभाय स्वाहा सर्वार्थसाधकः ॥ २ ॥ ओं नमो भगवते रुद्राय प्रेताधिपतये शृणु २ गर्ज २ भ्रामय २ मुञ्च २ मुञ्च २ कट २ आविश २ सुवर्णपक्षरुद्रो ज्ञापयति ठ ठ ॥ पातालक्षोभमन्त्रोऽयं मन्त्रणाद्विषनाशनः ॥ दंशकाहिदंशे सद्यो दष्टः काष्ठशिलादिना ॥ ३ ॥ विषशान्त्यै देहदंशं ज्वालकोकनदादिना ॥ शिरीषबीजपुष्पार्कक्षीरबीजकटुत्रयम् ॥ ४ ॥ विषं विनाशयेत्पानलेपनेनाञ्जनादिना ॥ शिरीषपुष्पस्य रसभावितं मरिचं सितम् ॥ ५ ॥ पाननस्याञ्जनाद्यैश्च विषं हन्यान्न संशयः ॥ कोषातकीवचाहिङ्गुशिरीषार्कपयोयुतम् ॥ ६ ॥ कटुत्रयं समेषाम्भो हरेन्नस्यादिना विषम् ॥ रामठेक्ष्वाकुसर्वाङ्गचूर्णं नस्याद्विषापहम् ॥ ७ ॥ इन्द्रबलाग्निकं द्रोणं तुलसी देविका सहा ॥ तद्रसार्कं त्रिकटुकं चूर्णं भक्ष्यं विषापहम् ॥ पञ्चाङ्गं कृष्णपञ्चम्यां शिरीषस्य विषापहम् ॥ ८ ॥ इत्यादिमहापुराणे आग्नेये विषहन्मंत्रौषधं

नाम सप्तनवत्यधिकद्विशततमोऽध्यायः ॥ २९७ ॥ अथ गोनसादिचिकित्सा ॥ अग्निरुवाच ॥ गोनसादिचिकित्सां च वसिष्ठ शृणु वच्मि ते ॥ ह्रीं ह्रीं अमलपाशि स्वाहा ॥ ताम्बूलस्वादनान्मंत्री हरेन्मण्डलिनो विषम् ॥ १ ॥ लशुनं रामठफलं कुष्ठाग्निव्योषकं विषे ॥ सुहीक्षीरं गव्यघृतं पक्षं पीत्वाऽहिजे विषे ॥ २ ॥ अथ राजिलदष्टे च पेया कृष्णा ससैन्धवा ॥ आज्यक्षौद्रशकृत्तोयं पुरीतत्या विषापहम् ॥ ३ ॥ सकृष्णा खण्डदुग्धाज्यं पातव्यं तेन माक्षिकम् ॥ व्योषं पिच्छं बिडालास्थि नकुलांगरुहैः समैः ॥ ४ ॥ चूर्णितैर्मेषदुग्धाक्तैर्धूपः सर्वविषापहः ॥ रोमनिर्गुण्डिकाकोलवर्णैर्वा लशुनं समम् ॥ ५ ॥ मुनिपत्रैः कृतस्वेदं दष्टं काञ्जिकपाचितैः ॥ मूषिकाः षोडश प्रोक्ता रसं कार्पासजं पिबेत् ॥ ६ ॥ सतैलं मूषिकार्त्तिघ्नं फलिनी कुसुमं तथा ॥ सनागरगुडं भक्ष्यं तद्विषारोचकापहम् ॥ ७ ॥ चिकित्सा विंशतिर्भूता लूताविषहरो गणः ॥ पद्मकं पाटली कुष्ठं नतमुशीरचन्दनम् ॥ ८ ॥ निर्गुण्डी सारिवा शेलु लूतार्त्ते सेचयेज्जलैः ॥ मुञ्जानिर्गुण्डिकंकोलपर्ण शुण्ठीनिशाद्वयम् ॥ ९ ॥ कारञ्जास्थि च तत्पङ्क्तैर्वृश्चिकार्त्तिहरं शृणु ॥ मञ्जिष्ठा चन्दनं व्योषपुष्पं शिरीषकोमुदम् ॥ १० ॥ संयोज्याश्चतुरो योगा लेपादौ वृश्चिकापहाः ॥ ओं नमो भगवते रुद्राय चिवि चिवि छिन्द छिन्द किरि किरि भिन्द भिन्द खड्गेन च्छेदय च्छेदय शूलेन भेदय चक्रेण दारय दारय ओं ह्रूं फट् ॥ मन्त्रेण मन्त्रितो देयो गर्दभादीन्निकृन्तति ॥ ११ ॥ त्रिफलोशीरमुस्ताम्बुमांसीपद्मकचन्दनम् ॥ अजाक्षीरेण पानादेर्गर्द्दभादेर्विषं हरेत् ॥ १२ ॥ हरेच्छिरीषपञ्चाङ्गं व्योषं शतपदीविषम् ॥ सकन्धरं शिरीषास्थि हरेदुन्दूरजं विषम् ॥ १३ ॥ व्योषं ससर्पिः पिण्डीतमूलमस्य विषं हरेत् ॥ क्षारव्योषवचाहिङ्गुविडंगं सैन्धवं नतम् ॥ १४ ॥ अम्बष्ठातिबलाकुष्ठं सर्वकीटविषं हरेत् ॥ यष्टिव्योषगुडक्षीरयोगः शुनो विषापहः ॥ १५ ॥ ओं सुभद्राये नमः ओं सुप्रभाये नमः ॥ यान्योषधानि गृह्यन्ते विधानेन विना जनैः ॥ १६ ॥ तेषां बीजं त्वया ग्राह्यमिति ब्रह्माऽब्रवीत् तान् ॥ तां प्रणम्योषधीं पश्चाद्यवान्प्राश्निप्य सुष्टिना ॥ १७ ॥ दश जप्त्वा मन्त्रमिदं नमस्कुर्य्यात्ततोषधम् ॥ त्वामुद्धराम्यूर्ध्वनेत्रनेत्रेण च भक्षयेत् ॥ १८ ॥ नमः पुरुषसिंहाय नमो गोपालकाय च ॥ आत्मनेवाभिजानाति रणे कृष्णपराजयम् ॥ १९ ॥ एतेन सत्यवाक्येन सगदो मेऽस्तु निष्पदु ॥ नमो वैदूर्य्यपत्ते तत्र रक्ष रक्ष मां सर्वविषेभ्यो गौरि गान्धारि चाण्डालि मातङ्गिनि स्वाहा हरिमाये ॥

ओषधादौ प्रयोक्तव्यो मन्त्रोऽयं स्थावरे विषे ॥ २० ॥ मुक्तमात्रे स्थिते ज्वाले पद्मं शीताम्बुसेचितम् ॥ पायचेत्सघृतं क्षौद्रं
विषं चेत्तदनन्तरम् ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये गोनसादिचिकित्सा नामाऽष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥
अथ बालग्रहहरबालतन्त्रम् ॥ अग्निरुवाच ॥ बालतन्त्रं प्रवक्ष्यामि बालादिग्रहमर्दनम् ॥ अथ जातादिने वत्सं ग्रही गृह्णाति पापिनी ॥
॥ १ ॥ गात्रोद्वेगो निराहारो नानाश्रीवाविवर्त्तनम् ॥ तच्चेष्टितमिदं तत्स्यान्मातॄणां च बलं हरेत् ॥ २ ॥ मत्स्यमांससुराभक्ष्यगन्धस्रग्धू-
पदीपकैः ॥ लिम्पेच्च धातकीलोध्रमञ्जिष्ठातालचन्दनैः ॥ ३ ॥ महिषाक्षेण धूपश्च द्विरात्रे भीषणी ग्रही ॥ तच्चेष्टा कासनिश्वासौ गात्रस-
ङ्कोचनं मुहुः ॥ ४ ॥ अजामूत्रैर्लिपेत्कृष्णा सेव्यापामार्गचन्दनैः ॥ गोशृङ्गदन्तकेशैश्च धूपयेत्पूर्ववद्बलिः ॥ ५ ॥ ग्रही त्रिरात्रे षण्टाली
तच्चेष्टाऽऽक्रन्दनं मुहुः ॥ जृम्भणं स्वनितं त्रासो गात्रोद्वेगमरोचनम् ॥ ६ ॥ केसराञ्जनगोहस्तिदन्तं साजपयो लिपेत् ॥ नखराजीबिल्वद-
लैर्धूपयेच्च बलिं हरेत् ॥ ७ ॥ ॥ ग्रही चतुर्थी काकोली गात्रोद्वेगप्ररोचनम् ॥ फेनोद्गारो दिशो दृष्टिः कुल्माषैः सासवैर्बलिः ॥ ८ ॥
गजदन्ताहिनिर्मोकवाजिमूत्रप्रलेपनम् ॥ सराजीनिम्बपत्रेण धूर्तकेशेन धूपयेत् ॥ ९ ॥ हंसाधिका पञ्चमी स्याज्जृम्भा श्वासोर्ध्वधारिणी ॥
मुष्टिबन्धश्च तच्चेष्टा बलिं मत्स्यादिना हरेत् ॥ १० ॥ मेषशृङ्गबलालोध्रशिलातालैः शिशुं लिपेत् ॥ फट्कारी तु ग्रही षष्ठी भयमोहप्र-
रोदनम् ॥ ११ ॥ निराहारोऽङ्गविक्षेपो हरेन्मत्स्यादिना बलिम् ॥ राजीमुग्गुलुकुष्ठैभदन्ताद्यैर्धूपलेपनैः ॥ १२ ॥ सप्तमे मुक्तकेश्यार्तः
पूतिगन्धो निजृम्भणम् ॥ सादः प्ररोदनं कासो धूपो व्याघ्रनखैर्लिपेत् ॥१३॥ वचागोमयगोमूत्रैः श्रीदण्डी चाष्टमे ग्रही ॥ दिशो निरीक्षणं
जिह्वाचालनं कासरोदनम् ॥ १४ ॥ बलिः पूर्वैव मत्स्याद्यैर्धूपलेपे च हिङ्गुला ॥ वचासिद्धार्थलशुनैश्चोर्ध्वग्राही महाग्रही ॥ १५ ॥ उद्वे-
जनोर्ध्वनिःश्वासः स्वमुष्टिद्वयखादनम् ॥ रक्तचन्दनकुष्ठाद्यैर्धूपयेल्लेपयेच्छिशुम् ॥ १६ ॥ कपिरोमनखैर्धूपो दशमी रोदनी ग्रही ॥ तच्चेष्टा
रोदनं शश्वत्सुगन्धो नीलवर्णता ॥ १७ ॥ धूपो निम्बेन भूतोग्रराजीसर्जरसैर्लिपेत् ॥ बलिं बहिर्हरेल्लाजकुल्माषकवकोदनम् ॥ १८ ॥ ॥२०५॥
यावत्रयोदशाहं स्यादेवं धूपादिका क्रिया ॥ ह्रियति मासिकं वत्सं पूतना सङ्कुली ग्रही ॥ १९ ॥ काकवद्रोदनं श्वासो भूतगन्धोऽक्षिमील-
नम् ॥ मोक्षणं नयनं तस्य बोधनेन च धूपनम् ॥ २० ॥ पीतासं दन्तसङ्गन्धो तैलदीपकः ॥ त्रिविधं पायसं मद्यं तिलं मांसं चतु-

विधम् ॥ २१ ॥ करञ्जाघो यमदिशि सप्ताहं तैर्बलिं हरेत् ॥ द्विमासिकं च मुकुटा वपुः शीतं च शीतलम् ॥२२॥ छर्दिः स्यान्मुखशो-
षादि पुष्पगन्धांशुकानि च ॥ अप्यूष्मोदनं दीप्तः कृष्णं नीरादि धूपकम् ॥ २३ ॥ तृतीये गोमुखी निद्रा सविण्मूत्रप्ररोदनम् ॥ यवाः
प्रियंगुः पललं कुल्माषं शाकमोदनम् ॥ २४ ॥ क्षीरं पूर्वं ददेन्मध्येऽहनि धूमश्च सर्पिषा ॥ पञ्चभङ्गेन तत्स्नानं चतुर्थे पिङ्गलार्तिस्तत् ॥
॥ २५ ॥ तनुः शीता पूतिगन्धः शोषः स म्रियते ध्रुवम् ॥ पञ्चमी ललना गात्रसादः स्यान्मुखशोणितम् ॥ २६ ॥ अपानः पीतवर्णश्च
मत्स्याद्यैर्दक्षिणे बलिः ॥ षण्मासे पङ्गुजा चेष्टा रोदनं विकृतः स्वरः ॥ २७॥ मत्स्यमांससुराभक्तपुष्पगन्धादिभिर्बलिः ॥ सप्तमे तु निरा-
हारा पूतिगन्धादिदन्तरुक् ॥ २८ ॥ पिष्टमांससुरामांसैर्बलिः स्यादमुनाष्टमे ॥ विस्फोटशोषणाद्यं स्यात्तद्विकित्सां न कारयेत् ॥ २९ ॥
नवमे कुम्भकर्ण्यार्त्तो ज्वरी छर्दति पालकम् ॥ रोदनं मांसकुल्मापमद्याद्यैर्वैश्वरे बलिः ॥ ३० ॥ दशमे तापसी चेष्टा निराहारोऽक्षिमील-
नम् ॥ घण्टा पताका पिष्टाक्ता सुरामांसबलिः समे ॥ ३१ ॥ राक्षस्येकादशी पीडा नेत्रादौ न चिकित्सितम् ॥ चञ्चला द्वादशे श्वासः
त्रासादिकाविचेष्टितम् ॥ ३२ ॥ बलिः पूर्वेऽथ मध्याह्ने कुल्माषाद्यैस्तिलादिभिः ॥ यातना तु द्वितीयेऽब्दे यातनं रोदनादिकम् ॥ ३३ ॥
तिलमांसमद्यमांसैर्बलिः स्नानादि पूर्ववत् ॥ तृतीये रोदनी कम्पो रोदनं रक्तमूत्रकम् ॥ ३४ ॥ गुडौदनं तिलापूपः प्रतिमा तिलपिष्टजा ॥
तिलस्नानं पञ्चपत्रैर्धूपो राजफलत्वचा ॥ ३५ ॥ चतुर्थे चटका शोफो ज्वरः सर्वाङ्गसादनम् ॥ मत्स्यमांसतिलाद्यैश्च बलिः स्नानं च धूप-
नम् ॥ ३६ ॥ पञ्चाला पञ्चमेऽब्दे तु ज्वरस्त्रासोऽङ्गसादनम् ॥ मांसौदनाद्यैश्च बलिर्मेषशृङ्गेण धूपनम् ॥ ३७ ॥ पलाशोदुम्बराश्वत्थ-
वटबिल्वदलाम्बुधृक् ॥ षष्ठेऽब्दे धावनी शोषो वैरस्यं गात्रसादनम् ॥ ३८ ॥ सप्ताहोभिर्बलिः पूर्वैर्धूपः स्नानं च भृङ्गकैः ॥ सप्तमे
यमुना च्छर्दिरवचो हासरोदनम् ॥ ३९ ॥ मांसपायसमद्याद्यैर्बलिः स्नानं च धूपनम् ॥ अष्टमे वा जातवेदा निराहारं प्ररोदनम् ॥ ४० ॥
कृसरापूपदध्याद्यैर्बलिः स्नानं च धूपनम् ॥ कालाब्दे नवमे बाह्वोरास्फोटो गर्जनं भयम् ॥४१॥ बलिः स्यात्कृसरापूपसक्तुकुल्माषपायसैः ॥
दशमेऽब्दे कलहंसी दाहोऽङ्गकृशता ज्वरः ॥ ४२ ॥ पोलिकापूपदध्यन्नैः पञ्चरात्रं बलिं हरेत् ॥ निम्बधूपः कुष्ठलेपो तथैकादशके ग्रही
॥ ४३ ॥ देवदूती निष्ठुरवाग्बलिर्लेपादि पूर्ववत् ॥ बलिका द्वादशे श्वासो बलिर्लेपादि पूर्ववत् ॥ ४४ ॥ त्रयोदशे वायवी च मुखबाह्या-

ङ्गसादनम् ॥ रक्तान्नगन्धमाल्याद्यैर्बलिः पञ्चदलैः क्षपेत् ॥ ४५ ॥ राजीनिम्बदलैर्धूपो याक्षिणी च चतुर्दशे ॥ चेष्टा शूलं ज्वरो दाहो मांसमक्षादिकैर्बलिः ॥ ४६ ॥ स्नानादि पूर्ववच्छान्त्यै मुण्डिकार्त्तिक्षिपञ्चके ॥ तच्चेष्टासृक्स्रवः शश्वत्कुर्य्यान्मातृचिकित्सनम् ॥ ४७ ॥ वानरी षोडशी भूपो पतेन्निद्रा सदा ज्वरः ॥ पायसाद्यैर्निशारात्रं चं बलिः स्नानादि पूर्ववत् ॥४८ ॥ गन्धवती सप्तदशे गात्रोद्वेगः प्ररोदनम् ॥ कुल्माषाद्यैर्बलिः स्नानधूपलेपादि पूर्ववत् ॥ ४९ ॥ दिनेशी पूतना नाम वर्षेशाः सुकुमारिकाः ॥ ओं नमः सर्वमातृभ्यो बालपीडासंयोगं भुञ्ज भुञ्ज चुट चुट स्फोटय स्फोटय स्फुर स्फुर गृह २ आकट्टय आकट्टय कट्टय २ एवं सिद्धरूपो ज्ञापयति ॥ हर हर निर्दोषे कुरु कुरु बालिकां वालं स्त्रियं पुरुषं वा सर्वग्रहाणामुपक्रमात् ॥ चामुण्डे नमो देव्यै ह्रूं ह्रूं ह्रीं अपसर दुष्टग्रहान् ह्रं तद्यथागच्छन्तु गृह्यकाः अन्यत्र पन्थानं रुद्रो ज्ञापयति ॥ सर्वबालग्रहेषु स्यान्मन्त्रोऽयं सार्वकामिकः ॥५०॥ ओं नमो भगवति चामुण्डे मुञ्च मुञ्च बालं बालिकां वा बलिं गृह्ण गृह्ण जय जय वस वस ॥ सर्वत्र बलिदानेऽयं रक्षाकृत्पठ्यते मनुः ॥ ब्रह्मा विष्णुः शिवः स्कन्दो गौरी लक्ष्मीर्गणादयः ॥ रक्षन्तु ज्वरदाहार्तं मुञ्चन्तु च कुमारकम् ॥५१॥ इत्यादिमहापुराणे आग्नेये बालग्रहहरबालतन्त्रनिरूपणं नाम नवनवत्यधिकद्विशततमोऽध्यायः ॥२९९॥

अथ ग्रहहृन्मन्त्रादिकम् ॥ अग्निरुवाच ॥ ग्रहोपहारमन्त्रादीन्वक्ष्ये ग्रहविमर्दनान् ॥ हर्षेच्छाभयशोकादिविरुद्धाशुचिभोजनात् ॥ १ ॥ गुरुदेवादिकोपाच्च पञ्चोन्मादा भवन्त्यथ ॥ त्रिदोषजाः सन्निपाता आगन्तव इति स्मृताः ॥ २ ॥ देवादयो ग्रहा जाता रुद्रकोपादनेकधा ॥ सरित्सरस्तडागादौ शैलोपवनसेतुषु ॥ ३ ॥ नदीसंगे शून्यगृहे बिलद्वार्य्येकवृक्षके ॥ ग्रहा गृह्णन्ति पुंसश्च स्त्रियं सुप्तां च गर्भिणीम् ॥ ४ ॥ आसन्नपुष्पां नग्नां च ऋतुस्नानं करोति या ॥ अवमानं नृणां वैरं विघ्नं भाग्यविपर्य्ययः ॥ ५ ॥ देवतागुरुधर्मादिसदाचारादिलङ्घनम् ॥ पतनं शैलवृक्षादेर्विधुन्वन्मूर्द्धजान्मुहुः ॥ ६ ॥ रुदन्नृत्यति रक्ताक्षो ह्रूंरूपोऽनुग्रही नरः ॥ उद्विग्नः शूलदाहार्त्तः क्षत्तृष्णार्त्तः शिरोर्त्तिमान् ॥ ७ ॥ देहि देहीति याचेत् बलिकामग्रही नरः ॥ स्त्रीमालाभोगस्नानेच्छू रतिकामग्रही नरः ॥ ८ ॥ महासुदर्शनो व्योमव्यापी विटपनासिकः ॥ पातालनारसिंहाद्या चण्डीमन्त्रा ग्रहार्दनाः ॥ ९ ॥ पृश्निहिङ्गुवचाचुक्रशिरीषदयितं परम् ॥ पाशाङ्कुशधरं देवमक्षमालाकपालिनम् ॥ १० ॥ खट्वांगान्जादिशक्तिं च दधानं चतुराननम् ॥ अन्तर्बाह्यादिखट्वांगपद्मस्थं रविमण्डले ॥ ११ ॥

आदित्यादियुतं प्राच्यं उदितेऽर्केऽर्घ्यकं ददेत् ॥ श्वासविषाग्निविप्रकुण्डीह्लेखासकलो भृगुः ॥ १२ ॥ अर्कोय भूर्भुवः स्वश्च जालिनीं कुलमुद्गरम् ॥ पद्मासनोऽरुणो रक्तवस्त्रसद्युतिविश्वकः ॥ १३ ॥ उदारः पद्मधृग्दोर्भ्यां सौम्यः सर्वांगभूषितः ॥ रक्ता हृदादयः सौम्या वरदाः पद्मधारिणः ॥ १४ ॥ विद्युत्पुञ्जनिभं वस्त्रं श्वेतः सौम्योऽरुणः कुजः ॥ बुधस्तद्वद्गुरुः पीतः शुक्रः शुक्रः शनैश्चरः ॥ १५ ॥ कृष्णाङ्गारनिभो राहुर्धूम्रः केतुरुदाहृतः ॥ वामोवामरुहस्तास्ते दक्षहस्तारुजानुषु ॥ १६ ॥ स्वनामाद्यन्तबीजास्ते हस्तौ संशोध्य चास्त्रतः ॥ अंगुष्ठादौ तले नेत्रे हृदाद्यं व्यापकं न्यसेत् ॥ १७ ॥ मूलबीजैस्त्रिभिः प्राणध्यायकं न्यस्य साङ्गकम् ॥ प्रक्षाल्य पात्रमस्त्रेण मूलेनापूर्य्य वारिणा ॥ १८ ॥ गन्धपुष्पाक्षतं न्यस्य दूर्वामर्घ्यं च मन्त्रयेत् ॥ आत्मानं तेन सम्प्रोक्ष्य पूजाद्रव्यं च वै ध्रुवम् ॥ १९ ॥ प्रभूतं विमलं सारमाराध्यं परमं सुखम् ॥ पीठाद्यान्कल्पयेदेतान्हृदा मध्ये विदिक्षु च ॥ २० ॥ पीठोपरि हृदो मध्ये दिक्षु चैव विदिक्षु च ॥ पीठोपरि हृदान्जं च केसरेष्वष्ट शक्तयः ॥ २१ ॥ वां दीप्तां वीं तथा सूक्ष्मां वुं जयां वूं च भद्रिकाम् ॥ वें विभूतीं वैं विमलां वोमसिघातविद्युताम् ॥ २२ ॥ वौं सर्वतोमुखीं वं पीठं वः प्राच्यं रविं यजेत् ॥ आवाह्य दद्यात्पाद्यादि हृत्षडङ्गेन सुव्रत ॥ २३ ॥ खंकारो दण्डिनो चण्डो मज्जा दशनसंयुता ॥ मांसदीर्घा जरद्वायुर्हृदैतत्सर्वदं रवेः ॥ २४ ॥ वह्नीशरक्षोमरुतां दिक्षु पूज्या हृदादयः ॥ स्वमन्त्रैः कर्णिकान्तस्था दिक्ष्वस्त्रं पुरतः सदृक् ॥ २५ ॥ पूर्वादिदिक्षु सम्पूज्याश्चन्द्रज्ञगुरुभार्गवाः ॥ पृश्निर्हिंगुवचा-चुक्रशिरीषलशुनामयैः ॥ नस्याञ्जनादि कुर्वीत साजमूत्रैर्ग्रहापहैः ॥ २६ ॥ पाठापथ्यावचाशिग्रुसिन्धुव्योषैः पृथक्पलैः ॥ अजाक्षीरा-ढके पंकसर्पिः सर्वग्रहान्हरेत् ॥ २७ ॥ वृश्चिकालीफलीकुष्ठं लवणानि च शार्ङ्गकम् ॥ अपस्मारविनाशाय तज्जलं त्वभिभोजयेत् ॥ ॥ २८ ॥ विदारीकुशकाशेक्षुक्काथजं पाययेत्पयः ॥ द्रोणे सयष्टिकूष्माण्डरसे सर्पिश्च संस्कृतम् ॥ २९ ॥ पञ्चगव्यं घृतं तद्वद्योगं ज्वरहरं शृणु ॥ ॐ भस्मास्त्राय विद्महे एकदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ॥ कृष्णोषणनिशाराम्लाद्राक्षातैलं गुडं लिहेत् ॥ ॥ ३० ॥ श्वासवानथ वा भार्ङ्गी सयष्टिमधुसर्पिषा ॥ पाठा तिक्ता कणा भार्ङ्गीमथ वा मधुना लिहेत् ॥ ३१ ॥ धात्री विश्वसिता कृष्णा मुस्ता खर्जूरमागधी ॥ पिप्पलीति द्विकात्रं तत्त्रयं मधुना लिहेत् ॥ ३२ ॥ कामलीजीरमाण्डूकीनिम्बपत्रीरसं पिबेत् ॥

व्योषपद्मकत्रिफलाविडङ्गदेवदारवः ॥ रास्नाचूर्णं समं सर्पिर्जग्ध्वा कासहरं ध्रुवम् ॥ २३ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मघ्नमन्त्रादिनिरूपणं नाम त्रिशततमोऽध्यायः ॥ ३०० ॥ अथ सूर्य्यार्चनम् ॥ अग्निरुवाच ॥ शय्या तु दण्डिसाजेशपावकश्चतुराननः ॥ सर्वार्थसाधकमिदं बीजं पिण्डार्थमुच्यते ॥ १ ॥ स्वयं दीर्घस्वराद्यं च बिन्दुषड्भूषितानि सर्वशः ॥ स्वातं साधु विषं चैव सबिन्दुं सकलं तथा ॥ २ ॥ गणस्य पञ्च बीजानि पृथग् दृष्टफलं महत् ॥ गणंजयाय नमः एकदंष्ट्राय चलत्कर्णिने गजवक्त्राय महोदरहस्ताय ॥ पञ्चाङ्गं सर्वसाम्राज्यं सिद्धिः स्याल्लक्षंजाप्यतः ॥ ३ ॥ गणाधिपतये गणेश्वराय गणनायकाय गणक्रीडाय ॥ दिग्दले पूजयेन्मूर्त्तीः पुरावच्चाङ्गपञ्चकम् ॥ वक्रतुण्डाय एकदंष्ट्राय महोदराय गजवक्त्राय विकटाय विघ्नराजाय धूम्रवर्णाय ॥ दिग्विदिक्षु यजेदेताँल्लोकेशांश्चैव मुद्रया ॥ ४ ॥ मध्यमातर्जनीमध्यगताङ्गुष्ठौ समुष्टिकौ ॥ चतुर्भुजं मोदकाढ्यं दण्डपाशांकुशान्वितम् ॥ ५ ॥ दन्तभक्ष्यधरं रक्तं साब्जं पाशांकुशैर्वृतम् ॥ पूजयेत्तं चतुर्थ्यां च विशेषेणाथ नित्यशः ॥ ६ ॥ श्वेतार्कमूलेन कृतं सर्वातिः स्यात्तिलैर्घृतैः ॥ तण्डुलैर्दधिमध्वाज्यैः सौभाग्यं वश्यता भवेत् ॥७॥ घोषासृक्प्राणधात्वर्दी दण्डी मार्त्तण्डभैरवः ॥ धर्मार्थकाममोक्षाणां कर्त्ता बिम्बपुटावृतः ॥८॥ ह्रस्वाः स्युर्मूर्त्तयः पञ्च दीर्घाण्यंगानि तस्य च ॥ सिन्दूरारुणमीशाने वामार्द्धदयितं रविम् ॥ ९ ॥ पाशांकुशधरं देवं ह्यक्षमालाकपालिनम् ॥ खट्वांगादिकशक्तिं च दधानं चतुराननम् ॥ १०॥ अंतर्बाह्ये विषद्रक्तं पद्मस्थं रविमंडलम् ॥ आदित्यादियुतं प्रार्च्य उदितेऽर्कैऽर्घकं ददेत् ॥११ ॥ श्वासं विषाग्निविपदण्डीन्दुलेखासकलो भृगुः ॥ अर्काय भूर्भुवः स्वरेज्वालिकुररुयसंगकम् ॥१२॥ पद्मासनोऽरुणो रक्तवस्तुसद्युतिबिम्बगः ॥ उदानः पद्महृद्दोर्भ्यां धूम्रकेतुरुदाहृतः ॥१३॥ रक्ता हृदादयः सौम्या वरदाः पद्मधारिणः ॥ विद्युत्पुंजनिभस्त्वर्कः श्वेतः सोमोऽरुणः कुजः ॥१४ ॥ बुधस्तद्वद्गुरुः पीतः शुक्लः शुक्रः शनैश्चरः ॥ कृष्णांगारनिभो राहुर्धूम्रकेतुरुदाहृतः ॥ वामोरुवामहस्तास्ते दक्षहस्ताभयप्रदाः ॥ १५ ॥ स्वनामाद्यन्तबीजास्ते हस्तौ संशोध्य चास्त्रतः ॥ अंगुष्ठादौ तले नेत्रे हृदाद्यं व्यापकं न्यसेत् ॥१६॥ मूलबीजोक्तिभिः प्राणव्यापकं न्यस्य सांमकम् ॥ प्रक्षाल्य पात्रमस्त्रेण मूलेनाऽऽपूर्य वारिणा ॥१७॥ गन्धपुष्पाक्षतं न्यस्य दूर्वामर्घ्यं च मंत्रयेत् ॥ आत्मानं तेन संप्रोक्ष्य पूजाद्रव्यं च वैभवम् ॥१८॥ प्रभूतं निमलं सारमाराध्यं परमं सुखम् ॥ पीठाद्यान्कल्पयेदेतान्हृदा मध्ये विदिक्षु च ॥१९॥ पीठोपरि हृदाद्यं च

केसरेष्वङ्गशक्तयः ॥ सं दीप्तां रीं तथा सूक्ष्मां रुं जयां रूं च भद्रया ॥२०॥ रें विभूतिं रैं विमलां रोमगां रौं चाथ विद्युतम् ॥ रं सर्वतोमुखीं रः च पीठं प्राच्यं रविं यजेत् ॥२१॥ आवाह्य दद्यात्पाद्यादि हृत्पङ्केन सुव्रतः ॥ खकारो दण्डिनौ चंडो मज्जादशनसंयुता ॥२२॥ मांसादीधोजवद्वायुहृदैतत्सर्वदं रवेः ॥ वह्नीशरक्षोमरुतां दिक्षु पूज्या हृदादयः ॥ २३ ॥ स्वमंत्रैः कर्णिकान्तःस्था दिक्षु तं पुरतश्च धृक् ॥ पूर्वादिदिक्षु संपूज्याश्चन्द्रज्ञगुरुभार्गवाः ॥ २४ ॥ आग्नेयादिषु कोणेषु कुजमन्दाहिकेतवः ॥ स्नात्वा विधिवदादित्यमाराध्यार्घ्यपुरःसरम् ॥ २५ ॥ कृतान्तमैशे निर्माल्यं तेजश्चण्डाय दीपितम् ॥ रोचनं कुङ्कुमं वारि रक्तगन्धाक्षताङ्कुराः ॥ २६ ॥ वेणुबीजयवाः शालिश्यामाकातिलराजिकाः ॥ जपापुष्पान्वितां दत्त्वा पात्रैः शिरसि धार्य्य तत् ॥ २७ ॥ जानुभ्यामवनिं गत्वा सूर्य्यायार्घ्यं निवेदयेत् ॥ स्वविद्यामन्त्रितैः कुम्भैर्नवभिः प्राच्यं वै ग्रहान् ॥ २८ ॥ ग्रहादिशान्तये स्नानं जम्बार्क सर्वमाप्नुयात् ॥ संग्रामविजयं साग्निं बीजदोषं सबिन्दुकम् ॥ २९ ॥ न्यस्य मूर्द्धादिपादान्तं मूलं पूज्य तु मुद्रया ॥ स्वाङ्गानि च यथान्यासमात्मानं भावयेद्रविम् ॥ ३० ॥ ध्यानं च मारणस्तम्भे पीतमाप्यायने सितम् ॥ रिपुघातविधौ कृष्णं मोहयेच्छक्रचापवत् ॥ ३१ ॥ योऽभिषेकजपध्यानपूजाहोमपरः सदा ॥ तेजस्वी ह्यजयः श्रीमान्स मुद्रादौ जयं लभेत् ॥ ३२ ॥ ताम्बूलादाविदं न्यस्य जप्त्वा दद्यादुशीरकम् ॥ न्यस्तबीजेन हस्तेन स्पर्शनं तद्वशे स्मृतम् ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेये सूर्यार्चनविधानं नामैकोत्तरत्रिशततमोऽध्यायः ॥ ३०१ ॥ अथ नानामन्त्रौषधनिरूपणम् ॥ अग्निरुवाच ॥ वाक्कर्मपार्श्वयुक्शुक्रतोकक्रते मतो प्लवः ॥ हुतान्तादेशवर्णेयं विद्या मुख्या सरस्वती ॥ १ ॥ अक्षाराशी वर्णलक्षं जपेत्स मतिमान्भवेत् ॥ अत्रिः सवह्निर्वामाक्षिबिन्दुरिन्द्राय हृत्परः ॥ २ ॥ वज्रपद्मधरं शक्रं पीतमावाह्य पूजयेत् ॥ नियुतं होमयेदाज्यतिलांस्तेनाभिषेचयेत् ॥ ३ ॥ नृपादिर्भ्रष्टराज्यादी राज्यपुत्रादिमाप्नुयात् ॥ हृल्लेखा शक्तिदेवाख्या दोषाग्निर्दण्डिदण्डवान् ॥ ४ ॥ शिवामिष्ट्वा जपेच्छक्तिमष्टम्यादिचतुर्दशीम् ॥ चक्रपाशाङ्कुशधरां साभयां वरदायिकाम् ॥ ५ ॥ होमादिना च सौभाग्यं कवित्वं पुत्रवान्भवेत् ॥ ओं ह्रीं ओं नमः कामाय सर्वजनहिताय सर्वजनमोहनाय प्रज्वलिताय सर्वजनहृदयं ममात्मगतं कुरु २ ओं ॥ एतज्जपादिना मन्त्री वंशं तत्सकलं जगत् ॥ ६ ॥ ओं ह्रीं चामुण्डे अमुकं दह २ पच २ मम वशमानय २ ठ ठ ॥ ओं वशीकरणकृन्मन्त्रश्चामुण्डायाः प्रकी-

स्तितः ॥ फलत्रयकषायेण वराङ्गं क्षालयेद्वशे ॥ ७ ॥ अश्वगन्धायवैः स्त्री तु निशाकर्पूरकादिना ॥ पिप्पली तण्डुलान्यष्टौ मरीचानि च विंशतिः ॥ ८ ॥ बृहतीरसलेपाच्च वशे स्यान्मरणान्तिकम् ॥ कटीरमूलत्रिकटुक्षौद्रलेपस्तथा भवेत् ॥ ९ ॥ हिमं कापित्थकरसं मागधी मधुकं मधु ॥ तेषां लेपः प्रयुक्तस्तु दम्पत्योः स्वस्तिमावहेत् ॥ १० ॥ सशर्करो गोनिलेपात्कदम्बरसको मधु ॥ सहदेवी महालक्ष्मीः पुत्रजीवी कृताञ्जलिः ॥११॥ एतच्चूर्णं शिरःक्षिप्तं लोकस्य वशमुत्तमम् ॥ त्रिफलाचन्दनक्वाथप्रस्थाद्विकुडवं पृथक् ॥१२॥ भृङ्गहेमरसं दोषा तांवती चुम्ब (छम्बु) कं मधु ॥ घृतैः पक्वा निशा छाया शुष्का लेप्या तु रञ्जनी ॥१३॥ विदारीं सोच्चटामाषचूर्णीभूतां सशर्कराम् ॥ मथितां यः पिबेत्क्षीरैर्नित्यं स्त्रीशतकं व्रजेत् ॥१४॥ गुल्ममापतिलव्रीहिचूर्णक्षौद्रसिताम्वितम् ॥ अश्वत्थवंशदर्भाणां मूलं वै वैष्णवीश्रियोः ॥ १५ ॥ मूलं दूर्वाश्वगन्धोत्थं पिबेत्क्षीरैः सुतार्थिनी ॥ कोन्नीलक्ष्म्योः शिफा धात्री वज्रं लोध्रं वटांकुरम् ॥१६॥ आज्यक्षीरमृतौ पेयं पुत्रार्थं त्रिदिवं स्त्रिया ॥ पुत्रार्थिनी पिबेत्क्षीरं श्रीमूलं सवटांकुरम् ॥१७॥ श्रीवटांकुर देवीनां रसं नस्ये पिबेच्च सा ॥ श्रीपद्ममूलमुत्क्षीरमश्वत्थोत्तरमूलयुक् ॥१८॥ तरलं पयसा युक्तं कार्पासफलपल्लवम् ॥ अपामार्गस्य पुष्पाग्रं नवं समहिषीपयः ॥ ॥ १९ ॥ पुत्रार्थं चार्द्धषट्श्लोकैर्योगाश्चत्वार ईरिताः ॥ शर्करोत्पलपुष्पाक्षलोध्रचन्दनसारिवाः ॥ २० ॥ स्रवमाणे स्त्रिया गर्भे दातव्यास्तण्डुलाम्भसा ॥ लाजायष्टिसिताद्राक्षाक्षौद्रसर्पींषि या लिहेत् ॥ २१ ॥ अटरूषकलाङ्गल्योः काकमाच्याः शिफा पृथक् ॥ नाभेरधः समालिप्य प्रसूते प्रमदा सुखम् ॥ २२ ॥ रक्तं शुक्लं जपापुष्पं रक्तशुक्लस्तनौ पिबेत् ॥ केसरं बृहतीमूलं गोपीषष्टितृणोत्पलम् ॥ ॥ २३ ॥ साजक्षीरं सतैलं तद्भक्षणं रोमजन्मकृत् ॥ शीर्यमाणेषु केशेषु स्थापनं च भवेदिदम् ॥ २४ ॥ धात्रीभृङ्गरसप्रस्थं तैलं च क्षीरमाढकम् ॥ षष्टयंजनपलं तैलं तत्केशाक्षिशिरोहितम् ॥ २५ ॥ हरिद्राराजवृक्षत्वक्चिंचालवणलोध्रकौ ॥ पीता खारी हरेदाशु गवाक्षुदरबृंहणम् ॥ २६ ॥ ओं नमो भगवते त्र्यम्बकाय उपशमय २ चुलु २ मिलि २ भिद २ गोमानिनी चक्रिणि ह्रूं फट् ॥ अस्मिन् ग्रामे गोकुलस्य रक्षां कुरु शान्तिं कुरु २ ठ ठ ठ ॥ घण्टाकर्णो महासेनो वीरः प्रोक्तो महाबलः ॥२७॥ मारीनिर्नाशनकरः स मां पातु जगत्पतिः ॥ श्लोको चैव न्यसेदेतो मन्त्रौ गोरक्षको पृथक् ॥ २८ ॥ इत्यादिमहापुराणे आग्नेये नानाविधमंत्रौषधादिकं नाम द्व्यधिकत्रि-

शततमोऽध्यायः ॥ ३०२ ॥ अथाग्नेयाक्षरार्चनम् ॥ अग्निरुवाच ॥ यदा जन्मर्क्षगश्चन्द्रो भानुः सप्तमराशिगः ॥ पौष्णः कालः स विज्ञेयस्तदा श्वासं परीक्षयेत् ॥ १ ॥ कण्ठोष्ठौ चलतः स्यानाद्यस्य वक्रा च नासिका ॥ कृष्णा च जिह्वा सप्ताहं जीवितं तस्य वै भवेत् ॥ २ ॥ तारो मेषो मिषं दन्ती नरो दीर्घौ घना रसः ॥ कुद्वोल्काय महोल्काय वीरोल्काय शिखा भवेत् ॥ ३ ॥ उल्काय सहस्रोल्काय वैष्णवोऽष्टाक्षरो मनुः ॥ कानिष्ठादितदष्टानामङ्गुलीनां च पर्वसु ॥ ४ ॥ ज्येष्ठाग्रेण क्रमात्तारं मूर्द्धन्यष्टाक्षरं न्यसेत् ॥ तर्जन्यां तारमंगुष्ठे लग्ने मध्यमया च तत् ॥ ५ ॥ तलेऽगुष्ठे तदुत्तारं बीजोत्तारं ततो न्यसेत् ॥ रक्तगौरधूम्रहरिज्ञातरूपाः सितास्त्रयः ॥ ६ ॥ एवंरूपानिमान् वर्णान्भावबद्धान्न्यसेत्क्रमात् ॥ हृदास्यनेत्रमूर्द्धांघ्रितालुगुह्यकरादिषु ॥ ७ ॥ अंगानि च न्यसेद्बीजान्यस्याथ करदेहयोः ॥ यथात्मनि तथा देवे न्यासः कार्य्यः करं विना ॥ ८ ॥ हृदादिस्थानगान्वर्णान्गन्धपुष्पैः समर्चयेत् ॥ धर्माद्यन्याद्यधर्मादि गात्रे पीठेऽम्बुजे न्यसेत् ॥ ९ ॥ यत्र (पद्म) केसरकिञ्जल्कव्यापिसूर्य्येन्दुदाहिनाम् ॥ मण्डलं त्रितयं तावद्वेदैस्तत्र न्यसेत्क्रमात् ॥ १० ॥ गुणाश्च तत्र सत्त्वाद्याः केसरस्थाश्च शक्तयः ॥ विमलोत्कर्षिणी ज्ञानक्रियायोगाश्च वै क्रमात् ॥ ११ ॥ प्रह्वी सत्या तथेशानानुग्रहा मध्यतस्ततः ॥ योगपीठं समभ्यर्च्य समावाह्य हरिं यजेत् ॥१२॥ पाद्यार्घ्याचमनीयं च पीतवस्त्रविभूषणम् ॥ एतत्पञ्चोपचारं च सर्वं मूलेन दीयते ॥१३॥ वासुदेवादयः पूज्याश्चत्वारो दिक्षु मूर्त्तयः ॥ विदिक्षु श्रीसरस्वत्यै रतिशान्त्यै च पूजयेत् ॥१४॥ शंखं चक्रं गदां पद्मं मुसलं खड्गशार्ङ्गके ॥ वनमालान्वितं दिक्षु विदिक्षु च यजेत्क्रमात् ॥१५॥ अभ्यर्च्य च बहिस्ताक्ष्यं देवस्य पुरतोऽर्चयेत् ॥ विष्वक्सेनं च सोमेशं मध्ये आवरणाद्बहिः ॥ इन्द्रादिपरिचारेण पूज्य सर्वमवाप्नुयात् ॥ १६ ॥ इत्यादिमहापुराणे आग्नेयेऽङ्गाक्षरपूजाविधिर्नाम त्र्यधिकत्रिशततमोऽध्यायः ॥३०३॥ अथ पञ्चाक्षरादिपूजादिकम् ॥ अग्निरुवाच ॥ मेषः संज्ञा विषं साज्यमस्ति दीर्घोदकं रसः ॥ एतत्पञ्चाक्षरं मन्त्रं शिवदं च शिवात्मकम् ॥ १ ॥ तारकादि समभ्यर्च्य देवत्वादि समाप्नुयात् ॥ ज्ञानात्मकं परं ब्रह्म परं बुद्धिः शिवो हृदि ॥२॥ तच्छक्तिभूतः सर्वेशो भिन्नो ब्रह्मादिमूर्त्तिभिः ॥ मन्त्राणाः पञ्चभूतानि तन्मात्रा विषयास्तथा ॥ ३ ॥ प्राणादिवायवः पञ्च ज्ञानकर्मेन्द्रियाणि च ॥ सर्वं पञ्चाक्षरं ब्रह्म तद्वदष्टाक्षरात्मकम् ॥ ४ ॥ गव्येन प्रोक्षयेदीशास्थानं मन्त्रेण चोदितम् ॥ तत्र सम्भृतसम्भारः शिवमिज्या विधानतः ॥ ५ ॥ मूलमूर्त्यङ्ग-

विद्याभिस्तण्डुलक्षेपणादिकम् ॥ कृत्वा चरुं पचेत्क्षीरं पुनस्तद्विभजेत्त्रिधा ॥ ६ ॥ निवेद्यं परं हुत्वा सशिष्योऽन्यद्गजेद्गुरुः ॥ आचम्य सकलीकृत्य दद्याच्छिष्याय देशिकः ॥७॥ दन्तकाष्ठं हृदा जप्तं क्षीरवृक्षादिसम्भवम् ॥ संशोध्य दंतान् तं क्षिप्त्वा प्रक्षाल्यैतत्क्षिपेद्भुवि ॥८॥ पूर्वेण सौम्यवारीशगतं शुभमतोऽशुभम् ॥ पुनस्तं शिष्यमायान्तं शिखाबन्धादिरक्षितम्॥९॥ कृत्वा वेद्यां सहानेन स्वपेद्भास्तरं बुधः ॥ सुषुप्तं वीक्ष्य तं शिष्यः प्रभाते श्रावयेद्गुरुम् ॥ १० ॥ शुभैः सिद्धिपदैर्भक्तिस्तैः पुनर्मण्डलार्चनम् ॥ मण्डलं भद्रकायुक्तं पूजयेत्सर्वसिद्धिदम् ॥११॥ स्नात्वाचम्य मृदा देहं मन्त्रैरालिप्य कल्प्यते ॥ शिवतीर्थे नरः स्नायादघमर्षणपूर्वकम् ॥ १२ ॥ हस्ताभिषेकं कृत्वाथ प्रायात्पूजागृहं बुधः ॥ मूलेनाब्जासनं कुर्य्यात्तेन पूरककुम्भकान् ॥ १३ ॥ आत्मानं योजयित्वोर्द्धं शिखान्ते द्वादशाङ्गुले ॥ संशोष्य दग्ध्वा स्वतनुं प्लावयेदमृतेन च ॥ १४ ॥ ध्यात्वा दिव्यं वपुस्तस्मिन्नात्मानं च पुनर्नयेत् ॥ कृत्वैवं चात्मशुद्धिः स्याद्दिव्यस्यार्चनमारभेत् ॥ १५ ॥ क्रमात्कृष्णसितश्यामरक्तपीता नगादयः ॥ मन्त्राणां दण्डिनाङ्गानि तेषु सर्वास्तु मूर्त्तयः ॥ १६ ॥ अङ्गुष्ठादिकनिष्ठान्तं विन्यस्याङ्गानि सर्वतः ॥ न्यसेन्मन्त्राक्षरं पादगुह्यहृद्वक्त्रमूर्द्धसु ॥ १७ ॥ व्यापकं न्यस्य मूर्द्धादि मूलमङ्गानि विन्यसेत् ॥ रक्तपीतश्यामासितान्पीठपादान्स्वकोणजान् ॥ १८ ॥ स्वाङ्गान्मन्त्रैर्न्यसेद्धात्राण्यधर्मादीनि दिक्षु च ॥ तत्र पद्मं च सूर्य्यादिमण्डलत्रितयं गुणान् ॥ १९ ॥ पूर्वादिपत्रे वामाद्या नवमी कर्णिकोपरि ॥ वामा ज्येष्ठा क्रमाद्रौद्री काली कलविकारिणी ॥ २० ॥ बलविकारिणी चाथ बलप्रमथनी तथा ॥ सर्वभूतदमनी च नवमी च मनोन्मनी ॥ २१ ॥ श्वेता रक्ता सिता पीता श्यामा वह्निनिभाऽसिता ॥ कृष्णारुणाश्च ताः शक्तीर्ज्वालारूपाः स्मरेत्क्रमात् ॥ २२ ॥ अनन्तयोगपीठे च आवाह्याथ हृदब्जतः ॥ स्फटिकाभं चतुर्बाहुं फलशूलधरं शिवम् ॥ २३ ॥ साभयं वरदं पञ्चवदनं च त्रिलोचनम् ॥ पत्रेषु मूर्त्तयः पञ्च स्थाप्यास्तत्पुरुषादयः ॥ २४ ॥ पूर्वे तत्पुरुषः श्वेतो ह्यघोरोऽष्टभुजोऽसितः ॥ चतुर्बाहुमुखः पीतः सद्योजातश्च पश्चिमे ॥ २५ ॥ वामदेवः स्त्रीविलासी चतुर्वक्त्रभुजोऽरुणः ॥ सौम्ये पश्चास्य ईशाने ईशानः सर्वदः सितः ॥ २६ ॥ इष्टाङ्गानि यथान्यायमनन्तं सूक्ष्ममर्चयेत् ॥ सिद्धेश्वरं त्वेकनेत्रं पूर्वादौ दिशि पूजयेत् ॥ २७ ॥ एकरुद्रं त्रिणेत्रं च श्रीकंठं च शिखण्डिनम् ॥ ऐशान्यादिविदिक्षेते विद्येशाः कमलासनाः ॥ २८॥ श्वेतः पीतः सितो रक्तो धूम्रो रक्तोऽरुणः

सितः ॥ शूलाशनिशरेष्वासवाहवश्चतुराननाः ॥ २९ ॥ उमा चण्डीशनन्दीशो महाकालो गणेश्वराः ॥ वृषो भृङ्गरिटिस्कन्दानुत्तरादौ प्रपूजयेत् ॥ ३० ॥ कुलिशं शक्तिदण्डौ च खड्गपाशध्वजौ गदाम् ॥ शूलं चक्रं यजेत्पद्मं पूर्वादौ देवमर्च्य च ॥ ३१ ॥ ततोऽधिवासितं शिष्यं पाययेद्व्यपञ्चकम् ॥ आचान्तं प्रोक्ष्य नेत्रान्तेनेंत्रे नेत्रेण बन्धयेत् ॥ ३२ ॥ द्वारे प्रवेशयेच्छिष्यं मण्डपस्याथ दक्षिणे ॥ सासनादिकुशासीनं तत्र संशोधयेद्गुरुः ॥ ३३ ॥ आदितत्त्वानि संहृत्य परमार्थे लयः क्रमात् ॥ पुनरुत्पादयेच्छिष्यं सृष्टिमार्गेण देशिकः ॥ ३४ ॥ न्यासं शिष्ये ततः कृत्वा तं प्रदक्षिणमानयेत् ॥ पश्चिमद्वारमानीय क्षेपयेत्कुसुमाञ्जलिम् ॥ ३५ ॥ यस्मिन्पतन्ति पुष्पाणि तन्नामाद्यं विनिर्दिशेत् ॥ पार्श्वे यागभुवः स्थाते कुण्डे सन्नाभिमेखले ॥ ३६ ॥ शिवाग्निं जनयित्वेङ्गा पुनः शिष्येण चार्चयेत् ॥ ध्यानेनात्मनि तं शिष्यं संहृत्य प्रलयक्रमात् ॥ ३७ ॥ पुनरुत्पाद्य तत्पाणौ दद्याद्दर्भांश्च मन्त्रितान् ॥ पृथिव्यादीनि तत्त्वानि जुहुयाद्धृदयादिभिः ॥ ३८ ॥ एकैकस्य शतं हुत्वा व्योममूलेन होमयेत् ॥ हुत्वा पूर्णाहुतिं कुर्य्यादस्त्रेणाष्टाहुतीर्हुनेत् ॥ ३९ ॥ प्रायश्चित्तं विशुद्ध्यर्थं ततः शेषं समापयेत् ॥ कुम्भं सुमन्त्रितं प्राच्यं शिशुं पीठेऽभिषेचयेत् ॥ ४० ॥ शिष्ये तु समयं दत्त्वा स्वर्णाद्यैः स्वगुरुं यजेत् ॥ दीक्षा पञ्चाक्षरस्योक्ता विष्ण्वादेरेवमेव हि ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये पञ्चाक्षरदीक्षाविधानं नाम चतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥ अथ पञ्चपञ्चाशद्विष्णुनामानि ॥ अग्निरुवाच ॥ जपन्वै पञ्चपञ्चाशद्विष्णुनामानि यो नरः ॥ मन्त्रजप्यादिफलभाक् तीर्थेष्वर्चादि चाक्षयम् ॥ १ ॥ पुष्करे पुण्डरीकाक्षं गयायां च गदाधरम् ॥ राघवं चित्रकूटे तु प्रभासे दैत्यसूदनम् ॥ २ ॥ जयं जयन्त्यां तद्वच्च जयन्तं हास्तिनापुरे ॥ वाराहं वर्द्धमाने च काश्मीरे चक्रपाणिनम् ॥ ३ ॥ जनार्दनं च कुब्जाम्रे मथुरायां च केशवम् ॥ कुब्जाम्रके हृषीकेशं गङ्गाद्वारे जटाधरम् ॥ ४ ॥ शालग्रामे महायोगं हरिं गोवर्धनाचले ॥ पिण्डारके चतुर्बाहुं शङ्खोद्धारे च शार्ङ्गिनम् ॥ ५ ॥ वामनं च कुरुक्षेत्रे यमुनायां त्रिविक्रमम् ॥ विश्वेश्वरं तथा शोणे कपिलं पूर्वसागरे ॥ ६ ॥ विष्णुं महोदधौ विद्याद्गङ्गासागरसङ्गमे ॥ किष्किन्धायां वनमालं देवं रैवतकं विदुः ॥ ७ ॥ काशीतटे महायोगं विरजायां रिपुञ्जयम् ॥ विशाखयूपे ह्यजितं नेपाले लोकभावनम् ॥ ८ ॥ द्वारकायां विद्धि कृष्णं मन्दरे मधुसूदनम् ॥ लोकाकुले रिपुहरं शाल-

ग्रामे (?) हरिं स्मरेत् ॥ ९ ॥ पुरुषं पूरुषवटे त्रिमले च जगत्प्रभुम् ॥ अनन्तं सेन्धवारण्ये दण्डके शार्ङ्गधारिणम् ॥ १० ॥ उत्पलावर्त्तके शौरिं नर्मदायां श्रियःपतिम् ॥ दामोदरं रैवतके नन्दायां जलशायिनम् ॥ ११ ॥ गोपीश्वरं च सिन्धौ माहेन्द्रे चाच्युतं विदुः ॥ सह्याद्रौ देवदेवेशं वेंकुण्ठं मागधे वने ॥ १२ ॥ सर्वपापहरं विन्ध्ये औद्रे तु पुरुषोत्तमम् ॥ आत्मानं हृदये विद्धि जपतां भुक्तिमुक्तिदम् ॥ १३ ॥ वैटवटे वैश्रवणं चत्वरे चत्वरे शिवम् ॥ पर्वतेपर्वते रामं सर्वत्र मधुसूदनम् ॥ १४ ॥ नरं भूमौ तथा व्योम्नि वसिष्ठे गरुडध्वजम् ॥ वासुदेवं च सर्वत्र संस्मरन्मुक्तिमुक्तिभाक् ॥ १५ ॥ नामान्येतानि विष्णोश्च जप्त्वा सर्वमवाप्नुयात् ॥ क्षेत्रेष्वोतेषु यः श्राद्धं दानं जप्यं च तर्पणम् ॥ १६ ॥ तत्सर्वं कोटिगुणितं मृतो ब्रह्ममयो भवेत् ॥ यः पठेच्छृणुयाद्वापि निर्मलः स्वर्गमाप्नुयात् ॥ ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये पंचपंचाशद्विष्णुनामकथनं नाम पंचाधिकत्रिशततमोऽध्यायः ॥ ३०५ ॥ अथ षट्प्रयोगतन्त्रिवारणमन्त्राः ॥ अग्निरुवाच ॥ स्तम्भो विद्वेषणोच्चाटमुत्सादो भ्रममारणे ॥ व्याधिश्चेति स्मृतं क्षुद्रं तन्मोक्षो वक्ष्यते शृणु ॥ १ ॥ ओं नमो भगवते उन्मत्तरुद्राय भ्रम भ्रम भ्रामय भ्रामय अमुकं त्रासय उद्भ्रामय उद्भ्रामय रौद्रेण हूं फट् ठ ठ ॥ इंमशानेनिशि जप्तेन तिलक्तं मधुना हुनेत् ॥ चिताग्नौ धूर्तसमिद्भिर्भ्राम्यते सततं रिपुः ॥ २ ॥ हेमगैरिकया कृष्णा प्रतिमा हैमसूचीभिः ॥ जप्त्वा विध्येच्च तत्कंठे हृदि वा म्रियते रिपुः ॥ ३ ॥ खरवालं चिताभस्म ब्रह्मदण्डी च मर्कटी ॥ गृहे वा मूर्ध्नि तच्चूर्णं जप्तमुत्सादकृत्क्षिपेत् ॥ ४ ॥ भृग्वाकाशौ सदीप्तमग्निर्भृगुवह्निश्च वर्म फट् ॥ एवं सहस्रारे ॥ हूं फट् आचक्राय स्वाहा हृदयं विचक्राय शिरः ॥ शिखाचक्रायाथ कवचं विचक्रायाथ नेत्रकम् ॥ ५ ॥ सुचाक्रयास्त्रमुदिष्टं ज्वालाचक्राय पूर्ववत् ॥ शार्ङ्गं सुदर्शनं क्षुद्रग्रहदुत्सर्वसाधनम् ॥ ६ ॥ मूर्द्धोक्षिमुखहृद्गुह्यपादे ह्यस्याक्षराण्यसेत् ॥ चक्राब्जासनमध्याभं दंष्ट्रिणं च चतुर्भुजम् ॥ ७ ॥ शंखचक्रगदापद्मशलाकाङ्कुशपाणिनम् ॥ चापिनं पिङ्गकेशाक्षमरव्याप्तत्रिविष्टपम् ॥ ८ ॥ नाभिस्तेनाग्निना विद्धा नश्यन्ते व्याधयो ग्रहाः ॥ पीतं चक्रधरं रक्तास्त्वराः श्यामसरान्तरम् ॥ ॥ ९ ॥ नेमिः श्वेता बहिः कृष्णवर्णरेखा च पार्थिवी ॥ मध्येन्तरे तारवर्णानेवं चक्रद्वयं लिखेत् ॥ १० ॥ आदावानीय कुम्भोदं गोचरे सन्निधाय च ॥ इष्ट्वा सुदर्शनं तत्र याम्ये चक्रे हुनेत्क्रमात् ॥ ११ ॥ आज्यापामार्गसमिधो ह्यक्षतं तिलसर्षपौ ॥ पायसं गव्यमाज्यं

च सहस्राष्टकसंख्यया ॥ १२ ॥ हुतशेषं निधेत्कुम्भे प्रतिद्रव्यं विधानवित् ॥ प्रस्थापनेन कृतं पिण्डं कुम्भे तस्मिन्निधेश्वयेत् ॥ १३ ॥ विष्वक्सेनादि सर्वं तत्रैव विशेत्तत्रैव दक्षिणे ॥ नमो विष्णुतनेभ्यः सर्वशान्तिकरेभ्यः प्रतिगृह्णन्तु शान्तयं नमः ॥ दद्यादनेन मन्त्रेण हुतशेषाम्भसा बलिम् ॥ १४ ॥ फलके कल्पिते पात्रे पञ्चाशत्क्षीरशाखिनः ॥ गव्यघृतेन निधेश्चैव दिक्ष्वेवं होमयेद्विजैः ॥ १५ ॥ सदक्षिणमिदं होमद्रव्यं भूतादिनाशनम् ॥ गव्याक्तपत्रालिखितैर्निष्पर्णैः क्षुद्रशुद्धनम् ॥ १६ ॥ दूर्वाभिरायुषे पद्मैः श्रिये पुत्रा उदुम्बरैः ॥ गोसिद्धयै सर्षपा गोष्ठे मेधायै सर्वशाखिना ॥ १७ ॥ ओं क्षौं नमो भगवते नारसिंहाय ज्वालामालिने दीप्तदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्वज्वरविनाशाय दह २ पच २ रक्ष २ हूं फट् ॥ मन्त्रोऽयं नारसिंहस्य सकलाघविवारणः ॥ जप्यादिना हरेत्क्षुद्रग्रहमारीविषामयान् ॥ चूर्णमण्डूकवसया जलाग्निस्तम्भकृद्भवेत् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये नारसिंहादिमंत्रकथनं नाम षडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥ अथ त्रैलोक्यमोहनमंत्राः ॥ अग्निरुवाच ॥ वक्ष्ये मन्त्रं चतुर्वर्गसिद्धयै त्रैलोक्यमोहनम् ॥ ओं श्रीं ह्रीं हूं ओं नमः पुरुषोत्तम पुरुषोत्तम प्रतिरूप लक्ष्मीनिवास सकलजगत्क्षोभण सर्वस्त्रीहृदयदारण त्रिभुवनमदोन्मादकर सुरमनुजसुन्दरीजनमनांसि तापय २ दीपय २ शोषय २ मारय २ स्तम्भय २ द्रावय २ आकर्षय २ परम सुभग सर्वसौभाग्यकर कामप्रद अमुकं हन २ चक्रेण गदया खड्गेन सर्वावयवैर्भिंद २ पाशेन कट २ अङ्कुशेन ताडय २ त्वर २ किं तिष्ठसि यावत् तावत् समीहितं मे सिद्धं भवति हूं फट् नमः ॥ ओं पुरुषोत्तम त्रिभुवनमदोन्मादकर हूं फट् हृदयाय नमः । कर्षय महाबल हूं फट् अस्त्राय । त्रिभुवनेश्वर सर्वजनवशंकरि हन २ दारय २ मम वशमानय २ हूं फट् नेत्राय । त्रैलोक्यमोहन रूपीकेशाप्रतिरूप सर्वस्त्रीहृदयाकर्षण आगच्छागच्छ नमः ॥ सङ्गाक्षिव्यापकेनैव न्यासं मूलवदीरितम् ॥ १ ॥ इष्ट्वा सञ्जप्य पञ्चाशत्सहस्रमाभिषिच्य च ॥ कुण्डेऽग्नौ दैविके वह्नौ चरुं कृत्वा शतं हुनेत् ॥ २ ॥ पृथग्दधि घृतं क्षीरं चरुं साज्यं पयःघृतम् ॥ द्वादशाहुतिमूलेन सहस्रं चाक्षतांस्तिलान् ॥ ३ ॥ यवं मधुत्रयं पुष्पं फलं दधि समिच्छतम् ॥ हुत्वा पूर्णाहुतिं शिष्टं प्राशयेत्सघृतं चरुम् ॥ ४ ॥ सम्भोज्य विप्रानाचार्य्यं तोषयेत्सिध्यते मनुः ॥ स्नात्वा यथावदाचम्य वाग्यतो यागमन्दिरम् ॥ ५ ॥ गत्वा पद्मासनं बद्धा शोषयेद्विधिना वपुः ॥ रक्षोघ्नविघ्नकृद्दिक्षु न्यसेदादौ सुदर्शनम् ॥ ६ ॥ यं च बीजं नाभिमध्यस्थं धूम्रं चण्डानिलात्मकम् ॥ अशेषकल्मषं देहाद्विश्लेषयदनु-

स्मरेत् ॥ ७ ॥ रंबीजं हृदयान्जस्थं स्मृत्वा ज्वालाभिरादहेत् ॥ ऊर्ध्वाधस्तिर्य्यग्गाभिस्तु मूर्ध्निं संप्लावयेद्वपुः ॥ ८ ॥ ध्यात्वा-
मृतेर्वह्निश्चान्तः सुषुम्नामार्गगामिभिः ॥ एवं शुद्धवपुः प्राणानायम्य मनुना त्रिधा ॥ ९ ॥ विन्यसेन्न्यस्तहस्तांतः शक्तिं मस्तकवक्त्रयोः ॥
गुह्ये गले दिक्षु हृदि कुक्षौ देहे च सर्वतः ॥ १० ॥ आवाह्य ब्रह्मरन्ध्रेण हृत्पद्मे सूर्य्यमण्डलात् ॥ तारेणैवं परात्मानं स्मरेत्तं सर्वल-
क्षणम् ॥ ११ ॥ त्रैलोक्यमोहनाय विद्महे स्मराय (?) धीमहि ॥ तन्नो विष्णुः प्रचोदयात् ॥ आत्मार्चनात्कृतद्रव्यं
प्रोक्षयेच्छुद्धपात्रकम् ॥ कृत्वात्मपूजां विधिना स्थण्डिले तं समर्चयेत् ॥ १२ ॥ कूर्मादिकल्पिते पीठे पद्मस्थं गरुडोपरि ॥ सर्वाङ्गसु-
न्दरं प्राप्तवयोलावण्ययौवनम् ॥ १३ ॥ मदाघूर्णिततताम्राक्षमुदारं स्मरविह्वलम् ॥ दिव्यमाल्याम्बरालेपभूषितं सस्मितंाननम् ॥ १४ ॥
विष्णुं नानाविधानेकपरिवारपरिच्छदम् ॥ लोकानुग्रहणं सौम्यं सहस्रादित्यतेजसम् ॥ १५ ॥ पञ्चबाणधरं प्राप्तकामेक्षं द्विचतुर्भुजम् ॥
देवस्त्रीभिर्वृतं देवीमुखासक्तेक्षणं जपेत् ॥ १६ ॥ चक्रं शंखं धनुः खड्गं गदां मुसलमङ्कुशम् ॥ पाशं च बिभ्रतं चार्चेदावाहादिविसर्गतः
॥ १७ ॥ श्रियं वामोरुजङ्घास्थां श्लिष्यन्तीं पाणिना पतिम् ॥ साञ्जवामकरां पीनां श्रीवत्सकौस्तुभान्विताम् ॥ १८ ॥
मालिनं पीतवस्त्रं च चक्राद्याढ्यं हरिं यजेत् ॥ ओं सुदर्शन महाचक्रराज धर्मशान्त दुष्टभयङ्कर च्छिद च्छिद विदारय विदारय परमन्त्रान्
ग्रस ग्रस भक्षय भक्षय भूतानि चाशय चाशय हूं फट् ओं जलचराय स्वाहा खड्गतीक्ष्ण च्छिन्द च्छिन्द खड्गाय नमः शार्ङ्गाय सशराय
हूं फट् ॥ भूतग्रामाय विद्महे चतुर्विधाय धीमहि ॥ तन्नो ब्रह्म प्रचोदयात् ॥ संवर्तक श्वसन पोथय पोथय हूं फट् स्वाहा पाशं बन्ध बन्ध
आकर्षय आकर्षय हूं फट् अङ्कुशेन कट्ट २ हूं फट् ॥ क्रमाद्भुजेषु मन्त्रैः स्वरोभिरस्त्राणि पूजयेत् ॥ १९ ॥ ओं पक्षिराजाय हूं फट् ।
तार्क्ष्यं यजेत्कर्णिकायामङ्गदेवान्यथाविधि ॥ शक्तिरिन्द्रादियन्त्रेषु तार्क्ष्याद्या धृतचामराः ॥२०॥ शक्तयोऽन्ते प्रयोज्यादौ सुरेशाद्याश्च
दण्डिना ॥ पीते लक्ष्मीसरस्वत्यौ रतिप्रीतिजयाः सिताः ॥ २१ ॥ कीर्त्तिकान्त्यौ सिते श्यामे तुष्टिपुष्ट्यौ स्मरोदिते ॥ लोकेशान्तं ॥२११॥
यजेदेवं विष्णुमिष्टार्थसिद्धये ॥ २२ ॥ ध्यायेन्मन्त्रं जपित्वैनं जुहुयात्त्वभिषेचयेत् ॥ ओं श्रीं क्रीं ह्रीं हूं त्रैलोक्यमोहनाय विष्णवे नमः ॥
एतत्पूजादिना सर्वान्कामानाप्नोति पूर्ववत् ॥ २३ ॥ तोयैः सम्मोहनी पुष्पैर्नित्यं तेन च तर्पयेत् ॥ ब्रह्मा सशक्रश्चीदण्डी बीजं त्रैलोक्य-

मोहनम् ॥ २४ ॥ जत्वा बिलक्षं हुत्वा च लक्षं बिल्वैश्च साज्यकैः ॥ तद्दलैः फलगन्धाद्यैर्वाभिस्त्वायुराप्नुयात् ॥ २५ ॥ तयाभिषेक-
होमादिक्रियातुष्टो ह्यभीष्टदः ॥ ओं नमो भगवते वराहाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि हृदयाय स्वाहा ॥ पञ्चाङ्गं नित्यमयुतं
जप्त्वायुराज्यमाप्नुयात् ॥ २६ ॥ इत्यादिमहापुराणे आग्नेये त्रैलोक्यमोहनमंत्रकथनं नाम सप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥ अथ
त्रैलो० लक्ष्म्यादिपूजा ॥ अग्निरुवाच ॥ वक्षः सवह्निर्मायाक्षी दण्डी श्रीः सर्वसिद्धिदा ॥ महाश्रिये महासिद्धे महाविद्युत्प्रभे नमः ॥ १ ॥
श्रिये देवि विजये नमः गौरि महाबले बन्ध २ नमः हूं महाकाये पद्महस्ते हूं फट् श्रियै नमः हूं श्रिये फट् श्रियै नमः (श्रियै फट् श्रीं नमः)
श्रिये श्रीदे नमः स्वाहा श्रीफट् ॥ अस्याङ्गानि नवोक्तानि तेष्वेकं च समाश्रयेत् ॥ बिल्वमेकलक्षं वा जप्त्वाज्याब्जैश्च भूतिदः ॥ २ ॥
श्रीगेहे विष्णुगेहे वा श्रियं पूज्य धनं लभेत् ॥ आज्याक्तैस्तण्डुलैर्लक्षं जुहुयात्खादिरानले ॥ ३ ॥ राजा वश्यो भवेद्वह्निः श्रीश्च स्यादुत्त-
रोत्तरम् ॥ सर्षपाम्भोऽभिषेकेण नश्यन्ते सकला ग्रहाः ॥ ४ ॥ बिल्वलक्षाहुता लक्ष्मीर्वित्तवृद्धिश्च जायते ॥ शक्रवेश्म चतुर्द्वारं हृदये
चिन्तयेदथ ॥ ५ ॥ बलाकां वामनां श्यामां श्वेतपङ्कजधारिणीम् ॥ ऊर्ध्वबाहुद्वयां ध्यायेत्क्रीडन्तीं द्वारि पूर्ववत् ॥ ६ ॥ ऊर्ध्वीकृतेव
हस्तेन रक्तपङ्कजधारिणीम् ॥ श्वेताङ्गीं दक्षिणे द्वारि चिन्तयेद्वनमालिनीम् ॥ ७ ॥ हरितां दोर्द्वयेनोर्ध्वमुद्वहन्तीं सिताम्बुजम् ॥ ध्यायेः
द्विभीषिकां नाम श्रीदूतीं द्वारि पश्चिमे ॥ ८ ॥ शाङ्करीमुत्तरे द्वारि तन्मध्येऽष्टदलं कजम् ॥ वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः
॥ ९ ॥ ध्येयास्ते पद्मपत्रेषु शंखचक्रगदाधराः ॥ अञ्जनशैरकाश्मीरहेमाभास्ते सुवाससः ॥ १० ॥ आग्नेयादिषु पत्रेषु गुग्गुलुश्च कुर-
ण्टकः ॥ दमकः सलिलं चेति हस्तिनो रजतप्रभाः ॥ ११ ॥ हेमकुम्भधराश्चैते कर्णिकायां श्रियं स्मरेत् ॥ चतुर्भुजां सुवर्णाभां सपद्मोर्ध्व-
भुजद्वयाम् ॥ १२ ॥ दक्षिणाभयहस्ताभां वामहस्तवरप्रदाम् ॥ श्वेतगन्धांशुकामेकरौप्यमालास्त्रधारिणीम् ॥ १३ ॥ ध्यात्वा सपरिवारां
तामभ्यर्च्य सकलं लभेत् ॥ द्रोणाब्जपुष्पं श्रीवृक्षपर्णं मूर्ध्नि न धारयेत् ॥ १४ ॥ लवणामलकं वर्ज्यं नागादित्यतिथौ क्रमात् ॥ पाय-
साशी जपेत्सूक्तं श्रियस्तेनाभिषेचयेत् ॥ १५ ॥ आवाहादिविसर्गान्तं मूर्ध्नि ध्यात्वार्चयेच्छ्रियम् ॥ बिल्वाज्यान्नपायसेन पृथग् योगः
श्रिये भवेत् ॥ १६ ॥ विषं महिषकालाग्निरुद्रज्योतिर्वकद्वयम् ॥ ओं ह्रीं महामहिषमर्दिनि ठं ठः मूलमन्त्रं महिषाहिंसिके नमः ॥ महिषशान्तं

भ्रामय २ ओं हूं फट् ठ ठं महिषं हेषय २ महिषं हेषय २ हूं महिषनिषूदनि फट् ॥ दुर्गाहृदयमित्युक्तं साङ्गं सर्वार्थसाधकम् ॥ १७ ॥ यजेद्यथोक्तं तां देवीं पीठं चैवाङ्गमध्यगम् ॥ ओं ह्रीं दुर्गे रक्षणि स्वाहा चेति दुर्गायै नमः ॥ वरवर्ण्यै नमः ॥ आर्य्यायै कनकप्रभायै कृतिकायै अभयदायै कन्यकायै सुरूपायै ॥ पत्रस्थाः पूजयेद्देता मूर्तीराद्यैः स्वरैः क्रमात् ॥ १८ ॥ चक्राय शंखाय गदायै खड्गाय धनुषे बाणाय ॥ अष्टम्याद्यैरिमां दुर्गां लोकेशान्तां यजेदिति ॥ दुर्गायोगः समायुः श्रीस्वास्थिरकृज्जयादिकृत् ॥ १९ ॥ संसाध्यैवान्नमन्त्रेण तिलहोमी वशीकरः ॥ जयः पद्मैस्तु दूर्वाभिः शान्तिकामः पलाशजैः ॥ २० ॥ पुष्टिः स्यात्काकक्षेण मृतिर्द्वेषादिके भवेत् ॥ ग्रहक्षुद्रभयापत्तिं सर्वामेव मनुर्हरेत् ॥ २१ ॥ ओं दुर्गे दुर्गे रक्षणि स्वाहा ॥ रक्षाकरीयमुदिता जयदुर्गाङ्गसंयुता ॥ श्यामां त्रिलोचनां देवीं ध्यात्वात्मानं चतुर्भुजम् ॥२२॥ शंखचक्राब्जशूलासिशूली रौद्ररूपिणीम् ॥ युद्धादौ सञ्जयेद्देतां यजेत्खड्गादिके जये ॥२३॥ ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते चर रक्षणि स्वाहा ॥ युद्धार्थं च जपेन्मंत्रं शत्रूञ्जयति योधकः ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये लक्ष्म्यादिपूजावर्णनं नामाष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥ अथ त्वरितापूजाः ॥ अग्निरुवाच ॥ त्वरिताङ्गान्समाख्यास्ये भुक्तिमुक्तिप्रदायकान् । ओं आधारशक्त्यै नमः ॥ ओं ह्रीं (प्रों) पुरु २ महासिंहाय नमः । ओं पद्माय नमः ॥ ओं ह्रीं हूं खेचछेक्षः ॥ स्त्रीं ओं हूं क्षैं हूं फट् त्वरितायै नमः । खेच हृदयाय नमः । चछे शिरसे नमः । छेक्षः शिखा यै नमः ॥ क्षस्त्रीं कवचाय नमः । स्त्रीं हूं नेत्रायं नमः । हूं खे अस्त्राय फट् नम । ओं त्वरितायिद्यां विद्महे तूर्णविद्या च धीमहि । तन्नो देवी प्रचोदयात् ॥ श्रीप्रगीतायै नमः ॥ हूंकारायै नमः ॥ ओंकारायै नमः ॥ ओं खेच हृदयाय नमः ॥ खेवर्य्यै नमः ॥ ओं चण्डायै नमः ॥ क्षस्त्रीं कवचाय नमः ॥ छेदन्यै नमः ॥ क्षेत्रण्यै नमः ॥ स्त्रियै हूंकार्य्यै नमः ॥ क्षेमङ्कर्यै जयायै विजयायै किङ्कराय रक्ष ॥ ओं त्वरिताज्ञया स्थिरो भव वषट् ॥ तोतला त्वरिता तूर्णेत्येवं विद्येयमीरिता ॥ १ ॥ शिरोभ्रूमस्तके कण्ठे हृदि नाभौ च गुह्यके ॥ ऊर्वोश्च जानुजंघोरुद्वये चरणयोः क्रमात् ॥२॥ न्यस्ताङ्गो न्यस्तमन्त्रस्तु समस्तं व्यापकं न्यसेत् ॥ पार्वती शबरी चेशा वरदाभयहस्तिका ॥ ३ ॥ मयूरवलयापिच्छमौलिः किसलयांशुका ॥ सिंहासनस्था मायूरबर्हच्छत्रसमन्विता ॥४॥ त्रिनेत्रा श्यामला देवी वनमालाविभूषणा ॥ विप्रादिकर्णाभरणा क्षत्रकेयूरभूषणा ॥ ५ ॥ वैश्यवर्गकटीबन्धा

वृषाहिकृतनूपुरा ॥ एवंरूपात्मिका भूत्वा तन्मन्त्रं नियुतं जपेत् ॥ ६ ॥ ईशः किरातरूपोऽभूत्पुरा गौरी च तादृशी ॥ जपेद्ध्यायेत्पूजयेत्तां सर्व-
सिद्धये विषादिहृत् ॥ ७ ॥ अष्ट सिंहासने पूज्या दले पूर्वादिके क्रमात् ॥ अङ्गगायत्री प्रणीता हुङ्काराद्या दलाग्रके ॥ ८ ॥ फट्कारी
चाग्रतो देव्याः श्रीबीजेनार्चयेदिमाः ॥ लोकेशायुधवर्णास्ताः फट्कारी तु धनुर्धरा ॥ ९ ॥ जया च विजया द्वाःस्थे पूज्यं सौवर्णयष्टिके ॥
किङ्करा बर्बरी मुण्डी लगुडी च तयोर्बहिः ॥ १० ॥ इद्धैवं सिद्धये द्रव्यैः कुण्डे योन्याकृतौ हुनेत् ॥ हेमलाभोऽर्जुनैर्द्रान्यैर्गोधूमैः पुष्टि-
सम्पदः ॥ ११ ॥ यवैर्यान्यैस्तिलैः सर्वसिद्धिरीतिविनाशनम् ॥ अक्षैरुन्मत्तता शत्रोः शाल्मलीभिश्च मारणम् ॥ १२ ॥ जम्बूभिर्धनधा-
न्यातिस्तुष्टिर्नीलोत्पलैरपि ॥ रक्तोत्पलैर्महापुष्टिः कुन्दपुष्पैर्महोदयः ॥ १३ ॥ मल्लिकाभिः पुरक्षोभः कुमुदैर्जनवल्लभः ॥ अशोकैः पुत्र-
लाभः स्यात्पाटलाभिः शुभाङ्गना ॥ १४ ॥ आम्रैरायुस्तिलैर्लक्ष्मीर्बिल्वैः श्रीश्चम्पकैर्धनम् ॥ इष्टं मधुकपुष्पैश्च बिल्वैः सर्वज्ञतां लभेत्
॥ १५ ॥ बिलक्षणमथात्तर्वातिर्द्वौमाद्र्यानात्तयेज्यया ॥ मण्डलेऽभ्यर्च्य गायत्र्या आहुतीः पञ्चविंशतिम् ॥ १६ ॥ दद्याच्छतत्रयं मूला-
त्पल्लवैर्दीक्षितो भवेत् ॥ पञ्चगव्यं पुरा पीत्वा चरुकं प्राशयेत्सदा ॥ १७ ॥ इत्यादिमहापुराणे आग्नेये त्वरितापूजाविधिवर्णनं नाम नवा-
धिकशततमोऽध्यायः ॥ ३०९ ॥ अथ त्वरितामन्त्रादि ॥ अग्निरुवाच ॥ अपरां त्वरितामद्यां वक्ष्येऽहं भुक्तिमुक्तिदाम् ॥ पुरे वज्राकुले
देवीं रजोभिर्लिखिते यजेत् ॥ १ ॥ पद्मगर्भे दिग्विदिक्षु चाष्टौ वज्राणि वीथिकाम् ॥ द्वारशोभोपशोभा च लिखेच्छीघ्रं स्मरेन्नरः
॥ २ ॥ अष्टादशभुजां सिंहे वामजङ्घा प्रतिष्ठिता ॥ दक्षिणा द्विगुणा तस्याः पादपीठे समर्पिता ॥ ३ ॥ नागभूषां
वज्रकुण्डे खड्गं चक्रं गदां क्रमात् ॥ शूलं शरं तथा शक्तिं वरदं दक्षिणैः करैः ॥ ४ ॥ धनुः पाशं शरं घण्टां तर्जनीं
शंखमङ्कुशम् ॥ अभयं च तथा वज्रं वामपार्श्वे धृतायुधम् ॥ ५ ॥ पूजनाच्छत्रुनाशः स्याद्राष्ट्रं जयति लीलया ॥ दीर्घायू राष्ट्र-
भूतिः स्यादिन्द्राद्यैश्च दिक्सिद्धिभाक् ॥ ६ ॥ तलेति सप्तपात्राणां कालाग्निर्भुवनान्तकः ॥ ओंकारादिस्वरारभ्य यावद्ब्रह्माण्डवाचकम् ॥
॥ ७ ॥ ओंकाराद्भ्रामयेत्तोयं तोतला त्वरिता ततः ॥ तकाराद्भ्रामयेत्तोयं तोतला त्वरिता ततः ॥ प्रस्तावं सम्प्रवक्ष्यामि स्वरवर्गं लिखे-
द्बुधि ॥ ८ ॥ तालुवर्गः कवर्गः स्याद्द्वितीयो जिह्वतालुकः ॥ चतुर्थस्तालुजिह्वाग्रो जिह्वादन्तस्तु पञ्चमः ॥ ९ ॥ षष्ठोष्ठपुटसम्पन्नो मिश्र-

वर्गस्तु सप्तमः ॥ ऊष्माणः स्याच्छवर्गस्तु उद्वरेच्च मनुं ततः ॥ १० ॥ षष्ठस्वरसमारूढमूष्मणोन्तं सबिन्दुकम् ॥ तालुवर्गाद्वितीयं तु स्वरैकादशयोजितम् ॥ ११ ॥ जिह्वातालुसमायोगः प्रथमं केवलं भवेत् ॥ तदेव च द्वितीयं तु अधस्ताद्विनियोजयेत् ॥ १२ ॥ एकादशस्वरैर्युक्तं प्रथमं तालुवर्गतः ॥ ऊष्माणस्य द्वितीयं तु अधस्ताद्दशयोजयेत् ॥ १३ ॥ षोडशस्वरसंयुक्तमूष्माणस्य द्वितीयकम् ॥ जिह्वादन्तसमायोगे प्रथमं योजयेद्बुधः ॥ १४ ॥ मिश्रवर्गाद्वितीयं तु अधस्तात्पुनरेव तु ॥ चतुर्थस्वरसम्भिन्नं तालुवर्गादिसंयुतम् ॥ १५ ॥ ऊष्मणश्च द्वितीयं तु अधस्ताद्विनियोजयेत् ॥ स्वरैकादशभिन्नं तु ऊष्मणान्तं सबिन्दुकम् ॥ १६ ॥ पञ्चस्वरसमारूढं ओष्ठसम्पुटयोगतः ॥ द्वितीयमक्षरं चान्त्यं जह्वाग्रे तालुयोगतः ॥ १७ ॥ प्रथमं पञ्चमे योज्यं स्वरादेर्नोद्धृता इमे ॥ ओंकाराद्या नमोऽन्ताश्च जपेत्स्वाहाग्निकार्य्यके ॥ १८ ॥ ओं ह्रीं हूं हृः हृदयं हां हृश्चेति शिरः ॥ शिखा ह्रीं ज्वल ज्वल शिखा स्यात्कवचं हुलुद्वयम् ॥ ह्रीं श्रीं क्ष्रूंनेत्रत्रयाय विद्यानेत्रं प्रकीर्तितम् ॥ क्षौं हं स्त्रौं हूं फडस्त्राय गुह्याङ्गानि पुरा न्यसेत् ॥ त्वरिताङ्गानि वक्ष्यामि विद्याङ्गानि शृणुष्व मे ॥ आदिर्हृदयं प्रोक्तं त्रिचतुःशिर इष्यते ॥ १९ ॥ पञ्चषष्ठः शिखा प्रोक्ता कवचं सप्तमोष्टमम् ॥ तारकं तु भवेन्नेत्रं नवार्द्धाक्षरलक्षणम् ॥ २० ॥ तोतलेति समाख्याता वज्रतुण्डे ततो भवेत् ॥ ख ख हूं दशबीजा स्याद्वज्रतुण्डेन्द्रद्रूतिका ॥ २१ ॥ खेचरी ज्वालिनी ज्वाले खखेति ज्वालिनी दश ॥ वर्धशबरीभीषणी खखेति च शवर्य्यापि ॥ २२ ॥ छे छेदानि करालिनि खखेति च करालयापि ॥ वक्षः श्रवद्रक्तलवनी खख ती प्लवंग्यपि ॥ २३ ॥ स्त्रीकालकारे धुनने शासी श्वसनवेगिका ॥ क्षेपक्षेकपिले हंस कापिला नाम दूतिका ॥ २४ ॥ हूं तेजोवति रौद्री च मातंगी रौद्रदूतिका ॥ पुटे पुटे ख ख खड्गे फट् ब्रह्मक्रदूतिका ॥ २५ ॥ वैतालिनि दशार्णाः स्युस्त्याजान्याद्विपलालवत् ॥ हृदादिकन्यासादौ स्यान्मध्ये नेत्रे न्यसेत्सुधीः ॥ २६ ॥ पादादारभ्य मूर्द्धान्तं शिर आरभ्य पादयोः ॥ अङ्घ्रिजानूरुगुह्ये च नाभिहृत्कण्ठदेशतः ॥ ॥ २७ ॥ वज्रमण्डलमूर्ध्वे च अधोर्ध्वे चादिबीजतः ॥ सोमरूपं ततो गावं धारामृतसुवर्षिणम् ॥ २८ ॥ विशन्तं ब्रह्मरन्ध्रेण साधकस्तु विचिन्तयेत् ॥ मूर्धास्यकण्ठहृन्नाभौ गुह्योरुजानुपादयोः ॥ २९ ॥ आदिबीजं न्यसेन्मन्त्री तर्जन्यादि पुनः पुनः ॥ ऊर्ध्वं सोममधः पद्मं शरीरं बीजविग्रहम् ॥ ३० ॥ यो जानाति न मृत्युः स्यात्तस्य न व्याधयो ज्वराः ॥ यजेज्जपेत्तां नित्यस्य ध्यायेद्देवीं शताष्टकम् ॥ ३१ ॥ मुद्रा

वक्ष्ये प्रणीताद्याः प्रणीताः पञ्चधा स्मृताः ॥ ग्रथितौ तु करौ कृत्वा मध्येऽङ्गुष्ठौ निपातयेत् ॥ ३२ ॥ तर्जनी मूर्ध्नि संलग्नां विन्यसेतां
शिरोपरि ॥ प्रणीतेयं समाख्याता हृदेशे तां समानयेत् ॥ ३३ ॥ ऊर्ध्वे तु कन्यसामध्ये सबीजान्तां विदुर्द्विजाः ॥ नियोज्य तर्जनीम-
ध्येऽनेकलग्नां परस्पराम् ॥ ३४ ॥ ज्येष्ठाग्रं निक्षिपेन्मध्ये भेदनी सा प्रकीर्तिता ॥ नाभिदेशे तु तां बद्ध्वा अङ्गुष्ठावुत्क्षिपेत्ततः ॥ ३५ ॥
करालि तु महामुद्रा हृदये योज्य मन्त्रिणः ॥ पुनस्तु पूर्ववद्बद्धलग्नां ज्येष्ठां समुत्क्षिपेत् ॥ ३६ ॥ वज्रतुण्डा समाख्याता वज्रदेशे तु
बन्धयेत् ॥ उभाभ्यां चैव हस्ताभ्यां मणिबन्धं तु बन्धयेत् ॥ ३७ ॥ त्रीणि त्रीणि प्रसार्य्यैति वज्रमुद्रा प्रकीर्तिता ॥ दण्डं खड्गं चक्रगदा
मुद्राचाकारतः स्मृता ॥३८॥ अङ्गुष्ठेनाक्रमेत्त्रीणि विशूलं चोर्द्धतो भवेत् ॥ एका तु मध्यमोर्द्धा तु शक्तिरेव विधीयते ॥३९ ॥ शरं च
वरदं चापं पाशं भारं च घण्टया ॥ शंखमङ्कुशमभयं पद्ममष्ट च विंशतिः ॥४०॥ ग्रोहणी मोक्षणी चैव ज्वालिनी चामृताभया ॥ प्रणीताः
पञ्चमुद्रांस्तु पूजाहोमे च योजयेत् ॥ ४१ ॥ इत्यादिमहापुराणे आग्नेये त्वरितामन्त्रादिवर्णनं नाम दशाधिकत्रिशततमोऽध्यायः ॥३१०॥
अथ त्वरितामूलमन्त्रादिः ॥ अग्निरुवाच ॥ दीक्षादि वक्ष्ये विन्यस्य सिंहवक्त्राकुलेऽञ्जके ॥ हे हे हुति वज्रदंत पुरु २ लुलु २ गर्ज २
इह सिंहासनाय नमः ॥ तिर्य्यगूर्ध्वगता रेखाश्चत्वारश्चतुरो भवेत् ॥१॥ नवभागविभागेन कोष्ठकान्कारयेद्बुधः ॥ ग्राह्या दिशागताः कोष्ठा
विदिशासु विनाशयेत् ॥ २ ॥ बाह्ये वै कोष्ठकोणेषु बाह्यरेखाष्टकं स्मृतम् ॥ बाह्यकोष्ठस्य बाह्ये तु मध्ये यावत्समानयेत् ॥ ३ ॥ वज्रस्य
मध्यमं शृङ्गं बाह्यरेखा द्विधार्द्धतः ॥ बाह्यरेखा भवेद्रक्ता द्विभङ्गां कारयेद्बुधः ॥४॥ मध्यकोष्ठं भवेत्पद्मं पीतकर्णिकमुज्ज्वलम् ॥ कृष्णेन
रजसाऽऽलिख्य कुलिशासिशिरोर्चिता ॥ ५ ॥ बाह्यतश्चतुरस्रं तु वज्रसम्पुटलाञ्छितम् ॥ द्वारे प्रदापयेन्मन्त्री चतुरो वज्रसम्पुटान् ॥ ६ ॥
पद्मनाम भवेद्वामवीथी चैव समा भवेत् ॥ गर्भे रक्तं केसराणि मण्डले दीक्षिताः स्त्रियः ॥ ७ ॥ जयेच्च परराष्ट्राणि क्षिप्रं राज्यमवाप्नुयात् ॥
मूर्तिं प्रणवसन्दीप्तां हुङ्कारेण नियोजयेत् ॥ ८ ॥ मूलविद्यां समुच्चार्य्य मरुद्व्योमगतां द्विज ॥ प्रयत्नेन पुनश्चैव कर्णिकायां प्रपूजयेत्
॥ ९ ॥ एवं प्रदक्षिणं पूज्य एकैकं बीजमादितः ॥ दलमध्ये तु विद्याङ्गान्याग्नेय्यां पञ्च नैर्ऋतम् ॥ १० ॥ मध्ये नेत्रं दिशास्त्रं च गुह्यकाङ्गे
तु रक्षणम् ॥ हुतयः केसरस्थास्तु वामदक्षिणपार्श्वतः ॥ ११ ॥ पञ्च पञ्च प्रपूज्यास्तु स्वैः स्वैर्मन्त्रैः प्रपूजयेत् ॥ लोकपालान्यसेद्बाो

बाह्यतो गर्भमण्डले ॥ १२ ॥ वर्णान्तमग्निमारूढं षष्ठस्वरविभेदितम् ॥ पञ्चदशेन चाक्रान्तं रोधस्तेनाभियोजयेत् ॥ १३ ॥ शीर्षं सिंहे कर्णिकायां यजेद्वह्न्यादिभिः श्रिये ॥ अष्टाभिर्वेष्टयेत्कुम्भैर्मन्त्राष्टशतमन्त्रितैः ॥ १४ ॥ मन्त्रमष्टसहस्रं तु जप्त्वांगानां दशांशकम् ॥ होमं कुर्य्यादग्निकुण्डे वह्निमन्त्रेण चालयेत् ॥ १५ ॥ निक्षिपेद्धृदयेनाग्निं शक्तिं मध्येऽग्निगां स्मरेत् ॥ गर्भाधानं पुंसवनं जातकर्म च होमयेत् ॥ १६ ॥ हृदयेन शतं ह्येकं गुह्यांगे जनयेच्छिखिम् ॥ पूर्णाहुत्या तु विद्यायाः शिवाग्निर्ज्वलितो भवेत् ॥ १७ ॥ होमयेन्मूलमन्त्रेण शतं चांगं दशांशतः ॥ निवेदयेत्ततो देव्यास्ततः शिष्यं प्रवेशयेत् ॥ १८ ॥ अस्त्रेण ताडनं कृत्वा गुह्यांगानि ततो न्यसेत् ॥ विद्यांगैश्चैव सन्नद्धं विद्यांगेषु नियोजयेत् ॥ १९ ॥ पुष्पं क्षिपायवेच्छिष्यमानयेदग्निकुण्डकम् ॥ यवैर्व्रीह्यैस्तिलैराज्यैर्मूलविद्याशतं हुनेत् ॥ २० ॥ स्थावरत्वं पुरा होमं सरीसृपमतः परम् ॥ पक्षिमृगपशुत्वं च मानुषं ब्राह्ममेव च ॥ २१ ॥ विष्णुत्वं चैव रुद्रत्वमन्ते पूर्णाहुतिर्भवेत् ॥ एकया चैव ह्याहुत्या शिष्यः स्यादीक्षितो भवेत् ॥ २२ ॥ अधिकारो भवेदेवं शृणु मोक्षमतः परम् ॥ सुमेरुस्थो यदा मन्त्री सदाशिवपदे स्थितः ॥ २३ ॥ परे च होमयेत्स्वस्थोऽकर्मकर्मशतान्दश ॥ पूर्णाहुत्या तु तद्योगी धर्माधर्मैर्न लिप्यते ॥ २४ ॥ मोक्षं याति परं स्थानं यद्गत्वा न निवर्त्तते ॥ यथा जले जलं क्षिप्तं जलं देही शिवस्तथा ॥ २५ ॥ कुम्भैः कुर्य्याच्चाभिषेकं जयराज्यादिसर्वभाक् ॥ कुमारी ब्राह्मणी पूज्या गुर्वादेर्दक्षिणां ददेत् ॥ २६ ॥ यजेत्सहस्रमेकं तु पूजां कृत्वा दिने दिने ॥ तिलाज्यपुरहोमेन देवी श्रीः कामदा भवेत् ॥ २७ ॥ ददाति विपुलान्भोगान्यदन्यच्च समीहते ॥ जप्त्वा ह्यक्षरलक्षं तु निधानाधिपतिर्भवेत् ॥ २८ ॥ द्विगुणेन भवेद्राज्यं त्रिगुणेन च याक्षिणी ॥ चतुर्गुणेन ब्रह्मत्वं ततो विष्णुपदं भवेत् ॥ २९ ॥ षड्गुणेन महासिद्धिर्लक्षेणैकेन पापहा ॥ दशजप्त्वा देहशुद्ध्यै तीर्थस्नानफलं शतात् ॥ ३० ॥ पटे वा प्रतिमायां वा शीघ्रं वै स्थण्डिले यजेत् ॥ शतं सहस्रमयुतं जपे होमे प्रकीर्त्तितम् ॥ ३१ ॥ एवं विधानतो जप्त्वा लक्षमेकं तु होमयेत् ॥ महिषाजमधमांसेन नरजेन वृषेण वा ॥ ३२ ॥ तिलैर्यवैस्तथा लाजैर्व्रीहिगोधूमकाम्रकैः ॥ श्रीफलैराज्यसंयुक्तैर्होमयित्वा व्रतं चरेत् ॥ ३३ ॥ अर्द्धरात्रेषु सन्नद्धः खड्गचापशरादिमान् ॥ एकवासा विचित्रेण रक्तपीतासितेन वा ॥ ३४ ॥ नीलेन वाथ वस्त्रेण देवीं तैरेव चार्चयेत् ॥ व्रजेद्दक्षिणदिग्भागं द्वारे दद्याद्बलिं बुधः ॥ ३५ ॥

दूतीमन्त्रेण द्वारादौ एकवृक्षे श्मशानके ॥ एवं च सर्वकामार्तिं भुङ्क्ते सर्वां महीं नृपः ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये त्वरितामूलमन्त्रादिवर्णनं नामैकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥ अथ त्वरिताविद्या ॥ अग्निरुवाच ॥ विद्याप्रस्तावमाख्यास्ये धर्मकामादिसिद्धिदम् ॥ नवकोष्ठविभागेन विद्याभेदं च विन्दति ॥ १ ॥ अनुलोमविलोमेन समस्तव्यस्तयोगतः ॥ कर्णाविकर्णयोगेन अत ऊर्ध्वं विभागशः ॥ २ ॥ त्रिविकेण च योगेन देव्या सत्रद्वयग्रहः ॥ जानाति सिद्धिदान्मन्त्रान्प्रस्तावान्निर्गतान्बहून् ॥ ३ ॥ शास्त्रे शास्त्रे स्मृता मन्त्राः प्रयोगास्तत्र दुर्लभाः ॥ गुरुः स्यात्प्रथमो वर्णः पूर्वेद्युर्न च वर्ण्यते ॥४॥ प्रस्तावे तत्र चैकार्गो द्व्यर्गोऽन्यर्गादयोऽभवन् ॥ तिर्यग्ऊर्ध्वगता रेखाश्चतुरश्चतुरो भजेत् ॥ ५ ॥ नवकोष्ठा भवन्त्येवं मध्यदेशे तथादिमान् ॥ प्रदक्षिणेन संस्थाप्य प्रस्तावं भेदयेत्ततः ॥ ६ ॥ प्रस्तावक्रमयोगेन प्रस्तावं यस्तु विन्दति ॥ करमुष्टिस्थितास्तस्य साधकस्य हि सिद्धयः ॥ ७ ॥ त्रैलोक्यं पादमूले स्यान्नवखण्डां भुवं लभेत् ॥ कपाले तु समालिख्य शिवतत्त्वं समन्ततः ॥ ८ ॥ श्मशानकर्परे वाथ वाह्यं निष्क्रम्य मन्त्रवित् ॥ तस्य मध्ये लिखेन्नाम कर्णिकोपरि संस्थितम् ॥ ९ ॥ तापयेत्खादिराङ्गारैर्भूर्नेत्राक्रम्य पादयोः ॥ सताडादानयेत्सर्वं त्रैलोक्यं सचराचरम् ॥ १० ॥ वज्रसम्पुटगर्भे तु द्वादशारे तु लेखयेत् ॥ मध्ये गर्भगतं नाम सदाशिवविदर्भितम् ॥ ११ ॥ कुड्ये फलकके वाथ शिलापट्टे हरिद्रया ॥ मुखस्तम्भं गतिस्तम्भं सैन्यस्तम्भं तु जायते ॥ १२ ॥ विपरीतेन संलिख्य श्मशाने कर्परे बुधः ॥ पद्मोगं दण्डमाक्रान्तं समन्त्रा-च्छक्तियोजितम् ॥ १३ ॥ मारयेदविलम्बेन श्मशाने निहतं रिपुम् ॥ छेदं कृत्वोरसि राज्ञस्य चक्रमध्ये न्यसेद्रिपुम् ॥ १४ ॥ चक्रध्यानाङ्गतां शक्तिं रिपुनाम्ना रिपुं हरेत् ॥ तार्क्ष्येणैव तु बीजेन खड्गमध्ये तु लेखयेत् ॥ १५ ॥ विदर्भरिपुनामाथ श्मशानाङ्गारलेखितम् ॥ सताडात्साधयेद्देशं ताडयेत्पेतभस्मना ॥ १६ ॥ भेदने छेदने चैव मारणेषु शिवो भवेत् ॥ तारकं नेत्रमुद्दिष्टं शान्तिपुष्टौ नियोजयेत् ॥ १७ ॥ दहनादिप्रयोगोयं शाकिनीं चैव कर्षयेत् ॥ मध्यादिसारुणीं यावद्भक्तकुण्डलसन्निभः ॥ १८ ॥ कुष्ठाद्या व्याधयो ये तु नाशयेत्तात्र संशयः ॥ मध्यादि उत्तरान्तं तु करालीमन्त्रनाम्नापेत् ॥ १९ ॥ रक्षयेदात्मनो विद्यां प्रतिवादी यदा शिवः ॥ वारुण्यादि ततो न्यस्य ज्वालकेशविनाशनम् ॥ २० ॥ सौम्यादि मध्यमान्तं तु गुरुत्वं जायते वटे ॥ पूर्वादि मध्यमान्तं तु लघुत्वं कुरुते

क्षणात् ॥ २१ ॥ भूर्जे रोचनयाऽऽलिख्य एतद्व्राकुलं पुरम् ॥ क्रमस्थैर्मन्त्रबीजैस्तु रक्षां देहेषु कारयेत् ॥ २२ ॥
वेष्टितां भावहेम्ना च रक्षेयं मृत्युनाशिनी ॥ विघ्नपापारिदमनी सौभाग्यायुःप्रदा धृता ॥ २३ ॥ द्यूते रणे च जयदा शत्रुसैन्ये न संशयः ॥
वन्ध्यानां पुत्रदा ह्येषा चिन्तामणिरिवापरा ॥ २४ ॥ साधयेत्पराष्ट्राणि राज्यं च पृथिवीं जयेत् ॥ फट् स्त्रीं क्षें हूं लक्षजप्त्यश्यक्षादिर्वशगो
भवेत् ॥ २५ ॥ इत्यादिमहापुराणे आग्नेये त्वरितविद्यासिद्धिकथनं नाम द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥ अथ नानामन्त्राः ॥
अग्निरुवाच ॥ ओं विनायकार्चनं वक्ष्ये यजेदाधारशक्तिकम् ॥ धर्माद्यष्टककन्दश्च नालं पद्मश्च कर्णिकाम् ॥ १ ॥ केसरं त्रिगुणं पद्मं
तीव्रं च ज्वलिनीं यजेत् ॥ नन्दाश्च सुयशाश्चोग्रां तेजोवतीं विन्ध्यवासिनीम् ॥ २ ॥ गणमूर्त्तिं गणपतिं हृदयं स्याद्गणंजयः ॥ एकदन्तो-
त्कटशिरः शिखायाचलकर्णिने ॥ ३ ॥ गजवक्त्रायां कवचं हुं फडन्तं तथाष्टकम् ॥ महोदरो दण्डहस्तः पूर्वादौ मध्यतो यजेत् ॥ ४ ॥
जयो गणाधिपो गणनायकोऽथ गणेश्वरः ॥ वक्रतुण्ड एकदन्तोत्कटलम्बोदरो गजः ॥ ५ ॥ वक्रो विकटनासाऽथ हुं पूर्वो विघ्नताशनः ॥
धूम्रवर्णो महेन्द्राद्यो बाह्ये विघ्नेशपूजनम् ॥ ६ ॥ त्रिपुरापूजनं वक्ष्ये असिताङ्गो रुरुस्तथा ॥ चण्डः क्रोधस्तथोन्मत्तः कपाली भीषणः
क्रमात् ॥ ७ ॥ संहारो भैरवो ब्राह्मीमुख्या हृत्स्वास्तु भैरवाः ॥ ब्रह्माणी पञ्चमुखा दीर्घा अभ्यर्चादौ बटुकाः क्रमात् ॥ ८ ॥ समयपुत्रो
बटुको योगिनीपुत्रकस्तथा ॥ सिद्धपुत्रश्च बटुकः कुलपुत्रश्चतुर्थकः ॥ ९ ॥ हेतुकः क्षेत्रपालश्च त्रिपुरान्तो द्वितीयकः ॥
अग्निवेतालोऽग्निजिह्वः करालो काललोचनः ॥ १० ॥ एकपादश्च भीमाक्ष ऐं क्षें प्रेतस्तथासनम् ॥ ओं ऐं ह्रीं द्वौ च त्रिपुरा
पद्मासनसमास्थिता ॥ ११ ॥ बिभ्रत्यभयपुस्तञ्च वामे नरदमालिकम् ॥ मूलेन हृदयादि स्यान्नाऽऽपूर्णं च कामकम्
॥ १२ ॥ गोमध्ये नाम संलिख्य चाष्टपत्रे च मध्यतः ॥ श्मशानादिपटे श्मशानाङ्गारेण विलेखयेत् ॥ १३ ॥
चिताङ्गारपिष्टकेन मूर्त्तिं ध्यात्वा तु तस्य च ॥ क्षित्वोदरे नीलसूत्रैर्वेष्टय चोच्चाटनं भवेत् ॥ १४ ॥ ओं नमो भगवति ज्वालामालिनि
गृध्रगणपरिवृते स्वाहा ॥ युद्धे गच्छञ्जपन्मन्त्रं पुमान्साक्षाज्जयी भवेत् ॥ ओं श्रीं ह्रीं क्लीं श्रियै नमः ॥ उत्तरादौ च घृणिनी सूर्य्या पूज्या
चतुर्दले ॥ १५ ॥ आदित्या प्रभावती च हेमाद्रिमधुरा श्रियः ॥ ओं ह्रीं गौर्यै नमः ॥ गौरीमन्त्रः सर्वहरो होमाद्ध्यानाज्जपार्चनात् ॥ १६ ॥

रक्ता चतुर्भुजा पाशवरदा दक्षिणे करे ॥ अङ्कुशाभययुक्तां तां प्रार्थ्य सिद्धात्मना पुमान् ॥ १७ ॥ जीवेद्वर्षशतं धीमान्न चौराग्निभयं भवेत् ॥ क्रुद्धः प्रसादी भवति युधि मात्राम्बुपानतः ॥१८॥ अञ्जने तिलकं वश्ये जिह्वाग्रे कविता भवेत् ॥ तज्जपान्मैथुनं वश्ये तज्जपाद्ये निरीक्षणम् ॥ १९ ॥ स्पर्शाद्वशी तिलहोमात्सर्वश्चैव तु सिध्यति ॥ सताभिमन्त्रितञ्चान्नं भुञ्जंस्तस्य श्रियः सदा ॥ २० ॥ अर्द्धनारीशरूपोऽयं लक्ष्म्यादिवैष्णवादिकः ॥ अनङ्गरूपा शक्तिश्च द्वितीया मदनातुरा ॥ २१ ॥ पवनवेगा भुवनपाला वै सर्वसिद्धिदा ॥ अनङ्गमदनानङ्गमेखलान्ताञ्जपोच्छ्रिये ॥ २२ ॥ पद्ममध्यदलेषु ह्रीं स्वरान्कादींस्ततः स्त्रियाः ॥ षट्कोणे वा घटे वाऽथ लिखित्वा स्याद्वशीकरम् ॥ २३ ॥ ओं ह्रीं छूं नित्यक्लिन्ने मदद्रवे ओं ओं ॥ मूलमन्त्रः षडङ्गोयं रक्तवर्णं त्रिकोणके ॥ द्रावणी हृदकारिणी क्षोभिणी गुरुशक्तिका ॥ २४ ॥ ईशानादौ च मध्ये तां नित्यां पाशाङ्कुशौ तथा ॥ कपालकल्पकतरुं वीणा रक्ता च तद्वती ॥ २५ ॥ नित्याभया मङ्गला च नववीरा च मङ्गला ॥ दुर्भगा मनोन्मनी पूज्या द्वारा पूर्वादितः स्थिता ॥ २६ ॥ ओं ह्रीं अनङ्गाय नमः ॥ ओं ह्रीं ह्रीं स्मराय नमः ॥ मन्मथाय च माराय कामायैवं च पञ्चधा ॥ कामाः पाशाङ्कुशौ चापबाणा ध्येयाश्च बिभ्रतः ॥ २७ ॥ रतिश्च विरतिः प्रीतिर्विप्रीतिश्च मतिर्धृतिः ॥ विधृतिः पुष्टिरेभिश्च क्रमात्कामादिकैर्युताः ॥ ओं छं नित्यक्लिन्ने मदद्रवे ओं ओं ॥ अआ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ॥ क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह क्ष ॥ ओं छं नित्यक्लिन्ने मदद्रवे स्वाहा ॥ आधारशक्तिं पद्मं च सिंहे देवीं हृदादिषु ॥२८॥ ओं ह्रीं गौरी रुद्रदयिते योगेश्वरि हूं फट् स्वाहा ॥ इत्यादिमहापुराणे आग्नेये नानामंत्रनिरूपणं नाम त्रयोदशाधिकत्रिशततमोऽध्यायः ॥ ३१३ ॥ अथ त्वरिताज्ञानम् ॥ अग्निरुवाच ॥ ओं ह्रीं हूं खे छे क्षः स्त्रीं हूं क्षे ह्रीं फट् त्वरितायै नमः ॥ त्वरितां पूजयेत्तस्य द्विभुजाञ्चाष्टबाहुकाम् ॥ आधारशक्तिं पद्मञ्च सिंहे देवीं हृदादिकम् ॥ १ ॥ पूर्वादौ गायत्रीं यजेन्मण्डले वै प्रणीतया ॥ हुकारां खेचरीं चण्डां छेदनीं क्षेपणीं स्त्रियाः ॥ ॥ २ ॥ हूंकारां क्षेमकारीं च फट्कारीं मध्यतो यजेत् ॥ जयां च विजयां द्वारि किङ्करं च तदग्रतः ॥ ३ ॥ तिलैर्होमेश्च सर्वाग्ये नामव्याहृतिभिस्तथा ॥ अनन्ताय नमः स्वाहा कुलेकाय नमः स्वधा ॥ ४ ॥ स्वाहा वासुकिराजाय

शंखपालाय वोषट् ॥ तक्षकाय वषण्नित्यं महापद्माय वै नमः ॥ ५ ॥ स्वाहा कर्कोटनागाय फट् पद्माय च वै नमः ॥ लिखेन्निग्रहचक्रं तु एकाशीतिपदैर्नरः ॥६॥ वह्निपदे ननौ भूर्जे शिलायां यष्टिकासु च ॥ मध्ये कोष्ठे साध्यनाम पूर्वादौ पट्टिकासु च ॥७॥ ओं ह्रीं क्ष्रूं छन्द छन्द चतुरः कण्ठकान्कालरात्रिकाम् ॥ ऐशादावम्बुपादौ च यमराज्यं च बाह्यतः ॥ कालीनारदमाली कालीनामाक्षमालिनी ॥ ८ ॥ मामोदेत्तत्तदोमोमा रक्षत रक्त स्व भक्ष वा ॥ यमयाटटया मय मटमो टटमो टमा ॥ ९ ॥ वामो भूरिविभूमेया टटरीश्व श्वरीटट ॥ यत्र राजाह्वयतो रं तं तोयं मारणात्मकम् ॥ १० ॥ कज्जलं निम्बनिर्य्यासमज्जामृग्विषसंयुतम् ॥ अङ्गारेण समायुक्तं पिङ्गलायारतंयुतम् ॥ काकपक्षस्य लेखन्या श्मशाने वा चतुष्पथे ॥ ११ ॥ निधापयेत्कुम्भायस्ताद्रलीके वाथ निक्षिपेत् ॥ विभीतद्रुमशाखाधो यन्त्रं सर्वारिमर्दनम् ॥ १२ ॥ लिखेद्वानुग्रहश्चक्रं शुक्लपक्षेऽथ भूर्जके ॥ लाक्षया कुङ्कुमेनाथ खटिकाचन्दनेन वा ॥ १३ ॥ भुवि भित्तौ च पूर्वोदि नाम मध्यमकोष्ठके ॥ खण्डे तु वारिमध्यस्थं ओं हंसो वापि पट्टिशम् ॥ १४ ॥ लक्ष्मीश्लोकं शिवादौ च राक्षसादिकमालिखेत् ॥ श्रीः सामभोमा सा श्रीः सानो याज्ञे ज्ञेया नोसा ॥ १५ ॥ माया लीला लाली यामा याज्ञे ज्ञेया नोसा माया ॥ लीला यत्र पडुक्ता बहिः शीघ्रां दिशु च कलशं बहिः ॥ यत्र ज्ञेया बहिः शीघ्रा दिशु रं कलशं बहिः ॥ १६ ॥ पद्मस्थं पद्मवक्त्रं च मृत्युजित्स्वर्गगं धृतिम् ॥ शान्तीनां परमा शान्तिः सौभाग्यादिप्रदायकम् ॥ १७ ॥ रुद्रे रुद्रसमाः कार्य्याः कोष्टकास्तत्र तां लिखेत् ॥ ओमाद्यां हूं फडन्तां च आदिवर्णमथान्तिमः ॥ १८ ॥ विद्यावर्णक्रमेणैव संज्ञां च वषडन्तिकाम् ॥ अधस्तात्प्रत्यङ्गिरेषा सर्वकामार्थसाधिका ॥ १९ ॥ एकाशीतिपदे सर्वामादिवर्णक्रमेण तु ॥ आदिमं यावदन्तं स्याद्वषडन्तं च नाम वै ॥ २० ॥ एषा प्रत्यङ्गिरा चान्या सर्वकार्य्यादिसाधनी ॥ निग्रहानुग्रहश्चक्रश्चतुःषष्टिपदैर्लिखेत् ॥ २१ ॥ अनृतौ सा च विद्या च क्ष्मौं सः हूं नामाथ मध्यतः ॥ फट्काराद्यां पत्रगतां ह्रींकारेण वेष्टयेत् ॥ २२ ॥ कुम्भवद्धारिता सर्वशत्रुहृत्सर्वदायिका ॥ विपन्नश्येत्कर्णजपादक्षराद्यैश्च दण्डकैः ॥२३॥ इत्यादिमहापुराणे आग्नेये त्वरितामन्त्रनिरूपणं नाम चतुर्दशाधिकत्रिशततमोऽध्यायः ॥३१४॥ अथ स्तम्भनादिमन्त्राः ॥ अग्निरुवाच ॥ स्तम्भनं मोहनं वश्यं विद्वेषोच्चाटनं वदे ॥ विषव्याधिमरोगं च मारणं शमनं पुनः ॥ १ ॥ भूर्जे कूर्म

समालिख्य ताडनेन षडङ्गुलम् ॥ मुखपादचतुष्केषु ततो मन्त्रं न्यसेद्बुधः ॥२॥ चतुष्पादेषु क्रींकारं ह्रीङ्कारं मुखमध्यतः ॥ गर्भे विद्यां ततो लिख्य साधकं पृष्ठतो लिखेत् ॥ ३ ॥ मालामन्त्रैस्तु संवेष्टय इष्टकोपरि संन्यसेत् ॥ विधाय कूर्मपृष्ठेन करालाग्निसम्पठेत् ॥ ४ ॥ महाकूर्मं पूजयित्वा पादप्रोक्षन्तु निक्षिपेत् ॥ ताडयेद्दामपादेन स्मृत्वा शत्रुञ्च सप्तधा ॥५॥ ततः सञ्जायते शत्रोः स्तम्भनं मुखरागतः ॥ कृत्वा तु भैरवं रूपं मालामन्त्रं समालिखेत् ॥ ६ ॥ ओं शत्रुमुखस्तम्भनी कामरूपा आलीढकरी ह्रीं फें फेत्कारिणी मम शत्रूणां देवदत्तानां मुखं स्तम्भय २ मम सर्वविद्वेषिणां मुखस्तम्भनं कुरु २ ओं हूं फें फेत्कारिणि स्वाहा ॥ फट् हेतुं च समालिख्य तज्जपान्तं महाबलम् ॥ वामेनैव नगं शूलं संलिखेद्दक्षिणे करे ॥ ७ ॥ लिखेन्मन्त्रमघोरस्य संग्रामे स्तम्भयेद्रिपून् ॥ ओं नमो भगवत्यै भगमालिनि विस्फुर २ स्पन्द २ नित्यक्लिन्ने द्रव २ हूं सः क्रींकाराक्षरे स्वाहा ॥ एतेन रोचनाद्यैस्तु तिलकान्मोहयेज्जगत् ॥ ८ ॥ ओं फें हूं फट् फेत्कारिणी ह्रीं ज्वल २ त्रैलोक्यं मोहय २ ओं गुह्यकालिके स्वाहा ॥ अनेन तिलकं कृत्वा राजादीनां वशीकरम् ॥ गर्दभस्य रजो गृह्य कुसुमं सूतकस्य च ॥ ९ ॥ नारीरजः क्षिपेद्रात्रौ शय्यादौ द्वेषकृद्भवेत् ॥ गोखुरञ्च तथा शृङ्गमश्वस्य च खुरं तथा ॥ १० ॥ शिरः सर्पस्य सङ्क्षिप्तं गृहेषूच्चाटनं भवेत् ॥ करवीरशिफा पीता संसिद्धार्था च मारणे ॥ ११ ॥ व्यालघुच्छुन्दरीरक्तं करवीरं तदर्थकृत् ॥ सरटं पट्पदञ्चापि तथा कर्कटवृश्चिकम् ॥ १२ ॥ चूर्णीकृत्य क्षिपेत्तैले तदभ्यङ्गश्च कुष्ठकृत् ॥ ओं नवग्रहाय सर्वशत्रून्मम साधय २ मारय २ ओं सों मं बुं चुं ओं शं वां कें ओं स्वाहा ॥ अनेनार्कशतैरर्च्य श्मशाने तु निधापयेत् ॥ १३ ॥ भूर्जे वा प्रतिमायां वा मारणाय रिपोर्ग्रहाः ॥ ओं कुञ्जरी ब्रह्माणी ॥ ओं मञ्जरी माहेश्वरी ॥ ओं वेताली कौमारी ॥ ओं काली वैष्णवी ॥ ओं अघोरा वाराही ॥ ओं वेताली इन्द्राणी उर्वशी ॥ ओं वेताली चण्डिका ॥ ओं जयानी यक्षिणी ॥ नवमातरो हे मम शत्रुं गृह्णत २ भूर्जे नाम रिपोर्लिख्य श्मशाने पूजिते म्रियेत् ॥ १४ ॥ इत्यादिमहापुराणे आग्नेये स्तम्भनमंत्रनिरूपणं नाम पंचदशाधिकद्विशततमोऽध्यायः ॥ ३१५ ॥ अथ नानामन्त्राः ॥ अग्निरुवाच ॥ आदौ हूंकारसंयुक्ता स्वे च छेपदभूषिता ॥ वर्मास्त्रविनियोगेण स्त्रीं हूं क्षेपफडन्तिका ॥ १ ॥ सर्वमर्दकरी विद्या विषसर्पादिमर्दनी ॥ ओं स्वे च छेतिप्रयोगश्च कालदष्टस्य जीवने ॥ २ ॥ ओं हूं क्षेः प्रयोगोऽयं विषशत्रुक्षमर्दनः ॥ स्त्रीं हूंफडिति योगोऽयं पापरो-

गादिकं जयेत् ॥ ३ ॥ खेछाति च प्रयोगोऽयं विघ्नदुष्टादि वारयेत् ॥ हूं स्त्रीं ओमिति योगोऽयं योषिदादिवशंकरः ॥ ४ ॥ स्वे स्त्रीं स्वे च प्रयोगोऽयं वशाय विजयाय च ॥ ऐं ह्रीं श्रीं स्फें कं क्षौं भगवति अम्बिका कुब्जिके ॥ स्फें ओं भं तं वश नमो अघोराय मुखे त्रां त्रीं किलि किलि विच्चा स्फ्रों हूं स्प्रं थ्रों ह्रीं ऐं श्रीमिति कुब्जिका विद्या सर्वकरा स्मृता ॥ भूयः स्कन्दाय यानाह मन्त्रानीशश्च तान्वदे ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये नानामन्त्रनिरूपणं नाम षोडशाधिकत्रिशततमोऽध्यायः ॥ ३१६ ॥ अथ सकलादिमन्त्रोद्धारः ॥ ईश्वर उवाच ॥ सकलं निष्कलं शून्यं कालाख्यं स्वमलङ्कृतम् ॥ क्षपणं क्षयमन्तः स्थं कण्ठोष्ठं चाष्टमं शिवम् ॥ १ ॥ प्रासादस्य पराख्यस्य स्मृतं रूपं गुहाष्टधा ॥ सदाशिवस्य शब्दस्य रूपस्याखिलसिद्धये ॥ २ ॥ अमृतश्चांशुमांश्चेन्दुश्चेश्वरश्चोग्र ऊहकः ॥ एकपादेन ओजाख्य ओषधश्चांशुमान्वशी ॥ ३ ॥ अकारादेः क्षकारश्च ककारादेः क्रमादिमे ॥ कामदेवः शिखण्डी च गणेशः कालशंकरौ ॥ ४ ॥ एकनेत्रो द्विनेत्रश्च त्रिशिखो दीर्घबाहुकः ॥ एकपादर्द्धचन्द्रस्य बलपो योगिनीप्रियः ॥ ५ ॥ शक्तीश्वरो महाग्रन्थिस्तर्पकः स्थाणुदन्तुरौ ॥ निधीशो नन्दी पद्मश्च तथान्यः शाकिनीप्रियः ॥ ६ ॥ मुखबिम्बो भीषणश्च कृतान्तः प्राणसंज्ञकः ॥ तेजस्वी शक्र उदधिः श्रीकण्ठः सिंह एव च ॥ ७ ॥ शशांको विश्वरूपश्च क्षश्च स्यान्नरसिंहकः ॥ सूर्य्यमात्रासमाक्रान्तं विश्वरूपन्तु कारयेत् ॥ ८ ॥ अंशुमत्संयुतं कृत्वा शशिबीजं विनायुतम् ॥ ईशानमोजसाक्रान्तं प्रथमं तु समुद्धरेत् ॥ ९ ॥ तृतीयं पुरुषं विद्धि दक्षिणं पञ्चमं तथा ॥ सप्तमं वामदेवन्तु सद्योजातं ततः परम् ॥ १० ॥ रसयुक्तन्तु नवमं ब्रह्मपञ्चकमीरितम् ॥ ओंकाराद्याश्चतुर्थ्यन्ता नमोऽन्ताः सर्वमन्त्रकाः ॥ ११ ॥ सद्यो देवा द्वितीयन्तु हृदयञ्चाङ्गसंयुतम् ॥ चतुर्थन्तु शिरो विद्धि ईश्वरन्नाम नामतः ॥ १२ ॥ ऊहकन्तु शिखा ज्ञेया विश्वरूपसमन्विता ॥ तन्मन्त्रमष्टमं ख्यातं नेत्रन्तु दशमं मतम् ॥ १३ ॥ अस्त्रं शशी समाख्यातं शिवसंज्ञं शिखिध्वजः ॥ नमः स्वाहा तथा वौषट् हूं च फट्क्रमेण तु ॥ १४ ॥ जातिफट्टं हृदादीनां प्रासादं मन्त्रमावदे ॥ ईशानाद्रुद्रसंख्यातं प्रोद्धरेच्चांशुरञ्जितम् ॥ १५ ॥ ओषधाक्रान्तशिरसमूहकस्योपरिस्थितम् ॥ अर्द्धचन्द्रोर्ध्वनादश्च बिन्दुद्वितयमध्यगम् ॥ १६ ॥ तदन्ते विश्वरूपन्तु कुटिलन्तु त्रिधा ततः ॥ एवं प्रासादमन्त्रश्च सर्वकर्मकरो मनुः ॥ १७ ॥ शिखाबीजं समुद्धृत्य फट्कारान्तं तु चैव फट् ॥ अर्द्धचन्द्रासनं ज्ञेयं कामदेवं ससर्पकम् ॥ १८ ॥ महापाशुपतास्त्रं तु सर्व-

दुष्टप्रमर्दनम् ॥ प्रासादः सकलः प्रोक्तो निष्कलः प्रोच्यतेऽधुना ॥ १९ ॥ औषधं विश्वरूपन्तु रुद्राख्यं सूर्य्यमण्डलम् ॥ चन्द्रार्द्धनादसंयोगं विसंज्ञं कुटिलन्ततः ॥ २० ॥ निष्कलो मुक्तिमुक्तो स्यात्पञ्चाङ्गोऽयं सदाशिवः ॥ अंशुमान्विश्वरूपं च आवृतं शून्यरञ्जितम् ॥ २१ ॥ ब्रह्माङ्गरहितः शून्यस्तस्य मूर्त्तिरसस्तरुः ॥ विघ्ननाशाय भवति पूजितो बालबालिशैः ॥ २२ ॥ अंशुमान्विश्वरूपाख्यमूहकस्योपरि स्थितम् ॥ कलाढ्यं सकलस्यैव पूजाङ्गादि च सर्वतः ॥ २३ ॥ नरसिंहं कृतान्तस्थं तेजस्विप्राणमूर्ध्वगम् ॥ अंशुमानूहकाक्रान्तमधोर्ध्वं स्वमलङ्कृतम् ॥ २४ ॥ चन्द्रार्द्धनादनादान्तं ब्रह्मविष्णुविभूषितम् ॥ उदधिं नरसिंहञ्च सूर्य्यमात्राविभेदितम् ॥ २५ ॥ यदा कृतं तदा तस्य ब्रह्मण्यङ्गानि पूर्ववत् ॥ ओजाख्यमंशुमद्युक्तं प्रथमं वर्णमुद्धरेत् ॥ २६ ॥ अंशुमच्चांशुनाक्रान्तं द्वितीयं वर्णनायकम् ॥ अंशुमानीश्वरन्तद्वत्तृतीयं मुक्तिदायकम् ॥ २७ ॥ ऊहकञ्चांशुनाक्रान्तं वरुणप्राणतेजसम् ॥ पञ्चमन्तु समाख्यातं कृतान्तन्तु ततः परम् ॥ २८ ॥ अंशुमानुहकप्राणः सप्तमं वर्णमुद्धृतम् ॥ पद्मामिन्दुसमाक्रान्तं नन्दीशमेकपादधृक् ॥ २९ ॥ प्रथमञ्चान्ततो योज्यं क्षपणं दशबीजकम् ॥ अस्यार्द्धं तृतीयञ्चैव पञ्चमं सप्तमं तथा ॥ ३० ॥ सद्योजातन्तु नवमं द्वितीयाद्धृदयादिकम् ॥ दशार्णप्रणवं यत्तं फण्डन्तञ्चास्त्रमुद्धरेत् ॥ ३१ ॥ नमस्कारयुतान्यत्र ब्रह्माङ्गानि तु नान्यथा ॥ द्वितीयादष्टमं यावदष्टौ विद्येश्वरा मताः ॥ ३२ ॥ अनन्तेशश्च सूक्ष्मश्च तृतीयश्च शिवोत्तमः ॥ एकमूर्त्त्येकरूपस्तु त्रिमूर्त्तिरपरस्तथा ॥ ३३ ॥ श्रीकण्ठश्च शिखण्डी च अष्टौ विद्येश्वराः स्मृताः ॥ शिखण्डिनोऽप्यनन्तान्तं मन्त्रान्तं मूर्त्तिरीरिता ॥ ३४ ॥ इत्यादिमहापुराणे आग्नेये सकलादिमंत्रोद्धारनिरूपणं नाम सप्तदशाधिकत्रिशततमोऽध्यायः ॥ ३१७ ॥ अथ गणपूजा ॥ ईश्वर उवाच ॥ विश्वरूपं समुद्धृत्य तेजस्युपरि संस्थितम् ॥ नरसिंहं ततोऽधस्तात्कृतान्तं तदधो न्यसेत् ॥ १ ॥ प्रणवं तदधः कृत्वा ऊहकं तदधः पुनः ॥ अंशुमान्विश्वमूर्त्तिस्थं कण्ठोष्ठप्रणवादिकम् ॥ २ ॥ नमोऽन्तः स्याच्चतुर्वर्णो विश्वरूपश्च कारणम् ॥ सूर्य्यमात्राहतं ब्रह्मण्यङ्गानीहं तु पूर्ववत् ॥ ३ ॥ उद्धरेत्प्रणवं पूर्वं प्रस्फुरद्वयमुच्चरेत् ॥ घोरघोरतरं पश्चात्तत्र रूपमतः स्मरेत् ॥ ४ ॥ चटशब्दं द्विधा कृत्वा ततः प्रणवमुच्चरेत् ॥ दहेति च द्विधा कार्य्यं वमेति च द्विधा मतम् ॥ ५ ॥ घातयेति द्विधाकृत्य हुं फडन्तं समुच्चरेत् ॥ अघोरास्त्रन्तु नेत्रं

स्याद्गायत्री चोच्यतेऽधुना ॥ ६ ॥ तन्महेशाय विद्महे महादेवाय धीमहि ॥ तन्नः शिवः प्रचोदयाद्गायत्री सर्वसाधनी ॥ ७ ॥ यात्रायां विजयादौ च यजेत्पूर्वङ्गणं श्रिये ॥ तुर्य्यांशे तु पुरा क्षेत्र समन्तादर्कमालिने ॥ ८ ॥ चतुष्पदं त्रिकोणे तु त्रिदलं कमलं लिखेत् ॥ तत्पृष्ठे पादिका वीथी भागैस्त्रिदलमश्नयुक् ॥ ९ ॥ वसुदेवसुतैः साब्जैस्त्रिदलैः पादवीथिकाः ॥ तदूर्ध्वे वेदिका देया भागमात्रप्रमाणतः ॥ १० ॥ द्वारं पद्ममितं कोष्ठादुपद्वारं विवर्णितम् ॥ द्वारोपद्वाररचितं मण्डलं विघ्नसूदनम् ॥ ११ ॥ आरक्तं कमलं मध्ये बाह्यपद्मानि तद्बहिः ॥ सिता तु वीथिका कार्य्या द्वाराणि तु यथेच्छया ॥ १२ ॥ कर्णिका पीतवर्णा स्यात्केसराणि तथा पुनः ॥ मण्डलं विघ्नमर्दोक्तं मध्ये गणपतिं यजेत् ॥ १३ ॥ नामाद्यं सप्तरार्कं स्यादेकाक्षरसमन्वितम् ॥ शिरोहृदं तत्पुरुषेण ओजाद्यञ्च नमोऽन्तकम् ॥ १४ ॥ गजास्यं गजशीर्षञ्च गांगेयं गणनायकम् ॥ त्रिरावर्त्तं गणनगं गोपतिं पूर्वपंक्तिगम् ॥ १५ ॥ विचित्रांशं महाकायं लम्बोष्ठं लम्बकर्णकम् ॥ लम्बोदरं महाभागं विकृतं पार्वतीप्रियम् ॥ १६ ॥ भयावहं च भद्रं च भगणं भयसूदनम् ॥ द्वादशैते दशपङ्क्तौ देवव्रातं च पश्चिमे ॥ १७ ॥ महानादं भास्वरं च विघ्नराजं गणाधिपम् ॥ उद्भटस्वानमश्वण्डौ महाशुण्डञ्च भीमकम् ॥ १८ ॥ मन्मथं मधुसूदनञ्च सुन्दरं भाव-पुष्टकम् ॥ सौम्ये ब्रह्मेश्वरं ब्राह्मं मनोवृत्तिञ्च संलयम् ॥ १९ ॥ लयं दूत्यप्रियं लौल्यं विकर्णं वत्सलं तथा ॥ कृतान्तं कालदण्डञ्च यजेत्कुम्भञ्च पूर्ववत् ॥ २० ॥ अयुतञ्च जपेन्मन्त्रं होमयेत्तु दशांशतः ॥ शेषाणान्तु दशाहुत्या जपाद्धोमन्तु कारयेत् ॥ २१ ॥ पूर्णां दत्त्वाऽभिषेकन्तु कुर्य्यात्सर्वन्तु सिध्यति ॥ भूगोऽश्वगजवस्त्राद्यैर्गुरुपूजाञ्चरेन्नरः ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये गणपूजानिरूपणं नामाष्टादशाधिकत्रिशततमोऽध्यायः ॥ ३१८ ॥ अथ वागीश्वरीपूजा ॥ ईश्वर उवाच ॥ वागीश्वरीपूजनञ्च प्रवदामि समण्डलम् ॥ ऊहकं कालसंयुक्तं मनुं वर्णसमायुतम् ॥ १ ॥ निषाद ईश्वरं कार्य्यं मनुना चन्द्रसूर्य्यवत् ॥ अक्षरन्न हि देयं स्याद्ध्यायेत्कुन्देन्दुसन्निभाम् ॥ २ ॥ पञ्चाशद्वर्णमालान्तु मुक्तास्रग्दामभूषिताम् ॥ वरदाभयाक्षसूत्रपुस्तकाढ्यां त्रिलोचनाम् ॥ ३ ॥ लक्षं जपेन्मस्तकान्तं स्कन्धान्तं वर्णमालिकाम् ॥ अकारादि क्षकारान्तां विशन्तीं मातरः स्मरेत् ॥ ४ ॥ कुर्य्याद्गुरुश्च दीक्षार्थं मन्त्रग्राहे तु मण्डलम् ॥ सूर्य्याग्निन्दुभकन्तु भागाभ्यां कमलं लिखेत् ॥ ५ ॥ वीथिका पदिका कार्य्या पत्रान्यष्टौ चतुष्पदे ॥ वीथिका पदिका बाह्ये

द्वाराणि द्विपदानि तु ॥ ६ ॥ उपद्वाराणि तद्वच्च कोणबंधं द्विपट्टिकम् ॥ सितानि नव पद्मानि कर्णिका कनकप्रभा ॥ ७ ॥ केसराणि विचित्राणि कोणात्रक्तेन पूरयेत् ॥ व्योमरेखान्तरं कृष्णं द्वारणीन्द्रेभमानतः ॥ ८ ॥ मध्ये सरस्वतीं पद्मे वागीशीं पूर्वपद्मके ॥ हृल्लेखा चित्रवागीशी गायत्री विश्वरूपया ॥ ९ ॥ शाङ्करी मतिर्धृतिश्च पूर्वाद्या ह्रीं स्वबीजकाः ॥ ध्येया सरस्वतीच्च कपिलाज्येन होमकः ॥ संस्कृतप्राकृतकविः काव्यशास्त्रादिविद्भवेत् ॥ १० ॥ इत्यादिमहापुराणे आग्नेये वागीश्वरीपूजाविधानं नामैकोनविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३१९ ॥ अथ मण्डलानि ॥ ईश्वर उवाच ॥ सर्वतोभद्रकान्यष्ट मण्डलानि वदे गुह ॥ शान्तिमासाधयेत्प्राचीमिष्टायां विषुवे सुधीः ॥ १ ॥ चित्रास्वात्यन्तरेणाथ दृष्टसूत्रेण वा पुनः ॥ पूर्वापरायतं सूत्रमास्फाल्य मध्यतोऽङ्कयेत् ॥ २ ॥ कोटिद्वयन्तु तन्मध्यादङ्कयेद्दक्षिणोत्तरम् ॥ मध्ये द्वयं प्रकर्त्तव्यं स्फालयेद्दक्षिणोत्तरम् ॥ ३ ॥ शतक्षेत्रार्द्धमानेन कोणसम्पातमादिशेत् ॥ एवं सूत्रचतुष्कस्य फालनाच्चतुरस्रकम् ॥ ४ ॥ जायते तत्र कर्त्तव्यं भद्रस्वेदकरं शुभम् ॥ वसुभक्तेन्दु द्विपदे क्षेत्रे वीथी च भागिका ॥ ५ ॥ द्वारं द्विपादिकं पद्ममानद्वै सकपोलकम् ॥ कोणबन्धावितिचन्तु द्विपदं तत्र वर्त्तयेत् ॥ ६ ॥ शुक्लं पद्मं कर्णिका तु पीता चित्रन्तु केसरम् ॥ रक्ता वीथी तत्र कल्प्या द्वारं लोकेशरूपकम् ॥ ७ ॥ रक्तकोणं विधौ नित्ये नैमित्तिकेऽञ्जकं शृणु ॥ असंसक्तन्तु संसक्तं द्विधाञ्जं भुक्तिमुक्तिकृत् ॥ ८ ॥ असंसक्तं मुमुक्षूणां संसक्तं तद्विधा पृथक् ॥ बालो युवा च वृद्धश्च नामतः फलसिद्धिदाः ॥ ९ ॥ पद्मक्षेत्रे तु सूत्राणि दिग्विदिक्षु विनिक्षिपेत् ॥ वृत्तानि पञ्चकल्पानि पद्मक्षेत्रसमानि तु ॥ १० ॥ प्रथमे कर्णिका तत्र पुष्करैर्नवभिर्युता ॥ केसराणि चतुर्विंशद्वितीयेऽथ तृतीयके ॥ ११ ॥ दलसन्धिर्गजकुम्भनिभान्तर्यद्दलाग्रकम् ॥ पञ्चमे व्योमरूपन्तु संसक्तं कमलं स्मृतम् ॥ १२ ॥ असंसक्तं दलाग्रे तु दिग्भागैर्विस्तराद्भजेत् ॥ भागद्वयपरित्यागाद्वस्वंशैर्वर्त्तयेद्दलम् ॥ १३ ॥ सन्धिं विस्तरसूत्रेण तन्मूलादञ्जयेद्दलम् ॥ सव्यापसव्यक्रमेणैव वृद्धमेतद्भवेत्तथा ॥ १४ ॥ अथ वा सन्धिमध्यातु भ्रामयेदर्द्धचन्द्रवत् ॥ सन्धिद्वयाग्रवृत्तं वा बालपद्मं तथा भवेत् ॥ १५ ॥ सन्धिसूत्रार्द्धमानेन पृष्ठतः परिवर्त्तयेत् ॥ तीक्ष्णाग्रन्तु सुवातेन कमलं भुक्तिमुक्तिदम् ॥ १६ ॥ मुक्तवृद्धौ च वश्यादौ बालं पद्मं समानकम् ॥ नवनाभं नवहस्तं भागैर्मन्त्रात्मकैश्च तत् ॥ १७ ॥ मध्येऽञ्जं पट्टिकावीथी द्वारेणाञ्जस्य मानतः ॥ कण्ठोपकण्ठमुक्तानि तद्बाह्ये वीथिकं,

मता ॥ १८ ॥ पञ्चभागान्विता सा तु समन्तादशभागिका ॥ दिग्विदिक्ष्वष्ट पद्मानि द्वारपद्मं सवीथिकम् ॥ १९ ॥ तद्बाह्य पञ्चपदिका वीथिका यत्र भूषिता ॥ पद्मद्वारकण्ठन्तु पदिकञ्चौष्ठकण्ठकम् ॥ २० ॥ कपोलं पादिकं कार्य्यं दिक्षु द्वारत्रयं स्फुटम् ॥ कोणबन्धं त्रिपट्टन्तु द्विपट्टं वज्रबन्धवेत् ॥ २१ ॥ मध्यन्तु कमलं शुक्लं पीतं रक्तञ्च नीलकम् ॥ पीतशुक्लञ्च धूम्रञ्च रक्तं पीतञ्च मुक्तिदम् ॥ २२ ॥ पूर्वादौ कमलान्यष्ट शिवविष्ण्वादि क जपेत् ॥ प्रासादमध्यतोऽभ्यर्च्य शक्रादीन्वज्रकादिषु ॥ २३ ॥ अस्त्राणि बाह्यवीथ्यान्तु विष्ण्वादीनश्वमेधभाक् ॥ पवित्रारोहणादौ च महामण्डलमालिखेत् ॥ २४ ॥ अष्टहस्तं पुरा क्षेत्रं रसपक्षैर्विवर्त्तयेत् ॥ द्विपदं कमलं मध्ये वीथिका पादिका ततः ॥ २५ ॥ दिग्विदिक्षु ततोऽष्टौ च नीलाब्जानि विवर्त्तयेत् ॥ मध्यपद्मप्रमाणेन त्रिंशत्पद्मानि तानि तु ॥ २६ ॥ दलसन्धिविहीनानि नीलेन्दीवरकाणि च ॥ तत्पृष्ठे पदिका वीथी स्वस्तिकानि तदूर्ध्वतः ॥ २७ ॥ द्विपदानि तथा चाष्टौ कृतिभागकृतानि तु ॥ वर्त्तयेत्स्वस्तिकांस्तत्र वीथिका पूर्ववद्बहिः ॥ २८ ॥ द्वाराणि कमलं यद्वदुपकण्ठयुतानि तु ॥ रक्तं कोणं पीतवीथि नलं पद्मञ्च मण्डले ॥ २९ ॥ स्वस्तिकादि विचित्रञ्च सर्वकामदप्रदं गृह ॥ मध्याब्जं पञ्चहस्तं स्यात्समन्तादशभाजितम् ॥ ३० ॥ द्विपदं कमलं वीथि पट्टिका दिक्षु पङ्कजम् ॥ चतुष्कं पृष्ठतो वीथी पादिका द्विपदान्यथा ॥ ३१ ॥ कण्ठोपकण्ठयुक्तानि द्वाराण्यब्जन्तु मध्यतः ॥ पञ्चाब्जमण्डले ह्यस्मिन्सितं पीतञ्च पूर्वकम् ॥ ३२ ॥ वैडूर्य्याभं दक्षिणाब्जं कुन्दाभं वारुणं कजम् ॥ उत्तराब्जन्तु शंखाभमन्यत्सर्वं विचित्रकम् ॥ ३३ ॥ सर्वकामप्रदं वक्ष्ये दशहस्तन्तु मण्डलम् ॥ विकारभक्तन्तुर्य्यांशं द्वारन्तु द्विपदं भवेत् ॥ ३४ ॥ मध्ये पंद्मं पूर्ववच्च विघ्नध्वंसं वदाम्यथ ॥ चतुर्हस्तं पुरं कृत्वा वृत्तञ्चैव करद्वयम् ॥ ३५ ॥ वीथिका हस्तमात्रन्तु स्वस्तिकैर्बहुभिर्वृता ॥ हस्तमात्राणि द्वाराणि दिक्षु वृत्तं सपद्मकम् ॥ ३६ ॥ पद्मानि पञ्च शुक्लानि मध्ये पूज्यश्च निष्कलः ॥ हृदयादीनि पूर्वादौ विदिक्ष्वस्त्राणि वै यजेत् ॥ ३७ ॥ प्राग्वच्च पञ्च ब्रह्माणि बुद्ध्याधारमतो वदे ॥ शतभागे तिथिभागे पद्मं लिङ्गाष्टकं दिशि ॥ ३८ ॥ मेखलाभागसंयुक्तं कण्ठं द्विपदिकं भवेत् ॥ आचार्य्यो बुद्धिमाश्रित्य कल्पयेच्च लतादिकम् ॥ ३९ ॥ चतुःषट्पञ्चमाष्टादि स्वाक्षिखाद्यादि मण्डलम् ॥ स्वाक्षीन्दुसूर्य्यगं सर्वं स्वाक्षि चेवेन्दुवर्णनात् ॥ ४० ॥ चत्वारिंशदधिकानि चतुर्दशशतानि हि ॥ मण्डलानि हरेः शम्भोर्देव्याः सूर्य्यस्य सन्ति

च ॥ ४१ ॥ दशसप्तविभक्ते तु लताङ्गोद्भवं शृणु ॥ दिक्षु पञ्च त्रयञ्चैकं त्रयं पञ्च च लोमयेत् ॥ ४२ ॥ ऊर्ध्वगे द्विपदे लिङ्गमन्दिरं पार्श्वकोष्ठयोः ॥ मध्येन द्विपदं पद्ममथ चैकं च पङ्क्तिगम् ॥ ४३ ॥ लिङ्गस्य पार्श्वयोर्भद्रे पदद्वारमलोपनात् ॥ तत्पार्श्वशोभाः षड् लोप्य लताः शेषास्तथा हरेः ॥ ४४ ॥ ऊर्ध्वं द्विपदिकं लोप्य हरेर्भद्राष्टकं स्मृतम् ॥ रश्मिमानसमायुक्तवेदलोपाच्च शोभितम् ॥ ४५ ॥ पञ्चविंशतिकं पद्मं ततः पीठमपीठकम् ॥ द्वयं द्वयं रक्षयित्वा उपशोभास्तथाष्ट च ॥ ४६ ॥ देव्यादिरूप्यापकं भद्रं वह्निमध्ये परं लघु ॥ मध्ये नवपदं पद्मं कोणे भद्रचतुष्टयम् ॥ ४७ ॥ त्रयोदशपदं शेषं बृद्ध्याधारस्तु मण्डलम् ॥ शतपत्रं षष्ट्यधिकं बुद्ध्याधारं हरादिषु ॥ ४८ ॥ इत्यादिमहापुराणे आग्नेये मंडलनिरूपणं नाम विंशत्यधिकद्विशततमोऽध्यायः ॥ ३२० ॥ अथाघोरास्त्रादिशान्तिकल्पः ॥ ईश्वर उवाच ॥ अस्त्रयागः पुरा कार्य्यः सर्वकर्मसु सिद्धिदः ॥ मध्ये पूज्यं शिवाद्यस्त्रं वज्रादीन्पूर्वतः क्रमात् ॥ १ ॥ पञ्चचक्रं दश करं रणादौ पूजितं जये ॥ ग्रहपूजा रविर्मध्ये पूर्वाद्याः सोमकादयः ॥ २ ॥ सर्व एकादशस्थास्तु ग्रहाः स्युर्ग्रहभूंजनात् ॥ अस्त्रशान्तिं प्रवक्ष्यामि सर्वोत्पातविनाशिनीम् ॥ ३ ॥ ग्रहरोगादिशमनीं मारीशत्रुनिमर्दनीम् ॥ विनायकोपतप्तिघ्नमघोरास्त्रं जपेन्नरः ॥ ४ ॥ लक्षं ग्रहदिनाशः स्यादुत्पाते तिलहोमकम् ॥ दिव्ये लक्षं तदर्द्धेन व्योमजोत्पातनाशनम् ॥ ५ ॥ घृतेन लक्षमानेन उत्पाते भूमिजे हितम् ॥ घृतगुग्गुलुहोमे च सर्वोत्पातादिमर्दनम् ॥ ६ ॥ दूर्वाक्षताज्यहोमेन व्याधयोऽथ घृतेन च ॥ ग्रहक्लेशेन तु दुःस्वप्ना विनश्यन्ति न संशयः ॥ ७ ॥ अयुताद्रक्तदोषघ्नो जपाघृतविमिश्रितात् ॥ विनायकार्त्तिशमनमयुतेन घृतस्य च ॥ ८ ॥ भूतवेतालशान्तिस्तु गुग्गुलोरयुतेन च ॥ महावृक्षस्य भङ्गे तु व्यालकङ्के गृहे स्थिते ॥ ९ ॥ आरण्यानां प्रवेशे च दूर्वाज्याक्षतहावनात् ॥ उल्कापाते भूमिकम्पे तिलाज्येनाहुताच्छिवम् ॥ १० ॥ रक्तस्रावे तु वृक्षाणामयुताद्गुग्गुलोः शिवम् ॥ अकाले फलपुष्पांगां राष्ट्रभङ्गे च मारणे ॥ ११ ॥ द्विपदादेर्यदा मारी लक्षार्द्धाच्च तिलाज्यतः ॥ हस्तिमारीप्रशान्त्यर्थं कांरिणीदन्तवर्धने ॥ १२ ॥ हस्तिन्यां मददृष्टौ च अयुताच्छान्तिरिष्यते ॥ अकाले गर्भपाते तु जातं यत्र विनश्यति ॥ १३ ॥ विकृता यत्र जायन्ते यात्राकालेऽयुतं हुनेत् ॥ तिलाज्यलक्षहोमन्तु उत्तमासिद्धिसाधने ॥ १४ ॥ मध्यमायां तदर्द्धेन तत्पादादधमासु च ॥ यथा जपस्तथा होमः संग्रामे विजयो भवेत् ॥ अघोरास्त्रं जपेन्यस्य ज्ञात्वा

पञ्चास्यमूर्जितम् ॥ १५ ॥ इत्यादिमहापुराणे आग्नेयेऽघोरास्त्रादिशान्तिकल्पनिरूपणंनामैकाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥

अथ पाशुपतशान्तिः ॥ ईश्वर उवाच ॥ वक्ष्ये पाशुपतास्त्रेण शान्तिजापादि पूर्वतः ॥ पादतः पूर्वनाशो हि फडन्तं चापदादिनुत् ॥ १ ॥ ओं नमो भगवते महापाशुपताय अतुलबलवीर्य्यपराक्रमाय त्रिपञ्चनयनाय नानारूपाय नानाप्रहरणोद्यताय सर्वाङ्गरक्ताय भिन्नाञ्जनचयप्रख्याय श्मशानवेतालप्रियाय सर्वविघ्ननिकृन्तनरताय सर्वसिद्धिप्रदाय भक्तानुकम्पिने असंख्यबाहवे सहस्रपादाय तस्मै सिद्धाय वेतालविद्रासिने शाकिनीक्षोभजनकाय व्याधिनिग्रहकारिणे पापभञ्जनाय मृत्युसोमाग्निनेत्राय विष्णुकवचाय खड्गवज्रहस्ताय यमदण्डवरुणपाशाय रुद्रशूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रहनिग्रहकारिणे दुष्टनागक्षयकारिणे ओं कृष्णपिङ्गलाय फट् हूंकारास्त्राय फट् वज्रहस्ताय फट् शक्तये फट् दण्डाय फट् यमाय फट् खड्गाय फट् नैर्ऋताय फट् वरुणाय फट् वज्राय फट् पाशाय फट् ध्वजाय फट् अङ्कुशाय फट् गदायै फट् कुबेराय फट् त्रिशूलाय फट् मुद्गराय फट् चक्राय फट् पद्माय फट् नागास्त्राय फट् ईशानाय फट् खेटकास्त्राय फट् मुण्डाय फट् मुण्डास्त्राय फट् कङ्कालास्त्राय फट् पिच्छिकास्त्राय फट् क्षुरिकास्त्राय फट् ब्रह्मास्त्राय फट् शक्त्यस्त्राय फट् गणास्त्राय फट् सिद्धास्त्राय फट् पिलिपिच्छास्त्राय फट् गन्धर्वास्त्राय फट् पूर्वास्त्राय फट् दक्षिणास्त्राय फट् वामास्त्राय फट् पश्चिमास्त्राय फट् मन्त्रास्त्राय फट् शाकिन्यस्त्राय फट् योगिन्यस्त्राय फट् दण्डास्त्राय फट् नमोस्त्राय फट् महादण्डास्त्राय फट् नागास्त्राय फट् शिवास्त्राय फट् ईशानास्त्राय फट् पुरुषास्त्राय फट् अघोरास्त्राय फट् कामदेवास्त्राय फट् सद्योजातास्त्राय फट् हृदयास्त्राय फट् महास्त्राय फट् गरुडास्त्राय फट् राक्षसास्त्राय फट् दानवास्त्राय फट् क्षौं नरसिंहास्त्राय फट् त्वष्टस्त्राय फट् सर्वास्त्राय फट् नः फट् वः फट् पः फट् फः फट् मः फट् स्त्रीं फट् ह्रैं फट् भूः फट् भुवः फट् स्वः फट् महः फट् जनः फट् तपः फट् सत्यं फट् सर्वलोक फट् सर्वपाताल फट् सर्वतत्त्व फट् सर्वप्राण फट् सर्वनाडी फट् सर्वकारण फट् सर्वदेव फट् ह्रीं फट् श्रीं फट् ह्रूं फट् स्रूं फट् आं फट् लां फट् वैराग्याय फट् मायास्त्रांय फट् कामास्त्राय फट् क्षेत्रपालास्त्राय फट् ह्रूंकारास्त्राय फट् भास्करास्त्राय फट् चन्द्रास्त्राय फट् विघ्नेश्वरास्त्राय फट् गौः गा फट् स्त्रौं स्त्रौं फट् ह्रौं ह्रौं फट् भ्रामय २ फट्

संतापय २ फट् छादय २ फट् उन्मूलय २ फट् त्रासय २ फट् सञ्जीवय २ फट् विद्रावय २ फट् सर्वदुरितं नाशय २ फट् ॥ सकृदावर्त्तनादेव सर्वविघ्नान्विनाशयेत् ॥ शतावर्त्तेन चोत्पातान्त्रगादौ विजयो भवेत् ॥ २ ॥ घृतगुग्गुलुहोमाच्च असाध्यानपि साधयेत् ॥ पठनात्सर्वशान्तिः स्याच्छस्त्रपाशुपतस्य च ॥ ३ ॥ इत्यादिमहापुराणे आग्नेये पाशुपतशान्तिवर्णनं नाम द्वाविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२२ ॥ अथ षडङ्गान्यघोरास्त्राणि ॥ ईश्वर उवाच ॥ ओं हूं हंस इति मन्त्रेण मृत्युरोगादि शाम्यति ॥ लक्षाहुतिभिर्दूर्वाभिः शान्तिं पुष्टिं प्रसाधयेत् ॥ १ ॥ अथ वा प्रणवेनैव मायया वा षडानन ॥ दिव्यान्तरिक्षभौमानां शांतिरुत्पातदूषके ॥ २ ॥ ओं नमो भगवंति गंङ्गे कालि २ महाकालि २ मांसशोणितभोजने रक्तकृष्णमुखि वशमानय मानुषान् स्वाहा ॥ ओं लक्षं जप्त्वा दशांशेन हुत्वा स्यात्सर्वकर्मकृत् ॥ वशं नयति शक्रादीन्मानुषेष्वेषु का कथा ॥ २ ॥ अन्तर्धानकरी विद्या मोहनी जृम्भणी तथा ॥ वशं नयति शत्रूणां शत्रुबुद्धिप्रमोहिनी ॥ ४ ॥ कामधेनुरियं विद्या सेतया परिकीर्तिता ॥ मन्त्रराजं प्रवक्ष्यामि शत्रुचौरादिमोहनम् ॥ ५ ॥ महाभयेषु सर्वेषु स्मर्तव्यं हरपूजितम् ॥ लक्षं जप्त्वा तिलैर्होमः सिध्येदुद्धारकं शृणु ॥ ६ ॥ ओं हले शूले एहि ब्रह्मसत्येन विष्णुसत्येन रुद्रसत्येन रक्ष मां वाचेश्वराय स्वाहा ॥ दुर्गात्तारयते यस्मात्तेन दुर्गा शिवा मता ॥ ओं चण्ड कपालिनि दन्तान् किटि २ खिटि २ मुखे फट् ह्रीं अनेन मंत्रराजेन क्षालयित्वा तु तण्डुलान् ॥ ७ ॥ त्रिंशद्वाराणि जप्तानि तच्चौरेषु प्रदापयेत् ॥ दन्तैश्छुर्णानि शुक्लानि पतितानि हि शुद्धये ॥ ८ ॥ ओं ज्वलज्जोचन कपिलजटाभारभास्वर विद्रावण त्रैलोक्यडामर २ दर २ भ्रम २ आकट्ट २ नोटय २ नोटय २ दह २ पच २ एवं सिद्धिरुद्रो ज्ञापयति यदि ग्रहोपगतः स्वर्गलोकं देवलोके वा आसमाविद्दारात्रलं तथापि तमावर्तयिष्यामि बलिं गृह्ण २ ददामि ते स्वाहेति ॥ क्षेत्रपालबलिं दत्त्वा ग्रहो व्यासाद्दशं व्रजेत् ॥ शत्रवो नाशमायान्ति रणे वैरिगणक्षयः ॥ ९ ॥ हंसबीजन्तु विन्यस्य विषन्तु त्रिविधं हरेत् ॥ अगुरुश्चन्दनं कुष्ठं कुङ्कुमं नागकेसरम् ॥ १० ॥ नखं वै देवदारुं च समं कृत्वाथ धूपकः ॥ माक्षिकेण समायुक्तो देववस्त्रादिधूपनात् ॥ ११ ॥ विवादे मोहने स्त्रीणां मण्डने कलहे शुभः ॥ कन्याया वरणे भाव्ये मायामन्त्रेण

मान्त्रितः ॥ १२ ॥ ह्रीं रोचनानागपुष्पाणि कुङ्कुमं च मनःशिला ॥ ललाटे तिलकं कृत्वा यं पश्येत्स वशी भवेत् ॥ १३ ॥ शतावर्य्यास्तु चूर्णन्तु दुग्धपीतं च पुत्रकृत् ॥ नागकेसरचूर्णन्तु घृतपक्वन्तु पुत्रकृत् ॥ १४ ॥ पालाशबीजपानेन लभते पुत्रकं तथा ॥ ओं उत्तिष्ठ चामुण्डे जम्भय २ मोहय २ अमुकं वशमानय २ स्वाहा षट्त्रिंशा सिद्धविद्या सा नदीतीरमृदा स्त्रियम् ॥ १५ ॥ कृत्वोन्मत्तरसेनैव नामालिख्यार्कपत्रके ॥ मूत्रोत्सर्गे ततः कृत्वा जपेत्तामानयेत्स्त्रियम् ॥ १६ ॥ ओं क्षुं सः वषट् महामृत्युञ्जयो मंत्रो जप्याद्धोमाच्च पुष्टिकृत् ॥ ओं हंसः हूं हूं सः हः सौं स्फैं ॥ मृतसञ्जीवनी विद्या अष्टार्णा जयकृद्रणे ॥ १७ ॥ मन्त्रा ईशानमुख्याश्च धर्मकामादिदायकाः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ १८ ॥ ब्रह्मणश्चाधिपतिर्ब्रह्म शिवोमेऽस्तु सदाशिवों ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ ओं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यस्तु सर्वतः ॥ १९ ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेरुतु रुद्ररूपेभ्यः ॥ ओं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमः ॥ रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः । सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ ओं सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥ भवे भवेऽनातिभवे भवस्व मां भवोद्भवाय नमः ॥ २० ॥ पञ्चब्रह्माङ्गषट्कं च वक्ष्येऽहं भुक्तिमुक्तिदम् ॥ ओं नमः परमात्मने पराय कामदाय परमेश्वराय योगाय योगसम्भवाय सर्वकराय कुरु २ सत्य २ भव २ भवोद्भव वामदेव सर्वकार्य्यकर पापप्रशमन सदाशिव प्रसन्न नमोऽस्तु ते स्वाहा । हृदयं सर्वार्थदन्तु सप्तत्यक्षरसंयुतम् ॥ ओं शिवः शिवाय नमः शिवः ओं हृदये ज्वालिनि स्वाहा शिखा ओं शिवात्मकं महातेजः सर्वज्ञ प्रभुरावर्त्तय महाघोर कवचपिङ्गल नमः । महाकवच शिवाज्ञया हृदयं बन्ध २ घूर्णय २ चूर्णय २ सूक्ष्मवज्रधर वज्रपाश धनुर्वज्राशनिवज्रशरीर मम शरीरमनुप्रविश्य सर्वदुष्टान् स्तम्भय २ हूं अक्षराणान्तु कवचं शतं पञ्चाक्षराधिकम् ॥ २१ ॥ ओं ओजसे नेत्रं ओं प्रस्फुर २ तनुरूप २ चट २ प्रचट २ कट २ वम २ घातय २ हुं फट् अघोरास्त्रम् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये षडङ्गाघोरास्त्रवर्णनं नाम त्रयोविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२३ ॥ अथ रुद्रशान्तिः ॥ ईश्वर उवाच ॥ शिवशान्तिं प्रवक्ष्यामि कल्पाघोरप्रपूर्वकम् ॥ सप्तकोट्यधिपो घोरो ब्रह्महत्याद्यघार्दनः ॥ १ ॥ उत्तमाधमसिद्धीनामालयोऽस्ति-

लरोगनुत् ॥ दिव्यान्तरिक्षभौमानामुत्पातानां विमर्दनः ॥ २ ॥ विषग्रहपिशाचानां ग्रसनः सर्वकामकृत् ॥ प्रायश्चित्तमघोपात्तो दौर्भाग्यार्त्तिविनाशनम् ॥ ३ ॥ एकवीरन्तु विन्यस्य ध्येयः पञ्चमुखः सदा ॥ शान्तिके पौष्टिके शुक्लो रक्तो वश्येऽथ पीतकः ॥ ४ ॥ स्तम्भने धूम्र उच्चाटमारणे कृष्णवर्णकः ॥ कपिलो मोहे द्वात्रिंशद्वर्णमर्चयेत् ॥ ५ ॥ त्रिंशल्लक्षं जपेन्मन्त्रं होमं कुर्य्याद्दशांशतः ॥ गुग्गुलामृतयुक्तेन सिद्धे सिद्धोऽथ सर्वकृत्॥ ६॥ अघोरान्नापरो मन्त्रो विद्यते भुक्तिमुक्तिकृत् ॥ अब्रह्मचारी ब्रह्मचारी अस्नातः स्नातको भवेत् ॥ ७ ॥ अघोरास्त्रमघोरन्तु द्वाविमौ मन्त्रराजकौ ॥ जपहोमार्चनाद्युद्धे शत्रुसैन्यं विमर्दयेत् ॥ ८ ॥ रुद्रशान्तिं प्रवक्ष्यामि शिवां सर्वार्थ-साधनीम्.॥ पुत्रार्थं ग्रहनाशार्थं विषव्याधिविनष्टये ॥ ९ ॥ दुर्भिक्षमारीशान्त्यर्थं दुःस्वप्नहरणाय च ॥ बलादिराज्यप्राप्त्यर्थं रिपूणां नाशनाय च ॥ १० ॥ अकालफलिते वृक्षे सर्वग्रहविमर्दने ॥ पूजने तु नमस्कारः स्वाहान्तो हवने तथा ॥ ११ ॥ आप्यायने वषट्कारं पुष्टौ वौषण्नियोजयेत् ॥ चकारद्वितयस्थाने जातियोगन्तु कारयेत्॥ १२॥ ओं रुद्राय च ओं वृषभाय नमः अविमुक्ताय असम्भवाय पुरु-षाय च पूज्याय ईशानाय पौरुषाय पञ्च चोत्तरे विश्वरूपाय कराल्य विकृतरूपाय अविकृतरूपाय ॥ निकृतौ चापरे काले अप्सुमाया च नैर्ऋते ॥ एकपिङ्गलाय श्वेतपिङ्गलाय कृष्णपिङ्गलाय नमः ॥ मधुपिङ्गलाय नमः मधुपिङ्गलाय नियंतौ अनन्ताय आर्द्राय शुष्काय प्योगणाय कालतत्त्वे कराल्य विकरालाय ॥ द्वौ मायातत्त्वे ॥ सहस्रशीर्षाय सहस्रवक्त्राय सहस्रकरचरणाय सहस्रलिङ्गाय ॥ विद्यातत्त्वे सहस्राक्षाद्विन्यसेद्दक्षिणे दले ॥ एकजटाय द्विजटाय त्रिजटाय स्वाहाकाराय स्वधाकाराय वषट्काराय ॥ षडरुद्रायेशतत्त्वे तु वह्निपत्रे स्थिता गुह ॥ भूतपतये पशुपतये उमापतये कालाधिपतये ॥ सदाशिवाख्यतत्त्वे षट् पूज्याः पूर्वदले स्थिताः ॥ उमाये कुरूपधारिणि ओं कुरु २ रुद्रिणि २ रुद्रोऽसि देवानां देवदेवविशाख हन २ दह २ पच २ मथ २ तुरु २ अरु २ सुरु २ रुद्रशान्तिमनुस्मर कृष्णपिङ्गल अकाल पिशाचाधिपति विश्वेश्वराय नमः ॥ शिवतत्त्वे कर्णिकायां पूज्यौ तूमामहेश्वरौ ॥ ओं व्योमव्यापिने व्योमरूपाय सर्वव्यापिने शिवाय अनन्ताय अनाथाय अनाश्रिताय शिवाय शिवतत्त्वे नव पदानि व्योमव्याप्याभिधास्यहि ॥ शाश्वताय योगपीठसंस्थिताय नित्यं योगिने ध्यानाहारत्य नमः ओं नमः शिवाय सर्वप्रभवे शिवाय ईशानमूर्धाय तत्पुरुषादिपञ्चवक्त्राय ॥ नवपदं पूर्वदले सदाख्ये पूज-

येदुद्द। अघोरेभ्यो घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ अघोरेभ्यो घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशिवोम् ॥ ओं नमो ब्रह्मणे ब्रह्मशिरसे ब्रह्मविद्यायै ब्रह्मणे ब्रह्मणे ब्रह्मणे

वैष्णवः स्मृतः ॥ १४ ॥ रुद्रांशको भवेद्वीर इन्द्रांशश्चेश्वरप्रियः ॥ नागांशो नागस्तब्धाक्षो यक्षांशो भूषणप्रियः ॥ १५ ॥ गन्धर्वांशो-ऽतिगीतादिः भीमांशो राक्षसांशकः ॥ दैत्यांशः स्याद्युद्धकार्य्यो मानी विद्याधरांशकः ॥ १६ ॥ पिशाचांशो मलाक्रान्तो मन्त्रं दद्यान्निरीक्ष्य च ॥ मन्त्र एकात्फडन्तः स्याद्विद्यापञ्चाशतावधि ॥ १७ ॥ बाला विंशाक्षरान्ता च रुद्रा द्वाविंशगायुधा ॥ तत ऊर्ध्वन्तु ये मन्त्रा वृद्धा यावच्छतत्रयम् ॥ १८ ॥ अकारादिहकारान्ताः क्रमात्पक्षौ सितासितौ ॥ अनुस्वारविसर्गेण विना चैव स्वरा दश ॥ १९ ॥ ह्रस्वाः शुक्ला दीर्घाः श्यामास्तिथयः प्रतिपन्मुखाः ॥ उदिते शान्तिकादीनि भ्रमिते वश्यकादिकम् ॥ २० ॥ भ्रामिते सन्धयो द्वेषोच्चाटने स्तम्भनेऽस्तकम् ॥ इडावाहे शान्तिकाद्यं पिङ्गले कर्षणादिकम् ॥ २१ ॥ मारणोच्चाटनादीनि विषुवे पञ्चधा पृथक् ॥ अधरस्य गृहे पृथ्वी ऊर्द्धे तेजोऽन्तरा द्रवः ॥ २२ ॥ रन्ध्रपार्श्वे बहिर्वायुः सर्वं व्याप्य महेश्वरः ॥ स्तम्भनं पार्थिवे शान्तिर्जले वश्यादि तेजसे । वायौ स्याद्भ्रमणं शून्ये पुण्यकाले समभ्यसेत् ॥ २३ ॥ इत्या-दिमहापुराणे आग्नेयेंशकादिवर्णनं नाम पंचविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२५ ॥ अथ गौर्य्यादिपूजा ॥ ईश्वर उवाच ॥ सौभा-ग्यादेरुमापूजां वक्ष्येऽहं भुक्तिमुक्तिदाम् ॥ मन्त्रध्यानं मण्डलञ्च मुद्रां होमादिसाधनम् ॥ १ ॥ चित्रभानुं शिवं कालं महाशक्तिसम-न्वितम् ॥ इडाद्यं परतोद्धृत्य सदेवः सविकाग्णम् ॥ २ ॥ द्वितीयं द्वारकाक्रान्तं गौरीप्रीतिपदान्वितम् ॥ चतुर्थ्यन्तं प्रकर्त्तव्यं गौर्य्यो वै मूलवाचकम् ॥ ३ ॥ ओं ह्रीं सः शां गौर्य्यै नमः ॥ तत्वार्णत्रितयेनैव जातियुक्तं षडङ्गुलम् ॥ आसनं प्रणवेनैव मूर्त्तिं वै हृदयेन तु ॥ ४ ॥ उदकं च तथा कालं शिवबीजं समुद्धरेत् ॥ प्राणं दीर्घस्वराक्रान्तं षडङ्गं जातिसंयुतम् ॥ ५ ॥ आसनं प्रणवेनात्र मूर्त्ति-न्यासं हृदाचरेत् ॥ यामलं कथितं वत्स एकवीरं वदाम्यथ ॥ ६ ॥ व्यापकं सृष्टिसंयुक्तं वह्निमायांकृशानुभिः ॥ शिवशक्तिमयं बीजं हृदयादिविवर्जितम् ॥ ७ ॥ गौरीं यजेद्धेमरूप्यां काष्ठजां शैलजादिकाम् ॥ पञ्चपिण्डां तथाऽव्यक्तां कोणे मध्ये तु पञ्चमम् ॥ ८ ॥ ललिता सुभगा गौरी क्षोभणी चाग्नितः क्रमात् ॥ वामा ज्येष्ठा क्रिया ज्ञाना वृत्ते पूर्वादितो यजेत् ॥ ९ ॥ सपीठे वामभागे तु शिव-स्यान्यक्तरूपकम् ॥ व्यक्ता द्विनेत्रा त्र्यक्षरा शुद्धा वा शङ्करान्विता ॥ १० ॥ पीठपद्मद्वयं तारा द्विभुजा वा चतुर्भुजा ॥ सिंहस्था वा

वृक्स्था वा अष्टाष्टादश सत्करा ॥ ११ ॥ स्रगक्षसूत्रकलिका गलकोत्पलपिण्डिका ॥ शरं धनुर्वा सव्येन पाणिनान्यतमं वहत् ॥ १२॥
वामेन पुस्तताम्बूलदण्डाभयकमण्डलुम् ॥ गणेशदर्पणेष्वासान्दद्यादेकैकशः क्रमात् ॥ १३ ॥ व्यक्ताव्यक्ताऽथ वा कार्य्या पद्ममुद्रा
स्मृतासने ॥ लिङ्गमुद्रा शिवस्योक्ता मुद्रा चावाहनी द्वयोः॥ १४ ॥ शक्तिमुद्रा तु योन्याख्या चतुरस्रन्तु मण्डलम् ॥ चतुरस्रं त्रिप-
त्राब्जं मध्यकोष्ठचतुष्टये ॥ १५ ॥ त्र्यश्रोर्द्धे चार्द्धचन्द्रस्तु द्विपदं द्विगुणं क्रमात् ॥ द्विगुणं द्वारकण्ठं तु द्विगुणादुपकण्ठतः ॥ १६ ॥
द्वारत्रयं त्रयं दिक्षु अथ वा भद्रके यजेत् ॥ स्थण्डिले वाथ संस्थाप्य पञ्चगव्यामृतादिना ॥ १७ ॥ रक्तपुष्पाणि देयानि पूजायित्वा
हृदङ्गमुखः ॥ शतं हुत्वामृताज्यं च पूर्णादः सर्वसिद्धिभाक् ॥ १८ ॥ बलिं दत्त्वा कुमारीश्च तिस्रो वा चाष्ट भोजयेत् ॥ नैवेद्य शैवभ-
क्तेषु दद्यान्न स्वयमाचरेत् ॥ १९ ॥ कन्यार्थी लभते कन्यामपुत्रः पुत्रमाप्नुयात् ॥ दुर्भगा चैव सौभाग्यं राजा राज्यं जयं रणे ॥ २० ॥
अष्टलक्षैश्च वाक्सिद्धिर्देवाद्या वशमाप्नुयुः ॥ न निवेद्य न चाश्नीयाद्धामहस्तेन चार्चयेत् ॥ २१ ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशे-
षतः ॥ मृत्युञ्जयार्चनं वक्ष्ये पूजयेत्कलशोदरे ॥ २२ ॥ हूयमानं च प्रणवो मूर्त्तिराजस ईदृशम् ॥ मूलं च वौषडन्तेन कुम्भमुद्रां
प्रदर्शयेत् ॥ २३ ॥ होमयेत्क्षीरदूर्वाज्यममृतां च पुनर्नवाम् ॥ पायसं च पुरोडाशमयुतन्तु जपेन्मनुम् ॥ २४ ॥ चतुर्मुखं चतुर्बाहुं
द्वाभ्यां च कलशं दधत् ॥ वरदाभयकं द्वाभ्यां स्रायाद्वै कुम्भमुद्रया ॥ २५ ॥ आरोग्यैश्वर्य्यदीर्घायुरौषधं मन्त्रितं शुभम् ॥ अपमृ-
त्युहरो ध्यातः पूजितोऽद्भुत एव सः ॥ २६ ॥ इत्यादिमहापुराणे आग्नेये गौर्यादिपूजाविधाननिरूपणं नाम षड्विंशत्यधिकत्रिशततमोऽ-
ध्यायः ॥ ३२६ ॥ अथ देवालयादिमाहात्म्यम् ॥ ईश्वर उवाच ॥ व्रतेश्वरांश्च सन्यादीनिष्ट्वा व्रतसमर्पणम् ॥ अरिष्टशमने शस्त-
मरिष्टं सूत्रनायकम् ॥ १ ॥ हेमरत्नमयं भूत्यै महाशङ्खं च मारणे ॥ आप्यायने शंखसूत्रं मौक्तिकं पुत्रवर्द्धनम् ॥ २ ॥ स्फाटिकं भूतिदं
कोशं मुक्तिदं रुद्रनेत्रजम् ॥ धात्रीफलप्रमाणेन रुद्राक्षं चोत्तमं ततः ॥ ३ ॥ समेरुं मेरुहीनं वा सूत्रं जप्यन्तु मानसम् ॥ अनामा-
ङ्गुष्ठमाक्रम्य जपं भाष्यन्तु कारयेत् ॥ ४ ॥ तर्जन्यङ्गुष्ठमाक्रम्य न मेरुं लंघयेज्जपे ॥ प्रमादात्पतिते सूत्रे जप्तव्यन्तु शतद्वयम् ॥
॥ ५ ॥ सर्ववाद्यमयी घण्टा तस्या वादनमर्थकृत् ॥ गोशकृन्मूत्रवल्मीकमृत्तिकाभस्मवारिभिः ॥ ६ ॥ वेश्मायतनलिङ्गादेः कार्य्यमेवं

विशोधनम् ॥ स्कन्दो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ॥ ७ ॥ गीतः पञ्चाक्षरो वेदे लोके गीतः षडक्षरः ॥ ओमित्यन्ते स्थितः शम्भुर्मुद्रार्थं वटबीजवत् ॥ ८ ॥ क्रमान्नमः शिवायेति ईशानाद्यानि वै विदुः ॥ षडक्षरस्य सूत्रस्य भाष्याद्विद्याकदम्बकम् ॥ ९ ॥ यदों नमः शिवायेति एतावत्परमं पदम् ॥ अनेन पूजयेल्लिङ्गं लिङ्गे यस्मात् स्थितः शिवः ॥ १० ॥ अनुग्रहाय लोकानां धर्मकामार्थमुक्तिदः ॥ यो न पूजयते लिङ्गं न स धर्मादिभाजनम् ॥ ११ ॥ लिङ्गार्चनाद्भुक्तिमुक्तिर्यावज्जीवमतो यजेत् ॥ वरं प्राणपरित्यागो भुञ्जीतापूज्य नैव तम् ॥ १२ ॥ रुद्रस्य पूजनाद्रुद्रो विष्णुः स्याद्विष्णुपूजनात् ॥ सूर्य्यः स्यात्सूर्य्यपूजातः शक्त्यादिः शक्तिपूजनात् ॥ १३ ॥ सर्वयज्ञतपोदाने तीर्थं वेदेषु यत्फलम् ॥ तत्फलं कोटिगुणितं स्थाप्य लिङ्गं लभेन्नरः ॥ १४ ॥ त्रिसन्ध्यं योर्चयेल्लिङ्गं कृत्वा बिल्वेन पार्थिवम् ॥ शतैकादशिकं यावत्कुलमुद्धृत्य नाकभाक् ॥ १५ ॥ भक्त्या वित्तानुसारेण कुर्य्यात्प्रासादसञ्चयम् ॥ अल्पे महति वा तुल्यफलमाढ्यदरिद्रयोः ॥ १६ ॥ भागद्वयं च धर्मार्थं कल्पयेज्जीविनाय च ॥ धनस्य भागमेकन्तु अनित्यं जीवितं यतः ॥ १७ ॥ त्रिसप्तकुलमुद्धृत्य देवागारकृदर्थभाक् ॥ मृत्काष्टेष्टकशैलाद्यैः क्रमात्कोटिगुणं फलम् ॥ १८ ॥ अष्टेष्टकसुरागारकारी स्वर्गमवाप्नुयात् ॥ पांसुना क्रीडमानोऽपि देवागारकृदर्थभाक् ॥ १९ ॥ इत्यादिमहापुराणे आग्नेये देवालयादिमाहात्म्यनिरूपणं नाम सप्तविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२७ ॥ अथ च्छन्दःसारः ॥ अग्निरुवाच ॥ छन्दो वक्ष्ये मूलजैस्तैः पिङ्गलोक्तं यथाक्रमम् ॥ सर्वादिमध्यान्तगणौ म्नौ भ्यौ त्रौ स्तौ त्रिका गणाः ॥ १ ॥ ह्रस्वो गुरुर्वा पादान्ते पूर्वो योगाद्विसर्गतः ॥ अनुस्वाराढ्यजनात्स्याज्जिह्वामूलीयतस्तथा ॥ २ ॥ उपध्मानीयतो दीर्घो गुरु र्लौ नौ गणाविह ॥ वसवोऽष्टौ च चत्वारो वेदादित्यादिलोकतः ॥ ३ ॥ इत्यादिमहापुराणे आग्नेये छंदःसारे अष्टाविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२८ ॥ अथ छन्दःसारः ॥ अग्निरुवाच ॥ छन्दोऽधिकारे गायत्री देवी चैकाक्षरी भवेत् ॥ पञ्चदशाक्षरी सा स्यात्प्राजापत्याष्टवर्णिका ॥ १ ॥ यजुषां षडर्णा गायत्री साम्ना स्याद्वादशाक्षरा ॥ ऋचामष्टादशार्णा स्यात्साम्नां वर्षैत च द्वयम् ॥ २ ॥ ऋचां तुर्य्यश्च वर्षैत प्राजापत्याचतुष्टयम् ॥ वर्षैदेकैककं शेषे आतुर्य्यादेकमुत्सृजेत् ॥ ३ ॥ उष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुज्जगत्यपि ॥ तानि

ज्ञेयानि क्रमशो गायत्र्यो ब्रह्म एव ताः ॥ ४ ॥ तिस्रास्तिस्रः सनाम्न्यः स्युरेकैका आर्ष्य एव च ॥ ऋग्यजुषां संज्ञाः स्युश्चतुःषष्टिपदे
लिखेत् ॥ ५ ॥ इत्यादिमहापुराणे आग्नेये छंदःसारे एकोनत्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३२९ ॥ अथ छन्दःसारः ॥ अग्निरुवाच ॥
पाद आपादपूरणे गायत्र्यो वसवः स्मृताः ॥ जगत्या आदित्याः पादो विराजो दिश ईरिताः ॥ १ ॥ विष्णुतो रुद्राः पादः स्याच्छन्द एका-
दिपादकम् ॥ आद्यं चतुष्पाच्चतुर्भिस्त्रिपात् सप्ताक्षरैः क्वचित् ॥ २ ॥ सा गायत्री पदे नीवृत्तत्प्रतिष्ठादि पट् त्रिपात् ॥ वर्धमानाः षडष्टाष्टा
त्रिपात्षड्वसुभूधरैः ॥ ३ ॥ गायत्री त्रिपदा नीवृन्नागी नव नवर्त्तुभिः ॥ वाराही रसाद्रिरसा छन्दश्चाथ तृतीयकम् ॥ ४ ॥ द्विपाद्दादशव-
स्वन्तैस्त्रिपात्तु त्रैष्टुभैः स्मृतम् ॥ उष्णिक्छन्दोऽष्टवसुकैः पादैर्वेदे प्रकीर्त्तितः ॥ ५ ॥ ककुबुष्णिगष्टसूर्य्यवस्वर्णा त्रिभिरेव सः ॥ पुनरु-
ष्णिक्सूर्य्यवसुवस्वर्णैश्च त्रिपाद्भवेत् ॥ ६ ॥ परोष्णिक्परतस्तस्माच्चतुष्पादात्रिभिर्भवेत् ॥ साष्टाक्षरैरनुष्टुप्स्याच्चतुष्पाच्च त्रिपात्क-
चित् ॥ ७ ॥ अष्टार्कसूर्य्यवर्णैः स्यान्मध्येऽन्ते च क्वचिद्भवेत् ॥ बृहतीजगत्यस्त्रयो गायत्र्याः पूर्वको यदि ॥ ८ ॥ तृतीयः पथ्या भवति
द्वितीया न्यंकुसारिणी ॥ स्कन्धो ग्रीवा कौषुके स्याद्यक्षे स्याद्रो बृहत्यपि ॥ ९ ॥ उपरिष्टाद्बृहत्यन्ते पुरस्ताद् बृहती पुनः ॥ क्वचिन्नवकां-
श्चत्वारो दिग्विदिक्ष्वष्टवर्णिकाः ॥ १० ॥ महाबृहती जागतैः स्यात्रिभिः सतो बृहत्यपि ॥ भण्डिलः पंक्तिश्छन्दः स्यात्सूर्य्यार्काष्टाष्ट-
वर्णकैः ॥ ११ ॥ पूर्वौ वेदयुजौ सतः पंक्तिश्च विपरीतको ॥ प्रस्तारपंक्तिश्च पुरतः पवादास्तरपंक्तिका ॥ १२ ॥ अक्षरपंक्तिः पञ्चकाश्च-
त्वारश्चाल्पशो द्वयम् ॥ पदपंक्तिः पञ्च भवेच्चतुष्कं षट्कत्रयम् ॥ १३ ॥ षट्कपञ्चभिर्गायत्रैः षड्भिश्च जगती भवेत् ॥ एकेन त्रिष्टुब्ज्यो-
तिष्मती तथैव जगतीरिता ॥१४॥ पुरस्ताज्ज्योतिः प्रथमे मध्ये ज्योतिश्च मध्यतः ॥ उपरिष्टाज्ज्योतिरन्त्यादेकस्मिन्पञ्चके तथा ॥ १५ ॥
भवेच्छन्दः शङ्कुमती षट्के छन्दः ककुभ्मती ॥ त्रिपादशिशुमध्या स्यात्सा पिपीलिकमध्यमा ॥ १६ ॥ विपरीता यवमध्या त्रिवृदेकेन
वर्जिता ॥ भूमिजेकेनाधिकेन द्विहीना च चिराद्भवेत् ॥ १७ ॥ स्वराट् स्याद्द्वाभ्यामधिकं सन्दिग्धो देवतादितः ॥ आदिपादान्निश्चयः
स्याच्छन्दसां देवताः क्रमात् ॥ १८ ॥ अग्नि सूर्य्यः शशी जीवो वरुणश्चन्द्र एव च ॥ विश्वेदेवाश्च षड्जाद्याः स्वराः षड्जो वृषः
क्रमात् ॥ १९ ॥ गान्धारो मध्यमश्चैव पञ्चमो धैवतस्तथा ॥ निषादवर्णाः श्वेतश्च सारङ्गश्च पिशङ्गकः ॥ २० ॥ कृष्णो नीलो लोहितश्च

गौरो गायत्रिमुख्यके ॥ गोरोचनाभाः कृतयो ज्योतिश्छन्दो हि श्यामलम् ॥ २१ ॥ अग्निर्वैश्यः काश्यपश्च गोतमाङ्गिरसौ क्रमात् ॥ भार्गवः कौशिकश्चैव वासिष्ठो गोत्रमीरितम् ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये छन्दःसारे त्रिंशदधिकत्रिशततमोऽध्यायः ॥३३०॥ अथ छन्दोजातिनिरूपणम् ॥ अग्निरुवाच ॥ चतुःशतमुत्कृतिः स्यादुत्कृतेश्चतुरस्त्यजेत् ॥ अभिसंख्या प्रत्यकृतिस्तानि छन्दांसि वै पृथक् ॥ १ ॥ कृतिश्चाति धृतिर्धात्री अत्यष्टिश्चाष्टिरित्यतः ॥ अतिशक्करी शक्करीति अतिजगती जगत्यपि ॥ २ ॥ छन्दोऽत्र लौकिकं स्याच्च आर्षमात्रैष्टुभात्स्मृतम् ॥ त्रिष्टुप्पङ्क्तिर्बृहती अनुष्टुबुष्णिगीरितम् ॥ ३ ॥ गायत्री स्यात्सुप्रतिष्ठा प्रतिष्ठा मध्यया सह ॥ अत्युक्तात्युक्त आदिश्च एकैकाक्षरवर्जितम् ॥ ४ ॥ चतुर्भागो भवेत्पादो गणच्छन्दः प्रदर्श्यते ॥ तावन्तः समुद्रा गणा ह्यादिमध्यान्तसर्वगाः ॥ ५ ॥ चतुर्वर्णाः पञ्च गणा आर्य्यालक्षणमुच्यते ॥ स्वरार्द्धेश्चार्य्यार्द्धे स्यादार्य्यायां विषेमण जः ॥ ६ ॥ षष्ठो जो नलपूर्वो स्याद्वितीयादिपदं नले ॥ सप्तमेऽन्ते प्रथमा च द्वितीये पञ्चमे नले ॥ ७ ॥ अर्द्धे पदं प्रथमादि षष्ठ एको लघुर्भवेत् ॥ त्रिषु गणेषु पादः स्यादार्य्यापश्चार्द्धके स्मृता ॥ ८ ॥ विपुलान्यथ चपला गुरुमध्यगतौ च जौ ॥ द्वितीयचतुर्थौ पूर्वे च चपला मुखपूर्विका ॥ ९ ॥ द्वितीये जघनपूर्वा चपलार्य्या प्रकीर्त्तिता ॥ उभयोर्महाचपला गीतवाद्यार्द्धतुल्यका ॥ १० ॥ अन्त्येनार्द्धेनोपगीतिरुद्गातिश्चोत्क्रमात्स्मृता ॥ अर्द्धे रक्षगणा आर्य्या गीतच्छन्दोऽथ मात्रया ॥ ११ ॥ वैतालीयं द्विस्वरा स्यादायुष्पादे समे नलः ॥ वसवोऽन्ते वनगाश्च गोपुच्छं दशकं भवेत् ॥ १२ ॥ भगणान्ता पाटलिका शेषे परे च पूर्ववत् ॥ साकं षड्वा मिश्रायुक्प्राच्यवृत्तिः प्रदर्श्यते ॥ १३ ॥ पञ्चमेन पूर्वसाकं तृतीयेन सहस्रयुक् ॥ उदीच्यवृत्तिर्वाच्यं स्याद्युगपच्च प्रवर्त्तकम् ॥ १४ ॥ अयुक्चारुहासिनी स्याद्युगपच्चान्तिका भवेत् ॥ सप्तार्चिर्वसवश्चैव मात्रासमकमीरितम् ॥ १५ ॥ भवेन्नलरमौ लश्च द्वादशो वानवासिका ॥ विश्लोकः पञ्चमाष्टौ मो चित्रा नवमकश्चलः ॥ १६ ॥ परयुक्तेनोपचित्रा पादाकुलकमित्युत ॥ गीत्यार्या लोपश्चेत्सौम्या लः पूर्वा ज्योतिरीरिता ॥ १७ ॥ स्याच्छिखा विपर्य्यस्तार्द्धा तूलिका समुदाहृता ॥ एकोनत्रिंशदन्ते गः स्याज्जेजनसमावला ॥ गुरित्येकगुरुं संख्यावर्णादशापिपर्य्ययात् ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये छंदःसारे एकत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३१ ॥ अथ विषमकथनम् ॥ अग्निरुवाच ॥ वृत्तं समञ्चार्द्धसमं विषमञ्च त्रिधा वदे ॥ समन्तावत्कृताकृतम-

र्द्धसमञ्च कारयेत् ॥ १ ॥ विषमं चेव वा स्यूनमतिवृत्तं समान्यपि ॥ ग्लौचतुष्प्रमाणी स्यादाभ्यामन्यद्वितानकम् ॥ २ ॥ पादस्याद्यन्तु वक्रं स्यात्सनौ न प्रथमा स्मृतौ ॥ बाल्यमुश्चतुर्थाद्वर्णात्पथ्यावक्रं युजो यतः ॥ ३ ॥ विपरीतपथ्यान्यासाच्चपला वा युजस्वनः ॥ विपुलायुग्मसप्तमः सर्वं तस्यैव तस्य च ॥ ४ ॥ तोन्तौ वा विपुलानेका चक्रजातिः समीरिता ॥ भवेत्पदं चतुरूर्ध्वं चतुर्वृद्ध्या पदेषु च ॥ ५ ॥ गुरुद्वयान्त आपीडः प्रत्यापीडो गणादिकः ॥ प्रथमस्य विपर्य्यासं मञ्जरी लवणी क्रमात् ॥ ६ ॥ भवेदमृतधाराख्या उद्ध-ताद्युच्यतेऽधुना ॥ एकतः ससजसानः स्युर्नसौ जो गोऽथ भौ नजौ ॥ ७ ॥ नो गोऽथ सजसा गोगस्तृतीयचरणस्य च ॥ सौरभे केचन भगा ललितश्च नमौ जसौ ॥ ८ ॥ उपस्थितं प्रचुपितं प्रथमाद्यं समौ जसौ ॥ गौगथो मलजा रोगः समौ चरजयाः पदे ॥ ९ ॥ वर्ध-मानं मलौ स्वौ नसौ अथो भोजोव इरिता ॥ शुद्धं विराडपभाख्यं वक्ष्ये चार्द्धसमन्तनः ॥ १० ॥ इत्यादिमहापुराणे आग्नेये छन्दःसारे द्वात्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३२॥ अथ अर्द्धसमनिरूपणम् ॥ अग्निरुवाच ॥ उपचित्रकं ससमनामथभोजभगामथ ॥ द्रुतमध्या ततभगागथोननजयाः स्मृताः ॥ १ ॥ वेगवती ससमगा भभभगोगथो स्मृता ॥ रुद्रविस्तारस्तोसभगासमजागोगथा स्मृता ॥ २ ॥ रजसागोगथोद्रोणौगोगौ वै केतुमत्यपि ॥ आख्यानिकी ततजगागथोततजगागथ ॥ ३ ॥ विपरीताख्यानिकी तौ जयामा नौ जगोगथ ॥ सौमलौ गथलभभावौ भवेद्धरिणवल्लभा ॥ ४ ॥ लोवनौगाथनजजा यः स्यादपराक्रमम् ॥ पुष्पिता ननवयानजजावोगथो रजौ ॥ ५ ॥ वोजश्चो जवजवागो मूले पनमनौ शिखा ॥ अष्टाविंशतिनागाभा त्रिंशन्नागन्ततो युजि ॥ खञ्जा तद्विपरीता स्यात्समवृत्तं प्रदर्श्यते ॥ ६ ॥ इत्यादिमहापुराणे आग्नेये छंदःसारे त्रयस्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३३ ॥ अथ समवृत्तनिरूपणम् ॥ अग्निरुवाच ॥ यतिर्विच्छेद इत्युक्तस्तत्तन्मध्यान्तयौ गणौ ॥ योसः कुमारललिता तौ गौ चित्रपदा स्मृता ॥ १ ॥ विद्युन्माला मममागणैर्भूतगणैर्भ-वेत् ॥ माणवका क्रीडितकं वनौ हलमुखीवसः ॥ २ ॥ स्याद्भुजङ्गशिशुभृता नौ मेहनं मरुतं ननौ ॥ भवेच्छुद्धविराड्वृत्तप्रतिपादं समौ जगौ ॥ ३ ॥ पणवोमलयोमः स्याज्जौगौ मयूरसारिणी ॥ सत्तामभसगा वृत्तं भजताद्युपरिस्थिता ॥ ४ ॥ रुक्मवती भससगाविन्द्रवज्रा तजौ जगौ ॥ जतौ जगौ भूपपूर्वावाद्यन्ताद्युपजातयः ॥ ५ ॥ दोधकं भगभागौ स्याच्छालिनी मतभागगौ ॥ यतिः

समुद्रा ऋषयः वातोर्मी मभतागगौ ॥ ६ ॥ चतुःस्वरा स्याद्भ्रमरो विलासिता मभौनलौ ॥ समुद्रा अय ऋषभो वनौ लौगौ रथोद्धता ॥ ७ ॥ सामताधनभागोगावृत्ताननसमाश्च सः ॥ श्येनी वजवनागः स्याद्भम्या नपरगागगः ॥ ८ ॥ जगती वंशस्था वृत्तं जतौ जावथ तौ जवौ ॥ इन्द्रवंशा तोटकं सैश्चतुर्भिः प्रतिपादतः ॥ ९ ॥ भवेद्रुनाविलाम्बिता नभौ भवावथौ नलौ ॥ स्यौ श्रीपुटो वसुवेदा जलौगतिजलौ जमौ ॥ १० ॥ जसौ वसर्ववश्चाथ ततं ननमराः स्मृतम् ॥ कुसुमविचित्रान्यौ द्यौ नौ नौ रौ स्याच्चलाम्बिका ॥ ११ ॥ भुजङ्गप्रयातं यैः स्याच्चतुर्भिः स्रग्विनीभवैः ॥ प्रमिताक्षरा गजौ सौ कान्तोत्पीडा मनौ समौ ॥ १२ ॥ वेश्वदेवौ ममयायाः पञ्चाङ्गा नंवमालिनी ॥ नजौ भयौ प्रतिपादं गणा यदि जगत्यपि ॥ १३ ॥ प्रहर्षणी मवजवा गोपतिर्वाह्निदिक्षु च ॥ रुचिरा जभसजगा छिन्ना वेदैर्यहैः स्मृता ॥ १४ ॥ मत्तमयूरं मतया सगौ वेदग्रहे यतिः ॥ गौरीनलनसागः स्यादसम्बाधा नतौ नगौ ॥ १५ ॥ गोग इन्द्रियनवकौ ननौ वसनागाः स्वराः ॥ स्वरांश्चापराजिता स्यान्ननभानत्रगाः स्वराः ॥ १६ ॥ द्विःप्रहरणकलिता वसन्ततिलकानभौ ॥ जौ गौ सिंहोन्नता सा स्यान्मुनेरुद्धर्षणौ च सा ॥ १७ ॥ चन्द्रावर्त्तानना सोमावर्त्तर्तुनवकः स्मृतः ॥ मणिगुणनिकरा सौ मालिनी नौ मयौ ययः ॥ १८ ॥ यतिर्वसुस्वरा भौ वौ नतलामित्रसग्रहाः ॥ ऋषभगजविलासितं ज्ञेया शिखरिणी जगौ ॥ १९ ॥ रसभालभृगुरुद्राः पृथ्वीजसजसा जनौ ॥ गावसुग्रहाविच्छिन्ना पिङ्गलेनेरिता पुरा ॥ २० ॥ वंशपत्रपतितं स्याद्भवना भौ नगौ सदिक् ॥ हरिणी नसमारः सौ नगौ रसचतुःस्वराः ॥ २१ ॥ मन्द्राक्रान्ता नभनतं तगोगच्छिर स्वराः ॥ कुसुमितलता वेल्लिता मतना यत्यया शराः ॥ २२ ॥ रथाः स्वराः प्रतिरथससजाः सतताश्च गः ॥ शार्दूलविक्रीडितं स्यादादित्यमुनयो यतिः ॥ २३ ॥ कृतिः सुवदना मो गो भनया भनगाः सुराः ॥ यतिर्मुनिरसाश्चाथ इति वृत्तं क्रमात्स्मृतम् ॥ २४ ॥ स्रग्धरा मरनाभोगो ययौ त्रिःसतका यतिः ॥ समुद्रकं भरजानोवनगा दशभास्कराः ॥ २५ ॥ अश्वललितं नजभा जभजा भनमीशतः ॥ मत्ताक्रीडा ममंनना नोनगौ गोष्टमाग्नीथिः ॥ २६ ॥ तन्वी भनतसाभोभो लयो बाणसुरार्ककाः ॥ क्रौञ्चपदा भमतता नौ नौ बाणशराष्टतः ॥ २७ ॥ भुजङ्गविजृम्भितं समतना ननवासनौ ॥ गोष्टेशमुनिभिश्छेदो द्युपहारास्यमीदृशम् ॥ २८ ॥ मननानवतानः सो गगौ ग्रहरसो रसात् ॥ नौ मत्तरोदण्डदः स्याच्चण्डवृष्टिप्रपात-

कम् ॥२९॥ रेफवृद्ध्या ननवा स्युर्व्यालजीमूतमुख्यकाः ॥ शेषे वै प्रचिता ज्ञेया गाथाप्रस्तार उच्यते ॥३०॥ इत्यादिमहापुराणे आग्नेये समवृत्तवर्णनं नाम चतुस्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३४ ॥ अथ प्रस्तारनिरूपणम् ॥ अग्निरुवाच ॥ छन्दोऽब्धिसिद्धं गाथा स्यात्पादे सर्वगुरौ तथा ॥ प्रस्तार आद्य गाथोनः परतुल्योऽथ पूर्वगः ॥ १ ॥ नष्टमध्ये समेऽङ्के नः समेऽर्द्धविषमे गुरुः ॥ प्रतिलोमगुणं नाद्यं द्विरुद्दिष्टक एकनुत् ॥ २ ॥ सङ्ख्याद्विरर्धे रूपे तु शून्यं शून्ये द्विरीरितम् ॥ नावदर्धे तद्गुणितं द्विद्विघ्नश्च तदन्तनः ॥ ३ ॥ परे पूर्णे परे पूर्णे मेरुप्रस्तारतो भवेत् ॥ नगसंख्या वृत्तसंख्या चाब्धाद्युलमथाऽर्द्धतः ॥ संख्यैव द्विगुणं क्षोनो छन्दःसागोऽयमीरितः ॥ ४ ॥ इत्यादिमहापुराणे आग्नेये पञ्चत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३५ ॥ अथ शिक्षानिरूपणम् ॥ अग्निरुवाच ॥ वक्ष्ये शिक्षां त्रिषष्टिः स्युर्वर्णा वा चतुरधिकाः ॥ स्वारा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ॥ १ ॥ यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ अनुस्वारो विसर्गश्च क-क पौ चापि परान्वितौ ॥ २ ॥ दुस्पृष्टश्चेति विज्ञेयो लकारः प्लुत एव च ॥ रश्च खे अरं प्रोक्तं हकारः पञ्चमैर्युतः ॥ ३ ॥ अन्तःस्थाभिः समायुक्त ओरस्यः कण्ठ्य एव सः ॥ आत्मावृद्ध्या समेमार्थं मनो युंक्ते विवक्षया ॥ ४ ॥ मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ॥ ५ ॥ प्रातःसवनयोगं तु छन्दो गायत्रमाश्रितम् ॥ कण्ठे माध्यन्दिनयुतं मध्यमन्त्रेषु भानुगम् ॥ ६ ॥ तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ सोदीर्णो मूर्ध्न्यभिहितो वक्त्रमापद्य मारुतः ॥ ७ ॥ वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ स्वरतः कालतः स्थानात्प्रयत्नार्थप्रदानतः ॥ ८ ॥ अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ॥ जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥ ९ ॥ स्वभावश्च विवृत्तिश्च शषसा रेफ एव च ॥ जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १० ॥ यद्यो भावप्रसन्धानमुकारादि परम्पदम् ॥ स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ ११ ॥ कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम् ॥ एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥ १२ ॥ सुतीर्थादागतं द्रव्यं साम्नायं सुव्यवस्थितम् ॥ सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ १३ ॥ न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ॥ गद्गदो बहुजिह्वश्च न वर्णान्वक्तुमर्हति ॥ १४ ॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ॥ सम्यग्वर्णप्रयोगेण ब्रह्मलोके

महीयते ॥ १५ ॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमाश्रयि ॥ १६ ॥ कण्ठ्यावह्वाविचु यशास्तालव्या ओष्ठजावुपू ॥ स्युर्मूर्द्धन्या ऋटुरषा दन्त्याः ऌतुलसाः स्मृताः ॥१७॥ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठौ वः स्मृतो बुधैः॥ एदैतौ कण्ठतालव्यौ ओऔ कण्ठ्यौष्ठजौ स्मृतौ ॥ १८ ॥ अर्द्धमात्रा तु कण्ठ्यास्याकारैकारयोर्भवेत् ॥ अयोगवाहा विज्ञेया आश्रय-स्थानभागिनः ॥ १९ ॥ अचोऽस्पृष्टायणस्त्वीषन्नोमस्पृष्टा हलः स्मृताः ॥ शेषाः स्पृष्टा हलः प्रोक्ता निबोधात्र प्रधाननः ॥२० ॥ अमो-ऽनुनासिकानह्यौ नादिनो हञषः स्मृताः ॥ ईषन्नादा यणश्चैव श्वासिनश्च खफादयः ॥ ईषच्छ्वासं चरं विद्यादीर्घमेतत्प्रचक्षते ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये शिक्षावर्णनं नाम षट्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३६ ॥ अथ काव्यादिलक्षणम् ॥ अग्निरुवाच ॥ काव्यस्य नाटकादेश्च अलङ्कारान्वदाम्यऽथ ॥ ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम् ॥ १ ॥ शास्त्रेतिहासवाक्यानां त्रयं यत्र समा-प्यते ॥ शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ॥ २ ॥ अभिधायाः प्रधानत्वात्काव्यं ताभ्यां विभिद्यते ॥ नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ॥ ३ ॥ कवित्वं दुर्लभं तत्र शक्तिस्तत्र च दुर्लभा ॥ व्युत्पत्तिर्दुर्लभा तत्र विवेकस्तत्र दुर्लभः ॥४॥ सर्वं शास्त्रमविद्वद्भिर्मृ-ग्यमाणं न सिध्यति ॥ आदिवर्णा द्वितीयाश्च महाप्राणास्तुरीयकः ॥ ५ ॥ वर्गेषु वर्णवृन्दं स्यात्पदं सुप्तिङन्तभेदतः ॥ सङ्क्षेपाद्वाक्यमिष्टा-र्थव्यवच्छिन्ना पदावली ॥ ६ ॥ काव्यं स्फुटदलङ्कारं गुणवदोषवर्जितम् ॥ योनिर्वेदश्च लोकश्च सिद्धमन्त्रादयोनिजम् ॥ ७ ॥ देवादीना संस्कृतं स्यात्प्राकृतं त्रिविधं नृणाम् ॥ गद्यं पद्यञ्च मिश्रञ्च काव्यादि त्रिविधं स्मृतम् ॥ ८ ॥ अपदः पदसन्तानो गद्यं तदपि गद्यते ॥ चूर्णकोत्कलिकागन्धिवृत्तभेदात्त्रिरूपकम् ॥ ९ ॥ अल्पाल्पविग्रहं नातिमृदुसन्दर्भनिर्भरम् ॥ चूर्णकं नामतो दीर्घसमासात्कलिका भवेत् ॥१०॥ भवेन्मध्यमसन्दर्भं नातिकुत्सितविग्रहम् ॥ वृत्तच्छायाहरं वृत्तसन्धिनैतत्किलोत्कटम्॥११॥ आख्यायिका कथा खण्डकथा परिकथा तथा ॥ कथानिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा ॥ १२ ॥ कर्तुर्वंशप्रशंसा स्याद्यत्र गद्येन विस्तरात् ॥ कन्याहरणसंग्रामवि-प्रलम्भविपत्तयः ॥ १३ ॥ भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः ॥ उच्छ्वासैश्च परिच्छेदो यत्र या चूर्णकोत्तरा ॥ १४ ॥ वक्त्रं वा पर-वक्त्रं वा यत्र साख्यायिका स्मृता ॥ श्लोकैः स्ववंशं संक्षेपात्कविर्यत्र प्रशंसति ॥ १५ ॥ मुख्यस्यार्थावतारायं भवेद्यत्र कथान्तरम् ॥

परिच्छेदो न यत्र स्याद्भवेद्वा लम्बकैः क्वचित् ॥ १६ ॥ सा कथा नाम तद्भेदौ निबध्नीयाच्चतुष्पदीम् ॥ भवेत्खण्डकथा यासौ यासौ परिकथा तयोः ॥ १७ ॥ अमात्यं सार्थकं वापि द्विजं वा नायकं विदुः ॥ स्यात्तयोः करुणं विद्धि विप्रलम्भश्चतुर्विधः ॥ १८ ॥ समाप्यते तयोर्नाद्या सा कथामनुधावति ॥ कथाख्यायिकयोर्मिश्रभावात्परिकथा स्मृता ॥ १९ ॥ भयानकं सुखपरं गर्भे च करुणो रसः ॥ अद्भुतोऽन्ते सुकृत्तार्थो नोदात्ता सा कथानिका ॥ २० ॥ पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा ॥ वृत्तमक्षरसंख्येयमुक्थं तन्क्रान्तिशेषजम् ॥ २१ ॥ मात्राभिर्गणाना यत्र सा जातिरिति काश्यपः ॥ समममर्द्धसमं वृत्तं विषमं पैङ्गलं त्रिधा ॥ २२ ॥ सा विद्या नौस्तितीर्षूणां गभीरं काव्यसागरम् ॥ महाकाव्यं कलापश्च पर्य्यायबन्धो विशेषकम् ॥ २३ ॥ कुलकं मुक्तकं कोश इति पद्यकुटुम्बकम् ॥ सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत् ॥ २४ ॥ तादात्म्यमजहत्तत्र तत्समं नातिदुष्यति ॥ इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ॥ २५ ॥ मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरलम् ॥ शक्वर्य्यातिजगत्यातिशक्वर्य्या त्रिष्टुभा तथा ॥ २६ ॥ पुष्पिताग्रादिभिर्वक्त्राभिजनैश्चारुभिः समैः ॥ मुक्ता तु भिन्नवृत्तान्ता नातिसंक्षिप्तसर्गकम् ॥ २७ ॥ अतिशर्करिकाष्टिभ्यामेकसङ्कीर्णकैः परः ॥ मात्रयाप्यपरः सर्गः प्राशस्त्येषु च पश्चिमः ॥ २८ ॥ कल्पोऽतिनिन्दितस्तस्मिन्विशेषानादरः सताम् ॥ नगरार्णवशैलर्तुचन्द्रार्काश्रमपादपैः ॥ २९ ॥ उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ दूतीवचनविन्यासैरसतीचारिताद्भुतैः ॥ ३० ॥ तमसा मरुताप्यन्यैर्विभावैरतिनिर्भरैः ॥ सर्ववृत्तिप्रवृत्तश्च सर्वभावप्रभावितम् ॥ ३१ ॥ सर्वरीतिरसैः पुष्टं पुष्टं गुणविभूषणैः ॥ अत एव महाकाव्यं तत्कर्त्ता च महाकविः ॥ ३२ ॥ वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ॥ पृथक्प्रयत्ननिर्वर्त्यं वाग्वक्त्रिम्णि रसाद्वपुः ॥ ३३ ॥ चतुर्वर्गफलं विष्वग्व्याख्यानं नायकाश्रया ॥ समानवृत्तिनिर्व्यूढः कौशिकीवृत्तिकोमलः ॥ ३४ ॥ कलापोऽत्र प्रवासः प्रागनुरागाह्वयो रसः ॥ सविशेषकश्च प्राय्यादि संस्कृतेनेतरेण च ॥ ३५ ॥ श्लोकैरनेकैः कुलकं स्यात्सन्दानितकानि तत् ॥ मुक्तकं श्लोक एकैकश्चमत्कारक्षमः सताम् ॥ ३६ ॥ मूक्तिभिः कविसिंहानां सुन्दरीभिः समन्वितः ॥ कोशो ब्रह्मापरिच्छिन्नः स विदग्धाय रोचते ॥ ३७ ॥ आभासोपमशक्तिश्च सर्गे यद्भिन्नवृत्तता ॥ मिश्रं वपुरिति ख्यातं प्रकीर्णमिति च द्विधा ॥ श्रव्यश्चैवाभिनेयश्च प्रकीर्ण सकलोक्तिभिः ॥ ३८ ॥ इत्यादिमहापुराणे आग्नेये काव्यादिलक्षणवर्णनं नाम

सप्तत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३७ ॥ अथ नाटकनिरूपणम् ॥ अग्निरुवाच ॥ नाटकं सप्रकरणं डिम ईहामृगोऽपि वा ॥ ज्ञेयः समवकारश्च भवेत्प्रहसनं तथा ॥ १ ॥ व्यायोगभाणवीथ्यङ्कव्रोटकान्यथ नाटिका ॥ सट्टकं शिल्पकः कर्णा एको दुर्मल्लिका तथा ॥ २ ॥ प्रस्थानं भाणिका भाणी गोष्ठी हल्लीशकानि च ॥ काव्यं श्रीगदितं नाट्यरासकं रासकं तथा ॥ ३ ॥ उल्लाप्यकं प्रेक्षणञ्च सप्तविंशति-रेव तत् ॥ सामान्यञ्च विशेषश्च लक्षणस्य द्वयी गतिः ॥ ४ ॥ सामान्यं सर्वविषयं शेषः क्वापि प्रवर्त्तते ॥ पूर्वरङ्गे निवृत्ते द्वौ देशकालावुभावपि ॥ ५ ॥ रसभावविभावानुभावा अभिनयास्तथा ॥ अङ्कः स्थितिश्च सामान्यं सर्वत्रैवोपसर्पणात् ॥ ६ ॥ विशेषोऽवसरे वाच्यः सामान्यं पूर्वमुच्यते ॥ त्रिवर्गसाधनं नाट्यमित्याहुः करणञ्च यत् ॥ ७ ॥ इतिकर्त्तव्यता तस्य पूर्वरङ्गे यथाविधि ॥ नान्दीमुखानि द्वात्रिंशदङ्गानि पूर्वरङ्गके ॥ ८ ॥ देवतानां नमस्कारो गुरूणामपि च स्तुतिः ॥ गोब्राह्मणनृपादीनामाशीर्वादादि गीयते ॥ ९ ॥ नान्द्यन्ते सूत्रधारोऽसौ रूपकेषु निबध्यते ॥ गुरुपूर्वक्रमं वंशप्रशंसा पौरुषं कवेः ॥ १० ॥ सम्बन्धार्थो च काव्यस्य पञ्चैता-नेष निर्दिशेत् ॥ नटी.विदूषकोवापि पारिपार्श्विक एव वा ॥ ११ ॥ सहिताः सूत्रधारेण संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्य्यो-त्थैः प्रस्तुताक्षेपिभिर्मिथः ॥ १२ ॥ आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि सा ॥ प्रवृत्तकं कथोद्घातः प्रयोगातिशयस्तथा ॥ १३ ॥ आमुखस्य त्रयो भेदा बीजांशेपूपजायते ॥ कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत् ॥ १४ ॥ तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवृत्त-कम् ॥ सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा ॥ १५ ॥ गृहीत्वा प्रविशेत्पात्रं कथोद्घातः स उच्यते ॥ प्रयोगेषु प्रयोगन्तु सूत्रधृ-ग्यत्र वर्णयेत् ॥ १६ ॥ ततश्च प्रविशेत्पात्रं प्रयोगातिशयो हि सः ॥ शरीरं नाटकादीनामितिवृत्तं प्रचक्षते ॥ १७ ॥ सिद्धमुत्प्रेक्षित-श्चेति तस्य भेदावुभौ स्मृतौ ॥ सिद्धमागमदृष्टञ्च सृष्टमुत्प्रेक्षितं कवेः ॥ १८ ॥ बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च ॥ अर्थ-प्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात् ॥ १९ ॥ प्रारम्भश्च प्रयत्नश्च प्राप्तिः सद्भाव एव च ॥ नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥ २० ॥ मुखं प्रतिमुखं गर्भो विमर्शश्च तथैव च ॥ तथा निर्वहणञ्चेति क्रमात्पञ्चैव सन्धयः ॥ २१ ॥ अल्पमात्रं समुद्दिष्टं बहुधा यत्प्रसर्पति ॥ फलावसानं यच्चैव बीजं तदभिधीयते ॥ २२ ॥ यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ॥ काव्ये शरीरानुगतं तन्मुखं परि-

कीर्त्तनम् ॥ २३ ॥ इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः ॥ रागप्राप्तिः प्रयोगस्य गुह्यानाञ्चैव गूहनम् ॥ २४ ॥ आश्चर्य्यवदाख्यातं प्रकाशानां प्रकाशनम् ॥ अङ्गहीनं नरो यद्वन्न श्रेष्ठं काव्यमेव च ॥ २५ ॥ देशकालौ विना किञ्चिन्नेतिवृत्तं प्रवर्त्तते ॥ अतस्तयोरुपादाननियमात्पदमुच्यते ॥ २६ ॥ देशेषु भारतं वर्षं काले कृतयुगत्रयम् ॥ नर्त्तं ताभ्यां प्राणभृतां सुखदुःखोदयः क्वचित् ॥ सर्गे सर्गादिवार्त्तां च प्रसजन्ती न दुष्यति ॥ २७ ॥ इत्यादिमहापुराणे आग्नेये नाटकनिरूपणं नामाष्टत्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३३८ ॥ अथ शृङ्गारादिरसनिरूपणम् ॥ अग्निरुवाच ॥ अक्षरं परमं ब्रह्म सनातनमजं विभुम् ॥ वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ॥ १ ॥ आनन्दः सहजस्तस्य व्यज्यते स कदाचन ॥ व्यक्तिः सा तस्य चैतन्यवपुषः करसाह्वया ॥ २ ॥ आद्यस्तस्य विकारो यः सोऽहङ्कार इति स्मृतः ॥ ततोऽभिमानस्तज्ज्ञेयं समातं भुवनत्रयम् ॥ ३ ॥ अभिमानाद्रतिः सा च पारिपोषमुपेयुषी ॥ व्यभिचार्य्यादिसामान्याच्छृङ्गार इति गीयते ॥ ४ ॥ तद्भेदाः कामामितरे हास्याद्या अप्यनेकशः ॥ स्वस्वस्थायिविशेषोत्थवारिपोषस्वलक्षणाः ॥ ५ ॥ सत्त्वादिगुणसन्ताना जायन्ते परमात्मनः ॥ रागाद्भवति शृङ्गारो रौद्रस्तेर्ष्यात्प्रजायते ॥ ६ ॥ वीरोऽवष्टम्भनः सङ्कोचभूर्बीभत्स इष्यते ॥ शृङ्गाराज्जायते हासो रौद्रात्तु करुणो रसः ॥ ७ ॥ वीराच्चाद्भुतनिष्पत्तिः स्याद्बीभत्साद्भयानकः ॥ शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ॥ ८ ॥ बीभत्साद्भुतशान्ताख्याः स्वभावाच्चतुरो रसाः ॥ लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा ॥ ९ ॥ अगारे काव्यसंसारे कविरेव प्रजापतिः ॥ यथा वै रोचते विश्वं तथेदं परिवर्त्तते ॥ १० ॥ शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् ॥ स चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत् ॥ ११ ॥ न भावहीनोऽस्ति रसो न भावो रसवर्जितः ॥ भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति ॥ १२ ॥ स्थायिनोऽष्टौ रतिमुखाः स्तम्भाद्या व्यभिचारिणः ॥ मनोऽनुकूलेऽनुभवः सुखस्य रतिरिष्यते ॥ १३ ॥ हर्षादिभिश्च मनसो विकासो हास उच्यते ॥ चित्रादिदर्शनाच्चेतोवैकृत्यं ब्रुवते भयम् ॥ १४ ॥ जुगुप्सा च पदार्थानां निन्दा दौर्भाग्यवाहिनाम् ॥ विस्मयोऽतिशयेनार्थदर्शनाच्चित्तविस्तृतिः ॥ १५ ॥ अष्टौ स्तम्भादयः सत्त्वाद्रजसस्तमसः परम् ॥ स्तम्भश्चेष्टाप्रतीघातो भयरागाद्युपाहितः ॥ १६ ॥ श्रमरागाद्युपेतान्तःक्षोभजन्म वपुर्जलम् ॥ स्वेदो हर्षादिभिर्देहोच्छ्वासोऽन्तः पुलकोद्गमः ॥ १७ ॥ हर्षादिजन्मवाक्यङ्गः

स्वरभेदो भयादिभिः ॥ मनोवैकल्यमिच्छन्ति शोकाभिघ्नक्षयादिभिः ॥ १८ ॥ क्रोधस्तेक्ष्णप्रबोधश्च प्रतिकूलानुकारिणि ॥ पुरुषार्थस-
मान्यर्थो यः स उत्साह उच्यते ॥ १९ ॥ चित्तक्षोभभवोत्तम्भो वेपथुः परिकीर्त्तितः ॥ वैवर्ण्यञ्च विषादादिजन्मा कान्तिविपर्य्ययः
॥ २० ॥ दुःखानन्दादिजं नेत्रजलमश्रु च विश्रुतम् ॥ इन्द्रियाणामस्तमयः प्रलयो लङ्घनादिभिः ॥ २१ ॥ वैराग्यादिर्मनःखेदो निर्वेद
इति कथ्यते ॥ मनःपीडादिजन्मा च सादो ग्लानिः शरीरगा ॥ २२ ॥ शङ्कानिष्टागमोत्प्रेक्षा स्यादसूया च मत्सरः ॥ मदिराद्युपयोगोत्थं
मनःसंमोहनं मदः ॥ २३ ॥ क्रियातिशयजन्मान्तःशरीरोत्थक्लमः श्रमः ॥ शृङ्गारादिक्रियाद्वेषश्चित्तस्यालस्यमुच्यते ॥ २४ ॥ दैन्यं
सत्त्वादपभ्रंशश्चिन्तार्थपरिभावनम् ॥ इतिकर्त्तव्यतोपायादर्शनं मोह उच्यते ॥ २५ ॥ स्मृतिः स्यादनुभूतस्य वस्तुनः प्रतिबिम्बनम् ॥
मतिरर्थपरिच्छेदस्तत्त्वज्ञानोपनायितः ॥ २६ ॥ व्रीडानुरागादिभवः सङ्कोचः कोऽपि चेतसः ॥ भवेच्चपलताऽस्थैर्य्यं हर्षश्चित्तप्रसन्नता
॥ २७ ॥ आवेशश्च प्रतीकारः शयो वैधुर्य्यमात्मनः ॥ कर्त्तव्ये प्रतिभाभ्रंशो जडतेत्यभिधीयते ॥ २८ ॥ इष्टप्राप्तेरुपचितः सम्पदाभ्युदयो
धृतिः ॥ गर्वः परेष्ववज्ञानमात्मन्युत्कर्षभावना ॥ २९ ॥ भवेद्विषादो दैवादेर्विघातोऽभीष्टवस्तुनि ॥ औत्सुक्यमीप्सिताप्राप्तेर्वाञ्छया तरलां
स्थितिः ॥ ३० ॥ चित्तेन्द्रियाणां स्तैमित्यमपस्नारोऽचला स्थितिः ॥ युद्धे बाधादिभिस्त्रासो वीप्सा चित्तचमत्कृतिः ॥ ३१ ॥ क्रोधस्याप्र-
शमोऽमर्षः प्रबोधश्चेतनोदयः ॥ अवहित्थं भवेद्धृतिरिङ्गिताकारगोचरा ॥ ३२ ॥ रोषतो गुरुवाग्दण्डपारुष्यं विदुरुग्रताम् ॥ ऊहो वितर्कः
स्याद्व्याधिर्मनोवपुरवग्रहः ॥ ३३ ॥ अनिबद्धप्रलापादिरुन्मादो मदनादिभिः ॥ तत्त्वज्ञानादिना चेतःकषायोपरमः शमः ॥ ३४ ॥ कविभि-
र्योजनीया वै भावाः काव्यादिके रसाः ॥ विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते ॥ ३५ ॥ विभावो नाम स द्वेधाऽऽलम्बनोद्दीपना-
त्मकः ॥ रत्यादिभाववर्गोऽयं यमाजीव्योपजायते ॥ ३६ ॥ आलम्बनविभावोऽसौ नायकादिभवस्तथा ॥ धीरोदात्तो धीरोद्धतः स्याद्धी-
रललितस्तथा ॥ ३७ ॥ धीरप्रशान्त इत्येवं चतुर्धा नायकः स्मृतः ॥ अनुकूलो दक्षिणश्च शठो धृष्टः प्रवर्त्तितः ॥ ३८ ॥ पीठमर्दो
विटश्चैव विदूषक इति त्रयः ॥ शृङ्गारे नर्मसचिवा नायकस्यानुनायकाः ॥ ३९ ॥ पीठमर्दः सम्भलकः श्रीमांस्तद्देशजो विटः ॥
विदूषको वैहासिकस्त्वष्ट नायकनायिकाः ॥ ४० ॥ स्वकीया परकीया च पुनर्भूरिति कौशिकाः ॥ सामान्या न पुनर्भूरि इत्याद्या

बहुभेदतः ॥ ४१ ॥ उद्दीपनविभावास्ते संस्कारैर्विविधैः स्थितैः ॥ आलंम्बनविभावेषु भावानुद्दीपयन्ति य ॥ ४२ ॥ चतुःषष्टिकला द्वेधा कर्माद्यैर्गीतिकादिभिः ॥ कुहकं स्मृतिरप्येषां प्रायो हासोपहारकः ॥ ४३ ॥ आलम्बनविभावस्य भावैरुद्बुद्धसंस्कृतैः ॥ मनोवाग्बुद्धिवपुषां स्मृतीच्छाद्वेषयत्नतः ॥ ४४ ॥ आरम्भ एव विदुषामनुभाव इति स्मृतः ॥ स चानुभूयते चात्र भवत्युत निरुच्यते ॥ ॥ ४५ ॥ मनोव्यापारभूयिष्ठो मन आरम्भ उच्यते ॥ द्विविधः पौरुषः स्त्रैण ईदृशोऽपि प्रसिध्यति ॥ ४६ ॥ शोभाविलासो माधुर्य्यं स्थैर्य्यं गाम्भीर्य्यमेव च ॥ ललितश्च तथौदार्य्यं तेजोऽष्टाविति पौरुषाः ॥ ४७ ॥ नीचनिन्दोत्तमस्पर्द्धा शौर्य्यं दाक्षादिकारणम् ॥ मनोधर्मे भवेच्छोभा शोभते भवनं यथा ॥ ४८ ॥ भावो हावश्च हेला च शोभा कान्तिस्तथैव च ॥ दीप्तिर्माधुर्य्यशौर्य्ये च प्रागल्भ्यं स्यादुदारता ॥ ४९ ॥ स्थैर्य्यं गम्भीरता स्त्रीणां विभावा द्वादशेरिताः ॥ भावो विलासो हावः स्याद्भावः किञ्चिच्च हर्षजः ॥ ५० ॥ वाचो युक्तिर्भवेद्वागारम्भो द्वादश एव सः ॥ तत्राभाषणमालापः प्रलापो वचनं बहु ॥ ५१ ॥ विलापो दुःखवचनमनुलापोऽसकृद्वचः ॥ संलाप उक्तप्रत्युक्तमपलापोऽन्यथावचः ॥ ५२ ॥ वार्त्ताप्रयाणं सन्देशो निर्देशः प्रतिपादनम् ॥ तत्त्वादेशोऽतिदेशोऽयमपदेशोऽन्यवर्णनम् ॥ ५३ ॥ उपदेशश्च शिक्षावाग्व्याजोक्तिर्व्यपदेशकः ॥ बोधाय एष व्यापारः सुबुद्ध्यारम्भ इष्यते ॥ तस्य भेदास्त्रयस्ते च रीतिवृत्तिप्रवृत्तयः ॥ ५४ ॥ इत्यादिमहापुराणे आग्नेये शृङ्गारादिरसनिरूपणं नामैकोनचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ॥ ३३९ ॥ अथ रीतिनिरूपणम् ॥ अग्निरुवाच ॥ वाग्विद्यासम्प्रतिज्ञाने रीतिः सापि चतुर्विधा ॥ पाञ्चाली गौडदेशीया वैदर्भी लाटजा तथा ॥ १ ॥ उपचारयुता मृद्वी पाञ्चाली ह्रस्वविग्रहा ॥ अनवास्थितसन्दर्भा गौडी या दीर्घविग्रहा ॥ २ ॥ उपचारैर्न बहुभिरुपचारैर्विवर्जिता ॥ नातिकोमलसन्दर्भा वैदर्भी मुक्तविग्रहा ॥ ३ ॥ लाटी या स्फुटसन्दर्भा नातिविस्फुरविग्रहा ॥ परित्यक्तापि भूयोभिरुपचारैरुदाहृता ॥ ४ ॥ क्रियास्वविषमा वृत्तिर्भारत्यारभटी तथा ॥ कौशिकी सात्वती चेति सा चतुर्धा प्रतिष्ठिता ॥ ५ ॥ वाक्प्रधाना नरप्राया स्त्रीयुक्ता प्राकृतोक्तिका ॥ भरतेन प्रणीतत्वाद्भारती रीतिरुच्यते ॥ ६ ॥ चत्वार्यङ्गानि भारत्या वीथी प्रहसनं तथा ॥ प्रस्तावना नाटकादेर्वीथ्यङ्गानि त्रयोदश ॥ ७ ॥ उद्घातकं तथैव स्यालापितं स्याद्द्वितीयकम् ॥ असत्प्रलापो वाक्केलिर्नालिका विपणं

तथा ॥ ८ ॥ व्याहारान्नमतश्चैव छलावस्कान्दित तथा ॥ गण्डाऽथ मृदवश्चैव त्रयादशमथाचितम् ॥ ९ ॥ तापसादेः प्रहसनं परिहासपरं वचः ॥ मायेन्द्रजालयुद्धादिबहुलारभटी स्मृता ॥ संक्षिप्तकारपातौ च वस्तूत्थापनमेव च ॥ १० ॥ इत्यादिमहापुराणे आग्नेये रीतिनिरूपणं नाम चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४० ॥ अथ नृत्यादावङ्गकर्मनिरूपणम् ॥ अग्निरुवाच ॥ चेष्टाविशेषमप्यङ्गप्रत्यङ्गे कर्म चानयोः ॥ शरीरारम्भमिच्छन्ति प्रायः पूर्वोऽबलाश्रयः ॥ १ ॥ लीलाविलासो विच्छित्तिर्विभ्रमं किलकिञ्चितम् ॥ मोट्टायितं कुट्टमितं बिब्बोको ललितन्तथा ॥ २ ॥ विकृतं क्रीडितं केलिरिति द्वादशधैव सः ॥ लीलेष्टजनचेष्टानुकरणं संवृतक्षये ॥ ३ ॥ विशेषं दर्शयन्किञ्चिद्विलासः सद्भिरिष्यते ॥ हसितक्रान्दितादनिं सङ्करः किलकिञ्चितम् ॥ ४ ॥ विकारकोऽपि बिब्बोको ललितं सौकुमार्य्यतः ॥ शिरः पाणिरुरः पार्श्वं कटिरङ्घ्रिरिति क्रमात् ॥ ५ ॥ अङ्गानि भ्रूलतादीनि प्रत्यङ्गान्यभिजानते ॥ अङ्गप्रत्यङ्गयोः कर्म प्रयत्नजानितं विना ॥ ६ ॥ न प्रयोगः क्वचिन्मुख्यं तिरश्चीनं च तत्क्वचित् ॥ आकम्पितं कम्पितं च धूतं विधूतमेव च ॥ ७ ॥ परिवाहितमाधूतमवधूतमथाऽञ्चितम् ॥ निकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम् ॥ ८ ॥ ललितञ्चेति विज्ञेयं त्रयोदशविधं शिरः ॥ भ्रूकर्म सप्तधा ज्ञेयं पातने भ्रूकुटीमुखम् ॥ ९ ॥ दृष्टिस्त्रिधा रसस्थायिसञ्चारिप्रतिबन्धना ॥ षट्त्रिंशद्भेदविधुरा रसजा तत्र चाष्टधा ॥ १० ॥ नवधा तारकाकर्म भ्रमणञ्चलनादिकम् ॥ पोढा च नासिका ज्ञेया निःश्वासो नवधा मतः ॥ ११ ॥ षोढौष्ठकर्मकं पापं सप्तधा चिबुककक्रिया ॥ कलुपादिसुखं पोढा ग्रीवा नवविधा स्मृता ॥ १२ ॥ असंयुतः संयुतश्च भूम्ना हस्तः प्रमुच्यते ॥ पताकास्त्रिपताकश्च तथा वै कर्त्तरीमुखः ॥ १३ ॥ अर्द्धचन्द्रोत्करालश्च शुकतुण्डस्तथैव च ॥ मुष्टिश्च शिखरश्चैव कापित्थः खेटकामुखः ॥ १४ ॥ सूच्यास्यः पद्मकोशो हि शिराः समृगशीर्षकाः ॥ कांबूलकालपद्मौ च चतुरभ्रमरौ तथा ॥ १५ ॥ हंसास्यहंसपक्षौ च सन्दंशमुकुलौ तथा ॥ ऊर्णनाभस्ताम्रचूडश्चतुर्विंशतिरित्यमी ॥ १६ ॥ असंयुतकराः प्रोक्ताः संयुतास्तु त्रयोदश ॥ अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा ॥ १७ ॥ कटको वर्धमानश्चाप्यसंगो निषधस्तथा ॥ दोलः पुष्पपुटश्चैव तथा मकर एव च ॥ १८ ॥ गजदन्तो बहिःस्तम्भो वर्धमानोऽपरे कराः ॥ उरः पञ्चविधं स्याच्च अभुग्ननर्त्तनादिकम् ॥ १९ ॥ उदरं दुरतिक्षामं खण्डं पूर्णमिति त्रिधा ॥ पार्श्वयोः पञ्च कर्माणि जङ्घाकर्म च

पञ्चधा ॥ अनेकधा पादकर्म नृत्यादौ नाटके स्मृतम् ॥ २०॥ इत्यादिमहापुराणे आग्नेये नृत्यादावङ्गकर्मनिरूपणं नामैकचत्वारिंशदधि-
कत्रिशततमोऽध्यायः ॥ ३४१ ॥ अथाभिनयादिनिरूपणम् ॥ अग्निरुवाच ॥ आभिमुख्यं नयन्नर्थान्विज्ञेयोऽभिनयो बुधैः ॥ चतुर्धा
सम्भवः सत्त्ववागङ्गाहरणाश्रयः ॥ १ ॥ स्तम्भादिः सात्त्विको वागारम्भो वाचिक आङ्गिकः ॥ शरीरारम्भ आहार्य्यो बुद्ध्यारम्भप्र-
वृत्तयः ॥ २ ॥ रसादिविनियोगोऽथ कथ्यते ह्यभिमानतः ॥ तमन्तरेण सर्वेषामपार्थैव स्वतन्त्रता ॥ ३ ॥ सम्भोगो विप्रलम्भश्च
शृङ्गारो द्विविधः स्मृतः ॥ प्रच्छन्नश्च प्रकाशश्च तावपि द्विविधौ पुनः ॥ ४ ॥ विप्रलम्भाभिधानो यः शृङ्गारः स चतुर्विधः ॥ पूर्वा-
नुरागमानाख्यः प्रवासकरुणात्मकः ॥ ५ ॥ एतेभ्योऽन्यतरं जायमानसम्भोगलक्षणम् ॥ विवर्त्तते चतुर्धैव न च प्रागतिवर्त्तते ॥ ६ ॥
स्त्रीपुंसयोस्तदुदयस्तस्य निर्वर्त्तिका रतिः ॥ निखिलाः सात्त्विकास्तत्र वैवर्ण्यप्रलयौ विना ॥ ७ ॥ धर्मार्थकाममोक्षैश्च शृङ्गार उपची-
यते ॥ आलम्बनविशेषैश्च तद्विशेषैर्निरन्तरः ॥ ८ ॥ शृङ्गारं द्विविधं विद्याद्वाङ्नेपथ्यक्रियात्मकम् ॥ हासश्चतुर्विधोऽलक्ष्यदन्तः स्मित
इतीरितः ॥ ९ ॥ किञ्चिल्लक्षितदन्ताग्रं हसितं पुलकलोचनम् ॥ विहसितं सस्वनं स्याज्जिह्मोपहसितन्तु तत् ॥ १० ॥ सशब्दं पापहसि-
तमशब्दमतिहासितम् ॥ यश्चासौ करुणो नाम स रसस्त्रिविधो भवेत् ॥ ११ ॥ धर्मोपघातजश्चित्तविलासजनितस्तथा ॥ शोकः शोका-
द्भवेत्स्थायी कः स्थायी पूर्वजो मतः ॥ १२ ॥ अङ्गनेपथ्यवाक्यैश्च रौद्रोऽपि त्रिविधो रसः ॥ तस्य निर्वर्त्तकः क्रोधः स्वेदो रोमाञ्च-
वेपथू ॥ १३ ॥ दानवीरो धर्मवीरो युद्धवीर इति त्रयम् ॥ वीरस्तस्य च निष्पत्तिहेतुरुत्साह इष्यते ॥ १४ ॥ आरम्भेषु भवेद्यत्र
वीरमेवानुवर्त्तते ॥ भयानको नाम रसस्तस्य निर्वर्त्तकं भयम् ॥ १५ ॥ उद्वेजनः क्षोभणश्च बीभत्सो द्विविधः स्मृतः ॥ उद्वेजनः
स्यात्प्लुत्याद्यैः क्षोभणो रुधिरादिभिः ॥ १६ ॥ जुगुप्सारम्भिका तस्य सात्त्विकांशो निवर्त्तते ॥ काव्यशोभाकरान्धर्मानलङ्कारान्प्र-
चक्षते ॥ १७ ॥ अलङ्करिष्णवस्ते च शब्दमर्थमुभौ त्रिधा ॥ ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः ॥ १८ ॥ शब्दालङ्कारमा-
हुस्तान्काव्यमीमांसकाविदः ॥ छाया मुद्रा तथोक्तिश्च युक्तिर्गुम्फनया सह ॥ १९ ॥ वाकोवाक्यमनुप्रासश्चित्तं दुष्करमेव च ॥ ज्ञेया
नवालङ्कृतयः शब्दानामित्यसङ्करात् ॥ २० ॥ तत्रान्योक्तेरनुकृतिश्छाया सापि चतुर्विधा ॥ लोकच्छेकार्भकोक्तीनामेकैकेरनुका-

रतः ॥२१॥ आभाणकोक्तिर्लोकोक्तिः सर्वसामान्य एव ताः ॥ यानुधावति लोकोक्तिश्छायामिच्छन्ति तां बुधाः ॥ २२ ॥ छेका विदग्धा वेदग्ध्यं कलासु कुशला मतिः ॥ तामुल्लिखन्ती छेकोक्तिश्छाया कविभिरिष्यते ॥ २३ ॥ अव्युत्पन्नोक्तिरखिलैरर्भकोक्त्योपलक्ष्यते ॥ तेनार्भकोक्तिश्छाया तन्मात्रोक्तिमनुकुर्वती ॥ २४ ॥ विप्लुताक्षरमश्लीषं वचो मत्तस्य तादृशी ॥ या सा भवति मत्तोक्तिश्छायोक्ताप्य-तिशोभते ॥ २५ ॥ अभिप्रायविशेषेण कविशक्तिं विवृण्वती ॥ ॥ मुत्प्रदायिनीति सा मुद्रा सैव शय्यापि नो मते ॥ २६ ॥ उक्तिः सा कथ्यते यस्यामर्थकोऽप्युपपत्तिमान् ॥ लोकयात्रार्थविधिना धिनोति हृदयं सताम् ॥ २७ ॥ उभौ विधिनिषेधौ च नियमानियमावपि ॥ विकल्पपरिसङ्ख्ये च तदीयाः षडथोक्तयः ॥ २८ ॥ अयुक्तयोरिव मिथो वाच्यवाचकयोर्द्वयोः ॥ योजनायै कल्प्यमाना युक्तिरुक्ता मनीषिभिः ॥ २९ ॥ पदञ्चैव पदार्थश्च वाक्यं वाक्यार्थमेव च ॥ विषयोऽस्याः प्रकरणं प्रपञ्चश्चेति षड्विधः ॥ ३० ॥ गुम्फना रचना चर्य्या शब्दार्थक्रमगोचरा ॥ शब्दानुकारादर्थानुपूर्वार्थेयं क्रमात्त्रिधा ॥ ३१ ॥ उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं द्विधैव तत् ॥ ऋजुवक्रोक्तिभेदेन तत्राद्यं सहजं वचः ॥ ३२ ॥ सा पूर्वप्रश्निका प्रश्नपूर्विकेति द्विधा भवेत् ॥ वक्रोक्तिस्तु भवेद्भङ्ग्या काकुस्तेन कृता द्विधा ॥ ३३ ॥ इत्यादिमहापुराणे आग्नेयेऽभिनयादिनिरूपणं नाम द्वाचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४२ ॥ अथ शब्दालङ्काराः ॥ अग्निरुवाच ॥ स्यादावृत्तिरनुप्रासो वर्णानां पदवाक्ययोः ॥ एकवर्णोऽनेकवर्णावृत्तेर्वर्णगुणो द्विधा ॥ १ ॥ एकवर्णगता-वृत्तेर्जायन्ते पञ्च वृत्तयः ॥ मधुरा ललिता प्रौढा भद्रा परुषया सह ॥ २ ॥ मधुरायाश्चवर्गान्तादधो वर्ग्यौ रणौ स्वनौ ॥ ह्रस्वस्वरेणा-न्तरितौ संयुक्तत्वं नकारयोः ॥ ३ ॥ न कार्य्या वर्ग्यवर्णानामावृत्तिः पञ्चमाधिका ॥ महाप्राणोष्मसंयोगप्रविमुक्तलघूत्तरौ ॥ ४ ॥ ललिता बलभूयिष्ठा प्रौढा या पणवर्गजा ॥ ऊर्ध्वं रेफेण युज्यन्ते नटवर्गोनपञ्चमाः ॥ ५ ॥ भद्रायां परिशिष्टाः स्युः परुषां साऽभिधीयते ॥ भवन्ति यस्यामूष्माणः संयुक्तास्तत्तदक्षरैः ॥ ६ ॥ अकारषर्जमावृत्तिः स्वराणामतिभूयसी ॥ अनुस्वारविसर्गौ च पारुष्याय निरन्तरौ ॥ ७ ॥ शषसा रेफसंयुक्ताश्चाकारश्चापि भूयसा ॥ अन्तःस्थाभिन्नमाभ्याञ्च हः पारुष्याय संयुतः ॥ ८ ॥ अन्यथापि गुरुर्वर्णः संयुक्ते परिपन्थिनि ॥ पारुष्यायाऽऽदिमांस्तत्र पूजिता न तु पञ्चमी ॥ ९ ॥ क्षेपे शब्दानुकारे च परुषापि प्रयुज्यते ॥ कर्णाटी कौन्तली कौन्ती

कोङ्कणी वामनासिका ॥ १० ॥ द्रावणी माधवी पञ्चवर्णान्तःस्थोष्माभिः क्रमात् ॥ अनेकवर्णावृत्तिर्या भिन्नार्थप्रतिपादिका ॥ ११ ॥ यमकं साव्यपेतञ्च व्यपेतञ्चेति तद्विधा ॥ आनन्तर्य्यादव्यपेतं व्यपेतं व्यवधानतः ॥ १२ ॥ द्वैविध्येनानयोः स्थानपादभेदाच्चतुर्विधम् ॥ आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः ॥ १३ ॥ सप्तधा सप्तपूर्वेण चेत्पादेनोत्तरोत्तरः ॥ एकद्वित्रिपदारम्भस्तुल्यः षोढा तदा परम् ॥ १४ ॥ तृतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् ॥ पादान्तयमकञ्चैव काञ्चीयमकमेव च ॥ १५ ॥ संसर्गयमकञ्चैव विक्रान्तयमकं तथा ॥ पादादियमकञ्चैव तथाम्रेडितमेव च ॥ १६ ॥ चतुर्व्यवसितञ्चैव मालायमकमेव च ॥ दशधा यमकं श्रेष्ठं तद्भेदा बहवोऽपरे ॥ १७ ॥ स्वतन्त्रस्यान्यतन्त्रस्य पदस्यावर्त्तना द्विधा ॥ भिन्नप्रयोजनपदस्यावृत्तिं मनुजा विदुः ॥ १८ ॥ द्वयोरावृत्तपदयोः समस्ता स्यात्समासतः ॥ अन्नमासात्तयोर्व्यस्ता पादे त्वेकत्र विग्रहात् ॥ १९ ॥ वाक्यस्यावृत्तिरप्येवं यथासम्भवमिष्यते ॥ अलङ्काराद्यनुप्रासो लघुमध्ये (प्ये) वमर्हणात् ॥ २० ॥ यया कयाचिद्वृत्त्या यत्समानमनुभूयते ॥ तद्रूपादिपदासत्तिः सानुप्रासा रसावहा ॥ २१ ॥ गोष्ठ्यां कुतूहलाध्यायी वाग्बन्धश्चित्रमुच्यते ॥ प्रश्नः प्रहेलिका गुप्तं च्युतदत्ते तथोभयम् ॥ २२ ॥ समस्या सप्त तद्भेदा नानार्थस्यानुयोगतः ॥ यत्र प्रदीयते तुल्यवर्णविन्यासमुत्तरम् ॥ २३ ॥ स प्रश्नः स्यादेकपृष्टद्विपृष्टोत्तरभेदतः ॥ द्विधैकपृष्टो द्विविधः समस्तो व्यस्त एव च ॥ २४ ॥ द्वयोरप्यर्थयोर्गुह्यमानशब्दा प्रहेलिका ॥ सा द्विधार्थी च शाब्दी च तत्रार्थी चार्थबोधतः ॥ २५ ॥ शब्दावबोधतः शाब्दी प्राहुः षोढा प्रहेलिकाम् ॥ यस्मिन्गुप्तेऽपि वाक्याङ्गं भाव्यर्थोऽपारमार्थिकः ॥ २६ ॥ तदङ्गविहिताकांक्षस्तद्गुप्तं गूढमप्यदः ॥ यत्रार्थान्तरनिर्भासो वाक्याङ्गच्यवनादिभिः ॥ २७ ॥ तदङ्गविहिताकाङ्क्षस्तच्च्युतं स्याच्चतुर्विधम् ॥ स्वरव्यञ्जनबिन्दूनां विसर्गस्य च विच्युतेः ॥ २८ ॥ दत्तेऽपि यत्र वाक्याङ्गे द्वितीयोऽर्थः प्रतीयते ॥ दत्तं तदाहुस्तद्भेदाः स्वराद्यैः पूर्ववन्मताः ॥ २९ ॥ अपनीताक्षरस्थाने न्यस्ते वर्णान्तरेऽपि च ॥ भासतेऽर्थान्तरं यत्र च्युतदत्तं तदुच्यते ॥ ३० ॥ सुश्लिष्टपद्यमेकं यन्नानालोकांशनिर्मितम् ॥ सा समस्या परस्यात्मपरयोः कृतिसङ्गरात् ॥ ३१ ॥ दुःखेन कृतमत्यर्थं कविसामर्थ्यसूचकम् ॥ दुष्करं नीरसत्वेऽपि विदग्धानां महोत्सवः ॥ ३२ ॥ नियमाच्च विदर्भाच्च बन्धाच्च भवति त्रिधा ॥ कवेः प्रतिज्ञा निर्माणरम्यस्य नियमः स्मृतः ॥ ३३ ॥ स्थानेनापि स्वरेणापि व्यञ्जनेनापि

सा त्रिधा ॥ विकल्पः प्रातिलोम्यानुलोम्यादेवाभिधीयते ॥ ३४॥ प्रातिलोम्यानुलोम्यञ्च शब्देनार्थेन जायते ॥ अनेकधा वृत्तवर्णविन्यासैः शिल्पकल्पना ॥ ३५ ॥ तत्तत्प्रसिद्धवस्तूनां बन्ध इत्यभिधीयते ॥ गोमूत्रिकार्द्धभ्रमणे सर्वतोभद्रमम्बुजम् ॥३६॥ चक्रञ्चक्राब्जकं दण्डो मुरजाश्चेति चाष्टधा ॥ प्रत्यर्धं प्रतिपादं स्यादेकान्तरसमाक्षरा ॥ ३७॥ द्विधा गोमूत्रिकां पूर्वामाहुरश्वपदां परे ॥ अन्त्यां गोमूत्रिकां धेनुं जालबन्धं वदन्ति हि ॥ ३८ ॥ अर्द्धाभ्यामर्द्धपादैश्च कुर्य्याद्विन्यासमेतयोः ॥ न्यस्तानामिह वर्णानामधोऽधःक्रमभागिनाम् ॥ ३९ ॥ अधोऽधःस्थितवर्णानां यावत्तुर्य्यपदं नयेत् ॥ तुर्यपादान्नयेदूर्ध्वं पादार्द्धं प्रातिलोम्यतः ॥ ४० ॥ तदेव सर्वतोभद्रं त्रिविधं सरसीरुहम् ॥ चतुष्पत्रं ततो विघ्नं चतुष्पत्रे उभे अपि ॥४१॥ अथ प्रथमपादस्य मूर्द्धन्यं त्रिपदाक्षरम् ॥ सर्वेषामेव पादानामन्ते तदुपजायते ॥ ४२ ॥ प्राक्पदस्यान्तिमं प्रत्यक्पादादौ प्रातिलोम्यतः ॥ अन्त्यपादान्तिमं चाद्यपादादावक्षरद्वयम् ॥ ४३ ॥ चतुश्छदे भवेदष्टच्छदे वर्णत्रयं पुनः ॥ स्यात्षोडशच्छदे त्वेकान्तरञ्चेदेकमक्षरम् ॥ ४४ ॥ कर्णिकां तोलयेदूर्ध्वं पत्राकाराक्षरावलिम् ॥ प्रवेशयेत्कर्णिकायां चतुष्पत्रसरोरुहे ॥ ४५ ॥ कर्णिकायां लिखेदेकं द्वे द्वे दिक्षु विदिक्षु च ॥ प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टच्छदेऽम्बुजे ॥ ४६ ॥ विश्वग्विषमवर्णानां तावत्पत्रावलीजुषाम् ॥ मध्ये समाक्षरन्यासः सरोजे षोडशच्छदे ॥ ४७ ॥ द्विधा चक्रं चतुररं षडरं तत्र चादिमम् ॥ पूर्वोर्द्धे सदृशा वर्णाः पादप्रथमपञ्चमाः ॥ ४८ ॥ अयुजोऽयुजश्चैव तुर्य्यावप्यष्टमावपि ॥ तस्योपपादप्राक्प्रत्यंगरेषु च यथाक्रमम् ॥ ४९ ॥ स्यात्पादार्द्धचतुष्कन्तु नाभौ तस्याद्यमक्षरम् ॥ पश्चिमारावधि नयेन्नेमौ शेषे पदद्वयी ॥ ५० ॥ तृतीयं तुर्य्यपादान्ते प्रथमौ सदृशावुभौ ॥ वर्णौ पादत्रयस्यापि दशमः सदृशो यदि ॥ ५१ ॥ प्रथमे चरमे तस्य षड्वर्णाः पश्चिमे यदि ॥ भवन्ति द्व्यन्तरं तर्हि बृहच्चक्रमुदाहृतम् ॥ ५२.॥ सम्मुखारद्वये पादमेकैकं क्रमशो लिखेत् ॥ नाभौ तु वर्णं दशमं नेमौ तुर्यपदं नयेत् ॥ ५३ ॥ श्लोकस्याद्यन्तदशमाः समा आद्यन्तिमौ युजोः ॥ आदौ वर्णः समौ तुर्य्यपंचमावाद्यतुर्य्ययोः ॥ ५४ ॥ द्वितीयप्रातिलोम्येन तृतीयं जायते यदि ॥ पदं विदध्यात्पत्रस्य दण्डश्चक्राब्जकं कृतेः ॥ ५५ ॥ द्वितीयौ प्राग्दले तुल्यौ सप्तमौ च तथापरौ ॥ सदृशावुत्तरदलौ द्वितीयाभ्यामर्द्धयोः ॥ ५६ ॥ द्वितीयषष्ठौ सदृशाश्चतुर्थपञ्चमावपि ॥ आद्यन्तपादयोस्तुल्यौ परार्द्धसप्तमावपि ॥ ५७ ॥ समौ तुर्य्य पञ्चमन्तु

क्रमेण विनियोजयेत् ॥ तुर्य्यो योज्यो तु तद्वच्च दलान्ताः क्रमपादयोः ॥ ५८ ॥ अर्द्धयोरन्तिमाद्यौ तु मुरजे सदृशावुभा ॥ पादाद्वेपतितो वर्णः प्रातिलोम्यानुलोमतः ॥ ५९ ॥ अन्तिमं परिवर्त्तीयाद्यावत्तुर्य्यमिहादिमत् ॥ पादातुर्य्याद्यवाऽऽद्यं नवमान्पोडशादपि ॥ ६० ॥ अक्षरात्पुटके मध्ये मध्येऽक्षरचतुष्टयम् ॥ कृत्वा कुर्य्याद्यथैतस्य मुरजाकारता भवेत् ॥ ६१ ॥ द्वितीयं चक्रशार्दूलविक्रीडितकमम्पदम् ॥ गोमूत्रिका सर्ववृत्तैरन्ये बन्धास्त्वनुष्टुभा ॥ ६२ ॥ नामधेयं यदि न चेदमीषु कविकाव्ययोः ॥ मित्रधेयानि तुष्यन्ति नामित्रः खिद्यते तथा ॥ ६३ ॥ बाणबाणासनव्योमखड्गमुद्गरशक्तयः ॥ द्विचतुर्थत्रिपृङ्गाटा दम्भोलिमुसलाङ्कुशाः ॥ ६४ ॥ पद्मं रथस्य नागस्य पुष्करिण्यसिपुत्रिका ॥ एते बन्धास्तथा चान्ये एवं ज्ञेयाः स्वयं बुधैः ॥ ६५ ॥ इत्यादिमहापुराणे आग्नेये शब्दालंकारनिरूपणं नाम त्रिचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४३ ॥ अथार्थालङ्काराः ॥ अग्निरुवाच ॥ अलङ्करणमर्थानामर्थालङ्कार इष्यते ॥ तं विना शब्दसौन्दर्य्यमपि नास्ति मनोहरम् ॥ १ ॥ अर्थालङ्काररहिता विधवेव सरस्वती ॥ स्वरूपसादृश्यमुत्प्रेक्षातिशयावपि ॥ २ ॥ विभावना निरोधश्च हेतुश्च सममष्टधा ॥ स्वभाव एव भावानो स्वरूपमभिधीयते ॥ ३ ॥ निजमागन्तुकञ्चेति द्विविधं तदुदाहृतम् ॥ सांसिद्धिकं निजं नैमित्तिकमागन्तुकं तथा ॥ ४ ॥ सादृश्यं धर्मसामान्यमुपमा रूपकं तथा ॥ सहोक्त्यर्थान्तरन्यासाविति स्यातु चतुर्विधः ॥ ५ ॥ उपमा नाम सा यस्यामुपमानोपमेययोः ॥ सत्ता चान्तरसामान्ययोगित्वेऽपि विवक्षितम् ॥ ६ ॥ किञ्चिदादाय सारूप्यं लोकयात्रा प्रवर्त्तते ॥ समासेनासमासेन सा द्विधा प्रतियोगिनः ॥ ७ ॥ विग्रहादभिधानस्य ससमासाऽन्यथोत्तरा ॥ उपमाद्योतकपदेनोपमेयपदेन च ॥ ८ ॥ ताभ्याञ्च विग्रहात्रेधा ससमासान्तिमात्रिधा ॥ विशिष्यमाणा उपमा भवन्त्यष्टादश स्फुटाः ॥ ९ ॥ यत्र साधारणो धर्मः कथ्यते गम्यतेऽपि वा ॥ ते धर्मवस्तुप्राधान्याद्धर्मवस्तूपमे उभे ॥ १० ॥ तुल्यमेवोपमीयेते यत्रान्योन्येन धर्मिणौ ॥ परस्परोपमा सा स्यात्प्रसिद्धेरन्यथा तयोः ॥ ११ ॥ विपरीतोपमा सा स्याद्व्यावृत्तेर्नियमोपमा ॥ अन्यत्राप्यनुवृत्तेस्तु भवेदनियमोपमा ॥ १२ ॥ समुच्चयोपमा सोऽन्यधर्मबाहुल्यकीर्त्तनात् ॥ बहोर्धर्मस्य साम्येऽपि वैलक्षण्यं विवक्षितम् ॥ १३ ॥ यदुच्यतेऽतिरिक्तत्वं व्यतिरेकोपमा तु सा ॥ यत्रोपमा स्याद्बहुभिः सदृशैः सा बहूपमा ॥ १४ ॥ धर्माः प्रत्युपमानञ्चेदन्या

मालोपमैव सा ॥ उपमानविकारेण तुलना विक्रियोपमा ॥ १५ ॥ त्रैलोक्यासम्भवि किमप्यारोप्य प्रतियोगिनि ॥
कविनोपमीयते या प्रथते साद्भुतोपमा ॥ १६ ॥ प्रतियोगिनमारोप्य तदभेदेन कीर्त्तनम् ॥ उपमेयस्य सा मोहोपमाऽसौ भ्रान्तिमद्वचः ॥
॥ १७ ॥ उभयोर्धर्मिणोस्तथ्यानिश्चयात्संशयोपमा ॥ उपमेयस्य संशय्य निश्चयान्निश्चयोपमा ॥ १८ ॥ वाक्यार्थेनैव वाक्यार्थोपमा
स्यादुपमानतः ॥ आत्मोपमानादुपमा साधारण्यनिशायिनी ॥ १९ ॥ उपमेयं यदन्यस्य तदन्यस्योपमा मता ॥ यद्युत्तरोत्तरं याति तदाऽ-
सौ गगनोपमा ॥ २० ॥ प्रशंसा चैव निन्दा च कल्पिता सदृशी तथा ॥ किञ्चिच्च सदृशी ज्ञेया उपमा पञ्चधा पुनः ॥ २१ ॥ उपमानेन
यत्तत्त्वमुपमेयस्य रूप्यते ॥ गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥ २२ ॥ उपमैव तिरोभूतभेदा रूपकमेव वा ॥ सहोक्तिः सहभा-
वेन कथनं तुल्यधर्मिणाम् ॥ २३ ॥ भवेदर्थान्तरन्यासः सादृश्येनोत्तरेण सः ॥ अन्यथोपस्थिता वृत्तिश्चेतनस्य नरस्य च ॥ २४ ॥
अन्यथा मन्यते यत्र तामुत्प्रेक्षां प्रचक्षते ॥ लोकसीमानिवृत्तस्य वस्तुधर्मस्य कीर्त्तनम् ॥ २५ ॥ भवेदतिशयो नाम सम्भवासम्भवाद्विधा॥
गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ॥२६॥ विशेषदर्शनायैव सा विशेषोक्तिरुच्यते ॥ प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित्कारणान्तरम् ॥
॥२७॥ यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥ सङ्गतीकरणं युक्त्या यदसंगच्छमानयोः ॥२८॥ विरोधपूर्वकत्वेन तद्विरोध इति
स्मृतम् ॥ सिसाधयिषितार्थस्य हेतुर्भवति साधकः ॥ २९ ॥ कारको ज्ञापक इति द्विधा सोऽप्युपजायते ॥ प्रवर्त्तते कारकाख्यः प्राक्पश्चा-
त्कार्य्यजन्मनः ॥३०॥ पूर्वशेष इति ख्यातस्तयोरेव विशेषयोः ॥ कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् ॥ ३१ ॥ ज्ञापकाख्यस्य
भेदोऽस्ति नदीपूरादिदर्शनात् ॥ अविनाभावनियमो ह्यविनाभावदर्शनात् ॥३२॥ इत्यादिमहापुराणे आग्नेयेऽर्थालङ्कारनिरूपणं नाम चतु-
श्चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४४ ॥ अथ शब्दार्थयोरलङ्काराः ॥ अग्निरुवाच ॥ शब्दार्थयोरलङ्कारो द्वावलङ्कुरुते समम् ॥
एकत्र निहितो हारः स्तनं ग्रीवामिव स्त्रियाः ॥ १ ॥ प्रशस्तिः कान्तिरौचित्यं संक्षेपो यावदर्थता ॥ अभिव्यक्तिरिति व्यक्तं षड्भेदास्तस्य
जायते ॥ २ ॥ प्रशस्तिः परवन्मर्मद्रवीकरणकर्मणः ॥ वाचोयुक्तिर्द्विधा सा च प्रेमोक्तिस्तुतिभेदतः ॥ ३ ॥ प्रेमोक्तिस्तुतिपर्य्यायौ प्रियो-
क्तिर्गुणकीर्त्तने ॥ कान्तिः सर्वमनोरुच्यवाच्यवाचकसङ्गतिः ॥ ४ ॥ यथा वस्तु तथा रीतिर्यथा वृत्तिस्तथा रसः ॥ ऊर्जस्विमृदुसन्दर्भा-

दोचित्यमुपजायते ॥ ५ ॥ संक्षेपो वाचकैरल्पैर्बहोरर्थस्य संग्रहः ॥ अन्यूनाधिकता शब्दवस्तुनोर्यावदर्थता ॥ ६ ॥ प्रकटत्वमभिव्यक्तिः श्रुतिराक्षेप इत्यपि ॥ तस्या भेदौ श्रुतिस्तत्र शब्दं स्वार्थसमर्पणम् ॥ ७ ॥ भवेन्नैमित्तिकी पारिभाषिकी द्विविधैव सा ॥ सङ्केतः पारिभाषेति ततः स्यात्पारिभाषिकी ॥ ८ ॥ मुख्योपचारिकी चेति सा च सा च द्विधा द्विधा ॥ स्वाभिधेयस्वलक्षणवृत्तिरमुख्यार्थस्य वाचकः ॥९॥ यया शब्दो निमित्तेन केनचित्सौपचारिकी ॥ सा च लाक्षणिकी गौणी लक्षणागुणयोगतः ॥ १० ॥ ॥ अभिधेयाविनाभूता प्रतीतिर्लक्षणोच्यते ॥ अभिधेयेन सम्बन्धात्सामीप्यात्समवायतः ॥ ११ ॥ वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता ॥ गौणी गुणानामानन्त्यादनन्ता तद्विवक्षया ॥ १२ ॥ अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ॥ सम्यगाधीयते यत्र स समाधिरिह स्मृतः ॥ १३ ॥ श्रुतेरलभ्यमानोऽर्थो यस्माद्भाति सचेतनः ॥ स आक्षेपो ध्वनिः स्याच्च ध्वनिना व्यज्यते यतः ॥ १४ ॥ शब्देनार्थेन यत्रार्थः कृत्वा स्वयमुपार्जनम् ॥ प्रतिषेध इवेष्टस्य यो विशेषोऽभिधित्सया ॥ १५ ॥ तमाक्षेपं बुधस्तत्र स्तुतं स्तोत्रमिदं पुनः ॥ अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः ॥ १६ ॥ यत्रोक्तं गम्यते नार्थस्तत्समानविशेषणम् ॥ सा समासोक्तिरुदिता सङ्क्षेपार्थतया बुधैः ॥ १७ ॥ अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थसूचनम् ॥ पर्य्यायोक्तं यदन्येन प्रकारेणाभिधीयते ॥ एषामेकतमस्यैव समाख्या ध्वनिरित्यतः ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये शब्दार्थालंकारनिरूपणं नाम पञ्चचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४५॥ अथ काव्यगुणविवेकः ॥ अग्निरुवाच ॥ अलंकृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत् ॥ वपुष्यललिते स्त्रीणां हारो भारायते परम् ॥ १ ॥ न च वाच्यं गुणो दोषो भाव एव भविष्यति ॥ गुणाः श्लेषादयो दोषा गूढार्थाद्याः पृथक् कृताः ॥ २ ॥ यः काव्ये महतीं छायामनुगृह्णात्यसौ गुणः ॥ सम्भवत्येष सामान्यो वैशेषिक इति द्विधा ॥ ३ ॥ सर्वसाधारणीभूतः सामान्य इति मन्यते ॥ शब्दमर्थमुभौ प्रातः सामान्यो भवति त्रिधा ॥ ४ ॥ शब्दमाश्रयते काव्यं शरीरं यः स तद्गुणः ॥ श्लेषो लालित्यगाम्भीर्य्यसौकुमार्य्यमुदारता ॥ ५ ॥ सत्यैव यौगिकी चेति गुणाः शब्दस्य सप्तधा ॥ सुश्लिष्टसन्निवेशत्वं शब्दानां श्लेष उच्यते ॥६ ॥ गुणादेशादिना पूर्वं पदसंबद्धमक्षरम् ॥ यत्र सन्धीयते नैव तल्लालित्यमुदाहृतम् ॥ ७ ॥ विशिष्टलक्षणोल्लेखलेख्यमुत्तानशब्दकम् ॥ गाम्भीर्य्यं कथयन्त्याद्यास्तदेवान्येषु शब्दताम् ॥ ८ ॥ अनिष्ठुराक्षरप्रायशब्दता सुकुमारता ॥ उत्तानप-

दतोदार्य्ययुतश्लाघ्यैर्विशेषणैः ॥ ९ ॥ ओजःसमासभूयस्त्वमेतत्पद्यादिजीवितम् ॥ आरभ्भारम्भपर्यन्तमाजसकृन पारुषम् ॥ १० ॥
उच्यमानस्य शब्देन येन केनापि वस्तुनः ॥ उत्कर्षमावहन्नर्थो गुण इत्यभिधीयते ॥ ११ ॥ माधुर्य्यं संविधानञ्च कोमलत्वमुदारता ॥
प्रौढिः सामयिकत्वञ्च तद्भेदाः षट् चकास्सति ॥ १२ ॥ क्रोधेर्ष्याकारगाम्भीर्य्यान्माधुर्य्यधैर्य्यगाहिता ॥ संविधानं पारिकरः स्यादपेक्षितासिद्धये ॥ १३ ॥ यत्काठिन्यादिनिर्मुक्तसन्निवेशविशिष्टता ॥ तिरस्कृत्यैव मृदुता भाति कोमलतेति सा ॥ १४ ॥ लक्ष्यते स्थूललक्ष्यत्वप्रवृत्तेर्षत्र लक्षणम् ॥ गुणस्य तदुदारत्वमाशयस्थातिसौष्ठवम् ॥ १५ ॥ अभिप्रेतं प्रति यतो निर्वाहस्योपपादिकाः ॥ युक्तयो हेतुगर्भिण्यः प्रौढा प्रौढिरुदाहृता ॥ १६ ॥ स्वतन्त्रस्यान्यतन्त्रस्य वाह्यान्तःसमयोगतः ॥ तत्र व्युत्पत्तिरर्थस्य या सामयिकतेति सा ॥ १७ ॥ शब्दार्थावुपकुर्वाणो नाम्नोभयगुणः स्मृतः ॥ तस्य प्रसादः सौभाग्यं यथासङ्ख्य प्रशस्यता ॥ १८ ॥ पाको राग इति प्राज्ञैः षट्त्रयपञ्चविपञ्चिताः॥ सुप्रसिद्धार्थपदता प्रसाद इति गीयते ॥ १९ ॥ उत्कर्षवान्गुणः काश्चिद्यस्मिन्नुक्ते प्रतीयते ॥ तत्सौभाग्यमुदारत्वं प्रवदन्ति मनीषिणः ॥ २० ॥ यथासङ्ख्यमनूद्देशः सामान्यमितिदिश्यते ॥ समये वर्णनीयस्य दारुणस्यापि वस्तुनः ॥ २१ ॥
अदारुणेन शब्देन प्रशस्त्यमुपवर्णनम् ॥ उच्चैः परिणतिः कापि पाक इत्यभिधीयते ॥ २२ ॥ मृद्वीकानारिकेलाम्बुपाकभेदाच्चतुर्विधः ॥
आदावन्ते च सौ (सा) रम्यं मृद्वीकापाक एव सः ॥ २३ ॥ काव्येच्छया विशेषो यः स राग इति गीयते ॥ अभ्यासोपहितः कान्ति सहजामपि वर्त्तते ॥ २४ ॥ हारिद्रश्चैव कौसुम्भो नीलीरागश्च स त्रिधा ॥ वैशेषिकः परिज्ञेयो यः स्वलक्षणगोचरः ॥ २५ ॥ इत्यादिमहापुराणे आग्नेये काव्यगुणविवेकवर्णनं नाम षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४६ ॥ अथ काव्यदोषविवेकः ॥ अग्निरुवाच ॥
उद्वेगजनको दोषः सभ्यानां स च सप्तधा ॥ वक्तृवाचकवाच्यानामेकद्वित्रिनियोगतः ॥ १ ॥ तत्र वक्ता कविर्नाम प्रथने स च भेदतः ॥
सन्दिहानोऽविनीतः सन्नज्ञो ज्ञाता चतुर्विधः ॥ २ ॥ निमित्तंपरिभाषायामर्थसंस्पर्शिवाचकम् ॥ तद्भेदौ पदवाक्ये द्वे कथितं लक्षणं द्वयोः ॥ ३ ॥ असाधुत्वाप्रयुक्तत्वे द्वावेव पदनिग्रहौ ॥ शब्दशास्त्राविरुद्धत्वमसाधुत्वं विदुर्बुधाः ॥ ४ ॥ व्युत्पन्नैरनिबद्धत्वमप्रयुक्तत्वमुच्यते ॥ छान्दसत्वमविस्पष्टत्वं च कष्टत्वमेव च ॥ ५ ॥ तदसामयिकत्वं च ग्राम्यत्वञ्चेति पञ्चधा ॥ छान्दसत्वं न भाषायामविस्पष्ट-

मबोधतः ॥ ६ ॥ गूढार्थता विपर्य्यस्तार्थता संशयितार्थता ॥ अविस्पष्टार्थता भेदास्तत्र गूढार्थतेति सा ॥ ७ ॥ यत्रार्थो दुःखसंवेद्यो विपर्य्यस्तार्थता पुनः ॥ विवक्षितान्यशब्दार्थप्रतिपत्तिर्मलीमसा ॥८॥ अन्यार्थन्यासमर्थत्वे एतामेवोपसर्पतः ॥ सन्दिह्यमानवाच्यत्वमाहुः संशयितार्थताम् ॥ ९ ॥ दोषत्वमनुबध्नाति सज्जनोद्वेजनादृते ॥ असुखोच्चार्य्यमाणत्वं कष्टत्वं समयाच्युतिः ॥ १० ॥ असामयिकता नेयामेतांश्च मुनयो जगुः ॥ ग्राम्यता तु जघन्यार्थप्रतिपत्तिः खलीकृता ॥ ११ ॥ वक्तव्यग्राम्यवाच्यस्य वचनात्स्मरणादपि ॥ तद्वाचकपदेनाभिसाम्याद्भवति सा त्रिधा ॥ १२ ॥ दोषः साधारणः प्रातिस्विकोऽर्थस्य स तु द्विधा ॥ अनेकभागुपालम्भः साधारण इति स्मृतः ॥ १३ ॥ क्रियाकारकयोर्भ्रंशो विसन्धिः पुनरुक्तता ॥ व्यस्तसम्बन्धता चेति पञ्च प्रातिस्विका मताः ॥ १४ ॥ अक्रियत्वं क्रियाभ्रंशो भ्रष्टकारकता पुनः ॥ कर्त्रादिकारकाभावो विसन्धिः सन्धिदूषणम् ॥ १५ ॥ विगतो वा विरुद्धो वा सन्धिः स भवति द्विधा ॥ सन्धेर्विरुद्धता कष्टमपदार्थान्तरागमात् ॥ १६ ॥ पुनरुक्तत्वमाभीक्ष्ण्यादभिधानं द्विधैव तत् ॥ अर्थावृत्तिः पदावृत्तिरर्थावृत्तिरपि द्विधा ॥ १७ ॥ प्रयुक्तवरशब्देन तथा शब्दान्तरेण च ॥ नावर्त्तते पदावृत्तौ वाच्यमावर्त्तते पदम् ॥ १८ ॥ व्यस्तसम्बन्धता सुष्ठु सम्बन्धो व्यवधानतः ॥ सम्बन्धान्तरनिर्भासात्सम्बन्धान्तरजन्मनः ॥ १९ ॥ अभावेऽपि तयोरन्वयव्यधानाद्विधैव सा ॥ अन्तरा पदवाक्याभ्यां प्रतिभेदं पुनर्द्विधा ॥ २० ॥ वाच्यमर्थार्थ्यमानत्वात्तद्विधा पदवाक्ययोः ॥ व्युत्पादितं पूर्ववाच्यं व्युत्पाद्यश्चेति भिद्यते ॥ २१ ॥ इष्टव्याघातकारित्वं हेतोः स्यादसमर्थता ॥ असिद्धत्वं विरुद्धत्वमनैकान्तिकता तथा ॥ २२ ॥ एवं सत्प्रतिपक्षत्वं कालातीतत्वसङ्करः ॥ पक्षे सपक्षे नास्तित्वं विपक्षेऽस्तित्वमेव तत् ॥ २३ ॥ काव्येषु पारिप्लवानां न भवेदप्यरुन्तुदम् ॥ एकादश निरर्थत्वं दुष्करादौ न दुष्यति ॥ २४ ॥ दुःस्वीकरोति दोषज्ञान्गूढार्थत्वं न दुष्करे ॥ न ग्राम्यनोद्वेगकारी प्रसिद्धेर्लोकशास्त्रयोः ॥ २५ ॥ क्रियाभ्रंशेन लक्ष्मास्ति क्रियाध्याहारयोगतः ॥ भ्रष्टकारकनाक्षेपबलाध्याहृतकारके ॥ २६ ॥ प्रगृह्ये गृह्यते नैव क्षतं विगतसन्धिना ॥ कष्टपाठाद्विसन्धित्वं दुर्वचादौ न दुर्भगम् ॥ २७ ॥ अनुप्रासे पदावृत्तिर्व्यस्तसम्बन्धता शुभा ॥ नार्थसंग्रहणे दोषो व्युत्क्रमाद्यैर्न लिप्यते ॥ २८ ॥ विभक्तिसंज्ञालिङ्गानां यत्रोद्वेगो न धीमताम् ॥ संख्यायास्तत्र भिन्नत्वमुपमानोपमेययोः ॥ २९ ॥ अनेकस्य नयैकेन बहूनां

बहुभिः शुभो ॥ कवनिां समुदाचारः समयो नाम गीयंते ॥ ३० ॥ सामान्यश्च विशिष्टश्च धर्मवद्भवति द्विधा ॥ सिद्धसेद्धान्तिकानाञ्च कवीनाञ्चाविवादतः ॥ ३१ ॥ यः प्रसिध्याति सामान्य इत्यसौ समयो मतः॥ सर्वे सि (से) द्धान्तिका येन सञ्चरन्ति निरत्ययम् ॥ ३२ ॥ कियन्त एव वा येन सामान्यस्तेन स द्विधा ॥ छेदसिद्धान्ततोऽन्यः स्यात्केषाञ्चिद्भान्तितो यथा ॥ ३३ ॥ तर्कज्ञानं मुनेः कस्य कस्यचित्क्षणभङ्गिका ॥ भूतचैतन्यता कस्य ज्ञानस्य सुप्रकाशता ॥ ३४ ॥ प्रज्ञातस्थूलता शब्दानेकान्तत्वं तथार्हतः ॥ शैववैष्णव-शाक्तेयसौरसिद्धान्तिनां मतिः ॥ ३५ ॥ जगतः कारणं ब्रह्म सांख्यानां सप्रधानकम् ॥ अस्मिन्सरस्वतीलोके सञ्चरन्तः परस्परम् ॥ ३६ ॥ बध्नन्ति व्यतिषज्यन्तो यद्विशिष्टः स उच्यते ॥ परिग्रहादप्यसतां सतामेवापरिग्रहात् ॥ ३७ ॥ भिद्यमानस्य तस्यायं द्वैविध्यमुपगीयते ॥ प्रत्यक्षादिप्रमाणैर्यद्बाधितं तदसद्विदुः ॥ ३८ ॥ कविभिस्तत्प्रतिग्राह्यं ज्ञानस्य द्योतमानता ॥ यदेवार्थक्रियाकारि तदेव परमार्थसत् ॥ ॥ ३९ ॥ अज्ञानाज्ज्ञाननस्त्वेकं ब्रह्मैव परमार्थसत् ॥ विष्णुः स्वर्गादिहेतुः स शब्दालङ्काररूपवान् ॥ अपरा च परा विद्या तां ज्ञात्वां मुच्यते भवात् ॥ ४० ॥ इत्यादिमहापुराणे आग्नेये काव्यदोषविवेको नाम सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४७ ॥ अथैकाक्षरकोशः ॥ अग्निरुवाच ॥ एकाक्षराभिधानं च मातृकान्तं वदामि ते ॥ अ विष्णुः प्रतिषेधः स्यादा पितामहवाक्ययोः ॥ १ ॥ सीमायामव्ययम आ भवेत्संक्रोधपीडयोः ॥ इः कामे रतिलक्ष्म्योरी उः शिवे रक्षकाद्य ऊः ॥ २ ॥ ऋ शब्दे चादिती ऋ स्यात्ल ऌ ते वै दितौ गुहे ॥ ए देवी ऐ योगिनी स्यादो ब्रह्मा औ महेश्वरः ॥ ३ ॥ अंकामः अः प्रशस्तः स्यात्को ब्रह्मादौ कु कुत्सिते ॥ खं शून्येन्द्रियं खं गो गन्धर्वे च विनायके ॥ ४ ॥ गं गीते गो गायने स्याद्घो घण्टाकिङ्किणीमुखे ॥ ताडने ङश्च विषये स्पृहायाञ्चैव भैरवे ॥ ५ ॥ चो दुर्जने निर्मले छश्छेदे जिर्जयने तथा ॥ जं गीते झः प्रशस्ते स्याद्ञले भो गायने च टः ॥ ६ ॥ ठश्चन्द्रमण्डले शून्ये शिवे चोद्बन्धने मतः ॥ डश्च रुद्रे घनौ त्रासे ढक्कायां ढो घनो मतः ॥ ७ ॥ णो निष्कर्षे निश्चये च तश्चोरे क्रोडपुच्छके ॥ भक्षणे थश्छेदने दो धारणे शोभने मतः ॥ ८ ॥ धो धातरि च धूस्तूरे नो वृन्दे सुगते तथा ॥ पं उपवने विख्यातः फश्च झंञ्झानिले मतः ॥ ९ ॥ फुः फूत्कारे निष्फले च बिः पक्षी भं च तारके ॥ मा श्रमिनं च मांता

स्याद्यागे यो यातृवीरणे ॥ ११ ॥ रो वह्नौ बलशक्रे च लो विधातरि ईरितः ॥ विश्लेषणे वो वरुणे शयने शश्च शं सुखे ॥ ११ ॥ षः श्रेष्ठे सः परोक्षे च सा लक्ष्मीः सं कचे मतः ॥ धारणे हस्तथा रुद्रे क्षः क्षत्रे चाक्षरे मतः ॥१२॥ क्ष्रौं नृसिंहे हरौ तद्वत्क्षेत्रपालकयोरपि॥ मन्त्र एकाक्षरो देवो भुक्तिमुक्तिप्रदायकः ॥ १३ ॥ क्ष्रौं हयशिरसे नमः सर्वविद्याप्रदो मनुः॥ अकाराद्यास्तथा मन्त्रा मातृकामन्त्र उत्तमः ॥ ॥ १४ ॥ एकपद्मेऽर्चयेदेतान्नव दुर्गाश्च पूजयेत् ॥ भगवती कात्यायनी कौशिकी चाथ चण्डिका ॥ १५ ॥ प्रचण्डा सुरनायिका उग्रा पार्वती दुर्गया ॥ ओं चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात् ॥ क्रमादि तु षडङ्गं स्याद्गणो गुरुर्गुरुः क्रमात् ॥ ॥ १६ ॥ अजितापराजिता चार्थं जया च विजया ततः ॥ कात्यायनी भद्रकाली मङ्गला सिद्धिरेवती ॥ १७ ॥ सिद्धादिबटुकाः पूज्या हेतुकश्च कपालिकः ॥ एकपादो भीमरूपो दिक्पालान्मध्यतो नव ॥ १८ ॥ ह्रीं दुर्गे दुर्गे रक्षणि स्वाहा मन्त्रार्थसिद्धये ॥ गौरी पूज्या च धर्माद्याः स्कन्दाद्याः शक्तयो यजेत् ॥ १९ ॥ प्रज्ञा ज्ञाना क्रिया वाचा वागीशी ज्वालिनी तथा ॥ कामिनी काममाला च इन्द्राद्याः शक्तिपूजनम् ॥ २० ॥ ओं गं स्वाहा मूलमन्त्रोऽयं गं वा गणपतये नमः ॥ षडङ्गो रक्तशुक्लश्च दन्ताक्षपरशूत्कटः ॥ २१ ॥ समोदकोऽथ गन्धादिगन्धोल्कायेति च क्रमात् ॥ गजो महागणपतिर्महोल्कः पूज्य एव च ॥ २२ ॥ कूष्माण्डाय एकदन्तत्रिपुरान्तकाय श्यामदन्तविकटहरहासाय लम्बनासाननाय पद्मदंष्ट्राय मेघोल्काय धूमोल्काय वक्रतुण्डाय विघ्नेश्वराय विकटोत्कटाय गजेन्द्रगमनाय भुजगेन्द्रहाराय शशाङ्कधराय गणाधिपतये स्वाहा एतैर्मनुभिः स्वाहान्तैः पूज्यः तिलहोमादिनार्थभाक् ॥ काद्यैर्वा (रा) बीजसंयुक्तैस्तेराद्यैश्च नमोऽन्तकैः ॥ २३ ॥ मन्त्राः पृथक्पृथग्वा स्युर्द्विरेफद्विर्मुखाक्षिणः ॥ कात्यायनं स्कन्दं आह यत्तद्व्याकरणं वदे ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये एकाक्षरकोशनिरूपणं नामाष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४८ ॥ अथ कौमारव्याकरणम् ॥ स्कन्द उवाच ॥ वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम् ॥ कात्यायननिबोधाय बालानां बोधनाय च ॥ ॥ १ ॥ प्रत्याहारादिकाः संज्ञाः शास्त्रसंव्यवहारगाः ॥ अ इ उ ण् ऋ ऌ क् ए ओ ङ् ऐ ओ च् ह य व र ट् ल ण् ञ म ङ ण न म् झ भ ञ् घ ढ ध ष् ज ब ग ड द श् ख फ छ ठ थ च ट त व् क प य् श ष स र् ह ल् इति प्रत्याहारः ॥ उपदेश इदल्लन्तं भवे

ष्वनुनासिकः ॥ २ ॥ आदिवर्णो गृह्यमाणोऽप्यन्त्येनेता सहैव तु ॥ तयोर्मध्यगतानां स्याद्ग्राहकः स्वस्य तद्यथा ॥ ३ ॥ अण् एङ् अट् यङ् छव् झम् भष् अक् इक् अण् इण् यण् परेण णकारेण । अम् यम् ङम् अच् इच् ऐच् अय् मय् झष् जव् झव् खय् शव् अश् हश् वश् भश् अल् हल् बल् रल् झल् शल् इति प्रत्याहाराः ॥ इत्यादिमहापुराणे आग्नेये कौमारव्याकरणशास्त्रे संज्ञाप्रकरणं नामैकोनपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३४९ ॥ अथ सन्धिसिद्धरूपम् ॥ स्कन्द उवाच ॥ वक्ष्ये सन्धिसिद्धरूपं स्वरसन्धिमथादितः ॥ दण्डाग्रं सागता दधीदं नदीहते मधूदकम् ॥ १ ॥ पितृषभः लृकारश्च तवेदं सकलोदकम् ॥ अर्धर्चोऽयं नवल्कारः सैषा सेन्द्री तवौदनम् ॥ २ ॥ खट्वोघोऽभवादित्येवं व्यसुधीर्वस्वलङ्कृतम् ॥ पित्रर्थोपवनं दात्री नायको लावको नयः ॥ ३ ॥ त इह तयिहेत्यादि तेऽत्र योऽत्र जलेऽकजम् ॥ प्रकृतिं नो अहो एहि अ अवेहि इ इन्द्रकम् ॥ ४ ॥ उ उत्तिष्ठ कवी एतौ वायू एतौ वने इमे ॥ अमी एते यज्ञभूते एति देव इमन्नय ॥ ५ ॥ वक्ष्ये सन्धिं व्यञ्जनानां वाग्यतोऽजेकमातृकः ॥ षडेते तदिमे वादि वाङ्नीतिः षण्मुखादिकम् ॥ ॥ ६ ॥ वाङ्मनसं वाग्भवादिर्वाक्श्लक्ष्णं तच्छरीरकम् ॥ तल्लुनाति तच्चरेच्च कुङ्ङास्ते च सुगण्णिह ॥ ७ ॥ भवांश्चरन् भवांश्छात्रो भवांष्टीका भवांष्ठकः ॥ भवांस्तीर्थं भवांस्थेयान् भवाँल्लेखा भवाञ्जयः ॥ ८ ॥ भवाञ्छेते भवाञ्शेते भवाञ्शेते भवाण्ड्ढीनः ॥ त्वम्भर्त्ता त्वङ्करिष्यादिः सन्धिर्ज्ञेयो विसर्गतः ॥ ९ ॥ कश्छिद्यात् कश्चरेत् कष्टः कष्टः कस्थश्च कश्चलेत् ॥ क ~ स्वनेत् क × करोति स्म क × पठेत् क × फलेत वा ॥ १० ॥ कश्श्वशुरः कः श्वशुरः कस्सावरः कःसावरः ॥ कः फलेत कः शायितां कोऽत्र योधः क उत्तमः ॥ ११ ॥ देवा एते भो इह सादरा यान्ति भगो व्रज ॥ सुपूः सुदूरात्रिरत्र वायुर्याति पुनर्न हि ॥ १२ ॥ पुनरेति स यातीह एष याति क ईश्वरः ॥ ज्योतीरूपं तच्छत्रं म्लेच्छंछर्धीश्छिद्रमाच्छिदत् ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये संधिसिद्धरूपनिरूपणं नाम पञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५० ॥ अथ सुंव्विभक्तिसिद्धरूपम् ॥ स्कन्द उवाच ॥ विभक्तिसिद्धरूपं च कात्यायन वदामि ते ॥ द्वे विभक्ती सुप्तिङश्च सुपः सप्त विभक्तयः ॥ १ ॥ सुओजसिति प्रथमा अमोट्टशसो द्वितीया ॥ टाभ्यांभिसिति तृतीया ङेभ्यांभ्यस्श्चतुर्थ्यापि ॥ २ ॥ ङसिभ्यांभ्यस्तः पञ्चमी स्यात् ङसोसामिति षष्ठ्यपि ॥ ङिओत्सुपिति सप्तमी स्यात्सुपः प्रातिपदि-

कात्पराः ॥ ३ ॥ द्विविधं प्रातिपदिकं ह्यजन्तश्च हलन्तकम् ॥ प्रत्येकं त्रिविधं तत्स्यात्पुमांस्त्री च नपुंसकम् ॥ ४ ॥ दृश्यन्ते नाम-
कास्तेषामनुक्तानां च वीर्य्यतः ॥ वृक्षः सर्वोऽथ पूर्वश्च प्रथमश्च द्वितीयकः ॥ ५ ॥ तृतीयः खण्डपा वह्निः सखा पतिरहर्पतिः ॥ पटुर्नो
ग्रामणीन्द्रश्च खलपूर्मित्रभूः स्वभूः ॥ ६ ॥ सुश्रीः सुधीः पिता भ्राता ना कर्त्ता क्रोष्टुनप्तृको ॥ सुरा रा गौस्तथा द्योर्ग्लौः स्वरान्ताः
पुंसि नायकाः ॥७॥ सुवाक्त्वक्पृपत्सम्राट् जन्मभाक् च सुराडपि ॥ आपो मरुद्वन्दीव्यन्भवांश्च मघवान्पिबन् ॥८॥ भगवानघवानर्वा-
वाड्विमत्सर्ववित्सुपृत् ॥ सुसीमाः कुण्डी राजा च श्वा युवा मघवा तथा ॥ ९ ॥ पूषा सुकर्मा यज्वा च सुवर्मा च सुधर्मणा ॥
अर्य्यमा वृत्रहा पन्थाः सुककुदादिर्पच च ॥१०॥ प्रशान्सुतांश्च पञ्चाद्याः सुगीः सुराः सुपूरपि ॥ चन्द्रमाः सुवचाः श्रेयान्विद्वांश्चोशनसा
सह ॥११॥ पेचिवान्गौरनड्वान्गोधुङ्मित्रद्रुहो श्वालिट् ॥ स्त्रियां जाया जरा बाला एडका सह वृद्धया ॥ १२ ॥ क्षत्रिया बहुराजा च बहु-
दामाऽथ बालिका ॥ माया कोमुदगन्धा च सर्वा पूर्वा सहान्यया ॥१३॥ द्वितीया च तृतीया च बुद्धिः स्त्री श्रीर्नदी सुधीः ॥ भवन्ती चैव
दीव्यन्ती भाती भान्ती च यान्त्यपि ॥ १४ ॥ शृण्वती तुदती कर्त्री तुदन्ती कुर्वती मही ॥ रुन्धती क्रीडती दान्ती पालयन्ती सुरा-
ण्यपि ॥ १५ ॥ गौरी पुत्रवती नौश्च वधूर्दैक्तया भुवा ॥ तिस्रो द्वे कति वर्षाभूः स्वसा माता वरा च गौः ॥ १६ ॥ नौर्वाक्त्वक्प्राच्य-
वाचीति तिरश्ची समुदीच्यपि ॥ शरद्विद्युत्सरिद्योषिदग्निवित्सस्यदा दृषत् ॥ १७ ॥ येषा सा वेदवित्संविद्वह्वी राज्ञी त्वया मया ॥
सीमा पञ्चादयो राजा धूः पूश्चैव दिशा गिरा ॥ १८ ॥ चतस्रो विदुषी चैव केयं दिदृक्ष तादृशी ॥ असौ स्त्रियां नायकाश्च नायकाश्च
नपुंसके ॥ १९ ॥ कुण्डं सर्वं सोमपञ्च दधि वारि खलप्वथ ॥ मधु त्रपु कर्तृ भर्त्तृ अतिभर्तृ पयः पुरः ॥ २० ॥ प्राक्प्रत्यक् च तिर्य्य-
गुदग्जगच्चाग्रत्तथा शकृत् ॥ सुसम्पच्च सुदण्डीह अहः किञ्चेदमित्यपि ॥ २१ ॥ षट् सर्पिः श्रेयश्चत्वारि अदोऽन्ये हीदृशाः परे ॥
एतेभ्यः प्रथमादयश्च स्युः प्रातिपादिकात्पराः ॥ २२ ॥ धातुप्रत्ययहीनं यत्स्यात्प्रातिपदिकन्तु तत् ॥ प्रातिपदिकात्स्वलिङ्गार्थवचने ॥२३६॥
प्रथमा भवेत् ॥ २३ ॥ सम्बोधने च प्रथमा उक्ते कर्मणि कर्त्तरि ॥ कर्म यत्क्रियते तत्स्याद्वितीया कर्मणि स्मृता ॥ २४ ॥ क्रियते येन
करणं कर्त्ता यश्च करोति सः ॥ अनुक्ते तिङ्कृत्तद्धितैस्तृतीया करणे भवेत् ॥ २५ ॥ कारके कर्त्तरि च सा सम्प्रदाने चतुर्थ्यपि ॥ यस्मै

दित्सां धारयते सम्प्रदानं तदीरितम् ॥ २६ ॥ अपादानं यतोऽदेति आदत्ते च भयं यतः ॥ अपादाने पञ्चमी स्यात्स्वस्वाम्यादौ च षष्ठ्यपि ॥ २७ ॥ आधारो योऽधिकरणं विभक्तिस्तत्र सप्तमी ॥ एकार्थे चैकवचनं द्व्यर्थे द्विवचनं भवेत् ॥ २८ ॥ बहुषु बहुवचनं सिद्धरूपाण्यथो वदे ॥ वृक्षः सूर्य्योऽम्बु वाहोऽर्को हे रवे हे द्विजातयः ॥ २९ ॥ विप्रो गजान्महेन्द्रेण यमाभ्यामनलेः कृतम् ॥ रामाय मुनिवर्य्याभ्यां केभ्यो धर्माद्धरौ रतिः ॥ ३० ॥ शराभ्यां पुस्तकेभ्यश्च अर्थस्येश्वरयोर्गतिः ॥ बालानां सज्जने प्रीतिर्हरयोः कमलेषु च ॥ ३१ ॥ एवं काममहेशाद्याः शब्दा ज्ञेयाश्च वृक्षवत् ॥ सर्वे विश्वे च सर्वस्मै सर्वस्मात्कतरो मतः ॥ ३२ ॥ सर्वेषां स्वं च विश्वस्मिन् शेषं रूपञ्च वृक्षवत् ॥ एवञ्चोभयकतरकतमान्यतरादयः ॥ ३३ ॥ पूर्वे पूर्वाश्च पूर्वस्मै पूर्वस्मात्सुसमागतः ॥ पूर्वे बुद्धिश्च पूर्वस्मिन् शेषरूपन्तु सर्ववत् ॥ ३४ ॥ एवं परावराद्याश्च दक्षिणोत्तरकान्तराः ॥ अपराश्चाधरो नेमाः प्रथमाः प्रथमेऽर्कवत् ॥ ३५ ॥ एवं चरमाश्च तया अल्पार्द्धा नेम आदयः ॥ द्वितीयस्मै द्वितीयाय द्वितीयस्माद्वितीयकात् ॥ ३६ ॥ द्वितीयस्मिन्द्वितीये च तृतीयश्च तथाऽर्कवत् ॥ सोमपाः सोमपौ ज्ञेयौ सोमपाः सोमपां व्रज ॥ ३७ ॥ कीलालपौ सोमपश्च सोमपात्सोमपे दद ॥ सोमपाभ्यां सोमपाभ्यः सोमपः सोमपौ कुलम् ॥ ३८ ॥ एवं कीलालपाद्याः स्युः कविरग्निस्तथाऽरयः ॥ हे कवे कविमग्नी नान्हरीन्सात्यकिना हृतम् ॥ ३९ ॥ रविभ्यां रविभिर्देहि वह्नये यः समागतः ॥ अग्नेरग्न्योस्तथाग्नीनां कवौ कव्योः कविष्वऽथ ॥ ४० ॥ एवं सुसृतिरभ्रान्तिः सुकीर्त्तिः सुधृतिस्तथा ॥ सखा सखायौ सखायः हे सखे व्रज सत्पतिम् ॥ ४१ ॥ सखायं च सखायौ च सखीन्सख्या गतो दद ॥ सख्ये सख्युश्च सख्युश्च सख्योः शेषः कवेरिव ॥ ४२ ॥ पत्या पत्ये च पत्युश्च पत्युः पत्योस्तथाऽग्निवत् ॥ द्वौ द्वौ द्वाभ्यां द्वाभ्यां द्वित्वाद्यर्थे द्वयोर्द्वयोः ॥ ४३ ॥ त्रयस्त्रींश्च त्रिभिस्त्रिभ्यस्त्रयाणां च त्रिषु क्रमात् ॥ कविवत्कतिकतीति शेषं बहुवचनं स्मृतम् ॥ ४४ ॥ नीर्नियौ च नियौ हे नीः नियं नियौ नियो निया ॥ नीभ्यां नीभिर्निये नीभ्यः नियां निधि नियोस्तथा ॥ ४५ ॥ सुश्रीः सुधीः प्रभृतयो ग्रामणीः पूजयेद्धरिम् ॥ ग्रामण्यौ ग्रामण्यो ग्रामण्यं ग्रामण्या ग्रामणीभिः ॥ ४६ ॥ ग्रामण्योर्ग्रामण्यामेवं सेनानीप्रमुखा सुभूः ॥ सुभुवौ च स्वयम्भुवः स्वयम्भुवं स्वयंभुवः ॥ ४७ ॥ स्वयम्भुवा स्वयम्भुवे एवं प्रतिभुवादयः ॥ खलपूः खलप्वौ श्रेष्ठो खलप्वश्च खलपि च ॥ ४८ ॥ एवं शरपूमुखाः स्युः

क्रोष्टा क्रोष्टार ईरिताः ॥ क्रोष्टूंश्च क्रोष्टुना क्रोष्ट्रा क्रोष्टूनां क्रोष्टरिदृशम् ॥ ४९ ॥ पिता पितरौ पितरः हे पितः पितरौ शुभौ ॥ पितॄन् पितुः पितुः पित्रोः पितॄणां पितरिदृशम् ॥ ५० ॥ एवं भ्राता च जामातृमुख्यौ नृणां नृणां तथा ॥ कर्त्ता कर्त्तारौ कर्तॄंश्च कर्तॄणां कर्त्तरीदृशम् ॥ ५१ ॥ पितृक्ष्वेवमुद्भाता स्वसा नप्त्रादयः स्मृताः ॥ सुराः सुरायौ सुरायः सुरायं च सुराम्यापि ॥ ५२ ॥ गौः गावौ गां गा गवा च गोर्गवोश्च गवां गवि ॥ एवं द्यौर्ग्लौश्चापि तथा स्वरान्ताः पुंसि नायकाः ॥ ५३ ॥ सुवाक्सुवाचौ सुवाचा सुवाग्भ्यां च सुवाक्ष्वापि ॥ एवं दिक्प्रमुखाः प्राङ्च प्राञ्चौ प्राञ्चश्च भो व्रज ॥ ५४ ॥ प्राग्भ्यां प्राग्भिः प्राचां च प्राचि च प्राङ्षु प्राङ्क्ष्वापि ॥ एवं ह्युदङ्प्रतीची वा सम्यङ् प्रत्यक् समीच्यपि ॥५५॥ तिर्य्यङ् तिरश्चः सध्र्यङ् च विष्वद्यङ् पूर्ववत्स्मृताः ॥ अदद्यङ्दमुयगं स्यात्तथामुमुयङीरितः ॥५६॥ अदद्यञ्चौ ह्यमुद्रीचिः अदद्यग्भ्याञ्च पूर्ववत् ॥ तत्त्वतृट् तत्त्वतृषौ च तत्त्वतृड्भ्यां समागतः ॥ ५७ ॥ तत्त्वतृषि तत्त्वतृट्सु एवं काष्ठतडादयः ॥ भिषक् भिषग्भ्यां भिषजि जन्मभागादयस्तथा ॥ ५८ ॥ मरुन्मरुद्भ्यां मरुति एवं शत्रुजिदादयः ॥ भवान्भवन्तौ भवतां भवंश्चैव भवत्यपि ॥ ५९ ॥ महान्महान्तौ महतामेवं भगवदादयः ॥ एवं मघवान्मघवन्तौ अग्निचिच्चानिचित्यापि ॥ ६० ॥ अग्निचित्स्वेवमेवान्यद्वेदवित्तत्त्ववित्त्वापि ॥ वेदविदामेवमन्यद्यः समस्तेन सर्ववित् ॥ ६१ ॥ राजा राजानौ राज्ञः राज्ञि राजनि राजन् ॥ यज्वा यज्वानस्तद्वत्करी दण्डी च दण्डिनौ ॥ ६२ ॥ पन्थाः पन्थानौ च पथः पथिभ्यां पथि चेदृशम् ॥ मन्था ऋभुक्षाः पथ्याद्याः पञ्च पञ्च च पञ्चभिः ॥ ६३ ॥ प्रतन्प्रतानौ प्रतान्भ्यां हे प्रतांश्च सुशर्मणः ॥ आपः अपः अद्भिरप्येवं प्रशांश्चैव प्रशाम्यापि ॥ ६४ ॥ कः केन सर्ववत्केषु अयं चेमे इमान्न यः ॥ अनेन ह्याभ्यामेभिश्च अस्मै चेभ्यः स्वमस्य च ॥ ६५ ॥ अनयोरेषामेषु स्याच्चत्वारश्चतुरस्तथा॥ चतुर्णाञ्च चतुर्ष्वस्ति सुगीः श्रेष्ठः सुगीर्ष्वपि ॥ ६६ ॥ सुद्यौः सुदिवौ सुद्युभ्यां विट् विशौ विट्सु यादृशः ॥ यादृगभ्याञ्चैव विड्भ्यां च षट् षट् षण्णां च षट्स्वपि ॥ ६७ ॥ सुवचाः सुवचसा च सुवचोभ्यामथेदृशम् ॥ हे सुवचो हे उषनन्नुशना वोशनस्यापि ॥ ६८ ॥ पुरुदंशा अनेहा हे विद्वन् विद्वांश्च उत्तमाः ॥ विदुषे नमो विद्वद्भ्यां विद्वत्सु च बभूविवान् ॥६९॥ एवं च पेचिवाञ्श्रेयान्श्रेयांसौ श्रेयसस्तथा ॥ असौ अमू अमौ श्रेष्ठा अमुं अमूनिहामुना ॥ ७० ॥ अमीभिरमुष्मै वामुष्मादमुष्य वाऽमुयोस्तथा ॥ अमीषाममुष्मिन्नित्येवं गोधु-

ग्भिरागतः ॥ ७१ ॥ गोधुक्षित्येवमन्येऽपि मित्रद्रुहो मित्रद्रुहा ॥ मित्रध्रुग्भ्यां मित्रध्रुग्भिरेवं चित्तद्रुहादयः ॥ ७२ ॥ स्वलिट् स्वलिड्भ्यां स्वलिड्हि अनड्वाननड्वत्सु च ॥ अजन्ताश्च हलन्ताश्च पुंस्यथोऽथ स्त्रियां वदे ॥ ७३ ॥ इत्यादिमहापुराणे आग्नेये सुन्नि-भक्तिसिद्धरूपनिरूपणं नामैकपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५१ ॥ अथ स्त्रीलिङ्गशब्दसिद्धरूपम् ॥ स्कन्द उवाच ॥ रमा रमे रमाः शुभा रमां रमे रमास्तथा ॥ रमया च रमाभ्यां च रमाभिः कृतमव्ययम् ॥ १ ॥ रमायै च रमाभ्यां च रमायां रमयोः शुभम् ॥ रमाणां च रमायां च रमास्वेवं कलादयः ॥ २ ॥ जरा जरसौ जर इति जरसश्च जरा जराम् ॥ जरसं च जरास्वेवं सर्वा सर्वे च सर्वया ॥ ॥ ३ ॥ सर्वस्यै देहि सर्वस्याः सर्वस्याः सर्वयोस्तथा ॥ शेषं रमावद्रूपं स्याद्वे द्वे ये तिस्रश्च तिसृणाम् ॥ ४ ॥ बुद्धीर्बुद्ध्यां बुद्ध्ये च बुद्धयै बुद्धेश्च हे मते ॥ कविवत् स्यान्मुनीनां च नदीं नद्यौ नदीं नदीः ॥ ५ ॥ नद्या नदीभिर्नद्यै च नद्यां चैव नदीषु च ॥ कुमारी जम्भणीत्येवं श्रीः श्रियौ च श्रियः श्रिया ॥ ६ ॥ श्रियै श्रिये स्त्रीं स्त्रियं च स्त्रीश्च स्त्रियः स्त्रिया स्त्रियै ॥ स्त्रियाः स्त्रीणां स्त्रियां च ग्रामण्यां धेन्वै च धेनवे ॥ ७ ॥ जम्बूर्जम्ब्वौ च जम्बूश्च जम्बूनां च फलं पिब ॥ वर्षाभ्वौ च पुनर्भ्वौ च मातृर्वापि च गौश्च नौः ॥ ॥ ८ ॥ वाग्वाचा वाग्भिश्च वाक्षु स्रग्भ्यां स्रजि स्रजोस्तथा ॥ विद्वद्भ्यांचैव विद्वत्सु भवती स्याद्भवन्त्यपि ॥ ९ ॥ दीव्यन्ती भाती भान्ती च तुदन्ती च तुदत्यपि ॥ ॥ रुदती रुन्धती देवी गृह्णती चोरयन्त्यपि ॥ १० ॥ दृषत् दृषद्भ्यां दृषदि विशेषविदुषी कृतिः ॥ समित्समिद्भ्यां समिधि सीमा सीम्नि च सीमनि ॥ ११ ॥ दामनीभ्यां ककुद्भ्यां च केयमाभ्यां तथासु च ॥ गीर्भ्यांश्चैव गिरा गीर्षु सुभूः सुपूः पुरा पुरि ॥ १२ ॥ द्यौर्द्युभ्यां दिवि द्युषु तादृश्या तादृशी दिशः ॥ यादृश्यां यादृशी तद्वत्सुवचोभ्यां सुवचःस्वपि ॥ असौ चामुष्मू चामूरमूभिरमुयाऽमुयोः ॥ १३ ॥ इत्यादिमहापुराणे आग्नेये स्त्रीलिंगशब्दसिद्धरूपनिरूपणं नाम द्विपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५२ ॥ अथ नपुंसकशब्दसिद्धरूपम् ॥ स्कन्द उवाच ॥ नपुंसके किं के कानि किं के कानि तनो जलम् ॥ सर्वं सर्वे च पूर्वाद्याः सोमपं सोम-पानि च ॥ १ ॥ ग्रामाणि ग्रामणिनी च ग्रामाणि ग्रामणिन्यपि ॥ वारि वारिणी वारीणि वारिणां वारिणीदृशम् ॥ २ ॥ शुचये शुचिने देहि मृदुने मृदवे तथा ॥ त्रपु त्रपुणि त्रपूणां च खलपूनि खलप्वि च ॥ ३ ॥ कर्त्रा च कर्तृणे कर्त्रे अतिर्य्यतीरिणां तथा ॥ अभिन्यभिनिनी चैव

तरपदस्त्वयम् ॥ संख्योभयपदो यद्वद्द्वित्राद्येकत्रयो नरः ॥ १३ ॥ सहपूर्वपदोऽयं स्यात्समूलोद्धनकस्तरुः ॥ व्यतिहारलक्षणार्थः केशा-
केशि नखानखि ॥ १४ ॥ दिग्लक्ष्या स्याद्दक्षिणपूर्वा द्विगुराभाषितो द्विधा ॥ एकवद्भावि द्विशृङ्गं पञ्चमूली त्वनेकधा ॥ १५ ॥ द्वन्द्वः समासो
द्विविधो हीतरेतरयोगकः ॥ रुद्रविष्णू समाहारो भेरीपटहमीदृशम् ॥ १६ ॥ द्विधाख्यातोऽव्ययीभावो नामपूर्वपदो यथा ॥ शाकस्य मात्रा
शाकप्रति यथाऽव्ययपूर्वकः ॥ १७ ॥ उपकुम्भञ्चोपरथ्यं प्राधान्येन चतुर्विधः ॥ उत्तरपदार्थमुख्यो द्वन्द्वश्चोभयमुख्यकः ॥ पूर्वार्थंशोऽव्य-
यीभावो बहुव्रीहिश्च बाह्यगः ॥ १८ ॥ इत्यादिमहापुराणे आग्नेये समासनिरूपणं नाम पञ्चपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५५ ॥ अथ
ताद्धितम् ॥ स्कन्द उवाच ॥ ताद्धितं त्रिविधं वक्ष्ये सामान्या वृत्तिरीदृशी ॥ लच्यंसलो वत्सलः स्यादिलत्रि स्यात्तु फेनिलम् ॥ १ ॥
लोमशः शे पामनो ने इलचि स्यात्तु पिच्छिलम् ॥ अणि प्राज्ञ आर्चकः स्यादन्तादुराचि दन्तुरः ॥ २ ॥ रे स्यान्मधुरं
सुषिरं वे स्यात्केशव ईदृशः ॥ हिरण्यं ये मालवो वे वलचि स्याद्वलस्वलः ॥ ३ ॥ इनौ धनी करी हस्ती धनिकं टिकनीरितम् ॥
पयस्वी विनि मायावी ऊर्णायुर्युचि ईरितम् ॥ ४ ॥ वाग्मी मिनि आलचि स्याद्वाचालश्चाटचीरितम् ॥ फलिनो बर्हिणः केकी वृन्दार-
कस्तथा कनि ॥ ५ ॥ आलुचि शीतन्न सहते शीतालुश्चालुरीदृशः ॥ हिमालुरालुचि स्याच्च हिमं न सहते तथा ॥ ६ ॥ रूपं वातादु-
लचि स्याद्वातुलश्चानपत्यके ॥ वासिष्ठः कौरवो वासः पाञ्चालः सोऽस्य वासकः ॥ ७ ॥ तत्र वासो माथुरः स्याद्वेत्त्यधीते च चान्द्रकः ॥
व्युत्क्रमं वेत्ति क्रमकः नरश्चक्राम कौशकः ॥ ८ ॥ प्रियंगूणां भवं क्षेत्रं प्रैयङ्गवीनकं खनि ॥ मौद्गीनं कौद्रवीणञ्च वैदेहश्चानपत्यके ॥ ९ ॥
इञि दाक्षिर्दाशरथिः फकि नाडायणादिकम् ॥ आश्वायनः स्याच्च फञि यञि गार्ग्यश्च वात्स्यकः ॥ १० ॥ ढकि स्याद्वैनतेयादिश्चाटकै-
रस्तथैरकि ॥ द्रिक गौधेरको रूपं गौधारश्चारकीरितम् ॥ ११ ॥ क्षत्रियो घे कुलीनः खे ण्ये कौल्यादयः स्मृताः ॥ यति मूर्द्धन्यमु-
ख्यादिः सुगन्धिरिति रूपकम् ॥ १२ ॥ तारकादिभ्य इतचि नभस्तारकितादयः ॥ अनङि स्याच्च कुण्डोघ्नी पुष्पधन्वसुधन्वनी
॥ १३ ॥ चुञ्चुपि वित्तचुञ्चुः स्याद्वित्तमस्य च शब्दके ॥ चणपि स्यात्केशचणः रूपे स्यात्पटरूपकम् ॥ १४ ॥ ईयसो च पटीयान्-
स्यात्तरप्पक्षतरादिकम् ॥ पचतितरां च तरपि तमप्यटतितमामपि ॥ १५ ॥ मृद्वीतमा कल्पपि स्यादिन्द्रकल्पोऽर्ककल्पकः ॥ राजदे-

शीयो देशीये देश्ये देश्यादिरूपकम् ॥ १६ ॥ पटुजातीयो जातीये जातुमात्रं च मात्रचि ॥ ऊरुद्वयसो द्वसचि ऊरुदघ्नं च दघ्नचि ॥ १७ ॥ तयपि स्यात्पञ्चतयः दोवारि कष्ठकीरितम् ॥ सामान्यवृत्तिरुक्ताथ अव्ययाख्यश्च तद्धितः ॥ १८ ॥ यस्माद्यतस्तासिलि च यत्र तत्र त्रलीरितम् ॥ अस्मिन् काले ह्यधुना स्यादिदानीञ्चैव दान्यपि ॥ १९ ॥ सर्वस्मिन् सर्वदा दा स्यात् तस्मिन्काले हिलीरितम् ॥ तर्हि होस्मिन् काल इह कर्हि कस्मिंश्च कालके ॥ २० ॥ यथा थालि थमि कथं पूर्वस्यां दिशि सञ्चयेत् ॥ अस्तातिं चैव पूर्वस्याः पूर्वादिग्रामणीयकाः ॥ २१ ॥ पुरस्तात्सञ्चरेद्गच्छेत्सद्यस्तुल्येऽहनीरितम् ॥ यति पूर्वाब्दे च परुत्पूर्वतरे परार्य्यपि ॥ २२ ॥ ऐषमोऽस्मिन्संवत्सरे रूपं समसणीरितम् ॥ एद्यवौ परेद्यवि स्यात्परस्मिन्नहनीरितम् ॥ २३ ॥ अद्यास्मिन्नहनि द्ये स्यात्पूर्वेद्युश्च तयेद्युसि ॥ दक्षिणस्यां दिशि वसेद्दक्षिणाद्दक्षिणाद्युभौ ॥ २४ ॥ उत्तरस्यां दिशि वसेदुत्तरादुत्तराद्युभौ ॥ उपरि वसेदुपरिष्टाद्धवेद्दिष्टाति ऊर्ध्वकात् ॥ २५ ॥ उत्तरेण च पित्रोक्तमाचि च स्याच्च दक्षिणा ॥ आहौ दक्षिणाहि वसेद्विप्रकारं द्विधा च धा ॥ २६ ॥ ध्यमुभि चैकध्यं कुरु त्वं द्वैधन्धमुभि चेदृशम् ॥ द्वौ प्रकारौ द्विधा धाचि आसुसुरतरं यथा ॥ २७ ॥ निपातास्तद्धिताः प्रोक्तास्तद्धितो भाववाचकः ॥ पटोर्भावः पटुत्वन्त्वे पटुता तलि चेरितम् ॥ २८ ॥ प्रथिमा चेमनि पृथोः सौख्यं सुखात्ष्यञीरितम् ॥ स्तेयं याति च स्तेनस्य ये सख्युः सख्यमीरितम् ॥ २९ ॥ कपेर्भावश्च कापेयं सैन्यं पथ्यं यकीरितम् ॥ आश्वं कौमारकं चाणि रूपं चाणि च यौवनम् ॥ आचार्य्यकं कनि प्रोक्तमेवमन्येऽपि तद्धिताः ॥ ३० ॥ इत्यादिमहापुराणे आग्नेये तद्धितनिरूपणं नाम षट्पञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५६ ॥ अथणादिसिद्धरूपम् ॥ कुमार उवाच ॥ उणादयोऽभिधास्यन्ते प्रत्ययाः धातुतः परे ॥ उणि कारुश्च शिल्पी स्याज्जायुर्मायुश्च पित्तकम् ॥ १ ॥ गोमायुरायुर्वेदेषु बहुलं स्युरुणादयः ॥ आयुः स्यादुश्च हेत्वाद्याः किंशारुर्धान्यशूककः ॥ २ ॥ कृकवाकुः कुक्कुटः स्याद्भरुर्भर्ता मरुस्तया ॥ शयुश्चाजगरो ज्ञेयः मरुरायुधमुच्यते ॥ ३ ॥ स्वरुर्वज्रं त्रपु सीसमसारं फल्गुरीरितम् ॥ गृध्रश्च क्रनि किराचि मन्दिरं तिमिरं तमः ॥ ४ ॥ इलाचि सलिलं वारि कल्याणं भाण्डलं स्मृतम् ॥ बुधो विद्वान्कसौ स्याच्च शिबिरं गुप्तसंस्थितिः ॥ ५ ॥ ओतुर्बिडालश्च वुनि अभिधानादुणादयः ॥ कर्णः

कामी च गृहभूर्वास्तुजेवातृकः स्मृतः ॥ ६ ॥ अनड्वान्वहनोर्डानिः स्याज्जातौ जीवाणवोषधम् ॥ नौ वह्नेरिनांने हरिणः मृगः कामी च भाजनम् ॥ ७ ॥ कम्बोजो भाजनं भाण्डे सरण्डश्च चतुष्पदः ॥ तरुरेरण्डः सङ्घातो वरूडः साम निर्भरम् ॥ ८ ॥ स्फारं प्रभूतं स्यान्नन्त-प्रत्यये चीरवल्कलम् ॥ कानरो भारुहुयस्तु प्रचण्डो जवसं तृणम् ॥ ९ ॥ जगच्चैव तु भूलोको कृशानुर्ज्योतिरर्कवः ॥ वर्वरः कुटिलो धूर्तश्चत्वरं च चतुष्पथम् ॥ १० ॥ क्षीरं भिक्षुर्वावृतिरादित्यो मित्र ईरितः ॥ पुत्रः सूनुः पिता नानः पृदाकुर्व्याघ्रवृश्चिके ॥ गर्तोऽवटोऽथ भरतो नटोऽपरोऽप्युणादयः ॥ ११ ॥ इत्यादिमहापुराणे आग्नेये उणादिसिद्धरूपनिरूपणं नाम सप्तपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ॥ ३५७ ॥ अथ तिङन्तविभक्तिसिद्धरूपम् ॥ कुमार उवाच ॥ तिङ्विभक्तिं प्रवक्ष्यामि तथादेशं मयाश्रुतः ॥ तिङस्त्रिष्वपि वर्तन्ते भावे कर्मणि कर्त्तरि ॥ १ ॥ सकर्मकाकर्मकाश्च कर्तरि द्विपदे स्मृताः ॥ सकर्मका च कर्मणि च तद्वाद्देशस्थयोरितः ॥ २ ॥ वर्तमाने लडा-ख्यातो विध्याद्यर्थे लिङीरितः ॥ विध्याशी लोङाशीषि च भूतानद्यतने च लङ् ॥ ३ ॥ भूते लुङ् लिट् परोक्षेऽथ भाविन्यद्यतने च लुट् ॥ लिङाशिषि च शेषेऽर्थे लृङ् भविष्यति लृङ् भवेत् ॥ ४ ॥ लिङ्निमित्ते क्रियातिपत्तौ परे नवात्मनेपदम् ॥ पूर्वं नव परस्मैपदं ति-तसन्तीति प्रथमः पुमान् ॥ ५ ॥ तिङ्यस्मद्यनयो मिपस्वश्चोत्तमः पुमान् ॥ त आताम्झात्मने मुख्यः थासाथां ध्वञ्च मध्यमः ॥ ६ ॥ उत्तम इ वहि महि भूवाद्या धातवः स्मृताः ॥ भुविरेधिः पचिर्नन्दिर्ग्रहिः श्रंसिः पदिस्त्वदिः ॥ ७ ॥ शीङिः क्रीडिर्जुहोतिश्च जहातिश्च दधात्यपि ॥ दीव्यतिः स्वपितिर्नेहिः सुनोतिर्वसतिश्च च ॥ ८ ॥ तुदिर्मृशतिर्मुञ्चतिः रुधिर्भुजिस्त्यजिस्तनिः ॥ शवादिके विकरणे मनिश्चैव करोत्यपि ॥ ९ ॥ क्रीडतिर्डुङ् ग्रहिश्चोतिः पानीरार्चैश्च नायकाः ॥ भुवि स्यातिङ भवति सः भवतस्तौ भवन्ति ते ॥ १० ॥ भवसि त्वं युवां भवथो यूयं भवथ चाप्यहम् ॥ भवाव्यावां भवावश्च भवामो ह्येधते कुलम् ॥ ११ ॥ एधेते द्वे तथैधन्ते एधसे त्वं हि मेधया ॥ एधेथे च समेधन्ते एधे ह्येधावहे धिया ॥ १२ ॥ एधामहे हरेर्भक्त्या पचतीत्यादि पूर्ववत् ॥ भूयतेऽनुभूयतेऽतो भावे कर्मणि वे यकि ॥ १३ ॥ बुभूषति सनीत्येवं णिचि भावयतीश्वरम् ॥ यङि बोभूयते वाद्यं बोभोति स्याच्च यङ्लुकि ॥ १४ ॥ पुत्री-यति पुत्रकाम्यत्येवं पटपटायते ॥ घटयत्यथ सनि णिचि बुभूषयति रूपकम् ॥ १५ ॥ भवेद्भवेतां च लिङि भवेयुश्च भवेः परे ॥

भवेतं च भवेतैवं भवेयं च भवेवं भवेम ॥ १६ ॥ एधेत एधेयातामेधेरन्मनसा श्रिया ॥ एधेथाश्च एधेयाथामेधेध्वमेधेय एधेवहि एधेमहि ॥ १७ ॥ अस्तु तावद्भवतां लोटि भवन्तु भवताद्भव ॥ भवतं भवत भवानि भवाव च भवाम च ॥ १८ ॥ एधतामेधेतामेधन्तामेधै पचावहै पचामहै ॥ अभ्यनन्ददपचतामपचन्नपचस्तथा ॥ १९ ॥ अभवतमभवतापचमपचावापचाम च ॥ ऐधतैधेतामैधध्वमेधे चैधामहीरितम् ॥ २० ॥ अभूदभूतामभूवन्नभूश्चाभूवमेव लुङ ॥ ऐधिष्टैधिषातां मरा वैधिष्ठा ऐधिषीष्टदृशम् ॥ २१ ॥ लिटि बभूव बभूवतुः बभूवुश्च बभूविथ ॥ बभूवथुर्बभूव च बभूविव बभूविम ॥ २२ ॥ पेचे पेचाते पेचिरे त्वमेधाञ्चक्रुषे तथा ॥ एधाञ्चक्राथे पेचिध्वे पेचे पेचिमहे तथा ॥ २३ ॥ लुटि भविता भवितारौ भवितारो हरादयः ॥ भवितासि भवितास्थो भवितास्मस्तथा वयम् ॥ २४ ॥ पक्तां पक्तारौ पक्तारः पक्तासे त्वं शुभौदनम् ॥ पक्ताध्वे पक्ताहे चाहं पक्तास्महे हरेश्चरुम् ॥ २५ ॥ लिङाशीषि सुखं भूयाद्भूयास्तां हरिशङ्करौ ॥ भूयासुस्ते च भूयास्त्वं युवां भूयास्तमीश्वरौ ॥ २६ ॥ भूयास्त यूयं भूयासमहं भूयास्म सर्वदा ॥ यक्षीष्ट ह्यधिषीयास्तां यक्षीरन्नोधिषीय च ॥ २७ ॥ यक्षीवह्योधिषीमहि लिङि चायक्ष्यते तिलङ ॥ अयक्ष्येतामयक्ष्यन्तायक्ष्यथा अयक्ष्येथां युवाम् ॥ २८ ॥ अयक्ष्यध्वमोधिष्यावह्योधिष्यामहि हरेर्वयम् ॥ लुटि स्याद्राविष्यतीति एधिष्यामह ईदृशम् ॥ २९ ॥ एवं विभावयिष्यन्ति बोभविष्यति रूपकम् ॥ घटयेत्पटयेत्तद्वत्पुत्रीयति च काम्यति ॥ ३० ॥ इत्यादिमहापुराणे आग्नेये . तिङ्विभक्तिनिरूपणं नामाष्टपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५८ ॥ अथ कृत्सिद्धरूपम् ॥ कुमार उवाच ॥ कृतस्त्रिष्वपि विज्ञेया भावे कर्मणि कर्त्तरि ॥ अञ्ल्युट् क्तिन्यभो भावे यजकारत एव च ॥ १ ॥ अचि धर्मस्य विनय उत्करः प्रकरस्तथा ॥ देवो भद्रः श्रीकरश्च ल्युटि रूपन्तु शोभनम् ॥ २ ॥ क्तिनि वृद्धिस्तुतिर्मती घञि भावोऽथ युच्यपि ॥ कारणा भावनेत्यादि अकारे च चिकित्सया ॥ ३ ॥ तथा तव्यो ह्यनीयश्च कर्त्तव्यं करणीयकम् ॥ देयं ध्येयञ्चैव याति प्याति कार्यं च कृत्यकाः ॥ ४ ॥ कर्त्तरि क्तादयो ज्ञेया भावे कर्मणि च क्वचित् ॥ गतो ग्राम गतो ग्राममाश्लिष्टश्च गुरुस्त्वया ॥ ५ ॥ शतृशानचौ भवन्नेधमानो भवन्त्यपि ॥ ण्वुल्तृचौ सर्वधातुभ्यो भावको भविता तथा ॥ ६ ॥ क्विन्तश्च स्वयम्भूश्च भूते लिटः क्वसुः कानच् ॥ बभूविवान्पेचिवांश्च पेचानः श्रद्दधानकः ॥ ७ ॥ अणि स्युः कुम्भकाराद्या भूतेऽप्युणादयः स्मृताः ॥ वायुः

पायुश्च कारुः स्याद्बहुलं छन्दसीरितम् ॥ ८ ॥ इत्यादिमहापुराणे आग्नेये कृदंतनिरूपणं नामैकोनषष्ट्यधिकत्रिशततमोऽध्यायः ॥
॥ ३५९ ॥ अथ कोशेषु स्वर्गपातालादिवर्गाः ॥ अग्निरुवाच ॥ स्वर्गादि नामलिङ्गो यो हारिस्तं प्रवदामि ते ॥ स्वः स्वर्गनाकत्रिदिवा
द्योदिवौ द्वे त्रिविष्टपम् ॥ १ ॥ देवा वृन्दारका लेखा रुद्राद्या गणदेवताः ॥ विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः ॥ २ ॥ पिशाचो
गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ देवद्विषोऽसुरा दैत्याः सुगतः स्यात्तथागतः ॥ ३ ॥ ब्रह्मात्मभूः सुरज्येष्ठो विष्णुर्नारायणो हरिः ॥
रेवतीशो हली रामः कामः पञ्चशरः स्मरः ॥ ४ ॥ लक्ष्मीः पद्मालया पद्मा सर्वैः सर्वेश्वरः शिवः ॥ कपर्दोऽस्य जटाजूटः पिनाकोऽ-
जगवन्धनुः ॥ ५ ॥ प्रमथाः स्युः पारिषदा मृडानी चण्डिकाऽम्बिका ॥ द्वैमातुरो गजास्यश्च सेनानीरग्निभूर्गुहः ॥ ६ ॥ आखण्डलः
सुनासीरः मरुत्वान् च दिवस्पतिः ॥ पुलोमजा शचीन्द्राणी देवी तस्य तु वल्लभा ॥ ७ ॥ स्यात्प्रासादो वैजयन्तो जयन्तः पाक-
शासनिः ॥ ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ८ ॥ ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ॥ व्योमयानं विमानोऽस्त्री
पीयूषममृतं सुधा ॥ ९ ॥ स्यात्सुधर्मा देवसभा स्वर्गङ्गा सुरदीर्घिका ॥ स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ॥ १० ॥ हाहा
हूहूश्च गन्धर्वा अग्निर्वह्निर्धनञ्जयः ॥ जातवेदाः कृष्णवर्त्मा आशयाशश्च पावकः ॥ ११ ॥ हिरण्यरेताः सप्तार्चिः शुक्रश्चैवाशुशुक्षणिः ॥
शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ॥ १२ ॥ वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ॥ स्फुलिङ्गोऽग्निकणा धर्म-
राजः परेतराट् ॥ १३ ॥ कालोऽन्तको दण्डधरः श्राद्धदेवोऽथ राक्षसः ॥ कोणपात्रपक्रव्यादा यातुधानश्च नैर्ऋतिः ॥ १४ ॥ प्रचेता वरुणः
पाशी श्वसनः स्पर्शनोऽनिलः ॥ सदागतिर्मातरिश्वा प्राणो मरुत्समीरणः ॥ १५ ॥ जवो रंहस्तरसी तु लघु क्षिप्रमरं द्रुतम् ॥ संत्वरं चपलं
तूर्णमाविलम्बितमाशु च ॥ १६ ॥ सततानारताश्रान्तसन्ततानिरतानिशम् ॥ नित्यानवरताजस्रमप्यथातिशयो भरः ॥ १७ ॥ अतिवे-
लभृशात्यर्थानिमात्रोद्वाढनिर्भरम् ॥ तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ॥ १८ ॥ गुह्यकेशो यक्षराजो राजराजो धना- ॥ २४१ ॥
धिपः ॥ स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ॥ १९ ॥ निधिर्नौ शेवधिर्व्योम त्वभ्रं पुष्करमम्बरम् ॥ द्योदिवौ चान्तरिक्षं स्वं काष्ठा-
शाककुभौ दिशः ॥ २० ॥ अभ्यन्तरं त्वन्तरालञ्चक्रवालन्तु मण्डलम् ॥ तडित्वान्वारिदो मेघस्तनयित्नुर्बलाहकः ॥ २१ ॥ काद-

म्बिनी मेघमाला स्तनितं गर्जितं तथा ॥ शम्पाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभाः ॥ २२ ॥ तडित्सौदामिनी विद्युच्चञ्चला चपलाऽपि च ॥ स्फूर्जथुर्वज्रनिर्घोषो वृष्टिघातस्त्ववग्रहः ॥ २३ ॥ धारा सम्पात आसारः शीकरोऽम्बुकणाः स्मृताः ॥ वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ॥ २४ ॥ अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ आपिधाननिगोधानापिधानाच्छादनानि च ॥ २५ ॥ अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥ विधुः कुमुदबन्धुश्च बिम्बोऽस्त्री मण्डलं त्रिषु ॥ २६ ॥ कला तु षोडशो भागो भित्तं शकलखण्डके ॥ चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ॥ २७ ॥ लक्षणं लक्ष्मकं चिह्नं शोभा कान्तिर्द्युतिश्छविः ॥ सुषमा परमा शोभा तुषारस्तुहिनं हिमम् ॥ २८ ॥ अवश्यायस्तु नीहारः प्रालेयः शिशिरो हिमः ॥ नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ॥ २९ ॥ गुरुर्जीव आङ्गिरस उशना भार्गवः कविः ॥ विधुन्तुदस्तमो राहुर्लम्बं राश्युदयः स्मृतः ॥ ३० ॥ सप्तार्चिर्यो मरीच्यत्रिमुखाश्चित्राशिखण्डिनः ॥ हरिदश्वत्रध्नपूषद्युमणिर्मिहिरो रविः ॥ ३१ ॥ परिवेषस्तु परिधिरुपसूर्य्यकमण्डले ॥ किरणोऽस्त्रमयूखांशुगभस्तिघृणिघृष्णयः ॥ ३२ ॥ भानुः करो मरीचिः स्त्री पुंसयोर्दीधितिः स्त्रियाम् ॥ स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीतयः ॥ ॥ ३३ ॥ रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ॥ ३४ ॥ तिग्मं तीक्ष्णं खरं तद्वदिष्टोऽनेहा च कालकः ॥ घस्रो दिनाहनी चैव सायंसन्ध्या पितृप्रसूः ॥ ३५ ॥ प्रत्यूषोऽऽहर्मुखं कल्यमुषःप्रत्यूषसी अपि ॥ प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यमथ शर्वरी ॥ ३६ ॥ यामी तमी तामिस्रा च ज्योत्स्नी चन्द्रिकयान्विता ॥ आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणी ॥ ३७ ॥ अर्द्धरात्रनिशीथौ द्वौ प्रदोषो रजनीमुखम् ॥ स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥ ३८ ॥ पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ॥ कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥ ३९ ॥ अमावास्या त्वमावस्या दर्शः सूर्य्येन्दुसङ्गमः ॥ सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ॥ ४० ॥ संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ कलुषं वृजिनेनोऽघमंहो दुरितदुष्कृतम् ॥ ४१ ॥ स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥ मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ॥ ४२ ॥ स्यादानन्दथुरानन्दः शर्मशातसुखानि च ॥ श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ ४३ ॥ भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥ दैवं दिष्टं

भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥ ४४ ॥ क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ॥ हेतुर्नो कारणं बीजं निदानं त्वादिकारणम् ॥ ४५ ॥ चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ॥ ४६ ॥ प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिश्चेतनाः ॥ धीर्धारणावती मेधा संकल्पः कर्म मानसम् ॥ ४७ ॥ सङ्ख्याविचारणा चर्चा विचिकित्सा तु संशयः॥ अध्याहारस्तर्क ऊहः समौ निर्णयनिश्चयौ ॥ ४८ ॥ मिथ्यादृष्टिर्नास्तिकता भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ४९ ॥ मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥ मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ५० ॥ मोक्षोऽपवर्गोऽथाज्ञानमविद्याहम्मतिः स्त्रियाम् ॥ विमर्दोत्थे परिमलो गन्धे जनमनोहरे ॥ ५१॥ आमोदः सोऽतिनिर्हारी सुरभिर्घ्राणतर्पणः ॥ शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डराः ॥ ५२ ॥ अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ॥ हरिणः पाण्डुरः पाण्डुरीपत्पाण्डुस्तु धूसरः ॥५३॥ कृष्णे नीलासितश्यामकालश्यामलमेचकाः ॥ पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ॥ ५४ ॥ रोहितो लोहितो रक्तः शोणः कोकनदच्छविः ॥ अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥ ५५ ॥ श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ॥ कडारः कापिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ ५६ ॥ चित्रं किर्म्मीरकल्माषशबलैताश्च कर्बुरे ॥ व्याहार उक्तिर्लपितमपभ्रंशोऽपशब्दकः ॥ ॥ ५७ ॥ तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ इतिहासः पुरावृत्तं पुराणं पञ्चलक्षणम् ॥ ५८ ॥ आख्यायिकोपलब्ध्यर्था प्रबन्धः कल्पना कथा ॥ समाहारः संग्रहस्तु प्रवल्हिका प्रहेलिका ॥ ५९ ॥ समस्या तु समासार्था स्मृतिस्तु धर्मसंहिता ॥ आख्याह्वे चाभिधानं च वार्त्ता वृत्तान्त ईरितः ॥ ६० ॥ हूतिराकारणाह्वानमुपन्यासस्तु वाङ्मुखम् ॥ विवादो व्यवहारः स्यात्प्रतिवाक्योत्तरे समे ॥ ६१ ॥ उपोद्घात उदाहारो ह्यथ मिथ्याभिशंसनम् ॥ अभिशापो यशः कीर्तिः प्रश्नः पृच्छानुयोगकः ॥ ६२ ॥ आम्रेडितं द्विस्त्रिरुक्तं कुत्सानिन्दे च गर्हणे ॥ स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥ ६३ ॥ अनुलापो मुहुर्भाषा विलापः परिदेवनम् ॥ विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ॥६४॥ सुप्रलापः सुवचनमपलापस्तु निह्नवः ॥ रुशती वागकल्याणी सङ्गतं हृदयङ्गमम् ॥ ६५॥ अत्यर्थमधुरं सान्त्वमबद्धं स्यादनर्थकम् ॥ निष्ठुराश्लीलपरुषं ग्राम्यं वै सूनृतं प्रिये ॥ ६६॥ सत्यं तथ्यमृतं सम्यङ् नाद-

निस्वाननिस्वनाः ॥ आरवारावसंरावविरावा अथ मर्मरः ॥६७॥ स्वनितं वस्त्रपर्णानां भूषणानान्तु शिञ्जितम् ॥ वीणाया निक्वणः क्वाणः तिरश्चां वाशितं रुतम् ॥ ६८ ॥ कोलाहलः कलकलो गीतं गानमिमे समे ॥ स्त्री प्रतिश्रुत्प्रतिध्वाने तन्त्रीकण्ठन्निषादकः ॥ ६९ ॥ काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ॥ कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैः स्त्रयास्त्रिषु ॥ ७० ॥ समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ॥ विपञ्ची सा तु तन्त्रीभिः सप्ताभिः परिवादिनी ॥ ७१ ॥ ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ॥ वंशादिकन्तु सुषिरं कांस्यतालादिक घनम् ॥ ७२ ॥ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ॥ मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योऽर्द्धकास्त्रयः ॥ ७३ ॥ स्याद्यशः पटहो ढक्का भेर्य्यामानकदुन्दुभिः ॥ आनकः पटहो भेदा झर्झरीडिण्डिमादयः ॥ ७४ ॥ मर्दलः पणवस्तुल्यो क्रियामानं तु तालकः ॥ लयः साम्यं ताण्डवन्तु नाट्यं लास्यञ्च नर्त्तनम् ॥ ७५ ॥ तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ राजा भट्टारको देवः साभिषेका च देव्यपि ॥ ७६ ॥ शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ॥ बीभत्सरौद्रे च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ ७७ ॥ उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ॥ कृपा दया चानुकम्पाऽप्यनुक्रोशोऽप्यथो हसः ॥ ७८ ॥ हासो हास्यञ्च बीभत्सं विकृतं त्रिष्विदं द्वयम् ॥ विस्मयोऽद्भुतमाश्चर्य्यं चित्रमप्यथ भैरवम् ॥ ७९ ॥ दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥ भयङ्करं प्रतिभयं रौद्रन्तूग्रमंमी त्रिषु ॥ ८० ॥ चर्तुदश दरत्रासौ भीतिर्भीः साध्वसं भयम् ॥ विकारो मानसो भावोऽनुभावो भावबोधनः ॥८१ ॥ गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः ॥ अनादरः परिभवः परिभावस्तिरक्रिया ॥ ८२ ॥ व्रीडा लज्जा त्रपा ह्रीः स्यादभिध्यानं धने स्पृहा ॥ कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम् ॥ ८३ ॥ स्त्रीणां विलासविब्वोकविभ्रमा ललितं तथा ॥ हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावज्ञाः ॥ ८४॥ द्रवकेलिपरीहासाः क्रीडा लीला च कूर्दनम् ॥ स्यादाच्छुरितकं हासः सोत्प्रासः समनाक्स्मितम् ॥८५॥ अधोभुवनपातालं च्छिद्रं श्वभ्रं वपा सुषिः ॥ गर्त्तावटौ भुवि श्वभ्रे तमिस्रं तिमिरं तमः ॥ ८६ ॥ सर्पः पृदाकुर्भुजगो दन्दशूको बिलेशयः ॥ विषं क्ष्वेडश्च गरलं निरयो दुर्गतिः स्त्रियाम् ॥ ८७ ॥ पयः कीलालममृतमुदकं भुवनं वनम् ॥ भङ्गस्तरङ्ग ऊर्मिर्वा कल्लोलोल्लोलकौ च तौ ॥ ८८ ॥ पृषन्ति बिन्दुपृषताः कूलं रोधश्च तीरकम् ॥ तोयोत्थितं तत्पुलिनं जम्बालं पङ्ककर्दमौ ॥ ८९ ॥ जलो-

च्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ॥ आतरस्तरपण्यं स्याद्द्रोणी काष्ठाम्बुवाहिनी ॥ ९० ॥ कलुषश्चाविलोऽच्छस्तु प्रसन्नोऽथ गभीरकम् ॥ अगाधं दाशकैवर्त्तौ शम्बूका जलशुक्तयः ॥ ९१ ॥ सौगन्धिकन्तु कह्लारं नीलमिन्दीवरं कजम् ॥ स्यादुत्पलं कुवलयं सिते कुमुदकेरवे ॥ ९२ ॥ शालूकमेषां कन्दः स्यात्पद्मं तामरसं कजम् ॥ नीलोत्पलं कुवलयं रक्तं कोकनदं स्मृतम् ॥ ९३ ॥ करहाटः शिफा कन्दं किञ्जल्कः केसरोऽस्त्रियाम् ॥ खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः ॥ ९४ ॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ स्वर्गपातालवर्गाद्या उक्ता नानार्थकाश्च शृणु ॥ ९५ ॥ इत्यादिमहापुराणे आग्नेये शब्दकोशे स्वर्गादिवर्गनिरूपणं नाम षष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६० ॥ अथाव्ययवर्गः ॥ अग्निरुवाच ॥ आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥ आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात्कोपपीडयोः ॥ १ ॥ पापकुत्सेपदर्थे कु धिग्जुगुप्सननिन्दयोः ॥ चान्वाचयसमाहारेतरेतरसमुच्चये ॥ २ ॥ स्वस्त्याशीःक्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति ॥ स्विन्प्रश्ने च वितर्के च तु स्याद्भेदेऽवधारणे ॥ ३ ॥ ॥ सकृत्सहैकवारे स्यादाराद्दूरसमीपयोः ॥ प्रतीच्यां चरमे पश्चादुताप्यथोविकल्पयोः ॥ ४ ॥ पुनः सहार्थयोः शश्वत्साक्षात्प्रत्यक्षतुल्ययोः ॥ खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत ॥ ५ ॥ हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ॥ ६ ॥ इति हेतौ प्रकरणे प्रकाशादिसमाप्तिषु ॥ प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि ॥ ७ ॥ यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ॥ मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ ॥ ८ ॥ वृथा निरर्थकाविध्योर्नानाऽनेकोभयार्थयोः ॥ नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरनु ॥ ९ ॥ प्रश्नावधारणानुज्ञाऽनुनयामन्त्रणे ननु ॥ गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि ॥ १० ॥ उपमायां विकल्पे वा सामित्वर्द्धे जुगुप्सिते ॥ अमा सह समीपे च कं वारिणि च मूर्धनि ॥ ११ ॥ इवेत्थमर्थयोरेवं नूनं तर्केऽर्थनिश्चये ॥ तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने ॥ १२ ॥ नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने ॥ अलं भूषणपर्य्याप्तिशक्तिवारणवाचकम् ॥ १३ ॥ हूं वितर्के परिप्रश्ने समयाऽन्तिकमध्ययोः ॥ पुनरप्रथमे भेदे निर्निश्चयनिषेधयोः ॥ १४ ॥ स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ॥ उरुधुरी चोरुरी च विस्तारेऽङ्गीकृते त्रयम् ॥ १५ ॥ स्वर्गे परे च लोके स्वर्वार्त्तासम्भावयोः किल ॥ निषेधवाक्यालङ्कारे जिज्ञासावसरे

खलु ॥ १६ ॥ समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ॥ नामप्रकाशयोः प्रादुर्मिथोन्योन्यं रहस्यपि ॥ १७ ॥ तिरोऽन्तर्द्धौ तिर्यगर्थे हा विषादशुगार्त्तिषु ॥ अहहेत्यद्भुते खेदे हि हेताववधारणे ॥ १८ ॥ चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ॥ मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १९ ॥ स्याज्झटित्यञ्जसाह्राय द्राङ्मङ्क्षु सपदि द्रुते ॥ बलवन्सुष्ठु किमुत विकल्पे किं किमूत च ॥ २० ॥ तु हि च स्म ह वै पादपूरणे पूजनेऽस्त्रियाम् ॥ दिवाह्नीत्यथ दोषा च नक्तं च रजनावपि ॥ २१ ॥ तिर्यगर्थे साचि तिरोऽप्यथ सम्बोधनार्थकाः ॥ स्युः प्याट् पाडङ्ग हे हे भोः समया निकषा हिरुक् ॥ २२ ॥ अतर्किते तु सहसा स्यात्पुरः पुरतोऽग्रतः ॥ स्वाहा देवहविर्दाने श्रौषड् वौषड् वषट् स्वधा ॥ २३ ॥ किञ्चिद्दीषन्मनागल्पे प्रेत्याऽमुत्र भवान्तरे ॥ यथा तथा चैव साम्ये अहो हो इति विस्मये ॥२४॥ मौने तु तूष्णीं तूष्णीकं सद्यः सपदि तत्क्षणे ॥ दिष्ट्या समुपपर्योपश्चेन्यानन्दोऽथान्तरेऽन्तरा ॥ २५ ॥ अन्तरेण च मध्ये स्युः प्रसह्य तु हठार्थकम् ॥ युक्ते द्वे साम्प्रतं स्थानेऽभीक्ष्णं शश्वदनारते ॥ २६ ॥ अंभवो न ह्यनो नापि मा स्म माऽलञ्च वारणे ॥ पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाऽञ्जसा द्वयम् ॥ २७ ॥ प्राकाश्ये प्रादुराविः स्याद्दोमेवं परमं मते ॥ समन्ततस्तु परितः सर्वतो विष्वगित्यपि ॥ २८ ॥ अकामानुमतौ कामममूयोपगमेऽस्तु च ॥ ननु च स्याद्विरोधोक्तौ कचिन्कामप्रवेदने ॥ २९॥ निःसमं दुष्षमं गर्ह्यं यथास्वन्तु यथायथम् ॥ नृषा मिथ्या च वितथे यथार्थन्तु यथातथम् ॥ ३० ॥ स्युरेवन्तु पुनर्वेवेत्यवधारणवाचकाः ॥ प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम् ॥ ३१ ॥ संवर्द्धेऽवरे त्ववर्णागमे सं स्वयमान्मना ॥ अल्पे नीचैमहत्युच्चैः प्रायोभूम्न्यऽद्भुते शनैः ॥३२॥ मना नित्ये बहिर्वाह्ये स्मार्तनित्येऽन्तमदर्शने ॥ अस्ति सत्त्वे रुशोक्तावृषुं प्रथेऽनुनये न्याये ॥३३॥ हूं तर्के स्यादुषा रात्रेरवसाने नमो नतौ ॥ पुनरर्थेऽङ्गानिन्दायां दुष्ठु सुष्ठु प्रशंसने॥३४॥ सायं साये प्रगे प्रातः प्रभाते निकषाऽन्तिके ॥ परुत्परार्य्येपमोऽब्दे पूर्वे पूर्वतरे यति ॥३५॥ अद्याऽद्यद्यऽथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ तथाऽवरान्यान्यतरेतरान्पूर्वेद्युरादयः ॥३६॥ उभयद्युश्चोभयेद्युः परे त्वह्नि परेद्यवि ॥ ह्यो गतेऽनागतेऽह्नि श्वः परश्वः श्वः परेऽहनि ॥३७॥ तदा तद्दानीं युगपदेकदा सर्वदा सदा ॥ एनर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ॥ ३८ ॥ इत्यादिमहापुराणे आग्नेये शब्दकोशेऽव्ययवर्गादिनिरूपणं नामैकपष्ट्यधिकद्विशततमोऽ-

व्यायः ॥ ३६१ ॥ अथ नानार्थवर्गाः ॥ अग्निरुवाच ॥ आकाशे त्रिदिवे नाको लोकस्तु भुवने जने ॥ पद्ये यशसि च श्लोकः शरे खड्गे च सायकः ॥ १ ॥ आनकः पटहो भेरी कलङ्कोऽङ्कापवादयोः ॥ मारुते वेधसि ब्रह्मे पुंसि कः कं शिरोऽम्बुनोः ॥ २ ॥ स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ महेन्द्रगुग्गुलूलूकव्यालग्राहिषु क्रौशिकः ॥ ३ ॥ शालावृकौ कपिश्वानौ मानं स्यान्मितिसाधनम् ॥ सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ॥ ४ ॥ योगः मन्त्रहनोपायध्यानसङ्गतियुक्तिषु ॥ भोगः सुखे रूयादिभृतावब्जौ शंखनिशाकरौ ॥ ५ ॥ काके भगण्डौ करटौ दुश्चर्मा शिपिविष्टकः ॥ रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाऽशुभे ॥ ६ ॥ व्यष्टिः फले समृद्धौ च दृष्टिर्ज्ञानेऽक्षिणि दर्शने ॥ निष्ठानिष्पत्तिनाशान्ताः काष्ठोत्कर्षे स्थितौ दिशि ॥ ७ ॥ भूगोवाचस्त्विडा इडः प्रगाढं भृशकृच्छ्रयोः ॥ भृशप्रतिज्ञयोर्बाढं शक्तस्थूलौ दृढौ त्रिषु ॥ ८ ॥ विन्यस्तसंहतौ व्यूढौ कृष्णो व्यासेऽर्जुने हरौ ॥ पणो द्यूतादिपूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ९ ॥ मौर्व्या द्रव्याश्रिते सत्त्वशुक्लसन्ध्यादिके गुणः ॥ श्रेष्ठेऽधिपे ग्रामणीः स्याज्जुगुप्साकरुणे घृणे ॥ १० ॥ तृषा स्पृहापिपासे द्वे विपणिः स्याद्वणिक्पथे ॥ विषाभिमरलोहेषु तीक्ष्णं क्लीबे स्वरे त्रिषु ॥ ११ ॥ प्रमाणं हेतुमर्य्यादाशास्त्रेयत्ताप्रमातृषु ॥ करणं क्षेत्रगात्रादावीरिणं शून्यमूषरम् ॥ १२ ॥ यन्ता हस्तिपके सूते वह्निज्वाला च हेतयः ॥ श्रुतं शास्त्रावभृतयोर्युगपर्य्यन्तयोः कृतम् ॥ १३ ॥ ख्याते दृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ॥ विविक्तौ पूतविजनौ मूर्च्छितौ मूढसोच्छ्रयौ ॥ १४ ॥ अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ॥ निदानागमयोस्तीर्थमृषिजुष्टजले गुरौ ॥ १५ ॥ प्राधान्ये राजलिङ्गे च वृषांगे ककुदोऽस्त्रियाम् ॥ स्त्री संविज्ज्ञानसम्भाषाक्रियाकाराजिनासु ॥ ॥ १६ ॥ धर्मे रहस्युपनिषत्स्यादृतौ वत्सरे शरत् ॥ पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ॥ १७ ॥ त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ॥ सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ॥ १८ ॥ विधिर्विधाने दैवेऽपि प्राणिधिः प्रार्थने चरे ॥ वधूर्जाया स्नुषा स्त्री च सुधालेपोऽमृतं स्नुही ॥ १९ ॥ स्पृहा सम्प्रत्ययः श्रद्धा पण्डितम्मन्यगर्वितौ ॥ ब्रह्मबन्धुरधिक्षेपे भानू रश्मिदिवाकरौ ॥ २० ॥ ग्रावाणौ शैलपाषाणौ मूर्खनीचौ पृथग्जनौ ॥ तरुशैलौ शिखरिणौ तनुस्त्वग्देहयोरपि ॥ २१ ॥ आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्त्म च ॥ उत्थानं पौरुषे तन्त्रे व्युत्थानं प्रतिरोधने ॥ २२ ॥ निर्य्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ॥ व्यसनं विपदि भ्रंशे दोषे कामजकोप-

पजे ॥२३॥ मृगयाक्षो दिवास्वप्नः पारुष्यं स्त्रियो मदः ॥ तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥२४॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ॥ वाग्दण्डश्चैव पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ २५ ॥ अकर्म्मगुह्ये कौपीनं मैथुनं सङ्गतौ रतौ ॥ प्रधानं परमार्थो धीः प्रज्ञानं बुद्धिचिह्नयोः ॥ २६ ॥ क्रन्दने रोदनाह्वाने वर्ष्म देहप्रमाणयोः ॥ आराधनं साधने स्यादवातौ तोषणेऽपि च ॥ २७ ॥ रत्नं स्वजातिश्रेष्ठेऽपि लक्ष्म चिह्नप्रधानयोः ॥ कलापो भूषणे बर्हे तूणीरे संहतेऽपि च ॥ २८ ॥ तल्पं शय्याट्टदारेषु डिम्भौ तु शिशुबालिशौ ॥ स्तम्भौ स्थूणाजडीभावौ सभ्ये संसदि वै सभा ॥ २९॥ किरणप्रग्रहौ रश्मी धर्म्मः पुण्ययमादयः ॥ ललामं पुच्छपुण्ड्राश्मभूषाप्राधान्यकेतुषु ॥ ३० ॥ प्रत्ययोऽभीत्रशपथज्ञानविश्वासहेतुषु ॥ समयाः शपथाचारकालसिद्धान्तसंविदः ॥ ३१ ॥ अत्ययोऽतिक्रमे कृच्छ्रे सत्यं शपथतथ्ययोः ॥ वीर्य्यं बलप्रभावौ च रूप्यं रूपे प्रशस्तके ॥ ३२ ॥ दूरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ महारण्ये दुर्गपथे कान्तारः पुन्नपुंसकम् ॥ ३३ ॥ यमानिलेन्द्रचन्द्रार्कविष्णुसिंहादिके हरिः ॥ दरोऽस्त्रियां भये श्वभ्रे जठरः कठिनेऽपि च ॥ ३४ ॥ उदारो दातृमहतोरित्तरस्त्वन्यनीचयोः ॥ चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ॥ ३५ ॥ बलिः करोपहारादौ सैन्यस्थैर्य्यादिके बलम् ॥ स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिषणेऽपि च ॥३६॥ शुक्लेऽर्जुनेऽर्पिके श्रेष्ठे सुकृते वृषभे वृषः ॥ द्यूताक्षे सारिफलकेऽप्याकर्षोऽथाऽक्षमिन्द्रिये ॥ ३७ ॥ ना द्यूताङ्गे च कर्षे च व्यवहारे कलिद्रुमे ॥ ऊर्णीषः स्यात्किरीटादौ कर्पूः कुल्याभिधायिनी ॥ ३८ ॥ प्रत्यक्षेऽधिकृतेऽध्यक्षः सूर्य्यवह्नी विभावसू ॥ शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ॥ ३९ ॥ तेजःपुरीषयोर्वर्चः आगः पापापराधयोः ॥ छन्दः पद्येऽभिलाषे च साधीयान्साधुबाढयोः ॥ व्यूहो वृन्देऽप्यहिर्वृत्रेऽप्यग्नीन्द्रार्कस्तमोनुदः ॥ ४० ॥ इत्यादिमहापुराणे आग्नेये शब्दकोशे नानार्थवर्गनिरूपणं नाम द्विषष्ट्यधिकात्रिशततमोऽध्यायः ॥ ३६२ ॥ अथ भूमिवनौषध्यादिवर्गाः ॥ अग्निरुवाच ॥ वक्ष्ये भूपुराद्रिवनौषधिसिंहादिवर्गकान् ॥ भूरनन्ता क्षमा धात्री क्ष्मा ज्या कुः स्याद्धरित्र्यपि ॥ १ ॥ मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ॥ जगत्त्रिविष्टपं लोको भुवनं जगती समा ॥ २ ॥ अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ॥ सरणिः पद्धतिः पद्या वर्त्तन्येकपदीति च ॥ ३ ॥ पूः स्त्री पुरीनगर्य्यौ वा पत्तनं पुटभेदनम् ॥ स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥ ४ ॥

तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ॥ आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ ५ ॥ रथ्या प्रतोली विशिखा स्याच्चयो वप्रम-
स्त्रियाम् ॥ प्राकारो वरणः शालः प्राचीरं प्रान्ततो वृतिः ॥ ६ ॥ भित्तिः स्त्री कुड्यमेडूकं यद्वन्तर्न्यस्तकीकसम् ॥ वासः कूटो द्वयोः
शाला सभा सभ्यवनान्त्विदम् ॥ ७ ॥ चतुःशालं मुनीनान्तु पर्णशालोटजोऽस्त्रियम् ॥ चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ॥ ८ ॥
हर्म्यादिर्धनिनां वासः प्रासादो देवभूभुजाम् ॥ स्त्री द्वाद्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥ ९ ॥ कपोतपालिकायान्तु विटङ्कं पुंनपुं-
सकम् ॥ कवाटमररं तुल्ये निःश्रेणिस्त्वधिरोहिणी ॥ १० ॥ सम्मार्जनी शोधनी स्यात्सङ्करोऽवकरस्तथा ॥ अद्रिगोव्रगिरिग्रावा गहनं
काननं वनम् ॥ ११ ॥ आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ॥ स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ १२ ॥ वीथ्यालिरावलिः
पङ्क्तिश्रेणीलेखास्तु राजयः ॥ वानस्पत्यः फलैः पुष्पात्तरपुष्पाद्वनस्पतिः ॥ १३ ॥ ओषध्यः फलपाकान्ताः पलाशी द्रुद्रुममाः ॥
स्थाणुर्वा ना ध्रुवः शङ्कुः प्रफुल्लोत्फुल्लसंस्फुटाः ॥ १४ ॥ पलाशं छदनं पर्णमिध्ममेधः समित्स्त्रियाम् ॥ बोधिद्रुमश्चलदलो दन्त्यग्राहि-
मन्मथाः ॥ १५ ॥ तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ॥ उदुम्बरे हेमदुग्धः कोविदारे द्विपत्रकः ॥ १६ ॥ सनपर्णो विशालत्वक्कु-
तमालं सुवर्णकः ॥ आरेवतव्याधिघातशम्याकचतुरङ्गुलाः ॥ १७ ॥ स्याज्जम्बीरे दन्तशठो वरुणे तिक्तशाकः ॥ पुन्नागे पुरुषद्रुमः
केसरो देववल्लभः ॥ १८ ॥ पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥ वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ॥ १९ ॥ आम्रातके मधूके
तु गुडपुष्पमधुद्रुमौ ॥ पीलौ गुडफलः स्रंसी नादेयी चाम्बुवेतसः ॥ २० ॥ शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीरशोचकाः ॥ रक्तोऽसौ
मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ॥ २१ ॥ गालवः शाबरो लोध्रस्तिरीटस्तिलमार्जनौ ॥ शेलुः श्लेष्मातकः शीत उद्दालो बहुवार-
कः ॥ २२ ॥ वैकङ्कतः सुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ तिन्दुकः स्फूर्जकः कालो नादेयी भूमिजम्बुकः ॥ २३ ॥ काकतिन्दौ
पीलुकः स्यात्पाटलिर्मोक्षमुष्ककौ ॥ क्रमुकः पट्टिकाख्यः स्यान्कुम्भी कैडर्य्यकट्फले ॥ २४ ॥ वीरवृक्षोऽरुष्करोऽग्निमुखी भल्ला-
तकी त्रिषु ॥ सर्जकासनजीवाश्च पीतसालेऽथ मालके ॥ २५ ॥ सर्जाश्वकर्णौ वीरेन्द्रौ इन्द्रद्रुः ककुभोऽर्जुनः ॥ इङ्गुदी तापसतरुर्मोचा
शाल्मलिरेव च ॥ २६ ॥ चिरबिल्वो नक्तमालः करजश्च करञ्जके ॥ प्रकीर्य्यः पूतिकरजो मर्कश्चक्षारवल्लरी ॥ २७ ॥ रोही रोहितकः

ग्रीहशत्रुर्दोंडमपुष्पकः ॥ गायत्री बालतनयः खदिरो दन्तधावनः ॥ २८ ॥ अरिमेदो विट्खदिरे कदरः खदिरे सिते ॥ पञ्चाङ्गुलो
वर्धमानश्चञ्चुगन्धर्वहस्तकः ॥ २९ ॥ पिण्डीतको मरुवकः पीतदारु च दारु च ॥ देवदारुः पूतिकाष्ठं श्यामा तु महिलाह्वया ॥ ३० ॥
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥ मण्डूकपर्णपत्रोर्णनटकब्रह्मदण्डकाः ॥ ३१ ॥ श्येनांकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ॥
पीतद्रुः सरलश्चाथ निचुलोऽम्बुज इज्जलः ॥३२॥ काकोदुम्बरिका फल्गुररिष्टः पिचुमर्दकः ॥ सर्वतोभद्रको निम्बे शिरीषस्तु कपीतनः
॥ ३३ ॥ वकुलो वञ्जुलः प्रोक्तः पिच्छिलाऽमुरुशिंशपाः ॥ जया जयन्ती तर्कारी कणिका गणिकारिका ॥ ३४ ॥ श्रीपर्णमग्निमन्थः
स्याद्वत्सको गिरिमल्लिका ॥ कालस्कन्दस्तमालः स्यात्तण्डुलीयोऽल्पमारिषः ॥ ३५ ॥ सिन्धुवारस्तु निर्गुण्डी सैवास्फोटा वनो-
द्भवा ॥ गणिका यूथिकाम्बष्ठा मल्लिका नवमालिका ॥ ३६ ॥ अतिमुक्तः पुण्ड्रकः स्यात्कुमारी तरणिः सहा ॥ तत्र शोणे कुरुवक-
स्तत्र पीते कुरुण्टकः ॥ ३७ ॥ नीली झिण्टी द्वयोर्वीणा झिण्टी सैरीयकस्तथा ॥ तस्मिन्नक्ते कुरुवकः पीते सहचरी द्वयोः ॥ ३८ ॥
धुस्तूरः कितवो धूर्तो रुचको मातुलुङ्गके ॥ समीरणो मरुवकः प्रस्थपुष्पः फणिर्जकः ॥ ३९ ॥ कुठेरकस्तु पर्णासेऽस्थास्फीतो
वसुकार्कके ॥ शिवमल्ली पाशुपतो वृन्दा वृक्षादनी तथा ॥ ४० ॥ जीवन्तिकां वृक्षरुहा गुडूची तन्त्रिकाऽमृता ॥ सोमवल्ली मधुपर्णी
मुरा तु मोरटी तथा ॥ ४१ ॥ मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥ पाठाऽम्बष्ठा विद्धकर्णी प्राचीना वनतिक्तिका ॥ ४२ ॥ कट्टः
कट्टम्भरा चाथ चक्रांगी शकुलादनी ॥ आत्मगुप्ता प्रावृषायी कपिकच्छूश्च मर्कटी ॥ ४३ ॥ अपामार्गः शैखरिकः प्रत्यक्पर्णी मयूरकः ॥
फञ्जिका ब्राह्मणी भार्गी द्रवन्ती शम्बरी वृषा ॥ ४४ ॥ मण्डूकपर्णी भण्डीरी समङ्गा कालमेषिका ॥ गोदन्ती कच्छुराऽनन्ता समु-
द्रान्ता दुरालभा ॥ ४५ ॥ पृश्निपर्णी पृथक्पर्णी कलशिर्वाविनिर्गुडा ॥ निदिग्धिका स्पृशी व्याघ्री क्षुद्रा दुःस्पर्शया सह ॥ ४६ ॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥ कालमेषी कृष्णफला वाकुची पूतिफल्यऽपि ॥ ४७ ॥ कणोषगोपकुल्या स्याच्छ्रेयसी
गजपिप्पली ॥ चव्यन्तु चविका काकचिञ्ची गुञ्जे तु कृष्णला ॥ ४८ ॥ विश्वा विषा प्रतिविषा वनशृङ्गाटगोक्षुरौ ॥ नारायणी शत-
मूली कालेयकहरीद्रवः ॥ ४९ ॥ दार्वी पचम्पचा दारु शुक्ला हैमवती वचा ॥ वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥ ५० ॥

आस्फोता गिरिकर्णी स्यात्सिंहास्यो वासको वृषः ॥ मिशी मधुरिकाच्छत्रा कोकिलाक्षेक्षुरः क्षुस ॥ ५१ ॥ विडङ्गोऽस्त्री कृमिघ्नः स्यद्व-
ह्वस्तुक्स्तुही सुधा ॥ मृद्वीका गोस्तनी द्राक्षा बला वाट्यालकस्तथा ॥ ५२ ॥ काला मसूरविदला त्रिपुटा त्रिवृता त्रिवृत् ॥
मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ॥ ५३ ॥ विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्टी च या सिता ॥ गोपी श्यामा शारिवा स्यादनन्तो-
त्पलशारिवा ॥ ५४ ॥ मोचा रम्भा च कदली भण्डाकी दुष्प्रधर्षिणी ॥ स्थिरगन्धा सालपर्णी शृङ्गी तु वृषभो वृषः ॥ ५५ ॥
गाङ्गेरुकी नागबला मुसली तालमूलिका ॥ ज्योत्स्नी पटोलिका जाली अजशृङ्गी विषाणिका ॥ ५६ ॥ स्यात्लाङ्गलिक्यग्निशिखा
ताम्बूली नागवल्ल्यपि ॥ हरेणू रेणुका कौन्ती हीबेरी दिव्यनागरम् ॥ ५७ ॥ कालानुसार्यवृद्धाश्मपुष्पशीताशिवानि
तु ॥ शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा ॥ ५८ ॥ ग्रन्थिपर्णं शुकं वर्हि बला तु त्रिपुटा त्रुटिः ॥ शिवा नाम-
लकी चाथ हनुर्हट्टविलासिनी ॥ ५९ ॥ कुटं नटं दशपुरं वानेयं परिपेलवम् ॥ तपस्विनी जटामांसी पृक्का देवी लता लशुः
॥ ६० ॥ कर्बुरको द्राविडको गन्धमूली शठी स्मृता ॥ स्यादक्षगन्धा छगलान्त्रा वेगी वृद्धदारकः ॥ ६१ ॥ तुण्डिकेरी रक्तफला
बिम्बिका पीलुपर्ण्यपि ॥ चाङ्गेरी चक्रिकाम्लष्ठा स्वर्णक्षीरी हिमावती ॥ ६२ ॥ सहस्रवेधो चुक्रोम्लवेतसः शतवेध्यपि ॥ जीवन्ती
जीवनी जीवा भूमिनिम्बः किरातकः ॥ ६३ ॥ कूर्चशीर्षो मधुकरश्चन्द्रः कपिवृकस्तथा ॥ दद्रुघ्नः स्यादेडगजो वर्षाभूः शोथहारिणी
॥ ६४ ॥ कुनन्दती निकुम्भघ्ना यमानी वार्षिका तथा ॥ लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥ ६५ ॥ वाराही वरदा गृष्टिः काकमाची
तु वायसी ॥ शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः ॥ ६६ ॥ अजाक्षुपी कारवी च सरणा तु प्रसारणी ॥ कटम्भरा भद्रबला
कर्बुरश्च शटी ह्यथ ॥ ६७ ॥ पटोलः कुलकस्तिक्तः कारवेल्लः कटिल्लकः ॥ कूष्माण्डकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियो ॥ ६८ ॥
इक्ष्वाकुः कटुतुम्बी स्या द्विशाला त्विन्द्रवारुणी ॥ अशोघ्नः सूरणः कन्दो मुस्तकः कुहविन्दकः ॥ ६९ ॥ वंशे त्वक्सारकर्मारवेणुम-
स्करतेजनाः ॥ छत्रातिच्छत्रपालघ्नो मालातृणकभूस्तृणे ॥ ७० ॥ तृणराजाह्वयस्तालो घोण्टा क्रमुकपूगकौ ॥ शार्दूलद्वीपिनौ व्याघ्रो
हर्य्यक्षः केसरी हरिः ॥ ७१ ॥ कोलः पोत्री वराहः स्यात्कोक ईहामृगो वृकः ॥ लूतोर्णनाभौ तु समौ तन्तुवायश्च मर्कटे ॥ ७२ ॥

वृश्चिकः शूककीटः स्यात्सारङ्गस्तोककौ समौ ॥ कृकवाकुस्ताम्रचूडः पिकः कोकिल इत्यपि ॥ ७३ ॥ काके तु करटारिष्टौ बकः कह्व उदाहृतः ॥ कोकश्चक्रश्चक्रवाको कादम्बः कलहंसकः ॥ ७४ ॥ पतङ्गिका पुत्तिका स्यात्सरघा मधुमक्षिका ॥ द्विरेफपुष्पलिड्-भृङ्गषट्पदभ्रमरालयः ॥ ७५ ॥ केकी शिख्यस्य वाक्केका शकुन्तिशकुनिद्विजाः ॥ स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ ७६ ॥ गतिरुड्डीनसण्डीनौ कुलायो नीडमस्त्रियाम् ॥ पेशी कोशो द्विहीनेऽण्डं पृथुकः शावकः शिशुः ॥ ७७ ॥ पोतः पाकोऽर्भको डिम्भः शब्दोहव्यूहकौ गणः ॥ स्तोमौघनिकरव्राता निकुरम्बं कदम्बकम् ॥ सङ्घातसञ्चयौ वृन्दं पुञ्जराशी तु कूटकम् ॥ ७८ ॥ इत्या-दिमहापुराणे आग्नेये शब्दकोशे भूम्यादिवर्गनिरूपणं नाम त्रिषष्टयधिकत्रिशततमोऽध्यायः ॥ ३६३ ॥ अथ मनुष्यवर्गः ॥ अग्निरुवाच ॥ नृब्रह्मक्षत्रविट्शूद्रवर्गान्वक्ष्येऽथ नामतः ॥ नरः पञ्चजना मर्त्या योषिद्योषाऽबला वधूः ॥ १ ॥ कान्तार्थिनी तु या याति सङ्केतं साऽ-भिसारिका ॥ कुलटा पुंश्चल्यसती नग्निका स्त्री च कोटवी ॥ २ ॥ कात्यायन्यर्धवृद्धा या सैरिन्ध्री परवेश्मगा ॥ असिक्नी स्यादवृद्धा या मालिनी तु रजस्वला ॥ ३ ॥ वारस्त्री गणिका वेश्या भ्रातृजायास्तु यातरः ॥ ननन्दा तु स्वसा पत्युः सपिण्डास्तु सनाभयः ॥ ४ ॥ समानोदर्य्यसोदर्य्यसगर्भ्यसहजाः समाः ॥ सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ५ ॥ दम्पती जम्पती भार्य्यापती जायापती च तौ ॥ गर्भाशयो जरायुः स्यादुल्बञ्च कललोऽस्त्रियाम् ॥ ६ ॥ गर्भो भ्रूण इमौ तुल्यौ क्लीबं षण्ढो नपुंसकम् ॥ स्यादुत्तानशयो डिम्भो बालो माणवकः स्मृतः ॥ ७ ॥ पिचण्डिलो बृहत्कुक्षिरभ्रटो नतनासिके ॥ विकलाङ्गस्तु पौगण्ड आरोग्यं स्यादनामयम् ॥ ८ ॥ स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः ॥ क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः ॥ ९ ॥ स्त्री क्षुत्क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् ॥ शोथस्तु श्वयथुः शोफः पादस्फोटो विपादिका ॥ १० ॥ किलाससिध्मे कच्छ्वान्तु पाम पामा विचर्चिका ॥ कोठो मण्डलक कुष्ठं श्वित्रं दुर्नामकार्शसी ॥ ११ ॥ आनाहस्तु निबन्धः स्याद्ग्रहणी रुक्प्रवाहिका ॥ बीजवीर्य्येन्द्रियं शुक्रं पललं क्रव्यमा-मिषम् ॥ १२ ॥ वृक्काऽग्र्यमांसं हृदयं हृन्मेदस्तु वपा वसा ॥ पश्चाद्ग्रीवा सिरा मन्या नाडी तु धमनिः शिरा ॥ १३ ॥ तिलकं क्लोम मस्तिष्कं दूषिका नेत्रयोर्मलम् ॥ अन्त्रं पुरीतद्वृक्षस्तु प्लीहा पुंस्यऽथ वस्रसा ॥ १४ ॥ स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥

स्यात्कर्पूरः कपालोऽस्त्री कीकसङ्कुत्यमस्थि च ॥ १५ ॥ स्याच्छरीरास्थि कङ्कालः पृष्टास्थि तु कशेरुकम् ॥ शिरोऽस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका ॥ १६ ॥ अङ्गं प्रतीकोऽवयवः शरीरं वर्ष्म विग्रहः ॥ कटौ ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती ॥ ॥ १७ ॥ पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः ॥ कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ॥ १८ ॥ स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ॥ भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसी ॥ १९ ॥ पिचिण्डकुक्षी जठरोदरं तुन्दं कुचौ स्तनौ ॥ चूचुकन्तु कुचाग्रं स्यान्नना क्रोडं भुजान्तरम् ॥ २० ॥ स्कन्धो भुजशिरोंसोस्त्री सन्धी तस्यैव जत्रुणी ॥ पुनर्भवः कररुहो नखोस्त्री नखरो स्त्रियाम् ॥ २१ ॥ प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ॥ २२ ॥ पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ बद्धमुष्टिकरोऽरत्निररत्निः स कनिष्ठवान् ॥ २३ ॥ कम्बुग्रीवा त्रिरेखा साऽवटुर्घाटा कृकाटिका ॥ अधः स्याच्चिबुकञ्चोष्ठादथ गण्डौ गलो हनुः ॥ २४ ॥ अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ॥ चिकुरः कुन्तलो वालः प्रतिकर्म प्रसाधनम् ॥ २५ ॥ आकल्पवेषो नैपथ्यं प्रत्यक्षं खेलयोगजम् ॥ चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ २६ ॥ कर्णिका तालपत्रं स्याल्लम्बनं स्याल्लन्तिका ॥ मञ्जीरो नूपुरं पादे किङ्किणी क्षुद्रघण्टिका ॥ २७ ॥ दैर्घ्यमायाम आरोहः परिणाहो विशालता ॥ पटच्चरं जीर्णवस्त्रं संव्यानञ्चोत्तरीयकम् ॥ २८ ॥ रचना स्यात्परिस्पन्द आभोगः परिपूर्णता ॥ समुद्गकः सम्पुटकः प्रतिग्राहः पतद्ग्रहः ॥ २९ ॥

इत्यादिमहापुराणे आग्नेये मनुष्यवर्गवर्णनं नाम चतुःषट्यधिकत्रिशततमोऽध्यायः ॥ ३६४ ॥ अथ ब्रह्मवर्गः ॥ अग्निरुवाच ॥ वंशोऽन्ववायो गोत्रं स्यात्कुलान्यभिजनान्वयौ ॥ मन्त्रव्याख्याकृदाचार्य्य आदेष्टा त्वध्वरे व्रती ॥ १ ॥ यष्टा च यजमानः स्याज्ज्ञात्वारम्भ उपक्रमः ॥ सतीर्थ्याश्चैकगुरवः सभ्याः सामाजिकास्तथा ॥ २ ॥ सभासदः सभास्तारा ऋत्विजो याजकाश्च ते ॥ अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ॥ ३ ॥ चषालो यूपकटकः समे स्थण्डिलचत्वरे ॥ आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ॥ ४ ॥ पृषदाज्यं सदध्याज्ये परमान्नन्तु पायसम् ॥ उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ ५ ॥ परम्पराकं शमनं प्रोक्षणं च वधार्थकम् ॥ पूजा नमस्याऽपचितिः सपर्य्यार्चार्हणाः समाः ॥ ६ ॥ वरिवस्या तु शुश्रूषा परिचर्य्याप्युपासनम् ॥ नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ॥ ७ ॥ मुख्यः

स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः ॥ कल्पे विधिक्रमौ ज्ञेयौ विवेकः पृथगात्मता ॥८॥ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥
भिक्षुः परिव्राट् कर्मन्दी पाराशर्य्यपि मस्करी ॥ ९ ॥ ऋषयः सत्यवचसः स्नातकश्चाप्लुतो व्रती ॥ ये निर्जितेन्द्रियग्रामा यातिनो यतयश्च
ते ॥ १० ॥ शरीरसाधनापेक्षं नित्यं यत्कर्म यद्यमः ॥ नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ॥ स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्य-
मित्यपि ॥ ११ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मवर्गवर्णनं नाम पञ्चषष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६५ ॥ अथ क्षत्राविट्शूद्रवर्गाः ॥
अग्निरुवाच ॥ मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ॥ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥ १ ॥ चक्रवर्त्ती सार्व-
भौमो नृपोऽन्यो मण्डलेश्वरः ॥ मन्त्री धीसचिवोऽमात्यो महामन्त्राः प्रधानकाः ॥ २ ॥ द्रष्टरि व्यवहाराणां प्राड्विवाकोऽक्षदर्शकौ ॥
भौरिकः कनकाध्यक्षोऽथाध्यक्षाधिकृतौ समौ ॥ ३ ॥ अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ॥ सौविदल्लाः कञ्चुकिनः स्थापत्याः
सौविदाश्च ते ॥ ४ ॥ षण्डो वर्षवरस्तुल्याः सेवकार्थ्यनुजीविनः ॥ विषयानन्तरो राजा शत्रुर्मित्रमतः परम् ॥ ५ ॥ उदासीनः पर-
तरः पार्ष्णिग्राहस्तु पृष्ठतः ॥ चरः स्पशः स्यात्प्रणिधिरुत्तरः काल आयतिः ॥ ६ ॥ तत्कालस्तु तदात्वं स्यादुदर्कः फलमुत्तरम् ॥
अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम् ॥ ७ ॥ भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ॥ प्रभिन्नो गर्जितो मत्तो वमथुः कर-
शीकरः ॥ ८ ॥ स्त्रियां सृणिस्त्वंकुशोऽस्त्री परिस्तोमः कुथो द्वयोः ॥ कर्णीरथः प्रवहणं दोला प्रेङ्खादिका स्त्रियाम् ॥ ९ ॥ आधो-
रणा हस्तिपका हस्त्यारोहा निषादिनः ॥ भटा योधाश्च योद्धारः कञ्चुको वारणोऽस्त्रियाम् ॥ १० ॥ शीर्षण्यं च शिरस्त्रेऽथ तनुत्रं वर्म्म-
दंशनम् ॥ आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ॥ ११ ॥ व्यूहस्तु बलविन्यासश्चक्रञ्चानीकमस्त्रियाम् ॥ एकेभैकरथा त्र्यश्वा
पत्तिः पञ्चपदातिका ॥ १२ ॥ पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ॥ १३ ॥
अनीकिनीदशानीकिन्यक्षौहिण्यो गजादिभिः ॥ धनुः कोदण्ड इष्वासो कोटिरस्याटनी स्मृता ॥ १४ ॥ लस्तकस्तु धनुर्मध्यं मौर्वी
ज्या शिञ्जिनी गुणः ॥ पृषत्कबाणविशिखा अजिह्मगस्वगाशुगाः ॥ १५ ॥ तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥ असिर्ऋष्टिश्च
निस्त्रिंशः करवालः कृपाणवत् ॥ १६ ॥ त्सरुः खड्गस्य मुष्टिः स्यादीलिः तु करपालिका ॥ द्वयोः कुठारः स्वधितिः छुरिका चासि-

पुत्रिका ॥ १७ ॥ प्रासस्तु कुन्तो विज्ञेयः सर्वला तोमरोऽस्त्रियाम् ॥ वैतालिका बोधकरा मागधा बन्दिनस्तुतौ ॥ १८ ॥ संश-
प्तकास्तु समयात्सङ्ग्रामादनिवर्त्तिनः ॥ पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ॥१९॥ अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ॥
अहमहमिका सा स्याद्योऽहङ्कारः परम्परम् ॥२०॥ शक्तिः पराक्रमः प्राणः शौर्य्यं स्थानसहो बलम् ॥ मूर्च्छा तु कश्मलं मोहोऽप्यवमर्दस्तु
पीडनम् ॥ २१ ॥ अभ्यवस्कन्दनस्त्वभ्यासादनं विजयो जयः ॥ निर्वासनं संज्ञपनं मारणं प्रतिघातनम् ॥ २२ ॥ स्यात्पञ्चता काल-
धर्मो दिष्टान्तः प्रलयोऽत्ययः ॥ विशो भूमिस्पृशो वैश्या वृत्तिर्वर्त्तनजीवने ॥ २३ ॥ कृष्यादिवृतयो ज्ञेयाः कुसीदं वृद्धिजीविका ॥
उद्धारोऽर्थप्रयोगः स्यात्कणिशं सस्यमञ्जरी ॥ २४ ॥ किंशारुः सस्यशूकं स्यात्स्तम्बो गुत्सस्तृणादिनः ॥ धान्यं व्रीहिः स्तम्बकरिः
कडङ्गरो बुसं स्मृतम् ॥ २५ ॥ मापादयः शमीधान्ये शूकधान्ये यवादयः ॥ तृणधान्यानि नीवाराः शूर्पं प्रस्फोटनं स्मृतम् ॥
॥ २६ ॥ स्यूतप्रसेवौ कण्डोलपिटौ कटकिलिञ्जकौ ॥ समानौ रसवत्यान्तु पाकस्थानमहानसे ॥ २७ ॥ पौरोगवस्तदध्यक्षः सूपका-
रास्तु बल्लवाः ॥ आरालिका आन्धसिकाः सूदा औदनिका गुणाः ॥ २८ ॥ क्लीबेऽम्बरीषं भ्राष्ट्रो ना कर्कर्य्यालूर्गलन्तिका ॥ आलि-
ञ्जरः स्यान्माणिकं सुषवी कृष्णजीरके ॥ २९ ॥ आरनालस्तु कुल्माषं बाह्लीकं हिङ्गु रामठम् ॥ निशा हरिद्रा पीता स्त्री खण्डे मत्स्य-
ण्डिकाणिते ॥ ३० ॥ कूर्चिका क्षीरविकृतिः स्निग्धं मसृणचिक्कणम् ॥ पृथुकः स्याच्चिपिटको धाना भ्रष्टयवाः स्त्रियाम् ॥ ३१ ॥
जेमनं लेप आहारो माहेयी सौरभी च गौः ॥ युगादीनां च वोढारो युग्यप्रासङ्ग्यशाकटाः ॥ ३२ ॥ चिरसूता बष्कयणी धेनुः स्यान्न-
वसूतिका ॥ सन्धिनी वृषभाक्रान्ता वेहद्गर्भोपघातिनी ॥ ३३ ॥ पण्याजीवो ह्यापणिको न्यासश्चोपनिधिः पुमान् ॥ विपणौ विक्रयः
सङ्ख्या सङ्ख्येये ह्यादश त्रिषु ॥ ३४ ॥ विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ संख्यार्थे द्विबहुत्वे स्तस्तासु चा नवतेः
स्त्रियः ॥ ३५ ॥ पङ्क्तेः शतसहस्राद्दि क्रमाद्दशगुणोत्तरम् ॥ मानन्तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥ ३६ ॥ ते षोडशाक्षः
कर्षोऽस्त्री पलं कर्षचतुष्टयम् ॥ सुवर्णबिस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ॥ ३७ ॥ तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ॥
कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः ॥३८॥ द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ॥ रीतिः स्त्रियामारकूटो न स्त्रियामथ

ताम्रकम् ॥ ३९ ॥ शुल्बमौदुम्बरं लौहे तीक्ष्णं कालायसायसी ॥ क्षारः काचोऽथ चपलो रसः सूतश्च पारदे ॥ ४० ॥ गरलं माहिषं शृङ्गं त्रपु सीसकपिच्चटम् ॥ डिण्डीरोऽब्धिकफः फेनो मधूच्छिष्टन्तु सिक्थकम् ॥ ४१ ॥ रङ्गवङ्गे पिचुस्थूलो कूलटी तु मनःशिला ॥ यवक्षारश्च पाक्यः स्यात्त्वक्क्षीरा वंशलोचना ॥ ४२ ॥ वृषला जघन्यजाः शूद्राश्चाण्डालान्त्याश्च सङ्करा: ॥ कारुः शिल्पी संहतैस्तै-र्द्वयोः श्रेणिः सजातिभिः ॥ ४३ ॥ रङ्गाजीवश्चित्रकरस्त्वष्टा तक्षा च वर्धकिः ॥ नाडिन्धमः स्वर्णकारो नापितान्तावसायिनः ॥ ॥ ४४ ॥ जाबालः स्यादजाजीवो देवाजीवस्तु देवलः ॥ जायाजीवास्तु शैलूषा भृतको भृतिभुक् तथा ॥ ४५ ॥ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ॥ विहीनोपशदो जाल्मो भृत्ये दासेरचेटकाः ॥ ४६ ॥ पटुस्तु पेशलो दक्षो मृगयुर्लुब्धकः स्मृतः ॥ चाण्डालस्तु दिवाकीर्त्तिः पुस्तं लेप्यादिकर्माणि ॥ ४७ ॥ पञ्चालिका पुत्रिका स्याद्धर्करस्तरुणः पशुः ॥ मञ्जूषा पेटकः पेटा तुल्यसाधारणो समौ ॥ प्रतिमा स्यात्प्रतिकृतिर्वर्गा ब्रह्मादयः स्मृताः ॥ ४८ ॥ इत्यादिमहापुराणे आग्नेये क्षत्रविट्शूद्रवर्ग-वर्णनं नाम षट्षष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६६ ॥ अथ सामान्यनामलिङ्गानि ॥ अग्निरुवाच ॥ सामान्यान्यथ वक्ष्याग्नि नामलिङ्गानि तच्छृणु ॥ सुकृती पुण्यवान् धन्यो महेच्छस्तु महाशयः ॥ १ ॥ प्रवीणंनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ॥ स्युर्वदान्यंस्थूललक्ष-दानशौण्डा बहुप्रदे ॥ २ ॥ कृती कृतज्ञः कुशल आसक्तोद्युक्त उत्सुकः ॥ इभ्य आढ्यः परिवृढो ह्यधिभूर्नायकोऽधिपः ॥ ३ ॥ लक्ष्मीवाँल्लक्ष्मणः श्रीलः स्वतन्त्रःस्वैर्य्यपावृतः ॥ खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः ॥ ४ ॥ जाल्मोऽसमीक्ष्यकारी स्यात्कु-ण्ठो मन्दः क्रियासु यः ॥ कर्मशूरः कर्मठः स्याद्दक्षको घस्मरोऽग्रणीः ॥ ५ ॥ लोलुपो गर्धलो गृध्नुर्विनीतप्रश्रितौ तथा ॥ धृष्टे धृष्णुर्वि-यातश्च निभृतः प्रविभान्विते ॥ ६ ॥ प्रगल्भो भीरुको भीरुर्वन्दारुरभिवादके ॥ भूष्णुर्भविष्णुर्भविता ज्ञाता विदुरविन्दकौ ॥ ७ ॥ ॥ मत्तशौण्डोत्कटक्षीबाश्चण्डस्त्वत्यन्तकोपनः ॥ देवानञ्चतिं देवद्रयङ् विष्वद्यङ्विष्वगञ्चति ॥ ८ ॥ यः सहाञ्चति सध्र्यङ् स स तिर्य्यङ् यस्तिरोऽञ्चति ॥ वाचोयुक्तिपटुर्वाग्मी वावदूकोतिवक्तरि ॥९॥ स्याज्जल्पाकस्तु वाचाटो वाचाटो बहुर्गह्यवाक् ॥ अपध्वस्तो धिक्कृतः स्याद्बद्धेकीलितसंयतौ ॥१०॥ वरेण्यः शब्दनो नान्दीवादी नान्दीकरः समाः ॥ व्यसनार्त्तोपरक्तौ द्वौ बद्धे कीलितसंयतौ ॥ ११ ॥

विहस्तव्याकुलो तुल्यो नृशंसक्रूरघातुकाः ॥ पापो धूर्त्तो वञ्चकः स्यान्मूर्खे वेधेयबालिशौ ॥ १२ ॥ कदर्य्ये कृपणक्षुद्रौ मार्गणो याचकार्थिनौ ॥ अहङ्कारवानहंयुः स्याच्छुभंयुस्तु शुभान्वितः ॥ १३ ॥ कान्तं मनोरमं रुच्यं हृद्याभीष्टे ह्यभीप्सिते ॥ असारं फल्गु शून्यं वै मुख्यवर्य्यवरेण्यकाः ॥ १४ ॥ श्रेयान्श्रेष्ठः पुष्कलः स्यात्राग्र्याग्र्यार्ग्रियमग्रियम् ॥ वड्रोरु विपुलं पीनपीन्नी तु स्थूलपीवरे ॥ १५ ॥ स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ॥ मात्राकुटीलवकणा भूयिष्ठं पुरुहं पुरु ॥ १६ ॥ अखंडं पूर्णसकलमुपकण्ठान्तिकाभितः ॥ समीपे सन्निधाभ्यासौ नेदिष्ठं सुसमीपकम् ॥ १७ ॥ सुदूरे तु दविष्ठं स्याद्वृत्तं निस्तलवर्तुले ॥ उच्चैरांशूच्चतोदग्रा ध्रुवो नित्यः सनातनः ॥ १८ ॥ आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ चञ्चलं तरलञ्चैव कठोरं जरठं दृढम् ॥ १९ ॥ प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ एकतानोऽनन्यवृत्तिरुच्चण्डमविलम्बितम् ॥ २० ॥ उच्चावचं नैकभेदं सम्बाधकाकिलं तथा ॥ तिमितं स्तिमितं क्लिन्नमभियोगस्त्वभिग्रहः ॥ २१ ॥ स्फातिर्वृद्धौ प्रथा ख्यातौ समाहारः समुच्चयः ॥ अपहारस्त्वपचयो विहारस्तु परिक्रमः ॥ २२ ॥ प्रत्याहार उपादानं निर्हारोऽभ्यवकर्षणम् ॥ विघ्नोऽन्तरायः प्रत्यूहः स्यादास्याद्वासना स्थितिः ॥ २३ ॥ सन्निधिः सन्निकर्षः स्यात्संक्रमो दुर्गसञ्चरः ॥ उपलम्भस्त्वनुभवः प्रत्यादेशो निराकृतिः ॥ २४ ॥ परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ अनुमा पक्षहेत्वोर्द्विम्बे भ्रमरविप्लवौ ॥ २५ ॥ असन्निकृष्टार्थज्ञानं शब्दाद्धि शाब्दमीरितम् ॥ सादृश्यदर्शनात्तुल्ये बुद्धिः स्यादुपमानकम् ॥ २६ ॥ कार्य्यं दृष्ट्वा विना न स्यादर्थापत्तिः परार्थधीः ॥ प्रतियोगिन्यगृहीते भुवि नास्तीत्यभावकः ॥ इत्यादिनानलिङ्गो हि हरिरुक्तो नृबुद्धये ॥ २७ ॥ इत्यादिमहापुराणे आग्नेये सामान्यनामलिङ्गवर्णनं नाम सप्तषष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६७ ॥ अथ नित्यनैमित्तिकप्राकृतप्रलयाः ॥ अग्निरुवाच ॥ चतुर्विधस्तु प्रलयो नित्यो यः प्राणिनां लयः ॥ सदा विनाशो जातानां ब्राह्मो नैमित्तिको लयः ॥ १ ॥ चतुर्युगसहस्रान्ते प्राकृतः प्राकृतो लयः ॥ लय आत्यन्तिको ज्ञानादात्मनः परमात्मनि ॥ २ ॥ नैमित्तिकस्य कल्पान्ते वक्ष्ये रूपं लयस्य ते ॥ चतुर्युगसहस्रान्ते क्षीणप्राये महीतले ॥ ३ ॥ अनावृष्टिरतीवोग्रा जायते शतवार्षिकी ॥ ततः सत्त्वक्षयः स्याच्च ततो विष्णुर्जगत्पतिः ॥ ४ ॥ स्थितो जलानि पिबति भानोः सप्तसु रश्मिषु ॥ भूपातालसमुद्रादितोयं नयति संक्षयम् ॥ ५ ॥ ततस्तस्यानुभावेन तोयाहारोपबृंहिताः ॥

त एव रश्मयः सप्त जायन्ते सप्त भास्कराः ॥ ६ ॥ दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विज ॥ कूर्मपृष्ठसमा भूः स्यात्ततः कालाग्निरुद्रकः ॥ ७ ॥ शेषाहिश्वाससम्पातात्पातालानि दहत्यधः ॥ पातालेभ्यो भुवं विष्णुर्भुवः स्वर्गं दहत्यतः ॥ ८ ॥ अम्बरीषमिवाभाति त्रैलोक्यमखिलं तथा ॥ ततस्तापपरीतास्तु लोकद्वयनिवासिनः ॥ ९ ॥ गच्छन्ति ते जनलोकं महर्लोकाज्जनं ततः ॥ रुद्ररूपी जगद्दग्ध्वा मुखनिःश्वासतो हरेः ॥ १० ॥ उत्तिष्ठन्ति ततो मेघा नानारूपाः सविद्युतः ॥ शतं वर्षाणि वर्षन्तः शमयन्त्यग्निमुत्थितम् ॥ ११ ॥ सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि शतं मरुत् ॥ मुखनिःश्वासतो विष्णोर्नाशं नयति तान्घनान् ॥ १२ ॥ वायुं पीत्वा हरिः शेषे शेते चैकार्णवे प्रभुः ॥ ब्रह्मरूपधरः सिद्धैर्जलगैर्मुनिभिः स्तुतः ॥ १३ ॥ आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः ॥ आत्मानं वासुदेवाख्यं चिन्तयन्मधुसूदनः ॥ १४ ॥ कल्पं शेते प्रबुद्धोऽथ ब्रह्मरूपी सृजत्यजः ॥ द्विपरार्धं ततोऽव्यक्तं प्रकृतौ लीयते द्विज ॥ १५ ॥ स्थानात्स्थानं दशगुणमेकस्माद्गुण्यते स्थले ॥ ततोऽष्टादशके भागे परार्धमभिधीयते ॥ १६ ॥ परार्धं द्विगुणं यत्तु प्राकृतः प्रलयः स्मृतः ॥ अनावृष्ट्याऽग्निसम्पर्कात्कृते संज्वलने द्विज ॥ १७ ॥ महदादेर्विकारस्य विशेषान्तस्य संक्षये ॥ कृष्णेच्छाकारिते तस्मिन्सम्प्राप्ते प्रतिसञ्चरे ॥ १८ ॥ आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धादिकं गुणम् ॥ आत्मगन्धात्ततो भूमिः प्रलयत्वाय कल्पते ॥ १९ ॥ रसात्मिकाश्च तिष्ठन्ति ह्यापस्तासां रसो गुणः ॥ पीयते ज्योतिषा तासु नष्टास्वग्निश्च दीप्यते ॥ २० ॥ ज्योतिषोऽपि गुणं रूपं वायुर्ग्रसति भास्करम् ॥ नष्टे ज्योतिषि वायुश्च बली दोधूयते महान् ॥ २१ ॥ वायोरपि गुणं स्पर्शमाकाशं ग्रसते ततः ॥ वायौ नष्टे तु चाकाशं नीरवं निष्ठति द्विज ॥ २२ ॥ आकाशस्याथ वै शब्दं भूतादिर्ग्रसते च खम् ॥ अभिमानात्मकं खञ्च भूतादिर्ग्रसते महान् ॥ २३ ॥ भूमिर्याति लयं चाप्सु आपो ज्योतिषि तद्व्रजेत् ॥ वायौ वायुश्च खे खञ्च अहङ्कारे लयं स च ॥ २४ ॥ महत्तत्त्वे महान्तश्च प्रकृतिर्ग्रसते द्विज ॥ व्यक्ताऽव्यक्ता च प्रकृतिर्व्यक्तस्याव्यक्तके लयः ॥ २५ ॥ पुमानेकाक्षरः शुद्धः सोऽप्यंशः परमात्मनः ॥ प्रकृतिः पुरुषश्चैतौ लीयेते परमात्मनि ॥ २६ ॥ न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ॥ सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥ २७ ॥ इत्यादिमहापुराणे आग्नेये नित्यनैमित्तिकप्राकृतप्रलयवर्णनं नामाष्टषष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६८ ॥ अथात्यन्तिकप्रलयगर्भोत्पत्तिनिरूपणम् ॥ अग्निरुवाच ॥ आत्यन्तिकं लयं

वक्ष्ये ज्ञानादात्यन्तिको लयः ॥ आध्यात्मिकादिसन्तापं ज्ञात्वा स्वस्य विरागतः ॥ १ ॥ आध्यात्मिकस्तु सन्तापः शारीरो मानसो द्विधा ॥ शारीरो बहुभिर्भेदैस्तापोऽसौ श्रूयतां द्विज ॥ २ ॥ त्यक्त्वा जीवो भोगदेहं गर्भमाप्नोति कर्मभिः ॥ आतिवाहिकसंज्ञस्तु देहो भवति वै द्विज ॥ ३ ॥ केवलं स मनुष्याणां मृत्युकाल उपस्थिते ॥ याम्यैः पुंभिर्मनुष्याणां तच्छरीरं द्विजोत्तम ॥ ४ ॥ नीयते याम्यमार्गेण नान्येषां प्राणिनां मुने ॥ ततः स्वर्याति नरकं स भ्रमेद्वय्यन्त्रवत् ॥ ५ ॥ कर्मभूमिरियं ब्रह्मन्फलभूमिरसौ स्मृता ॥ यमो योनिश्च नरकं निरूपयति कर्मणा ॥ ६ ॥ पूरणीयाश्च तेनैव यमश्चैवानुपश्यताम् ॥ वायुभूताः प्राणिनश्च गर्भं ते प्राप्नुवन्ति हि ॥ ७ ॥ यमदूतैर्मनुष्यस्तु नीयते तञ्च पश्यति ॥ धर्मी च पूज्यते तेन पापिष्ठस्ताड्यते गृहे ॥ ८ ॥ शुभाशुभं कर्म तस्य चित्रगुप्तो निरूपयेत् ॥ बान्धवानामशौचे तु देहे खल्वातिवाहिके ॥ ९ ॥ तिष्ठन्नयाति धर्मज्ञ दत्तपिण्डाशनं ततः ॥ तं त्यक्त्वा प्रेतदेहन्तु प्राप्यान्यं प्रेतलोकतः ॥ १० ॥ वसेत्क्षुधातृषायुक्त आमश्राद्धान्नभुङ्नरः ॥ आतिवाहिकदेहा तु प्रेतपिण्डैर्विना नरः ॥ ११॥ न हि मोक्षमवाप्नोति पिण्डांस्तत्रैव सोऽश्नुते ॥ कृते सपिण्डीकरणे नरः संवत्सरात्परम् ॥ १२ ॥ प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते ॥ भोगदेहावुभौ प्रोक्तावशुभाशुभसंज्ञितौ ॥ १३ ॥ भुक्त्वा तु भोगदेहेन कर्मबन्धान्निपात्यते ॥ तं देहं पतितस्तस्माद्भक्षयन्ति निशाचराः ॥ १४ ॥ पापे तिष्ठति चेत्स्वर्गं तेन भुक्तं तदा द्विज ॥ तदा द्वितीयं गृह्णाति भोगदेहन्तु पापिनाम् ॥ १५ ॥ भुक्त्वा पापन्तु वै पश्चाद्येन भुक्तं त्रिविष्टपम् ॥ शुचीनां श्रीमतां गेहे स्वर्गभ्रष्टोऽभिजायते ॥ १६ ॥ पुण्ये तिष्ठति चेत्पापं तेन भुक्तं तदा भवेत् ॥ तस्मिन्सम्भक्षिते देहं शुभं गृह्णाति विग्रहम् ॥ १७ ॥ कर्मण्यल्पावशेषे तु नरकादपि मुच्यते ॥ मुक्तस्तु नरकाद्याति तिर्य्यग्योनिं न संशयः ॥ १८ ॥ जीवः प्रविष्टो गर्भन्तु कललेऽप्यत्र तिष्ठति ॥ घनीभूतं द्वितीये तु तृतीयेऽवयवास्ततः ॥ १९ ॥ चतुर्थेऽस्थीनि त्वङ्मांसं पञ्चमे रोमसम्भवः ॥ षष्ठे चेतोऽथ जीवस्य दुःखं विन्दति सप्तमे ॥ २० ॥ जरायुवेष्टिते देहे मूर्ध्नि बद्धाञ्जलिस्तथा ॥ मध्ये क्लीबस्तु वामे स्त्री दक्षिणे पुरुषस्थितिः ॥ २१ ॥ तिष्ठत्युदरभागे तु पृष्ठस्याभिमुखस्तथा ॥ यस्यां तिष्ठत्यसौ योनौ तां स वेत्ति न संशयः ॥ २२ ॥ सर्व च वेत्ति वृत्तान्तमारभ्य नरजन्मनः ॥ अन्धकारं च महतीं पीडां विन्दति मानवः ॥ २३ ॥ मातुराहारपीतन्तु सप्तमे मास्युपाश्नुते ॥ अष्टमे नवमे

मासि भृशमुद्विजते तथा ॥ २४ ॥ व्यवाये पीडामाप्नोति मातुर्व्यायामके तथा ॥ व्याधिश्च व्याधितायां स्यान्मुहूर्त्तं शतवर्षवत् ॥ ॥ २५ ॥ सन्तप्यते कर्मभिस्तु कुरुतेऽथ मनोरथान् ॥ गर्भाद्विनिर्गतो ब्रह्मन्मोक्षज्ञानं करिष्यति ॥ २६ ॥ सूतिवातैरधोभूतो निःसरेद्योनियन्त्रतः ॥ पीड्यमानो मासमात्रं कररुपर्शेन दुःखितः ॥ २७ ॥ स्वशब्दात्क्षुद्रस्रोतांसि देहे श्रोतं विविक्तता ॥ श्वासोच्छ्वासौ गतिर्वायोर्वक्रसंस्पर्शनं तथा ॥ २८ ॥ अग्ने रूपं दर्शनं स्यादूष्मा पक्तिश्च पित्तकम् ॥ मेधा वर्णं बलं छाया तेजः शौर्य्यं शरीरके ॥ २९ ॥ जलात्स्वेदश्च रसनं देहे वै संप्रजायते ॥ क्लेदो वसा रसा रक्तं शुक्रमूत्रकफादिकम् ॥ ३० ॥ भूमेर्घ्राणं केशनखं गौरवं स्थिरतोऽस्थितः ॥ मातृजानि मृदून्यत्र त्वङ्मांसहृदयानि च ॥ ३१ ॥ नाभिर्मज्जा शकृन्मेदःक्लेदान्यामाशयानि च ॥ पितृजानि शिरस्नायुशुक्रंचैवात्मजानि तु ॥ ३२ ॥ कामक्रोधौ भयं हर्षौ धर्माधर्मात्मना तथा ॥ आकृतिः स्वरवर्णौ तु मेहनाद्यं तथा च यत् ॥ ३३ ॥ तामसानि तथाऽज्ञानं प्रमादालस्यतृट्क्षुधाः ॥ मोहमात्सर्य्यवैगुण्यशोकायासभयानि च ॥ ३४ ॥ कामक्रोधौ तथा शौर्य्यं यज्ञेप्सा बहुभाषिता ॥ अहङ्कारः परावज्ञा राजसानि महामुने ॥ ३५ ॥ धर्मेप्सा मोक्षकाम्यित्वं परा भक्तिश्च केशवे ॥ दाक्षिण्यं व्यवसायित्वं सात्त्विकानि विनिर्दिशेत् ॥ ३६ ॥ चपलः क्रोधनो भीरुर्बहुभाषी कलिप्रियः ॥ स्वप्ने गगनगश्चैव बहुवातो नरो भवेत् ॥ ३७ ॥ अकालपलितः क्रोधी महाप्राज्ञो रणप्रियः ॥ स्वप्ने च दीप्तिमत्प्रेक्षी बहुपित्तो नरो भवेत् ॥ ३८ ॥ स्थिरमित्रः स्थिरोत्साहः स्थिराङ्गो द्रविणान्वितः ॥ स्वप्ने जलसितालोकी बहुश्लेष्मा नरो भवेत् ॥ ३९ ॥ रसस्तु प्राणिनां देहे जीवनं रुधिरं तथा ॥ लेपनं च तथा मांसमेदस्नेहकरन्तु तत् ॥ ४० ॥ धारणन्त्वस्थि मज्जा स्यात्पूरणं वीर्य्यवर्धनम् ॥ शुक्रवीर्य्यकरं ह्योजः प्राणकृज्जीवसंस्थितिः ॥ ४१ ॥ ओजः शुक्रात्सारतरमार्पीतं हृदयोपगम् ॥ षडङ्गं सक्थिनी बाहुर्मूर्धा जठरमीरितम् ॥ ४२ ॥ षट् त्वचा बाह्यतो यद्वदन्यं रुधिरधारिका ॥ विलासधारिणी चान्या चतुर्थी कुण्डधारिणी ॥ ४३ ॥ पञ्चमी विद्रधिस्थानं षष्ठी प्राणधरा मता ॥ कला सप्तमी मांसधरा द्वितीया रक्तधारिणी ॥ ४४ ॥ यकृत्प्लीहाश्रया चान्या मेदोधाराऽस्थिधारिणी ॥ मज्जाश्लेष्मपुरीषाणां धरा पक्वाशयस्थिता ॥ षष्ठी पित्तधरा शुक्रधरा शुक्राशयाऽपरा ॥ ४५ ॥ इत्यादिमहापुराणे आग्नेये आत्यन्तिकप्रलयगर्भोत्पत्तिवर्णनं नामैकोनसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३६९ ॥

अथ शरीरावयवाः ॥ अग्निरुवाच ॥ श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणं धीः खञ्च भूतगम् ॥ शब्दस्पर्शरूपरसगन्धाः स्वादिषु तद्गुणाः ॥ १ ॥ पायूपस्थौ करौ पादौ वाग्भवेत्कर्म खं तथा ॥ उत्सर्गानन्दकादानगतिवागादिकर्म तत् ॥ २ ॥ पञ्च कर्मेन्द्रियाण्यत्र पञ्च बुद्धीन्द्रियाणि च ॥ इन्द्रियार्थाश्च पञ्चैव महाभूता मनोऽधिपाः ॥ ३ ॥ आत्माऽव्यक्तश्चतुर्विंशतत्त्वानि पुरुषः परः ॥ संयुक्तश्च वियुक्तश्च यथा मत्स्योदके उभे ॥ ४ ॥ अव्यक्तमाश्रितानीह रजःसत्त्वतमांसि च ॥ आन्तरः पुरुषो जीवः स परं ब्रह्म कारणम् ॥ ५ ॥ स याति परमं स्थानं यो वेत्ति पुरुषं परम् ॥ सप्ताशयाः स्मृता देहे रुधिरस्यैक आशयः ॥ ६ ॥ श्लेष्मणश्चामपित्ताभ्यां पक्वाशयस्तु पञ्चमः ॥ वायुमूत्राशयः सप्त स्त्रीणां गर्भाशयोऽष्टमः ॥ ७ ॥ पित्तात्पक्वाशयोऽग्नेः स्याद्योनिर्विकासिता द्युतौ ॥ पद्मवद्गर्भाशयः स्यात्तत्र धत्ते सरक्तकम् ॥ ८ ॥ शुक्रं स्वशुक्रतश्चाङ्गं कुन्तलान्यत्र कालतः ॥ न्यस्तं शुक्रमतो योनौ नेति गर्भाशयं मुने ॥ ९ ॥ ऋतावपि च योनिश्चेद्वातपित्तकफावृता ॥ भवेत्तदा विकाशित्वं नैव तस्यां प्रजायते ॥ १० ॥ वृक्कात्पुक्कसकप्लीहकृतकोष्ठाङ्गदद्रुणाः ॥ तण्डकश्च महाभाग निबद्धान्याशये मतः ॥ ११ ॥ रसस्य पच्यमानस्य साराद्भवति देहिनाम् ॥ प्लीहा यकृच्च धर्मज्ञ रक्तफेनाच्च पुक्कसः ॥ १२ ॥ रक्तं पित्तञ्च भवति तथा तण्डकसंज्ञकः ॥ मेदो रक्तप्रसाराच्च वृक्कायाः सम्भवः स्मृतः ॥ १३ ॥ रक्तमांसप्रसाराच्च भवन्त्यन्त्राणि देहिनाम् ॥ सार्धत्रिव्यामसंख्यानि तानि नृणां विनिर्दिशेत् ॥ १४ ॥ त्रिव्यामानि तथा स्त्रीणां प्राहुर्वेदविदो जनाः ॥ रक्तवायुसमायोगात्कामे यस्योद्भवः स्मृतः ॥ १५ ॥ कफप्रसाराद्भवति हृदयं पद्मसन्निभम् ॥ अधोमुखं तत्सुषिरं यत्र जीवो व्यवस्थितः ॥ १६ ॥ चेतन्यानुगता भावा सर्वे तत्र व्यवस्थिताः ॥ तस्य वामे तथा प्लीहा दक्षिणे च तथा यकृत् ॥ १७ ॥ दक्षिणे च तथा क्लोम पद्मस्यैवं प्रकीर्तितम् ॥ स्रोतांसि यानि देहेऽस्मिन्कफरक्तवहानि च ॥ १८ ॥ तेषां भूतानुमानाच्च भवतीन्द्रियसम्भवः ॥ नेत्रयोर्मण्डलं शुक्लं कफाद्भवति पैतृकम् ॥ १९ ॥ कृष्णञ्च मण्डलं वातात्तथा भवति मातृकम् ॥ पित्तात्त्वङ्मण्डलं ज्ञेयं मातापितृसमुद्भवम् ॥ २० ॥ मांसासृक्कफजा जिह्वा मेदोऽसृक्कफमांसजौ ॥ वृषा (ष) णौ दशा प्राणस्य ज्ञेयान्यायतनानि तु ॥ २१ ॥ मूर्धा हृन्नाभिकण्ठाश्च जिह्वा शुक्रञ्च शोणितम् ॥ गुदं बस्तिश्च गुल्फश्च कण्डुराः षोडशेरिताः ॥ २२ ॥ द्वे करे द्वे च चरणे चतस्रः पृष्ठतो गले ॥ देहे

पादादिशीर्षान्ते जालानि चैव षोडश ॥ २३ ॥ मांसस्नायुशिरास्थिन्यः चत्वारश्च पृथक्पृथक् ॥ मणिबन्धनगुल्फेषु निबद्धानि परस्परम् ॥ २४ ॥ षट् कूर्चानि स्मृतानीह हस्तयोः पादयोः पृथक् ॥ ग्रीवायाश्च तथा मेढ्रे कथितानि मनीषिभिः ॥ २५ ॥ पृष्ठवंशस्योपगताश्चतस्रो मांसरज्जवः ॥ नवत्यश्च तथा पेश्यस्तासां बन्धनकारिकाः ॥ २६ ॥ सीवन्यश्च तथा सप्त पञ्च मूर्धानमाश्रिताः ॥ एकैका मेढ्रजिह्वास्था अस्थिषष्टिशतत्रयम् ॥ २७ ॥ सूक्ष्मैः सह चतुःषष्टिर्दशना विंशतिर्नखाः ॥ पाणिपादशलाकाश्च तासां स्थानचतुष्टयम् ॥ २८ ॥ षष्टयङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम् ॥ चत्वार्य्यरत्न्योरस्थीनि जङ्घयोस्तद्वदेव तु ॥ २९ ॥ द्वे द्वे जानुकपालोरुफलकांशसमुद्भवम् ॥ अक्षस्थानांशकश्रोणिफलके चैवमादिशेत् ॥ ३० ॥ भगे त्वेकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ॥ ग्रीवायां च तथास्थीनि जत्रुकश्च तथा हनुः ॥ ३१ ॥ तन्मूलं द्वे ललाटास्थिगण्डनासाक्ष्यवस्थिताः ॥ पर्शुकास्तालुकैः सार्द्धमर्बुदैश्च द्विसप्ततिः ॥ ३२ ॥ द्वे शङ्के कपालानि चत्वार्येव शिरस्तथा ॥ उरः सप्तदशास्थीनि सन्धीनां द्वे शते दश ॥ ३३ ॥ अष्टषष्टिस्तु शाखासु पष्टिश्चैकविवर्जिता ॥ अन्तरा वै त्र्यशीतिश्च स्नायोर्नवशतानि च ॥ ३४ ॥ त्रिंशाधिके द्वे शते तु अन्तराधौ तु सन्ततिः ॥ ऊर्ध्वगाः षट्छतान्येव शाखास्तु कथितानि तु ॥ ३५ ॥ पञ्चपेशीशतान्येव चत्वारिंशत्तथोर्ध्वगाः ॥ चतुःशतन्तु शाखासु अन्तराधौ च षष्टिका ॥ ३६ ॥ स्त्रीणां चैकाधिका वे स्याद्विंशतिश्चतुरुत्तरा ॥ स्तनयोर्दश योनौ च त्रयोदश तथाशये ॥ ३७ ॥ गर्भस्य च चतस्रः स्युः शिराणाञ्च शरीरिणम् ॥ त्रिंशच्छतसहस्राणि तथान्यानि नवैव तु ॥ ३८ ॥ षट्पञ्चाशत्सहस्राणि रसं देहे वहन्ति ताः ॥ केदार इव कुल्याश्च क्केदलेपादिकंञ्च यत् ॥ ३९ ॥ द्वासप्ततिस्तथा कोट्यो लोम्नामिह महामुने ॥ मज्जाया मेदसश्चैव वसायाश्च तथा द्विज ॥ ४० ॥ मूत्रस्य चैव पित्तस्य श्लेष्मणः शकृतस्तथा ॥ रक्तस्य सरसस्यात्र क्रमशोऽञ्जलयो मताः ॥ ४१ ॥ अर्धार्धाभ्याधिकाः सर्वाः पूर्वपूर्वाऽञ्जलेर्मताः ॥ अर्धाञ्जलिश्च शुक्रस्य तदर्धञ्च तथौजसः ॥ ४२ ॥ रजसस्तु तथा स्त्रीणाञ्चतस्रः कथिता बुधैः ॥ शरीरं मलदोषादि पिण्डं ज्ञात्वात्मनि त्यजेत् ॥ ४३ ॥ इत्यादिमहापुराणे आग्नेये शरीरावयववर्णनं नाम सप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७० ॥ अथ नरकनिरूपणम् ॥ अग्निरुवाच ॥ उक्तानि यममार्गाणि वक्ष्येऽथ मरणे नृणाम् ॥ ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥ १ ॥ शरीर-

मुपरुध्याऽथ कृत्स्नान्दोषान्रुणद्धि वै ॥ छिनत्ति प्राणस्थानानि पुनर्मर्माणि चैव हि ॥ २ ॥ शीत्यात्प्रकुपितो वायुश्छिद्रमन्विष्यते ततः ॥ द्वे नेत्रे द्वौ तथा कर्णौ द्वौ तु नासापुटौ तथा ॥ ३ ॥ ऊर्ध्वं तु सप्त छिद्राणि अष्टमं वदनं तथा ॥ एतैः प्राणो विनिर्याति प्रायशः शुभकर्मणाम् ॥ ४ ॥ अधः पायुरुपस्थश्च अनेनाशुभकारिणाम् ॥ मूर्धानं योगिनो भित्त्वा जीवो यात्यथ चेच्छया ॥ ५ ॥ अन्तकाले तु सम्प्राप्ते प्राणेऽपानमुपस्थिते ॥ तमसां संवृते ज्ञाने संवृतेषु च मर्मसु ॥ ६ ॥ स जीवो नाभ्यधिष्ठानाच्चाल्यते मातरिश्वना ॥ बाध्यमानश्चानयते अष्टाङ्गाः प्राणवृत्तिकाः ॥ ७ ॥ च्यवन्तं जायमानं वा प्रविशन्तञ्च योनिषु ॥ प्रपश्यन्ति च तं सिद्धा देवा दिव्येन चक्षुषा ॥ ८ ॥ गृह्णाति तत्क्षणाद्योगे शरीरञ्चातिवाहिकम् ॥ आकाशवायुतेजांसि विग्रहाद्ऊर्ध्वगामिनः ॥ ९ ॥ जलं मही च पञ्चत्वमापन्नः पुरुषः स्मृतः ॥ आतिवाहिकदेहन्तु यमदूता नयन्ति तम् ॥ १० ॥ याम्यं मार्गं महाघोरं षडशीतिसहस्रकम् ॥ अन्नोदकं नीयमानो बान्धवैर्दत्तमश्नुते ॥ ११ ॥ यमं दृष्ट्वा यमौकेन चित्रगुप्तेन चेरितान् ॥ प्राप्नोति नरकान्घोद्रान्धर्मी शुभपथैर्दिवम् ॥ १२ ॥ भुज्यन्ते पापिभिर्वेद्यै नरकांस्ताश्च यातनाः ॥ अष्टाविंशतिरेवाधः क्षितेर्नरककोटयः ॥ १३ ॥ सप्तमस्य तलस्यान्ते घोरे तमसि संस्थिताः ॥ घोराख्या प्रथमा कोटिः सुघोरा तदधः स्थिता ॥ १४ ॥ अतिघोरा महाघोरा घोररूपा च पञ्चमी ॥ षष्ठी तरलताराख्या सप्तमी च भयानका ॥ १५ ॥ भयोत्कटा कालरात्री महाचण्डा च चण्डया ॥ कोलाहला प्रचण्डाख्या पद्मा नरकनायिका ॥ १६ ॥ पद्मावती भीषणा च भीमा चैव करालिका ॥ विकराला महावक्त्रा त्रिकोणा पञ्चकोणिका ॥ १७ ॥ सुदीर्घा वर्तुला सप्तभूमा चैव सुभूमिका ॥ दीप्तमायाऽष्टाविंशतयः कोटयः पापिदुःखदाः ॥ १८॥ अष्टाविंशतिकोटीनां पञ्च पञ्च च नायकाः ॥ रौरवाद्याः शतञ्चैकं चत्वारिंशच्चतुष्टयम् ॥ १९ ॥ तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥ असिपत्रं वनञ्चैव लोहभारं तथैव च ॥ २० ॥ नरकं कालसूत्रञ्च महानरकमेव च॥सञ्जीवनं महावीचि तपनं सम्प्रतापनम् ॥ २१ ॥ सङ्घातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकम् ॥ लोहशङ्कुमृजीषञ्च प्रधानं शाल्मलीं नदीम् ॥ २२ ॥ नरकान्विद्धि कोटीशनागान्वै घोरदर्शनान् ॥ पात्यन्ते पापकर्म्माण एकैकस्मिन्बहुष्वपि ॥ २३ ॥ मार्जारोलूकगोमायुगृध्रादिवदनाश्च ते ॥ तैलद्रोण्यां नरं क्षिप्त्वा ज्वालयन्ति हुताशनम् ॥ २४ ॥ अम्बरीषेषु चैवान्यांस्ताम्रपात्रेषु चापरान् ॥ अयःपात्रेषु

चैवान्यान्बहुवह्निकणेषु च ॥ २५ ॥ शूलाग्रारोपिताश्चान्ये छिद्यन्ते नरकेऽपरे ॥ ताड्यन्ते च कशाभिस्तु भोज्यन्ते चाप्ययोगुडान् ॥
॥ २६ ॥ यमदूतैर्नराः पांसून्विष्ठारक्तकफादिकान् ॥ तप्तं मद्यं पाययन्ति पाटयन्ति पुनर्नरान् ॥ २७ ॥ यन्त्रेषु पीडयन्ति स्म भक्ष्यन्ते
वायसादिभिः ॥ तैलेनोष्णेन सिच्यन्ते छिद्यन्तेऽनेकधा शिरः ॥ २८ ॥ हा तातेति क्रन्दमानाः स्वकं निन्दन्ति कर्म ते ॥ महापातकजान्
घोरान्नरकान्प्राप्य गर्हितान् ॥ २९ ॥ कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥ मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ॥ ३० ॥
खरपुक्कशम्लेच्छानां मद्यपः स्वर्णहार्य्यपि ॥ कृमिकीटपतङ्गत्वं गुरुगस्तृणगुल्मताम् ॥ ३१ ॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावद-
न्तकः ॥ स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ ३२ ॥ यो येन संस्पृशत्येषां स तल्लिङ्गोऽभिजायते ॥ अन्नहर्ताऽमयावी स्यान्मूको
वागपहारकः ॥ ३३ ॥ धान्यं हृत्वाऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः ॥ तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः ॥ ३४ ॥
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च ॥ अरण्ये निर्जने देशे जायते ब्रह्मराक्षसः ॥ ३५ ॥ रत्नहारी हीनजातिर्गन्धांछुछुन्दरी शुभान् ॥
पत्रं शाकं शिखी हृत्वा मुखरा धान्यहारकः ॥ ३६ ॥ अजः पशुं पयः काको यानमुष्टः फलं कपिः ॥ मधु दंशः फलं गृध्रो गृहकाक
उपस्करम् ॥ ॥ ३७ ॥ श्वित्री वस्त्रं सारसश्च झिल्ली लवणहारकः ॥ उक्त आध्यात्मिकस्तापः शस्त्राद्यैराधिभौतिकः ॥ ३८ ॥ ग्रहाग्नि-
देवपीडाद्यैराधिदैविक ईरितः ॥ त्रिधा तापं हि संसारं ज्ञानयोगाद्विनाशयेत् ॥ कृच्छ्रैर्व्रतैश्च दानाद्यैर्विष्णुपूजादिभिर्नरः ॥ ३९ ॥ इत्यादि-
महापुराणे आग्नेये नरकनिरूपणं नामैकसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७१ ॥ अथ यमनियमाः ॥ अग्निरुवाच ॥ संसारतापमु-
क्त्यर्थं वक्ष्याम्यष्टाङ्गयोगक्रम् ॥ ब्रह्मप्रकाशकं ज्ञानं योगस्तत्रैकचित्तता ॥ १ ॥ चित्तवृत्तिनिरोधश्च जीवब्रह्मात्मनोः परः ॥ अहिंसा
सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ॥ २ ॥ यमाः पञ्च स्मृता विप्र नियमाद्भुक्तिमुक्तिदाः ॥ शौचं सन्तोषतपसी स्वाध्यायेश्वरपूजने ॥ ३ ॥
भूतापीडा ह्यहिंसा स्यादहिंसा धर्म उत्तमः ॥ यथा गजपदेऽन्यानि पदानि पथगामिनाम् ॥ ४ ॥ एवं सर्वमहिंसायां धर्मार्थमभिधीयते ॥
उद्वेगजननं हिंसा सन्तापकरणं तथा ॥५॥ रुक्कृतिः शोणितकृतिः पैशुन्यकरणं तथा ॥ हितस्यातिनिषेधश्च मर्मोद्घाटनमेव च ॥६॥ सुखाप-
ह्नुतिः संरोधो वधो दशविधा च सा ॥ यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणम् ॥७॥ सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ प्रियञ्च

नानृतं ब्रूयादेष धर्मः सनातनः ॥ ८ ॥ मैथुनस्य परित्यागो ब्रह्मचर्य्यं तदष्टधा ॥ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ ९ ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ १० ॥ ब्रह्मचर्य्यं क्रियामूलमन्यथा विफलाः
क्रियाः ॥ वसिष्ठश्चन्द्रमाः शुक्रो देवाचार्य्यः पितामहः ॥ ११ ॥ तपोवृद्धा वयोवृद्धास्तेऽपि स्त्रीभिर्विमोहिताः ॥ गौडी पैष्टी च माध्वी
च विज्ञेया त्रिविधा सुरा ॥ १२ ॥ चतुर्थी स्त्रीसुरा ज्ञेया ययेदं मोहितं जगत् ॥ माद्यति प्रमदां दृष्ट्वा सुरां पीत्वा तु माद्यति ॥ १३ ॥
यस्माद्दृष्टमदा नारी तस्मात्तां नावलोकयेत् ॥ यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ॥ १४ ॥ अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं
हविः ॥ कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ॥ १५ ॥ पादुके चापि गृह्णीयात्कुर्य्यान्नान्यस्य संग्रहम् ॥ देहस्थितिनिमित्तस्य
वस्त्रादेः स्यात्परिग्रहः ॥ १६ ॥ शरीरं धर्मसंयुक्तं रक्षणीयं प्रयत्नतः ॥ शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ॥ १७ ॥ मृज्जलाभ्यां
स्मृतं बाह्यं भावशुद्धेरथान्तरम् ॥ उभयेन शुचिर्यस्तु स शुचिर्नेतरः शुचिः ॥ १८ ॥ यथाकथञ्चित्प्राप्त्या च सन्तोषस्तुष्टिरुच्यते ॥
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं तप उच्यते ॥ १९ ॥ तज्जयः सर्वधर्मेभ्यः स धर्म पर उच्यते ॥ वाचिकं मंत्रजप्यादि मानसं रागवर्जनम् ॥ २० ॥
शारीरं देवपूजादि सर्वदन्तु त्रिधा तपः ॥ प्रणवाद्यस्ततो वेदाः प्रणवे पर्य्यवस्थिताः ॥ २१ ॥ वाङ्मयः प्रणवः सर्वं तस्मात्प्रणवमभ्य-
सेत् ॥ अकारश्च तथोकारो मकारश्चार्द्धमात्रया ॥ २२ ॥ तिस्रो मात्रास्त्रयो वेदा लोका भूरादयो गुणाः ॥ जाग्रत्स्वप्नः सुषुप्तिश्च
ब्रह्मविष्णुमहेश्वराः ॥ २३ ॥ प्रद्युम्नः श्रीवासुदेवः सर्वमोङ्कारकः क्रमात् ॥ अमात्रो नष्टमात्रश्च द्वैतस्यापगमः शिवः ॥ २४ ॥ ओङ्कारो
विदितो येन स मुनिर्नेतरो मुनिः ॥ चतुर्थीं मात्रा गान्धारी प्रयुक्ता मूर्ध्नि लक्ष्यते ॥ २५ ॥ तत्तुरीयं परं ब्रह्म ज्योतिर्दीपो घटे यथा ॥ तथा
हृत्पद्मनिलयं ध्यायेन्नित्यं जपेन्नरः ॥ २६ ॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥ अप्रमत्तन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ २७ ॥
एतदेकाक्षरं ब्रह्म एतदेकाक्षरं परम् ॥ एतदेकाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ २८ ॥ छन्दोऽस्य देवी गायत्री अन्तर्य्यामी ऋषिः
स्मृतः ॥ देवता परमात्मास्य नियोगो भुक्तिमुक्तये ॥ २९ ॥ भूरग्न्यात्मने हृदयं भुवः प्राजापत्यात्मने ॥ शिरः स्वःसूर्य्यात्मने च शिखा
कवचमुच्यते ॥ ३० ॥ ओंभूर्भुवः स्वःकवचं सत्यात्मने ततोऽस्त्रकम् ॥ विन्यस्य पूजयेद्विष्णुं जपेद्वै भुक्तिमुक्तये ॥ ३१ ॥ जुहुयाच्च तिला-

ज्यादि सर्वं सम्पद्यते नरे ॥ यस्तु द्वादशसाहस्रं जपमन्वहमाचरेत् ॥ ३२ ॥ तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥ अणिमादि
कोटिजप्याल्लक्षात्सारस्वतादिकम् ॥ ३३ ॥ वैदिकस्तान्त्रिको मिश्रो विष्णोर्वै त्रिविधो मखः ॥ त्रयाणामीप्सितेनैकविधिना
हरिमर्चयेत् ॥ ३४ ॥ प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत् ॥ स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥ ३५ ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ३६ ॥ इत्यादिमहापुराणे आग्नेये यमनि-
यमनिरूपणं नाम द्विसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७२ ॥ अथासनप्राणायामप्रत्याहाराः ॥ अग्निरुवाच ॥ आसनं कमलाद्युक्तं
तद्बद्ध्वा चिन्तयेत्परम् ॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ १ ॥ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ तत्रैकाग्रं
मनः कृत्वा यतचित्तेन्द्रियक्रियः ॥ २ ॥ उपविश्यासने युञ्ज्योद्योगमात्मविशुद्धये ॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ ३ ॥
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ पार्ष्णिभ्यां वृषणौ रक्षंस्तथा प्रजननं पुनः ॥ ४ ॥ ऊरुभ्यांमुपरि स्थाप्य बाहू तिर्य्य-
क्प्रयत्नतः ॥ दक्षिणं करपृष्ठं च न्यसेद्वामतलोपरि ॥ ५ ॥ उन्नम्य शनकैर्वक्त्रं मुखं विष्टभ्य चायतः ॥ प्राणः स्वदेहजो वायुस्तस्याः
यामो निरोधनम् ॥ ६ ॥ नासिकापुटमङ्गुल्या पीडयेव च परेण च ॥ औदरं रेचयेद्वायुं रेचनाद्रेचकः स्मृतः ॥ ७ ॥ बाह्येन वायुना
देहं द्रुतिवत्पूरयेद्यथा ॥ तथा पूर्णश्च सन्तिष्ठेत्पूरणात्पूरकः स्मृतः ॥ ८ ॥ न मुञ्चति न गृह्णाति वायुमन्तर्बहिः स्थितम् ॥ सम्पू-
र्णकुम्भवत्तिष्ठेदचलः स तु कुम्भकः ॥ ९ ॥ कन्यकः सकृदुद्घातः स वै द्वादशमात्रिकः ॥ मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रिकः ॥ १० ॥
उत्तमश्च त्रिरुद्घातः षट्त्रिंशत्तालमात्रिकः ॥ स्वेदकम्पाभिघातानां जननश्चोत्तमोत्तमः ॥ ११ ॥ अजितान्नारुहेद्धामिं हिक्काश्वासा-
दयस्तथा ॥ जिते प्राणे स्वल्पदोषविण्मूत्रादि प्रजायते ॥ १२ ॥ आरोग्यं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवम् ॥ बलवर्णप्रसादश्च
सर्वदोषक्षयः फलम् ॥ १३ ॥ जपो ध्यानं विना गर्भः संगर्भस्तद्विनिष्फलः ॥ इन्द्रियाणां जयार्थाय समर्भं धारयेत्परम् ॥ १४ ॥
ज्ञानवैराग्ययुक्ताभ्यां प्राणायामवशेन च ॥ इन्द्रियांश्च विनिर्जित्य सर्वमेव जितं भवेत् ॥ १५ ॥ इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकौ-
भौ ॥ निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥ १६ ॥ शरीरं रथमित्याहुरिन्द्रियाण्यस्य वाजिनः ॥ मनश्च सारथिः प्रोक्तः प्राणा-

यामः कशा स्मृतः ॥ १७ ॥ ज्ञानवैराग्यरश्मिभ्यां मायया विधृतं मनः ॥ शनैर्निश्चलतामेति प्राणायामैकसंहितम् ॥ १८ ॥ जल-
बिन्दुं कुशाग्रेण मासे मासे पिबेत्तु यः ॥ संवत्सरशतं साग्रं प्राणायामश्च तत्समः ॥ १९ ॥ इन्द्रियाणि प्रसक्तानि प्रविश्य विषयोदयौ ॥
आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते ॥ २० ॥ उद्धरेदात्मनात्मानं मज्जमानं यथाम्भसि ॥ भोगनद्यनिवेगेन ज्ञानवृक्षं समाश्र-
येत् ॥ २१ ॥ इत्यादिमहापुराणे आग्नेये आसनप्राणायामप्रत्याहारनिरूपणं नाम त्रिंसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७३ ॥ अथ
ध्यानम् ॥ अग्निरुवाच ॥ ध्ये चिन्तायां स्मृतो धातुर्विष्णुचिन्ता मुहुर्मुहुः ॥ अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते ॥ १ ॥ आत्मनः
समनस्कस्य मुक्ताशेषोपधस्य च ॥ ब्रह्मचिन्ता समा शक्तिर्ध्यानं नाम तदुच्यते ॥ २ ॥ ध्येयालम्बनसंस्थस्य सदृशप्रत्ययस्य च ॥
प्रत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते ॥ ३ ॥ ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ॥ ध्यानमेतत्समुद्दिष्टं प्रत्ययस्यैकभा-
वना ॥ ४ ॥ एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् ॥ कुलं स्वजनमित्राणि समुद्धृत्य हरिर्भवेत् ॥ ५ ॥ एवं मुहूर्त्तमर्धं वा ध्यायेद्यः
श्रद्धया हरिम् ॥ सोऽपि यां गतिमाप्नोति न तां सर्वैर्महामखैः ॥ ६ ॥ ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् ॥ एतच्चतुष्टयं ज्ञात्वा
योगं युञ्जीत तत्त्ववित् ॥ ७ ॥ योगाभ्यासाद्भवेन्मुक्तिरैश्वर्य्यञ्चाष्टधा महत् ॥ ज्ञानवैराग्यसम्पन्नः श्रद्दधानः क्षमान्वितः ॥८॥ विष्णुभक्तः
सदोत्साही ध्यातेत्थं पुरुषः स्मृतः ॥ मूर्तामूर्तं परं ब्रह्म हरेर्ध्यानं हि चिन्तनम् ॥९॥ सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः ॥ अणि-
मादिगुणैश्वर्य्यं मुक्तिर्ध्यानप्रयोजनम् ॥ १० ॥ फलेन योजको विष्णुरतो ध्यायेत्परेश्वरम् ॥ गच्छंस्तिष्ठन्स्वपञ्जाग्रदुन्मिषन्निमिषन्नपि ॥
॥ ११ ॥ शुचिर्वाप्यशुचिर्वापि ध्यायेत्सततमीश्वरम् ॥ स्वदेहायतनस्यान्ते मनसि स्थाप्य केशवम् ॥ १२ ॥ हृत्पद्मपीठिकामध्ये
ध्यानयोगेन पूजयेत् ॥ ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः ॥ १३ ॥ तेनेष्ट्वा मुक्तिमाप्नोति बाह्यशुद्धैश्च नाध्वरैः ॥ हिंसादो-
षविमुक्तत्वाद्विशुद्धिश्चित्तसाधनः ॥ १४ ॥ ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ॥ तस्मादशुद्धं सन्त्यज्य ह्यनित्यं बाह्यसाधनम् ॥
॥ १५ ॥ यज्ञाद्यं कर्म सन्त्यज्य योगमत्यर्थमभ्यसेत् ॥ विकारमुक्तमव्यक्तं भोग्यभोगसमन्वितम् ॥ १६ ॥ चिन्तयेद्धृदये पूर्वं क्रमा-
दादौ गुणत्रयम् ॥ तमः प्रच्छाद्य रजसा सत्त्वेन छादयेद्रजः ॥ १७ ॥ ध्यायेत्त्रिमण्डलं पूर्वं कृष्णं रक्तं सितं क्रमात् ॥ सत्त्वोपाधि-

गुणातीतः पुरुषः पञ्चविंशकः ॥ १८ ॥ ध्येयमेतदशुद्धं च त्यक्त्वा शुद्धं विचिन्तयेत् ॥ ऐश्वर्य्य पङ्कजं दिव्यं पुरुषोपरि संस्थितम् ॥ १९ ॥ द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् ॥ नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम् ॥ २० ॥ पद्मपत्राष्टकं ज्ञेयमीषमादिगुणाष्टकम् ॥ कर्णिकाकेसरं नालं ज्ञानवैराग्यमुत्तमम् ॥ २१ ॥ विष्णुधर्म्मश्च तत्कन्दामिति पद्मं विचिन्तयेत् ॥ तद्धर्मज्ञानवैराग्यं शिवैश्वर्य्यमयं परम् ॥ २२ ॥ ज्ञात्वा पद्मासनं सर्वं सर्वदुःखान्तमाप्नुयात् ॥ तत्पद्मकर्णिकामध्ये शुद्धदीपाशिखाकृतिम् ॥ २३ ॥ अङ्गुष्ठमात्रममलं ध्यायेदोङ्कारमीश्वरम् ॥ कदम्बगोलकाकारं तारं रूपमिव स्थितम् ॥ २४ ॥ ध्यायेद्वा रश्मिजालेन दीप्यमानं समन्ततः ॥ प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्वरम् ॥ २५ ॥ ध्यायेज्जपेच्च सततमोङ्कारं परमक्षरम् ॥ मनःस्थित्यर्थमिच्छन्ति स्थूलध्यानमनुक्रमात् ॥ २६ ॥ तद्भूतं निश्चलीभूतं लभेन्मूक्ष्मेऽपि संस्थितम् ॥ नाभिकन्दे स्थितं नालं दशाङ्गुलसमायतम् ॥ २७ ॥ नालेनाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥ संकर्णिके केसरालं सूर्य्यसोमाग्निमण्डलम् ॥२८॥ अग्निमण्डलमध्यस्थः शङ्खचक्रगदाधरः ॥ पद्मी चतुर्भुजो विष्णुरथ वाष्टभुजो हरिः ॥ २९ ॥ शार्ङ्गक्षेवलयधरः पाशाङ्कुशधरः परः ॥ स्वर्णवर्णः श्वेतवर्णः सश्रीवत्सः सकौस्तुभः ॥ ३० ॥ वनमाली स्वर्णहारी स्फुरन्मकरकुण्डलः ॥ रत्नोज्ज्वलकिरीटश्च पीताम्बरधरो महान् ॥ ३१ ॥ सर्वाभरणभूषाढ्यो वितस्तिर्वा यथेच्छया ॥ अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ॐ ३ ॥ ३२ ॥ ध्यानाच्छान्तो जपेन्मन्त्रं जपाच्छान्तश्च चिन्तयेत् ॥ जपध्यानादियुक्तश्च विष्णुः शीघ्रं प्रसीदति ॥ ३३ ॥ जपयज्ञस्य वै यज्ञाः कलां नार्हन्ति षोडशीम् ॥ जपिनं नोपसर्पन्ति व्याधयश्चाधयो ग्रहाः ॥ भक्तिर्मुक्तिर्मृत्युजयो जपेन प्राप्नुयात्फलम् ॥ ३४ ॥ इत्यादिमहापुराणे आग्नेये ध्याननिरूपणं नाम चतुःसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७४ ॥ अथ धारणा ॥ अग्निरुवाच ॥ धारणां मनसो ध्येये संस्थितिर्ध्यानवद्विधा ॥ मूर्त्तामूर्त्तहरिध्यानमनो धारणतो हरिः ॥ १ ॥ यद्ध्यावस्थितं लक्ष्यं तंस्मान्न चलते मनः ॥ तावत्कालं प्रदेशेषु धारणा मनसि स्थितिः ॥ २ ॥ कालावधि परिच्छिन्नं देहे संस्थापितं मनः ॥ न प्रच्यवति यल्लक्ष्याद्धारणा साभिधीयते ॥ ३ ॥ धारणा द्वादशायामा ध्यानं द्वादश धारणाः ॥ ध्यानं द्वादशकं यावत्समाधिरभिधीयते ॥ ४ ॥ धारणाभ्यासयुक्तात्मा यदि प्राणैर्विमुच्यते ॥ कुलैकविंशमुत्तार्य्य स्वर्याति परमं पदम् ॥ ५ ॥ यस्मिन्यस्मिन्भवेदङ्गे

योगिनां व्याधिसम्भवः ॥ तत्तदङ्गं विधा व्याप्तं धारयेत्तत्त्वधारणम् ॥ ६ ॥ आग्नेयी वारुणी चैव ऐशानी चामृतात्मिका ॥ साग्निः शिखा फडन्ता च विष्णोः कार्य्या द्विजोत्तम ॥ ७ ॥ नाडीभिर्विकटं दिव्यं शूलाग्रं वेधयेच्छुभम् ॥ पादाङ्गुष्ठात्कपालान्तं रश्मिमण्डलमावृतम् ॥ ८ ॥ तिर्य्यक् चाधोर्ध्वभागेभ्यः प्रयान्त्योऽतीव तेजसा ॥ चिन्तयेत्साधकेन्द्रस्तं यावत्सर्वं महामुने ॥ ९ ॥ भस्मीभूतं शरीरं स्वं ततश्चैवोपसंहरेत् ॥ शीतोष्णादयः पापं विनश्यन्ति द्विजातयः ॥ १० ॥ शिरो धीरं विचारं च कण्ठं चाधोमुखे स्मरेत् ॥ ध्यायेदच्छिन्नचित्तात्मा भूयो भूतेन चात्मना ॥ ११ ॥ स्फुरच्छीकरसंस्पर्शप्रभूते हिमगामिभिः ॥ धाराभिरखिलं विश्वमापूर्य्य भुवि चिन्तयेत् ॥ १२ ॥ ब्रह्मरन्ध्राच्च संक्षोभाद्यावदाधारमण्डलम् ॥ सुषुम्नान्तर्गतो भूत्वा संपूर्णेन्दुकृतालयम् ॥ १३ ॥ संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्त्तिना ॥ क्षुत्पिपासाक्रमप्रायसन्तापपरिपीडितः ॥ १४ ॥ धारयेद्वारुणीं मन्त्री तुष्ट्यर्थं चाप्यतन्द्रितः ॥ वारुणी धारणा प्रोक्ता ऐशानीधारणां शृणु ॥ १५ ॥ व्योम्नि ब्रह्ममये पद्मे प्राणापाने क्षयं गते ॥ प्रसादं चिन्तयेद्विष्णोर्यावच्चिन्ता क्षयं गता ॥ १६ ॥ महाभावं जपेत्सर्वं ततो व्यापक ईश्वरः ॥ अर्धेन्दुं परमं शान्तं निराभासं निरञ्जनम् ॥ १७ ॥ असत्यं सत्यमाभाति तावत्सर्वं चराचरम् ॥ यावत्स्वस्यन्दरूपन्तु न दृष्टं गुरुवक्त्रतः ॥ १८ ॥ दृष्टे तस्मिन्परे तत्त्वे आब्रह्म सचराचरम् ॥ प्रमातृमानमेयं च ध्यानहृत्पद्मकम्पनम् ॥ १९ ॥ मातृमोदकवत्सर्वं जपहोमार्चनादिकम् ॥ विष्णुमन्त्रेण वा कुर्य्यादमृतां धारणां वदे ॥ २० ॥ सम्पूर्णेन्दुनिभं ध्यायेत्कमलं तन्त्रिमुष्टिगम् ॥ शिरःस्थं चिन्तयेद्यत्नाच्छशाङ्कायुतवर्चसम् ॥ २१ ॥ सम्पूर्णमण्डलं व्योम्नि शिवकल्लोलपूर्णितम् ॥ तथा हृत्कमले ध्यायेत्तन्मध्ये स्वतनुं स्मरेत् ॥ साधको विगतक्लेशो जायते धारणादिभिः ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये धारणायोगनिरूपणं नाम पञ्चसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७५ ॥ अथ समाधिः ॥ अग्निरुवाच ॥ यदात्ममात्रं निर्भासं स्तिमितोदधिवत्स्थितम् ॥ चैतन्यरूपवद्ध्यानं तत्समाधिरिहोच्यते ॥ १ ॥ ध्यायन्मनः सन्निवेश्य यस्तिष्ठेदचलः स्थिरः ॥ निर्वातानलवद्योगी समाधिस्थः प्रकीर्त्तितः ॥ २ ॥ न शृणोति न चाघ्राति न पश्यति न रस्यति ॥ न च स्पर्शं विजानाति न सङ्कल्पयते मनः ॥ ३ ॥ न चाभिमन्यते किञ्चिन्न च बुध्यति काष्ठवत् ॥ एवमीश्वरसंलीनः समाधिस्थः स गीयते ॥ ४ ॥ यथा दीपो निवातस्थो नेङ्गते सोपम,

स्मृता ॥ ध्यायतो विष्णुमात्मानं समाधिस्तस्य योगिनः ॥ ५ ॥ उपसर्गाः प्रवर्त्तन्ते दिव्याः सिद्धिप्रसूचकाः ॥ पातितः श्रवणो धातुर्दर्शनस्वाङ्गवेदनाः ॥ ६ ॥ प्रार्थयन्ति च तं देवा भोगैर्दिव्यैश्च योगिनम् ॥ नृपाश्च पृथिवीदानैर्धनैश्च सुधनाधिपाः ॥ ७ ॥ वेदादिसर्वशास्त्रं च स्वयमेव प्रवर्त्तते ॥ अभीष्टच्छन्दोविषयं काव्यञ्चास्य प्रवर्त्तते ॥ ८ ॥ रसायनानि दिव्यानि दिव्याश्चौषधयस्तथा ॥ समस्तानि च शिल्पानि कलाः सर्वाश्च विन्दति ॥ ९ ॥ सुरेन्द्रकन्या इत्याद्या गुणाश्च प्रतिभादयः ॥ तृणवत्तान्त्यजेद्यस्तु तस्यं विष्णुः प्रसीदति ॥ ॥ १० ॥ अणिमादिगुणैश्वर्य्यः शिष्ये ज्ञानं प्रकाश्य च ॥ भुक्त्वा भोगान्यथेच्छातस्तनुं त्यक्त्वा लयात्ततः ॥ ११ ॥ विष्ठेत्स्वात्मनि विज्ञान-आनन्दे ब्रह्मणीश्वरे ॥ मलिनो हि यथादर्शः आत्मज्ञानाय न क्षमः ॥ १२ ॥ सर्वाश्रयाच्त्रिजे देहे देही विन्दति वेदनाम् ॥ योगयुक्तस्तु सर्व्वेषां योगान्नाप्नोति वेदनाम् ॥ १३ ॥ आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ॥ तथात्मैको ह्यनेकेषु जलाधारेष्विवांशुमान् ॥ १४ ॥ ब्रह्म खानिलतेजांसि जलभूक्षितिधातवः ॥ इमे लोका एष चात्मा तस्माच्च सचराचरम् ॥ १५ ॥ मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम् ॥ करोति तृणंमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १६ ॥ करणान्येवमादाय नासु तास्विह योनिषु ॥ सृजत्यात्मनमात्मैवं सम्भूय करणानि च ॥ १७ ॥ कर्मणा दोषमोहाभ्यामिच्छयैव स बध्यते ॥ ज्ञानाद्विमुच्यते जीवो धर्म्माद्योगी न रोगभाक् ॥ १८ ॥ वर्त्त्यधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ॥ विक्रियापि च दृष्टैवम् काले प्राणसंक्षयः ॥ १९ ॥ अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि ॥ सिताऽसिताः कद्रुनीलाः कपिलाः पीतलोहिताः ॥ २० ॥ ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्य्यमण्डलम् ॥ ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ २१ ॥ यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ॥ तेन देवनिकायानि धामानि प्रतिपद्यते ॥ २२ ॥ ये नेकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ॥ इह कर्मोपभोगाय तैश्च सञ्चरते हि सः ॥ २३ ॥ बुद्धीन्द्रियाणि सर्वाणि मनः कर्मेन्द्रियाणि च ॥ अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥ २४ ॥ अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ॥ ईश्वरः सर्वभूतस्य सन्नसन्सदसच्च सः ॥ २५ ॥ बुद्धेरुत्पतिरव्यक्ता ततोऽहङ्कारसम्भवः ॥ तस्मात्खादीनि जायन्ते एकोत्तरगुणानि तु ॥ २६ ॥ शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणः ॥ यो यस्मिन्नाश्रितश्चैषां स तस्मिन्नेव लीयते ॥ २७ ॥ सत्त्वं रजस्तमश्चैव गुणास्तस्यैव

कीर्त्तिताः ॥ रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते हि सः ॥ २८ ॥ अनादिरादिमान्यश्च स एव पुरुषः परः ॥ लिङ्गेन्द्रियैरुपग्राह्यः स विकार उदाहृतः ॥ २९ ॥ यतो वेदाः पुराणानि विद्योपनिषदस्तथा ॥ श्लोकाः सूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं भवेत् ॥ ३० ॥ पितृयानोपवीथ्याश्च यदगम्यस्य चान्तरम् ॥ तेन त्रिशोत्रिणो यान्ति प्रजाकामा दिवं प्रति ॥ ३१ ॥ ये च दानपराः सम्यगग्निभिश्च गुणैर्युताः ॥ अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः ॥ ३२ ॥ पुनरावर्त्तने बीजभूता धर्मप्रवर्त्तकाः ॥ सप्तर्षिनागवीथ्याश्च देवलोकं समाश्रिताः ॥ ३३ ॥ तावन्त एव मुनयः सर्वाग्म्भविवर्जिताः ॥ तपसा ब्रह्मचर्येण सङ्गत्यागेन मेधया ॥ ३४ ॥ यत्र यत्रावतिष्ठन्ते यावदाभूतसंप्लवम् ॥ वेदानुवचनं यज्ञा ब्रह्मचर्यं तपो दमः ॥ ३५ ॥ श्रद्धोपवासः सत्यन्वमात्मनो ज्ञानहेतवः ॥ सत्त्वाश्रमैर्निर्दिष्यास्यः समस्तैरेवमेव तु ॥ ३६ ॥ द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥ य एवमेनं विन्दन्ति ये चारण्यकमाश्रिताः ॥ ३७ ॥ उपासते द्विजाः सत्यं श्रद्धया परया युताः ॥ क्रमात्ते सम्भवन्त्यर्चिरहः शुक्लं तथोत्तरम् ॥ ३८ ॥ अयनं देवलोकश्च सवितारं सविद्युतम् ॥ ततस्तान्पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ॥ ३९ ॥ करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥ यज्ञेन तपसा दानैर्ये हि स्वर्गजितो जनाः ॥ ४० ॥ धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ पितृलोकं चन्द्रमसं नभो वायुं जलं महीम् ॥ ४१ ॥ क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च ॥ एतद्यो न विजानाति मार्गद्वितयमात्मनः ॥ ४२ ॥ दन्दशूकः पतङ्गो वा भवेत्कीटोऽथ वा कृमिः ॥ हृदये दीपवद्ब्रह्मध्यानाज्जीवोऽमृतो भवेत् ॥ ४३ ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ॥ श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥ ४४ ॥ इत्यादिमहापुराणे आग्नेये समाधिनिरूपणं नाम पट्सप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७६ ॥ अथ ब्रह्मविज्ञानम् ॥ अग्निरुवाच ॥ ब्रह्मज्ञानं प्रवक्ष्यामि संसाराज्ञानमुक्तये ॥ अयमात्मा परं ब्रह्म अहमस्मीति मुच्यते ॥ १ ॥ देह आत्मा न भवति दृश्यत्वाच्च घटादिवत् ॥ प्रसुप्ते मरणे देहादात्माऽन्यो ज्ञायते ध्रुवम् ॥ २ ॥ देहः स चेद्व्यवहरेदविकार्य्यादिसन्निभः ॥ चक्षुरादीनीन्द्रियाणि नात्मा वै करणं त्वतः ॥ ३ ॥ मनो धीरपि आत्मा न दीपवत्करणं त्वतः ॥ प्राणोऽप्यात्मा न भवति सुषुप्ते चित्प्रभावतः ॥ ४ ॥ जाग्रत्स्वप्ने च चैतन्यं सङ्कीर्णत्वान्न बुध्यते ॥ विज्ञानरहितः प्राणः सुषुप्ते ज्ञायते

यतः ॥ ५ ॥ अतो नात्मेन्द्रियं तस्मादिन्द्रियादिकमात्मनः ॥ अहङ्कारोऽपि नैवात्मा देहवद्व्यभिचारतः ॥ ६ ॥ उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वत्रादि स्थितः ॥ सर्वद्रष्टा च भोक्ता च नक्तमुज्ज्वलदीपवत् ॥ ७ ॥ समाध्यारम्भकाले च एवं सञ्चिन्तयेन्मुनिः ॥ यतो ब्रह्मण आकाशं खाद्वायुर्वायुतोऽनलः ॥ ८ ॥ अग्नेरापो जलात्पृथ्वी ततः सूक्ष्मं शरीरकम् ॥ अपञ्चीकृतभूतेभ्य आसन्पञ्चीकृतान्यतः ॥ ९ ॥ स्थूलं शरीरं ध्यात्वास्माल्लयं ब्रह्मणि चिन्तयेत् ॥ पञ्चीकृतानि भूतानि तत्कार्यं च विराट् स्मृतम् ॥ १० ॥ एतत्स्थूलं शरीरं हि आत्मनो ज्ञानकल्पितम् ॥ इन्द्रियैरथ विज्ञानं धीरा जागरितं विदुः ॥ ११ ॥ विश्वस्तदभिमानी स्याद्व्ययमेतदुकारकम् ॥ अपञ्चीकृतभूतानि तत्कार्यं लिङ्गमुच्यते ॥ १२ ॥ संयुक्तं सप्तदशभिर्हिरण्यगर्भसंज्ञितम् ॥ शरीरमात्मनः सूक्ष्मं लिङ्गमित्यभिधीयते ॥ १३ ॥ जाग्रत्संस्कारजः स्वप्नः प्रत्ययो विषयात्मकः ॥ आत्मा तदुपमानी स्यात्तैजसो ह्यप्रपञ्चतः ॥ १४ ॥ स्थूलसूक्ष्मशरीराख्यद्वयस्यैकं हि कारणम् ॥ आत्मा ज्ञानञ्च साभासं तदध्यात्मतमुच्यते ॥ १५ ॥ न सन्नासन्नसदसदेतन्सावयवं न तत् ॥ निर्गतावयवं नेति नाभिन्नं भिन्नमेव च ॥ १६ ॥ भिन्नाभिन्नं ह्यनिर्वाच्यं बन्धसंसारकारकम् ॥ एकं स ब्रह्मविज्ञानात्प्राप्तं नैव च कर्म्मभिः ॥ १७ ॥ सर्वात्मना हीन्द्रियाणां संहारः कारणात्मनाम् ॥ बुद्धेः स्थानं सुषुप्तं स्यात्तद्व्ययस्याभिमानवान् ॥ १८ ॥ प्राज्ञ आत्मा त्रयञ्चैतन्मकारः प्रणवः स्मृतः ॥ अकारश्च उकारोऽसौ मकारो ह्ययमेव च ॥ १९ ॥ अहं साक्षी च चिन्मात्रो जाग्रत्स्वप्नादिकस्य च ॥ नाज्ञानञ्चैव तत्कार्यं संसारादिकबन्धनम् ॥ २० ॥ नित्यशुद्धबुद्धमुक्तसत्यमानन्दमद्वयम् ॥ ब्रह्माहमस्म्यहं ब्रह्म परं ज्योतिर्विमुक्त ओम् ॥ २१ ॥ अहं ब्रह्म परं ज्ञानं समाधिर्विबन्धघातकः ॥ चिरमानन्दकं ब्रह्म सत्यं ज्ञानमनन्तकम् ॥ २२ ॥ अयमात्मा परं ब्रह्म तद्ब्रह्म त्वमसीति च ॥ गुरुणा बोधितो जीवो ह्यहं ब्रह्मास्मि वाह्यतः ॥ २३ ॥ सोऽसावादित्यपुरुषः सोसावहमखण्ड ॐ ३ ॥ मुच्यतेऽसारसंसारद्ब्रह्मज्ञो ब्रह्म तद्भवेत् ॥ २४ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मविज्ञाननिरूपणं नाम सप्तसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७७ ॥ पुनः ब्रह्मविज्ञानम् ॥ अग्निरुवाच ॥ अहं ब्रह्म परं ज्योतिः पृथिव्यवनलोज्झितम् ॥ अहं ब्रह्म परं ज्योतिर्वाय्वाकाशविवर्जितम् ॥ १ ॥ अहं ब्रह्म परं ज्योतिरादिकार्यैर्विवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्विराडात्मविवर्जितम् ॥ २ ॥ अहं ब्रह्म परं ज्योतिर्जाग्रत्स्थानविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्विश्वभाव-

त्रिवर्जितम् ॥ ३ ॥ अहं ब्रह्म परं ज्योतिरकारक्षरवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्वाक्पाण्यङ्घ्रिविवर्जितम् ॥ ४ ॥ अहं ब्रह्म परं ज्योतिः पायूपस्थविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः श्रोत्रत्वक्चक्षुरुज्झितम् ॥ ५ ॥ अहं ब्रह्म परं ज्योतिः रसरूपविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः सर्वगन्धविवर्जितम् ॥ ६ ॥ अहं ब्रह्म परं ज्योतिर्जिह्वाघ्राणविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः स्पर्शोष्णत्वविवर्जितम् ॥ ७ ॥ अहं ब्रह्म परं ज्योतिर्मनोबुद्धिविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिश्चित्ताहङ्कारवर्जितम् ॥ ८ ॥ अहं ब्रह्म परं ज्योतिः प्राणापानविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्व्यानोदानविवर्जितम् ॥ ९ ॥ अहं ब्रह्म परं ज्योतिः समानपरिवर्जितम् ॥ अहं परं ज्योतिर्जरामरणवर्जितम् ॥ १० ॥ अहं ब्रह्म परं ज्योतिः शोकमोहविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः क्षुत्पिपासाविवर्जितम् ॥ ११ ॥ अहं ब्रह्म परं ज्योतिः शब्दोद्भूतादिवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्हिरण्यगर्भवर्जितम् ॥ १२ ॥ अहं ब्रह्म परं ज्योतिः स्वप्नावस्थाविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिस्तेजसादिविवर्जितम् ॥ १३ ॥ अहं ब्रह्म परं ज्योतिरपकारादिवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः सभाज्ञानविवर्जितम् ॥ १४ ॥ अहं ब्रह्म परं ज्योतिरध्यात्मतत्त्वविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः सत्त्वादिगुणवर्जितम् ॥ १५ ॥ अहं ब्रह्म परं ज्योतिः सदसद्भाववर्जितम् ॥ अहं ब्रह्म परं ज्योतिः सर्वावयववर्जितम् ॥ १६ ॥ अहं ब्रह्म परं ज्योतिर्भेदाभेदविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः सुषुप्तिस्थानवर्जितम् ॥ १७ ॥ अहं ब्रह्म परं ज्योतिः प्राज्ञभावविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्मकारादिविवर्जितम् ॥ १८ ॥ अहं ब्रह्म परं ज्योतिर्मानमेयविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिर्मितिमातृविवर्जितम् ॥ १९ ॥ अहं ब्रह्म परं ज्योतिः साक्षित्वादिविवर्जितम् ॥ अहं ब्रह्म परं ज्योतिः कार्य्यकारणवर्जितम् ॥ ॥ २० ॥ देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् ॥ जाग्रत्स्वप्नसुषुप्त्यादिमुक्तं ब्रह्म तुरीयकम् ॥ २१ ॥ नित्यशुद्धबुद्धमुक्तं सत्यमानन्दमद्वयम् ॥ ब्रह्माहमस्म्यहं ब्रह्म सविज्ञानं विमुक्त ॐ ॥ अहं ब्रह्म परं ज्योतिः समाधिर्मोक्षदः परः ॥ २२ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मविज्ञानेऽष्टसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७८ ॥ पुनः ब्रह्मविज्ञानम् ॥ अग्निरुवाच ॥ यज्ञेश्च देवानाप्नोति वैराजं तपसा पदम् ॥ ब्रह्मणः कर्मसन्यासाद्वैराग्यात्प्रकृतो लयम् ॥ १ ॥ ज्ञानात्प्राप्नोति कैवल्यं पञ्चैता गतयः स्मृताः ॥ प्रीतितापविषादादेर्विनिवृत्तिर्विरक्तता ॥ २ ॥ संन्यासः कर्मणां त्यागः कृतानामकृतैः सह ॥ अव्यक्तादौ विशेषान्ते विकारोऽस्मिन्निवर्त्तते ॥ ३ ॥ चेतनाचेतनान्यत्व-

ज्ञानेन ज्ञानमुच्यते ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः ॥ ४ ॥ विष्णुनाम्ना च देवेषु वेदान्तेषु च गीयते ॥ यज्ञेश्वरो यज्ञपुमान्प्र-
वृत्तेरिज्यते ह्यसौ ॥ ५ ॥ निवृत्तैर्ज्ञानयोगेन ज्ञानमूर्त्तिः स चेक्ष्यते ॥ ह्रस्वदीर्घप्लुताग्रन्तु वचस्तत्पुरुषोत्तमः ॥ ६ ॥ तत्प्राप्तिहेतुर्ज्ञो-
नञ्च कर्म चोक्तं महामुने ॥ आगमोक्तं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ ७ ॥ शब्दब्रह्मागममयं परं ब्रह्म विवेकदम् ॥ द्वे ब्रह्मणी वेदि-
तव्ये ब्रह्म शब्दपरञ्च यत् ॥ ८ ॥ वेदादिविद्या ह्यपरमक्षरं ब्रह्मसत्परम् ॥ तदेतद्भगवद्वाच्यमुपचारेऽर्चनेऽन्यतः ॥ ९ ॥ सम्भर्त्तेति तथा
भर्त्ता भकारोऽर्थद्वयान्वितः ॥ नेता गमयिता स्रष्टा गकारोऽयं महामुने ॥ १० ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ॥ ज्ञानवै-
राग्ययोश्चैव षण्णां भग इतीङ्गना ॥ ११ ॥ वसन्ति विष्णोर्भूतानि स च धातुस्त्रिधात्मकः ॥ एवं हरौ हि भगवान्छब्दोऽन्यत्रोपचारतः ॥
॥ १२ ॥ उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ १३ ॥ ज्ञानशक्तिबलैश्वर्य्यवीर्य्य-
तेजांस्यशेषतः ॥ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ १४ ॥ खाण्डिक्य (क्यो) जनकायाह योगं कोशीध्वजः पुरा ॥
अनात्मन्यात्मबुद्धिर्य्या आत्मस्वमिति या मतिः ॥ १५ ॥ अविद्याभवसम्भूतिर्बीजमेतद्द्विधा स्थितम् ॥ पञ्चभूतात्मके देहे देही मोह-
तमःश्रितः ॥ १६ ॥ अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥ इत्थञ्च पुत्रपौत्रेषु तदेहोत्पातितेषु च ॥ १७ ॥ करोति पण्डितः
साम्यमनात्मनि कलेवरे ॥ सर्वदेहोपकाराय कुरुते कर्म मानवः ॥ १८ ॥ देहश्चान्यो यदा पुंसस्तदा बन्धाय तत्परम् ॥ निर्योगमय
एवायमात्मा ज्ञानमयोऽमलः ॥ १९ ॥ दुःखज्ञानमयोऽधर्मः प्रकृतेः स तु नात्मनः ॥ जलस्य नाग्निना सङ्गः स्याच्छीतत्वात्तथापि हि
॥ २० ॥ शब्दास्ते कादिका धर्मास्तत्कृता वै महामुने ॥ तथात्मा प्रकृतौ सङ्गादहंमानादिभूषितः ॥ २१ ॥ भजते प्राकृतान्यर्थानन्य-
स्तेभ्यो हि सोऽव्ययः ॥ बन्धाय विषयासङ्गं मनो निर्विषयं धिये ॥ २२ ॥ विषयात्तत्समाकृष्य ब्रह्मभूते हरौ स्मरेत् ॥ आत्मभावं
नयत्येनं तद्ब्रह्मध्यायिनं मुने ॥ २३ ॥ विचार्य्य स्वात्मनः शक्त्या लोहनाकर्षको यथा ॥ आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः
॥ २४ ॥ तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥ विनिष्पन्दः समाधिस्थः परं ब्रह्माधिगच्छति ॥ २५ ॥ यमैः सनियमैः स्थित्या
प्रत्याहृत्या मरुज्जयैः ॥ प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ॥ २६ ॥ वशीकृतेस्ततः कुर्य्यात्स्थिरं चेतः शुभाश्रये ॥ आश्रयश्चेतसो

ब्रह्म मूर्त्तञ्चामूर्त्तक द्विधा ॥ २७॥ सनन्दनादयो ब्रह्मभावभावनया युताः ॥ कर्मभावनया चान्ये देवाद्याः स्थावरान्तकाः ॥२८॥ हिरण्यगर्भादिषु च ज्ञानकर्मात्मिका द्विधा ॥ त्रिविधा भावना प्रोक्ता विश्वं ब्रह्म उपास्यते ॥२९॥ प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ॥ वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ३० ॥ तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ॥ अशक्यं प्रथमं ध्यातुमतो मूर्त्तादि चिन्तयेत् ॥ ३१ ॥ मद्भावभावमापन्नस्ततोऽसौ परमात्मना ॥ भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत् ॥ ३२ ॥ इत्यादिमहापुराणे आग्नेये ब्रह्मज्ञानवर्णनं नामैकोनाशीत्यधिकत्रिशततमोऽध्यायः ॥ ३७९ ॥ अथाद्वैतब्रह्मविज्ञानम् ॥ अग्निरुवाच ॥ अद्वैतब्रह्मविज्ञानं वक्ष्ये यद्ब्रह्मणोऽगदत् ॥ शालग्रामे तपश्चक्रे वासुदेवार्चनादिकृत् ॥१॥ मृगसङ्गान्मृगो भूत्वा ह्यन्तकाले स्मरन्मृगम् ॥ जातिस्मरो मृगस्त्यक्त्वा देहं योगात्स्वतोऽभवत् ॥ २ ॥ अद्वैतब्रह्मभूतश्च जडवल्लोकमाचरत् ॥ क्षत्ताऽसौ वीरराजस्य विष्टियोगममन्यत ॥ ३ ॥ उवाह शिविकामस्य क्षत्तुर्वचनचोदितः ॥ गृहीतो विष्टिना ज्ञानी उवाहान्मक्षयाय तम् ॥ ४ ॥ ययौ जडगतिः पश्चाद्ये त्वन्ये त्वरितं ययुः ॥ शीघ्राञ्शीघ्रंगनीन्दृष्ट्वा अशीघ्रं तं नृपोऽब्रवीत् ॥ ५ ॥ राजोवाच ॥ किं श्रान्तोऽस्यल्पमध्वानं त्वयोढा शिविका मम ॥ किमायाससहो न त्वं पीवानसि निरीक्ष्यसे ॥ ६ ॥ ब्राह्मण उवाच ॥ नाहं पीवा न वै वोढा शिविका भवतो मया ॥ न श्रान्तोऽस्मि न वायासो वोढव्योऽसि महीपते ॥ ७ ॥ भूमौ पादयुगं तस्थौ जङ्घे पादद्वये स्थिते ॥ ऊरू जङ्घाद्वयस्थौ तदाधारं तयोदरम् ॥ ८ ॥ वृक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ॥ स्कन्धस्थितेयं शिविका मम भावोऽत्र किं कृतः ॥ ९ ॥ शिविकायां स्थितञ्चेदं देहं त्वदुपलक्षितम् ॥ तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥ १० ॥ अहं त्वञ्च तथाऽन्ये च भूतैरुह्याम पार्थिव ॥ गुणप्रवाहपतितो गुणवर्गो हि यात्ययम् ॥ ११ ॥ कर्मवश्या गुणाश्चैते सत्त्वाद्याः पृथिवीपते ॥ अविद्यासञ्चितं कर्म तच्चाशेषेषु जन्तुषु ॥ १२ ॥ आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ॥ प्रकृत्यपचयो नास्य एकस्याखिलजन्तुषु ॥ १३ ॥ यदा नापचयस्तस्य यदा नापचयो नृप ॥ तदा पीवानसीति त्वं कया युक्त्या त्वयेरितम् ॥ १४ ॥ भूजङ्घापादकट्यूरुजठरादिषु संस्थिता ॥ शिविकेयं तथा स्कन्धे तदा भावः समस्त्वया ॥ १५ ॥ तदन्यजन्तुभिर्भूप शिविकोत्थानकर्मणा ॥ शैलद्रव्यगृहोत्थापि पृथिवीसम्भवापि वा ॥ १६ ॥ यथा पुंसः पृथ-

ग्भावः प्राकृतैः करणैर्नृप ॥ सोढव्यः स महाभारः कतरो नृपते मया ॥१७॥ वहव्या शिबिका चेयं तद्वव्यो भूतसंग्रहः ॥ भवतो मेऽखिल-
स्यास्य समत्वेनोपबृंहितः ॥ १८ ॥ तच्छ्रुत्वोवाच राजा तं गृहीत्वाङ्घ्री क्षमाप्य च ॥ प्रसादं कुरु त्यक्त्वेमां शिबिकां ब्रूहि शृण्वते ॥
यो भवान्यन्निमित्तं वा यदागमनकारणम् ॥ १९ ॥ ब्राह्मण उवाच ॥ श्रयतां कोहमित्येतद्वक्तुं नैव च शक्यते ॥ उपभोगनिमित्तं च
सर्वत्रागमनक्रिया ॥ २० ॥ सुखदुःखोपभोगौ तु तौ देशाद्युपपादकौ ॥ धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देशादिमृच्छति ॥ २१ ॥ राजो-
वाच ॥ योऽस्ति सोहमिति ब्रह्मन्कथं वक्तुं न शक्यते ॥ आत्मन्येष न दोषाय शब्दोहमिति यो द्विज ॥ २२ ॥ ब्राह्मण उवाच ॥
शब्दोहमिति दोषाय नात्मन्येष तथैव तत् ॥ अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥ २३ ॥ यदा समस्तदेहेषु पुमानेको
व्यवस्थितः ॥ तदा हि को भवान्कोहमित्येतद्विफलं वचः ॥ २४ ॥ त्वं राजा शिबिका चेयं वयं वाहाः पुरःसराः ॥ अयं च भवतो
लोको न सदेतन्नृपोच्यते ॥ २५ ॥ वृक्षाद्दारु ततश्चेयं शिबिका त्वदधिष्ठिता ॥ का वृक्षसंज्ञा ज्ञातास्य दारुसंज्ञाथ वा नृप ॥ २६ ॥
वृक्षारूढो महाराजो नायं वदति चेतनः ॥ न च दारूणि सर्वस्त्वां ब्रवीति शिबिकागतम् ॥ २७ ॥ शिबिकादारुसङ्घातो रचनास्थि-
तिसंस्थितः ॥ अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥ २८ ॥ पुमांस्त्री गौरयं वाजी कुञ्जरो विहगस्तरुः ॥ देहेषु लोकसंज्ञेयं
विज्ञेया कर्महेतुषु ॥ २९ ॥ जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुकं नृप ॥ एतेनाहं यतः सर्वे वाङ्निष्पादनहेतवः ॥ ३० ॥ किं हेतु-
भिर्वदन्त्येषा वागेवाहमिति स्वयम् ॥ तथापि वाङ्नाहमेतदुक्तं मिथ्या न युज्यते ॥ ३१ ॥ पिण्डः पृथग्यतः पुंसः शिरःपाण्यादि-
लक्षणः ॥ ततोऽहमिति कुत्रैतां संज्ञां राजन्करोम्यहम् ॥ ३२ ॥ यदन्योऽस्ति परः कोपि मत्तः पार्थिवसत्तम ॥ तदेषोहमयं चान्यो
वक्तुमेवमपीष्यते ॥३३॥ परमार्थभेदो न नगो न पशुर्न च पादपः ॥ शरीराच्च विभेदाच्च य एते कर्मयोनयः ॥ ३४॥ यस्तु राजेति यल्लोके
यच्च राजभटात्मकम् ॥ तच्चान्यच्च नृपेत्थन्तु न सत्सम्यगनीमयम् ॥ ३५ ॥ त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपो रिपुः ॥ पत्न्याः
पतिः पिता सूनोः कस्त्वां भूप वदाम्यहम् ॥ ३६ ॥ त्वं किमेतच्छिरः किन्न शिरस्तव तथोदरम् ॥ किमु पादादिकं त्वं वै तवैतत्किं महीं-
पते ॥ ३७ ॥ समस्तावयवेभ्यस्त्वं पृथग्भूतो व्यवस्थितः ॥ कोहमित्यत्र निपुणं भूत्वा चिन्तय पार्थिव ॥ तच्छ्रुत्वोवाच राजा तम्-

वधूतं द्विजं हरिम् ॥ ३८ ॥ राजोवाच ॥ श्रेयोऽर्थमुद्यतः प्रष्टुं कापिलर्षिमहं द्विज ॥ तस्यांशः कापिलर्षेस्त्वं मत्कृते ज्ञानदो भुवि ॥
ज्ञानवीच्युदधेर्यस्माद्यच्छ्रेयस्तच्च मे वद ॥ ३९ ॥ ब्राह्मण उवाच ॥ भूयः पृच्छसि किं श्रेयः परमार्थं न पृच्छसि ॥ श्रेयांस्यपरमार्थानि
अज्ञेषाण्येव भूपते ॥४०॥ देवताराधनं कृत्वा धनसम्पत्तिमिच्छति ॥ पुत्रानिच्छति राज्यं च श्रेयस्तस्यैव किं नृप ॥ ४१ ॥ विवेकिनस्तु
संयोगः श्रेयो यः परमात्मनः ॥ यज्ञादिका क्रिया न स्यान्नास्ति द्रव्योपपत्तिना ॥ ४२ ॥ परमार्थात्मनोर्योगः परमार्थ इतीष्यते ॥ एको
व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ॥४३॥ जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः ॥ परं ज्ञानमयोऽसङ्गी गुणजात्यादिभिर्विभुः ॥
॥४४॥ निदाघऋतुसंवादं वदामि द्विज तं शृणु ॥ ऋतुर्ब्रह्मसुतो ज्ञानी तच्छिष्योऽत्रिपुलस्त्यजः ॥४५ ॥ निदाघः प्रातिथ्योऽस्मान्नगरे
वै पुरे स्थितः ॥ देविकायास्तटे तच्च तर्कयामास वै ऋतुः ॥४६॥ दिव्ये वर्षसहस्रेऽगान्निदाघमवलोकितुम् ॥ निदाघो वैश्वदेवान्ते भुक्त्वान्नं
शिष्यमब्रवीत् ॥ भुक्तन्ते तृप्तिरुत्पन्ना तुष्टिदा साऽक्षया यतः ॥ ४७ ॥ ऋतुरुवाच ॥ क्षुदास्ति यस्य भुक्तेऽन्ने तुष्टिर्ब्राह्मण जायते ॥ न मे
क्षुद्भवतृप्तिं कस्मात्त्वं परिपृच्छसि ॥४८॥ क्षुत्तृष्णे देहधर्माख्ये न मय्येते यतो द्विज ॥ पृष्टोहं यत्त्वया ब्रूयां तृप्तिरस्त्येव मे सदा ॥ ४९॥
पुमान्सर्वगतो व्यापी आकाशवदयं यतः ॥ अतोऽहं प्रत्यगात्मास्मीत्येतदर्थं भवेत्कथम् ॥५०॥सोऽहं गन्ता न चागन्ता नैकदेशनिकेतनः॥
त्वं चान्यो न भवेन्नापि नान्यस्त्वत्तोऽस्मि वाप्यहम् ॥५१॥ मृन्मयं हि गृहं यद्वन्मृदालिप्तं स्थिरीभवेत् ॥ पार्थिवोऽयं तथा देहः पार्थिवैः
परमाणुभिः ॥ ५२ ॥ ऋतुरस्मि तवाचार्य्यः प्रज्ञादानाय ते द्विज ॥ इहागतोऽहं यास्यामि परमार्थस्तवोदितः ॥ ५३ ॥ एकमेवाभिदं
विद्धि न भेदः सकलं जगत् ॥ वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ॥ ५४ ॥ ऋतुर्वर्षसहस्रान्ते पुनस्तन्नगरं ययौ ॥ निदाघं नगर-
प्रान्ते एकान्ते स्थितमब्रवीत् ॥ एकान्ते स्थीयते कस्मान्निदाघमृतुरब्रवीत् ॥ ५५ ॥ निदाघ उवाच ॥ भो विप्र जनसंवादो महानेष
नरेश्वर ॥ प्रविविक्ष्य पुरं रम्यं तेनात्र स्थीयते मया ॥ ५६ ॥ ऋतुरुवाच ॥ नराधिपोऽत्र कतमः कतमश्चेतरो जनः ॥ कथ्यतां मे
द्विजश्रेष्ठ त्वमभिज्ञो द्विजोत्तम ॥ ५७ ॥ योऽयं गजेन्द्रमुन्मत्तमद्रिशृङ्गसमुत्थितम् ॥ अधिरूढो नरेन्द्रोऽयं परिवारस्तथेतरः ॥ ५८ ॥
गजो योऽयमधो ब्रह्मन्नुच्यतेऽसौ स भूपतिः ॥ ऋतुरुवाच गजः कोऽत्र राजा चाह निदाघकः ॥ ५९ ॥ ऋतुर्निदाघ आरूढो दृष्टान्तं पश्य

वाहनम् ॥ उपर्य्यहं यथा राजा त्वमधः कुञ्जरो यथा ॥ ६० ॥ ऋतुः प्राह निदाघं तं कतमस्त्वामहं वदे ॥ उक्तो निदाघस्तं नत्वा प्राह मे त्वं गुरुर्ध्रुवम् ॥ नान्यस्माद्वैतसंस्कारसंस्कृतं मानसं तथा ॥ ६१ ॥ ऋतुः प्राह निदाघं तं ब्रह्मज्ञानाय चागतः ॥ परमार्थं सारभूतमद्वैतं दर्शितं मया ॥ ६२ ॥ ब्राह्मण उवाच ॥ निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ॥ सर्वभूतान्यभेदेन ददृशे स तदात्मनि ॥ ॥ ६३ ॥ अवाप मुक्तिं ज्ञानात्स तथा त्वं मुक्तिमाप्स्यसि ॥ एकः सन्सर्वगं त्वञ्चाहं विष्णुः सर्वगतो यतः ॥ ६४ ॥ पीतनीलादिभेदेन यथैकं दृश्यते नभः ॥ भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥ ६५ ॥ अग्निरुवाच ॥ मुक्तिं ह्यवाप भवतो ज्ञानसारेण भूपतिः ॥ संक्षेपाज्ज्ञानबहुशास्त्रिज्ञानं ब्रह्मेति चिन्तय ॥ ६६ ॥ इत्याग्नेये महापुराणे अद्वैतब्रह्मविज्ञानं नामाशीत्यधिकद्विशततमोऽध्यायः ॥ ३८० ॥

अथ गीतासारः ॥ अग्निरुवाच ॥ गीतासारं प्रवक्ष्यामि सर्वगीतोत्तमोत्तमम् ॥ कृष्णोऽर्जुनाय यामाह पुरा वै भुक्तिमुक्तिदाम् ॥ १ ॥ श्रीभगवानुवाच ॥ गतासुरगतासुर्वा न शोच्यो देहवानजः ॥ आत्माऽजरोऽमरोऽमेद्यस्तस्माच्छोकादिकं त्यजेत् ॥ २ ॥ ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ॥ सङ्गात्कामस्ततः क्रोधः क्रोधात्सम्मोह एव च ॥ ३ ॥ सम्मोहात्स्मृतिविभ्रंशो बुद्धिनाशात्प्रणश्यति ॥ दुःसङ्गहानिः सत्सङ्गान्मोक्षकामी च कामनुत् ॥ ४ ॥ कामत्यागादात्मनिष्ठः स्थिरप्रज्ञस्तदोच्यते ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ ५ ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ ६ ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ ७ ॥ गुणा गुणेषु वर्त्तन्ते इति मत्वा न सज्जते ॥ सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति ॥ ८ ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ॥ ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ॥ ९ ॥ लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ १० ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ११ ॥ न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ १२ ॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १३ ॥ चतुर्विधा भजन्ते मां ज्ञानी चैकत्वमास्थितः ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥ १४ ॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैव-

तम् ॥ १५॥ अविद्यज्ञोऽहमेवात्र देहे देहभृतां वर ॥ अन्तकाले स्मरन्मां च मद्भावं यात्यसंशयः ॥ १६॥ यं यं भावं स्मरन्नन्ते त्यजेद्देहं तमाप्नुयात् ॥ प्राणं न्यस्य भ्रुवोर्मध्य अन्ते प्राप्नोति मत्परम् ॥ १७ ॥ ओमित्येकाक्षरं ब्रह्म वदन्देहं त्यजन् तथा ॥ ब्रह्मादिस्तम्बपर्यन्ताः सर्वे मम विभूतयः ॥ १८ ॥ श्रीमन्तश्चौजितताः सर्वे ममांशाः प्राणिनः स्मृताः ॥ अहमेको विश्वरूप इति ज्ञात्वा विमुच्यते ॥ १९ ॥ क्षेत्रं शरीरं यो वेत्ति क्षेत्रज्ञः स प्रकीर्तितः ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २० ॥ महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ॥ इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥ २१ ॥ इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥२२॥ अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥२३ ॥ इन्द्रियार्थेषु वैराग्यमनोहङ्कार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥२४॥ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ॥ नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ २५ ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ २६ ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानानुदर्शनम् ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ २७ ॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यं ज्ञात्वाऽमृतमश्नुते ॥ अनादि परमं ब्रह्म सत्त्वं नाम तदुच्यते ॥ २८ ॥ सर्वतःपाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतः श्रुतिमल्लोकी सर्वमावृत्य तिष्ठति ॥ २९ ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ ३० ॥ बहिरन्तश्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थञ्चान्तिकेऽपि यत् ॥ ३१ ॥ अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ॥ भूतभर्तृ च विज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ ३२ ॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ ३३ ॥ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ॥ अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ ३४ ॥ अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ॥ तेपि चाश्रुतरन्त्येव मृत्युं श्रुतिपरायणाः ॥ ३५ ॥ सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतो ज्ञानमेव च ॥ ३६ ॥ गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ मानावमानमित्रारितुल्यस्त्यागी स निर्गुणः ॥ ३७ ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ॥ छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ ३८ ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ॥ अहिंसादिः क्षमा चैव

देवीसम्पत्तितो नृणाम् ॥ ३९ ॥ न शौचं नापि वाचारो ह्यासुरीसम्पदोद्भवः ॥ नरकत्वात्क्रोधलोभकामस्तस्मात्त्रयं त्यजेत् ॥ ४० ॥ यज्ञस्तपस्तथा दानं सत्त्वाद्यैस्त्रिविधं स्मृतम् ॥ आयुः सत्त्वं बलारोग्यसुखायान्नं तु सात्त्विकम् ॥ ४१ ॥ दुःखशोकामयायान्नं तीक्ष्ण-रूक्षन्तु राजसम् ॥ अमेध्योच्छिष्टपूत्यन्नं तामसं नीरसादिकम् ॥ ४२ ॥ यष्टव्यो विधिना यज्ञो निष्कामाय स सात्त्विकः ॥ यज्ञः फलाय दम्भात्मा राजसस्तामसः क्रतुः ॥ ४३ ॥ श्रद्धामंत्रादिविधुक्तं तपः शारीरमुच्यते ॥ देवादिपूजाऽहिंसादि वाङ्मयं तप उच्यते ॥ ४४ ॥ अनुद्वेगकरं वाक्यं सत्यं स्वाध्यायसज्जपः ॥ मानसं चित्ततंशुद्धेर्मौनमात्मविनिग्रहः ॥ ४५ ॥ सात्त्विकञ्च तपोऽकामं फलार्थन्तु राजसम् ॥ तामसं परपीडायै सात्त्विकं दानमुच्यते ॥ ४६ ॥ देशादौ चैव दातव्यमुपकारायं राजसम् ॥ अदेशादावज्ञातं तामसं दानमीरितम् ॥ ४७ ॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥ यज्ञदानादिकं कर्म्म भुक्तिमुक्तिप्रदं नृणाम् ॥४८॥ अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम् ॥ भवत्यत्यागिनां प्रेत्य न तु सन्यासिनां क्वचित् ॥ ४९ ॥ तामसः कर्मसंयोगान्मोहात्क्लेशभयादिकात् ॥ राजसः सात्त्विकोऽकामात्पञ्चैते कर्महेतवः ॥ ५० ॥ अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम् ॥ त्रिविधाश्च पृथक्चेष्टा दैवञ्चैवात्र पञ्चमम् ॥ ५१ ॥ एकं ज्ञानं सात्त्विकं स्यात्पृथग्ज्ञानन्तु राजसम् ॥ अतत्त्वार्थं तामसं स्यात्कर्माकामाय सात्त्विकम् ॥ ॥ ५२ ॥ कामाय राजसं कर्म मोहात्कर्म तु तामसम् ॥ सिद्ध्यसिद्ध्योः समः कर्त्ता सात्त्विको राजसोऽपि ॥ ५३ ॥ शठोऽलसस्तामसः स्यात्कार्य्यादिधीश्च सात्त्विकी ॥ कार्य्यार्थं सा राजसी स्याद्विपरीता तु तामसी ॥ ५४ ॥ मनोधृतिः सात्त्विकी स्यात्प्रीतिकामेति राजसी ॥ तामसी तु प्रशोकादौ सुखं सत्त्वात्तदन्तगम् ॥ ५५ ॥ सुखं तद्राजसञ्चाग्रे अन्ते दुःखन्तु तामसम् ॥ अतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ ५६ ॥ स्वकर्मणा तमभ्यर्च्य विष्णुं सिद्धिञ्च विन्दति ॥ कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ॥ ५७ ॥ ब्रह्मादिस्तम्बपर्यन्तं जगद्विष्णुञ्च वेत्ति यः ॥ सिद्धिमाप्नोति भगवद्भक्तो भागवतो ध्रुवम् ॥ ५८ ॥ इत्याग्नेये (महा) आदिपुराणे गीतासारो नामैकाशीत्यधिकत्रिशततमोऽध्यायः ॥ ३८१ ॥ अथ यमगीता ॥ अग्निरुवाच ॥ यमगीतां प्रवक्ष्यामि उक्ता या नाचिकेतसे ॥ पठतां शृण्वतां मुक्त्यै मुक्त्ये मोक्षार्थिनां सताम् ॥ १ ॥ यम उवाच ॥ आसनं शयनं यानपरिधानगृहा-

दिकम् ॥ वाञ्छत्यहोऽतिमोहेन सुस्थिरं स्वयमस्थिरः ॥ २ ॥ भोगेष्वसक्तिः सततं तथैवात्मावलोकनम् ॥ श्रेयः परं मनुष्याणां कपिलोद्गीतमेव हि ॥ ३ ॥ सर्व्वत्र समदर्शित्वं निर्म्ममत्वमनङ्गता ॥ श्रेयः परं मनुष्याणां गीतं पञ्चशिखेन हि ॥ ४ ॥ आगर्भजन्मबाल्यादियोऽवस्थादिवेदनम् ॥ श्रेयः परं मनुष्याणां गङ्गाविष्णुप्रगीतकम् ॥ ५ ॥ आध्यात्मिकादिदुःखानामाद्यन्तादिप्रतिक्रिया ॥ श्रेयः परं मनुष्याणां जनकोद्गीतमेव च ॥ ६ ॥ अविज्ञयोर्भेदकरः प्रत्ययो यः पराहनः ॥ तच्छान्तिपरमं श्रेयो ब्रह्मोद्गीतमुदाहृतम् ॥ ७ ॥ कर्त्तव्यमिति यत्कर्म्म ऋग्यजुःसामसंज्ञितम् ॥ कुरुते श्रेयसे सङ्गं जैगीषव्येण गीयते ॥ ८ ॥ हानिः सर्व्वचिकित्सानामात्मनः सुखहेतुकी ॥ श्रेयः परं मनुष्याणां देवलोद्गीतमीरितम् ॥ ९ ॥ कामत्यागात्तु विज्ञानं सुखं ब्रह्म परं पदम् ॥ कामिनां न हि विज्ञानं सनत्कोद्गीतमेव तत् ॥ १० ॥ प्रवृत्तं च निवृत्तं च कार्य्यं कर्म्मण्यऽब्रवीत् ॥ श्रेयसां श्रेय एतद्धि नैष्कर्म्म्यं ब्रह्म तद्वरिः ॥ ११ ॥ पुमांश्चाधिगतज्ञानो भेदं नाप्नोति सत्तमः ॥ ब्रह्मणा विष्णुसंज्ञेन परमेणाव्ययेन च ॥ १२ ॥ ज्ञानं विज्ञानमास्तिक्यं सौभाग्यं रूपमुत्तमम् ॥ तपसा लभ्यते सर्व्वं मनसा यद्यदिच्छति ॥ १३ ॥ नास्ति विष्णुसमन्ध्येयं तपो नानशनात्परम् ॥ नास्त्यारोग्यसमं धन्यं नास्ति गङ्गासमा सरित् ॥ १४ ॥ न सोऽस्ति बान्धवः कश्चिद्विष्णुं मुक्त्वा जगद्गुरुम् ॥ अधश्चोर्द्धं हरिश्चाग्रे देहेन्द्रियमनोमुखे ॥ १५ ॥ इत्येवं संस्मरन्प्राणान्यस्त्यजेत्स हरिर्भवेत् ॥ यत्तद्ब्रह्म परः सर्व्वं यत्सर्व्वं तस्य संस्थितम् ॥ १६ ॥ अग्राह्यकर्मनिर्देश्यं सुप्रतिष्ठं च यत्परम् ॥ परापरस्वरूपेण विष्णुः सर्व्वहृदि स्थितः ॥ १७ ॥ यज्ञेशं यज्ञपुरुषं केचिदिच्छन्ति तत्परम् ॥ केचिद्विष्णुं हरं केचित्केचिद्ब्रह्मागमीश्वरम् ॥ १८ ॥ इन्द्रादिनामभिः केचित्सूर्य्यं सोमं च कालकम् ॥ ब्रह्मादिस्तम्बपर्य्यन्तं जगद्विष्णुं वदन्ति च ॥ १९ ॥ स विष्णुः परमं ब्रह्म यतो नावर्त्तते पुनः ॥ सुवर्णादिमहादानपुण्यतीर्थावगाहनैः ॥ २० ॥ ध्यानैर्व्रतैः पूजया च धर्म्मश्रुत्या तदाप्नुयात् ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥ २१ ॥ बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विषयांश्चैषु गोचरान् ॥ २२ ॥ आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ यस्त्वविज्ञानवान्भवत्यपुनर्म्मनसा सदा ॥ २३ ॥ न सत्पदमवाप्नोति संसारञ्चाधिगच्छति ॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा ॥ २४ ॥ स तत्पदमवाप्नोति

यस्माद्भूयो न जायते ॥ विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ॥ २५ ॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इन्द्रियेभ्यः
परा ह्यर्था अर्थेभ्यश्च परं मनः ॥ २६ ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ २७ ॥
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ॥२८॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मद-
र्शिभिः ॥ यच्छेद्वाङ्मनसे प्राज्ञस्तद्यच्छेज्ज्ञानमात्मनि ॥ २९ ॥ ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनि ॥ ज्ञात्वा ब्रह्मात्मनो-
र्योगं यमाद्यैर्ब्रह्म सद्भवेत् ॥ ३० ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ यमाश्च नियमाः पञ्च शौचं सन्तोषसत्तपः ॥ ३१ ॥ स्वाध्या-
येश्वरपूजा च आसनं पद्मकादिकम् ॥ प्राणायामो वायुजयः प्रत्याहारः स्वनिग्रहः ॥ ३२ ॥ शुभे ह्येकत्र विषये चेतसो यत्प्रधारणम् ॥
निश्चलत्वात्तु धीमद्भिर्धारणा द्विज कथ्यते ॥ ३३ ॥ पौनःपुन्येन तत्रैव विषयेष्वेव धारणा ॥ ध्यानं स्मृतं समाधिस्तु अहं ब्रह्मात्मसं-
स्थितिः ॥ ३४ ॥ घटध्वंसाद्यथाकाशमभिन्नं नभसा भवेत् ॥ मुक्तो जीवो ब्रह्मणैवं सद्ब्रह्म ब्रह्म वै भवेत् ॥ ३५ ॥ आत्मानं मन्यते ब्रह्म
जीवो ज्ञानेन नान्यथा ॥ जीवो ह्यज्ञानतः कार्य्यमुक्तः स्यादजरामरः ॥ ३६ ॥ अग्निरुवाच ॥ वशिष्ट यमगीतोक्ता पठतां भुक्तिमुक्तिदा ॥
आत्यन्तिको लयः प्रोक्तो वेदान्तब्रह्मवीमयः ॥ ३७ ॥ इत्यादिमहापुराणे आग्नेये यमगीता नाम द्व्यशीत्यधिकत्रिशततमोऽध्यायः ॥
॥ ३८२ ॥ अथाग्नेयपुराणमाहात्म्यम् ॥ अग्निरुवाच ॥ आग्नेयं ब्रह्मकल्पन्ते पुराणं कथितं मया ॥ सप्रपञ्चं निष्प्रपञ्चं विद्योद्वयवयं
महत् ॥ १ ॥ ऋग्यजुःसामाथर्वाख्या विद्या विष्णुर्जगन्मयिः ॥ छन्दःशिक्षाव्याकरणनिघण्टुज्योतिराख्यकाः ॥ २ ॥
निरुक्तधर्मशास्त्रादिमीमांसान्याय विस्तराः ॥ आयुर्वेदपुराणाख्या धनुर्गन्धर्वविस्तराः ॥ ३ ॥ विद्या सेवार्थशास्त्राख्या वेदान्ताऽन्या हरि-
र्महान् ॥ इत्येषा चापरा विद्या परविद्याऽक्षरं परम् ॥ ४ ॥ यस्य भावोऽखिलं विष्णुस्तस्य नो बाधते कलिः ॥ अनिङ्वा तु महाब्रह्म-
नकृत्वापि पितृस्वधाम् ॥५॥ कृष्णमभ्यर्चयन्भक्त्या नैनसो भाजनं भवेत् ॥ सर्वकारणमत्यन्तं विष्णुं ध्यायन्न सीदति ॥६॥ अन्यतन्त्रा-
दिदोषोत्थो विषयाकृष्टमानसः ॥ कृत्वापि पापं गोविन्दं ध्यायन्पापैः प्रमुच्यते ॥ ७ ॥ तद्ध्यानं यत्र गोविन्दः सा कथा यत्र केशवः ॥
तत्कर्म यत्तदर्थायं किमन्यैर्बहुभाषितैः ॥ ८ ॥ न तापिता तु पुत्राय न शिष्याय गुरुर्द्विज ॥ परमार्थं परं ब्रूयाद्यदेतत्ते मयोदितम् ॥९॥

संसारे भ्रमता लभ्यं पुत्रदारधनं वसु ॥ सुहृदश्च तथैवान्ये नोपदेशो द्विजेदृशः ॥ १० ॥ किं पुत्रदारैर्मित्रैर्वा किं मित्रैस्त्रबान्धवैः ॥ उपदेशः परो बन्धुरीदृशो यो विमुक्तये ॥ ११ ॥ द्विविधो भूतमार्गोयं देव आसुर एव च ॥ विष्णुभक्तिपरो देवो विपरीतस्तथासुरः ॥ १२ ॥ एतत्पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनम् ॥ सुखप्रीतिकरं नृणां मोक्षदृष्यत्तवेरितम् ॥ १३ ॥ येषां गृहे लिखितमाग्नेयं हि पुराणकम् ॥ पुस्तकं स्थास्यति सदा तत्र नेऽसुरुपद्रवाः ॥ १४ ॥ किं तीर्थैर्गो दानैर्वा किं यज्ञैः किमुपोषितैः ॥ आग्नेयं ये हि शृण्वन्ति अहन्यहनि मानवाः ॥ १५ ॥ यो ददाति तिलप्रस्थं सुवर्णस्य च माषकम् ॥ शृणोति श्लोकमेकं च आग्नेयस्य तदाप्नुयात् ॥ १६ ॥ अध्यायपठनञ्चास्य गोप्रदानाद्विशिष्यते ॥ अहोरात्रकृतं पापं श्रोतुमिच्छोः प्रणश्यति ॥ १७ ॥ कपिलानां शते दत्ते यद्भवेज्ज्येष्ठपुष्करे ॥ तदाग्नेयं पुराणं हि पठित्वा फलमाप्नुयात् ॥ १८ ॥ प्रवृत्तं च निवृत्तं च धर्मं विद्याद्द्वयात्मकम् ॥ आग्नेयस्य पुराणस्यास्य शास्त्रस्य समं न हि ॥ १९ ॥ पठन्नाग्नेयकं नित्यं शृण्वन्वापि पुराणकम् ॥ भक्तो वसिष्ठ मनुजः सर्वपापैः प्रमुच्यते ॥ २० ॥ नोपसर्गा न चानर्था न चौरारिभयं गृहे ॥ तस्मिन्स्याद्यत्र चाग्नेयपुराणस्य हि पुस्तकम् ॥ २१ ॥ न गर्भहारिणी भीतिर्न च बालग्रहा गृहे ॥ यत्राग्नेयं पुराणं स्यान्न पिशाचादिकं भयम् ॥ २२ ॥ शृण्वन्विप्रो वेदवित्स्यात्क्षत्रियः पृथिवीपतिः ॥ ऋद्धिं प्राप्नोति वैश्यश्च शूद्रश्चारोग्यमृच्छति ॥ २३ ॥ यः पठेच्छृणुयान्नित्यं समदग्विष्णुमानसः ॥ ब्रह्माग्नेयं पुराणं सत्तत्र नश्यन्त्युपद्रवाः ॥ २४ ॥ दिव्यान्तरिक्षभौमाद्या दुःस्वप्नाद्याभिचारकाः ॥ यच्चान्यदुरितं किञ्चित्तत्सर्वं हन्ति केशवः ॥ २५ ॥ पठतः शृण्वतः पुंसः पुस्तकं यजतो महत् ॥ आग्नेयं श्रीपुराणं हि हेमन्ते यः शृणोति वै ॥ २६ ॥ प्रपूज्य गन्धपुष्पाद्यैरग्निष्टोमफलं लभेत् ॥ शिशिरे पुण्डरीकस्य वसन्ते चाश्वमेधजम् ॥ २७ ॥ ग्रीष्मे तु वाजपेयस्य राजसूयस्य वर्षति ॥ गोसहस्रस्य शरदि फलं तत्पठतो वृतौ ॥ २८ ॥ आग्नेयं पुराणं यो भक्त्याग्ने च पठेद्धरेः ॥ सोऽर्चयेच्च वसिष्ठेह ज्ञानयज्ञेन केशवम् ॥ २९ ॥ यस्याग्नेयपुराणस्य पुस्तकं तस्य वै जयः ॥ लिखितं पूजितं गेहे भुक्तिर्मुक्तिः करेऽस्ति हि ॥ ३० ॥ इति कालाग्निरूपेण गीतं मे हरिणा पुरा ॥ आग्नेयं हि पुराणं वै ब्रह्मविद्याद्वयात्मकम् ॥ विद्याद्वयं वसिष्ठेदं मनुष्येभ्यः कथयिष्यति ॥ ३१ ॥ वसिष्ठ उवाच ॥ व्यासाग्नेयपुराणं

ते रूपं विद्याद्व्यात्मकम् ॥ कथितं ब्रह्मणा विष्णोरग्निना कथितं यथा ॥ ३२ ॥ सार्द्धं देवेश्च मुनिभिर्मह्यं सर्व्वार्थदर्शकम् ॥ पुराणमग्निना गीतमाग्नेयं ब्रह्मसम्मितम् ॥ ३३ ॥ यः पठेच्छृणुयाद्व्यास लिखेद्वा लेखयेदपि ॥ श्रावयेत्पाठयेद्वापि पूजयेद्वारयेदपि ॥ ३४ ॥ सर्व्वपापविनिर्मुक्तः प्राप्तकामो दिवं व्रजेत् ॥ लेखयित्वा पुराणं यो दद्याद्विप्रेभ्य उत्तमम् ॥ ३५ ॥ स ब्रह्मलोकमाप्नोति कुलानां शतमुद्धरेत् ॥ एकं श्लोकं पठेद्यस्तु पापपङ्काद्विमुच्यते ॥ ३६ ॥ तस्माद्व्यास सदा श्राव्यं शिष्येभ्यः सर्व्वदर्शनम् ॥ शुकाद्यैर्मुनिभिः सार्द्धं श्रोतुकामैः पुराणकम् ॥ ३७ ॥ आग्नेयं पठितं ध्यातं शुभं स्याद्भुक्तिमुक्तिदम् ॥ अग्नये तु नमस्तस्मै येन गीतं पुराणकम् ॥ ३८ ॥ व्यास उवाच ॥ वसिष्ठेन पुरा गीतं सूतैतत्ते मयोदितम् ॥ पराविद्याऽपराविद्यास्वरूपं परमं पदम् ॥ ३९ ॥ आग्नेयं दुर्लभं रूपं प्राप्यते भाग्यसंयुतैः ॥ ध्यायन्तो ब्रह्म चाग्नेयं पुराणं हरिमागताः ॥ ४० ॥ विद्यार्थिनस्तथा विद्यां राज्यं राज्यार्थिनो गताः ॥ अपुत्राः पुत्रिणः सन्ति नाश्रया आश्रयं गताः ॥४१ ॥ सौभाग्यार्थी च सौभाग्यं मोक्षं मोक्षार्थिनो गताः ॥ लिखन्तो लेखयन्तश्च निष्पापाश्च श्रियं गताः ॥ ४२ ॥ शुकपैलमुखैः सूत आग्नेयन्तु पुराणकम् ॥ रूपं चिन्तय यातासि भुक्तिं मुक्तिं न संशयः ॥ ४३ ॥ श्रावय त्वञ्च शिष्येभ्यो भक्तेभ्यश्च पुराणकम् ॥ सूत उवाच ॥ व्यासप्रसादादाग्नेयं पुराणं श्रुतमादरात् ॥ ४४ ॥ आग्नेयं ब्रह्मरूपं हि मुनयः शौनकादयः ॥ भवन्तो नैमिषारण्ये यजन्तो हरिमीश्वरम् ॥ ४५ ॥ तिष्ठन्तः श्रद्धया युक्तास्तस्माद्वः समुदीरितम् ॥ अग्निना प्रोक्तमाग्नेयं पुराणं वेदसम्मितम् ॥ ४६ ॥ ब्रह्मविद्याद्व्योपेतं भुक्तिदं मुक्तिदं महत् ॥ नास्मात्परतरःसारो नास्मात्परतरः सुहृत् ॥४७॥ नास्मात्परतरो ग्रन्थो नास्मात्परतरं गतिः ॥ नास्मात्परतरं शास्त्रं नास्मात्परतरा श्रुतिः ॥४८॥ नास्मात्परतरं ज्ञानं नास्मात्परतरा स्मृतिः ॥ नास्मात्परो ह्यागमोऽस्ति नास्मद्विद्या परोऽस्ति हि ॥ ४९ ॥ नास्मात्परः स्यात्सिद्धान्तो नास्मात्परममङ्गलम् ॥ नास्मोत्परोऽस्ति वेदान्तः पुराणं परमन्त्विदम् ॥ ५० ॥ नास्मात्परतरं भूमौ विद्यते वस्तु दुर्लभम् ॥ आग्नेये हि पुराणेऽस्मिन्सर्व्वविद्याः प्रदर्शिताः ॥ ५१ ॥ सर्वे मत्स्यावताराद्या गीता रामायणन्त्विदं ॥ हरिवंशो भारतञ्च नव सर्गाः प्रदर्शिताः ॥ ५२ ॥ आगमो वैष्णवो गीतः पूजा दीक्षा प्रतिष्ठया ॥ पवित्रारोहणादीनि प्रतिमालक्षणानि च

कम् ॥५३॥ प्रासादलक्षणाद्यञ्च मन्त्रा वै भुक्तिमुक्तिदाः ॥ शैवागमस्तदर्चाञ्च शाक्तेयः सौर एव च ॥५४॥ मण्डलानि च वास्तुञ्च मन्त्राणि विविधानि च ॥ ज्योतिर्गणाश्च गीतो ब्रह्माण्डपरिमण्डलम् ॥ ५५ ॥ गीतो भुवनकोशश्च द्वीपवर्षादिनिम्नगाः ॥ गयागङ्गाप्रयागादितीर्थमाहात्म्यमीरितम् ॥५६॥ ज्योतिश्चक्रं ज्योतिषादि गीतो युगजयार्गवः ॥ मन्वन्तरादयो गीताः धर्मो वर्णादिकस्य च ॥५७॥ अशौचं द्रव्यशुद्धिश्च प्रायश्चित्तं प्रदर्शितम् ॥ राजधर्मो दानधर्मो व्रतानि विविधानि च ॥५८॥ व्यवहाराः शान्तयश्च ऋग्वेदादिविधानकम् ॥ सूर्यवंशः सोमवंशो धनुर्वेदश्च वैद्यकम् ॥ ५९ ॥ गान्धर्ववेदोऽर्थशास्त्रं बीजं ज्यायविस्तरः ॥ पुराणसंख्यामाहात्म्यं छन्दो व्याकरणं स्मृतम् ॥६०॥ अलङ्कारो निरुक्तञ्च शिक्षा कल्प इहोदितः ॥ नैमित्तिकः प्राकृतिको लय आत्यन्तिकः स्मृतः ॥ ६१॥ वेदान्तं ब्रह्मविज्ञानं योगो ह्यष्टाङ्ग ईरितः ॥ स्तोत्रं पुराणमाहात्म्यं विद्या ह्यष्टादश स्मृताः ॥६२॥ ऋग्वेदाद्याः परा ह्यत्र परा विद्याक्षरं परम् ॥ सुप्रपञ्चं निष्प्रपञ्चं ब्रह्मणो रूपमीरितम् ॥६३॥ इदं पञ्चदशसाहस्रं शतकोटिविस्तरम् ॥ देवलोके देवनैश्च पुराणं पठ्यते सदा ॥६४॥ लोकानां हितकामेन संक्षिप्योद्धृतमग्निना ॥ सर्वं ब्रह्मेति जानीयं मुनयः शौनकादयः ॥ ६५ ॥ शृणुयाच्छ्रावयेद्वापि यः पठेत्पाठयेदपि ॥ लिखेल्लेखापयेद्वापि पूजयेत्कीर्तयेदपि ॥६६॥ पुराणपाठकं चैव पूजयेत्प्रयतो नृपः ॥ गोभूहिरण्यहस्त्यश्वैर्वस्त्रालङ्कारतर्पणैः ॥ ६७॥ तं संपूज्य लभेच्चैव पुराणश्रवणात्फलम् ॥ पुराणान्ते च वै कुर्यादाश्वं द्विजभोजनम् ॥ ६८ ॥ निर्मलः प्राप्तसर्वार्थः सकुलः स्वर्गमाप्नुयात् ॥ शृण्वन्वै पुस्तकाग्रे सूर्ये वै पर्वसञ्चये ॥ ६९ ॥ पट्टिकायां चित्रादि दद्याद्यः स्वर्गमाप्नुयात् ॥ यो दद्याद्ब्रह्मलोकी स्यात्पुस्तकं यस्य वै गृहे ॥ ७० ॥ तस्योत्पातभयं नास्ति मुक्तिमुक्तिमवाप्नुयात् ॥ यूयं स्मरत चाग्नेयं पुराणं रूपमैश्वरम् ॥ सूतो गतः पूजितस्तैः शौनकाद्या हरिं ययुः ॥७१॥ ॐ इत्याग्नेये आदि (महा) पुराणे आग्नेयपुराणमाहात्म्यं नाम त्र्यशीत्यधिकत्रिशततमोऽध्यायः ॥३८३॥

ॐ तत्सत् ॥ श्रीवासुदेवार्पणमस्तु ॥ (ग्रन्थसंख्या १५०००) ॥

समाप्तं चेदमाग्नेयमहापुराणम् ।

इदं श्रीमदाग्नेयमहापुराणं कल्याणनगर्यां श्रीकृष्ण-
दासात्मज—गङ्गाविष्णोः अध्यक्ष "लक्ष्मीवेङ्क-
टेश्वर" मुद्रणालये पं० शिवदुलारे वाजपे-
यीत्यनेन स्वाम्यर्थं मुद्रयित्वा प्रकाशितम्।

शकाब्दाः १८४२, संवत् १९७७.

पुस्तक मिलनेका ठिकाना—गङ्गाविष्णु श्रीकृष्णदास,
लक्ष्मीवेंकटेश्वर छापाखाना, कल्याण—मुंबई.

विक्रेय ग्रन्थोंकी संक्षिप्त सूची—(पुराण-इतिहासग्रन्थाः)

नाम.	कि. रु. आ.
विष्णुपुराण विष्णुचित्तीय तथा—श्रीधरी टीकासहित	६—०
कल्किपुराण भाषाटीका समेत	२—०
पद्मपुराण—सम्पूर्ण ५५०००० ग्रंथ बहुतपुस्तकोंके द्वारा शुद्ध होकर छपा-तयार है	१६—०
हरिवंशपुराण सटीक	७—०
तथा भाषाटीका समेत	१०—०
तथा केवल भाषावार्तिक जिल्दबँधा	५—०
श्रीवाल्मीकीयरामायण—संस्कृत मूल और अत्युत्तम भा. टी. माहात्म्य और अनुक्रमणिका सहित मोटा कागज सुंदर अ.	२१—०
वाल्मीकीयरामायण केवलभाषा दो जिल्दोंमें	१०—०
श्रीवाल्मीकीयरामायण सुंदरकांड मूल बडा	२०—

नाम.	कि. रु. आ.
अध्यात्मरामायणसटीक चिकना कागज	३—०
तथा रफू कागज	२—८
अध्यात्मरामायण भाषाटीकासहित	४—०
अध्यात्मरामायण मूल (गुटका) पाठ करनेको अत्युत्तम है	१—०
अध्यात्मरामायण—केवलभाषा सुन्दर जिल्दबँधी	२—०
श्रीमद्भागवत श्रीधरीटीका और टिप्पणी सहं ग्लेज का. १०रु. रफू	९—०
श्रीमद्भागवतचूर्णिका मोटेअक्षर उत्तम कागजकी (सप्ताह-वाँचनेमें परमोपयोगी)	८—०
श्रीमद्भागवत भाषाटीका माहात्म्य और शंका समाधान सह अत्युत्तम जिसमें कथाके सिवाय ५०० दृष्टांत हैं	१२—०
श्रीमद्भागवत—सुबोधिनीटीका समेत पढनेवालों वे सप्ताह वाँचने-वालोंको परमोपयोगी है	१२—०

पुस्तकें मिलनेका ठिकाना—गङ्गाविष्णु श्रीकृष्णदास,
लक्ष्मीवेंकटेश्वर छापाखाना, कल्याण—मुंबई.

ASIATIC SOCIETY OF BENGAL
LIBRARY

ग्रन्थ परिचय

Granth Parichaya